Śri Nārāyaṇa Paṇḍitācārya's

ŚRĪ-MADHVA-VIJAYA
BHĀVA-PRAKĀŚIKĀ
PRAMEYA-NAVA-MĀLIKĀ

(With Padārtha-Dīpikā of Sri Vedāñgatīrtha,
Sourabha-Prakāśikā of Sri Raghuvaryatīrtha and
Tatva-Candrikā and Sambandha-Dīpikā
of Bannanje Govindācārya)

Editor:
Bannanje Govindācārya

Īśāvāsya-Pratiṣṭhānam
Udupi-Bangalore

2003

ŚRĪ-MADHVA-VIJAYA, BHĀVA-PRAKĀŚIKĀ and PRAMEYA-NAVA-MĀLIKĀ [With the Commentaries of Śri Vedāñgatīrtha, Sri Raghuvaryatīrtha and Bannanje Govindācārya] Edited by Vidyāvācāspati, Vidyāratnākara Bannanje Govindācārya.

Published by : Īśāvāsya Pratiṣṭhānam, Udupi-Bangalore
Regd. office : Īśāvāsyam, Ambalapadi, Udupi- 576 103
Admn. office : #104/1, 3rd Floor, Swastik complex,
Sheshadri-puram, Bangalore -560 020

© Editor

First Edition : 2003 Feb. [600 copies]
Second Edition : 2003 Aug. [400 copies]

Pages : 52+1056

Price : [In India] Rs. 500-00
[Outside India] $50

Cover illustration
& sketches : Ganjeefa Raghupati Bhat

Cover lay-out
& bandhas : K.M. Sheshagiri

Typeset : Kaddi Badari Narayana Achar,
Poornaprajna Vidya Peetha,
Bangalore-28

Printed at : Rajaprakash Prints,
187/ 2, 2nd Main Road,Chamarajpet,
Near Rayan Circle, Bangalore -560 018
(Tel. 6521515)

Sole
distributors : Bannanje Associates
Īśāvāsyam, Ambalapadi, Udupi- 576 103
Tel.(0820)2525396 / 2521047

श्रीनारायणपण्डिताचार्यविरचितः

श्रीमध्वविजयः

स्वकृता भावप्रकाशिका, प्रमेयनवमालिका च,
श्रीवेदाङ्गतीर्थकृता पदार्थदीपिका, श्रीरघुवर्यतीर्थकृता
सौरभप्रकाशिका, आचार्यगोविन्दकृता तत्वचन्द्रिका,
मध्वविजय-प्रमेयनवमालिका-सम्बन्धदीपिका च ।

*

सम्पादकः
बन्नञ्जेपदोपाह्व आचार्यगोविन्दः

*

ईशावास्य-प्रतिष्ठानम्
उडुपि-बेङ्गळूरु
२००३

भवतरणं तव चरणं हृदयाभरणं हरे सतां भरणम् ।
विशतु ममान्तःकरणं शरणं जगतो रमावरणम् ॥

पातु हैयङ्गवीनस्य हर्त्री सकलपालनी ।
नीलनीरदनीकाशा कैशोरी काऽपि सा कृपा ॥



सुरवृन्दवन्दितपदं श्रितविष्णुपदं गतापदं शुभदम् ।
वन्दामहे महेक्षं नन्दितसुजनं सुनन्दितीर्थमुनिम् ॥

यत् पपाथ भगवद्गुणपाथो यज्जगन्थ भवसागरपारम् ।
यत् सतामुवचिथ प्रियतत्वं तेन मध्व सुहृदध्वनि भूयाः ॥

किञ्चित् प्राथमिकं वचः

आचार्यमध्वस्य विजयगाथेयं श्रीमध्वविजयो नाम । मध्वस्य विजयमधिकृत्य कृतो ग्रन्थ इति । मध्वविजयमिति वा । मध्वस्य विजयमागूर्य कृतं काव्यमिति ।

विजयो हि नाम द्विधा भवति आवर्जनेन च सन्तर्जनेन च । सुहृदोऽपि विजयते । दुर्हृदोऽपि विजयते । ये भूतसर्गे दैवास्तानपि । य आसुरास्तानपि ।

सुहृदः सात्विकान् तत्ववादेन प्रबोध्य प्रीत्या विजिग्ये, वनस्पतीनिव चन्द्रिकया चन्द्रमाः । दुर्हृदः पुनस्तामसान् प्रतिभाप्राभवेण विद्राव्य पराजिग्ये, तरणिरिव तमांसि प्रखरप्रभाप्रसरेण ।

अत एव हि मध्वः । सतां मधु गमयतीति, असतां मधु नाशयतीति । तद् यथा केशिनं हतवानिति केशवो भवति । तथा मध्वोऽपि भवत्यसतां मधु हतवानिति । अस्ति हि वधधातुरपि । ननु न पठितः? मा पाठि । नह्यस्ति नियमः– योयोऽस्ति सस पठित इति । किन्तु योयः पठितः ससोऽस्तीत्येव ।

अपिचापर्याप्तं पठनं भवति । पाणिनिनाऽपठितान् चन्द्रादयः पठन्ति । तैरप्यपठितान् काशकृत्स्नः पपाठ । अयोगव्यवच्छेदो हि पाठो नाम । 'वर्धते हि धातुगणः' इति वैयाकरणस्यैव व्याहरणम् । पठितश्च मुखतः सूत्रे 'जनिवध्योश्च'[७.३.३५] इति । प्रयुञ्जते च– 'भक्षकश्चेन्न विद्येत वधकोऽपि न विद्यते' इति ।

तथाच तस्येदं मध्वस्य चरितं भवति। भवति माध्वस्य विजयस्य च परिपन्थिनां परिभवस्य च । तदियमाख्यायिका मध्वसमकालभवेन लिकुचकुलसम्भवेन हृदयालुना सज्जनदयालुना मध्वचरितानुवादलोलेन श्रीलेन नारायणपण्डितेन प्राणीयत सन्तो हर्षमाणा भवेयुरिति । तदिदं महापुरुषकथानकस्य यथातथं प्रकथनमिदमुपक्रममुट्टङ्कितं नारायणपण्डितेन ।

अस्यानुशीलनेन चैतदवसीयते– यदयं प्रबन्धा प्रगल्भो विविधकाव्यप्रकारेषु, कुशलो निखिलशास्त्रप्रकरेषु, निष्णातः साङ्गतरङ्गनिगमागमपारावारेषु, कलितमनीषः सकलासु ललितकलासु, अलङ्कर्मीणोऽनल्पेषु कल्पकलापेषु, परिणतप्रज्ञः सर्वदर्शनप्रभेदेषु, बद्धादरश्च तत्ववादेषु, श्रद्धेयवचनश्च पुरावृत्तेष्विति ।

दृष्ट्वा चेममुपक्रमं परेऽपि पराक्रममाणा ईर्ष्ययेव स्पर्धयेव विकृतमन्वकुर्वन् । तेन हि नैके शङ्करविजयाः प्राणीयन्त। नैकोऽप्यपरसंवादी। प्रायस्तत्र प्रतनतरौ द्वावेतौ– आनन्दगिरीयो माधवीयश्च । अथापि न शङ्करसमकालसम्भवौ । केवलं किंवदन्तीगर्भौ । अहो किंवदन्तीवधूरियं श्रद्धाजडैर्जनितगर्भा पुनःपुनरतथ्यानि च वितथ्यानि चापत्यानि निरन्तरं प्रसूते ।

अत एव नैकरूपता शङ्करविजयेषु। एकस्मिन् विजये त्रिंशद् वर्षाणि शङ्करो जीवति । अपरस्मिन् सहसा वार्षशतिको भवति । एकस्मिन्नङ्कितळेषु जायते । अपरस्मिन् चिदम्बरे । एकस्मिन् शङ्करस्य जननात् पूर्वमेव कतिपयः कालस्तत्तातस्य निलयान्निर्गतस्य। अपरस्मिन् पुनस्तत्पिता तज्जननादनन्तरमपि बहुतिथं कालं वेश्मनि वसन् तनयमुपनीय, पुनस्तमुद्वाहयितुं कन्यामन्विष्यति । अहो इदं नाम मद्राकरणमितिहासस्य ।

स कथमितिहासो भवति य इतिह नाऽस? नहि कोप्यनुन्मत्तो वक्तुमर्हति इतिहाप्यास, इतिहाप्यासेति । इति हसेयुरितिहासविदः । कचिदितिहासः पलायाञ्चक्रे गिरिमारुह्य । कचिदरण्ये विषमेऽपथेन चरन् प्रपाते पपात । एवमुत्तरोत्तरं पुरावृत्तपरम्पराकं नवोनवः परं महिमातिशयः स्पर्धयेव ववृधे ।

तदिदमाचतुर्यमन्धश्रद्धाजननी तोकं प्रसूते । अवगम्यते चैतदितिहासेषु च शास्त्रेषु च गाढमवगाढैः, बाढमेकान्ततः कृतपरिश्रमैर्विद्वत्परिवृढैः । नहि कचिदाधूनस्य तत्वविद्या भवति पद्या ।

कारणं तु परिस्फुटम् । न कोऽपि शङ्करचरितं व्यरीरचत्, यदा शङ्करः स्वयमजीवत् । तस्य त्वयमपवादः । यत् कालतः कनीयानपि मध्वसमकाल एवायं लिकुचकुलीनो नारायणपण्डितस्तच्चरितं चकार लिपिबद्धम् । तेन पश्चात्तनैः क्रियमाण इतिहासस्यापचारो वा व्यत्ययो वा नात्र प्रायः समजनि ।

*

अथापि न केवलमितिहासोऽयम् । काव्यं चेदमुदग्रम् । पुरावृत्तं चेदं समग्रम् । ऐतिहासिकं काव्यमित्येतत् ।

कवेः काव्यमनीषा समुन्मिमेष किलैकादशे सर्गे शृङ्गाररसमिषेण । पूर्णाङ्गतया महाकविरेवात्र जजागार नारायणपण्डिते । यत्र पुनरयमितिहासे निहितनेत्रः, तदा जागर्ति संशोधनप्रज्ञा । एकं चक्षुरितिहासे । अपरं काव्यरसे । अन्यदध्यात्मविकासे । तदिदं त्रिनेत्रदर्शनम् । अथच त्रिविक्रमदर्शनम् । कवितायां वेदे वेदान्ते च विचक्रम इति । यथा पिता तथाऽत्मजः । तदेवं नारायणपण्डितः कविरपि, अध्यात्मकोविदोऽपि । तस्य कृतिः काव्यमपि शास्त्रमपि । तदिदं काव्यशास्त्रमाहो शास्त्रकाव्यम् ।

नन्वितिहासनिष्ठा न दृश्यत इतरकाव्येषु । काव्यं चेदम् । तस्माद् भूयोदर्शनेन निश्चीयेत नात्रापीतिहासनिष्ठेति । यथातथं हि वार्ता भवति । अतिरञ्जितं वितथं च वचः काव्यं भवति । ततः किं प्रमाणमियं कृतिरितिहासप्रमाणीति? अवधत्स्व यद्यस्ति शुश्रूषा । कविप्रतिज्ञैव हि तस्येतिहासनिष्ठां स्पष्टयति । तथाहि भावप्रकाशिकायाम्–

‘प्रायेण नैकमात्रोक्ताः कथिता इह सर्वशः ।
‘मया दृष्टा ध्रुवमिति प्रोक्ताः प्रायेण पूरुषैः ।
‘द्वयोर्वक्त्रोर्विरोधेऽत्र स्वीकृता प्रबलस्य गीः’ इति ।

तथा–

'काव्यश्रिये वा गुरुकीर्तये वा प्रोक्तं स्वयैवापि मनीषया वा ।

'तस्मान्न शङ्कचेत महाजनेन पुंसा कुशाग्रीयधियाऽप्यवश्यम्' इति च ।

इतिहासबोधके शोधके चावश्यमपेक्षणीया गुणा एते । नारायणपण्डितो नात्र न जागरूक इति तदिदमपूर्वं महत्त्वमस्याः काव्यकृतेः, राजतरङ्गिण्या इव कल्हणस्य । समग्रे संस्कृतकाव्यवाङ्मये नेदृशी कृतिरितिहासप्रमाणी बहुलमुपलभ्यते । नारायणपण्डितस्येदमपूर्वमुपायनं संस्कृतवाङ्मयस्य ।

यदि येकेचिदुच्चक्षूभवन्ति, भवन्तु नाम । न तन्मनसि कर्तव्यम् । नहि गोष्ठश्वो बुक्कतीति क्वापि कम्पते नाकः ।

अथाप्याधुनिकाः संशेरते शोधकम्मन्याः । यदि बहुभिर्दृष्टम्, ध्रुवं दृष्टमिति समर्थितं च कथानकमेवात्र कथितम्, कथमथ वैकुण्ठवर्णनमेकादशे? तदपि दिवि सनकादिभिः पृष्टस्य शेषस्य प्रतिवचनमिति? य एवमर्वाञ्चः संशेरते संशय्य चानाश्वासप्रासादे तिष्ठन्ते किं तेषां प्रतिवचनं भवति । ते किल प्रत्यवतिष्ठन्ते श्मश्रुपिहितं स्मयमानाः– 'ननु भोः क इदमाकर्णयामास शेषगदितं वैकुण्ठवर्णनम्? को निर्वर्णयामास? कश्च तमुदन्तं वर्णयामास नारायण-पण्डिताय' इति ।

कुहनामयी कुशङ्केयमाहोपुरुषिकामात्रम् । ईदृशस्य शङ्काशङ्कोरपनोदायैव प्रायः प्रोक्तं ग्रन्थकृता –'काव्यश्रिये वा–' इति । सत्यमेतत् यत् प्रतनाः श्रद्धुः यत्र स्त्रीपुंसयोर्निधुवनवर्णनं न भवति तत् काव्यमेव न भवतीति । इदं तु कविसमयमुल्लङ्घ्य प्रवृत्तं काव्यम् । यतोऽत्र न नायिका विद्यते । यदि स्यात् काव्यमृतेऽपि नायिकायाः, किमिति न स्यादृतेऽपि सुरतवर्णनात्?

इयं तु वस्तुस्थितिरभ्यूह्यते– स्वप्रवचनं शुश्रूषन्तं शेषमाकाशगतं मध्वः शिष्येभ्यो दर्शयामासेति भावप्रकाशिकायां स्फुटम् । एतावान् सार्वलौकिकः प्रसङ्गः । 'ततः किं समजनि यदाऽयमहिपतिरस्मन्नयनपथादपससार' इति नूनमुपजात-

कुतूहलैश्छात्रैः पृष्ट आचार्यो मुनिपानामहिपस्य च सम्भाषणसारं तेभ्यः संवर्णयामास । तमेव कविरत्र सङ्ग्राहेति । अत एव कविराह– 'तुल्यं तत्सूक्ष्मदृष्ट्यादौ दैवे नैव परीक्ष्यते' इति । 'आचार्यः स्वोक्तार्थे स्वयमेव प्रमाणम्' इति तत्वदीपिका ।

महत्तरमत्र कारणान्तरं च प्रतीमः । केचिदिह मन्यन्ते– 'नाऽत्मनां लिङ्गभेदः सम्भवति । भौतिकानि हि लिङ्गानि भवन्ति । इयं स्त्रीति, अयं पुमानिति, इयं पोटेति, इयं न स्त्री नवा पुमानिति । मोक्षे नैव स्त्री न पुमानस्ति । सर्वमेकं चिन्मात्रम्' इति । तदिदमातश्चनं श्रोत्रयोर्लिङ्गात्ययो नाम केषाञ्चित् । नेदं तथ्यमित्याह मध्वः । अदीर्घदर्शिनां दर्शनमेतत् । यतो जीवस्वरूपं भवति स्त्रीत्वं वा पुंस्त्वं वा । तेन स्त्रैणानि च पौंस्नानि च निर्बाणेऽपि भवन्तीति । उपनिषदप्याह– 'रममाणः स्त्रीभिर्वा यानैर्वा' इति । भागवते च– 'विद्योतमानः प्रमदोत्तमाभिः सविद्युदभ्रावलिभिर्यथा नभः' इति ।

अपिच, आत्मनां न लिङ्गभेद इति वदन् प्रष्टव्यः– अङ्गो देवानाम्प्रिय, केयं ते वाचोयुक्तिः? जडस्य तावन्न लिङ्गभेदः । यदि न चेतनस्यापि, ननु भोः कस्यायं तर्हि लिङ्गभेदः? चेतनविशिष्टस्य जडदेहस्येति वदेः । दुर्वादोऽयम् । यन्न विशेष्यस्य धर्मः, नापि विशेषणस्य, कथं नाम विशिष्टस्य स्यात्? तेन स्वरूपानन्दमयः स्त्रीपुंसयोर्भोगो मोक्षेऽप्यनुवर्तत इत्यौपनिषदः सिद्धान्तः । तमिमं वेदवादिभिर्विस्मृतं मध्वेन स्मारितं प्रमेयविशेषं ग्राहयितुमेवायं शृङ्गारमयः सर्गः ।

✻

ईदृशमेवान्यत् प्रसङ्गद्वयम्– मध्वस्य व्यासेन समागमः, नारायाणाश्रमदर्शनं च । एकाकी किल तत्र जगाम मध्वः । न कोऽपि द्रष्टा । कथं तर्हि नारायणपण्डितः प्रबबन्ध? किं भगवानूह एव शरणम्? अथ किमेतानि स्वमनीषोत्थवचनानि? तामेतां शङ्कां निर्मूलयन्निवाऽह भावप्रकाशिकायाम्– 'प्रोक्तं स्वयैवापि मनीषयेति नैवात्र शङ्क्येत' इति ।

एतेनैतद् विशदम्– मध्वः स्वयं व्यासनारायणाश्रमोदन्तं शिष्यानुजिघृक्षया ततः प्रतिनिवृत्तो व्यवरीष्ट। तेनोदितमनूदितं च तस्य शिष्यैः सञ्जग्राह ग्रन्थ-कृदिति ।

अवतारप्रसङ्गोऽप्येवम्। स्वयमाचार्य एवान्तरङ्गशिष्येष्वभिव्यनक्ति स्म स्वावतर-णात् पूर्वं नाकलोके यन्निरवर्तत । तद् यथातथमिह कविनोपनिबद्धमिति ।

*

अथापि क्वचित् कविरवश्यवक्तव्येऽपि दिव्यं मौनमावहति । तद् यथा– किंनामधेयौ मध्वस्य पितरौ? अथ यावतिथे संवत्सरे मध्वोऽवततार भुवि? यावतिथे मासे? यावतिथे तिथौ? आश्वयुजशुद्धदशम्यां मध्वस्यावतरणमिति केचित्। माघशुद्धसप्तम्यामित्यन्ये। उभयेऽपि स्वाभिमतार्थसमर्थनाय पौराणं वचः पठन्ति! तूष्णीकः पण्डितः कविः ।

कवेर्मौनस्य फलमिदम्– यदेतावन्तमनेहसं मध्वस्यावतारकालो निर्विवादतया न निरणीयत। बहवः पक्षाः। सर्वेऽपि स्वाभिमत एव पक्षे बद्धाग्रहाः। यद्यपि मठेषु गुरुपरम्परा पठ्यते । नैकाऽप्यन्यसंवादिनी, क्वचिदनैतिहासिक-कथासङ्कीर्णेति न साऽन्ततः प्रमाणपदवीमध्यास्ते ।

केवलमणुमध्वचरिते मध्वावतारनिर्याणयोः खचितः कालनिर्देशः श्रूयते–

'त्रिशताब्दोत्तरचतुःसहस्राब्देभ्य उत्तरे ।
'एकोनचत्वारिंशाब्दे विलम्बिपरिवत्सरे ।
'आश्वीनशुक्लदशमीदिवसे भुवि पावने ।
'पाजकाख्ये शुभक्षेत्रे दुर्गया चाभिवीक्षिते ।
'जातो मध्याह्नवेलायां बुधवारे मरुत्तनुः' इति,

'एकोनाशीतिवर्षाणि भूत्वा मानुषदृष्टिगः ।
'पिङ्गलाब्दे माघशुद्धनवम्यां बदरीं ययौ' इति च ।

कस्तावदस्य ग्रन्थस्य कर्तेति न स्फुटम् । श्रीहृषीकेशतीर्थकृतिरिति तावत् प्रवादमात्रम् । यः कोऽपि कर्ता भवतु । अथापीदं सद्यः प्रमाणत्वेन स्वीक्रियेत यावदन्यत् प्रबलं प्रमाणान्तरं नोपलभ्यते ।

इदमुपज्ञमेव व्यज्ञायि यन्मध्व एकोनाशीतिवर्षाणि मानुषदृष्टिगो बभूवेति । इदं तावत् सर्वैरभ्युपगतम्, अन्यमन्यमवतारकालं वदद्भिरपि । तर्हि सर्वमप्यविरोधि काममङ्गीक्रियेत । किमर्धजरतीयेन?

अपिच भगवत्पादकृतस्तिथिनिर्णयोऽप्यत्र संवदते । तथाहि तिथिनिर्णये, तद्रचनदिवसे गतानि कल्यहानि निर्दिष्टानि– 'भूश्रीभिन्नाकिचिन्त्योनात् कल्यहात्' इत्यादि ।

तथाच तद्दिने कलिगताहानि–१६,१०,४२४(भूश्रीभिन्नाकिचिन्त्य) । तेन तदानीं कलिगताब्दाः–

$$\frac{१६,१०,४२४ \times ३१}{११,३२३} = \text{४४०९वर्षाणि[३७ दिनानि च] ।}$$

यदि 'चतुःसहस्रे त्रिशतोत्तरे गते' इति महाभारततात्पर्यनिर्णयानुसारेण ४३००तमे (शा.श.११२१) कलिगताब्द एव भगवत्पादाविर्भावः, ततः १०९वर्षानन्तरमेतद्ग्रन्थकरणमित्युक्तं स्यात् । नच तत् सम्भवति । 'एकोनाशीतिवर्षाणि भूत्वा मानुषदृष्टिगः' इति सर्वाभिमतवचनविरोधात् । ततश्च पूर्वोक्तरीत्या ३९ अब्दानां पूरणे तु सर्वं सुसङ्गतं भवति । अवतारकालः ४३३९तमः कलिगताब्दः(शा.श.११६०) । ततः सप्ततिवर्षानन्तरमेतद्ग्रन्थरचनमिति ।

अत्र यत् केचिन्निरालम्बां शङ्कामुदभावयन्– तिथिनिर्णये 'भूगीभिन्नाकिचिन्त्योनात्' इति पाठान्तरदर्शनान्न तेन शक्यं कालनिर्णयः कर्तुमिति । गणितज्ञानवैधुर्यमेव शङ्काबीजम् । पाठान्तरेण कालनिर्णयस्य का बाधा?

तथाहि – 'भूगी–' इत्यादिपाठे तद्दिने कलिगताहानि–१६,१०,४३४। किमासीत्? केवलं दश दिनान्यधिकानि भवन्ति। तेन जननवत्सरनिर्णये का क्षतिः? तेन सर्वमिदमज्ञानविजृम्भितम्। ततश्च निर्णायकप्रमाणोपलब्धि-पर्यन्तमेतावतैव सन्तोष्टव्यम्– शा.श. ११६० तमे वर्षे मध्वावतारः, १३३९ तमे बदरीगमनमिति।

एवं जनकस्यापि 'मध्यगेह' [नडिल्लाय] इति कुलनाम, भट्ट इति गौरव-नाम च निर्दिश्य तूष्णीमेवाऽस्ते कविः। ननु निर्दिदेश तन्नामापि नारायणभट्ट इति। तथाहि मणिमञ्जर्याम्– 'श्रीमध्वो विजयश्च मध्वविजयो नारायणप्रोद्भवः' इति। सावकाशमेतत्। नारायण इति भगवानपि स्यात्। नारायण इति भट्टोऽपि स्यात्। स्याद् वा मा वा भूत्। जनन्यास्तु नाम न क्वापि।

अथवा किं श्लेषभङ्ग्या सूचयामास सत्यवती भगवत्पादमातेति? यदाह– 'अधिकधिषणमेनं व्याख्यया शोभमानं हरिमिव कविवर्यं सत्यवत्यास्तनूजम्' [१४.४५] इति। तेन सत्यवतीति तस्या नाम स्यात्। यत् केचित् कल्पयन्ति वेदवतीति तन्नामेति तत् किंवदन्तीमात्रम्।

*

बहव ईदृशाः प्रसङ्गाः। मुख्यतस्तु कृष्णप्रतिष्ठाप्रसङ्गः। कुत इयं प्रतिमा? किं द्वारकात आगता? अथ नु कथमागता? कष्टम्, किमपि च स्पष्टं नाऽचष्ट श्रीमध्वविजये कविः।

इदमितिवृत्तं प्रथमं प्रास्तावि श्रीरघुवर्यतीर्थैः श्रीहृषीकेशतीर्थसंस्थानमारूढैः प्रमेयनवमालिकाटीकायाम्। प्रमेयनवमालिका च सटीकोपरिष्टान्मुद्रिता। तत्रेदं प्रकटम्– द्वारकातः सांयात्रिकैरानीतां रूप्यपीठान्तिके जलधौ मग्नां कृष्णप्रतिमां तत आनीय रूप्यपीठे मध्वः प्रतिष्ठापयामासेति। एवं स्थितेऽपि वस्तुतत्वे कवेर्मौनं विविधां विगतमूलां विकृतां कथां प्रासूत। सैव कैश्चित् साभिनिवेशमुदूहे। क एनं दुरभिनिवेशं समूलकाषं कषेद्दते पण्डिता-चार्यस्फुटाभिलापात्? दुराग्रहगृहीतत्वादनुवर्तन्त एव सर्वदा।

न केवलमयं कविः । ये तदात्वेऽवर्तन्त, ये च प्रतिष्ठासाक्षिणस्ते केऽपि मुखं न व्यादित्सन् । केऽपि किमपि नाऽविरकुर्वन् । कोऽपि गुह्यबीजं न निरभिदत् । विस्मापयते नः प्राचां दिव्यं मौनमिदम् ।

विस्तरभयान्नोक्तमिति तु न युक्तं वचः । देवगुह्यत्वनिश्चयादनुक्तं स्यादिति तु शक्यं वक्तुम् । तथाहि स्वयमेवाऽऽह–

'चर्या दृष्टा नरैः काश्चिद् विस्मृता देवमायया ।
'अविस्मृताश्च पुरुषैर्नास्माभिः सकलाः श्रुताः ।
'श्रुताश्च काश्चिन्नैवोक्ता देवगुह्यत्वनिश्चयात्' इत्यादि ।

तर्हि पश्चात्तनैः कथमवगतम्? एवं तु सम्भाव्यते– इदमपि गुह्यं मध्वेनाऽविष्कृतमन्तरङ्गशिष्येषु, प्राय आज्ञप्तं च 'मा सद्यो बहिरङ्गं कारि । आयत्यां तु प्रकटीभविष्यति' इति ।

तदात्वे तु मायावादमिषेण श्रीमध्वस्य तत्ववादं विरुन्धानः कश्चन प्रबलो वर्ग आसीत् । तत्ववादविद्वेषविषदूषितधिषणः स जनः श्रीमध्वपरीवाद एव पर्याप्तप्राण आसीत् । तादृशस्य पूर्वाग्रहान्धस्य पुरस्तथ्यकथनमपि परिहासाय केवलम् । अत आज्ञप्तं स्यान्मध्वेन– 'कृष्णप्रतिकृतेरागतिमूलं मा तेन विज्ञायि यस्यायं परिहासग्रासः केवलम्' इति ।

इत्थमाचार्यशिष्यैः पिहितं बहोः कालादनावृतं श्रीवादिराजरघुवर्यतीर्थादिभिरिति सर्वं भवति समञ्जसम् ।

*

एवं बहुषु स्थलेषु मितवागप्ययं क्वचित्क्वचिद् विततवागपि भवति । मदनेश्वरमन्दिरे विष्णुमङ्गले च कृतनिवासस्य मध्वस्याऽऽह्निकी चर्या, राज्ञो जयसिंहस्य त्रिविक्रमपण्डितस्य च मध्वेन मिलनम्– एवमादीनां निरूपणे कवेः प्रतिभा प्रकटा विशङ्कटा च भवति ।

एकैकामपि घटनां विश्लेषंविश्लेषं स्फुटं मनोज्ञं च सोत्साहं सोत्सेधोन्नाहं

व्याहरति। एवङ्कारमाद्वादशसर्गादापञ्चदशं निरूपितः कथासमुद्गक इतिहास-दृष्ट्या काव्यदृष्ट्या चातिमात्रं महत्त्वमावहति। प्रायेण बाल्ये, आवीच्ये वा वयसि कविना साक्षात्कृतोऽयं सर्वप्रसङ्गः । अत एतं कथासन्दर्भं विशदं परिस्फुटं च निरूपयामास ।

✻

अथ काव्यशैलीमागूर्य गमनीयं किञ्चिदस्ति । रमणीया शय्या । रमणीयं काव्यम्। सर्वालङ्कारेषु सिद्धहस्तः सहजकविरयम्। अनुप्रासः स्वयमागत्याह-महमिकया तद्वदनरङ्गे नरीनृत्यति । पित्र्योऽयं दायभागः । श्लेषालङ्कृति-युवतिरश्लक्ष्णं चिराय तमश्लिक्षत् । गाढमुपगूढा च न कदाऽपि मुञ्चति । अनितरसाधारणी चेतोहारिणी श्लेषमाधुरी कवेः ।

प्रायः समग्रेऽपि संस्कृतमहाकाव्यवाङ्मये एतावन्तं श्लेषविलासं नान्यत्र पश्यामः । अष्टमे तु सर्गे एकैकेन पद्येन द्वेद्वे भगवद्रूपे वर्णयतः कवेश्चातुरी निरुपमा भवति ।

कवेः श्लेषप्रियताया मूलस्फूर्तिर्वैदिकपरम्परैव– 'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते' इति ।

मन्दारमरन्देऽलङ्कारशास्त्रे कृष्णावधूतो द्विर्मध्वविजयपद्ये उदाजहार। तथाहि पर्यायोक्तालङ्कारप्रस्तावे व्यङ्ग्यबिन्दौ–

'स्वस्याथवा परस्येष्टकार्यसम्पादनं मिषात् ।
'पर्यायोक्तं तदन्यत् स्यादिति केचित् प्रचक्षते ।

'प्राचीनम्–

'नवमल्लिकास्रजमभीष्टतमः शुचिसम्भवां प्रणयिनीशिरसि ।
'कलयन् स्वयं न कुशलेति किल प्रतिघट्टयत्युरुकुचावुरसा'

[म.वि.११.४१] इति ।

अपरं च पूर्वरूपालङ्कारप्रस्तावे व्यङ्ग्यबिन्दावेव–

'पूर्वावस्थानुवृत्तिश्च विगते सति वस्तुनि ।
'कथ्यते चेद् द्वितीयं तु पूर्वरूपमुदाहृतम् ।

'प्राचीनम्–

'व्याख्याता निशि स कदाचन प्रदीपे
'संशान्ते पुनरपि वाचयाम्बभूव ।
'शिष्यान् स्वान् पुरुकरुणाम्बुधिर्निजाङ्घ्रे-
'रङ्गुष्ठस्फुटनखरान्तरोचिषैव' [म.वि.१६.६] इति ।

*

अथ का सञ्ज्ञा काव्यस्य? किं मध्वविजय इति ? आहो सुमध्वविजय इति? सुपूर्वमेवेत्येके । असुपूर्वमिति वयम् । यत् कविः काव्यस्य पिता भवति । कविर्माता भवति। मातापितरौ च पोतस्य नाम कुरुतः। कविरयं काव्यपोतस्यास्य नाम चकार मध्वविजय इति ।

तथाहि मणिमञ्जर्याम्– 'श्रीमध्वो विजयश्च मध्वविजयः' इति । 'कृत्वाऽपि मध्वविजयम्–' इति भावप्रकाशिकायाम्। 'स मध्वविजयाभिधं व्यधित' इति प्रमेयनवमालिकायाम् । अत्रैव च दशमसर्गे–

धन्योऽ**म**ह्यत **ना**किनामहितहृद्बा**ण**स्समोऽ**ज**स्य यो
मध्वो **ध्व**स्तदु**रा**गमोऽग्र्यहिमगुश्रीः **का**ममा**या**मिहृत् ।
विष्णुं **वि**श्वज**य**प्रदं स हि नमन् से**व्यं** सुसौ**ख्यं** मुदा–' इत्यादि ।

अत्र प्रतिपादं तृतीयानां सप्तदशानां चाक्षराणां संयोजने 'मध्वविजयाख्यं' इति काव्यनाम सम्पद्यते । षष्ठानां चतुर्दशानां च मेलने 'नारायणकाव्यं' इति कर्तृनाम सम्पद्यते ।

यत् केचिदाहुः– रुग्मिणीशविजये पुनरेतादृशे चक्रबन्धे 'रुग्मिणीशजयः'

इत्येव निर्दिष्टम्। 'रुग्मिणीशविजयः' इति तु कविसम्मतं नाम। एवमिहापि 'मध्वविजयः' इत्येव चक्रबन्धे निर्देशेऽपि 'सुमध्वविजयः' इत्येव कविसम्मतं नाम। तस्मादनिर्णायकं चक्रबन्धवचनमिति। तन्नाऽदृत्यम्। अदूरदृश्वनां बालभाषितमेतत्। यतः षडेव वर्णाश्चक्रबन्धे निबद्धुं शक्यन्ते। 'रुग्मिणीशविजयः' इति सप्ताक्षरं नाम। अतश्छन्दःसौहित्याय विजयं जयमित्याह विलोपेनेति स्फुटं छन्दःशास्त्रेष्वधीतिनाम्। नात्र तथा। 'सुमध्वविजयः' इति षडक्षरं नाम। नात्राक्षरलोपस्यावकाशः। अथाप्यक्षरं विलोप्य छन्दःपूरणाय 'आख्यम्' इति पदं पूरयित्वा बन्धं सुबबन्धेत्याहोपुरुषिकामात्रम्।

अपि चैवं वदता स्ववचनेष्वेव परस्परं विसङ्गतिरपि विस्मृता। तथाहि– छन्दःपूरणाय 'रुग्मिणीशजयः' इत्याहेति वदता पद्येषु छन्दआनुगुण्याय नाम्नि क्वचिदक्षरस्य न्यूनताऽधिक्यं वा न दोषमावहतीत्यङ्गीकृतं भवति। तर्हि गतं स्ववचनम् – 'सुमध्वविजयः' इत्यपि कैश्चिद् ग्रन्थकारैः स्वग्रन्थगतपद्येषु प्रयोगात्, प्रमेयनवमालिकायामपि–'सुमध्वविजयाभिधम्' इति पाठान्तरस्य प्रमितैरपि स्वीकृतत्वाच्च तदपि प्रामाणिकं नामधेयम्– इति। ननूक्तं भवतैव पद्यपठितानां नाम्नां क्वचिदक्षरव्यत्यासो भवतीति।

प्रसिद्धं चैतत् स्वादिपूरणं पद्येषु। तथाहि भगवत्पादप्रयोगः– 'सुपूर्णप्रज्ञाभिधो ग्रन्थमिमं चकार' इति। अहो नन्वेतादृशः पण्डिता ब्रूयुरेव– 'आचार्यपादप्रयोगात् 'सुपूर्णप्रज्ञः' इत्यपि 'पूर्णप्रज्ञः' इतिवन्मध्वस्य नामान्तरमिति। बालभाषितमिति विदः क्षमन्ते।

प्राचीनटीकास्वपि सर्वत्र मध्वविजय इत्येव। अतोऽत्रापि मध्वविजय इत्येव मौलं नामैव परिगृहीतम्।

अथापि सुपूर्वमेव पठनीयमिति ये हठन्ति पठन्तु नाम– 'सुनारायणपण्डिताचार्यविरचितः सुमध्वविजयः' इति। पठित्वा तृप्यन्तु। किं नश्छिन्नम्? वयं तु तत्वान्वेषणतत्पराः।

*

नारायणार्यस्य जनयिता लिकुचतिलकः कविराजस्त्रिविक्रमपण्डिताचार्यः । यस्तौळवमण्डलेश्वरस्य जयसिंहस्याऽस्थानकविरासीत् । अस्य वासमन्दिरं 'कावुमठ' इति प्रसिद्धम् । तद्वंशजा एव सम्प्रत्यपि तत्र निवसन्ति ।

आचार्यमध्वः प्रियतमायान्तेवासिने त्रिविक्रमपण्डिताचार्याय श्रीवत्सनारायणार्चां ददौ । सा च प्रतिकृतिरद्यत्वेऽपि तत्र पूज्यते । अप्रतिमा प्रतिमा । तथाह्यङ्गुष्ठप्रमाणी नारायणस्य प्रतिकृतिः । तस्या वक्षसि लक्षणभूता लक्ष्मीः । मूर्तिशिल्प-कौशलस्यापूर्वमुदाहरणम् ।

पण्डिताचार्यस्य कुलनाम 'पेजत्ताय' [ಪೆಜತ್ತಾಯ] इति । पञ्चशताधिकानि कुलनामानि भवन्ति तौळवानाम् । तद् यथा– 'ताळेत्ताय, पेजत्ताय, पेलत्ताय, तोटंतिल्लाय' इत्यादीनि वृक्षोपलक्षणानि नामानि । 'मूडिल्लाय, पड्डिल्लाय, मित्तिल्लाय, सित्तिल्लाय, नडिल्लाय' इत्यादीनि दिगुपलक्षणानि । 'अले-वूराय, इन्नंताय, कन्नर्पाडित्ताय, पुत्तूराय, कुद्यपुस्तूराय' इत्यादीनि ग्रामोपलक्षणानि ।

'पेजत्ताय' इति तौळवं नाम संस्कृतीकृत्य लिकुचकुलं बभूव । यथा 'नडिल्लाय' इत्येतत् मध्यगेह इति । लिकुचः कर्णाटभाषायां 'हेब्बलसु' इत्युच्यते । तौळवभाषायां 'पेज' इति । एकत्र जनाधिवासे यस्य वाट्यामेव केवलं लिकुचवृक्षो बभूव स लिकुचान्वयः, स 'पेजत्ताय' इति । अद्यापि बहवः सन्ति लिकुच-कुलीनास्तौळवमण्डले ।

तौळवमण्डलस्य स्वर्णयुगे हि जिजीव पण्डिताचार्यः । सम्प्रत्ययं भूभागः 'कासरगोडु' इति व्यपदिश्यते यत्रेमे लिकुचकुलीनाः न्यूषुः । तदात्वे तु 'कबेनाडु' इति । राजधानी चेयमासीत् तौळवमण्डलस्य । [हन्त सम्प्रति केरळभूमिभागः ।] द्वितीयो जयसिंहः, यं प्रजाः प्रीत्या 'कबेसिंह' इति व्याजह्रुः, तौळवमण्डलेश्वर आस । समृद्धा भूमिः । प्रतिगृहमारामाः । प्रत्यारामं कूपवापीतटाकाः । समृद्धं प्रशान्तं च जीवनम् ।

तौळवमण्डलस्य पुत्ररत्नमाचार्यमध्वस्तस्मिन्नेवानेहसि भुव्यवततार। अलञ्चकार च तौळवभूमिभागम् । ईदृशे किल काले त्रिविक्रमपण्डितस्तौळवमण्डले न केवलम्, प्रायः समग्रेऽपि भारतेऽद्वितीयोऽद्वैतानुयायी विद्वानास । पण्डित-प्रपञ्चस्तमग्रमान्यमग्रण्यामपि विदुषां मेने । अद्वैतसमर्थनाय सर्वेऽपि तन्मुखं निरीक्षमाणा बभूवुः । स किल मुखवाणी बभूव सर्वविदुषाम् ।

पण्डिताचार्यस्य पुण्यपाकेन तस्य प्रथमं मध्वप्रणीतदर्शनेन तदनु मध्वेन समजनि समागमः। उभयेनापि दर्शनेन विस्मिततरान्तरो बभूव पण्डिताचार्यः। अन्तरेव विजितश्च । अथाप्यजित इव वादाय समनह्यत । प्रावर्तत च वादः सप्ताष्टानि दिनानि साकं मध्वेन । अभिद्यत हृदयग्रन्थिः । अच्छिद्यन्त सर्वसंशयाः । अक्षीयन्त च कर्माणि। पराजयेन जिगाय। परम्परयाऽऽगतमित्यनुसृतं मायावादं परित्यज्य तत्ववादे स्वयमदीक्षत पण्डिताचार्यः ।

नारायणार्यस्तत्प्रेमपाकः स्वकीये मध्वविजये तदिदं स्वतातचरितं सादरं सविस्तरं वर्णयामास [१३.४३–६९, १४.१–५ १५.१–९०] ।

*

लिकुचकुलमेव पण्डितकुलम्। त्रिविक्रमपण्डितस्य पिता सुब्रह्मण्यपण्डितोऽपि लिकुचान्वयानामाङ्गिरसगोत्राणामग्रणीर्विपश्चित् कविवर्यश्चाऽसेति श्रूयते । त्रिविक्रमपण्डिताचार्यस्तु तौळवानां प्रथमो महाकविः । यो बालभाव एव रचयामास प्रबुद्धं महाकाव्यमुषाहरणं नाम । यस्येदमाद्यं पद्यं भवति–

'लक्ष्मीलावण्यपीयूषपानपात्रायितेक्षणः ।

'सनीरनीरदश्यामः पातु वो भगवान् हरिः' इति ।

अन्यदप्रतिमानं ग्रन्थरत्नं वेदान्तसूत्राणां भाष्यस्य टीका तत्वदीपिका । या तस्य काव्ये वेदे वेदान्ते चातुलस्य प्रज्ञातिशयस्य साक्षिभूता। भगवत्पादाज्ञयैव रचिता– 'आज्ञाबलादकृषि लेशत एष तेषाम्' इति ।

द्वे स्तोत्रकाव्ये–वायुस्तुतिश्च विष्णुस्तुतिश्चेति । ता इमा निर्विवादाश्चतस्रः कृतयस्त्रिविक्रमपण्डितस्य ।

*

त्रिविक्रमपण्डितस्यानुजन्मा, मध्वविजयप्रणेतुः पितृव्यः, शङ्करार्योऽपि महान् मनीषी य आचार्यमध्वस्य ग्रन्थपालो बभूव। शङ्करार्य इत्यन्योऽपि लिकुचकुलीनः श्रूयते । 'द्वौ शङ्करार्यौ' इति हि भावप्रकाशिका । शङ्करार्यकृतिरिति द्वौ ग्रन्थावुपलभ्येते एतावन्तमप्यनेहसममुद्रितौ, अथापि पुण्यलेशवशादघुण-भक्षितौ । द्वयोः शङ्करार्ययोः कतरेण प्रणीताविति स्फुटमनवगमेऽपि प्रायः पण्डिताचार्यानुजन्मकृती– अनुव्याख्यानसम्बन्धदीपिका, अनुव्याख्यान-न्यायविवरणसम्बन्धदीपिका च ।

तदिदं किञ्चिदिव विस्मयावहं यन्नारायणपण्डितः शङ्करार्यकृती आगूर्य न किमपि बभाषे। स्वकृतायामनुव्याख्यानटीकायां नयचन्द्रिकायामपि सम्बन्ध-दीपिकां नोल्लिलेख, श्रीपद्मनाभतीर्थभट्टारककृतां सन्न्यायरत्नावळिं सबहु-मानमुल्लिखन्नपि ।

[कल्याणीति काचन त्रिविक्रमपण्डितस्यानुजाऽऽसीदिति तौळवेषु प्रथित-मैतिह्यम्। तनुजेत्यपरे। अस्या अप्युल्लेखः कविनाऽत्र न कृतः। केवलमैतिह्यं श्रूयते। आचार्यमध्वस्य ज्येष्ठा भगिनी, या मध्वस्य शैशवे कुलस्थकुलं प्राभो-जयत्, साऽपि कल्याणीनामधेयाऽऽसीदिति वदन्ति। कल्याणीदेव्याः कृति-रिति द्वित्राणि स्तोत्राण्युपलभ्यन्ते। निश्चिततया किमपि वक्तुं न पार्यते।]

*

त्रिविक्रमपण्डितस्य त्रयः पुत्राः । नारायणपण्डितस्तृतीयः । आद्यावज्ञात-सञ्ज्ञौ । तत्कृतानीति च द्वित्राणि स्तोत्राणि पठ्यन्ते । एकं तावत् नारायणपण्डिताग्रजस्य कृतिरिति निर्विवादम् । सेयं रमेशगीतिस्त्रिविक्रम-पण्डितस्य द्वितीयेन तनयेन ग्रथिता । तथाहि तद्वचनम्–

'लिकुचकविनन्दनः सन्नुपान्त्यो व्यदधदिति वै रमेशस्य गीतिम् ।
'शरणदमदोषमानन्दपूर्णं शरणमनिशं रमेशं प्रपद्ये.' इति ।

अन्यच्च वासुदेवगीतिरिति प्रथितं स्तोत्रमुपलब्धम् । तन्नारायणपण्डितानुजकृतमिति वदन्तो भ्रान्ताः । नारायणपण्डित एव हि त्रिषु कनिष्ठः ।

स्तोत्रकृत् तावदात्मानं परिचाययन्नेवमाह–

'लिकुचतिलकात्मजानां प्रसादादवरजनिना कृता गीतिकेयम् ।
'अनवरतमादरादम्बुजाक्षं स्मर भवभयापहं वासुदेवम्' इति ।

न तावदयमवरजनिर्नारायणपण्डितः । 'लिकुचतिलकात्मजानां प्रसादात्' इति पूर्ववचनविरोधात् । त्रिभिः पद्यैः पूर्वं सादरं सूरिसूनुस्मरणाच्च । शङ्करार्यसूनुः स्यादस्य कर्तेति सम्भाव्यते ।

*

नारायणपण्डित एव वंशेऽस्मिन् विपुलं ग्रन्थान् प्रणिनाय । मध्वविजयं विरचय्य चायमेव ददौ चारित्रिककाव्यपरम्परायाश्चालनम् ।

नारायणार्यः क्वचिदात्मानं लिकुचसूरिसूनुरिति व्यपदिशति । लिकुचतिलकसूनुरिति च । यथा शिवस्तुतौ, यथा वा नृसिंहस्तुतौ– 'शिवस्तुतिमिमां शिवां लिकुचसूरिसूनुः सुधीः' इति, 'लिकुचतिलकसूनुः सद्धितार्थानुसारी नरहरिनुतिमेतां शत्रुसंहारहेतुम्' इति च ।

क्वचिन्नारायण इति । यथा कृष्णमालायाम्– 'नारायणस्यार्पयते पदाब्जे नारायणः श्रीमति कृष्णमालाम्' इति ।

क्वचित् त्रैविक्रमार्य इति । यथा तत्वमञ्जर्याम्, यथा वा नयचन्द्रिकायाम्– 'त्रैविक्रमार्यकृतौ तत्वमञ्जर्याम्–', 'त्रैविक्रमार्यकृतौ नयचन्द्रिकायाम्–' इत्यादि ।

यद्यपि सावसरमिदं व्याहरणं त्रैविक्रमार्य इति । त्रयोऽपि पुत्रास्त्रिविक्रमपण्डितस्य त्रैविक्रमार्याः । तथाऽपि मुख्ये सम्प्रत्यय इति नारायणपण्डित एव गृह्यते जघन्यजोऽप्यजघन्यः । सम्प्रदायतश्चैतदवसीयते ।

अथच तत्कृतित्वेन निश्चिताः सम्प्रत्युपलब्धा ग्रन्थाः–

१. सङ्ग्रहरामायणम्
२. मध्वविजयः
३. प्रमेयनवमालिका
४. भावप्रकाशिका
५. शुभोदयम्
६. पारिजातहरणम्
७. मणिमञ्जरी
८. तत्वमञ्जरी
९. नयचन्द्रिका
१०. शिवस्तुतिः
११. नृसिंहस्तुतिः
१२. योगदीपिका
१३. ध्यानमाला
१४. कृष्णमाला
१५. दाशरथ्यष्टकम्
१६. रामगीत्यष्टकम्
१७. गोविन्दस्तुतिः
१८. पूर्णबोधस्तुतिः
१९. यमकस्तोत्रम्(१)
२०. यमकस्तोत्रम्(२)
२१. यमकस्तोत्रम्(३)

सङ्ग्रहरामायणं नाम रामकथासङ्ग्रहो महाकाव्यम् । यत्र वाल्मीकिरामायणं महाभारततात्पर्यनिर्णयानुसारेण समन्वीय समगृह्यत। सेतुबन्धोऽयं वाल्मीकिरामायणस्य मध्वरामायणस्य च। यत्र किलाऽभाणकमाभणन्ति– यदाचार्यमध्वः स्वयमिदं काव्यं दृष्ट्वा 'सर्षपे कूष्माण्डप्रवेशः' इति सशिरःकम्पं प्रशशंसेति ।

मध्वविजय इत्यपरं गुरुकाव्यम् । गुरोरिदं काव्यम् । गुरु चेदं महाकाव्यं गुरुचरितग्राहकमिति ।

मध्वविजयस्यैव समासः प्रमेयनवमालिका । मध्वविजयस्य प्रतिसर्गं कथाभागं प्रायो द्वाभ्यान्द्वाभ्यां पद्याभ्यां सङ्क्षिपन्नित्यपारायणोपयुक्तं लघुकाव्यम् । अत एव 'अणुमध्वविजयः' इति प्रथितम् ।

मध्वविजयस्य लघुटीका भावप्रकाशिका । अल्पाकृतिरप्यनल्पापूर्वविषया । स्थलनामानि तु तत एव ज्ञातव्यानि । यदि न सा व्यरचिष्यत मध्वसन्दर्शितानां भूमिभागानां नामापि न व्यज्ञास्यत । एकविंशतिकुभाष्याणां

वार्ताऽपि नाश्रोष्यत। तदेवं मध्वचरितलम्पटस्य कवेर्ग्रन्थत्रयी माध्वानामुपदा महत्तरेयम् ।

शुभोदयम्, पारिजातहरणम्, मणिमञ्जरी चेत्यपराणि खण्डकाव्यानि। भागवतगतं पुरञ्जनोपाख्यानं विस्तारयदध्यात्मकाव्यं शुभोदयम्। पारिजातहरणमिति नामैव ग्रन्थं परिचाययति। यमकग्रथितं चेदं काव्यम्। एतावत्पर्यन्तममुद्रितम्। मणिमञ्जरी तत्ववादस्य पूर्वमितिवृत्तं प्रस्तावयत् विवादग्रस्तमपूर्ववस्तुकं काव्यम् ।

आचार्यमध्वकृतेर्विष्णुतत्वनिर्णयस्यापूर्वा टीका तत्वमञ्जरी । इयमनुपलब्धपूर्वा। मन्निकटे त्वेकोऽपूर्वः कोशो वर्तते। समशोधि च मया। पद्मनाभतीर्थकृतया टिप्पण्या, एतावन्तं कालमज्ञातचरया नारायणपण्डितकृतयाऽपूर्वार्थगर्भितया तत्वमञ्जर्या च समुपबृंहितो विष्णुतत्वनिर्णयोऽपि नातिचिरेण प्रकाशनीय इत्यस्ति सङ्कल्पः ।

अन्या चानुव्याख्यानस्य टीका नयचन्द्रिका। यद्यप्यनुव्याख्यानसम्बन्धदीपिका पूर्वमेव शङ्करार्यकृताऽऽसीत्। अथापि सा केवलमवतरणिकारूपा पूर्वोत्तरपद्ययोः सम्बन्धदीपिका, न पद्यार्थप्रकाशनीति नयचन्द्रिका निरमीयत नारायणपण्डितेन । सकृन्मुद्रिता, अथाप्यशुद्धिबहुला । शुद्धं तु मुद्रणं प्रतीक्षिष्यते ।

शिवस्तुतिर्नृसिंहस्तुतिश्च स्तोत्रमुक्ताहारतरळहीरायिते । [नृसिंहस्तुतिं त्रिविक्रमपण्डितकृतिं केचिन्मन्यन्ते । मूलकोशानुसारेण नारायणपण्डितकृतिरित्येव सूक्तम्। अपि च गमनिकान्तरं स्तोत्र एव दृश्यते। त्रिविक्रमपण्डितः किल लिकुचसूरिरित्युच्यते, न क्वापि लिकुचसूनुरिति, ऋते 'सूरिनन्दनः' [१५.७१] इति प्रयोगान्मध्वविजये । त्रिविक्रमपण्डितस्य पुत्रेष्वन्यतम एव लिकुचसूनुरुच्यते। तथाहि रमेशस्तुतौ– 'लिकुचकविनन्दनः सन्नुपान्त्यः' इति । 'लिकुचतिलकात्मजानां प्रसादात्' इति च वासुदेवगीतौ । अत्र च नृसिंहस्तुतौ– 'लिकुचतिलकसूनुः' इति ।]

वैष्णवाचारं बोधयन्ती योगदीपिका विष्णुतीर्थीयादनन्तरमतिप्रतनमधिकृतं वैष्णवं धर्मशास्त्रम्। कर्मकाण्डिनामपूर्वोऽयं प्रबन्धः। सव्याख्यानमस्य पुनर्मुद्रणं सदाचारपरिनिष्ठितानां भवेदुपकाराय महते ।

उपासनाप्रकारं विशदयन्ती ध्यानमाला, कृष्णकथां कालानुक्रमेण तात्पर्यनिर्णयोक्तदिशा सङ्गृह्य स्तुतिरूपेण बोधयन्ती कृष्णमाला चात्यन्तमपूर्वे कृती । मयैवेमे इदमुपज्ञं संशोध्य सटीकं सानुवादं च प्रकाशिते ।

अथापरेषु सप्तसु स्तोत्रेषु[१५–२१] चत्वारि दाशरथ्यष्टकम्, रामगीत्यष्टकम्, गोविन्दस्तुतिः, पूर्णबोधस्तुतिश्च। तत्रोत्तरं स्तुतिद्वयं सटीकं सानुवादं च पूर्वमेव प्रकाशितं प्रतिष्ठानेन । विष्णुस्तुतिं वायुस्तुतिं मन्त्रकाव्ये पिता चकार; गोविन्दस्तुतिं पूर्णबोधस्तुतिं चाणुके गीतिकाव्ये पुत्रश्चकार; आबालमहिळं गायज्ञायं यथा सर्वेऽपि सन्तुष्येयुः ।

रामगीत्यष्टकं दाशरथ्यष्टकं च चतुर्दशस्तोत्रेष्वन्तर्गतमिति पुरैव मुद्रितम् । एतानि चत्वार्यपि स्तोत्राणि नारायणपण्डिताचार्यकृतानीति प्रथा । क्वचित्तु पूर्वसूरिकृतानीतीयदेव पठ्यते ।

त्रीणि यमकस्तोत्राणि चापूर्वाणि मया सङ्गृहीतानि । किञ्चिदिवाशुद्धानि । शुद्धपाठोपलम्भे सत्यवश्यं प्रकाशनाय प्रयत्यते ।

[काचिदणुभाष्यटीका नारायणार्यकृतिरिति मुद्रिता। मूलपाठाननुगुणेयं टीका नूनं कस्यचिदर्वाक्तनस्य नारायणाख्यस्य कृतिः । भाषायामपि न लैकुची शैली । न वा बन्धः । नापि च काचिदपूर्वताऽर्थनिर्वर्णने । इदं चावधेयम्– यदि नारायणपण्डितः पूर्वमेव व्याकरिष्यत्, तदा वामनपण्डितेनाऽनन्दमालारचनमेव न प्रासङ्क्ष्यत । अथापरौ च नारायणार्यकृतत्वेन मुद्रितौ– मध्वामृतमहार्णवः, अंशांशिनिर्णयश्च । उभावपि भाषाशैल्यां प्रमेयनिरूपणे च नातिकुशलौ। तौळवमण्डले च नैतौ तत्कृतित्वेन प्रथितौ। निश्चप्रचमर्वाचीनौ

ग्रन्थौ । आचतुर्यमेवैतद् यदेतेषां लिकुचकविसूनुकृतत्वाभिधानम् । तारतम्य-स्तोत्रमिव, अद्वैतकालानल इव, मध्वमन्त्रार्थमञ्जरीव सर्वा एता अर्वाचीनाः कृतयः ।]

महाभारततात्पर्यस्य यमकभारतापरनामधेयस्य टीका, कृष्णामृतमहार्णवस्य टीका, प्रमाणलक्षणस्य टीका चेति त्रयोऽपरेऽपि ग्रन्था नारायणार्यग्रथिता इति विदुषा बि.एन्.के.शर्मणा न्यरूपि । अन्वेष्टव्या एते ।

*

वामनपण्डितः प्रायो नारायणपण्डितपुत्रः । स पुनरात्मानं त्रैविक्रमार्यदास इत्येव व्यपदिशति । अथापि शैली तस्य लिकुचकुलीनतां समर्थयते ।

सर्वशास्त्रार्थसङ्ग्रह[अणुभाष्य]स्य अनेन रचिता टीका 'आनन्दमाला' नाम मयैव प्रथमं सम्पाद्य मुद्रिता । रमणीया टीका । आतञ्चनी मनःश्रवणयोः ।

भाष्यं त्रिविक्रमपण्डितो व्याचख्यौ । शङ्करार्यो न्यायविवरणम् । अनुव्याख्यानं नारायणपण्डितः । सर्वशास्त्रार्थसङ्ग्रहं वामनपण्डितः । तदेवं लिकुचसन्ततित्रयी समग्रं सूत्रप्रस्थानं व्यवृणीतेति गम्यते । माध्ववाङ्मयस्येदमनुपममुपायनम् ।

अथ च वामनपण्डितस्यापराः षट्कृतयो मया सङ्गृह्य संशोधिताः– याज्ञीय-मन्त्रभाष्यटीका, तलवकारोपनिषद्भाष्यटीका, काठकोपनिषद्भाष्यटीका, षट्प्रश्नोपनिषद्भाष्यटीका, आथर्वणोपनिषद्भाष्यटीका, माण्डूकोपनिषद्भाष्यटीका च । यथावकाशं च प्रकाशयिष्यन्ते । तौळवमण्डलं धन्यमेभिः सुपुत्रैः ।

मध्वविजयटीकाः

प्रथमा तावट्टीका ग्रन्थकृतैव रचिता 'भावप्रकाशिका'।

[स्थूलतया शा.श. १२७०]

द्वितीया वेदाङ्गतीर्थविरचिता 'पदार्थदीपिका'। [१३७०]

तृतीया विश्वपतितीर्थविरचिता 'पदार्थदीपिकोद्बोधिका'। [१५२०]

चतुर्थी लिङ्गेरीव्यासाचार्यकृता । [१५७०]

पञ्चमी आनन्दतीर्थाचार्यकृता 'पदार्थप्रकाशिका' । [१७८०]

षष्ठी छलारीशेषाचार्यकृता 'मन्दोपकारिणी' । [१७८०]

एवं छलारीनरसिंहाचार्यकृताऽपि टीकाऽस्तीति केचित् । तथा मुद्गलानन्द-तीर्थाचार्यकृताऽप्यन्याऽस्ति टीकेत्यन्ये । प्रायो नामभ्रान्तिरेवेयम् ।

भावप्रकाशिकाया वैशिष्ट्यं किञ्चिदिवात्र विश्लेषणीयम्– तौळवमण्डलस्य स्थलनामानि इत एवावगम्यन्ते । कुलनामानि च । स्वोक्तार्थदार्ढ्याय क्वचित् पूर्वग्रन्थानुद्धरति संवादितया । तेनैतद् विज्ञायते– ततः पूर्वमेव मध्वकथासङ्ग्रहः केनचिद् व्यरचीति । किन्तु तादृशस्य ग्रन्थभागस्यात्रोल्लेखादृते कोऽप्यन्यः परिचयलेशोऽपि नावशिष्टः ।

श्रूयते जनश्रुतिः– पद्मनाभतीर्थैः प्रथमं मध्वचरितं निबद्धमिति । तस्यैकं लिखितं पुस्तकं कश्मीरेष्वासीदिति च । यदि तथ्यं तत् किं तत एवेदमुद्धरणं स्यात्? न किमपि निर्णेतुं शक्यं यावच्चरितान्तरं नोपलभ्यते ।

इदानीं त्रीणि तावदुपलभ्यन्ते– सम्प्रदायपद्धतिः, अणुमध्वचरितम्, मध्वविलासश्चेति । तत्राऽद्यं द्वयं हृषीकेशतीर्थकृतिरिति, अन्त्यं सत्यतीर्थकृतिरिति च किंवदन्ती । प्रवाद एवायम् । आद्यद्वयं न क्वापि प्रतनकोशेषु दृश्यते । द्वयमप्यर्वाचीनमितीतिवृत्तविदो वृद्धाः । मध्वविलासस्तु ततोऽप्यर्वाचीन इति सर्वेऽपि संशोधका जानन्ति । असङ्गतः कथाभागः, अप्रबुद्धा च शैली स्फुटं मध्वविलासस्यार्वाचीनतामुद्घोषयति ।

अनया हि भावप्रकाशिकया महती च शिरोवेदना विमर्शकानां परिहृता । तथाहि विमर्शकाः समशयिषत– आचार्यमध्वस्य प्रमुखशिष्यं श्रीनरहरितीर्थम्, यः कळिङ्गराज्ये महत्तरं पात्रं निरुवाह, किमिति सर्वात्मना नोल्लिलेख नारायणपण्डित इति ।

उल्लिलेखैवेति भावप्रकाशिका समाधत्त । तथाहि 'नरसिंहपदाधाराः' [१५.१२८] इति श्लोकस्य व्याख्याने भावप्रकाशिका तमेतमर्थं स्फुटीचकार– 'नरहरितीर्थाः' इति ।

सम्प्रति 'अदमारुमठ' इति ख्यातस्य संस्थानस्य मूलयतेरुल्लेखोऽयम् । मध्वविजयानुसारेण नरसिंहतीर्था एवैतत्संस्थानस्य प्रथमयतय इति सर्वत्र व्यवहारः, तौळवमण्डलेष्वष्टमठेषु च । मध्वविजयप्रामाण्यात् । सर्वाऽपि माध्वी कथा मध्वविजयप्रमाणी हि भवति । परन्तु मध्वविजयकृदेव स्वयं स्ववचो व्याख्याति– 'नरहरितीर्थाः' इति ।

तथाहि समग्रं भावप्रकाशिकावचनम्–'हृषीकेशतीर्थाः । जनार्दनतीर्थाः । नरहरि-तीर्थाः । ....उपेन्द्रतीर्थाः । .... । ... वामनतीर्थाः.... । रामतीर्थाः । ....अधोक्षजतीर्थाः' इति । एतेन निर्विचिकित्सितं निश्चीयेत यन्नरहरितीर्था अदमारुमठीयपरम्पराया मूलयतय इति ।

एतावतित्थं कालमनधिगतपूर्वमपूर्वमेतत् प्रमेयम् । इतिहासस्योपरि कश्चनापूर्वः प्रकाशप्रसरः । चक्षुष्मतां नूतनमुपायनं चित्तरसायनम् ।

एतेनैतावत्तु निश्चप्रचम्– यन्नरहरितीर्था अदमारुमठीयपरम्पराया मूलप्रवर्तका आसन् । ततो रूप्यपीठे स्वसंस्थाने कमलेक्षणतीर्थान् संस्थाप्य स्वयं पद्मनाभतीर्थपरम्परामलञ्चक्रुरिति ।

केचिद् द्वौ नरहरितीर्थावास्तामिति यथाकथाच कन्थां सुस्यूषन्ति । कथ-मेकाभिधानता तर्हि? विवेकार्थं हि नाम क्रियते । नामसाङ्कर्ये कथं व्यक्ति-विवेकः? द्वयोरपि शिष्ययोरेकमेव नामधेयं ददौ मध्व इत्यद्भुतं पाटवप्रक-टनम् । किमिदं नामदारिद्र्यम्? नह्यनुन्मत्तः कोऽपि पिता तनयावेकैनैव नाम्ना काप्याकारयति ।

एतेनैतदपि स्फुटं विज्ञायते – यदुपरिगिरं गृहस्थसन्न्यास इत्यधोगिरं बालसन्न्यास इति च न प्रतनः सम्प्रदाय इति । यदा विरक्तः पुरुषः प्रजायते तदैव सन्न्यासविधिरितीयदेव प्राचीनम् । बालत्वं गृहस्थत्वं चावर्जनीयसन्निधिः ।

*

अथ किंनामा स यतिः श्रीमध्वस्य तुरीयाश्रमदीक्षां यो ददौ? अच्युतप्रेक्षाचार्य इति बहवः। 'जनोऽच्युतप्रेक्षमुदाहरत् स्फुटम्' इति मध्वविजयमूलैव साऽपि प्रतीतिः। यथा नरसिंहतीर्था इति। अच्युतप्रज्ञ इति तु वास्तवं नाम। तदेतदपि भावप्रकाशिकात एवावगम्यते। तथा हि भावप्रकाशिकायामच्युतप्रेक्षपदविवरणम्– 'अच्युतप्रेक्षः। 'प्रेक्षा प्रज्ञा प्रतिभा' इति'। यद्यच्युतप्रज्ञ इति नाम नाभविष्यत् तदा प्रेक्षापदस्य प्रज्ञावाचित्वे 'प्रेक्षा प्रज्ञा प्रतिभा' इत्यभिधानरत्नमालाया वचनोपन्यसनमनपेक्षितमप्रस्तुतं चाभविष्यत्।

उपरिष्टाच्च स्फुटमेतदाह– 'प्रददेऽच्युतात्मने'[४.३८] इत्यत्र 'अच्युते आत्मा बुद्धिः प्रज्ञाऽस्येति अच्युतात्मा अच्युतप्रज्ञः' इति। एतेन अच्युतप्रेक्ष इत्येव तन्नामेति वदन्तः शोच्याः, भावप्रकाशिकाविरोधादुपेक्ष्याः।

वेदाङ्गतीर्था अपि स्वटीकायां सर्वत्र अच्युतप्रज्ञपदमेव प्रयुञ्जते, न क्वाप्यच्युतप्रेक्ष इति।

पलिमारुमठे ताडपत्रेषूपलब्धं गुरुपरम्परापद्यमप्येतेन संवदते–

'वंशस्याऽदीन् सनकादीनुपासे दुर्वाससं परतीर्थाख्यभिक्षुम्।
'सत्यप्रज्ञं प्राज्ञतीर्थं च पश्चात्पश्चाच्छिष्यानच्युतप्रज्ञमध्वौ' इति

पूर्णप्रज्ञ इति नामाप्येतदेव सूचयति। सोऽच्युतप्रज्ञः, अयं पूर्णप्रज्ञ इति। यद्यच्युतप्रेक्ष इति नामाभविष्यत् तर्हि प्रायः पूर्णप्रेक्ष इति नामाकरिष्यत्। भावप्रकाशिका चेयमपरिचितचरप्रतनसम्प्रदायानामन्धश्रद्धां पराणुद्य चक्षुरुन्मील्य तथ्यं प्रकाशयति। तदस्या टीकाया अनुपममैतिहासिकमहत्त्वम्। अन्यदपि वक्तव्यं वैशिष्ट्यान्तरं पूर्वमेव प्रस्तावितम्।

द्वित्रिरियं मुद्रिताऽपि अपशब्दबहुला, अपपाठबहुला च दृश्यते। अतोऽत्र भावप्रकाशिकायाः शुद्धपाठप्रकटने यथासम्भवं प्रायत्यत।

*

अथापरा प्राचीनटीका वेदाङ्गमुनिविरचिता पदार्थदीपिका । एतावन्तमपि दीर्घमनेहसं तमोगर्भे निलीनाऽप्रकटितैवाऽसीत् । तस्याः प्रायः शुद्धतमः पाठोऽत्रेदमुपज्ञं सहृदयेभ्य उपहारीक्रियते ।

भावप्रकाशिकातः परमिदानीमुपलब्धासु व्याख्यासु प्रतनतमा सन्निकृष्टा च कालतो देशतश्च मूलकृतेः पदार्थदीपिका यस्या बहुलमनुकृतिर्विश्वपतितीर्थकृता टीका ।

श्रीवेदाङ्गतीर्थाः श्रीविष्णुतीर्थसंस्थानमारूढाः परम्परायां त्रयोदशाः । यत्र विंशाः श्रीवादिराजतीर्थाः । दशमाश्च वायुस्तुतिव्याख्यातारः श्रीवेदात्मतीर्थाः । तथाहीयं गुरुपरम्परा वेदाङ्गतीर्थपर्यन्ता सम्प्रति 'सोदेमठ' इति प्रथितस्य, पुरा 'कुम्भासिमठ' इति गदितस्य श्रीविष्णुतीर्थसंस्थानस्य–

१. विष्णुतीर्थाः
२. वेदव्यासतीर्थाः
३. वेदवेद्यतीर्थाः
४. वेदगर्भतीर्थाः
५. वरदेशतीर्थाः
६. वामनतीर्थाः
७. वासुदेवतीर्थाः
८. वेदव्यासतीर्थाः
९. वराहतीर्थाः
१०. वेदात्मतीर्थाः
११. विश्ववन्द्यतीर्थाः
१२. रत्नगर्भतीर्थाः
१३. वेदाङ्गतीर्थाः

श्रीमतां वेदाङ्गतीर्थानां वृन्दावनमुत्तरकर्णाटके 'सिद्धापुर' विभागे 'बिळगि' नामनि ग्रामे बहोः कालादलक्षितमरक्षितं चाऽसीत् । एतद्ग्रन्थप्रकाशनसमय एव तद्वृन्दावनस्यापि यदृच्छया नवीभवनं शिवमोग्गनगरनिवासिना मूलतस्तौळववंशजेन भगवदनुग्रहपात्रेण श्रीमता के.एल्.उपाध्यायेन सादरं सम्पादितमिति महत्तरमिदं प्रमोदस्थानम् । नूनं श्रीवेदाङ्गतीर्थानां महती तपःशक्तिरेव सम्प्रति फलोन्मुखी वर्तते ।

व्याख्या चेयं सरळा। नातिविस्तरा, नातिसङ्क्षेपा, नातिप्रौढा, नातिमुग्धा च। बहुलं भावप्रकाशिकामवलम्ब्यैव पदार्थवर्णनपरा। अथापि क्वचिद् भाव-प्रकाशिकाननुगुणमिव विभिन्नं पन्थानं पतति। न ज्ञायते किं तदाऽपि समग्रा भावप्रकाशिकाऽनुपलब्धाऽसीदिति। यदि तथा, सुभगा वयं सम्प्रति समग्रां भावप्रकाशिकामुपलभमानाः।

*

समग्रा भावप्रकाशिका वेदाङ्गतीर्थानामप्यनुपलब्धाऽऽसीदिति प्रतिभाति। भावप्रकाशिकावेदाङ्गतीर्थीययोर्विवरणेष्वनैकरूप्यमेव तत्र प्रबलं गमकम्। तथाहि कतिचनोदाहरणानि–

प्रथमसर्गे सप्तमे पद्ये 'गुणाढ्याः' इत्यस्य व्याख्यानम्–

'गुणग्राहित्वादयो गुणास्तैराढ्याः' [भावप्र.]।

'गुणाढ्याः महत्त्वदयाळुत्वादिगुणाढ्याः' [वेदा.]।

तथा तृतीये चतुःपञ्चाशे पद्ये–

'प्रकटभागवती श्रीमन्नारायणोपनिषत्' [भावप्र.]।

'उपनिषच्च श्रीमन्महैतरेयोपनिषदपि' [वेदा.]।

पञ्चमे त्रयोदशे पद्ये–

'सदास्पदं नक्षत्रास्पदं च' [भावप्र.]।

'सदास्पदं सतामाश्रयभूतम्, प्राणिनामाश्रयं वा' [वेदा.]।

षष्ठे त्रयोदशे पद्ये–

'गृहवे ग्रहणयोग्याय' [भावप्र.]।

'गृहवे गृहमागताय' [वेदा.]।

षष्ठ एव पञ्चविंशे–

'भारतमुत्तमं येषु शास्त्रेषु' [भावप्र.]।

'भारतं च तदुत्तमं चेति भारतोत्तमम्' [वेदा.]।

तत्रैव सप्तपञ्चाशे–

'कलापः काञ्ची'[भावप्र.]।

'श्रीमद्रत्नकलापं कान्तिमद्रत्नखचितभूषणाढ्यम्' [वेदा.]।

अष्टमेऽष्टादशे पद्ये–

'परशुरेव भासमानरश्मिरस्य'[भावप्र.]।

'परशौ कुठारे भासमानाभिर्गोभिस्तेजोभिर्निहितम्'[वेदा.]।

तत्रैव त्रयोविंशे पद्ये–

'गावो नयनानि च। प्राप्तकामानां तापसानाम्..... सरसा आर्द्रधीगिरः'[भावप्र.]।

'सकलगोकुलप्रियः सर्ववेदसमूहप्रियः...तापसो विश्वामित्रः... रसार्द्रधिया गीर्भिश्च सहिताः'[वेदा.]।

तत्रैव पञ्चविंशे–

'क्षपितः उग्रसेननृपपुत्रः येन तत् पौरुषमस्य कृष्णस्य'[भावप्र.]।

'क्षपितं उग्रसेनाख्यनृपसूनोः कंसस्य पौरुषं येन'[वेदा.]।

त्रयोदशे एकान्नविंशे पद्ये–

'निषिद्धकाम्यभावः निषिद्धकाम्यकर्मणोरभिप्रायः'[भावप्र.]।

'काम्यभावः काम्यकर्मविषयकं मनः। निषिद्धश्चासौ काम्यभावश्चेति निषिद्धकाम्यभावः। त्यक्तो निषिद्धकाम्यभावो यैस्ते'[वेदा.]।

पञ्चदशेऽष्टचत्वारिंशे पद्ये–

'स्वव्याहत्यादिना प्रमाणाविषयत्वेन च'[भावप्र.]।

'स्वव्याहत्यादिना। अत्राऽऽदिशब्देनानुक्तिर्गृह्यते'[वेदा.]।

अथाप्यंशत उपलब्धेति च ज्ञायते। तथाहि तैरेवोक्तम्–

'ग्रन्थकृता स्वयमेव सङ्गृह्याप्युक्तं भावप्रकाशिकायाम्। तदस्माभिरुदाह्रियते' इत्यादि।

पदानामर्थानुवर्णन एव दत्तदृष्टिरियं व्याख्या तत्रतत्र व्याकरणविशेषं विवृण्वानाऽपि न तत्र बद्धान्तरा । न नितरामलङ्कारेषु, न च्छन्दस्सु, नवा निर्वचनेषु ।

वेदाङ्गतीर्थैर्महाभारततात्पर्यनिर्णयस्यापि लघुटिप्पणी प्राणीयत । बहुलं श्रीहृषीकेशतीर्थलिखितमूलपाठानुगुणा चेयम् । तस्या अपि मया शुद्धपाठः संशोधितः । सम्प्रति सम्प्रतीक्षते प्रकाशनम् । एभिरेव कर्मन्दिभिर्विरचिता ऐतरेयभाष्यटीकाऽपि सम्प्रत्येवोपलब्धेति श्रीसोदामठाधीशाः श्रीविश्वोत्तमतीर्थश्रीचरणाः करुणया प्रकट्यकार्षुः ।

भगवद्गीताया अपि काचन दीपिका तैः प्रणीतेति केवलं श्रूयते नच दृश्यते ।

*

अपरासु टीकासु श्रीविश्वपतितीर्थविरचिता पदार्थदीपिकोद्बोधिका, छलारी शेषाचार्यविरचिता मन्दोपकारिणी च प्रकटिते प्रचुरं प्रचलिते अध्ययनपरम्परायाम् ।

श्रीविश्वपतितीर्था अधोक्षजतीर्थसंस्थानमारूढा विंशाः पीठाधिपतयः । तदीया टीका पदार्थदीपिकोद्बोधिका तु बहुलं वेदाङ्गतीर्थीयमनुसरन्ती तदनुकृतिरेव । स्वयं तैरेव चेदमुदघुष्यत– 'श्रीवेदाङ्गमुनिविरचितश्रीमध्वविजयटीकाविवृतौ श्रीविश्वपतितीर्थकृतौ....' इत्यादि ।

'वेदाङ्गाभिधदेशिकैर्निजजनज्ञानादिसंसिद्धये
'या व्याख्याभिधदीपिका विरचिता श्रीकृष्णपूजाविधौ ।
'तस्याऽबोधनमात्रमत्र हि कृतं बालावबोधाय यत्
'तन्मात्रेण च तोषमेतु भगवान् श्रीविट्ठलो मध्वगः' इति च ।

अत एव सा पदार्थदीपिका । इयं पदार्थदीपिकोद्बोधिका । नातिप्रौढा । 'बालावबोधाय' इति स्वयमेव ह्याह ।

एतैर्विरचिता उपलब्धाष्टीकाः– द्वादशस्तोत्राणां प्रचलितपाठस्य टीका, [अत एव श्रीविश्वपतितीर्थानां प्रशिष्यैः श्रीविश्वाधीश्वरतीर्थैः हृषीकेशतीर्थीयमूल-

पाठानुसारि द्वादशस्तोत्रपाठं स्वयं विलिख्य विश्वपतितीर्थादृतः पाठो न मूलपाठानुगुण इति स्फुटमुक्तम् । तदेतत् ताळपत्रात्मकं पुस्तकं सम्प्रत्यपि श्रीपेजावरमठीये हि पुस्तकालये सुरक्षितं वर्तते ।] पञ्चस्तुतीनां टीका, ब्रह्म-पारस्तोत्रटीका, चतुर्दशस्तोत्राणां टीका, मणिमञ्जरीटीका, मध्वविजयटीका, सङ्ग्रहरामायणटीका च । अन्या अपि रामसन्देशादीनां टीकास्तैर्विरचिता इति वदन्ति । परन्तु नोपलभ्यन्ते ।

तत्रापूर्वः कोऽपि प्रौढिमा सङ्ग्रहरामायणटीकायां विलसति । विश्वपतितीर्थानां पाण्डित्यस्य चेयं टीका निकषोपलायते । पलायते च यस्यामधीतायां भरतो लक्ष्मणाग्रज इत्याद्या केषाञ्चिन्मन्दमतीनामन्धश्रद्धाजडानां जडानामविद्या-मूला कुशङ्का । किं करणीयम्? कूपे भवन्ति मण्डूकाः । अमुद्रितेयं रमणीया सङ्ग्रहरामायणटीका मुद्रणं प्रतीक्षते ।

मध्वविजयटीकाऽपि सकृदेव मुद्रिता, अशुद्धिबहुला च । शुद्धं पुनर्मुद्रण-मपेक्षितम् ।

इत्थं द्वौ यतिशेखरौ मध्वविजयं स्वव्याख्ययाऽभ्यर्हयाञ्चक्रतुरिति महतीयं गौरवभूमिर्लिकुचकाव्यस्य ।

अवशिष्टेषु छलारीयटीका मन्दोपकारिणी द्विस्त्रिर्मुद्रिता शोधकप्रमादेन बह्वबद्धकलिताऽपि प्रचुरं प्रचलिता ।

मुद्रितेषु सर्वेष्वपि पुस्तकेषु न शुद्धपाठे भरो दृश्यते । सर्वमपि याथाकथा-चम् । को न्वपेक्षते शुद्धं पाठम्? ननु राराज्यन्ते अशुद्धपाठशुभसम्प्रदायप्रव-र्तकाः । सम्प्रदायभञ्जनमेवैतत् यच्छुद्धपाठान्वेषणम् ।

हन्त विस्मृतमाचार्यवचोऽप्येतैः –‘ग्रन्थोऽप्येवं विलुळितः किम्वर्थो देवदुर्गमः’ इति । एवं ग्रन्थविलोळकानां शुद्धपाठविमुखानामथ चाशुद्धपाठे बद्धादराणां परपुष्टानां साम्राज्येऽपि केचिदनुरज्यन्ते शुद्धे पाठे शुद्धे चार्थे । तेषां कृते किलैष यत्नः । इत्थङ्कारं शुद्धः पाठः, एवङ्कारं चार्थ इति । ‘ये नाम केचिदिह नः प्रथयन्त्यवज्ञां जानन्ति ते किमपि तान् प्रति नैष यत्नः’ ।

*

सम्प्रति प्रचलितोऽपपाठप्रकारः किञ्चिदिव प्रदर्श्यते जिज्ञासूनां स्फुटावबोधाय। तथाहि विश्वपतितीर्थीयव्याख्यानोपेते मुद्रिते पुस्तके 'कीर्तिं त्रिलोक्यां हृदये मुकुन्दम्'[१–४४] इति प्रचलितः पाठ एव मुद्रितः । इयं तस्य विश्वपतितीर्थकृता व्याख्या– 'त्रिलोक्यां कीर्तिं निधाय, हृदयं मनः मुकुन्दे निधाय' इति ।

एतेन स्फुटं प्रतीयते –'हृदये मुकुन्दम्' इत्यर्वाचीनोऽपपाठः। 'हृदयं मुकुन्दे' इति प्राचीनपाठ एव विश्वपतितीर्थाभिमत इति । अयमेव चार्थतः सुन्दरः पाठः । अयमेव च वेदाङ्गतीर्थसम्मतः पाठः । नहि द्वौ मूलकृत्सम्मतौ प्रायः पाठौ भवतः । एकः पाठो भवति । अपरस्त्वपपाठः ।

*

अन्यच्चोदाहरणमिदं भवति– 'बद्धाञ्जलिर्मरुदनर्घ्यमधत्त मूर्ध्नि'[२.४] इति। अत्र 'अनर्घ्यम्' इति सर्वत्र मुद्रितः प्रचलितः पाठः । परन्तु विश्वपतितीर्था अन्यथैव व्याचक्षत– 'न विद्यतेऽर्घो मूल्यं यस्य तम्' इति। तथाच 'अनर्घम्' इति प्रतनः पाठः । 'अनर्घ्यम्' इत्यर्वाक्तनः प्रचलितोऽपपाठः ।

वेदाङ्गतीर्था अपि 'अनर्घम्' इत्येव पेठुः । छलारिशेषाचार्योऽपि । तथाहि तद्व्याख्यानम्– 'अनर्घं मूल्यरहितम्' इति। अर्घो हि मूल्यमुच्यते नत्वर्घ्यम्। हस्तावनेजनं त्वर्घ्यमुच्यते । तथाच 'अनर्घ्यं मूल्यरहितम्' इति मुद्रितश्छलारीयपाठः शोधकप्रमाद एव। नूनं शोच्यास्ते येऽनर्घ्यमित्येव कथञ्चिद् योजनीयमिति गद्गद्यन्ति ।

*

अपरं चेदम्– 'कुलित्थकुलं प्रपक्वम्'[२.३८] इति ।

कुलित्थपदं प्राचीनकोशेषु न क्वाप्युदलिख्यत । कौ भूमौ लग्नं तिष्ठतीति कुलस्थमिति तन्निर्वचनम्। 'हुरुळि' इति भाषायाम्। कुलस्थं कुलत्थ-

मासीत्। विस्मृतनिर्वचनानां मुखे कुलित्थमासीत्। कौ लीनं तिष्ठतीति नूतनं निर्वचनं च निरमायि। अदृष्टधान्यमञ्जरीणामिदं निर्वचनम्। न तद् भूमौ लीयते। दृश्यत एवोपरिष्टात् चक्षुष्मताम्।

कुलस्थमित्येव पठन्ति वेदाङ्गतीर्थाः। तदनुसारिणि विश्वपतितीर्थीयेऽपि तथैव भाव्यमिति स्फुटम्। कुलित्थमिति लिपिकृतां प्रमाद एव। चक्षुषी निमील्य गजनिमीलकया समशोधयन्। का गतिः?

*

अन्यच्चेदं सर्गे षष्ठे–'मरकतरत्नमयस्थलाग्र्यशोभम्'[६.५६]।

मरकतमित्यर्वाचीना वैयाकरणाः। मरतकमिति प्राचीनाः। महाभारततात्पर्यनिर्णये मध्वोऽपि मरतकमित्येव प्रायुङ्क्त– 'शुभमरतकवर्णो रक्तपादाब्ज-नेत्राधरकरनखरसनाग्रश्चक्रशङ्खाब्जरेखः' इति हृषीकेशतीर्थपाठः। पुराणेष्वपि सर्वत्र तथैव प्राचीनपाठः।

तथाहि निर्वचनम्– मरं मरणं तकति परिहसतीति मरतकम्। तक हसने। 'तक सहने' इति दुर्गः। 'तकेत् तङ्क्येद् यथासङ्ख्यं हसने कृच्छ्रजीवने' इति दैवम्। 'सहन इत्यपरः पाठः' इति पुरुषकारे लीलाशुकः। तुष्यतु तत्रभवानपि। तथाऽपि भवति निर्वचनम्– मरणं सहते मर्षयतीति। सहनमित्यनभिभाव्यता। ननु सोऽपि म्रियते यो मरतकं ध्रियते। सोऽपि ममार यो दधार। मृषीष्ट नाम। नहि मरतकममरतामापादयतीति ब्रूमः। रक्षार्थं हि ध्रियते मास्म कोऽप्यकाले मृतेति।

अर्वाचीनास्त्वेवं निर्वदन्ति– मरकं तरन्त्यनेनेति। वेदाङ्गतीर्थास्तु प्राचीनमेव रूपं पेठुः– 'मरतकरत्नमयस्थालाग्र्यशोभम्' इति।

*

नवमे– 'तानितानि च वितानचेतसः'(९.५२) इति प्रचलितः पाठः। 'वितानिचेतसः' इति प्राचीनः पाठः। अर्थदृष्ट्या चायमेव साधुः। 'वितानम्'

इति विस्तारः। 'वितानि' इति विस्तृतमुच्यते। विस्तृतचेता इति हि वक्तव्यम्। 'वितानिचेतसः' इत्येव सर्वव्याख्यातृसम्मतः पाठः। 'वितानचेतसः' इति प्रमाद एवायं तुन्दपरिमृजानाम्।

✻

दशमे चैकं पद्यमित्थं पठ्यते–

अयमेव गोविषयतोऽपि कुत्रचित्
सदसि जनताऽर्थितो जवात्।
पुष्पमुत फलमहो विदधे
जनसुस्तिदानुपमगानसम्पदा॥ [१०.५३]

प्रायः सर्वत्राप्येवमेव पाठः। वस्तुतस्तु 'अयमेव गोविषयतोऽपि' इतीयानेव प्रथमः पादः। 'कुत्रचित्' इत्यधिकम्। तदिदं व्याख्यानगतं पदं छन्दस्स्वकृतमुखैरनन्तर्वाणिभिर्मूले भ्रान्त्या निवेशितम्। तथाहि प्राचीनटीकायाम्– 'तत्र कुत्रचित् सदसि जनतार्थितः' इति। विश्वपतितीर्थीयेऽपि तथा। 'गोविषये तन्नामकग्रामेऽपि कुत्रचित् सदसि सभायाम्' इति छलारीयम्। अत्र सर्वत्रापि व्याख्यानेषु 'कुत्रचित्' इति पदश्रवणं मूलप्रतीकमेतदिति भ्रान्तिबीजम्।

विषममिदं वृत्तमुद्गता नाम। १०+ १०+ ११+ १३ इति पादेष्वक्षरव्यवस्था। तथाहि तल्लक्षणमामनन्ति–

'प्रथमे सजौ यदि सलौ च नसजगुरुकाण्यनन्तरम्।
'यद्यथ भनजलगाः स्युरथो सजसा जगौ च भवतीयमुद्गता' इति।
पिङ्गलनागोऽप्याह– 'उद्गतामेकतः स्जौ स्लौ, न्सौ ज्गौ, भ्नौ ज्लौ ग्, स्जौ स्जौ ग्' (५.२५) इति।

'यत्र प्रथमे पादे सकार (।।ऽ) जकार(।ऽ।)सकार(।।ऽ) ल(।)कारैर्दशाक्षराणि भवन्ति, द्वितीये पादे नकार(।।।) सकार(।।ऽ) जकार(।ऽ।) ग(ऽ) कारैर्दशैव, तृतीये च पादे भकार(ऽ।।)नकार(।।।)जकार(।ऽ।)लकार(।) ग(ऽ)-

कारैरेकादशैव, चतुर्थे पादे सकार(।।ऽ)जकार(।ऽ।) सकार(।।ऽ) जकार(।ऽ।)-ग(ऽ)कारैस्त्रयोदश तद् वृत्तं 'उद्गता' नाम। यत्र सूत्रे गकारो (ऽ) लकारो(।) वा श्रूयते तत्र तेनैव वृत्तस्य पादः परिसमाप्यते। उद्गतामिति कर्मविभक्तिश्रवणात् पठेदित्यध्याहार्यम्। 'एकतः' इति प्रथमं पादं द्वितीयेन सहाविलम्बेन पठेदित्यर्थः। 'उपस्थितप्रचुपितं पृथगाद्यम्' इत्यतः सिंहावलोकितन्यायेन आद्यग्रहणमनुवर्तनीयम्। तेनाऽद्यमेव पादमेकतः पठेत्' इति मृतसञ्जीविन्यां हलायुधः। 'तरसोदिता सजसलेषु' इति जयदेवः।

कृष्णावधूतोऽप्येवमेवाऽह–

'प्रथमे सजसा लश्चेद् द्वितीये नसजा गुरुः।
'तृतीये भ्नजूलगास्तुर्ये सज्सज्गैः सहितोद्गता' इति।

यत् क्वचिद् व्याख्यानेषु लक्षणान्तरं मुद्रितम्– 'प्रथमचरमयोः सजसजगाः, द्वितीये नसजगाः, तृतीये भनजलगाश्चेदुद्गता' इति तच्छन्दःशास्त्रविरुद्धं निर्मूलं चेत्युपेक्ष्यम्। अपि च तथात्वे त्विदमंशतोऽर्धसमं वृत्तं स्यात्, प्रथमचतुर्थयोरैक्यात्, विषमं हीदं वृत्तं पठ्यते।

तथाहीत्थं शुद्धः प्राचीनपाठः–

सगण जगण सगण लघु
।।ऽ ।ऽ। ।।ऽ ।
अयमे। वगोवि। षयतो। पि।

नगण सगण जगण गुरु
।।। ।।ऽ ।ऽ। ऽ
सदसि। जनता। र्थितोज। वात्।

भगण नगण जगण लघु गुरु
ऽ।। ।।। ।ऽ। । ऽ
पुष्पमु। तफल। महोवि। द। धे।

सगण जगण सगण जगण गुरु
।।ऽ ।ऽ। ।।ऽ ।ऽ। ऽ
जनसु। प्तिदानु। पमगा। नसम्प। दा॥

तस्मादत्र कुत्रचित्पदं न कुत्रचिदपि।

*

द्वादशे चेदं पद्यमेवं पठन्ति–'आदौ ह्रस्वत्वेन वत्सानुवृत्त्या–' [१२.३२] इत्यादि ।

असङ्गतमेतत् । वत्सानुसृतिरिति हि काचिद् विवृत्तिः शीक्षाशास्त्रे पठ्यते । न वत्सानुवृत्तिरिति । तथा ह्यत्र प्राचीनटीका– 'आदौ ह्रस्वत्वेन हेतुना वत्सानुसृत्यां वत्सानुसृत्याख्यायां विवृत्तौ' इति । भावप्रकाशिकायां च तथा । गोवत्सानुसरणे पादौ वर्तयन् इति च श्लेषः । सर्वथाऽपि 'आदौ ह्रस्वत्वेन वत्सानुसृत्याम्–' इति शीक्षाशास्त्रसम्मतः साधुः प्राचीनः पाठः । अशिक्षितशीक्षाशास्त्रैः कृतेयमपपाठशिक्षा काव्यस्य ।

अत एवोत्तरपद्येऽपि–'शिक्षाशिक्षालक्षणानाम्–' [१२.३५] इति प्रचलितं पाठमपहाय 'शीक्षाशिक्षालक्षणानाम्' इति प्राचीन एव प्रयोग ऊर्यक्रियत । तथाहि तलवकारभाष्ये–'शीक्षाद्यं स्मृतयस्तथा । अङ्गानि' इति ।

*

क्वचिद् ग्रन्थान् प्रक्षिपन्ति । तद् यथैकादशे पद्यद्वयम्–

'उपचारनन्दनमिदं द्युवनं नियमेन नन्दयति यन्न जनम् ।
'परमेव नन्दनमुपेन्द्रवनं सकलं सदा यदभिनन्दयति' इत्यष्टत्रिंशात् पद्यादनन्तरमेकं पद्यम् । तथा–

'सुरतोत्सवोत्सुकतया त्वरयन् करपल्लवं निवसनग्रहणे ।
कररुद्धमायतदृशः सहसा त्वरयत्यथ द्विगुणमिष्टतमः' इति चैकोनषष्टितमात् पद्यादनन्तरमेकम् ।

प्राचीनटीकासु न व्याख्याते एते । छलारीयेऽप्याद्यपद्यटीकायामुक्तम्– 'अयं श्लोकः प्रक्षिप्त इत्याहुः । अत एव पूर्वटीकाकारैर्न व्याख्यातः' इति । उत्तरपद्यटीकायामप्येतद् वाक्यमनुवर्तनीयम् ।

एतेन प्राचीनपाठानुसारेण मूले पद्यसङ्ख्या षडुत्तरं सहस्रमेव [१००६], नाष्टोत्तरं सहस्रम् [१००८]। रोचकमेतद् यत् कर्णाटभाषायां षडुत्तरं सहस्रं 'साविरारु' इत्यपरिमितं वक्ति ।

*

एवं कुर्युः क्वचिच्च व्यत्यासम् । तथाहि पञ्चदशे श्रूयते–

'अङ्घो तापस नो शून्यं कारणं कुम्भकर्तृवत्' [१५.२९] इति ।

अत्र सम्बोधनार्थे 'अङ्ग' इतिवत् 'अङ्घो'पदं पठ्यते । नेदं वैयाकरणैः कोशकारैश्चाभ्युपेयते । तेन केचित् पाठमेव व्यतियन्ति– 'अहो तापस–' इत्यादि । 'अङ्घो' इति बौद्धनये प्रसिद्धं सम्बोधनम् । परिहासगर्भं चेदं पालीभाषागतं पदम्– 'अयि अविवेकिन्' इति। सम्प्रति नेदं पदं पालीकोशेषु पठ्यत इति वदन्ति। एतस्य स्थाने 'अम्भो' इति पदं पठ्यते। 'अङ्घो' इति तु प्रतनं रूपम्। त्रिविक्रमपण्डिताचार्योऽप्याह तत्वदीपिकायां बौद्धनयप्रसङ्गे – 'अङ्घो देवप्रिय' इति । सोऽयमपूर्वः सौगतान् प्रति परिहासः । 'अङ्घो तापस' इति ।

महानयमपचारः, यत् 'अहो तापस–' इति पाठान्तरकरणम्। अपिच अङ्ग तापस पाठान्तरप्रिय, व्याकरणरीत्याऽपि सुसाधमिदं पदम्। तथाहि– अगि गतौ। अङ्गति। पचाद्यचि 'अङ्ग' । अघि गतौ। अङ्घते। डोप्रत्यये 'अङ्घो' इति भवति । अहो इति यथा ।

*

एवं प्रमादात् क्वचिदन्यथा। तथाहि पञ्चदश एव क्वचित् प्रचलिता पद्यानुपूर्वी–

'वेदबाह्यो विपश्चिद्भिरेष निश्चीयतां ततः ।
'यो वेदवेदितार्थानां नित्यसन्त्यागसंश्रवी'[१५.३७] इति ।

सर्वव्याख्यानविरुद्धेयमानुपूर्वी । प्रमादमात्रमूलाधारा खट्वारूढानामियं कथा । इयं सर्वसम्मताऽऽनुपूर्वी व्यत्यस्ता भवति–

'यो वेदवेदितार्थानां नित्यसन्त्यागसंश्रवी ।
'वेदबाह्यो विपश्चिद्भिरेष निश्चीयतां ततः' इति ।

स एव च पाठक्रमोऽत्र समादृतः। दिङ्मात्रमेतत्। एवमनेके प्रमादाः। यथाशक्ति प्रमादपरिमार्जने शुद्धपाठसमार्जने चात्र प्रायत्यतेति सप्रश्रयं निवेद्यते ।

*

अपिच पाणिनीयम्मन्या किञ्चिदिव विज्ञापनीयाः ।
साधवः शब्दा द्विविधा भवन्ति– पाणिनीया अपाणिनीयाश्चेति । पाणिनीयाः साधव एव । नतु पाणिनीया एव साधवः । बहुलमत्र पाणिनीयमेव व्याकरणमनुवर्तिष्यते । क्वचिदन्यथा । तद् यथा–

अलभिष्टेति, विविधभूरतीत्येति । एतादृशानां बहूनां प्रयोगविशेषाणामुपपत्तिरुपरिष्टात् तत्वचन्द्रिकायां विस्तरेण विमृष्टा । विवृतं च वैयाकरणानां प्रक्रियैव क्वचिदपशब्दानां जननी बभूवेति । वैयकरणा अपि बभ्रमुः ।
तथाहि– अश्रद्धेया वैयाकरणानां धातुपाठा भवन्ति । षच सेचन इत्येके पठन्ति । सेवन इत्यन्ये । युजु कुत्सायामित्येके । यु जुगुप्सायामित्यन्ये । युजु जुगुप्सायामित्यपरे । किमितोऽपि साक्षी बलवानपेक्ष्यते वैयाकरणविभ्रमस्य?
एवं ळळकारप्रक्रियाऽप्यत्र विभिन्नैव द्रष्टव्या । पाणिनिना ळकारस्यास्मरणाड्डकारप्रतिनिधिमन्तरेणान्यस्य । प्राचीनसंस्कृते तु स्वतन्त्रा ळकारा भवन्ति ।

तद्यथा– काल इति समयः । काळ इति कृष्णः ।
बहून् लातीति बहुलम् न बहुळम् । अपितु बहळम् न बहलम् ।
विरळं न विरलम् । केरळं न केरलम् । बाहुषाळी न बाहुशाली ।
तदेतत् सर्वं मूलग्रन्थेषु भगवत्पादप्रयोगादवगम्यते ।
तदनुगुणमत्रापि तत्रतत्र ळकारः प्रायोजि ।

तदेतत् पारायणिकैरवधातव्यम् । यतः सर्वलकारता मध्वस्याननुमता चावैदिकी च ।

✻

क्वचिदेवमपि भायात्– अर्वाचीन एव पाठः स्वरस इति । तद् यथा सर्गे तृतीये पठ्यते– 'द्रुतसखिष्वभवत् स पुरःसरः' [३.४४] इति । 'द्रुतसखेषु' इति भाव्यम् । स्मरति हि पाणिनिः– 'राजाहःसखिभ्यष्टच्' इति । छलारिशेषाचार्यः पुनस्तमेव पाठमुपादत्त । प्राचीनटीकासु तु 'द्रुतसखिषु' इत्येव पठ्यते । अभ्युपयन्ति हि वैयाकरणा एव समासान्तो विधिरयोगव्यवच्छेद इति । उदाहरन्ति च 'शुच्यम्पि तटाकानि' इत्यादीन् प्राचीनप्रयोगान् । 'गङ्गासङ्गेन नैर्मल्यं रथ्याद्भिर्लभ्यते यथा' इति च टीकाकृत्पादाः । अत्रैव च 'पुष्पवारं सुगन्धम्' इति पण्डिताचार्यः । यदि वैयाकरणानां शासनमनुल्लङ्घनीयमभविष्यत्, 'सुगन्धिम्' इत्येवावक्ष्यत् । 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' [५.४.१३५] इति हि पाणिनिः स्मरति ।

तथाच प्राचीनटीकास्वप्रकटार्थान् प्रकटयितुम्, अचर्चितान् प्रमेयभागान् चर्चयितुम्, छन्दोनिरुक्तव्याकरणादिषु विशेषांशान् मीमांसितुम्, शीक्षाकल्पादिषु येऽपूर्वार्था लिकुचकविनाऽऽविष्कृतास्तान् स्फुटयितुं च मयाऽत्र काचिन्नूतना टीका विरचिता 'तत्वचन्द्रिका' नाम । यत्र पूर्वे न पदं प्रसस्रुस्तत्रेयं विहरति । स्फुटमेतदुपरि परिशीलनशीलानां निर्मत्सराणां सताम् ।

✻

अत्रायं पाठक्रमः– प्रथमं मध्वविजयः, ततो भावप्रकाशिका, ततो वेदाङ्गतीर्थीया पदार्थदीपिका, ततस्तत्वचन्द्रिकेत्येतावान् प्रथमो भागः ।

द्वितीयभागे मध्वविजयसङ्ग्रहरूपा प्रमेयनवमालिका । श्रीहृषीकेशतीर्थसंस्थानमारूढैः श्रीरघुवर्यतीर्थैर्विरचिता तट्टीका सौरभप्रकाशिका च । सम्बन्धदीपिका नाम मदीया लघुटिप्पणी च ।

तदेवं मध्वचरितमधिकृत्य नारायणपण्डितेन विरचितास्त्रयोऽपि ग्रन्था एकत्र प्रकाशिता भवन्ति सहापूर्वाभ्यां द्वाभ्यां टीकाभ्याम्– वेदाङ्गतीर्थकृतया मध्वविजयटीकया पदार्थदीपिकया, रघुवर्यतीर्थकृतया प्रमेयनवमालिकाटीकया सौरभप्रकाशिकया च ।

*

प्रमेयनवमालिकाया वैशिष्ट्यं तावद् सौरभप्रकाशिकायां स्फुटमभ्यधायि– 'श्रीनारायणपरमानुग्रहपात्रभूतसकलसुरगुरुश्रीमुख्यप्राणावतारलीलाप्रतिपादनलोलः श्रीनारायणपण्डिताचार्यः कृतश्रीमध्वविजयाख्यकाव्योऽपि तस्यानल्पतया प्रतिदिनं पठनं व्यसनशतकुण्ठितसत्कर्मणां पुंसामशक्यमिति तदनुजिघृक्षया त्रिभिस्त्रिभिः श्लोकैर्दशमषोडशसर्गकथाप्रतिपादकम्, एकैकश्लोकेनैकादशत्रयोदशसर्गकथाप्रतिपादकम्, द्वाभ्यान्द्वाभ्यां श्लोकाभ्यामितरसर्गकथाप्रतिपादकम्, एवं सङ्क्षेपेण मध्वविजयोक्तनिखिलप्रमेयप्रतिपादकम्, अत एव प्रमेयनवमालिकाख्यम्, प्रतिश्लोकं वन्दनप्रार्थनान्यतररूपतयाऽतिशयेनैहिकामुष्मिकश्रेयःसाधनं ग्रन्थं चिकीर्षुः....' इत्यादि ।

आह च स्वयमेव प्रमेयनवमालिकायामुपसंहारश्लोके–

'दशप्रमतिविक्रमं बहुविधात्मना हेमवत्
'स मध्वविजयाभिधं व्यधित भावदीपाह्वयम् ।
'प्रमेयनवमालिकां पुनरिमां च दक्षाश्रितां
'सतां श्रवणभूषणं व्यदधदेष नारायणः' इति ।

भावदीपाह्वयमिति भावप्रकाशिकाम् ।

अस्य सङ्ग्रहमध्वविजयस्य द्वे टीके उपलब्धे । एका श्रीराघवेन्द्रश्रीचरणैः पूर्वाश्रमे रचिता । अपरा रघुवर्यतीर्थकृता याऽत्र प्रकटिता । पूर्वं सकृन्मयैव प्रकाशितेयं टीका सम्प्रति विशेषतः परिशुद्धा प्रकाश्यते ।

व्याख्या चेयं विस्तृता, मूलस्यापूर्वमर्थमाविष्कुर्वन्ती कयाचिदपूर्वया विवरणशैल्या चित्तमावर्जयति ।

व्याख्यातारः श्रीरघुवर्यतीर्थाः(१६००) सम्प्रति पलिमारुमठ इति प्रथितस्य श्रीहृषीकेशतीर्थसंस्थानस्य पीठमारूढाः परम्परायां एकान्नविंशाः । तथाहि तन्मठीयगुरुपरम्परा तावत्पर्यन्ता–

१. हृषीकेशतीर्थाः
२. समात्मेशतीर्थाः
३. सम्भवतीर्थाः
४. अपराजिततीर्थाः
५. विद्यामूर्तितीर्थाः
६. राजराजेश्वरयतयः
[वेदान्तराज्ये पट्टाभिषेकात् पूर्वमेव प्राप्तहरिपदाः]
७. श्रीनिधितीर्थाः
८. विद्येशतीर्थाः
९. श्रीवल्लभतीर्थाः
१०. जगद्भूषणतीर्थाः
११. रामचन्द्रतीर्थाः
१२. विद्यानिधितीर्थाः
१३. सुरेशतीर्थाः
१४. राघवेन्द्रतीर्थाः
१५. रघुनन्दनतीर्थाः
१६. विद्यापतितीर्थाः
१७. रघुपतितीर्थाः
१८. रघुनाथतीर्थाः
१९. रघूत्तमतीर्थाः
२०. रामभद्रतीर्थाः
२१. रघुवर्यतीर्थाः

तत्कृतौ द्वौ ग्रन्थावुपलब्धौ । इयं टीका, रघुनाथविजयं नाम काव्यं च । वृत्तरत्नाकरे लक्षितानां छन्दसां उदाहरणरूपाणि पद्यानि स्वोपास्यश्रीरामभद्रस्य चरितरूपतया निबद्धानि रघुनाथविजयनाम्ना प्रथितानि । लघुकाव्यं चेदं प्रायः श्रीरघुवर्यतीर्थैरध्ययनवेलायां बाल्य एव रचितम्, मुद्रितं चेदं मैसूरुनगरीय-प्राच्यसंशोधनालयेन । एतेषां परमगुरवो विद्यागुरवश्च विद्वत्तल्लजाः श्रीरघूत्तम-तीर्थाः । तथाहि सौरभप्रकाशिकाया उपसंहारे–

'सुमध्वागमपीयूषं मां योऽपाययदाशु तम् ।
'रघूत्तममुनिं वन्दे परमं गुरुमन्वहम्' इति ।

रघुनाथविजयेऽपि–

'सुखमुनिशास्त्रमतुल्यं व्याख्यान्मे यो महातपोभूषः ।
'वन्दे तं यतितिलकं रघूत्तमाख्यायुतं दयावार्धिम्' इति ।

स्वगुरुस्तुतिश्च तत्रैव–

'यत्पादसंश्रयान्मे विनाऽतियत्नेन बुधताऽभूत् ।

'तं रामभद्रनाम्ना युतं भजेऽहं गुरुं प्राज्ञम्' इति ।

सुभाषितशतकम्, काश्चनोपनिषदामन्तरङ्गार्थचिन्तनरूपाष्टिप्पण्यश्च मठे सम्प्रत्युपलभ्यमाना एतेषामेव कृतय इति सम्भाव्यन्ते। इयं प्रमेयनवमालिकाटीका तु तेषां प्रबुद्धा प्रगल्भा च कृतिरिति स्फुटं विदुषाम्। हृषीकेशतीर्थैः लिखितेन सर्वमूलग्रन्थानां मूलपाठेनाङ्कितस्य ताडपत्रस्य गळितताम‌नुलक्ष्य तस्य पुनर्लेखनमेतैः कृतमद्यापि मठे सुरक्षितमस्ति ।

*

मध्वविजयटीकायाः पदार्थदीपिकायाः मूलकोशोऽपि श्रीरघुवर्यतीर्थैः संशोधित एवास्माभिरत्रोपयुक्तः। चक्रबन्धसर्वतोभद्रबन्धयो रेखाविन्यासपूर्वकं ग्रन्थान्ते तैरेवमुल्लिखितम्–



'चक्रबन्धः ।

'धन्योऽमह्यत नाकिनामहितहृद्बाणस्समोऽजस्य यो

'मध्वो ध्वस्तदुरागमोऽग्र्यहिमगुश्रीः काममायामिहृत् ।

'विष्णुं विश्वजयप्रदं स हि नमन् सेव्यं सुसौख्यं मुदा

'दाक्ष्याच्छ्रीधरमामयादिविरही योगी सुहृत् सर्वदा ॥

'धाराषट्के तृतीयाक्षराणि मध्वविजयाख्यमित्येवंरूपाणि ।

षष्ठाक्षराणि नारायणकाव्यमित्येवंरूपाणि ।

स	मा	न	या
मा	य	या	त
न	या	स	ना
या	त	ना	ल



'सर्वतोभद्रम् ।

'रघुवर्यतीर्थेन लिखितमिदं बन्धद्वयम्' इत्यादि ।
अन्ते च काचिदपूर्वा गुरुकथा न्यरूपि–

'श्रीहयग्रीवाय नमः । निश्चित्योत्क्रमणं रघूत्तममुनिः शिष्यप्रशिष्यौ यती कर्तव्यान्यनुशास्य शास्त्रविधिना स्नात्वाऽथ जप्त्वा मनून् । सम्पूज्याथ रघुप्रवीरममलं नैवेद्यमन्नं हरेर्भुक्त्वाऽऽचम्य समागतान् प्रियजनानन्त्येष्टियत्नेऽदिशत् ॥ १ ॥ भुक्त्वा स्वान्तिकमागतेषु सुजनेष्वार्यान् सुरान् तत्वपानस्मार्षीद्रघुपं च सर्वशरणं द्वैपायनं ग्रन्थगम् । कुर्वन्नञ्जलिबन्धमात्मवचसा शिष्यप्रशिष्यार्पितं तीर्थं देवसरित्पयश्च स पपौ स्तोत्राणि शृण्वन् मुदा ॥ २ ॥ ध्यायन् वंशधरस्य चांसयुगळे न्यस्याऽत्महस्तौ हरिं शोकं कुर्वति तत्र सर्वसुजने हस्तेन सोऽवारयत् । सायं तर्पणमारचय्य यतिना शिष्येण साकं हरेः पूजार्थं निजशिष्यशिष्यमदिशच्छीघ्रेण पूजाऽस्त्विति ॥ ३ ॥ पूजानन्तरमावसत्सु सुजनेष्वात्मान्तिकं मन्दवाक् कार्यं श्रीहरिनामकीर्तनमिति प्रोवाच सच्छास्त्रवित् । शृण्वन् श्रीहरिनामकीर्तनमथो शुभ्रोर्ध्वपुण्ड्राङ्कितः सद्वीरासनभूषितः पुनरपाल्लक्ष्मीशपादोदकम् ॥ ४ ॥ श्रीकृष्णार्पितगन्धसत्तुळसिकामालायुताङ्गस्तदा पूर्वानुष्ठितसत्क्रियायुत-

हरिध्यानादियोगाद्वदन् । दुष्कर्मामयभेषजं हरिपदं पश्चान्नृसिंहाभिधां योगी प्राप रघूत्तमो हरिपदं काले निशीथान्तिके । [मासे शरद्यादिके][1] ॥ ५ ॥ वर्षेऽस्मिन् परिधाविनाम्नि[2] तरणौ कन्यां गते वासरे सौरे केसरिनामके सुकरणे[3] प्रीत्याख्ययोगे तथा । पञ्चम्यां सुतिथौ रघूत्तममुनिः शुक्लाख्यपक्षे शुभे मैत्रर्क्षे[4] हरिलोकमाप रघुपं ध्यायन्निशायां मुदा ॥ ६ ॥ नित्यं स्नानजपादिकर्मनिरतं सत्काष्ठमौनान्वितं व्याख्यान्तं सुखतीर्थशास्त्रमतुलं कामादिदोषोज्झितम् । सीतानाथपदार्चनैकमनसं शुद्धं दयासागरं वन्देऽहं सततं रघूत्तमगुरुं ज्ञानादिसुश्रेयसे ॥ ७ ॥ स्नानमौनहरिध्यानशास्त्रव्याख्यानभूषितान् । वन्दे रघूत्तमगुरून् निजकल्पतरून् सदा ॥ ८ ॥ रघुवर्यतीर्थकृतमिदं श्लोकाष्टकम् ॥

'अस्मत्परमगुरूणामस्मद्विद्यागुरूणां रघूत्तमतीर्थश्रीमच्चरणानामन्तर्यामी श्रीरामचन्द्रः प्रीयताम्' इति ।

एतानि श्रीरघुवर्यतीर्थैः स्वहस्तलिखितान्यपूर्वेतिहासबोधकान्यक्षराणि तत्र ग्रन्थान्त उपलब्धानीति महद् वैशिष्ट्यमस्य मूलकोशस्य ।

ग्रन्थस्यास्य काचिदपूर्वता

अथात्र महाकाव्ये येये मन्त्रभागाः, यानि चापूर्वाणि सूक्तानि मध्वचरितसङ्गततया समुल्लिखितानि तानि सर्वाण्यत्रेदमुपक्रमं व्याख्यातानि । तत्रापि खिलगतानां कुन्तापसूक्तानामेतावत्पर्यन्तं व्याख्यानपरम्परैव नाऽसीत् ।

१. श्रीरघुवर्यतीर्थैरेव प्रथमम्– 'काले निशीथान्तिके' इति विलिख्य, पश्चात् 'मासे शरद्यादिके' इति पाठान्तरं लिखितम् । शरदि ऋतौ आदिके मासे आश्वयुजे ।

२. प्रायः शा.श.१५९६तमे वत्सरे ।

३. शनिवासरे, केसरिनामके बवनामके करणे ।

४. मैत्रर्क्षेऽनुराधानक्षत्रे ।

अत्रोपयुक्ताः कुन्तापसूक्तगताश्चतुर्दशापि मन्त्रा अत्रार्थोपबृंहिताः प्रकटिताः । मन्ये भवेदिदं वैदिकसाहित्यस्यापूर्वमुपायनम्, भवेच्च वैदिकवाङ्मयेष्वधीतिनां महत उपकारायेति ।

परिशिष्टगतं च वैशिष्ट्यं किञ्चिन्निवेदनीयम् । प्रथमं तावत् परिशिष्टे च्छन्दोमीमांसा भवति । मध्वविजये प्रयुक्तानां छन्दसां समग्रं समीक्षणमेतावत्पर्यन्तं नासीदेव । तादृशः प्रयत्नोऽत्र कृतः । छन्दःशास्त्ररसिकानामपूर्वं प्रमेयजातमुपस्थापयति छन्दोमीमांसा ।

परिशिष्टे द्वितीयो भागो भवति बन्धमीमासा । बन्धलक्षणानि तु तत्रतत्रालङ्कारशास्त्रेषु बहुलमुपलभ्यन्ते । परन्तु नोदाहरणानि; नापि तेषां रेखाविन्यासक्रमः । तामेतां न्यूनतां निवारयितुमत्र यथाशक्ति प्रायत्यत । प्रसिद्धानामप्रसिद्धानां बहुलं बन्धानामत्र रेखाविन्यासपूर्वकमुदाहरणान्यदीयन्त । साहित्यकुतूहलिनामिदमुपयुक्तं भवेदिति ।

प्रथमं तावच्छब्दालङ्काराणां विपुलः सङ्ग्रहः इदमुपक्रमं श्रीमन्त्रालयकृतालयानां श्रीराघवेन्द्रश्रीचरणानां गुरुभिः श्रीसुधीन्द्रतीर्थैः स्वकृते 'अलङ्कारमञ्जरी' नामनि ग्रन्थे सोदाहरणमक्रियत । तन्मूल एव चायमपि प्रयत्नः ।

तृतीयो भागः काव्यमीमांसा । किं काव्यलक्षणम्? किमथ महाकाव्यस्य? कथं च महाकाव्यत्वमृते नायिकायाः? कश्चात्र रसः? यदि भक्तिः, कथं भक्ते रसत्वम्? तदियं मीमांसाऽत्र भवति ।

चतुर्थः पुनरलङ्कारमीमांसा । यत्र पुनर्मध्वविजयनिबद्धानामलङ्काराणां प्राधान्येन विमर्शो भवति । अलङ्काराणामुदाहरणानामनुक्रमणिका च ।

पञ्चमस्तारतम्यमीमांसा । न साक्षान्मध्वविजयकथासङ्गता । अथापि मध्वसिद्धान्ते तावदपूर्वं प्रमेयं तारतम्यं नाम । ज्ञातव्यं च सर्वैर्माध्वसमयजिज्ञासुभिरिति तदपि निरूपितम् ।

षष्ठः शासनमीमांसा मध्वचरितसङ्गतानि शासनानि सविमर्शं परामृशति ।

सप्तमोऽत्र नाममीमांसा । मध्वचरितसम्बद्धानां पुरुषाणां स्थळविशेषाणां च यावन्ति नामानि कविनोपनिबद्धानि, मध्वभगवत्पादस्य भगवतश्च यावन्ति नामानि निर्दिष्टानि, तानि सर्वाण्यत्र समगह्यन्त ।

अन्ते च श्लोकार्द्धानुक्रमणिका भवति । प्रायः सर्वत्राकाराद्यनुक्रमेण श्लोक-प्रथमपादानुक्रमणिकैव भवति । अत्र पूर्वार्द्धस्योत्तरार्द्धस्य च प्रत्येकमकाराद्य-नुक्रमणिका दत्तेत्येतावान् विशेषः ।

अपि चात्राक्षरानुक्रमे काचिदन्या रीतिराद्दता । ळकारस्य क्षकारस्य न पाणिनीयानां मते पृथगक्षरत्वम् । तन्त्रशास्त्रेषु च उभे अपि भिन्ने अक्षरे । आचार्यमध्वस्य चैतदेव सम्मतम् । हकारोत्तरं च ते पठ्येते 'य,र,ल,व, श,ष,स,ह,ळ,क्ष'– इति । एतदनुसारेण तयोः पृथगक्षरत्वमूरीकृत्य तदनुगुणमेवानुक्रमणिका संयोजितेति सुधीभिरवधेयम् ।

तदेवं मध्वचरितानुबद्धं सर्वमपि लिकुचकाव्यमत्रैकीभूतम् । सर्वमप्यधिकृतं मध्वचरितमधिकृत्य कृतं प्राचीनग्रन्थजातं च । सम्प्रदायपद्धतिरणुमध्वचरितं च प्राचीने कृती इति पूर्वमालोचितं मयाऽपि । पश्चात् तयोरर्वाचीनताधिगमेन पर्यत्यज्येताम् । मध्वविलासस्तु भाषायामप्रबुद्धः कथानिरूपणेऽसङ्गत इति विद्वत्सु न विवादः । तदिदं सर्वं प्रागेव न्यवेद्यत ।

*

एतत्पुस्तकसंशोधनविषये किञ्चिद् वक्तव्यम्–

वेदाङ्गतीर्थीयसंशोधनार्थं तौळवलिपिबद्धं ताळपत्रमयं पुस्तकं श्रीपलिमारुमठीय-ग्रन्थालयतः समग्राहि । प्रायः अत्यन्तं परिशुद्धः पाठः । मध्वविजयव्याख्यातृभिः श्रीविश्वपतितीर्थैः प्रमेयनवमालिकाव्याख्यातृभिः श्रीरघुवर्यतीर्थैश्च प्रसारित-चक्षुरिदं प्राचीनं पुस्तकम् । ये केचिल्लिपिकृत्प्रमादास्तत्रतत्राधस्तात् परि-

शोधिताः । तदिदं मूलशोधनं श्रीविश्वपतितीर्थैर्वा, श्रीरघुवर्यतीर्थैर्वा स्वयं कृतमपि स्यादिति सम्भाव्यते। यतोऽत्र ग्रन्थान्ते रघुवर्यतीर्थाः स्वगुरुनिर्याणकथां सविस्तरं कतिपयैः श्लोकैः समुल्लिखितवन्तः ।

प्रमेयनवमालिकाटीका पुना रघुवर्यतीर्थैरेव विरचिता । तस्याः एकः कोशः पलिमारुमठ एवोपलब्धः किञ्चिदिव गलितः। दृढपत्रमन्यत् ताळपत्रमयं पुस्तकं श्रीविष्णुतीर्थसंस्थानमधिरूढैः श्रीसोदामठाधीशैः श्रीविश्वोत्तमतीर्थैर्वितीर्णम् । अस्य कोशस्य परिशुद्धत्वात् प्रायो नान्यकोशापेक्षा । अन्यदपूर्वं वेदाङ्गमुनिटीकाया आदर्शान्तरं मया सम्पादितम्। आन्ध्राणां देशे आत्मकूरु नगरे कृतनिवासस्य श्रीमत आनन्दतीर्थाचार्यस्य, वैद्यके, व्याकरणे वेदान्ते चाधिगतप्रगल्भपाण्डित्यस्य ललितकवेः पुस्तकालये देवनागरीलिपिबद्ध एकोऽपूर्णः कोश आसीत् । सहृदयस्य श्रीमत आचार्यस्य सौहार्देन सोऽपि कोश उपलब्धः । चिरं स्मरामस्तदुपकारस्य ।

तदेभिर्निवेदनाक्षरैः सहापूर्वमेतद्ग्रन्थरत्नमुपहरामस्तत्रभवतां हस्ते ।

कृतज्ञा वयमेषाम्

मध्वविजयमूलपाठशोधने तावत् श्रीमता विदुषा पि. एस्. शेषगिर्याचार्येण बहूपकृतम्। एकं तुळुलिपिबद्धमपरं देवनागरीलिपिबद्धं च कोशद्वयं प्रशोध्य तत्रत्यान् पाठभेदान् सङ्गृह्य प्रेषयामास तत्रभवान् ।

श्रीलाः पर्कळ वेङ्कटेश बायरी–शङ्करनारायण अडिग–रङ्गनाथ कट्टिप्रभृतयः बहवो दोषज्ञाः ग्रन्थेऽस्मिन् मुद्रणदोषनिरासाय बहुधा प्रायतन्त ।

श्रीलौ रमेशशर्मा बैतमङ्गलकृष्णशर्मा च लिप्यङ्कनकर्मणि कृतबहुसहकारौ । श्रीलः भं. गुरुराजाचार्यः प्रकाशनकर्मणि बद्धादरो कृतबहुपरिश्रमश्च । श्रीलः सुधीन्द्रशर्मा च । कृतज्ञा वयमेषां समेषाम् ।

अपूर्वचित्रसंयोजनेन पुस्तकस्य शोभातिशयहेतुर्विख्यातश्चित्रकलाचतुरः श्रीमान् गञ्जीफा रघुपतिभट्टः, चक्रबन्धादिसंयोजनेन पुस्तकविन्यासकर्मणि कृतपरिश्रमः श्रीमान् के.एम्. शेषगिरिशर्मा तत्सहयोगी श्रीमान् के.गिरिधरश्च बहुलं कार्तज्ञ्यमर्हन्ति । मुद्रणकर्मणि कृतसहकारं राजप्रकाशमुद्रणालयाधिकृतं श्रीप्रकाशं च सकार्तज्ञ्यमभिनन्दामः । एतस्मिन् पुण्यकर्मणि धनसाहाय्य-दानेन दत्तावलम्बानां धन्यानां वदान्यमूर्धन्यानां महोपकारस्य कथङ्कारं विस्मरामः । अविस्मरणीयस्तेषामुपकारः सौजन्यमयः ।

कड्डीपदोपाह्वः श्रीमान् बदरीनारायणाचार्यस्तु अहर्निशमेतस्य ग्रन्थस्य लिपिमुद्राङ्कने प्रयतमानः सर्वं परिचष्कार । अप्रतिकारोऽयमुपकारः । तानेतान् सर्वानपि प्रबुद्धान् सङ्ख्यावतः श्रीमध्वनारायणौ भूयसा श्रेयसा संयोजयतामिति केवलमभ्यर्थयामहे ।

बन्नञ्जेपदोपाह्व आचार्यगोविन्दः

ईशावास्यम्,

चित्रभानुसं.माघशुद्धद्वितीया

शा.श. १९२६

[3-2-2003]

रजतपीठपुरम् [उडुपि]

श्रीनारायणपण्डिताचार्यविरचितः

श्रीमध्वविजयः

[स्वकृतया भावप्रकाशिकया, श्रीवेदाङ्गतीर्थकृतया पदार्थदीपिकया,
आचार्यगोविन्दकृतया तत्वचन्द्रिकया च संवलितः ।]

*

श्रीनारायणपण्डिताचार्यः



वन्दे लिकुचसञ्जातं श्रीनारायणपण्डितम् ।
योऽपाययत् सुधीव्रातं श्रीमध्वचरितामृतम् ॥

मध्वानन्ददमध्वानं दर्शयामास दर्शनम् ।
तमार्यं पण्डिताचार्यं नुमो नारायणाह्वयम् ॥

प्रथमः सर्गः

[मङ्गलाचरणम् । ग्रन्थकरणप्रतिज्ञा । हनुमदवतारकथा । भीमावतारकथा । भीमनिहतानां मणिमदादीनां कलौ पुनर्जननम् । भुवि मायावादप्रसारः ।]

ॐ ॥ कान्ताय कल्याणगुणैकधाम्ने
नवद्युनाथप्रतिमप्रभाय ।
नारायणायाखिलकारणाय
श्रीप्राणनाथाय नमस्करोमि ॥ १ ॥

भावप्रकाशिका

[१]नमो जयात्मने यन्त्रे द्विजराजस्फुरच्छ्रिये।
हरेरजस्य प्रिय ते हरये देवतात्मने ॥

---

१. जयात्मने अपराजिताय सर्वोत्कृष्टाय च । सर्वनियन्त्रे । द्विजराजौ वीशाहीशौ तत्र स्फुरन्ती श्रीः स्वरूपशोभा यस्य तस्मै गरुडगमनाय शेषशयनाय । हरेर्वायोरजस्य च प्रिय । सर्वदेवतान्तर्यामिणे हरये ते नमः ॥*॥ अथ द्विजराजाः क्षत्रियप्रवराः रघुदशरथादयः येन विशदयशसोऽभवन् तस्मै रामाय । द्विजराजेन वाल्मीकिना च प्रथितयशसे । द्विजराजश्चन्द्रः । स इव स्फुरच्छ्रीः, तस्मै । रामचन्द्र इति हि तं निगदन्ति । 'द्विजराजः शशधरे सुपर्णेऽनन्तभोगिनि' इत्यभिधानम् । हरेः सूर्यात्मनः सुग्रीवस्य भविष्यदजस्य हनूमतश्च प्रियो हि सः ॥*॥ अथ जयात्मने भारतप्रतिपाद्याय कृष्णाय । अर्जुनरथयन्त्रे । द्विजराजाः पाण्डवाश्च वैश्यवरा नन्दादयश्च येन स्फुरच्छ्रियः, विप्रवरस्य दूत्येन लब्धा स्फुरन्ती श्रीः रुग्मिणी च येन तस्मै । हरेरिन्द्रात्मनोऽर्जुनस्य, भाविनोऽजस्य च भीमस्य प्रिय । सर्वदेवता यस्याऽत्मनि तस्मै दर्शितविश्वरूपाय ॥*॥ अथ जयं भारतमातनोतीति जयात्मने व्यासाय । वेदमार्गनियन्त्रे । विप्रवरेण पराशरेण प्रकटश्रिये विप्रवराणां वा प्रकटा श्रुतिसम्पद् येन । 'सा हि श्रीरमृता' इति हि श्रुतिः । स्वयं विप्रराजः स्फुरच्छ्रीश्च । अकारवाच्यात् स्वस्मादेव जातस्य हरेर्यमात्मनो विदुरस्य, शुकाविष्टस्य वायोश्च प्रिय । 'हरिर्वातार्कचन्द्रेन्द्रयमोपेन्द्रमरीचिषु' इत्यभिधानम् । 'हरिः कपौ' इति च ॥*॥ अथ ते हरये वायवे नमः । अजयात्मने अयन्त्रे इत्यपि । अजपदं

पदार्थदीपिका

सज्जनाभीष्टसन्दोहसम्पादनविशारदम्।
लक्ष्मीपूज्यपदाम्भोजयुगं नौमि निरन्तरम् ॥

श्रीमदानन्दतीर्थार्यपदाब्जं प्रणमाम्यहम्।
वृत्तिं मधुकृतां यत्र वसन्तीन्द्रादयः सुराः ॥

श्रीमध्वशास्त्रकमळाकरतिग्मभानुं
श्रीवैष्णवाम्बुधिविबोधनशीतभानुम्।
अद्वैतवादवनदाहविवृद्धमग्निं
[१]वृष्णीन्द्रतीर्थमुनिवर्यमहं नमामि ॥

श्रीमध्वशास्त्रपरिशोधितचित्तवृत्तीन्
गङ्गादितीर्थविनिमज्जनशुद्धगात्रान्।

यातीति तादृगात्मने। अः ब्रह्मैव नियन्ता नान्यो यस्य तस्मै। जयात्मने यन्त्रे च। अथच यन्त्रेत्, विजर, अजेति च्छेदः। सर्वयन्तृत्वाद् यन्त्रम्। तद्यथा शास्तृत्वाच्छास्त्रम्। तदेत्यवगच्छतीति तादृश। भविष्यदज। स्फुरन्ती श्रीः भारती सदा यस्य सहचरी। 'शंरूपाने नित्यरतेरियं श्रीः' इति वचनात् ॥*॥ अथ हरये वानराय हनुमते नमः। द्विजराजेन सम्पातिना सीतोदन्तं श्रुत्वा स्फुरच्छ्रिये। हरेः सुग्रीवस्याजस्य रामस्य च प्रिय ॥*॥ अथ ते भीमरूपाय हरये वायवे। द्विजेषु द्रोणादिषु राजसु च रणे स्फुरच्छ्रिये। अर्जुनस्य कृष्णस्य च प्रिय। द्विजेषु तत्रापि राजसु स्फुरच्छ्रिये। वायोः क्षत्रवर्णमानित्वात् बलरूपत्वाच्च ॥*॥ अथ ते मध्वरूपाय। मध्यगेहाख्यद्विजवरेण स्फुरच्छ्रिये। विद्वज्जनतातारानिकरे द्विजराजः चन्द्र इव विराजमानाय। विप्रवरेषु स्फुरन्ती वेदव्याख्यानश्रीर्यस्य। अत एव हरेर्विष्णोर्विशिष्य व्यासरूपस्य च प्रियः। यद्यपि प्रियते प्रियवदाचरत इत्यपि शक्यं व्याख्यातुम्। तथाऽपि वर्तिर्नातिस्वरस इति द्वैपद्यमेवाऽश्रितम्। बहवोऽर्थाः प्रतिपदं नृत्यन्तः स्फुरन्ति। दिङ्मात्रमत्र प्रादर्शि ॥ * ॥

१.वृष्णीन्द्रतीर्थ इति विष्णुतीर्थ एव। '–विवृद्धवह्निं श्रीविष्णुतीर्थमुनिवर्यमहं नमामि' इत्यपि पाठः सम्भाव्यते।

सद्ब्रह्मचर्यमुखसद्गुणरत्नसिन्धून्
वन्दे गुरून्[१] मम विदारितरागदोषान् ॥

त्रिविक्रमार्यपुत्रेण नारायणविपश्चिता ।
कृतं श्रीमध्वविजयं विवृणोमि यथामति ॥

प्रारिप्सिततया चित्तसन्निहितं काव्यमारभमाणो नारायणाचार्यः स्वेष्टदेवतां नारायणं नमस्करोति– **कान्तायेति** । **कान्ताय** रमणीयाय । **कल्याणगुणैकधाम्ने** शोभनगुणानां मुख्यधाम्ने । **नवद्युनाथप्रतिमप्रभाय** उद्यदादित्यप्रभासदृशप्रभाय । **अखिलकारणाय** अखिलस्य जगतः कारणभूताय । अखिलस्य सृष्टिस्थित्यादेः कारणायेति वा । **श्रीप्राणनाथाय** श्रीवल्लभाय । प्राणनाथो वल्लभः । **नारायणाय नमस्करोमि** ॥ १ ॥

तत्वचन्द्रिका

त्रिभिरवतारैरवते भुवनं भवते भवन्तमनु भवते च ।
अभिलप्य नमोवाकं याचे साकं च काञ्चन प्रमतिम् ॥

व्याख्यान्तौ मध्वविजयं प्रथमं ग्रन्थकृत् स्वयम् ।
वेदाङ्गतीर्थस्तदनु स्थाने स्तामर्थनिर्णये ॥

प्रतिपद्यं प्रतिपदं न व्याख्यातुमयं श्रमः ।
प्रत्नैर्न यद् व्यक्तमुक्तं तद् व्यञ्जयितुमुद्यमः ॥

दिष्टं प्रत्नैर्यदि स्पष्टं न तदाम्रेड्यते पुनः ।
प्रज्ञा नवनवोपज्ञा नहि रोमन्थमिच्छति ॥

नारायणाय नमस्करोमि । इष्टो विशिष्टश्च नम्यते । इष्टोऽयमित्याह– कान्तायेति, नवद्युनाथप्रतिमप्रभायेति । अतिविशिष्टश्चायमित्याह–कल्याणगुणैकधाम्न इति, अखिलकारणायेति, श्रीप्राणनाथायेति । एतेन सकल-

१. गुरूनिति रत्नगर्भतीर्थार्यान् ।

वाङ्मयदेवता श्रीरपि नता । अथाधिकृतश्चायमित्याह– श्रीप्राणनाथाय । शंरूपे प्राणे रतेति भारती श्रीः । तया श्रितः प्राणः श्रीप्राणः । तस्यायं नाथः । यद्यपि प्राणाधिकारोऽयम् । अथापि सनाथ एव हि प्राणोऽधिकृतः । प्राणमहिम्नामाम्नानेनान्ततस्तन्नाथमहिमैव हि महीयते । तथाच नतः सनाथः प्राणो विषयः । नन्ताऽधिकारी । गुरुभक्तिजा मुकुन्दभक्तिः प्रयोजनमिति च वक्ष्यति । सम्बन्धश्च यथायथम् ।

ननु कथमिह चतुर्थीयोगः? किं न पश्यसि नमःपदम्? पश्यामि नमःपदम्, पश्यामि च शिरसि क्रियापदम् । तेन शिरोधृतेन कृत्ता द्वितीया किं न स्यात्? स्यादप्यन्यत्र । अत्र तु मा भूत् । तदियं व्यवस्था । यत्र क्रियायाः प्राधान्यं, द्वितीया तत्र । यत्र प्रकारस्य नमःपदार्थस्य, चतुर्थी तत्रेति । 'नारायणायेदं सर्वमर्पितम् । न मम स्वं किमपीति भावयामि' इति किल वचनार्थः । अत उभयथाऽपि साधुः प्रयोगः । अत एव 'रामाय नत्वा' इत्याह भगवत्पादः ॥

सर्गेऽस्मिन्नात्रिपञ्चाशं पद्यं त्रिष्टुब्बद्धम् । एकादशाक्षरं रुद्रदैवत्यम् । अभिमानिनी च त्रिष्टुभः शचीति तत्प्रभेदभूतामिन्द्रवज्रामाहुः, इन्द्रं गच्छन्ती रमत इति । इन्द्रस्य वज्रमिव कवीन्द्राणामियमायुधभूतेति च । उपेन्द्रवज्रां च । मिळितां च तामुपेन्द्रमालामुपजातिमाहुः । गुरुणाऽऽरम्भे त्विन्द्रवज्रा । लघुना चोपेन्द्रवज्रा । तथाहि लक्षणविदो वदन्ति– 'इन्द्रवज्रा ततजगा गो हरास्यर्तुभिर्यतिः' इति, 'उपेन्द्रवज्रा जतजा गौ बाणऋतुभिर्यतिः' इति, 'मिश्रा तूपेन्द्रमाला स्यादुपजातिं च तां विदुः' इति च । अत्र च षट्सु (६,१०,१८,१९,२२,२६) इन्द्रवज्रा । द्वयोः (२५,५०) उपेन्द्रवज्रा । अवशिष्टेषु (१-५,७-९,११-१७,२०,२१,२३,२४,२७-४९,५१-५३) उपजातिरुपेन्द्रमाला नाम ।

ननु कथं तगणेन ग्रन्थमारभत? 'तस्याऽकाशो देवता स्यात् फलं शून्यं

प्रकीर्तितम्' इति हि भणन्ति । अथापि तगणमादावुपादत्त– आकाशदेवता विघ्नराड् यथा निष्प्रत्यूहं प्रारब्धं परिसमापयेदिति, लौकिकफलकामना-शून्यतां च तेनाभिप्रेयाय । अपिचोत्सर्गोऽयं तस्य शून्यं फलमिति । अपवादश्च तस्य भवति । तद् यथा– 'ये वैष्णवा दैवताश्च शब्दा भद्रादिवाचकाः । ते न निन्द्या गणादिभ्य इत्युक्तं पिङ्गलादिभिः' इति मन्दारमरन्दे । अत एव काळिदासोऽपि– 'अस्त्युत्तरस्यां दिशि देवतात्मा' इति तगणेनैव काव्यमारेभे । अपिच निर्वर्णयत महिमानम्– ककारः सम्पत्करः । अकार आकारश्च । नकारः सन्तोषे । तकारः सुखे । यकारो लक्ष्म्याम् । तथाच 'कान्ताय' इति सर्वमङ्गलानां समाहारोऽयं तगणमशून्यं करोति । तथाह्युक्तम्– 'अचः प्रोक्ताः सम्पत्करा बुधैः । कखौ गघौ च सम्पत्तौ' इति, 'तः सुखे' इति, 'ध्नौ सन्तोषे' इति, 'यो लक्ष्म्याम्' इति च ॥ १ ॥

अनाकुलं गोकुलमुल्ललास यत्पालितं नित्यमनाविलात्म ।
तस्मै नमो नीरदनीलभासे कृष्णाय कृष्णारमणप्रियाय ॥ २ ॥

(भा.प्र.) कृष्णाय वासुदेवाय वेदव्यासाय च । नित्यं सततम्, अनाकुलं गोकुलम्, अविनाशि वाग्जातं वेदः ॥

(प.दी.) **अनाकुलम्** । **तस्मै** प्रसिद्धाय **कृष्णाय** श्रीवेदव्यासाय **नमः** । **कृष्णाय** देवकीपुत्राय च **नमः** । कीदृशाय? **नीरदनीलभासे** नीरदवन्नीलभासे नीलप्रभाय । **कृष्णारमणप्रियाय** द्रौपदीपतिपाण्डवप्रियाय । एतद् विशेषणद्वयं कृष्णद्वयसाधारणम् । **यत्पालितं** येन वेदव्यासेन पालितम् । **नित्यं गोकुलम्**, अविनाशि वाग्जातम्, वेद इति यावत् । **अनाकुलम्** स्वरवर्णादिव्यत्यास-रहितम् । **अनाविलात्म** अपपाठादिना स्वरूपतिरोधानरहितम्, **उल्ललास** । **यत्पालितं** येन श्रीकृष्णेन पालितं **गोकुलं** गवां समूहः, नन्दादिगोपावास-स्थानं वा । **नित्यं** सर्वदा **अनाकुलं** भ्रमरहितम् । **अनाविलात्म** अविनष्ट-स्वरूपम् । **उल्ललास** उच्चैः शुशुभे ॥ २ ॥

(त.चं.) यं रजतपीठे श्रीमध्वः स्वयमानीय प्रतिष्ठापयामास यं च रजतगिरौ प्रत्यक्षं प्रीणयामास तस्मै तस्मै च कृष्णाय। कृष्णारमणप्रियाय विशिष्य भीमप्रियाय। कृष्णारमणस्य प्रियः। कृष्णारमणश्च प्रियः। अनाकुलमत्रस्तम्, अनाविलमकलुषं मुग्धं च व्रजस्थानम् ॥ २ ॥

अपि त्रिलोक्या बहिरुल्लसन्ती
तमो हरन्ती मुहुरान्तरं च ।
दिश्याद् दृशं नो विशदां जयन्ती
मध्वस्य कीर्तिर्दिननाथदीप्तिम् ॥ ३ ॥

(प.दी.) अपीति । **मध्वस्य कीर्तिः** यशो **नः** अस्माकं **विशदां** निर्मलां **दृशं** ज्ञानदृष्टिं **दिश्यात्** दिशतु। कथम्भूता कीर्तिः? **दिननाथदीप्तिं** सूर्यप्रकाशं **जयन्ती** अतिशयाना । कुतः? **त्रिलोक्याः** त्रैलोक्याद् **बहिरपि उल्लसन्ती** शोभमाना, **मुहुः** पुनरपि **आन्तरं** मानसं **तमः** अज्ञानं **च हरन्ती** । दिननाथदीप्तिः न त्रैलोक्याद् बहिर्भाति । नाप्यान्तरं तमो हरति । नैवं मध्वस्य कीर्तिरिति दिननाथदीप्तिं जयन्तीत्युक्तमिति भावः ॥ ३ ॥

(त.चं.) त्रिलोक्या बहिरुल्लसन्त्यप्यान्तरं तमो हरतीति विरोधाभासः । बहिरप्युल्लसन्ती, आन्तरं च तमो हरतीति परिहारः । मध्वस्य आनन्द-तीर्थस्य। अथच मध्विति आनन्दनिधानं परं ब्रह्म। तद् वाति निषेवितुमिति मध्व इति पूर्वतन्यावपि तनू मध्वे । तेन त्रिधा कृतावतरणः प्राणः स्तूयत इत्यपि सुवचम् ॥ ३ ॥

तमोनुदाऽऽनन्दमवाप लोक-
स्तत्वप्रदीपाकृतिगोगणेन ।
यदास्यशीतांशुभुवा गुरूंस्तां-
स्त्रिविक्रमार्यान् प्रणमामि वर्यान् ॥ ४ ॥

(भा.प्र.) तमस्तु अज्ञानकारणम् । तत्वप्रदीपात्मको ग्रन्थः, तेजोगणश्च वस्तुतत्वानां प्रदीपाकृतिः ॥

(प.दी.) **तम** इति । **लोको** जनः **यदास्यशीतांशुभुवा** येषां त्रिविक्रमार्याणां आस्यं मुखमेव शीतांशुश्चन्द्रः तस्मादुत्पन्नेन, **तत्वप्रदीपाकृतिगोगणेन** तत्वप्रदीपिकाख्यग्रन्थात्मकवचनसमूहेन **आनन्दं** सुखम् **अवाप** । कथम्भूतेन? **तमोनुदा** अज्ञाननाशकेन । **वर्यान्** उत्तमान् **तान् त्रिविक्रमार्यान्** त्रिविक्रमपण्डितान् **गुरून् प्रणमामि** । **शीतांशुभुवा** चन्द्रादुत्पन्नेन **तमोनुदा** अन्धकारनाशकेन **तत्वप्रदीपाकृतिगोगणेन,** तत्वं तत्तत्पदार्थस्वरूपम्, तद्विषये प्रदीपाकृतिना पदार्थस्वरूपप्रकाशकेनेति यावत्, गोगणेन रश्मिसमूहेन **लोकः** चराचरात्मकं विश्वं यद्वदानन्दमाप्नुयात् तद्वद् यन्मुखादुत्पन्नेन तत्वप्रदीपिकानाम्ना ग्रन्थेन लोक आनन्दमवाप तान् त्रिविक्रमार्यान् प्रणमामीत्यभिप्रायः ॥ ४ ॥

(त.चं.) मध्वपरमानुग्रहभाजनं स्वजनकं स्तौति– तमोनुदा । तम इत्यज्ञानकारणं तमोगुणः, अन्धकारश्च । आर्यान् आर्यत भगवानेतैरिति ॥ ४ ॥

मुकुन्दभक्त्यै गुरुभक्तिजायै सतां प्रसत्त्यै च निरन्तरायै ।
गरीयसीं विश्वगुरोर्विशुद्धां वक्ष्यामि वायोरवतारलीलाम् ॥ ५ ॥

(भा.प्र.) अवताराणां लीलाम् ॥

(प.दी.) यदर्थमिष्टदेवतादिनमस्कारः कृतस्तदिदानीं प्रतिजानीते– **मुकुन्दभक्त्या** इत्यादिना । **विश्वगुरोः वायोः गरीयसीं** अतिशयेन गुर्वीं **विशुद्धां** निर्दोषां **अवतारलीलां** हनुमदाद्यवतारैः कृतां **लीलां वक्ष्यामि** । इयं विवक्षितार्थप्रतिज्ञा । तत्कथनेन किं प्रयोजनमित्यत आह– **गुरुभक्तिजायै** । गुरुभक्तेः जातायै **मुकुन्दभक्त्यै** मुकुन्दभक्त्यर्थम् । तादर्थ्ये चतुर्थी । मुकुन्दभक्तेर्गुरुभक्तिजन्यत्वम्– 'गुरुद्वारा प्रसादकृदहं त्विति', 'यस्य देवे पराभक्तिर्यथा देवे तथा गुरौ', 'अगम्यत्वाद् हरिस्तस्मिन्नाविष्टो मुक्तिदो

भवेत्' इत्यादिप्रमाणसिद्धम् । किञ्च **निरन्तरायै** सन्ततायै **सतां** सज्जनानां **प्रसत्त्यै** प्रसन्नतायै **च** । सकलसुरजननिकरगुरुतमश्रीमुख्यप्राणस्यावतार-लीलावर्णनेन सन्तोऽपि सन्तुष्टा भवन्ति । सत्सन्तोषश्च तदनुग्रहद्वारा हरिभक्तिहेतुः । सा च मोक्षहेतुरिति भावः ॥ ५ ॥

(त.चं.) अथ सप्रयोजनकथनं प्रतिजानीते– मुकुन्दभक्त्यै । मुकुं मुक्तिं ददद्धि मुकुन्दः । तेन मुक्तिर्महाफलम् । वायोरवताराणाम्, विशिष्य च तृतीयावतारस्य, लीलाम् ॥ ५ ॥

तां मन्त्रवर्णैरनुवर्णनीयां
शर्वेन्द्रपूर्वैरपि वक्तुकामे ।
सङ्क्षिप्नुवाक्ये मयि मन्दबुद्धौ
सन्तो गुणाढ्याः करुणां क्रियासुः ॥ ६ ॥

(भा.प्र.) 'बळित्था तद् वपुषे धायि दर्शतम्', 'भूषन्न योऽधि बभ्रूषु नम्नते', 'तां सु ते कीर्तिं मघवन् महित्वा' इति सूक्तानि। 'विष्णोः पदे परमे मध्व उत्सः', 'विद्वान् मध्व उज्जभारा दृशे कम्' इत्यादयो मन्त्रवर्णाः। गुणग्राहि-त्वादयो गुणाः। तैराढ्याः॥

(प.दी.) तामिति। शर्वेन्द्रपूर्वैः रुद्रेन्द्रादिदेवैः **अपि मन्त्रवर्णैः** वेदैः करणैः– 'बळित्था तद् वपुषे धायि दर्शतम्','भूषन्न योऽधि बभ्रूषु नम्नते', 'तां सु ते कीर्तिं मघवन् महित्वा', 'विष्णोः पदे परमे मध्व उत्सः','विद्वान् मध्व उज्जभारा दृशे कम्' इत्याद्यैः **अनुवर्णनीयां** अनुवर्णयितुं योग्यां **तां** अवतारलीलां **वक्तुकामे मन्दबुद्धौ** अत एव **सङ्क्षिप्नुवाक्ये** सङ्क्षेपण-शीलवद्वाक्ये **मयि गुणाढ्याः** महत्त्वदयाळुत्वादिगुणाढ्याः **सन्तः** महान्तः **करुणां क्रियासुः** कुर्वन्तु । अतिविस्तारवता वाक्येन वर्णनीयां वायोरवतार-लीलामल्पेन वाक्येनाकथयदिति न कुप्यन्त्विति भावः ॥ ६ ॥

(त.चं.) मन्त्रवर्णैरनुवर्णनीयाम् । ते च मन्त्रवर्णा ग्रन्थकृतैव भाव-

प्रकाशिकायां प्रकाशिताः। अध्येतॄणामानुकूल्याय तेषामर्थोऽत्र सङ्गृह्यते ।

भूषन्न योऽधि बभ्रूषु नम्नते। त्रयोदशर्चमिदं सूक्तम् –'वेदिषदे प्रियधामाय सुद्युते–' [ऋ.१.१४०.१] इत्यादि। दीर्घतमा औचथ्य ऋषिः। प्राणाग्निर्देवता। एकादश जगत्यः। दशमी त्रिष्टुब् वा। अन्त्ये त्रिष्टुभौ। तथाह्यनुक्रमणिका– 'वेदिषदे सप्तोना, दीर्घतमा औचथ्यः, आग्नेयं तु, द्वित्रिष्टुबन्तं तु, त्रिष्टुब् दशमी वा' इति । तत्र आद्याः पञ्चर्चः प्रथमो वर्गः। ततः पञ्च द्वितीयः । अन्त्यास्तिस्रस्तृतीयः । द्वितीयवर्गस्याऽद्यो मन्त्रः 'भूषन् न योऽधि–' इत्यादि । विशिष्य मध्वावतारकथा तत्र वर्ण्यत इति तत एव प्रतीकमग्राहि भावप्रकाशिकाकृता । तस्येयं व्याख्या भवति । तत्र सूक्ते षष्ठो द्वितीयवर्गे प्रथमो मन्त्रः–

भूषन् न योऽधि बभ्रूषु नम्नते वृषेव पत्नीरभ्येति रोरुवत् ।
ओजायमानस्तन्वश्च शुम्भते भीमो न शृङ्गा दविधाव दुर्गृभिः ॥

व्याख्यानेन भूषयन्निव, भगवद्गुणान् बिभ्रतीति बभ्रूषु केवलं विष्णुपरासु विद्यासु अधिकं नतो भवति। अमुख्यवृत्त्याऽन्यत्रापि पतनशीलाः विद्याः वृषेव रोरुवदभ्येति । अन्याश्च तन्वस्तदर्थोपबृंहणेन विस्तारयित्रीर्विद्याः, अल्पा अङ्गविद्या वा यथार्थाविष्करणेनोद्दीपयति। शतशृङ्गशृङ्गाणि, प्रत्यर्थिशृङ्गाणि वा, भीमसेन इव मध्वोऽपि दुर्वादिभीमः शुष्कतर्कैर्दुर्गृभिर्दुर्ग्राह्यैः कुभाष्यशृङ्गाणि दुर्वादिशृङ्गाणि चायं विधूनयामास विकम्पयामास । धू विधूनने ॥ * ॥

द्वितीयो मन्त्रः–

स संस्तिरो विष्टिरः सं गृभायति जानन्नेव जानतीर्नित्य आ शये ।
पुनर्वर्धन्ते अपि यन्ति देव्यमन्यद् वर्पः पित्रोः कृण्वते सचा ॥

स मध्वः क्वचित् संस्तिरः सङ्क्षिप्तः, क्वचिद् विष्टिरः विस्तृतः । सङ्क्षेप-

विस्तराभ्यामिति यावत्। वेदार्थं सङ्गृह्णाति। स्वयं सर्वं जानन्नेव भगवद्गुणान् गातुं जानतीर्वेदविद्या नित्यमा शेते। तासु विहरति। 'नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु' इति वक्ष्यति। अपव्याख्यानेन पिहितास्ताः पुनरस्य व्याख्यानेन वर्धन्ते। देव्यं स्तुत्यं भगवन्तं स्तोतुं यन्ति च। ततश्च जगत्पित्रोः लक्ष्मीनारायणयोः प्राणनारायणयोर्वा सचा सहैवान्यदपूर्वं वर्पः गुणविशेषमाविष्कुर्वते ॥ * ॥

तृतीयो मन्त्रः–

तमग्रुवः केशिनीः सं हि रेभिर ऊर्ध्वास्तस्थुर्मम्रुषीः प्रायवे पुनः।
तासां जरां प्रमुञ्चन्नेति नानदद्सुं परं जनयन् जीवमस्तृतम् ॥

अग्रुवः प्रतीक्षयाऽग्रतः स्थिताः केशिन्यः कामिन्य इव वेदविद्यास्तमवतीर्णं सं हि रेभिरे परिरेभिरे स्वार्थाविष्करणाय। ताः खल्वपि केशिन्यः। के शेत इति केशो नारायणः। तद्वत्यः। भगवत्परतानिराकरणेन ता अकेशिन्य इवाऽसन्। इदानीं मध्वेन सुकेशिन्योऽभूवन्निति। मम्रुषीः मृतप्राया अपव्याख्यानेन पुनः प्रायवे उज्जीवयितुमागच्छते वायवे स्वागतं व्याहर्तु-मुत्कण्ठया ऊर्ध्वास्तस्थुः। तासां जीर्णतां प्रमोचयन्नेष नारायणगुणान् नानददेति। तासां परमसुं प्राणं जनयन्, उज्जीवयन्, अस्तृतमविच्छिन्नं जीवं जीवनशक्तिं च जनयन् ॥ * ॥

चतुर्थो मन्त्रः–

अधीवासं परि मातू रिहन्नहं तुविग्रेभिः सत्वभिर्याति वि ज्रयः।
वयो दधत् पद्वते रेरिहत् सदाऽनु श्येनी सचते वर्तनीरहं ॥

मातुरधिवासं वेदावासं वेदव्यासं परि लिहन् मनसा स्वदमानः, ध्यायन्। अहेति स्वयमास्वदते। तुविग्रेभिः प्रभूतगमनशीलैः धावद्भिः सत्वभिर्जन्तुभिः सह ज्रयः, 'ज्रि अभिभवे', वेगेन धावन्ति सत्वान्यप्यभिभवन्, वि याति व्यासाश्रमम्। अथ खल्वपि– वेदमातुरधीवासं भगवन्तं परि रिहन् स्वयमा-

स्वदमानो गायन्, तुविग्रेभिः उच्चैर्भगवन्तं गायद्भिः बहुग्रहणशीलैर्वा सत्वभिः सात्त्विकैरनुगैः व्रयः भगवद्गुणप्रसारणे कृतरयः भुवं वि याति सञ्चरति । जराजीर्णाया वेदविद्याया नवं वयो दधत् ददत् । पद्वते मर्त्यलोकाय तदनुग्रहाय भगवद्गुणान् रेरिहदास्वादयन् श्येनी, 'श्यैङ् गतौ', सञ्चरन् । वर्तनीरहेत्यत्र वर्तनिरिति प्रतृण्णम् । सदा अनुवर्तनिः भगवत्सङ्कल्पमनुवर्तमानः सदा अनु सचते भगवन्तमनुगतो भवति । अहेति पुनरास्वादे ॥ * ॥

पञ्चमो मन्त्रः–

अस्माकमग्ने मघवत्सु दीदिह्यध श्वसीवान् वृषभो दमूनाः ।
अवास्या शिशुमतीरदीदेर्वर्मेव युत्सु परिजर्भुराणः ॥

हे अग्ने विद्वदग्रणीः, तत्ववादाग्रनेतः, अस्माकं मघवत्सु तत्ववादाख्यसम्पद्भरितेषु गृहेषु दीदिहि दीप्यस्व । अथ चास्मान् साधुमार्गे श्वसीवान् चेष्टयन् देववृषभः अशुभान् दमूना दमयन् भव । 'अवास्या' इति क्षैप्रदीर्घलोपे 'अवास्य' इति प्रतृण्णम् । शिशुमतीः प्रजनने रताः, नतु प्रज्ञाजनने, प्रजा अवास्य निरस्य अदीदेः अतितरां द्योतमानो भव । युत्सु ज्ञानयुद्धेषु तत्ववादेषु जल्पवितण्डासु च वर्मेव परिजर्भुराणः परितः शत्रून् परिहरन् रक्षिता भव ॥* ॥

अथ तृतीयवर्गे प्रथमो मन्त्रः–

इदमग्ने सुधितं दुर्धितादधि प्रियादु चिन्मन्मनः प्रेयो अस्तु ते ।
यत् ते शुक्रं तन्वो३ रोचते शुचि तेनास्मभ्यं वनसे रत्नमा त्वम् ॥

हे अग्ने सर्वदेवाग्र्य, दुर्धितात्, धि धारणे, दुष्टं धृताद् वेदार्थापनयनादधि उपरि इदं ते यथावद् व्याख्यानं सुधितं सम्यगवधृतम् । मन्मनः मननीयात् प्रियादु चित् सर्वस्मादपि प्रियवस्तुनस्तवेदं व्याख्यानं नः प्रेयोऽस्तु । यत् ते तन्वः शुचि शुक्रं तेजो रोचते तेन त्वमस्मभ्यं रत्नमानन्दमा वनसे वितरसि ॥ * ॥

द्वितीयो मन्त्रः–

रथा॑य॒ नाव॑मु॒त नो॑ गृ॒हाय॒ नित्या॑रित्रां प॒द्वतीं॑ रास्यग्ने ।
अ॒स्माकं॑ वी॒राँ उ॒त नो॑ म॒घोनो॒ जनां॑श्च॒ या पा॒रया॒च्छर्म॒ या च॑ ॥

हे अग्ने अज्ञानात्तः, रथायाऽनन्दरूपाय गृहाय सर्वाश्रयणीयाय गृह्यमाणाय वा भगवते, तं प्राप्तुमिति यावत् । नस्तत्वविद्याख्यां नावमुत रासि ददासि । नित्यं भक्त्याख्यारित्रयुक्ताम् । अरित्रं जलापकर्षणदण्डः । पद्वतीं पदनवतीम् । भगवदभिमुखं गमनशीलाम् । या नौर्न केवलमस्मान्, किन्त्वस्माकं वीरानुत, वीरशब्दः सन्ततिवचनः । पुत्रपौत्रादिकानपि मघोनः ज्ञानभक्त्यादिसम्पन्नान् कृत्वा संसारात् पारयात् तारयेत् । 'नास्याब्रह्मवित् कुले भवति' इति हि श्रुतिः । उत नो जनांश्च सहचारिणः सात्त्विकान् तारयेत् । या च तारयित्वा शर्म स्वरूपानन्दं प्रयच्छेत् ॥ ❋ ॥

तृतीयो मन्त्रः–

अ॒भी नो॑ अग्न उ॒क्थमिज्जु॑गुर्या॒ द्यावा॒क्षामा॒ सिन्ध॑वश्च॒ स्वगू॑र्ताः ।
गव्यं॒ यव्यं॒ यन्तो॑ दी॒र्घाहेषं॒ वर॑मरु॒ण्यो॑ वरन्त ॥

हे अग्ने अङ्गागनेतः, न उक्थमेतत् स्तुतिवचनं अभिजुगुर्या अभिगृणीहि । स्वीकृत्य समुल्लाघय । त्वदनुग्रहेण द्यावाक्षामा द्यावापृथिव्यौ, स्वगूर्ताः, गूरी उद्यमने, स्वत एव गमनोद्यताः, सन्ततप्रवहणशीलाः सिन्धवो नद्यश्च । तदभिमानिन्य इत्येतत् । गव्यं गवि वाचि स्थितं वेदवेद्यम्, यव्यम्, 'यु मिश्रणे', ध्याने मनसा संयोजनीयम्, परं ब्रह्म यन्तः यन्त्यः प्रापयन्त्यः, सामर्थ्यातिशयद्योतनाय पुंवत्प्रयोगः, भवन्तु । अरुण्य उषसः दीर्घाणि निरन्तराणि अहानि च । दीर्घाण्यहानि निरन्तरमिति वा । अत्यन्तसंयोगे द्वितीया । इषमिष्टं वरं वरणीयं सर्वं वरन्त वरयन्तु निनयन्तु । इषं ज्ञानाख्यमन्नं वा । 'अन्नं ज्ञानरसान्नं च बाह्यमन्नमिति द्विधा' इति हि स्मरन्ति ॥ ❋ ॥

इत उपरि 'बळित्था–'[ऋ.१.१४१] इत्यादि दैर्घतमसमेव सूक्तं भवति त्रयोदशर्चं प्राणाग्निदैवत्यम् । एकादश जगत्यः । अन्त्ये त्रिष्टुभौ । आद्याः पञ्च मन्त्राः प्रथमो वर्गः । तत्रैव विशिष्यावताराणां प्रस्तावात् तावानेव व्याख्यायते । व्याख्यातं च समग्रं सूक्तमस्माभिः पूर्वमेव विस्तरेणेत्यधिकं तत्रैव द्रष्टव्यम् ।

तत्र प्रथमो मन्त्रः–

बळित्था तद् वपुंषे धायि दर्शतं देवस्य भर्गः सहंसो यतो जनिं ।
यदीमुप ह्वरंते साधंते मतिर्ऋतस्य धेनां अनयन्त सस्रुतंः ॥

सहसः अनभिभाव्यस्य देवस्य भर्गः तेजः यतो वायोर्जनि वेदार्थमथनेनाभिव्यक्तमजनि तत् प्राणतत्वं बट् बलरूपम्, इत्था इत्थमेव मूलरूपवदेव बलात्मकं दर्शतं सर्वज्ञं च त्रेधा वपुषेऽवताराय धायि अवधृतम् । यदीं यदेव उप ह्वरते श्रीराममुपह्वरे सेवते साधते साधयति च तदादिष्टं स मतिर्नाम । हनुमन्नामकं प्रथमं रूपम् । मतिमान् हनुमानिति च समानोऽर्थः । 'हन ज्ञाने' । दशमतिर्मतिरिति च । सस्रुतः सततमानन्दरसस्यन्दिन्यः ऋतस्य सत्यवचनस्य रामस्य धेनाः सन्देशवचनानि किल तं लङ्कामनयन्त अनयन् । तेन वा सीतां प्रत्यनीयन्त ॥ * ॥

द्वितीयो मन्त्रः–

पृक्षो वपुंः पितुमान् नित्य आ शंये द्वितीयमा सप्तशिवासु मातृषु ।
तृतीयंमस्य वृषभस्यं दोहसे दशंप्रमतिं जनयन्त योषंणः ॥

पितुमान् । पितुरित्यन्ननामसु पठ्यते । बकवधे बह्वन्नभुक् । पृक्षः पृतनाक्षपणो भीमो द्वितीयं वपुर्द्वितीयोऽवतारः । नित्यः भगवन्नियतः सन् युद्धेषु आ शेते विहरन् प्रवर्तते । अथ खल्वपि चत्वारो वेदाः पञ्चरात्रं भारतं पुराणानि चेति सप्तशिवासु मातृष्वपि विद्यासु नित्यमा शेते विहरति । अस्य देववृषभस्य तृतीयं वपुर्मध्वाख्यम्, यं दशप्रमतिं प्रवदन्ति, दोहसे ज्ञानदोहाय योषणो वेदमानिन्यो योषित एव मध्यगेहयोषिद्गता जनयन्त अजनयन्त । श्रीभूदुर्गा

एवात्र योषणः । नारायणपण्डिताचार्योऽप्याह– 'श्रीश्रीधरप्रततिशारशरीरयष्टी'[म.वि.२.२२] इति ॥ * ॥

तृतीयो मन्त्रः–

निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः ।
यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति ॥

यदीं यस्मादेव बुध्नाद् बुधानां नेतुः मध्वात् महिषस्य महितषड्गुणस्य वर्पसः वरणीयान् गुणानवतारान् वा ईशानासः समर्था अपि सूरयः शवसा सुखेन निः क्रन्त निष्कृतवन्तो निर्ज्ञातवन्त इति । कुतः? यदीं यस्मादेव कारणात् प्रदिवः प्रकृष्टज्ञानो मध्वरूपो मातरिश्वा अविद्यागुहायां गूढं सन्तं महिषं आधवे आधवत्वे सर्वोत्तमत्वे, सर्वोत्तमत्वस्थापनाय तदनुगुणतया वेदान् मथायति । मथित्वा च तत्वनवनीतं विश्राणयतीति ॥ * ॥

चतुर्थो मन्त्रः–

प्र यत् पितुः परमान्नीयते पर्या पृक्षुधो वीरुधो दंसु रोहति ।
उभा यदस्य जनुषं यदिन्वत आदिद् यविष्ठो अभवद् घृणा शुचिः ॥

यदयं परमात् पितुर्नारायणादेव सर्वकार्येषु सर्वावतारेषु च प्रणीयते तस्मादेव हि प्राणो नाम । तस्मादेवायं पृच्छ्यन्त इति पृक्षुधः कुवादिप्रश्नान् गोवृषभो वीरुधो लता इव प्रकर्षेण परितो दंसु दन्तेष्वारोहयति । निष्पिष्य शकलशो निराकरोति । यत् यस्मात् यातीति यत् ज्ञानरूपमस्य जनुषमवताररूपं उभौ श्रीश्रीधराविन्वतः व्याप्नुतः आदित् तस्मादेवायं यविष्ठः नित्ययुवा, अतितरां भगवता सङ्गतः अभवत् । घृणावान् सत्सु शुचिः प्रकाशमानश्चाभवत् ॥ * ॥

पञ्चमो मन्त्रः–

आदिन्मातॄराऽविशद् यास्वा शुचिरहिंस्यमान उर्विया वि वावृधे ।
अनु यत् पूर्वा अरुहत् सनाजुवो नि नव्यसीष्ववरासु धावते ॥

आदित् तस्मादेव भगवतः सप्तशिवा मातॄराविशत् । विद्याजलधौ मग्न इत्येतत् । यासु विहरन् आ शुचिः दुर्वादिभिरपव्याख्यानैश्चाहिंस्यमानः उर्व्या स्वरूपशक्त्यैव वि वावृधे वर्धते । सनातनं भगवन्तं सना सदा जवन्त इति सनाजुवः । जुङ् गतौ । पूर्वाः पूर्वोक्ताः सप्तमातॄः अनु उपक्रमाद्यनुगुणं सविमर्शमरुहत् इति यत् तस्मादेव शुचिरहिंस्यमानः । नव्यसीषु अर्वाचीनासु काव्यव्याकरणादिषु त्ववरविद्यासु नि धावते । निःशङ्कं धावते ॥ * ॥

'तां सु ते कीर्तिम्–' [ऋ.१०.५४] इति षळृचं वामदेव्येन बृहदुक्थेन दृष्टं त्रैष्टुभं सूक्तम् । इन्द्रनाम्नः प्राणस्येदं भवति । बृहतीसहस्रगोऽयं मन्त्रवर्गः ।

तत्र प्रथमो मन्त्रः–

तां सु ते कीर्तिं मघवन् महित्वा यत् त्वा भीते रोदसी अह्वयेताम् ।
प्रावो देवाँ आतिरो दासमोजः प्रजायै त्वस्यै यदशिक्ष इन्द्र ॥

हे मघवन् यशस्विन्, इन्द्र प्राणगणनायक, यद् यदा दुर्जनदुर्वचनभरेण भीते रोदसी द्यावापृथिव्यौ, दिवि देवाः पृथिव्यां सात्विकजीवाश्च । अत एवोक्तम्– 'देवाश्चतुर्मुखमुखाः शरणं प्रजग्मुः' इति । ते महित्वा महित्वेन महिम्ना सह तां तव कीर्तिं सु कीर्तयन्तः । तव कीर्तिं महित्वा पूजयित्वा वा । त्वामवनाय अह्वयेताम् । तदा देवान् प्रावः । दासं लोकोपक्षयकरमसुरनिकरमातिरः व्यनीनशः । सानुगं रावणं सानुजं दुर्योधनं मायिगणं च । यत् यस्माच्च निमित्तात् दैवासुरभेदेन द्विविधे प्रजावर्गे त्वस्यै एकस्यै दैव्यै प्रजायै ओजः सात्विकं सामर्थ्यमशिक्षः । यत् त्वा अह्वयेताम्, यदशिक्षस्तां ते सुकीर्तिं कीर्तयामीति वा । अस्यै सात्विकप्रजायै तु इति वा च्छेदः । ननु पदपाठः कुप्यति । न कुप्यति । यतोऽयोगमेव व्यवच्छिनत्ति स नान्ययोगम् ॥

द्वितीयो मन्त्रः–

यदचरस्तन्वा वावृधानो बलानीन्द्र प्रब्रुवाणो जनेषु ।
मायेत् सा ते यानि युद्धान्याहुर्नाद्य शत्रुं ननु पुरा विवित्से ॥

हे इन्द्र परमसमर्थ, तन्वा वावृधानः वर्धमानः सन् यदचरः । समुद्रलङ्घने शरीरेण, युद्धरङ्गे बलरूपेण, वादेषु ज्ञानरूपेण वावृधानः । त्वदीयानि च बलानि जनेषु प्रब्रुवाणः । 'निहन्ता शत्रुसैन्यानाम्', 'जरढस्य सुता हताः', 'यस्य त्रीण्युदितानि' इत्यादिना । भगवतः सामर्थ्यानि जनेषु ब्रुवाणो वा । सा ते मायेत् मृषा विनोदमात्रं ननु । यानि च ते युद्धान्याहुः साऽपि ते माया ननु । कुतः? यतो नाद्य शत्रुं विवित्से विन्दसे । न पुरा नन्वविन्दथाः । त्वत्समानस्य प्रतियोद्धुरेवाभावात् तव युद्धानीति मृषावादोऽयम् । आखणाश्मा हि त्वम् ॥ * ॥

तृतीयो मन्त्रः–

क उ नु ते महिमनः समस्यास्मत् पूर्व ऋषयोऽन्तमापुः ।
यन्मातरं च पितरं च साकमजनयथास्तन्व१ः स्वायाः ॥

समस्य समग्रस्य ते महिम्नः अन्तमस्मत्तः पूर्वेऽपि ऋषयः क उ न्वापुः । ऊँ इति प्रतृण्णं प्रश्ने, उल्लाघने च । यत् त्वं जगतः मातरं च पितरं च श्रीश्रीधरौ साकं सहैव स्वायास्तन्वः स्वावताररूपेण अजनयथाः प्रकट्यकृथाः ॥

चतुर्थो मन्त्रः–

चत्वारि ते असुर्याणि नामादाभ्यानि महिषस्य सन्ति ।
त्वमङ्ग तानि विश्वानि वित्से येभिः कर्माणि मघवन् चकर्थ ॥

महिषस्य महितषड्गुणस्य नारायणस्य चत्वारि रूपाणि अदाभ्यानि अहिंस्यानि असुषु रममाणानि नियमयन्ति चेत्यसुर्याणि वासुदेवसङ्कर्षणप्रद्युम्नानिरुद्धा नाम ते रक्षकाणि सन्ति । अङ्ग, तानि सर्वाणि त्वमेव वित्से, यैः प्रेरितस्त्वं कर्माणि चकर्थ । हे मघवन् यज्ञाराध्य । भुव्यन्तरिक्षे दिवि सत्यलोके चेति महिषस्य महीयत इति महनीयस्य तवैव चत्वारि रूपाणि वा । त्रयोऽवतारा मूलरूपं चेति वा चत्वारि रूपाणि ॥ * ॥

पञ्चमो मन्त्रः–

त्वं विश्वा दधिषे केवलानि यान्याविर्या च गुहा वसूनि ।
काममिन्मे मघवन् मा वि तारीस्त्वमाज्ञाता त्वमिन्द्रासि दाता ॥

हे इन्द्र इन्द्रियप्रेरक, त्वं केवलानि केवलं त्वयैव दातुं शक्यानि विश्वानि, यान्याविः प्रकटानि बाह्यान्यैहिकानि, यानि च गुहा निगूढानि आन्तराणि पारत्रिकाणि ज्ञानादीनि वसूनि दधिषे ददासि । हे मघवन् सम्पत्स्वामिन्, मे कामं कामितं मा इत् वितारीः मा खलु विनीनशः । त्वमाज्ञाता मदभिलषितानामसि । त्वमेवासि दाता च ॥ * ॥

षष्ठो मन्त्रः–

यो अर्दधाज्ज्योतिषि ज्योतिरन्तर्यो असृजन्मधुना सं मधूनि ।
अर्ध प्रियं शूषमिन्द्राय मन्म ब्रह्मकृतो बृहदुक्थादवाचि ॥

यो वेदादिज्योतिष्यन्तरर्थाविष्करणेनापूर्वं ज्योतिरदधात् । पुनरधिकं द्योतमानं चकार । सूर्यादिज्योतिषि चान्तः स्थितो ज्योतिरदधात् । यो मधुना मधुरेण व्याख्यानेन मधुराणि प्रमेयजातानि समसृजत् आविश्चकार । अथेदमेवंविधमिन्द्राय वायवे प्रियं मन्म मननीयं शूषमज्ञानशोषं बलं ब्रह्मकृतो वेदद्रष्टुः बृहदुक्थादृषेर्मत्तः अवाचि उक्तं स्तुतमभूदिति । ब्रह्म आविष्करोतीति ब्रह्मकृत्, बृहदुक्थं शस्त्रं बृहतीसहस्रगतो मन्त्रभाग इति वा ॥ * ॥

'तदस्य–' [ऋ.१.१५४.५] इति प्रथममण्डले 'विष्णोर्नु कम्–' इत्यादिके षळृचे दीर्घतमोदृष्टे विष्णुसूक्ते त्रैष्टुभे पञ्चमो मन्त्रः–

तदस्य प्रियमभि पाथो अश्यां नरो यत्र देवयवो मदन्ति ।
उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सः ॥

तत् मध्वेनाऽविष्कृतमस्य विष्णोरभीक्ष्णं प्रियं पाति जीवमिति पाथः पन्थानमश्यां प्राप्नुयाम् । यत्र देवमिच्छन्तो दैवस्वभावाः सात्विका नरो मदन्ति । इत्थं तत्ववादाविष्करणेन उरुक्रमस्य बन्धुरात्मीयः स हि विष्णोः परमे पदे उनत्तीति उत्स उत्क उत्सुको वा मध्वः ॥ * ॥

'सप्त स्वसॄः– '[ऋ.१०.५.५] इति दशममण्डले 'एकः समुद्रः–' इत्यादिके सप्तर्चे प्राणाग्निसूक्ते त्रितदृष्टे त्रैष्टुभे पञ्चमो मन्त्रः–

सप्त स्वसृ॒ररु॑षीर्वावशा॒नो वि॒द्वान् मध्व॒ उज्ज॑भारा दृ॒शे कम् ।
अ॒न्तर्ये॑मे अ॒न्तरि॑क्षे पु॒राजा इ॒च्छन् व॒व्रिम॑विदत् पू॒षण॒स्य ॥

वावशानः तत्वप्राकट्यमभिलषन् विद्वान् मध्वः अरुषीः रोचमानाः स्वं स्वतन्त्रं सरन्तीति स्वसृः सप्त विद्या उज्जहार सतां कं सुखेन दृशे दर्शनाय । अपि चायं पुराजाः वीशादिदेवेभ्यः पुराजातः, पूर्वं जातेषु देवेष्वप्यास्त इति वा, प्राणः अन्तर्हृदयान्तरिक्षे जीवान् येमे नियमयति । स एव चेह भगवदादेशं चिकीर्षन् पूषणस्य पूर्णबलानन्दस्य विष्णोः वव्रिं गुणजातम्, वरणाद् वव्रिं स्वरूपं वा अविदत् अवेदयत् । 'निर्णिक्, वव्रिः, वर्पः, वपुः' इति रूपनामसु निघण्टुः । 'वर्पाख्यान् गुणान्' इति च स्म हि स्मरन्ति ॥ * ॥

सङ्क्षिप्नुवाक्ये । 'त्रसि-गृधि-धृषि-क्षिपेः क्नुः' [३.२.१४०] । एभ्यो धातुभ्यस्तच्छीलादिषु क्नुप्रत्ययः भवति । ननु तर्हि 'सङ्क्षिप्णुः' इति वक्तव्यम्, न सङ्क्षिप्नुरिति? सत्यम् । अथापि प्राचीनाः सङ्क्षिप्नुरित्येव पठन्ति, न सङ्क्षिप्णुरिति । तद्यथा सुषुम्नेत्येव पठन्ति, न सुषुम्णेति ॥ ६ ॥

उच्चावचा येन समस्तचेष्टाः
किं तत्र चित्रं चरितं निवेद्यम् ।
किन्तूत्तमश्लोकशिखामणीनां
मनोविशुद्ध्यै चरितानुवादः ॥ ७ ॥

(प.दी.) उच्चावचाः । **येन** श्रीमुख्यवायुना **उच्चावचाः** उच्चाः गुरुपर्वतोद्धरणाद्याः अवचाः अल्पाः तृणोद्धरणाद्याः **समस्तचेष्टाः** सर्वे व्यापाराः, स्युरिति शेषः । 'कारकाणां प्रयोगे तु क्रियाभावेऽस्ति तिष्ठति' इति वचनान्नाध्याहारदोषः । सर्वेषां देहेन्द्रियनियामकतया सर्वान्तर्गतेन येन सर्वाः चेष्टाः स्युः, यत्प्रेरणया भवन्ति, **तत्र** एवं सर्वप्रवर्तकस्य चरितेषु **किं चरितं** कर्म **चित्रं निवेद्यम्?** इदं चित्रमिति किं वर्णयितुं शक्यते? तत्कृतानां सर्वेषामपि चरितानां चित्रत्वादिदं चित्रमिति विशिष्य वर्णयितुमशक्यमिति भावः ।

तर्हि न वर्णनीयं किमित्यभिप्रायेण शङ्कते– **किन्त्विति** । परिहारमाह– **उत्तमश्लोकेत्यादिना** । **उत्तमश्लोकशिखामणीनाम्,** [उत्तमश्लोकानां] पुण्ययशसां शिखामणयः चूडारत्नभूताः, उत्तमा इति यावत् , तेषां **चरितानुवादः** कर्मणामनुवर्णनं **मनोविशुद्ध्यै** चित्तशुद्ध्यर्थं स्यादिति संयोज्यम् । तादर्थ्ये चेयं चतुर्थी । 'पद्ये यशसि च श्लोकः' इत्यमरः ॥ ७ ॥

(त.चं.) उच्चावचाः । उच्चा अवचाश्चेति टीकाकाराः । यद्यपि गणपठितमेतत्–'उच्चावचम्, उच्चनीचम्, अवचितोपचितम्, अवचितपराचितम्' इत्यादि । उदक् च अवाक् च उच्चावचमिति च व्याचक्षते । रीत्यन्तरेणापि शक्यं व्याख्यातुम् । नहि राज्ञामाज्ञाऽस्ति नोच्चा अवचाश्चेति विग्रहीतव्यमिति । अथ खल्वपि सन्दिहते– कथमवचमित्यल्पवचनम्? अवचनीयं ह्यवचमुच्यते । सत्यम् । अवचनीयमप्युच्यते । अल्पमप्युच्यते । उच्चिनोतीत्युच्चं बहळम् । अवचिनोतीत्यवचमल्पम् ॥ ७ ॥

मालाकृतस्तच्चरिताख्यरत्नैरसूक्ष्मदृष्टेः सकुतूहलस्य ।
पूर्वापरीकारमथापरं वा क्षाम्यन्तु मे हन्त मुहुर्महान्तः ॥ ८ ॥

(भा.प्र.) अपरं वा अपरपूर्वीकारं वा ॥

(प.दी.) मालेति । **महान्तः** सन्तः सज्जनाः **तच्चरिताख्यरत्नैः** तस्य श्रीमुख्यप्राणस्य चरिताभिधरत्नैः **मालाकृतः** मालां रचयतो **मे पूर्वापरीकारम्,** पूर्वस्य अपरीकारम्, पूर्वं वर्णनीयस्य अपरीकरणं पश्चाद्वर्णनम् । **अथ** पक्षान्तरम् **अपरं वा** अपरपूर्वीकरणं वा, पश्चाद्वर्णनीयस्य आदितो वर्णनं वा मुहुः **क्षाम्यन्तु** सहन्ताम् । 'क्षमूष् सहने' इति धातुः । पूर्वापरीकारादेर्निमित्तमाह– **असूक्ष्मदृष्टेरिति** । **असूक्ष्मदृष्टेः** सूक्ष्मज्ञानरहितस्य । अत एव पूर्वापरीकारादि सम्भावितमिति भावः । असूक्ष्मदृष्टित्वेऽपि परामर्शेन पूर्वापरीकारादि किं परिहर्तुं न शक्यत इत्याशङ्क्य न शक्यमित्याह– **सकुतूहलस्येति** । **सकुतूहलस्य** ससम्भ्रमस्य । अत एव न परामर्शावसर इति

भावः । अयमभिप्रायः– यथा कश्चिन्मालाकारः [स्वयं मन्ददृष्टिः सन्] अनर्घ्यरत्नानि दृष्ट्वा सम्भ्रान्तः सन् आनुपूर्वीं विहाय यदि पूर्वापरीकारादिकं कुर्यात् तद्वदहमपि स्वतो मन्ददृष्टिः सन् तच्चरिताख्यरत्नानि दृष्ट्वा सम्भ्रान्तः सन् यदि पूर्वापरीकारादिकं कुर्यां तर्हि महान्तोऽनुकम्पया तन्मुहुः क्षाम्यन्त्विति । हर्षद्योतकं **हन्त** इत्येतत् । 'हन्त हर्षेऽनुकम्पायाम्' इत्यमरः ॥

(त.चं.) अनुकम्पायां हन्त । मन्ददृष्टिरयम् । अथापि सकुतूहल इत्यनुकम्पया क्षाम्यन्तु । अहङ्कारप्रतिक्षेप एवायम् । न वस्तुगतिः । अमन्ददृष्टिरप्यात्मानं मन्ददृष्टिमाह । तद्यथा सीतां प्रति हनुमद्वचनम्– 'मत्तः प्रत्यवरः कश्चिन्नास्ति सुग्रीवसन्निधौ' इति ॥ ८ ॥

श्रीवल्लभाज्ञां ससुरेन्द्रयाच्ञां
सम्भाव्य सम्भाव्यतमां त्रिलोक्याम् ।
प्राणेश्वरः प्राणिगणप्रणेता
गुरुः सतां केसरिणो गृहेऽभूत् ॥ ९ ॥

(भा.प्र.) तीर्थविघ्नकरं दुष्टगजं हत्वा प्रतोषिताः ।
भरद्वाजादयो धन्यं पुत्रं केसरिणे[१] ददुः ॥

(प.दी.) वायोरवतारलीलां वक्ष्यामीत्युक्तम् । तत्र हनुमदाख्यावतारस्य प्राथमिकत्वात् तल्लीलां वक्तुमारभते– **श्रीवल्लभाज्ञामि**त्यादिना । **प्राणिगणप्रणेता** प्राणिगणानां प्रेरकः **सतां गुरुः प्राणेश्वरः** श्रीमुख्यप्राणः **केसरिणः** केसरिनाम्नो वानरस्य गृहे भार्यायां **अभूत्** प्रादुर्भूतः । 'तीर्थविघ्नकरं दुष्टगजं हत्वा प्रतोषिताः । भरद्वाजादयो धन्यं पुत्रं केसरिणे ददुः' इति वचनात्, मुनीनां वरादेव तत्पुत्रभावं प्राणो भेजे । किं कृत्वा? **ससुरेन्द्रयाच्ञां** 'स्वामिन्, भवान् भुव्यवतीर्य राक्षसनिग्रहं करोतु' इति सुरेन्द्रप्रार्थना-

१. 'केसरिणो ददुः' इति पाठान्तरम् ।

सहिताम्, **त्रिलोक्यां** त्रैलोक्ये **सम्भाव्यतमां** अतिशयेन सम्भावनीयां **श्रीवल्लभाज्ञां सम्भाव्य** आदृत्य ॥ ९ ॥

(त.चं.) ससुरेन्द्रयाच्ञाम् । 'यज-याच-यत-विच्छ-प्रच्छ-रक्षो नङ्' [३.३.९०] । तद् यथा– यज्ञः । याच्ञा । यत्नः । विश्नोऽन्तरायः । प्रश्नः । रक्ष्णो रक्षणमिति । प्राणिगणप्रणेता जीवगणाभिमानी । जीवस्वरूपं हि षोडशी कला । तदभिमानी च सः । प्राणेश्वरः मरुद्गणेश्वरः । गृहेऽङ्गनायाम् । गृह्यत इति गृहं कळत्रम् । गृह्यते वा । गृह ग्रहणे । यत्र विशन्ति तद् गृहम् । यत्र निर्विशन्ति तदपि गृहम् ॥ ९ ॥

येये गुणा नाम जगत्प्रसिद्धा यं तेषुतेषु स्म निदर्शयन्ति ।
साक्षान्महाभागवतप्रबर्हं श्रीमन्तमेनं हनुमन्तमाहुः ॥ १० ॥

(भा.प्र.) 'पराक्रमौदार्ययशःप्रतापैः सौजन्यमाधुर्यनयानयैश्च'[१] ।
'गाम्भीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतः कोऽभ्यधिकस्त्रिलोक्याम्'[२] ।
'[३]प्रजा मिमङ्क्षोरिव सागरस्य लोकान् दिधक्षोरिव पावकस्य ।
'सर्वान् जिहीर्षोरिव चान्तकस्य हनूमतः स्थास्यति कः पुरस्तात् ।
'ससूत्रवृत्त्यर्थपदं महार्थं ससङ्ग्रहं साध्यति वै कपीन्द्रः ।
'न ह्यस्य कश्चित् सदृशोऽस्ति शास्त्रे वैशारदे छन्दगतौ तथैव' ॥
इत्युत्तररामायणे गुणकथनम् [७.३६.४१–४३] ॥

(प.दी.) येये । **साक्षात्** मुख्यतः **महाभागवतप्रबर्हं** महाभागवतश्रेष्ठं **श्रीमन्तं**

१.'पराक्रमोत्साहमतिप्रतापैः सौन्दर्यमाधुर्यदयानयैश्च' इति पाठान्तरम् ।

२.'को ह्यधिकस्त्रिलोक्याम्' इति च ।

३. प्रवीविविक्षोरिव सागरस्य ....लोकक्षयेष्वेव यथाऽन्तकस्य' इति प्रचलितो रामायणपाठः । वेदाङ्गतीर्थीये तु 'प्रजा मिमङ्क्षोरिव सागरस्य .....सर्वान् जिहीर्षोरिव चान्तकस्य' इति प्रथमतृतीयपादयोः पाठान्तरम् । स एव च साधुरिति भाति । भावप्रकाशिकामूलकोशानुपलम्भाद् भगवान् सन्देह एव शरणम् ।

एनं केसरिपुत्रं **हनुमन्तं** हनुमन्नामकं **आहुः** । **येये गुणा नाम** गुणशब्द-वाच्याः **जगत्प्रसिद्धाः** लोकप्रसिद्धाः **तेषुतेषु** गुणत्वेन प्रसिद्धेषु **यं** केसरिपुत्रं **निदर्शयन्ति स्म** निदर्शनमकुर्वन्, महान्त इति शेषः । तस्मादयं हनूमा-नित्यर्थः । 'हनशब्दो ज्ञानवाची' इति वचनात् हनूमान् इत्युक्ते ज्ञानवा-नित्यर्थः । ततश्च ज्ञानोपलक्षितसर्वगुणयुक्तत्वेन सर्वगुणनिदर्शनस्थान-त्वादयं हनूमानित्युक्त इति भावः ।। १० ।।

(त.चं.) निदर्शयन्ति स्म वाल्मीकिमुखा मुनयः । तानि च कानिचन वचनानि भावप्रकाशिकायामेव न्यदर्शिषत । अभिभवनशक्तिः पराक्रमः । अनभिगम्यता प्रतापः । प्रियंवदता माधुर्यम् । अनयः शठे शाठ्यम् । भावस्यानवगाह्यता गाम्भीर्यम् । सपदि समस्यापारगमनं चातुर्यम् । अवार्य-मन्तःसत्वं सुवीर्यम् । रभसा प्रत्युद्गमने साध्वसविरहो धैर्यम् । अथ भाविन-मवतारमप्युपक्षिपति– ससूत्रवृत्यर्थपदम् । सूत्रविवृत्या वृत्त्या वाऽनुव्याख्या-समाख्यया सहितमर्थपदम्, सूत्रार्थप्रतिपादकं भाष्यम् । सर्वशास्त्रार्थसङ्ग्र-हाख्येन सङ्ग्रहभाष्येण च सहितम् । साधयिष्यति वै मध्वरूपेण । विशारदो विष्णुः । 'माया वैशारदी' इति हि भागवते । वैशारदे वैष्णवे शास्त्रे, छन्दसां वेदानामवगतौ च नह्यस्य कश्चित् सदृशोऽस्ति ।। १० ।।

कर्माणि कुर्वन् परमाद्भुतानि सभासु दैवीषु सभाजितानि ।
सुग्रीवमित्रं स जगत्पवित्रं रमापतिं रामतनुं ददर्श।। ११ ।।

(प.दी.) कर्माणि । **परमाद्भुतानि** अत्याश्चर्याणि **दैवीषु** देवसम्बन्धिनीषु **सभासु सभाजितानि** सम्भावितानि **कर्माणि कुर्वन् सुग्रीवमित्रं** सुग्रीव-स्यानिमित्तोपकारी **स** हनूमान् **जगत्पवित्रं** जगति शुद्धम्, निर्दोषमिति यावत् । 'पवित्रोऽग्नौ हरौ पूते' इत्यभिधानम् । **रामतनुं** श्रीरामस्वरूपं **रमापतिं ददर्श** ।। ११ ।।

(त.चं.) सभाजितानि सबहुमानं सेवितानि । सभाज प्रीतिसेवनयोः । तत्वदीपिकाचार्योऽप्याह–'सुचरित चरितं भाति गन्धर्वगीतम्' इति ।।

पदारविन्दप्रणतो हरीन्द्रस्तदा महाभक्तिभराभिनुन्नः ।
अग्राहि पद्मोदरसुन्दराभ्यां दोर्भ्यां पुराणेन स पूरुषेण ॥ १२ ॥

(प.दी.) पदारविन्देति । तदा **महाभक्तिभराभिनुन्नः** महाभक्त्याख्यभारेण अभितो नुन्नः प्रेरितः, अत एव **पदारविन्दप्रणतः** सः **हरीन्द्रः** श्रीहनूमान् **पुराणेन पूरुषेण** श्रीरामेण **पद्मोदरसुन्दराभ्यां** कमलान्तर्भागवद् रक्तत्वेन रमणीयाभ्यां **दोर्भ्यां अग्राहि** गृहीतः, उत्थापित इति यावत् । अत्र दोःशब्दस्य बाहुवाचकत्वेऽपि पद्मोदरसुन्दराभ्यामित्युक्तत्वात् उत्तानाभ्यां पाणिभ्याम-ग्राहीत्यवगम्यते । यथा महाभारमुद्वहन्नशक्तत्वात् पतन् कश्चित् केनचिदाशु गृह्येत तद्वदिति श्लेषाभिप्रायः ॥ १२ ॥

(त.चं.) पिपुरतीति पूरवः पूर्णाः । तेषु सारभूत इति पूरुषः पूर्णतमः । पॄ पालने पूरणे च । ॠकारस्य ऊरादेशः । 'ॠतेरूर्' इति हि काशकृत्स्नः । यद्वा पूरुष इति पुरुषोत्तमः । 'आधिक्येऽधिकम्' ॥ १२ ॥

अदार्यसालावलिदारणेन व्यापादितेन्द्रप्रभवेन तेन ।
प्राद्योतनिप्रीतिकृता निकामं मधुद्विषा सन्दिदिशे स वीरः ॥ १३ ॥

(प.दी.) अदार्येति । **अदार्यसालावलिदारणेन** श्रीराघवेतरैरभेद्यसाल-पङ्क्तिविदारणेन, **व्यापादितेन्द्रप्रभवेन** निहतवालिना, अत एव **निकामं** अतितरां **प्राद्योतनिप्रीतिकृता**, प्रद्योतनः सूर्यः, तत्सुतः प्राद्योतनिः सुग्रीवः, तस्य प्रीतिकृता **मधुद्विषा** मधुसूदनेन **तेन वीरः सः** हनूमान् **सन्दिदिशे** सीतान्वेषणार्थं प्रहितः ॥ १३ ॥

(त.चं.) वरबलेनादार्या रक्षोरूपा सप्तसालावलिः । सालवृक्षस्य 'मत्ति' इत्यपभ्रष्टसञ्ज्ञा । समानपदत्वविवक्षायां 'प्रभवेण' इति च साधु । अविवक्षायां प्रभवेनेति । तद् यथा– प्रपन्नः । सुषुम्ना । मधुद्विषा । कैटभसहचरं मधुमह-न्निति । लवणपितुर्मधोर्द्विट् । अत एव शत्रुघ्नेन लवणं घातयामासेति वा । असुराणां मधु आनन्दमपहन्तीति च ॥ १३ ॥

कर्णान्तमानीय गुणग्रहीत्रा रामेण मुक्तो रणकोविदेन ।
स्फुरन्नसौ वैरिभयङ्करोऽभूत् सत्पक्षपाती प्रदरो यथाऽग्र्यः ॥ १४ ॥

(भा.प्र.) गुणग्रहीत्रा दोषेतरग्राहिणा, ज्याकर्षणेन च। पक्षो भागः, पतत्रं च॥

(प.दी.) कर्णान्तम् । **गुणग्रहीत्रा** दोषेतरग्राहिणा, हनूमद्गुणान् जानता वदता वेति भावः । हनूमद्गुणाश्च उत्तररामायणे श्रूयन्ते –'पराक्रमौदार्ययशःप्रतापैः सौजन्यमाधुर्यनयानयैश्च । गाम्भीर्यचातुर्यसुवीर्यधैर्यैर्हनूमतः कोऽभ्यधिकस्त्रिलोक्याम् । प्रजा मिमङ्क्षोरिव सागरस्य लोकान् दिधक्षोरिव पावकस्य । सर्वान् जिहीर्षोरिव चान्तकस्य हनूमतः स्थास्यति कः पुरस्तात्' इत्यादिहनूमद्गुणग्रहीत्रा । गुणो मौर्वी च, **गुणग्रहीत्रा** मौर्वीग्राहिणा, **रणकोविदेन,** रणो युद्धम्, तत्र चतुरेण **रामेण कर्णान्तं** कर्णसमीपं **आनीय** रहसि वक्तव्यं वक्तुमिति भावः, मौर्वीकर्षकश्च यथा मौर्वी कर्णान्तमानीय हि बाणं मुञ्चति तद्वत् **कर्णान्तमानीय रामेण मुक्तः** । **स्फुरन्** शोभमानः **असौ** हनूमान् **वैरिभयङ्करः अभूत्** । कथम्? **अग्र्यः** आर्जवनैशित्यादिगुणयुक्तत्वेन श्रेष्ठः **प्रदरः** शरो **यथा** । कथम्भूतः? **सत्पक्षपाती** सत्सु पक्षपातयुक्तः । शरोऽपि शोभनेन पक्षेण पतत्रेण पातः गमनं तद्वान् ॥

(त.चं.) गुणग्रहीत्रा। 'नानृग्वेदविनीतस्य नायजुर्वेदधारिणः। नासामवेदविदुषः शक्यमेवं प्रभाषितुम्' इत्यादि रामवचनम्। 'त्वय्येव हनुमन्नस्ति बलं बुद्धिः पराक्रमः। देशकालानुवृत्तिश्च नयश्च नयपण्डित' इत्यादि च । 'शौर्यं दाक्ष्यं बलं धैर्यं प्राज्ञता नयसाधनम् । विक्रमश्च प्रभावश्च हनूमति कृतालयाः' इत्यादि च । शृणातीति शरः । परान् प्रकर्षेण दृणातीति च प्रदरः । दॄ विदारणे । अग्र्यः परदारणे चेतरप्रहरणेभ्योऽधिकरय इत्यग्रेसरः ॥

गोभिः समानन्दितरूपसीतः स्ववह्निनिर्दग्धपलाशिराशिः ।
अहो हनूमन्नववारिदोऽसौ तीर्णाम्बुधिर्विष्णुपदे ननाम ॥ १५ ॥

(भा.प्र.) गोभिः वाग्भिरद्भिश्च। सीता सीरजा[ता], सस्यं च। पलाशिनो वृक्षाः, मांसादाश्च॥

(प.दी.) गोभिरिति। गोभिः वचोभिः **समानन्दितरूपसीतः,** समानन्दिता सन्तोषिता रूपसीता सीतारूपं येन सः समानन्दितरूपसीतः। अथवा समानन्दितं रूपं यस्याः सा समानन्दितरूपा सीता येन सः समानन्दित-रूपसीतः। **स्ववह्निनिर्दग्धपलाशिराशिः,** स्वपुच्छगताग्निना निर्दग्धः पलाशिराशिः मांसाशिनां राक्षसानां समूहो येन स तथोक्तः। **असौ हनूमन्नववारिदः** हनूमदाख्यनूतनमेघः **तीर्णाम्बुधिः** पुनरप्युत्तीर्णसागरः **विष्णुपदे** श्रीरामपदे **ननाम** नमश्चकार। यथा कश्चिन्नवमेघः स्वजलैः **समानन्दितरूपसीतः** समानन्दितरूपाणि सीतानि सस्यानि येन स तथोक्तः। **स्ववह्निनिर्दग्धपलाशिराशिः** स्वगतविद्युद्वह्निना निर्दग्धः पलाशिराशिः येन स तथोक्तः। पलाशिनः पत्रवन्तः। 'पत्रं पलाशं च्छदनं दलं पर्णं च्छदः पुमान्' इत्यमरः। पत्रवन्तश्च वृक्षाः। निर्दग्धवृक्षसमूह इति यावत्। एवम्भूतो मेघः **तीर्णाम्बुधिः** वायुवशात् समुद्रमतीत्य देशान्तरं गतः यथा **विष्णुपदे** आकाशे नमेत् लीनो भवेत् तद्वदिति श्लेषाभिप्रायः। **अहो** आश्चर्यं हनूमच्चरितमित्यर्थः॥ १५॥

(त.चं.) सीरजाता सीता। तेन जनकात्मजा च सीता। हलवीथी च सीता। सस्यजातिश्च सीता। सस्यं वा सीतम्। सीरजातमित्येव। रूपेणैव सीता नतु स्वरूपेण। विष्णुपदे वियति वारिदः,विष्णोः पादे पादौ वा हनूमान् ननाम॥ १५॥

अपक्षपाती पुरुषस्त्रिलोक्यामभोगभोक्ता पतगाधिराजम्।
विश्वम्भरं बिभ्रदसौ जिगाय त्वरापराक्रान्तिषु चित्रमेतत्॥१६॥

(भा.प्र.) अपक्षपातित्वं सत्सु गुणानुकूल्येन स्थितिः। भोगो नामाहिशरीरं च॥

(प.दी.) अपक्षेति। असौ हनूमान् **त्वरापराक्रान्तिषु** वेगे पराक्रमेषु च

पतगाधिराजं गरुडं **जिगाय**। **एतत्** हनूमतो गरुडविजयः **त्रिलोक्यां चित्रं** आश्चर्यम्। तत् कुतः? हनूमान् **अपक्षपाती पुरुषः**, पक्षाभ्यां पातरहितः अपक्षपाती, सत्सु तत्तद्गुणानुसारेण वर्तत इति चापक्षपाती। गरुडस्तु पक्षाभ्यां पततीति पक्षपाती। **अभोगभोक्ता** हनूमान् भोगानां भोक्ता न भवति। ब्रह्मचर्यनिरत इति भावः। नैवं गरुडः। स हि भोगान् सर्पदेहान् भुङ्क्ते। **विश्वम्भरं** सर्वधारकं श्रीरामं **बिभ्रद्** वहन्। विश्वम्भरभगवद्वाहनत्वं गरुडस्याप्यस्ति। तथाऽप्यभोगभोक्तुरपक्षपातिनो हनूमतो भोगभोक्तुः पक्षपातिनो गरुडस्य जयश्चित्रमिति भावः ॥ १६ ॥

(त.चं.) विश्वं जगत्। विश्वो वायुः। तं बिभ्रतमयं स्वयमबिभः। तदिदं चित्रम्। पदगः पुरुषः पतगाधिराजं जिगायेति चित्रम्। पक्षाभ्यामपतन्नपि त्वरायां जिगायेति चित्रम्। पोषहेतून् भोगानभुञ्जानोऽपि पराक्रान्तिषु जिगायेति चित्रमितीयं त्रिलोक्यामदृष्टचरा चित्रपरम्परा। भुञ्जन्ति भुज्यन्ते चेति भोगाः ॥ १६ ॥

निबध्य सेतुं रघुवंशकेतुभ्रूभङ्गसम्भ्रान्तपयोधिमध्ये।
मुष्टिप्रहारं दशकाय सीतासन्तर्जनाग्र्योत्तरमेषकोऽदात् ॥ १७ ॥

(प.दी.) निबध्येति। एषकः, स्वार्थे कप्रत्ययः, एषः हनूमान् **रघुवंश-केतुभ्रूभङ्गसम्भ्रान्तपयोधिमध्ये**, रघुवंशकेतोः श्रीरामस्य भ्रूविक्षेपेण सम्भ्रान्त-स्य पयोधेः सागरस्य मध्ये, **सेतुं निबध्य**, लङ्कां गत्वेति भावः, **दशकाय** दशशिरसे रावणाय **मुष्टिप्रहारमदात्** ताडितवानित्यर्थः। कथम्भूतं मुष्टि-प्रहारम्? **सीतासन्तर्जनाग्र्योत्तरं** सीतासन्तर्जनस्य सीताभत्सनस्य अग्र्योत्तरं समीचीनोत्तरम् ॥ १७ ॥

(त.चं.) केतुरिव केतुः। विजयस्तम्भ इव ॥ १७ ॥

जाज्वल्यमानोज्ज्वलराघवाग्नौ चक्रे स सुग्रीवसुयायजूके।
आध्वर्यवं युद्धमखे प्रतिप्रस्थात्रा सुमित्रातनयेन साकम् ॥ १८ ॥

(प.दी.) जाज्वल्येति । **स** हनूमान् **जाज्वल्यमानोज्ज्वलराघवाग्नौ** भृशं शोभमानराघवाख्याग्नियुक्ते **सुग्रीवसुयायजूके** सुग्रीवाख्यसद्यजमानयुक्ते **युद्धमखे** युद्धाख्ययज्ञे **प्रतिप्रस्थात्रा** प्रतिप्रस्थातृव्यापारयुक्तेन **सुमित्रा-तनयेन साकं आध्वर्यवं** अध्वर्युव्यापारं **चक्रे** । यज्ञे ह्यध्वर्य्वादयो भवेयुः । युद्धाख्ययज्ञे च हनूमदादयोऽध्वर्य्वादयः ॥ १८ ॥

(त.चं.) यायजूको यष्टा । अध्वर्युः प्रधानहोमकर्ता यजुर्वेदवित् । अध्वर-मिच्छति, अध्वरं याति वा । तत्सहायक ऋत्विक् प्रतिप्रस्थाता । यजुर्वेद-विदेव । प्रत्येकं प्रतिनियतं प्रस्थापयतीति । सोमयागे हि चत्वारः प्रधानर्त्विजः होताऽध्वर्युरुद्गाता ब्रह्मा चेति । तत्रर्ग्वेदविद् होता शस्त्राणि शंसति । अध्व-र्युर्जुहोति । उद्गाता साम गायति । ब्रह्मा सर्वाधिवीक्षको यज्ञस्य विरिष्टिं सन्दधाति । तेषां त्रयस्त्रयः सहायका इत्याहत्य षोडशर्त्विजः । तथाह्या-श्वलायनः–'तस्यर्त्विजश्चत्वारस्त्रिपुरुषाः । तस्यतस्योत्तरे त्रयः । होता, मैत्रावरुणोऽच्छावाको ग्रावस्तुत्, अध्वर्युः, प्रतिप्रस्थाता नेष्टोन्नेता, ब्रह्मा, ब्राह्मणाच्छंस्याग्नीध्रः पोता, उद्गाता, प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इति । एतेऽहीनैकाहैर्याजयन्ति' इति । द्विरात्रादिरहीनः । अग्निष्टोमादिरेकाहः । 'यथा सवनत्रयात्मकः क्रतुरहीनादिषु प्रत्यहं सम्बध्यमानो विशिष्टो भवति' इति पण्डिताचार्यवचनम् ॥ १८ ॥

रामार्चने यो नयतः प्रसूनं
द्वाभ्यां कराभ्यामभवत् प्रयत्नः ।
एकेन दोष्णा नयतो गिरीन्द्रं
सञ्जीवनाद्याश्रयमस्य नाभूत् ॥ १९ ॥

(प.दी.) **रामार्चन** इति । रामार्चनार्थं **द्वाभ्यां कराभ्यां प्रसूनं नयतः यः प्रयत्नः** प्रयासः **अभवत् एकेन दोष्णा** एकेन हस्तेन **सञ्जीवनाद्याश्रयं** मृतसञ्जीव-नाद्याश्रयं **गिरीन्द्रं** गन्धमादनं **नयतोऽस्य** हनूमतः स प्रयत्नो **नाभूत्** । पर्वत-

मुद्धृत्य नयतोऽस्य पुष्पोद्धरणे यावान् प्रयासस्तावानपि नाभूदिति भावः ॥
(त.चं.) सञ्जीवनादीति। मृतसञ्जीवनं विशल्यकरणं सन्धानकरणं सवर्णकरणं चेति ॥ १९ ॥

स दारितारिं परमं पुमांसं समन्वयासीन्नरदेवपुत्र्या ।
वह्निप्रवेशाधिगतात्मशुद्ध्या विराजितं काञ्चनमालयेव ॥ २० ॥

(प.दी.) स इति । स हनूमान् **दारितारिम्,** दारिताः निहताः अरयो येन स दारितारिः, तं **परमं पुमांसम्,** रावणादीन् हत्वा अयोध्याभिमुखं यान्तं रामं **समन्वयासीत्** सम्यगनुययौ। कथम्भूतम्? **वह्निप्रवेशाधिगतात्मशुद्ध्या** वह्निप्रवेशेन जनैरधिगतात्मपातिव्रत्यादिशुद्धिमत्या **नरदेवपुत्र्या** राजपुत्र्या सीतया **विराजितं** शोभमानम् । **वह्निप्रवेशाधिगतात्मशुद्ध्या काञ्चनमालयेव** । वह्नौ निक्षेपणे हि काञ्चनस्य शुद्धिरवगम्यते ॥ २० ॥
(त.चं.) समुचितमन्वयासीत्। सभक्त्युन्मेषं विरचिताञ्जलितया प्रह्वतया ॥

श्यामं स्मितास्यं पृथुदीर्घहस्तं सरोजनेत्रं गजराजयात्रम् ।
वपुर्जगन्मङ्गलमेष दृग्भ्यां चिरादयोध्याधिपतेः सिषेवे ॥ २१ ॥

(प.दी.) श्याममिति । **एष** हनूमान् **श्यामं** श्यामवर्णम्, **स्मितास्यं** स्मितवदनम्, **पृथुदीर्घहस्तं** स्थूलायतबाहुम्, **सरोजनेत्रं** पद्माक्षम्, **गजराजयात्रं** गजराजगतिसमानगमनम्, **जगन्मङ्गलं** दर्शनश्रवणमननैः जगन्मङ्गलप्रदम्, **अयोध्याधिपतेः वपुः चिरात् दृग्भ्यां सिषेवे** । दृग्भ्यामित्युपलक्षणम् । 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम् । अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्' इति नवविधां सेवां कृतवानित्यभिप्रायः ॥ २१ ॥

(त.चं.) श्याममित्यादिना रामशब्दार्थं निरवक् । नीलमेघश्याम इति रामः । गात्रेण च रमणीयतम इति रामः । असितश्वेतमनोज्ञेषु हि रामशब्दं पठन्ति । दीर्घहस्तमाजानुबाहुम् ॥ २१ ॥

राज्याभिषेकेऽवसितेऽत्र सीता
प्रेष्ठाय नस्तां भजतां दिशेति ।
रामस्य वाण्या मणिमञ्जुमाला-
व्याजेन दीर्घां करुणां बबन्ध　　　　॥ २२ ॥

(प.दी.) राज्येति । **सीता राज्याभिषेके** श्रीरामस्य साम्राज्याभिषेके **अवसिते** समाप्ते सति **मणिमञ्जुमालाव्याजेन** मणिमयरमणीयमालाव्याजेन **अत्र** हनूमति **दीर्घां** अविच्छिन्नां **करुणां बबन्ध** कृतवतीति भावः । **तां** मालां **नः** अस्मान् **भजतां** [मध्ये] **प्रेष्ठाय** अतिप्रियाय **दिश** प्रयच्छ **इति रामस्य वाण्या** । अयमभिप्रायः– रामस्य राज्याभिषेकानन्तरं सीता मणिमयमालां गृहीत्वा 'इमां कस्मै प्रदद्याम्' इति रामं पृष्टवती । तदा भगवान् 'अस्मत्सेवकानां मध्येऽतिशयेन प्रियाय तां प्रयच्छ' इत्यभ्यधात् । तदा भगवती तां मालां हनूमते दिदेशेत्युत्तररामायणस्था कथाऽत्र सूच्यते ॥ २२ ॥

(त.चं.) रामस्य वाण्या । तथाहि रामायणे– 'मणिप्रवरजुष्टं तु मुक्ताहारमनुत्तमम् । सीतायै प्रददौ रामश्चन्द्ररश्मिसमप्रभम् । अवमुच्याऽऽत्मनः कण्ठाद् हारं जनकनन्दिनी । अवैक्षत हरीन् सर्वान् भर्तारं च मुहुर्मुहुः । तामिङ्गितज्ञः सम्प्रेक्ष्य बभाषे जनकात्मजाम् । प्रदेहि सुभगे हारं यस्य तुष्टाऽसि भामिनि । ददौ सा वायुपुत्राय तं हारमसितेक्षणा' इति ॥ २२ ॥

हृदोरुसौहार्दभृताऽधिमौलि न्यस्तेन हस्तेन दयार्द्रदृष्ट्या ।
सेवाप्रसन्नोऽमृतकल्पवाचा दिदेश रामः सहभोगमस्मै॥ २३ ॥

(प.दी.) हृदा । **सेवाप्रसन्नो रामोऽस्मै** हनूमते **सहभोगं** सहभोगनामकं पारमेष्ठ्यं पदं **दिदेश** । कथम्भूतः? **उरुसौहार्दभृता** उरुसौहार्दमुर्वनुग्रहं दधता **हृदा** मनसा । 'स्वान्तं हृन्मानसं मनः' इत्यमरः । इत्थम्भूतलक्षणे चेयं तृतीया । श्वेतच्छत्रेण राजानमद्राक्षीदितिवत् । **अधिमौलि** शिरसि **न्यस्तेन**

हस्तेन । **दयार्द्रदृष्ट्या** कृपाप्रसन्नदृष्ट्या । **अमृतकल्पवाचा** 'हनूमतो न प्रतिकर्तृता स्यात् स्वभावभक्तस्य निरौपधं मे'। 'मद्भक्तौ ज्ञानपूर्ताविनुपधिकबलप्रोन्नतौ स्थैर्यधैर्यस्वाभाव्याधिक्यतेजस्सुमतिशमदमेष्वस्य तुल्यो न कश्चित् । शेषो रुद्रः सुपर्णोऽप्युरुगुणसमितौ नो सहस्रांशतुल्याः' इत्यादिगुणकथनरूपामृतकल्पवाचा । इत्थम्भूतलक्षणो रामः सहभोगं दिदेशेति ॥ २३ ॥

(त.चं.) दिदेश । तत्वप्रदीपिकाचार्योऽप्याह- 'सहभुजमकरोद् रामनामा मुकुन्दः । दुष्प्रापे पारमेष्ठ्ये करतळमतुलं मूर्ध्नि विन्यस्य धन्यं तन्वन् भूयः प्रभूतप्रणयविकसिताब्जेक्षणस्त्वेक्षमाणः' इति ॥ २३ ॥

प्रेष्ठो न रामस्य बभूव तस्मा-
न्न रामराज्येऽसुलभं च किञ्चित् ।
तत्पादसेवारतिरेष नैच्छत्
तथाऽपि भोगान् ननु सा विरक्तिः ॥ २४ ॥

(प.दी.) **प्रेष्ठ** इति । **रामस्य तस्मात्** मारुतेरन्यः **प्रेष्ठः** अतिप्रियः **न बभूव** । मारुतिरेव रामस्य प्रियोऽभूदिति भावः । **रामराज्ये किञ्चिद्** अपि वस्तु **असुलभं** दुर्लभं न । **तथाऽपि** स्वयं रामस्यातिप्रियोऽपि, रामराज्ये सर्ववस्तूनां सौलभ्येऽपि **एष** हनूमान् **भोगान् नैच्छत्** । कुतः? **तत्पादसेवारतिः** तस्य श्रीरामस्य पादसेवायां रतिर्यस्य स तथोक्तः । हेतुगर्भं विशेषणमिदम् । तत्पादसेवारतित्वादेव भोगान् नैच्छदिति भावः । अनेन हनूमतोऽतिविरक्तत्वमुक्तं भवति । तदुपपादयति– **नन्वित्यादिना** । **सा ननु** सा हि **विरक्तिः** । सर्वभोगसौलभ्येऽपि भोगेषु हेयतामतिरेव हि विरक्तिरिति भावः ॥ २४ ॥

(त.चं.) यद्यपि सीता प्रेष्ठा । प्रेष्ठस्त्वन्यो न बभूव ॥ २४ ॥

नमोनमो नाथ नमोनमस्ते नमोनमो राम नमोनमस्ते ।
पुनःपुनस्ते चरणारविन्दं नमामि नाथेति नमन् स रेमे ॥ २५ ॥

(प.दी.) नमोनम इति स्पष्टोऽर्थः । नमोनम इति पुनरुक्तिर्नमस्कारे आदरातिशयद्योतनार्था ॥ २५ ॥

(त.चं.) नमोनम इत्यादि चैकं पदम् । वीप्साया ऐकपद्यनियमात् । सहप्रयोगनैयत्यमेव ह्यैकपद्यं नाम ॥ २५ ॥

किं वर्णयामः परमं प्रसादं सीतापतेस्तत्र हरिप्रबर्हे ।
मुञ्चन् महीं नित्यनिषेवणार्थं स्वात्मानमेवैष ददौ यदस्मै॥ २६ ॥

(प.दी.) किं वर्णयामः । तत्र हरिप्रबर्हे वानरश्रेष्ठे हनूमति, तद्विषय इत्यर्थः, **सीतापतेः परमं प्रसादं** उत्तममनुग्रहं **किं वर्णयामः?** एतद्वर्णयितुं वयमशक्ता इत्यर्थः । कुतः? **यत्** यस्मात् एष रामो **महीं मुञ्चन्** स्वलोकं गन्तुं भूमिं मुञ्चन् **नित्यनिषेवणार्थं** हनूमत्कृतनिरन्तर[सेवानिमित्तं] **अस्मै** हनूमते **स्वात्मानमेव ददौ** । नित्यनिषेवणार्थं नित्यमात्मानं [सेवयितुमिति] वा । नित्यदर्शनादिरूपां सेवां कर्तुमिति भावः ॥ २६ ॥

(त.चं.) मुञ्चन् महीम् । ततः परं रामरूपेणाप्रकटीभवन् जनानाम् । हनूमते तु स्वात्मानं प्रकटं ददौ ॥ २६ ॥

स्वानन्दहेतौ भजतां जनानां
मग्नः सदा रामकथासुधायाम् ।
असाविदानीं च निषेवमाणो
रामं पतिं किम्पुरुषे किलाऽस्ते ॥ २७ ॥

(प.दी.) स्वानन्देति। असौ हनूमान् इदानीं च किम्पुरुषे किम्पुरुषाख्यखण्डे **आस्ते किल** वर्तते किल। किलेत्यैतिह्ये। किं कुर्वन्? **भजतां** श्रवणम-

ननादिना भजतां **जनानां स्वानन्दहेतौ** स्वरूपानन्दाविर्भावलक्षणमोक्षहेतौ **रामकथासुधायां** रामकथामृते **सदा मग्न**-एव **पतिं** स्वामिनं **रामं निषेवमाणः** नितरां सेवमानः ॥ २७ ॥

(त.चं.) अतोऽमुना निषेव्यमाणो रामोऽपि किम्पुरुषे किलाऽस्ते ॥

तस्यैव वायोरवतारमेनं सन्तो द्वितीयं प्रवदन्ति भीमम् ।
स्पृष्टैव यं प्रीतिमताऽनिलेन नरेन्द्रकान्ता सुषुवेऽत्र कुन्ती॥ २८ ॥

(प.दी.) एवं प्रथमावतारलीलावर्णनं कृतम् । अथ द्वितीयावतार-लीलानुवर्णनं करोति– **तस्यैवे**त्यादिना । **सन्तः** बळित्थेति सूक्ताभिप्राय-विदः । तत्र 'पृक्षो वपुः पितुमान्नित्य आ शये द्वितीयमा सप्तशिवासु मातृषु' इति पृक्षपदेन भीम उच्यते । 'पृतनाक्षयकारित्वात् पृक्षो भीम उदाहृतः' इति वचनात् । **एनं भीमं तस्य वायोरेव** हनूमत्त्वेनावतीर्णस्यैव तदपेक्षया **द्वितीयमवतारं प्रवदन्ति** । **प्रीतिमता** अनुग्रहवता **अनिलेन** मुख्यप्राणेन **स्पृष्टैव** केवलं स्पृष्टा **नरेन्द्रकान्ता** पाण्डुभार्या **कुन्ती अत्र** भुवि **यं सुषुवे** प्रसूतवती ॥ २८ ॥

(त.चं.) अवतारक्रमेण द्वितीयमथाप्यद्वितीयं प्रवदन्ति सन्तः सङ्ख्या-वन्तः । भगवतो भूभारहरणकर्मणि च द्वितीयम् ॥ २८ ॥

इन्द्रायुधं हीन्द्रकराभिनुन्नं चिच्छेद पक्षान् क्षितिधारिणां प्राक् ।
बिभेद भूभृद्वपुरङ्गसङ्गात् चित्रं स पन्नो जननीकराग्रात् ॥ २९ ॥

(प.दी.) **इन्द्रायुधम्** । **प्राक् इन्द्रायुधं** वज्रं **इन्द्रकराभिनुन्नं हि** इन्द्रकरेण सम्यक् प्रेरितमेव **क्षितिधारिणां** पर्वतानां **पक्षान् चिच्छेद** । हिशब्दोऽवधा-रणे । 'हि हेताववधारणे' इत्यमरः । **सः** भीमः [**जननीकराग्रात्**] शार्दूलभीत-जननीकराग्रात् प्रमादतः पर्वते **पन्नः** सन् पतितः सन् स्वस्य **अङ्गसङ्गात् भूभृद्वपुः** पर्वतशरीरमेव **बिभेद,** न पक्षमात्रम् । तस्मादेतत् **चित्रम्** ॥

(त.चं.) इन्द्रायुधमिन्द्रकरेण साभिप्रायं नुन्नम् । अयं त्वकस्मात् पन्नः, स्कन्नः । हीति पर्वतपक्षच्छेदनं पुराणप्रसिद्धमित्याह । पद गतौ । दिवादिः ॥

पुरे कुमारानलसान् विहारा-
न्निरीक्ष्य सर्वानपि मन्दलीलः ।
कैशोरलीलां हतसिंहसङ्घां
वृत्तां वने प्राक् स्मरति स्म सूत्कः ॥ ३० ॥

(प.दी.) पुरे । स भीमः **पुरे** हस्तिनपुरे **मन्दलीलोऽपि** मन्दं क्रीडमानोऽपि[1] **सर्वान् कुमारान् विहारादलसान्** सश्रमान् **निरीक्ष्य प्राग् वने वृत्तां हतसिंहसङ्घां कैशोरलीलां सूत्कः** सम्यगुत्कण्ठायुक्तः **स्मरति स्म** अस्मरत् । स्म अतीते । कुमारैः सह विहारात् **सिंहैः** सह विहारः समीचीनः, तादृशो विहारः कदा भवेदित्युत्कण्ठावानभूदित्यभिप्रायः ॥ ३० ॥

(त.चं.) पुरे हस्तिनपुरे । हस्तिनपुरमित्येव सर्वत्र प्राचीनः प्रयोगः । हस्तिनः पुरम् । हस्तिना वा निर्मितं पुरम् । 'दीर्घबिन्दुविसर्गादीनां लोपो वा' इति हि सूत्रं पठन्ति ॥ ३० ॥

भुक्तं च जीर्णं परिपन्थिदत्तं विषं विषण्णो विषभृद्गणोऽतः ।
प्रमाणकोटेः स हि हेळयाऽगान्नेदं जगज्जीवनदेऽत्र चित्रम् ॥ ३१ ॥

(प.दी.) भुक्तं च । **परिपन्थिदत्तं** शत्रुभिर्दत्तं **विषं भुक्तं च** जानता अनेन भुक्तमपि **जीर्णम्** । **अतः** भीमसकाशात् **विषभृद्गणः** सर्पसमूहः **विषण्णः** तळचूर्णो विनष्टः । **स** भीमः **प्रमाणकोटेः** प्रमाणकोट्याख्यह्रदात् , तस्मिन् ह्रदे धार्तराष्ट्रैर्बद्ध्वा क्षिप्तोऽपि, **हेळया अगाद्धि,** उत्तीर्येति शेषः । तर्हीदं चित्रमिति चेत् सत्यं लोके तथा भवति । **जगज्जीवनदे** सकलजगज्जीवनप्रदे **अत्र** श्रीमुख्यप्राणे उक्तं सर्वं **इदं चित्रं न** ॥ ३१ ॥

---
१. 'क्रीडन्नपि' इति स्वरसम् ।

(त.चं.) हेळया अनादरेण । अनायासेनेत्येतत् । हेड़ अनादरे । डस्य ळ इति वैयाकरणाः । वस्तुतस्तु हेऴ अनादरे इत्यपि पठनीयम् । तद् यथा 'ईड ईळ स्तुतौ' इति काशकृत्स्नः ॥ ३१ ॥

दग्ध्वा पुरं योगबलात् स निर्यन्
धर्मानिव स्वान् सहजान् दधानः ।
अदारिभावेन जगत्सु पूज्यो
योगीव नारायणमाससाद ॥ ३२ ॥

(भा.प्र.) पुरं देहश्च । योगी गूढपुरुषः, समाधिविपाकवांश्च । अदारिभावेन, अदो राक्षसः, तस्यारित्वेन । दारो दलनम्, तद्रहितत्वेन अमृतत्वेन च ॥

(प.दी.) दग्ध्वा । **योगबलात्** उपायबलात् **पुरं** लाक्षागृहं **दग्ध्वा निर्यन्** वारणावतात् निर्गच्छन् **धर्मानिव** अदृष्टविशेषानिव **स्वान् सहजान्** भ्रातॄन् धर्मादीन् **दधानो** वहन्, **अदारिभावेन,** अदो राक्षसो हिडिम्बः,तस्य अरित्वेन **जगत्सु पूज्यः स** भीमः **नारायणं** नारायणावतारं हिडिम्बीं[१] ग्राहयितुमाविर्भूतं श्रीवेदव्यासं **आससाद** ददर्शेति भावः । क इव? **योगीव** गूढपुरुष इव । स यथा कस्यचित् स्वस्वामिद्विषः **पुरं योगबलात्** कुतश्चिदुपायबलाद् **दग्ध्वा निर्यन् अदारिभावेन,** दारो दलनम्, तद्धीनत्वेन, स्वयं शत्रुभिरदारितत्वेनेति भावः, **जगत्सु पूज्यः** सन् स्वस्वामिनं प्राप्नुयात् तद्वदिति भावः । पुनः क इव? **योगीव** । योगः समाधिपरिपाकः तद्वान् योगी, स इव, सोऽपि जितपवनत्वात् **पुरं** शरीरं **योगबलाद्** स्वसमाधिपरिपाकबलात् **दग्ध्वा** स्वदेहगतवह्निना भस्मीकृत्य **निर्यन्** ब्रह्मनाडीमार्गेण देहादुत्क्रम्य गच्छन् अदारिभावेन, दारो दलनम्, शरीरपाटनम्, पवनाभ्यासं कुर्वतां योगिनां पवनस्यामार्गसञ्चारे सति देहपाटनं भवति । तद्रहितत्वेन **जगत्सु** स्वर्गाद्युत्तरलोकेषु **पूज्यः** सन् **धर्मान्** मोक्षे सुखाभिवृद्धिहेतून्

१. 'हिडिम्बा, हिडिम्बी' इति द्वयमपि साधु । तद् यथा–कृपी कृपा । तथाहि भगवत्पादः– 'अभियापयते हिडिम्बीम्' इति, 'नत आशु हिडिम्बया च' इति च ।

अशेषविशेषान् **दधानः** तान् न मुञ्चन् **नारायणं** स्वबिम्बभूतं परमात्मानं यथा प्राप्नुयात् तद्वदिति भावः ॥ ३२ ॥

(त.चं.) पुरमिति नगरम् । पुरमिति गृहम् । पुरमिति शरीरम् । यत्र लोकानामाशा पूर्यते । तेन पुरं लाक्षागृहं दग्ध्वा । अहो तदपि पाण्डवानामेव पुरं बभूव न कौरवस्येति परिहसतीव । अदः पुरुषादो हिडिम्बः । असंस्कृतं पदम् । तेन न निर्वचनापेक्षा । आहिण्डमानः कामयत इति वा । हिडि गतौ । ब कामने । अरते हिनस्तीत्यरिः । ऋङ् हिंसायाम् । दारो विदारणम् । दारिभावो विदीर्णता । तेनादारिभाव इत्यमृतत्वं च ॥ ३२ ॥

समर्प्य कृत्यानि कृती कृतानि
व्यासाय भूम्ने सुकृतानि यावत् ।
करिष्यमाणानि च तस्य पूजां
सङ्कल्पयामास स शुद्धबुद्धिः ॥ ३३ ॥

(प.दी.) समर्प्य । **कृती** कुशलः सर्वकार्येषु निपुणः **स** भीमः **शुद्धबुद्धिः** सर्वदा भगवत्प्रतिकूलबुद्धिरहित इति भावः, **सुकृतानि** आत्मना भगवत्पूजात्वेन सम्यक् कृतानि **कृत्यानि** स्वकर्तव्यानि **कृतानि** कर्माणि, अत्र कृतशब्दो भावे निष्ठान्तः, **भूम्ने** परिपूर्णाय **व्यासाय समर्प्य करिष्यमाणानि च कृतानि**, चशब्देन कृतानि चेत्येतत् समुच्चीयते, **तस्य** श्रीवेदव्यासस्य **पूजां सङ्कल्पयामास** । **यावत्** साकल्येन । अवतारप्रभृति हिडिम्बनिग्रहान्तानि कर्माणि भगवति समर्प्य अथ करिष्यमाणानि च बकनिग्रहादीनि भगवत्पूजात्वेन करिष्यामीति सङ्कल्पयामासेति भावः । अत एव कृती शुद्धबुद्धिश्चेति भावः ॥ ३३ ॥

(त.चं.) एतावता कृतानि सुकृतानि कृत्यानि पुण्यकर्माणि समर्प्य । इतः करिष्यमाणानि च कृत्यानि 'सर्वं तदाराधनमेव भूयात्' इति मनसा दध्यौ ॥ ३३ ॥

विष्णोःपदश्रिद् बकसन्निरासी क्षिप्तान्यपक्षिप्रकरः सुपक्षः ।
ससोदरोऽथाऽदित राजहंसः स राजहंसीमिव राजकन्याम् ॥ ३४॥

(भा.प्र.) बकः पक्षिविशेषश्च ॥

(प.दी.) **विष्णोः**। **अथ ससोदरः** सभ्रातृकः **स** भीमः **राजकन्यां** द्रौपदीं **आदित** आदत्त। कः कामिव? **राजहंसः** राजहंसाख्यः पक्षिविशेषः **राजहंसीमिव** । कथम्भूतः? **विष्णोःपदश्रित्** श्रीहरिच्चरणमाश्रितः । राजहंसोऽपि विष्णोःपदं आकाशमाश्रितः । **बकसन्निरासी** मारितबकासुरः । राजहंसोऽपि जितबकाख्यपक्षिविशेषः । **क्षिप्तान्यपक्षिप्रकरः**, निराकृतान्यपक्षिप्रकरः, निराकृतः स्वपक्षविरुद्धान्यपक्षिणामन्यसिद्धान्तिनां प्रकरः समूहः येन स तथोक्तः । राजहंसोऽपि निराकृतकाकोलूकादिविहगसमूहः । **सुपक्षः** शोभमानसिद्धान्तः । अन्यः शोभमानपतत्रः ॥ ३४ ॥

(त.चं.) विष्णोःपदश्रिदित्यलुक् । तेन नैकदेशान्वयशङ्काऽपि । सन्निरासी । निरासे सम्यक्ता नाम बकानुयायिनामपि नरमांसभक्षणत्याजनेन सभ्यतापादनम् । आदित, डुदाञ् दाने, लुङ् । लोहितचञ्चुचरणो राजहंसः ॥ ३४ ॥

इन्दीवरश्रीजयिसुन्दराभं स्मेराननेन्दुं दयितं मुकुन्दम् ।
स्वमातुलेयं कमलायताक्षं समभ्यनन्दत् सुचिराय भीमः॥ ३५ ॥

(प.दी.) इन्दीवरेति। **भीमः सुचिराय** अतिचिरात् **इन्दीवरश्रीजयिसुन्दराभं** नीलोत्पलशोभातिशयितसुन्दरकान्तिम्, **स्मेराननेन्दुं** मन्दस्मितयुक्तेन्दुसमाननम्, **दयितं** आत्मनः सर्वस्मादपि प्रियं **स्वमातुलेयं** स्वमातुलसुतं **कमलायताक्षं मुकुन्दं** श्रीकृष्णं **समभ्यनन्दत्**, कृष्णायाः स्वयम्बरे दृष्ट्वा समभ्यनन्दत् ॥ ३५ ॥

(त.चं.) सुचिराय बहोः कालाद् दृष्टम् । मातुलेयं मातुलस्य कुन्तीभ्रातुर्वसुदेवस्य सुतम् । सुचिराय समभ्यनन्दत् ॥ ३५ ॥

महागदं चण्डरणं पृथिव्यां बार्हद्रथं मङ्क्षु निरस्य वीरः ।
राजानमत्युज्ज्वलराजसूयं चकार गोविन्दसुरेन्द्रजाभ्याम्॥ ३६ ॥

(भा.प्र.) चण्डरणम्, चण्डानां रणं च। बार्हद्रथं जरासन्धम्, बृहद्रथसम्बद्धं च॥

(प.दी.) **महागदम्** । **वीरः** स भीमः **राजानं** धर्मजं **अत्युज्ज्वलराजसूयं** अतिरमणीयराजसूययुक्तं **चकार** । किं कृत्वा? महती गदा यस्य सः महागदः, तं महागदम्, अतिशयेन गदाभ्यासयुक्तं वा, **पृथिव्यां चण्डरणम्**, चण्डः क्रूरः रणः युद्धं यस्य स तथोक्तः, तं **बार्हद्रथं** बृहद्रथसुतं **गोविन्दसुरेन्द्रजाभ्यां** कृष्णार्जुनाभ्याम्, सहयोगे चेयं तृतीया, ताभ्यां सह गत्वेति भावः । **मङ्क्षु** सद्यः, [१]'सद्यो द्राङ्गङ्क्षु च द्रुतम्' इत्यमरः, **निरस्य** हत्वा । पुनः किं कृत्वा? महान्तश्च ते अगाश्चेति महागाः महापर्वताः वृक्षा वा । 'शैलवृक्षौ नगावगौ' इत्यमरः । तान् द्यति खण्डयतीति महागदः तम् । 'दो अवखण्डन' इति धातुः । महापर्वतादिविदारणसमर्थमिति भावः । **बार्हद्रथं** बृहद्रथसम्बन्धिनम्, बृहद्भिर्महद्भी रथैर्युक्तमिति भावः । एवम्भूतं **चण्डरणम्**, चण्डानां क्रूराणां कीचकादीनां रणं युद्धं **मङ्क्षु** निरस्य, तान् विजित्येति भावः ॥ ३६ ॥

(त.चं.) बार्हद्रथो बृहद्रथसुतो जरासन्धः। चण्डरणो जरासन्धोऽपि महत्या गदया युक्तः, चण्डानामन्येषां रणश्च महत्या गदया युक्त इति भावप्रकाशिकाकृदाशयः । बृहद्भी रथैर्युक्त इति, महारथै राजभिश्च निर्वृत्त इति बार्हद्रथश्चण्डानां रणः ॥ ३६ ॥

दुःशासनेनाऽकुलितान् प्रियायाः
सूक्ष्मानराळानसितांश्च केशान् ।
जिघांसया वैरिजनस्य तीक्ष्णः
स कृष्णसर्पानिव सञ्चिकाय ॥ ३७ ॥

---

१. '-द्राङ्मङ्क्षु सपदि द्रुते' इति त्वमरपाठः ।

(प.दी.) दुःशासनेन । **सः** भीमो **दुःशासनेन** दुर्योधनानुजेन **आकुलितान्** केशेषु गृहीत्वा आकर्षणेन विकीर्णान्, **सूक्ष्मान्, अराळान्** वक्रान्, **असितान्** नीलान् [च] **प्रियायाः** द्रौपद्याः **केशान्**, **वैरिजनस्य** दुर्योधनादेः **जिघांसया** हनिष्यामीति बुद्ध्या **सञ्चिकाय** एकीचकार, बबन्धेति भावः । क इव? **तीक्ष्णः** क्रूरः कश्चित् गारुडमन्त्रचतुरः **वैरिजनस्य जिघांसया** सूक्ष्मत्वादिविशेषयुक्तान् **कृष्णसर्पानिव** । कथम्भूतान्? **दुःशासनेन**, सर्प-विषये दुष्टं क्रूरं शासनं मन्त्रौषधरूपं यस्य सः दुःशासनः, तेन **आकुलितान्** पञ्जरादिस्थानाद् विद्रावितान् **कृष्णसर्पान्** । अन्यः कश्चित् गारुडचतुरः तान् यथा स्वकीयपञ्जरादिस्थानेष्वेकीकुर्यात् तद्वदिति भावः ।। ३७ ।।

(त.चं.) कृष्णा काळाहिवेणीति भङ्ग्यन्तरेणाऽह– दुःशासनेन ।।

जाज्वल्यमानस्य वनेवनेऽलं दिधक्षतः पार्थिवसार्थमुग्रम् ।
सत्त्वानि पुंसां भयदानि नाशं वृकोदराग्नेर्गुरुतेजसाऽऽपुः ।। ३८ ।।

(भा.प्र.) पार्थिवा राजानो वृक्षाश्च । तेजः पराक्रमश्च ।।

(प.दी.) जाज्वल्येति । **वनेवने अलं** प्रतिवनं सम्यग् **जाज्वल्यमानस्य** पुनःपुनः ज्वलतः । जाज्वल्यमानस्येत्यत्र यङो भृशार्थत्वे अलमित्यनेन पुनरुक्तिः स्यात् । तस्मात् पुनःपुनरित्येव युक्तम् । **उग्रं पार्थिवसार्थं** राज-समूहं **दिधक्षतः** दग्धुमिच्छतः । भविष्यद्भारतयुद्धे दुर्योधनादिपार्थिवदिधक्षया तद्युद्धं प्रतीक्षमाणस्येति भावः । **वृकोदराग्नेः** भीमाख्याग्नेः **गुरुतेजसा** गुरुतरपराक्रमेण **पुंसां भयदानि** भयङ्कराणि **सत्त्वानि** प्राणिनः किर्मीरादयः सिंहव्याघ्रादयश्च **नाशमापुः** । **वनेवने अलं जाज्वल्यमानस्य उग्रं** कण्ट-कादिना दुरवगाहं **पार्थिवसार्थं** वृक्षसमूहं दग्धुमिच्छतः दवाग्नेः **गुरुतेजसा** **पुंसां** भयङ्कराणि सिंहव्याघ्रसर्पवृश्चिकादीनि यथा नश्येयुः तद्वदिति श्लेषा-भिप्रायः ।। ३८ ।।

(त.चं.) अलं निरवशेषं दग्धुमिच्छतः ।। ३८ ।।

भोगाधिकाभोगवतोऽरुणाक्षा-
नितस्ततः संवलतो धरेन्द्रे ।
बहून् द्विजिह्वाँन् मणिमत्पुरोगा-
नसौ कटून् क्रोधवशान् जघान ॥ ३९ ॥

(भा.प्र.) आभोगः परिपूर्णता । द्विजिह्वाँन् भुजगान् रत्नवत्प्रधानान् कोपाधिकान् । द्विजिह्वाँन् मत्सरिणो मणिमत्प्रभृतीन् क्रोधवशांश्च ॥

(प.दी.) **भोगेति** । **असौ** भीमः **भोगाधिकाभोगवतः**, भोगाः अभीष्टविषयाः भोगाः, तैः अधिकान् अतिशयेन विषयासक्तानिति भावः, आभोगवतः, आभोगः परिपूर्णता, तद्युक्तान्, बलादिभिः परिपूर्णानिति यावत् । **अरुणाक्षान्** स्वभावतः कोपेन वा लोहितलोचनान् । **धरेन्द्रे** गन्धमादने गिरिवरे **इतस्ततः संवलतः** सञ्चलतः **द्विजिह्वाँन्** मत्सरिणः अनृतवादिनश्च । **कटून्** मनोवाक्कर्मभिः निष्ठुरान् । 'रसे कटुः कट्वकार्ये त्रिषु मत्सरितीक्ष्णयोः'[1] इत्यमरः । **मणिमत्पुरोगान्**, मणिमान्नामासुरः पुरोगोऽग्रणीर्येषां ते मणिमत्पुरोगाः, तान् **बहून् क्रोधवशान्** क्रोधवशाख्यासुरान् **जघान** । **असौ** दवाग्निरपि **बहून् क्रोधवशान्** क्रोधाधिकान्, द्वे जिह्वे येषां ते द्विजिह्वाः सर्पाः तान्, **भोगाधिकाभोगवतः**, भोगैः शरीरैः अधिकान्, आभोगवतः बलादिपरिपूर्णान् , **अरुणाक्षान्**, धरवरे कस्मिंश्चित् पर्वते **इतस्ततः संवलतः** सञ्चरतः, **मणिमत्पुरोगान्**, मणिमन्तः फणाग्ररत्नवन्तः, तत्पुरोगान् तत्प्रधानकान्, **कटून्** विषदंष्ट्रादिना अतिक्रूरान् । दवाग्निः एवम्भूतान् सर्पान् यथा नाशयेत् तद्वद् भीमोऽसुरान् जघानेति भावः ॥ ३९ ॥

(त.चं.) भोगस्य शरीरस्य योऽधिकः आभोगः परिणाहस्तद्वतः । भोगेष्वेवाधिकमाभोगो मग्नता तद्वतश्च । एतदुभयमपि कटाक्षीकृत्योक्तं भाव-

---

१. '–मत्सरतीक्ष्णयोः' इत्यमरपाठः प्रचलितः ।

प्रकाशिकायाम्– 'आभोगः परिपूर्णता' इति। द्विजिह्वा मत्सरिणः, मत्सरादेव स्वोक्तं व्याघ्नन्तो व्याहरन्तीति। 'द्विजिह्वो मत्सरी मतः' इति चाभिधानम् ॥

अथैष वेषान्तरभस्मलीनः
क्रमेण वायुप्रभवः सुतेजाः ।
रुद्धाखिलाशं मुखरं प्रचण्डं
भस्मीचकाराखिलकीचकौघम् ॥ ४० ॥

(भा.प्र.) वायुप्रभवः भीमः क्रमेण सुव्यक्ततेजाः । अग्निः क्रमेण वायुप्रवृद्धः। आशा इच्छाविशेषाः, दिशश्च। 'स्वनन्ति येऽनिलोद्धूता वेणवस्ते तु कीचकाः' इति च॥

(प.दी.) **अथ**। **एषः वायुप्रभवो** भीमः, **अथ** वनवाससमाप्त्यनन्तरम्, **वेषान्तरभस्मलीनः**, अज्ञातवासे सूदनाम्ना अन्यवेषाख्यभस्मलीनः निगूढः, भीम इति केनाप्यविदित इति भावः । **क्रमेण सुतेजाः** अभिव्यक्तपराक्रमः । **रुद्धाखिलाशम्**, रुद्धा प्रतिरुद्धा अखिलानामाशा जयाशा येन स तथोक्तस्तम् । षडुत्तरशतकीचकानामतिप्रबलत्वात् तद्विजयाशा कस्यापि नाभूदिति भावः । **मुखरं** अविचारितभाषणम् । **प्रचण्डं** अतिक्रूरम् । **अखिलकीचकौघं** षडुत्तरशतकीचकसमूहम् । **भस्मीचकार** ददाह । अग्निरपि **भस्मलीनः** सन् **क्रमेण वायुप्रभवः** वायुना उद्बोधितः, अत एव **सुतेजाः**, **रुद्धाखिलाशं** परितः प्रतिरुद्धदिङ्मुखम्, **मुखरं** वायुवशात् सशब्दम्, **प्रचण्डं** कण्टकात्मकत्वात् क्रूरतरम्, **अखिलकीचकौघं** अखिलवेणुसमूहं यथा भस्मीकरोति तद्वदिति भावः ॥ ४०॥

(त.चं.) वायुप्रभवो वायुनन्दनो भीमः । वायुप्रभवेण सुतेजसा युक्तोऽग्निश्च। वायुना सुतेजाः प्राभवदिति । तद् यथा सर्वगतिगतेन नित्यत्वेन सर्वगतो विशिष्यते 'नित्यः सर्वगतः' इति । वायुप्रभवः वायुना प्रोद्धतः सुतेजाः अग्निरिति वा ॥ ४० ॥

स कृष्णवर्त्मा विजयेन युक्तो मुहुर्महाहेतिधरोऽप्रधृष्यः ।
भीष्मद्विजाद्यैरतिभीषणाभं विपक्षकक्षं क्षपयन् विरेजे ॥ ४१ ॥

(भा.प्र.) कृष्णेन वर्त्म यस्येति कृष्णवर्त्मा भीमः । विजयो वायुरर्जुनश्च । हेतिरायुधं तेजश्च । भीष्मद्विजाद्यैः भीषणपक्षिमृगैश्च ॥

(प.दी.) सः । **कृष्णवर्त्मा** कृष्णप्रेरितरथमार्गः, **विजयेन** अर्जुनेन **युक्तः, महाहेतिधरः** । **अप्रधृष्यः** परैरविनाश्यः, **सः** भीमः,**भीष्मद्विजाद्यैः** भीष्म-द्रोणाद्यैः, **अतिभीषणाभं विपक्षकक्षं** दुर्योधनादिविपक्षवनं **मुहुः क्षपयन्** नाशयन् **विरेजे** । **कृष्णवर्त्मा** नीलमार्गोऽग्निः, 'कृष्णत्मार्ऽऽशुशुक्षणिः' इत्यमरः[1] । **विजयेन** विशिष्टेन जयेन **युक्तः, महाहेतिधरः,** 'हेति-र्ज्वालांऽशुरायुधम्', **अप्रधृष्यः,** भीष्मद्विजाद्यैः भयङ्करपक्ष्याद्यैः **अति-भीषणाभं कक्षं** वनं **क्षपयन्** यथा विराजते तद्वदिति भावः ॥ ४१ ॥

(त.चं.) कृष्णवर्त्मा । श्रुतिरप्याह–'तस्य पत्मन् दक्षुषः कृष्णजंहसः' [ऋ.१.१४१.७] इति । कृष्णस्य जंहा मार्ग एवास्य मार्ग इति किल कृष्ण-जंहाः । विजयेनार्जुनेन युक्तो भीमः । विजयेन वायुना युक्तः कृष्ण-वर्त्माऽग्निः । विजयते सर्वमयम्, विजयन्ते च सर्वेऽनेनेति विजयो वायुः । इन्द्रं च विजयते सोमग्रहे ॥ ४१ ॥

तरस्विनः प्रोच्चलितानधीरान्
निर्दग्धपक्षानतितीक्ष्णकोपान् ।
स धार्तराष्ट्रान् बहुहेतिलीलो
विनाश्य विश्वान् परया श्रियाऽऽभात् ॥ ४२ ॥

(भा.प्र.) धार्तराष्ट्राः सितेतरचरणा हंसाश्च ॥

१. नायममरः । हलायुधकोशोऽयम् । 'कृष्णवर्त्मा शोचिष्केश उषर्बुधः' इति त्वमरः ।

(प.दी.) तरस्विनः । **बहुहेतिलीलः** बहुविधायुधैः क्रीडमानः **स** भीमः **तरस्विनः** वेगिनः **प्रोच्चलितान्** स्वधर्ममार्गादपगतान् **अधीरान्** धैर्यरहितान् **निर्दग्धपक्षान्** हतस्वपक्षीयान् **अतितीक्ष्णकोपान् धार्तराष्ट्रान्** दुर्योधनादीन् **विश्वान्** सर्वान्, **विनाश्य**, **परया श्रिया** जयश्रिया राजश्रिया च, **आभात्** अशोभत । दावाग्निरपि **तरस्विनः प्रोच्चलितान्** स्वनीडादेः स्थानात् चलितान्, **अधीरान्** अग्निमत्प्रदेशमतिलङ्घ्य गन्तुमधीरान्, अत एव **निर्दग्धपक्षान्** दग्धपतत्रान्, **अतितीक्ष्णकोपान् धार्तराष्ट्रान्** सितान् लोहितचञ्चुचरणान् पक्षिविशेषान्, 'धार्तराष्ट्रास्तु ते चञ्चुचरणैर्लोहितैः सिताः'[१] इत्यमरः, तान् **विश्वान्** सर्वान् **बहुहेतिलीलः** सन् **विनाश्य** यथा **परया श्रिया** शोभते तद्वदिति श्लेषाभिप्रायः ॥ ४२ ॥

(त.चं.) धृतराष्ट्रे भवाः धार्तराष्ट्राः । धृतराष्ट्रा इत्यसितचञ्चुचरणा हंसा उच्यन्ते । धार्तराष्ट्रा इति च । चक्षुषी निमील्य विहरन्तीति धृतराष्ट्रा इत्युपहस्यन्ते । 'धृतराष्ट्रः सुराज्ञि स्यात् पक्षिक्षत्रियभेदयोः' इति, 'धृतराष्ट्रः खगे सर्पे सुराज्ञि क्षत्रियान्तरे' इति च ॥ ४२ ॥

कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः कृष्णामुखाम्भोरुहहंसराजः ।
प्रजासरोजावलिरश्मिराजः ससोदरोऽराजत वीरराजः ॥ ४३ ॥

(प.दी.) कृष्णेति। **कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः** श्रीकृष्णचरणारविन्दे मधुकरराजायमानः, **कृष्णामुखाम्भोरुहहंसराजः** द्रौपदीवदनारविन्दमधुपाने राजहंसायितः, **प्रजासरोजावलिरश्मिराजः** स्वकीयप्रजाकमलावळीविबोधने रविरिव वर्तमानः, **वीरराजः ससोदरः** स भीमः **अराजत** शुशुभे ॥ ४३ ॥

(त.चं.) कृष्णस्याङ्घ्रिः पृथिवीमये पङ्के रोहतीति पङ्केरुहम् । 'पृथिवी

---

१. सम्पातायातमेतत् । 'राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः' इति, 'धार्तराष्ट्राः सितेतरैः' इति चामरपाठः ।

पाजस्यम्' इति हि श्रुतिः । कृष्णाया मुखमम्मये वर्ष्मणि विकसित-मित्यम्भोरुहम् । 'आपः पुरुषवचसो भवन्ति' इति च ॥ ४३ ॥

पौत्रे पवित्राह्वयजामिपौत्रे
धरां निधायासुरधीषु तापम् ।
कीर्तिं त्रिलोक्यां हृदयं मुकुन्दे
भेजे पदं स्वं सहजैः स भीमः ॥ ४४ ॥

(प.दी.) पौत्रे[1] । **स भीमः सहजैः** सह **स्वं पदं** स्वस्वरूपं **भेजे** । किं कृत्वा? **पवित्राह्वयजामिपौत्रे,** पावननाम्नः श्रीकृष्णस्य जामिः सहजा सुभद्रा, तस्याः पौत्रे, 'पवित्रोऽग्नौ हरौ पूते','जामिः स्वसृकुलस्त्रियोः', तेन स्वस्य च **पौत्रे** परीक्षिति **धरां निधाय, असुरधीषु** असुरमनस्सु, **तापं** वयमनेनैव नाशिता हीति **सन्तापं निधाय, त्रिलोक्यां कीर्तिं** निधाय, **हृदयं** मनो **मुकुन्दे निधाय** ॥ ४४ ॥

(त.चं.) पवित्राह्वयः कृष्णः । 'पवित्रं मङ्गलं परम्' इति सहस्रनामसु । पुनाति सर्वमिति पवित्रः पवित्रं वा । 'कर्तरि चर्षिदेवतयोः'[३.२.१८२] इति पवतेरित्रः प्रत्ययः । पवित्राणि नामानि यस्येति वा । तस्य जामिः सुभद्रा । तस्याः पुत्रोऽभिमन्युः । तत्पुत्रः परीक्षिदिति ॥ ४४ ॥

विष्णोःपदान्तं भजताऽनिलेन घोरप्रघातैरिति नाशितास्ते ।
रसोज्झिताश्चञ्चलवृत्तयोऽलं शोभां न भेजुः सुरवैरिमेघाः॥ ४५ ॥

(भा.प्र.) प्रघातो युद्धं घट्टनं च । रसो वीर्यमुदकं च ॥

(प.दी.) विष्णोरिति । **विष्णोःपदान्तं** श्रीहरिचरणसन्निधिं **भजता** सदा तत्र वर्तमानेन **अनिलेन** भीमरूपेण वायुना **घोरप्रघातैः** घोरयुद्धैः **इति**

---

१. कोशेषु–'कथम्? पौत्रे' इति पठ्यते । नातीव स्वरसम् ।

उक्तप्रकारेण **नाशिताः**, **रसोज्झिताः** सत्त्वरहिताः, अत एव **अलं चञ्चलवृत्तयः** **ते सुरवैरिमेघाः शोभां न भेजुः** । मेघा वायुना घोरताडितैः **नाशिताः** शकलीकृताः, **रसोज्झिताः** निर्जलाः, अत एव लघुत्वात् **अलं चञ्चलवृत्तयः** सन्तो यथा शोभां न भजेयुस्तद्वदिति श्लेषाभिप्रायः ॥ ४५ ॥

(त.चं.) विष्णोःपदान्तमिति चैकं पदम् । हरिचरणसन्निधिं वियदेकदेशं चेति ॥ ४५ ॥

> **एतत्प्रतीपं किल कर्तुकामा**
> **नष्टौजसः सङ्कटमेवमाप्य ।**
> **मुकुन्दवैगुण्यकथां स्वयोग्यां**
> **काले कलावाकलयन्त तेऽलम्** ॥ ४६ ॥

(प.दी.) एतदिति । **नष्टौजसः** नष्टसामर्थ्याः ते दैत्याः **एवं सङ्कटं** भीमनिमित्तक्लेशं **आप्य**, **एतत्प्रतीपं** भीमकृतापकारप्रतीकारं **कर्तुकामाः** । **किल** अपरमार्थे । अपकर्तुमसमर्था इति भावः । **कलौ काले** कलियुगे उत्पन्ना इति भावः । **स्वयोग्यां** दैत्यानामेव योग्यां **मुकुन्दवैगुण्यकथाम्**, मुकुन्दस्य विगुणत्वसम्बन्धिनीं कथां वाग्जालम्, 'कथ वाक्यप्रबन्धे' इति धातोः, **अलमाकलयन्त** चक्रुः । कल कामधेनुरिति धातुः ॥ ४६ ॥

(त.चं.) स्वेषामेव योग्याम् । वस्तुतस्तु सु नितरामयोग्याम् ॥ ४६ ॥

> **यो भूरिवैरो मणिमान् मृतः प्राग्**
> **वाग्ग्मी बुभूषुः परितोषितेशः ।**
> **स सङ्कराख्योऽङ्क्तिळेषु जज्ञे**
> **स्पृधाऽपरेऽप्यासुरिहासुरेन्द्राः** ॥ ४७ ॥

(प.दी.) **यः** । **प्राक्** सौगन्धिकवने **मृतः** भीमेन हतः **यः मणिमान्** **भूरिवैरः**, 'भीमे' इति शेषः, **सः स्पृधा** स्पर्धया **वाग्ग्मी** चतुरवचनो **बुभूषुः**

सन्, **परितोषितेशः** तपसा सन्तोषितरुद्रः सन्, **इह** भुवि **सङ्कराख्यः** सर्वभेदनिराकरणात् सङ्कर इत्यन्वर्थनामा, **अङ्कितळेषु** अङ्कितळसञ्ज्ञकेषु विप्रेषु **जज्ञे** । **अपरे असुरेन्द्रा अपि इह आसुः** उत्पन्नाः । 'अङ्कितळ' इत्यस्य 'कालडि' इत्यपभ्रष्टसञ्ज्ञा ॥ ४७ ॥

(त.चं.) वाग्ग्मी बुभूषुः । मत्वर्थे ग्मिनिः । 'वाचो ग्मिनिः' [५.२.१२४] 'लोपः समाने' इत्येकगकारलोपे 'वाग्मी' इति च । अङ्कितळेषु जज्ञे । वेदानधिकारिणां हि प्रभवस्थानमङ्कितळम्– 'पद्भ्यां शूद्रो अजायत' इति । अहो बलवती भगवती यदृच्छा ॥ ४७ ॥

सान्नाय्यमव्यक्तहृदाखुभुग् वा श्वा वा पुरोडाशमसारकामः ।
मणिस्रजं वा प्लवगोऽव्यवस्थो जग्राह वेदादिकमेष पापः ॥ ४८ ॥

(भा.प्र.) आखुभुगादिवदव्यक्ताभिप्रायादित्वमस्य ॥

(प.दी.) **सान्नाय्यम्** । **अव्यक्तहृत्** अव्यक्ताभिप्रायः **आखुभुक्** मार्जारः । 'ओतुर्बिलाळो[1] मार्जारो वृषदंशक आखुभुक्' इत्यमरः । **सान्नाय्यं वा** दोहाख्ययाज्ञीयहविर्विशेषमिव । वाशब्द इवार्थे । 'वा विकल्पोपमानयोः' इत्यमरः । **असारकामः** अपवित्रेच्छुः **श्वा पुरोडाशं वा** पुरोडाशमिव । **अव्यवस्थः** व्यवस्थारहितः **प्लवगः** कपिः **मणिस्रजं वा** अनर्घ्यमणिमालामिव **पापः एषः** सङ्कराख्यः **वेदादिकं जग्राह** । अयमत्र दृष्टान्तत्रयाभिप्रायः– सान्नाय्यं पिपासुरपि मार्जारः अव्यक्तहृदयो निमीलिताक्षः साधुरिव वर्तमानो यथाऽवसरे प्राप्ते तत् पिबेत् एवमयमव्यक्तहृदयः ब्रह्मणोऽवाच्यत्वात् निर्विषयत्वेन वेदाप्रामाण्यं ब्रह्मणश्च निर्विशेषत्वमन्ततः शून्यत्वमित्यादि स्वाभिप्रायानभिव्यञ्जकः । श्वा यथा असारं जुगुप्सिततमं कामयते तद्वदयमपि जीवब्रह्मैक्यं ब्रह्मणो निर्गुणत्वं तस्यैव जीवरूपेण संसारित्वं जगन्मिथ्यात्वमित्यादिकं सर्वमप्रामाणिकं सर्वप्रमाणविरुद्धं च कामयते । प्लवगोऽपि

---

१. 'ओतुर्बिडालो मार्जारः–' इत्यर्वाचीनाः । बिल एवाडतीति बिलाळः । 'अड उद्यमे' ।

यथा नानारत्नमयीं मालां लब्ध्वाऽपि इयं मणिमाला, अत्रत्यमणीनामपीदं तारतम्यमित्यादिविवेकरहितः तथाऽयमपि बद्धमुक्तव्यवस्थां जीवब्रह्मव्यवस्थामज्ञानस्य चायमाश्रयो विषयश्चायमित्यादि व्यवस्थां न समर्थयितुं समर्थ इत्यव्यवस्थ इति ॥ ४८ ॥

(त.चं.) हविष्ट्वेनेन्द्राय सन्नेयं सान्नाय्यम् । दधिपयोरूपं हविः । 'ऐन्द्रं दधि','ऐन्द्रं पयः' इत्यादिश्रवणात् । 'पाय्यसान्नाय्यनाकाय्यधाय्या मानहविर्निवाससामिधेनीषु'[३.१.१२९] इति हि वैयाकरणाः । पुरः प्रथमं दाश्यत इति पुरोडाशोऽपि हविर्विशेषः । दाशृ दाने । 'पुरोडाशो हविर्भेदे चमस्यां पिष्टकस्य च । रसे सोमलतायाश्च हुतशेषेऽपि' इति च ॥

जनो नमेन्नापरथेति मत्वा शठश्चतुर्थाश्रममेष भेजे ।
पद्माकरं वा कलुषीचिकीर्षुः सुदुर्दमो दुष्टगजो विशुद्धम् ॥ ४९ ॥

(प.दी.) **जनः** । **शठः** वेदादिप्रमाणेषु तत्प्रतिपाद्ये ब्रह्मणि च निगूढद्वेषः **एषः** सङ्करः **चतुर्थाश्रमं** यत्याश्रमं **भेजे** । कः किमिव? **सुदुर्दमः** अतिदुर्दान्तः **दुष्टगजः** **विशुद्धं** पूर्वमकल्मषं **कलुषीचिकीर्षुः** सन् **पद्माकरं वा** [सरोवरमिव] । किं मत्वा? **अपरथा** आश्रमापरिग्रहे सति **जनो न नमेत्** न प्रवणीभवेत् **इति मत्वा** । नतु विरक्त्येति भावः ॥ ४९ ॥

(त.चं.) शठ कैतवे । शठतीति शठः । शठ अनृतभाषणे । शाठयतीति शठः । द्वयमपि भूषणं तस्य ॥ ४९ ॥

अवैदिकं माध्यमिकं निरस्तं निरीक्ष्य तत्पक्षसुपक्षपाती ।
तमेव पक्षं प्रतिपादुकोऽसौ न्यरूरुपन्मार्गमिहानुरूपम् ॥ ५० ॥

(प.दी.) **अवैदिकम्** । **असौ** सङ्करः **माध्यमिकं** बौद्धसम्बन्धिनं **पक्षं** सिद्धान्तं **अवैदिकम्**, हेतुगर्भं विशेषणमेतत्, अवैदिकत्वादिति भावः, **निरस्तं** वैदिके-

निराकृतं **निरीक्ष्य तत्पक्षसुपक्षपाती** स्वयं तत्पक्षे सुतरां पक्षपातयुक्तः, अत एव **तं पक्षमेव** बौद्धपक्षमेव **प्रतिपादुकः** प्रतिपादयितुकामः, **इह** तत्पक्षसमर्थनविषये **अनुरूपं** स्वस्य वेदान्तित्वप्रसिद्धिमनुपमृद्यैव बौद्ध-मतसमर्थनानुगुणम्, **मार्गम्** उपायं **न्यरूरुपत्** चिन्तितवान् ॥ ५० ॥

(त.चं.) शाठ्यमेव द्विविधं विशदयति द्वाभ्याम्– अवैदिकम् । निरस्तं कुमारिलेन भट्टेन भाट्टैश्च । प्रतिपादुकः । शीलार्थ उकञ् । 'लष-पत-पद-स्था-भू-वृष-हन-कम-गम-शॄभ्य उकञ्' [३.२.१५४] । तद् यथा– अभिलाषुकः । पातुकः । प्रतिपादुकः । उपस्थायुकः । भावुकः । वर्षुकः । घातुकः । कामुकः । आगामुकः । विशारुकः ॥ ५० ॥

असत्पदेऽसन् सदसद्विविक्तं
मायाख्यया संवृतिमभ्यधत्त ।
ब्रह्माप्यखण्डं बत शून्यसिद्ध्यै
प्रच्छन्नबौद्धोऽयमतः प्रसिद्धः ॥ ५१ ॥

(प.दी.) **असत्पदे** । **असन्** दुष्टः **असत्पदे** असतः स्थाने, असदिति वक्तव्य इति भावः, **सदसद्विविक्तं** सदसद्विलक्षणं **अभ्यधत्त** । बौद्धमता-नुसारेण विश्वमसदिति वक्तव्ये तथाऽनुक्त्वा सदसद्विलक्षणमित्युवाचेति भावः । **संवृतिम्,** शून्यवादिनस्तु विश्वारोपनिमित्तमज्ञानं संवृतिरित्याहुः, अयं तु तां संवृतिं **मायाख्यया** मायानाम्ना **अभ्यधत्त** व्यवहृतवान् । शून्य-वादिनस्तु शून्याख्यं परतत्वमखण्डं निर्विशेषमाहुः, **अयमपि** परतत्वं **ब्रह्म अखण्डं** निर्विशेषं **अभ्यधत्त** । किमर्थम्? **शून्यसिद्ध्यै** शून्यसाधर्म्येण ब्रह्मणोऽपि शून्यत्वसिद्ध्ये **बत** । बतेत्येतदव्ययं खेदे वर्तते । अनन्तसद्गुणमपि ब्रह्मायं निर्गुणमुक्तवानिति खेदः । 'खेदानुकम्पासन्तोषविस्मयामन्त्रणे बत' इत्यमरः । **अतः अयं** विद्वत्सभासु **प्रच्छन्नबौद्ध** इति **प्रसिद्धः** अभूत् ॥ ५१ ॥

(त.चं.) शून्यसिद्ध्यै । शून्यं स्वाभिमतं साधयितुं कैतवेन ब्रह्मण्येव शून्यलक्षणानि समन्वायत ॥ ५१ ॥

यद् ब्रह्मसूत्रोत्करभास्करं च प्रकाशयन्तं सकलं स्वगोभिः ।
अचूचुरद् वेदसमूहवाहं ततो महातस्करमेनमाहुः ॥ ५२ ॥

(प.दी.) यत् । अयं **स्वगोभिः** स्वकीयवचोभिः **सकलं** जीवेश्वरस्वरूपादिकं **प्रकाशयन्तम्, वेदसमूहवाहं** विषयत्वेन वा स्वोक्तार्थे प्रमाणत्वेन वा सकलवेदान् वहन्तम्, **ब्रह्मसूत्रोत्करभास्करं च** ब्रह्मसूत्रसमूहाख्यभास्करं च **अचूचुरत्** चोरयामास, **यत्** यस्मात् **ततः एनं** सङ्करं **महातस्करमाहुः** । भास्करोऽपि स्वरश्मिभिः सकलप्रकाशकः सकलवेदाभिमानितुरगवाहनश्च । तथा च सकलप्रकाशकत्वादिना भास्करसदृशानि ब्रह्मसूत्राणि अचूचुरद् यत् तस्मात् महातस्करोऽयमिति भावः । युक्तमेव हि भास्करतस्करस्य महातस्करत्वम् ॥ ५२ ॥

(त.चं.) वेदसमूहवाहम् । सप्त च्छन्दांसि हि तस्य सप्ताश्वाः । तथा हि श्रुतिः– 'सप्त युञ्जन्ति रथमेकचक्रम्' इति ॥ ५२ ॥

स्वसूत्रजातस्य विरुद्धभाषी
तद्भाष्यकारोऽहमिति ब्रुवन् यः ।
तं तत्क्षणाद् यो न दिधक्षति स्म
स व्यासरूपो भगवान् क्षमाब्धिः ॥ ५३ ॥

(भा.प्र.) न दिधक्षति स्म । 'लट् स्मे' इति सूत्रादतीतार्थत्वम् ॥

(प.दी.) स्वेति । **यः** सङ्करः **स्वसूत्रजातस्य** स्वकृतब्रह्मसूत्रजातस्य **विरुद्धभाषी,** यद्विरुद्धं जगन्मिथ्यात्वादिकं तद्भाषणशीलः, तथाऽपि **अहं तद्भाष्यकार इति** ब्रह्मसूत्रभाष्यकार इति **ब्रुवन्** वर्तते । **तं** एवंविधं सङ्करं **यो व्यासरूपो भगवान् तत्क्षणात् न दिधक्षति स्म** न दग्धुमैच्छत् **सः क्षमाब्धिः** । दिधक्षति स्मेति 'लट् स्मे' इत्यतीतार्थे लट् ॥ ५३ ॥

(त.चं.) प्रथमत एव तावत् 'आनन्दमयो विष्णुः' इति भगवानाह । अयं कोश इति बभाषे । एवमान्तं विरुद्धमेव भाषमाणोऽपि 'एतदेव व्याসहृदयम्' इति पुनरहो भणति । दिधक्षति स्म । अदिधक्षत् । स्मयोगेऽतीतार्थे भवति लडित्याह– 'लट् स्मे'[३.२.११८] इति ॥

**निगमसन्मणिदीपगणोऽभवत् तदुरुवाग्गणपङ्कनिगूढभाः ।
अविदुषामिति सङ्करताकरः स किल सङ्कर इत्यभिशुश्रुवे ॥ ५४ ॥**

(भा.प्र.) अविदुषामिति तस्मादविदुषां नराणाम् ॥

(प.दी.) **निगमेति** । **निगमसन्मणिदीपगणः** वेदाख्यसद्रत्नप्रदीपगणः **तदुरुवाग्गणपङ्कनिगूढभाः** तस्य सङ्करस्य निगमव्याख्यानरूपवाग्जालाख्य-कर्दमेन निगूढप्रकाशः **अभवत्** । दीपवद् भगवत्स्वरूपादिकं सम्यक् प्रकाशयन्नपि निगमः सङ्करकृतापव्याख्यानेन तिरोहितोऽभवदिति भावः । **इति** तस्मात् श्रुत्याद्यन्यथाव्याख्यानात् **अविदुषां** स्वतो वेदार्थमजानतां नराणां **सङ्करताकरः** सर्वभेदाभावबुद्धिजनकः **स सङ्कर इत्यभिशुश्रुवे किल** विद्वत्सभासु प्रसिद्धोऽभवत् किल ॥ ५४ ॥

(त.चं.) वङ्गाः शङ्करं सङ्करमाहुः । तदेवास्य समुचितं नामेति तेनैव नाम्ना तदात्वे विद्वत्सभास्वयमप्रथत । तदिदं नभभरैर्द्वादशाक्षरमादित्यदेवतं जागतं द्रुतविळम्बितं नाम । द्रुतं प्रस्तूय विळम्बेन परिसमाप्यत इति । सर्वदेवस्त्रियोऽभिमानिन्यः । 'नभौ भरौ चेद् द्रुतविळम्बितं न यतिः पदि' इति ॥ ५४ ॥

**विश्वं मिथ्या विभुरगुणवानात्मनां नास्ति भेदो
दैत्या इत्थं व्यदधत गिरां दिक्षु भूयः प्रसिद्धिम् ।**

आनन्दाद्यैर्गुरुगुणगणैः पूरितो वासुदेवो
मन्दम्मन्दं मनसि च सतां हन्त नूनं तिरोऽभूत् ॥ ५५ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते प्रथमः सर्गः

—०—

(भा.प्र.) आनन्दाद्यैरित्यादि [1]सर्गान्तश्लोकपदेन आनन्दात्मकोऽयं ग्रन्थः ॥

इति नारायणपण्डिताचार्यविरचितायां
स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां
प्रथमः सर्गः

—०—

(प.दी.) **विश्वम्**। **दैत्या** भुव्युत्पन्ना मणिमदादयः **दिक्षु** नानादेशेषु **इत्थं गिरां** वचसां **भूयः** बाहुल्येन **प्रसिद्धिं व्यदधत**। कथम्? **विश्वं** प्रपञ्चो **मिथ्या** सदसद्विलक्षणः। **विभुः** व्याप्तो भगवान् विष्णुः **अगुणवान्**। न गुण-वानित्यगुणवान् निर्गुण इति यावत्। अगुणा गुणविरुद्धा दोषास्तद्वानिति वा। ब्रह्मैव जीवरूपेण सकलदोषभाजनमिति हि मायिमतम्। **आत्मनां भेदो नास्ति**। इत्थं प्रसिद्धिमित्यन्वयः। तया प्रसिद्ध्या किमभूदित्यपेक्षा-यामाह– **आनन्दाद्यैरिति**। **आनन्दाद्यैः गुरुगुणगणैः पूरितो वासुदेवः सतां** सम्यग्ज्ञानयोग्यानां **मनसि च मन्दम्मन्दं तिरोऽभून्नूनम्**, तिरोहितोऽ-भूदेव। 'नूनं तर्केऽवधारणे' इत्यमरः[2]। सामान्यतो विष्णुमनन्तगुणं जानतामपि सतां मायिप्रणीतदुर्भाष्यादिरूपवाक्प्रसिद्ध्या इदमदो वेति संशयो विपरीतज्ञानं वाऽभूदिति भावः। **हन्त** इत्येतदनुकम्पायाम्। सतां

१. 'समाप्तिश्लोक–' इति पाठान्तरम्।
२. 'नूनं तर्केऽर्थनिश्चये' इति तु प्रचलितः पाठः।

मनसि च भगवत्तिरोभावोऽभूत् । अथ कथं कदा वा तेषां तत्वज्ञानं स्यादिति ग्रन्थकर्तुरनुकम्पा । 'हन्त हर्षेऽनुकम्पायाम्' इत्यमरः । सर्गान्तश्लोकेष्वानन्दपदाङ्कमिदं काव्यम् ॥ ५५ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां प्रथमः सर्गः

—०—

(त.चं.) यद् विश्वं विविधं वर्धमानं च जगद् वर्तते तन्मिथ्या । यश्च गुणैर्विशिष्टो भवन् विभुरगुणवान्, प्रतिशरीरमन्यदन्यद् विषयजातमदतामात्मनां नास्ति भेद इतीत्थं व्याघाताकराणां गिराम् । सतां सज्जनानामपि विदुषामपि मनसि । हन्तेति विषादेऽनुकम्पायां वा । इदं च सप्तदशाक्षरमतिच्छन्दः । अतिच्छन्दसां सर्वेषामपि सर्वदेवस्त्रियो देवताः । मभनतता गुरुद्वयं चेति मन्दाक्रान्ता नामात्यष्टिः । मन्दं प्रस्तूय द्रुततरमाक्रामतीति । 'मन्दाक्रान्ता मभ्नतास्तो गावब्धिषडगैर्यतिः' इति ॥ ५५ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याचख्यौ प्रथमं सर्गं सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां
तत्वचन्द्रिकायां प्रथमः सर्गः

—०—

द्वितीयः सर्गः

[देवैः प्रार्थितेन नारायणेन वायोरवतारार्थमादेशः। रजतपीठेऽयनोत्सव आविष्टपुरुषेणावतारघोषणम्। 'नडिल्लाय' विप्रकथा। तद्विवाहः। पौराणिकस्य तस्य पुत्रेच्छया अनन्तासनस्य सेवा। पुत्रजननम्। तस्य 'वासुदेव' इति नामकरणम्। 'मूडिल्लाय' विप्रेण शिशोः पयःपानार्थं गोप्रदानम्। रात्रौ शिशुना सह रजतपीठपुरादागमनावसरे ग्रहाविष्टेन केनचित् तस्य शिशोः लोकेश्वरत्वघोषणा। शिशोः कुलस्थकुल-भोजनम्। बालस्य रिङ्खणादिलीला। वृषभस्य पुच्छान्तमवलम्ब्य प्रातर्गृहान्निर्गमनम्। वृष-विक्रयिणः निष्कपदे तिन्त्रिणीबीजदानम्। एवं बाललीलाभिः सुजनमोदनम्।]

विज्ञानभानुमति कालबलेन लीने
दुर्भाष्यसन्तमससन्तिततो जनेऽन्धे ।
मार्गात् सतां स्खलति खिन्नहृदो मुकुन्दं
देवाश्चतुर्मुखमुखाः शरणं प्रजग्मुः ॥ १ ॥

(प.दी.) विज्ञानेति । **विज्ञानभानुमति** विज्ञानाख्ये सूर्ये **कालबलेन** कलिकालाख्यसमयसामर्थ्येन **लीने** तिरोहिते सति, **दुर्भाष्यसन्तमससन्ततितः** सङ्कारादिप्रणीताद् ब्रह्मसूत्रादिदुर्भाष्यान्धकारसमूहात् **अन्धे** भगवत्स्वरूपादिकमविदुषि **जने** तत्वज्ञानयोग्ये जने **सतां मार्गात्** सद्भिराचरितमार्गात् **स्खलति** सन्मार्गे सम्यगवर्तमाने सतीति भावः, **खिन्नहृदः** खेदितमनसः **चतुर्मुखमुखाः देवाः मुकुन्दं शरणं प्रजग्मुः** ॥ १ ॥

(त.चं.) समन्तात् ततं तमः सन्तमसम् । 'अवसमन्धेभ्यस्तमसः' [५.४.७९] इत्यच् । अवतमसम् । सन्तमसम् । अन्धतमसम् । सतां ज्ञानप्रकर्षो यथा भवति तथा जग्मुः । अस्मिन् सर्गे चतुर्दशाक्षरा शकरी छन्दः, अन्त्योपान्त्याभ्यामृते । सर्वदेवस्त्रियो देवताः । शकरीष्वपि वसन्ततिलका नाम । वसन्तस्यापि तिलकं विशेषकं ययेति । वसन्तो हि सरसः कालः । सरसतरमिदं छन्द इति । 'वसन्ततिलका प्रोक्ता तभजा जगगा यदि । नवा पादेऽपि विरतिः सप्तसप्ताक्षरैर्मता' इति तल्लक्षणम् । इमामेव सिंहोद्धतां केचिदाचक्षते । मधुमाधवीमपरे । चेतोहितामपरे मन्यन्ते ॥ १ ॥

नाथः कलौ त्रियुगहूतिरनुद्बुभूषु-
र्ब्रह्माणमप्यनवतारमनादिदिक्षुः ।
सर्वज्ञमन्यमनवेक्ष्य सकार्यवीर्यं
स्मेराननो भुवनजीवनमाबभाषे ॥ २ ॥

(भा.प्र.) कृतादीनि त्रीणि युगान्यवतर्तुमिष्टान्यस्येति त्रियुगः । 'युगत्रयावतारत्वात् त्रियुगो विष्णुरुच्यते' इति च ॥

(प.दी.) **नाथः** । **त्रियुगहूतिः** त्रियुग इति हूतिः नाम यस्य सः त्रियुगहूतिः । त्रियुगहूतित्वं च तस्य युगत्रयावतारत्वात् । 'युगत्रयावतारत्वात् त्रियुगो विष्णुरुच्यते' इति वचनात् । त्रियुगहूतित्वं चात्र हेतुत्वेनोक्तमवगन्तव्यं त्रियुगहूतित्वादिति । तस्मात् **कलौ** कलियुगे **अनुद्बुभूषुः** अवतर्तुमनिच्छन् **नाथः** स्वामी भगवान् **अनवतारं** अवताररहितं **ब्रह्माणं** चतुर्मुखं **अप्यनादिदिक्षुः** अवतारार्थमादेष्टुमनिच्छन्, **सकार्यवीर्यम्**, कार्यसाधन[विषये]वीर्यं सामर्थ्यं कार्यवीर्यम्, तत्सहितः सकार्यवीर्यः, तं **सर्वज्ञम्**, **अन्यं** विष्णुचतुर्मुखातिरिक्तं **अनवेक्ष्य भुवनजीवनं** मुख्यवायुं **आबभाषे** । कथम्भूतः? **स्मेराननः** अनुग्रहविशेषान्मन्दस्मितवदनः ॥ २ ॥

(त.चं.) ज्ञानाविष्कारार्थमवतर्तुं नास्येष्टं कलियुगमिति त्रियुगहूतिः । वायुमृते विष्णुचतुर्मुखाभ्यामन्यं सर्वज्ञं कार्यदक्षमनवेक्ष्य । अथवा नाथः स्वयं कलौ नाववतितीर्षति । ब्रह्माणमपि नाऽदिदिक्षति । तयोश्च विरहे वायोरन्यं सर्वज्ञमनवेक्ष्य तमेवाऽबभाषे । विष्णुब्रह्मवायुभ्योऽन्यं सकार्यवीर्यमनवेक्ष्येति निर्गळितम् । स इति भिन्नं वा पदम् । स नाथः कार्ये पर्याप्तं वीर्यं यस्य तं भुवनजीवनमाबभाषे आहूय बभाषे । चतुर्दशभुवनगतं जीवजातं जीवयतीति भुवनजीवनो मुख्यप्राणः ॥ २ ॥

वेदान्तमार्गपरिमार्गणदीनदूना
दैवीः प्रजा विशरणाः करुणापदं नः ।

आनन्दयेः सुमुख भूषितभूमिभागो
रूपान्तरेण मम सद्गुणनिर्णयेन ॥ ३ ॥

(प.दी.) वेदान्तेति । **सुमुख, मम सद्गुणनिर्णयेन,** सन्तो निर्दोषाश्च ते गुणाश्चेति सद्गुणाः, तेषां निर्णयो यस्माद् भवति तत् सद्गुणनिर्णयम्, तेन **रूपान्तरेण** मध्वनाम्ना तवान्यरूपेण **भूषितभूमिभागः** अलङ्कृतभूप्रदेशः, **वेदान्तमार्गपरिमार्गणदीनदूनाः,** वेदान्तमार्गो वेदार्थनिर्णयात्मकमार्गः ब्रह्मसूत्रादिरूपः, [तस्य] परिमार्गणेन विचारेण दीनाः रहिताः, अशक्त्या तद्विचाररहिता इति भावः, अत एव तत्वज्ञानाभावाद् दूनाः दुःखयुक्ताः । **दैवीः प्रजाः** मोक्षयोग्यजीवान् **आनन्दयेः** सुखय । कथम्भूताः? **विशरणाः** अस्मद्व्यतिरिक्ताश्रयहीनाः, रक्षकहीना वा । 'शरणं गृहरक्षित्रोः' इत्यमरः । अत एव **नः** अस्माकं **करुणापदं** कृपास्पदम् । मध्वाख्यावतारस्य भगवद्गुणनिर्णायकत्वं च 'तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः । निर्यदीं बुध्नान्महिषस्य वर्पस ईशानासः शवसा क्रन्त सूरयः । यदीमनु प्रदिवो मध्व आधवे गुहा सन्तं मातरिश्वा मथायति' इति श्रुतिसिद्धम् । एतदर्थश्च– योषणः योषित्,आदराद् बहुवचनम्, अस्य [देववृषभस्य] वायोस्तृतीयं रूपमिति शेषः, दोहसे ज्ञानामृतदोहनाय जनयन्त अजनयत् । दशप्रमतिं यतित्वे पूर्णप्रज्ञनामकम् । ईशानासः समर्थाः सूरयः ज्ञानिनः देवमुनिपूर्वकाः, बुध्नात् बुद्ध्यत इति बुध्नः ज्ञानी तस्माद् बुध्नात्, यदीं यस्मादेव महिषस्य महितषड्गुणस्य हरेः वर्पसः रमणीयान् गुणान् शवसा सुखेन निः नितरामक्रन्त व्यज्ञासिषुः । क्रमु पादविक्षेप इति धातुः । गत्यर्थाश्च ज्ञानार्थाः । यदीं य एव प्रदिवः प्रकृष्टक्रीडादिगुणः मध्वः मध्वनामा आनन्दतीर्थाख्यः । 'मध्वित्यानन्द उद्दिष्टो वेति तीर्थमुदाहृतम् । मध्व आनन्दतीर्थः स्यात् तृतीया मारुती तनुः' इति वचनात् । एवं च मध्वनामा आनन्दतीर्थाख्यः मातरिश्वा वायुः गुहा सन्तं मायिनां निर्गुणोक्तिभिः

गूहितं सन्तं हरिं आधवे आ समन्तात् धवत्वे विष्णोः निरुपचरितसर्वस्वामित्वे, निमित्ते चेयं सप्तमी, तत्सिद्ध्यर्थं मथायति मथ्नाति, वेदादिकं सदाऽऽलोचयति तत्वज्ञानार्थमिति भावः ॥ ३ ॥

(त.चं.) वेदान्तमार्गपरिमार्गणे दीनाः सामर्थ्यहीनाः । अत एव दूयन्ते स्मेति दूना दुःखिताश्चेति । 'टुदु उपतापे' ॥ ३ ॥

आदेशमौलिमणिमुज्ज्वलवर्णमेनं
बद्धाञ्जलिर्मरुदनर्घमधत्त मूर्ध्ना ।
हारावळीमिव हृदा विबुधेन्द्रयाच्ञां
बिभ्रन्निजाननुजिघृक्षुरवातितीर्षत् ॥ ४ ॥

(भा.प्र.) वर्णोऽक्षरम्, गुणश्च ॥

(प.दी.) आदेशेति । **मरुत्** मुख्यवायुः **उज्ज्वलवर्णं** शोभनाक्षरयुक्तं **अनर्घं एनमादेशमौलिमणिं** भगवदादेशाख्यमकुटरत्नं **बद्धाञ्जलिः** सन् **मूर्ध्ना अधत्त** दधार। शिरसा बद्धाञ्जलिर्भूत्वा भगवदाज्ञां 'तथाऽस्तु' इत्यङ्गीचकारेति भावः । यथा कश्चित् भृत्यः स्वस्वामिना दीयमानं मकुटखचितं योग्यं शोभनवर्णं रत्नं बद्धाञ्जलिः सन् स्वीकुर्यात् तद्वदिति श्लेषाभिप्रायः । **हृदा** मनसा **हारावळीमिव** हृत्प्रदेशे हारमालामिव **विबुधेन्द्रयाच्ञां** सुरेन्द्रप्रार्थनां 'भवता भुव्यवतीर्य सदनुग्रहः कार्यः' इत्यादिरूपां **बिभ्रद्** दधानः । **निजान्** स्वभक्तान् **अनुजिघृक्षुः** अनुग्रहीतुमिच्छन् वायुः **अवातितीर्षत्** अवतर्तुमैच्छत् ॥ ४ ॥

(त.चं.) अनर्घममूल्यम् । अर्घ इति मूल्यम् । अर्घ्यमिति हस्तावनेजनम् । 'अर्चनामूल्ययोरर्घः' । अर्ह पूजायाम् । अर्ह्यत इत्यर्घः । अर्हतेः कवर्गादेश इति तु वैयाकरणाः । अर्घ्यत इति वाऽर्घः। अर्घ पूजायामित्यपि धातुपाठं पठन्ति प्राचीनाः ॥ ४ ॥

कालः स एव समवर्तत नाम याव-
च्चिन्ताकुलं विविधसाधुकुलं बभूव ।
वेदान्तसन्ततकृतान्तरसं न विद्मः
श्रेयो लभेमहि कथं नु वयं बतेति ॥ ५ ॥

(प.दी.) **कालः**। **यावदेव** यदैव **स कालः** सज्जनकृपालुभिः ब्रह्मरुद्रादिभिः भगवत्प्रार्थनाकालः **समवर्तत नाम** तदैव तस्मिन् काल एव **विविधसाधुकुलं** वर्णाश्रमभेदेन नानाविधसज्जनसमूहः इति **चिन्ताकुलं** चिन्तया सम्भ्रमद् **बभूव**। कथम्? **वेदान्तसन्ततकृतान्तरसं** वेदान्तशास्त्रस्य सन्ततमनादितः सत्सम्प्रदायप्राप्तं कृतान्तरसं सिद्धान्तरसम्, 'कृतान्तौ यमसिद्धान्तौ' इत्यमरः[१], **न विद्मः** न जानीमः । **श्रेयः** पुरुषार्थं **कथं नु** कथं वा [**वयं**] **लभेमहि** प्राप्स्यामः **बत** कष्टम् । 'बत खेदे' ॥ ५ ॥

(त.चं.) नामेति प्राकाश्ये विस्मये च। प्रकटमेतद् यदा भगवान् भुवनजीवन-मवतर्तुमाबभाषे तदैव भुवि साधुकुले चिन्तामाकुलयामासेति । अहो भगवतो लीलामयी व्यवस्थेति विस्मयते ॥ ५ ॥

तत्प्रीतये रजतपीठपुराधिवासी
देवो विवेश पुरुषं शुभसूचनाय ।
प्राप्ते महाय महिताय महाजनौघे
कोलाहलेन सकुतूहलिनि प्रवृत्ते ॥ ६ ॥

(भा.प्र.) रजतपीठपुरस्य 'ओडिपु' इत्यपभ्रष्टसञ्ज्ञा[२] । **महाय** अयनसङ्क्रमणोत्सवाय॥

(प.दी.) **तत्प्रीतये**। **रजतपीठपुराधिवासी**, रजतपीठपुरे अधिवासः रजत-

---

१.नायं पाठोऽमरकोश उपलभ्यते सम्प्रति । 'कृतान्तो यमसिद्धान्तदैवाकुशलकर्मसु' इति तत्र पठ्यते ।

२.'–भ्रष्टभाषा' इति क्वचित् ।

पीठपुराधिवासः, सोऽस्यास्तीति रजतपीठपुराधिवासी **देवः तत्प्रीतये** चिन्ताकुलसज्जनप्रीत्यर्थम्, **शुभसूचनाय** मुख्यप्राणावताराख्यं शुभं सूचयितुं **पुरुषं** कश्चित् पुरुषं **विवेश** । कस्मिन्नवसरे? **महिताय** सर्वैः पूजिताय **महाय** उत्सवदर्शनाय **कोलाहलेन** सम्भ्रमेण **प्राप्ते** समागते **महाजनौघे सकुतूहलिनि** कुतूहलयुक्तजनयुक्ते तत्र रजतपीठपुरे **प्रवृत्ते** वर्तमाने सति । रजतपीठपुरस्य 'ओडिपु'[ಒಡಿಪು] इत्यपभ्रष्टसञ्ज्ञा ॥ ६ ॥

(त.चं.) महाय । रजतपीठपुरपतेरनन्तासनस्य मकरसङ्क्रमणे वार्षिकोत्सवः प्रावर्ततेति पुराणविदो वदन्ति । कोलाहलेन आविष्टपुरुषदर्शनजनितकलकलेन सकुतूहलिनि सञ्जातकुतूहलजनसङ्कटेऽयनसङ्क्रमणमहोत्सवे प्रवृत्ते सति ॥ ६ ॥

आविष्टवानकुशलं पुरुषं प्रकृत्या
प्रत्याययन्निह जनान् नितरामनृत्यत् ।
उत्तुङ्गकेतुशिखरे स कृताङ्गहारो
रङ्गान्तरे नट इवाखिलविस्मयात्मा ॥ ७ ॥

(प.दी.) **आविष्टवान्** । **प्रकृत्या** स्वभावत एव **अकुशलं** अचतुरं **पुरुषमाविष्टवान् स** देवः इह रजतपीठपुरे **जनान्** मिळितसुजनान् **प्रत्याययन्** विश्वासयन् **उत्तुङ्गकेतुशिखरे** उन्नतध्वजशिरसि **नितरां कृताङ्गहारः** कृताङ्गविक्षेपः **अनृत्यत्** । क इव? **रङ्गान्तरे** रङ्गमध्ये **नट इव** । अत एव **अखिलविस्मयात्मा** सर्वविस्मयस्वरूपः ॥ ७ ॥

(त.चं.) उत्तुङ्गकेतुशिखरे ध्वजस्तम्भशिरसि । अङ्गस्य हारो हरणं हस्तपादादिविन्यासः । अङ्गविक्षेप इत्येतत् ॥ ७ ॥

आभाष्य सोऽत्र जनतां शपथानुविद्ध-
मुच्चैरिदं वचनमुद्धृतदोर्बभाषे ।

उत्पत्स्यते जगति विश्वजनीनवृत्ति-
र्विश्वज्ञ एव भगवानचिरादिहेति ॥ ८ ॥

(भा.प्र.)विश्वजनीनं विश्वजनहितम्। **'आत्मन्विश्वजनभोगोत्तरपदात्खः'॥**

(प.दी.) आभाष्य । सः पुरुषे आविष्टवान् देवः **अत्र** मिळितां **जनतां** जनसमूहं **आभाष्य** 'श्रूयताम्' इति सम्बोध्य **उद्धृतदोः** उद्धृतहस्तः सन् **शपथानुविद्धं** त्रिःकथनादिरूपशपथयुक्तं यथा भवति तथा **उच्चैः इदं** वक्ष्यमाणं **वचनं बभाषे**। कथम्? **इह जगति विश्वजनीनवृत्तिः**। 'तस्मै हितम्' इत्यनुवर्तमाने 'आत्मन्विश्वजनभोगोत्तरपदात् खः' इति सूत्रेण विश्वजनशब्दात् तस्मै हितमित्यस्मिन्नर्थे खप्रत्ययः । खस्य च ईनादेशः । 'यस्येति च' इत्यकारलोपः। एवं च विश्वजनस्य[1] हिता वृत्तिर्यस्य सः विश्वजनीनवृत्तिरिति भावः। **विश्वज्ञः भगवान्** षड्गुणैश्वर्यसम्पन्नः कश्चिद् **अचिरादेव उत्पत्स्यते** जनिष्यत इति बभाषे इत्यन्वयः । अत्र विश्वजनीनवृत्तिरित्यादिविशेषणत्रयेण वायुरिति सूच्यते ॥ ८ ॥

(त.चं.) आभाष्य बभाषे आवर्जनार्थं किञ्चिदालप्य ततो भाषणीयं बभाषे। विश्वजनेभ्यो हिता विश्वजनीना वृत्तिः। 'आत्मन्विश्वजनभोगोत्तरपदात् खः' [५.१.९] । तद्यथा– आत्मने हितमात्मनीनम् । राजभोगाय हितं राजभोगीनम् । विश्वं सकलं जानातीति विश्वज्ञः । विश्वं विष्णुं जानातीति विश्वज्ञः। अत एव भगवान्। 'उत्पत्तिमायतिं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति' ॥ ८ ॥

सद्वीपवारिनिधिसप्तकभूतधात्र्या
मध्येऽपि कर्मभुवि भारतनामखण्डे ।
काले कलौ सुविमलान्वयलब्धजन्मा
सन्मध्यगेहकुलमौलिमणिर्द्विजोऽभूत् ॥ ९ ॥

---

१. विश्वजनेभ्य इति वक्तव्यम् । सम्पातायातमेतत् ।

(प.दी.) अथेदानीं वायोरवतारं वक्तुं तत्पित्रादिकमाह– **सद्वीपे**त्यादिना । **कलौ** कलियुगे **काले सद्वीपवारिनिधिसप्तकभूतधात्र्याः**, द्वीपसप्तकेन वारिनिधिसप्तकेन च सहिता सद्वीपवारिनिधिसप्तका, सा च सा भूतधात्री चेति सद्वीपवारिनिधिसप्तकभूतधात्री, तस्या **मध्ये** जम्बूद्वीप इति यावत् । **अपि** तत्रापि **कर्मभुवि** यत्र कृतानि शुभाशुभकर्माणि स्वर्गादिसाधनानि भवन्ति सा कर्मभूरित्युच्यते[१] । सा च केत्यपेक्षायामाह– **भारतनामखण्डे** । **सुविमलान्वयलब्धजन्मा** अतिनिर्मलवंशे लब्धजन्मा **सन्मध्यगेहकुलमौलिमणिः** समीचीनस्य मध्यगेहकुलस्य मौलिमणिः कश्चिद् **द्विजोऽभूत्** ॥ ९ ॥

(त.चं.) कर्मभुवि । कर्मप्रधाना भूः कर्मभूः । नहि कर्मभुवि भोगो नास्ति । नापि भोगभुवि कर्म नास्ति । कर्मभुवि कर्मणः फलमधिकं च । तत्रापि पुण्यक्षेत्रेषु ततोऽप्यधिकमित्यादि । मध्यगेहकुलस्य 'नडिल्लाय' [ನಡಿಲ್ಲಾಯ] इति तौळवं नाम ॥ ९ ॥

> **वेदाद्रिसद्रजतपीठपुरेश्वराभ्यां**
> **ग्रामो विभूषिततरः शिवरूप्यनामा ।**
> **हेमाद्रिराजविभुराजदिळावृताभ-**
> **स्तस्याभवद् गुरुगुणः खलु मूलभूमिः ॥ १० ॥**

(भा.प्र.) शिवरूप्यनामा । ['शिवळ्ळि' इत्यपभ्रष्टभाषायाम्[२]] ॥

(प.दी.) वेदेति । **वेदाद्रिसद्रजतपीठपुरेश्वराभ्यां** वेदाद्रिणा सता समीचीनेन रजतपीठपुरेश्वरेण च **विभूषिततरः** अलङ्कृतः **गुरुगुणः** वेदशास्त्राभिज्ञसज्जना-

---

१ ' कर्मभूमीत्युच्यते' इति लिखितकोशपाठः क्वचित् । ईदन्तोऽपि भूमीशब्दः पठ्यते । 'भूमीलोकदिदृक्षया' इति हि कृष्णावधूतः ।

२. क्वचिदिदं वाक्यं न पठ्यते । 'शिवबेळ्ळि' इति तु स्वरसम् ।

धिष्ठितत्वादिगुरुगुणयुक्तः **शिवरूप्यनामा** 'शिवळ्ळि' इत्यपभ्रष्टनामा **ग्रामः तस्य** सन्मध्यगेहकुलमौलिमणेः द्विजस्य **मूलभूमिः** जन्मभूमिः **अभवत् खलु** । खल्वित्यव्ययं प्रसिद्धिवाचकम् । कीदृशोऽयं ग्रामः? **हेमाद्रिराजविभुराजदिळावृताभः,** हेमाद्रिराजो मेरुः, तेन च, इळावृतखण्डाधिवासिना विभुना रुद्रेण च राजतः शोभमानस्य इळावृतस्य समानः ॥ १० ॥

(त.चं.) सतः पुण्यक्षेत्रस्य रजतपीठपुरस्येश्वरः । शिवरूप्यनामा । तदेव व्यवहारभाषायां 'शिवबोळ्ळि'[ಶಿವಬೊಳ್ಳಿ] इति, 'शिवबेळ्ळि'[ಶಿವಬೆಳ್ಳಿ] इति भूत्वा पुनरक्षरलोपेन 'शिवळ्ळि'[ಶಿವಳ್ಳಿ] इति प्रथितमभूदिति ग्रन्थकृदाशयः। अर्वाचीनास्तु भाषाशास्त्रविदः 'शिवहळ्ळि'[ಶಿವಹಳ್ಳಿ] इत्येतन्मूलं प्रचलितं नामेत्याचक्षते । मूलभूमिः जन्मभूमिः । तस्यास्य तौळवमण्डलस्य सुषमा सुगीता रामसन्देशे श्रीराजराजेश्वरयतिना । तद् यथा– 'तस्याऽसीनः शिरसि महति प्रस्खलन्मेघबिम्बे पश्याधस्ताद् विवृतनयनस्तौळवं देशभागम् । आगोकर्णं जलधिवलयेनाऽवृतं दक्षिणेन ब्रह्मावासं नृपतिरिपुणा जामदग्न्येन सृष्टम् । प्रत्यावासं विविधविलसत्कूपवापीसमेतं पुण्यैर्वृक्षैः परिवृतगृहं भूरिदेवालयाढ्यम् । पश्यन् देशं सुभग तमिमं दृष्टिसाफल्यमेषि प्रायः प्रीतिर्भवति जगतामात्मयोग्ये पदार्थे। मन्दो वायुर्बहुलमुदकं कन्दमूलाद्यमन्दं स्निग्धा जाया समयसहिता जन्तवो भूसुराद्याः । भुक्तिर्नित्यं करतळगता यत्र जन्तोस्तमेनं देशं दूरादनुसर गिरौ पश्चिमाशामुखस्त्वम्' इति । हेमाद्रिराजविभुराजदिळावृताभः । जम्बूद्वीपगतं वर्षमिळावृतं नाम । तथाहि भागवते –'यो वा अयं द्वीपः .... यस्मिन् नव वर्षाणि...येषां मध्य इळावृतं नामाभ्यन्तरवर्षं यस्य नाभ्यामवस्थितः सर्वतः सौवर्णः कुलगिरिराजो मेरुः' इति, 'इळावृते तु भगवान् भव एक एव पुमान्, नह्यन्यस्तत्र निविशति' इत्यादि च ॥ १० ॥

रामाधिवेशितहरिस्वसृमौलिमाला-
राजद्विमानगिरिशोभितमध्युवास ।

क्षेत्रं स पाजकपदं त्रिकुलैककेतुः
कं यद् दधाति सततं खलु विश्वपाजात् ॥ ११ ॥

(भा.प्र.) विश्वपाजात् विश्वपालकादजाद् रामान्निमित्तात्। स तत्र परश्वादिना तीर्थं चकारेति॥

(प.दी.) **रामेति** । **त्रिकुलैककेतुः** 'ओडिपे','पार्पदाने', 'कबेकुडिनाये' इत्यपभ्रष्टनामकस्य कुलत्रयस्य मुख्यध्वजः **स** द्विजः, **रामाधिवेशितहरिस्वसृमौलिमालाराजद्विमानगिरिशोभितम्,** रामेण श्रीपरशुरामेण अधिवेशितया प्रतिष्ठापितया हरिस्वसृमौलिमालया दुर्गाख्यया मौलिमालया राजद्विमानेन गिरिणा शोभितं **पाजकपदं क्षेत्रमध्युवास** । क्षेत्रमिति 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम्[१] । पाजकपदे क्षेत्रे उवासेति भावः । **यत्** क्षेत्रं **विश्वपाजात्** विश्वं पातीति विश्वपः, विश्वपश्चासावजश्चेति विश्वपाजः, तस्मात् विश्वपाजात् [श्रीपरशुरामात्] **सततं** सर्वकालं **कं** जलं **दधाति खलु** । पातीति पः, पश्चासौ अजश्चेति पाजः, पाजात् कं यस्मिन् तत् पाजकमिति विग्रहः । स तत्र परशुना भुवं भित्त्वा तीर्थानि चकार हि ।। ११ ।।

(त.चं.) हरिस्वस्रा कृष्णावतारे स्वसृत्वेनावतीर्णया दुर्गया मौळिमालया स्वशिरसि धृतपुष्पदामायमानया राजता विमानगिरिणा शोभितम् । 'ओडिपे'[ಒಡಿಪೆ] इत्यादिनामानि त्रीणि कुलानि तौळवानां कुलभेदेषु विशिष्टानि । तत्राप्ययं केतुरिवोन्नततर आसीदिति । त्रिष्वयं किङ्कुल इति न प्रकटीकृतं गन्थकृता । 'ओडिपे'[ಒಡಿಪೆ] इतीदानीमपि प्रसिद्धं कुलम् । 'पार्पदाने'[ಪಾರ್ಪದಾನೆ] इत्येतत् सम्प्रति लुप्तप्रायम् ।'कबेकुडिनाये' [ಕಬೆಕುಡಿನಾಯೆ] इति यत् कुलं तदेव क्वचित् 'कबेकोडिन्नाय'[ಕಬೆಕೊಡಿನ್ನಾಯ] इति 'क़बेकोताय' [ಕಬೆಕೊತಾಯ] इति च पठ्यते । कं यद् दधाति । तथाहि

---

१. अध्ययनप्रमादायातमेतत् । 'उपान्वध्याङ् वसः' इति कर्मत्वमिति पठनीयम् । वसधातुर्ह्यत्र पठ्यते, नाऽसधातुः ।

स्मरन्ति–'परश्वधधनुर्बाणगदातीर्थोपशोभिते । गिरौ यत्र सुतप्रेम्णेवाऽस्ते नित्यं हरिस्वसा' इति ॥ ११ ॥

अर्थं कमप्यनवमं पुरुषार्थहेतुं
पुंसां प्रदातुमुचितामुचितस्वरूपाम् ।
कन्यां सुवर्णलसितामिव वेदविद्यां
जग्राह विप्रवृषभप्रतिपादितां सः ॥ १२ ॥

(प.दी.) **अर्थम्** । स द्विजः **पुंसां** सत्पुरुषाणां **पुरुषार्थहेतुं** सत्पुरुषार्थनिमित्तम् । **अनवमम्**, न अवमः अनवमः, उत्तम इति यावत् । तं **कमप्यर्थं** मध्वाख्यवस्तु **प्रदातुं** प्रसवेन दातुं **उचितां** योग्यां **उचितस्वरूपां** कुलवयोरूपैरात्मन उद्वोढुमुचितरूपाम्, **सुवर्णलसितां** सुवर्णेन हेम्ना, तन्मयाभरणेनेति यावत्, लसिताम्, **विप्रवृषभप्रतिपादितां** ब्राह्मणोत्तमेन दत्तां **कन्यां जग्राह** उपयेमे । कामिव? **वेदविद्यामिव** । सा हि पुंसां सर्व [पुरुषार्थ]प्रदमनवमं सर्वोत्तमं कमप्यर्थं परब्रह्माख्यवस्तु प्रदातुमुचिता, उचितस्वरूपा ब्राह्मणेन अध्येतुमुचितस्वरूपा, सुवर्णलसिता शोभमानाक्षरलसिता च । [तादृशीं] ब्राह्मणोत्तमेन दत्तां वेदविद्यामध्यगीष्ट, अनन्तरमुपयेमे चेति भावः ॥ १२ ॥

(त.चं.) वेदविद्यां मनसा जग्राह । कन्यां पाणिना ॥ १२ ॥

रेमेऽच्छयोपनिषदेव महाविवेको
भक्त्येव शुद्धकरणः परमश्रिताऽलम् ।
मिथ्याभिमानरहितः परयेव मुक्त्या
स्वानन्दसन्ततिकृता स तया द्विजेन्द्रः ॥ १३ ॥

(भा.प्र.) अच्छत्वादीनि महाविवेकादीनि विशेषणानि दम्पत्योर्द्रष्टव्यानि । स्वानन्द एव सन्ततिर्मध्वः । 'हनूमान् भीम आनन्दः' इति तद्रूपाणि ॥

(प.दी.) रेमे । **स द्विजेन्द्रः तया** भार्यया **रेमे** । कः कयेव? **महाविवेकः** महाज्ञानवान् कश्चित् **अच्छया** अपौरुषेयत्वादप्रामाण्यकारणदोषरहितया **उपनिषदेव** । अयं द्विजश्च महाविवेकः, साऽपि रूपचारित्रैरच्छा । **शुद्धकरणः** शुद्धान्तःकरणः पुमान् **अलं परमश्रिता,** परमं श्रयत इति परमश्रित् तया परमश्रिता **भक्त्येव** । **मिथ्याभिमानरहितः,** अस्वकीयक्षेत्रापत्यकळत्रादौ स्वकीयत्वमानो मिथ्याभिमानः, तद्रहितः तत्वज्ञानीति यावत् । सः **स्वानन्द-सन्ततिकृता,** स्वानन्दः स्वरूपभूतनिर्दुःखपरमानन्दः, तस्य सन्ततिर्नाम अदुःखानुभवः[१], तं[२] करोतीति स्वानन्दसन्ततिकृत् तया, अत एव **परमया मुक्त्येव** । अयं द्विजेन्द्रोऽपि मिथ्याभिमानरहितः । सा च स्वानन्दसन्तति-कृत् । शोभनानन्दाख्यसन्ततिमपत्यं करोतीति स्वानन्दसन्ततिकृत् ॥

(त.चं.) अच्छया विमलशीलया, परमश्रिता भगवद्भक्तया, स्वानन्द-तीर्थाख्यसन्ततिं दास्यमानया भार्यया महाविवेकः विष्वग् विचारविचक्षणः, शुद्धान्तःकरणः, मिथ्याभूताभ्यामहङ्कारममकाराभ्यां रहितः स द्विजेन्द्रो रेमे । निर्दोषयोपनिषदेव । विष्णुविषयया भक्त्येव । स्वानन्दसन्ततिकृता मुक्त्येव । अपूर्णविकासाऽपरा मुक्तिः काचिदस्तीति परयेत्याह । उपनिषदा च रेमे । विष्णुभक्त्या च रेमे । तदनुकूलया भार्यया च रेमे । आनन्दतीर्थदानेन भाविनीं मुक्तिं प्राप्तप्रायामिव मन्वानो रेमे ॥ १३ ॥

तस्य प्रभोश्चरणयोः कुलदेवताया
भक्तिं बबन्ध निजधर्मरतः स धीरः ।
विज्ञातभारतपुराणमहारहस्यं
यं भट्ट इत्यभिवदन्ति जना विनीतम् ॥ १४ ॥

(प.दी.) तस्य । **निजधर्मरतः** स्ववर्णाश्रमधर्मनिरतः **धीरः** स्थिरबुद्धिः **स**

---

१. 'अविरतानुभवः' इति मूलपाठः सम्भाव्यते ।

२. तामिति स्वरसम् । सन्ततिर्हि तत्पदार्थः ।

द्विजः **कुलदेवतायाः** स्वकुलदेवतायाः **तस्य प्रभोः** रजतपीठपुराधिवासिनः भगवतः **चरणयोः भक्तिं बबन्ध** चकार । **जनाः** महाजनाः **विज्ञातभारत-पुराणमहारहस्यम्,** विज्ञातं सम्यग् ज्ञातं भारतस्य पुराणानां च महारहस्यं अतिगूढार्थो येन स तथोक्तः तम् । अत एव **विनीतं यं भट्ट इत्यभिवदन्ति** व्यवहरन्ति सः भक्तिं बबन्धेत्यन्वयः ।। १४ ।।

(त.चं.) भटतीति भट्टः । भट परिभाषणे । यः शास्त्रेषु स्वाम्यमाप । यस्य भाषितमेव चरमम् । यमन्ये श्रुत्वाऽनुसरन्ति । 'भट्ट उच्छ्रये' इत्यपि काशकृत्स्नः पठति । भट्टतीति भट्टः । यं विद्वदग्रणीरिति जना अभिमानपूर्वकं सगौरवं वदन्ति । अत एव विनीतः । विद्या हि विनयं ददाति ।। १४ ।।

गोविन्दसुन्दरकथासुधया स नृणा-
मानन्दयन्न किल केवलमिन्द्रियाणि ।
किन्तु प्रभो रजतपीठपुरे पदाब्जं
श्रीवल्लभस्य भजतामपि दैवतानाम् ।। १५ ।।

(भा.प्र.) रजतपीठपुरस्थस्य नारायणत्वं निश्चीयते–

'स्वदर्शनोरुव्रतिने निशीथे प्राप्ताय भोगीन्द्रगतो हरिः प्रभुः ।
'स्वं दर्शयित्वा खलु कुञ्जमाधवद्विजाय तद्वत् प्रतिमां व्यधापयत् '।।

(प.दी.) गोविन्देति । **स** भट्टः **गोविन्दसुन्दरकथासुधया केवलं नृणां** मनुष्याणां **इन्द्रियाणि** श्रोत्रादीनि **न आनन्दयत्** । **किन्तु रजतपीठपुरे प्रभोः श्रीवल्लभस्य पदाब्जं भजतां दैवतानां** देवानां **इन्द्रियाण्यपि आनन्दयत् किल** । रजतपीठपुराधिवासिनः श्रीवल्लभत्वं चैतस्य सिद्धम्– 'स्वदर्शनोरुव्रतिने निशीथे प्राप्ताय भोगीन्द्रगतो हरिः प्रभुः । स्वं दर्शयित्वा[१] खलु कुञ्ज-माधवद्विजाय तद्वत् प्रतिमां व्यधापयत्' इति ।। १५ ।।

---

१. 'सन्दर्शयित्वा' इति क्वचित् पाठान्तरम् । भावप्रकाशिकायामपि । नातीव स्वरसम् । अर्थतश्च 'स्वं दर्शयित्वा' इत्येव सुन्दरम् । स्फुटं लिपिकृतः प्रामाद्यन् ।

(त.चं.) रजतपीठपुरपतेः प्रतिकृतिभूता पद्मनाभस्य प्रतिमा 'कुञ्जिबेट्टु' [ಕುಂಜಿಬೆಟ್ಟು] इति ख्याते ग्रामे इदानीमपि पूज्यमाना वर्तते यत्र 'कुञ्जत्ताय' [ಕುಂಜತ್ತಾಯ] कुलजो माधवद्विजो बभूव । अपरा च पाजके ॥ १५ ॥

इत्थं हरेर्गुणकथासुधया सुतृप्तो
नैर्गुण्यवादिषु जनेष्वपि साग्रहेषु ।
तत्वे स कालचलधीरतिसंशयालु-
र्धीमान् धिया श्रवणशोधितया प्रदध्यौ ॥ १६ ॥

(प.दी.) इत्थम् । स भट्टारकः **इत्थं हरेर्गुणकथासुधया सुतृप्तः** अन्यत्र अलम्बुद्धिं प्राप्तः सन् **नैर्गुण्यवादिषु** हरेर्निर्गुणत्वभाषणशीलेषु **जनेषु** मायिजनेषु **अपि साग्रहेषु** सगुणत्वप्रमाणान्यनादृत्य निर्गुण एवेत्याग्रह-युक्तेषु सत्सु **तत्वे** तत्वविषये **कालचलधीः** कालबलादेव चञ्चलबुद्धिः, न तु स्वत इति भावः । तस्माद् **अतिसंशयालुः** माय्युक्तप्रकारेण हरिर्निर्गुणो वा, 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे' इत्यादिप्रमाणानुसारेण सगुणो वेति संशयशीलः **धीमान्** स्वयमेव **श्रवणशोधितया** शास्त्रश्रवणेन निर्मली-कृतया **धिया प्रदध्यौ** । किमत्र मयाऽनुष्ठेयमिति चिन्तितवान् ।'ध्यै चिन्तायाम्' इति धातुः ॥ १६ ॥

(त.चं.) अतिसंशयालुः । 'आलुचि शीङो ग्रहणं कर्तव्यम्' [३.२.१५८] इति हि कात्यायनः । ध्यायत्यनयेति धीः । अभ्यस्तध्यानया धिया पुनरपि प्रकर्षेण दध्यौ ॥ १६ ॥

त्राता य एव नरकात् स हि पुत्रनामा
मुख्यावनं न सुलभं पुरुषादपूर्णात् ।
तस्मात् समस्तविदपत्यमवद्यहीनं
विद्याकराकृति लभेमहि कैरुपायैः ॥ १७ ॥

(प.दी.) त्राता । **य एव नरकात् त्राता स हि** स एव हि **पुत्रनामा** । पुत् नरकम्, पुतस्त्रायत इति पुत्त्र इति भावः । 'पुन्नाम्नो नरकात् त्राता पुत्त्र इत्यभिधीयते' इति च । **अपूर्णात्** सार्वज्ञ्यादिगुणैरपूर्णात् **पुरुषात् मुख्यावनं** सम्यगवनं रक्षणं **सुलभं न** । अयं भावः– अत्रावनं नाम सम्यग्ज्ञानमेव विवक्षितम् । तच्च अल्पज्ञपुरुषात् न सुलभमिति । **तस्मात्** मुख्यावनस्य असुलभत्वात् **समस्तवित्** सर्वज्ञं **अवद्यहीनं** अज्ञानविप्रलम्भादिदोषहीनं **विद्याकराकृति** विद्यानामाकरभूतस्वरूपं अपत्यं **कैरुपायैः लभेमहि** ॥

(त.चं.) पुनातीति पुत्र इति वैयाकरणाः । 'पूञो ह्रस्वश्च' इति हि ते पठन्ति । 'पुवो ह्रस्वश्च' इति क्षीरस्वामी पपाठ । नरकहेतुपापात् पुनाति पितरमिति ह्येवार्थः । 'पुरु त्रायत इति पुत्रः' इति नैरुक्ताः । नरकात् त्रायत इत्येव । 'पुन्नरकं ततस्त्रायते' इति पौराणाः । पोथनात् पुदिति नरक-मुच्यते । 'पुथ हिंसायाम्'। 'पुङ् रक्षे' इत्यपि पठन्ति । तेन पवत इति पुत्र इत्यपि शक्यं निर्वक्तुम् । नाममात्रात् पुत्रा भवेयुर्नाम बहवः । नार्थत इत्याह– मुख्यावनं न सुलभम् ॥ १७ ॥

पूर्वेऽपि कर्दमपराशरपाण्डुमुख्या
यत्सेवया गुणगणाढ्यमपत्यमापुः ।
तं पूर्णषड्गुणतनुं करुणामृताब्धिं
नारायणं कुलपतिं शरणं व्रजेम ॥ १८ ॥

(प.दी.) **पूर्वे**ऽपीति । **पूर्वे** पुरातनाः **कर्दमपराशरपाण्डुमुख्याः अपि** **यत्सेवया** यस्य लक्ष्मीकान्तस्य सेवया **गुणगणाढ्यमपत्यमापुः पूर्णषड्गुणतनुं करुणामृताब्धिं कुलपतिम्** अस्माकं कुलस्वामिनं तं कर्दमादीनामपत्यप्रदं **नारायणं शरणं व्रजेम** ॥ १८ ॥

(त.चं.) 'ज्ञानशक्तिबलैश्वर्यवीर्यतेजांस्यशेषतः । भगवच्छब्दवाच्यानि विना हेयैर्गुणादिभिः' इति षड्गुणाः । सर्वज्ञता ज्ञानम् । सर्वशक्तिः शक्तिः ।

आनन्दमयता बलम् । सर्वप्रशासनमैश्वर्यम् । सर्वनिग्रहो वीर्यम् । सर्वप्रकाशनं तेजः । 'एतस्य वा अक्षरस्य प्रशासने', 'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' इत्यादेः ॥ १८ ॥

इत्थं विचिन्त्य स विचिन्त्यमनन्यबन्धुः
प्रेष्ठप्रदं रजतपीठपुराधिवासम् ।
भक्त्या भवाब्धिभयभङ्गदया शुभात्मा
भेजे भुजङ्गशयनं द्विषडब्दकालम् ॥ १९ ॥

(प.दी.) इत्थमिति । **अनन्यबन्धुः** भगवद्व्यतिरिक्तबन्धुरहितः **शुभात्मा** निर्मलचित्तः **सः विचिन्त्यं** विचारणीयं **इत्थं विचिन्त्य** विचार्य । **प्रेष्ठप्रदम्,** प्रेष्ठं अतिप्रियम्, यस्ययस्य यद्यत् प्रेष्ठं तत्तद् ददातीति प्रेष्ठप्रदः,[तं] **रजतपीठपुराधिवासम्,** रजतपीठपुरमधिवासः आवासस्थानं यस्य स तथोक्तः, तं **भुजङ्गशयनम्, भवाब्धिभयभङ्गदया,** [भवाब्धेः] संसारसमुद्राद् यद् भयं तस्य भङ्गं ददातीति भवाब्धिभयभङ्गदा, तया **भक्त्या द्विषडब्दकालं** द्वादशवत्सरकालसम्पूर्तिपर्यन्तम् । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । **भेजे** सिषेवे ॥ १९ ॥

(त.चं.) भवाब्धौ ये भयाख्या भङ्गास्तरङ्गास्तान् द्यतीति तादृश्या वा भक्त्या । भयनाशनो हि भगवान् । द्विषडब्दकालम् । 'कालाध्वनोरत्यन्तसंयोगे' [२.३.५]। 'क्रियागुणद्रव्यैः साकल्येन कालाध्वनोः सम्बन्धोऽत्यन्तसंयोगः' इति जयादित्यः । तद् यथा– मासमधीते । क्रोशं कुटिला नदी ॥ १९ ॥

पत्न्या समं भगवतः स भजन् पदाब्जं
भोगान् लघूनपि पुनर्लघयाञ्चकार ।
दान्तं स्वयं च हृदयं दमयाञ्चकार
स्वच्छं च देहमधिकं विमलीचकार ॥ २० ॥

(प.दी.) पत्न्या । **पत्न्या समं भगवतः पदाब्जं भजन् सः** द्विजेन्द्रः **लघून्** स्वतः अल्पान् **अपि भोगान् पुनः** भगवद्भजनोपक्रमानन्तरं **लघयाञ्चकार** लघूचकार । **स्वयं च** स्वत एव, अप्रयत्नेनेति भावः, **दान्तं** निगृहीतेन्द्रियं हृदयं मनः [पुनः] **दमयाञ्चकार** दान्तमकरोत् । **अधिकं स्वच्छं** निर्मलं च शौचाचमनप्राणायामादिभिः बाह्याभ्यन्तरशुद्धियुक्तं **देहमधिकं विमलीचकार** पञ्चगव्यप्राशनादिना पुनर्निर्मलमकरोत् ॥ २० ॥

(त.चं.) लघुरितीष्टवचनः । अल्पवचनश्च । 'लघुरगुरौ च मनोज्ञे' । इष्टानपि भोगान् पूर्वमेव लघूकृतान् पुनर्लघयाञ्चकार । 'लघि गतौ' इति पाणिनीयाः । 'भोजननिवृत्तौ च' इति क्षीरस्वामी । चाद् गतौ च । 'लघि शोषणे उत्क्रमणे च' इति काशकृत्स्नः । 'लङ्घनं परमौषधम्' इति हि प्रयुञ्जते । लङ्घ्यत इति लघुः । 'लङ्घिबंह्योर्नलोपश्च' [१.११४] इति दशपादिका । लघुं करोति लघयति । 'दम इन्द्रियनिग्रयः' इति भागवते ॥

तीव्रैः पयोव्रतमुखैर्विविधव्रताग्र्यै-
र्जायापती गुणगणार्णवपुत्रकामौ ।
सम्पूर्णपूरुषमतोषयतां नितान्तं
देवेरिताविव पुराऽदितिकाश्यपौ तौ ॥ २१ ॥

(प.दी.) तीव्रैः । **गुणगणार्णवपुत्रकामौ जायापती तीव्रैः** दुष्करैः **पयोव्रतमुखैः** क्षीराहारपुरस्सरैः **विविधव्रताग्र्यैः सम्पूर्णपूरुषं** अनन्तगुणसम्पूर्णं पुरुषं श्रीमन्नारायणं **नितान्तमतोषयताम्** । काविव? **पुरा देवेरितौ** वामनावतारार्थं देवेन चतुर्मुखेन ईरितौ तपः कार्यमित्युक्तौ **तौ अदितिकाश्यपाविव** । ब्रह्मेरितावदितिकाश्यपौ वामनावतारे तत्पितृत्वं प्राप्तुं तपश्चक्रतुरिति हरिवंशे प्रसिद्धम् । एतावपि दम्पती देवेनान्तर्यामिणा भगवता प्रेरितौ तमतोषयताम् ॥ २१ ॥

(त.चं.) व्रतं हि द्विप्रकारं भवति । यत्र यदेव विशिष्योपयुज्यते तदपि

तद्व्रतम् । यथा प्रकृतं पयोव्रतम् । यत्र यन्नोपयुज्यते तदपि तद्व्रतम् । यथा चातुर्मास्ये पयोव्रतम् । ननु कथं सम्पूर्णपूरुषमिति? पूर्ण एव पुरुषो भवति । 'स पूर्णत्वात् पुमान् नाम' इति च बाह्वृचभाष्यम् । सत्यम् । अथापि निर्वचनान्तरं भवति । सर्वान्तरः सर्वपालकः पुरुषः । 'पुरः कुषन्' इति हि वैयाकरणाः । पृणातीति पुरुषः । पॄ पालनपूरणयोः । अथापि—'पुरुषः पुरिषादः पुरिशयः' इति हि नैरुक्ताः । 'पुरि वसतीति पुरुष इति नैरुक्ताः' इति च श्वेतवनवासी । अदितिकाश्यपौ तौ । काश्यप इत्येव मारीचस्य प्रतनं नाम पुराणेषु पठितम् । न कश्यप इति । नहि स कश्यं पिबति । किन्तु शब्दप्रकाश्यमौपनिषदं ब्रह्म पाति । 'काश्यप उक्तो मुनिमृगयोर्भेदे' इति, 'काश्यपः स्यान्मुनौ' इति चाभिधानम् । 'कश्यप'इति तु पाश्चात्यम् ॥

नाथस्य भूरिकरुणासुधयाऽभिषिक्तौ
श्रीश्रीधरप्रततिशारशरीरयष्टी ।
भूरिव्रतप्रभवदिव्यसुकान्तिमन्तौ
तौ देहशुद्धिमतिमात्रमथाऽलभेताम् ॥ २२ ॥

(प.दी.) नाथस्येति । नाथस्य स्वामिनः स्वयं समाराधितस्य हरेः **भूरिकरुणासुधयाऽभिषिक्तौ ।** बहळकृपामृतवर्षविषयाविति भावः । **श्रीश्रीधरप्रततिशारशरीरयष्टी,** श्रियश्च श्रीधरस्य च प्रतत्या व्याप्त्या विशेषसन्निधानेन शारे मिश्रे शरीरयष्टी ययोस्तौ तथोक्तौ । **भूरिव्रतप्रभवदिव्यसुकान्तिमन्तौ** भूरिव्रतप्रभवा दिव्या देवतानुग्रहसम्बन्धिनी सुकान्तिः तयोरस्तीति तथोक्तौ । **तौ** जायापती **अथ** अनन्तरं **देहशुद्धिं अतिमात्रमालभेतां** प्राप्तौ ॥ २२ ॥

(त.चं.) श्रीश्रीधरयोः प्रतत्या प्रकृष्टसन्निधानेन । तावेव हि वस्तुतः पवमानस्य मातापितरौ । शारा कृतावरणा, कृतरक्षेति यावत्, शरीरयष्टिर्ययोः । 'शॄ वायुवर्णनिवृतेषु' इति वार्तिकम् । निवृतं निहितावरणम् । व्रतकार्श्यं शरीरस्य यष्टिपदेनाऽह ॥ २२ ॥

कान्तादृतौ समुचितेऽथ बभार गर्भं
सा भूसुरेन्द्रदुहिता जगतां हिताय ।
अच्छाम्बरेव रजनी परिपूरिताशा
भाविन्यपास्ततमसं विधुमाद्यपक्षात् ॥ २३ ॥

(भा.प्र.) समुचित इति । ऋतू रजोदर्शनात् पञ्चमादिः, शरदादिश्च । अम्बरं वसनम्, गगनं च । आद्यस्य विष्णोः पक्षपातात्, पूर्वपक्षाच्च ॥

(प.दी.) कान्तात् । अथ भगवत्सेवया देहशुद्ध्यनन्तरम् । **अच्छाम्बरा** निर्मलवसना **सा भूसुरेन्द्रदुहिता** द्विजसुता **जगतां हिताय आद्यपक्षात्** आद्ये सर्वस्याऽदिभूते हरौ पक्षः पक्षपातो यस्य स आद्यपक्षः, तद्भक्त इति यावत्, तस्मात् **कान्तात्** पत्युः **समुचिते** गर्भाधानयोग्ये **ऋतौ**, ऋतुदर्शनानन्तरमिति भावः, **अपास्ततमसं** निरस्ताज्ञानं **गर्भं बभार** । कथम्भूता? **परिपूरिताशा** परिपूर्णकामा **भाविनी** भवित्री । **अच्छाम्बरा** निर्मलाकाशा **परिपूरिताशा** चन्द्रिकया सम्पूर्णदिग् **भाविनी** क्रमेण भविष्यन्ती **रजनी** रात्रिः **समुचिते** चन्द्रविकासस्य समुचिते **ऋतौ** शरदृतौ **आद्यपक्षाद्** आद्यः मासादिभूतश्चासौ पक्षश्चेत्याद्यपक्षः शुक्लपक्ष इति भावः, तस्मात् **अपास्ततमसं** निरस्तान्धकारं **विधुमिव** चन्द्रमिव ॥ २३ ॥

(त.चं.) आद्यस्य विष्णोः पक्ष एव यस्य भवति पक्षः स आद्यपक्षः । वैष्णव इत्येतत् । आद्य एव पक्षः सहायो यस्य वा । आद्यस्य पक्षः पक्षीयो वा । पक्ष परिग्रहे ॥ २३ ॥

तं पूर्वपक्षसितबिम्बमिव प्रवृद्धं
यावद् द्विजेन्द्रवनिता सुषुवेऽत्र तावत् ।
अंशेन वायुरवतीर्य स रूप्यपीठे
विष्णुं प्रणम्य भवनं प्रययौ तदीयम् ॥ २४ ॥

(प.दी.) **तम्** । **द्विजेन्द्रवनिता** भट्टारकस्य भार्या **पूर्वपक्षसितबिम्बमिव** पूर्वपक्षे चन्द्रमण्डलमिव **प्रवृद्धं तं गर्भं यावत्** यदा अत्र **सुषुवे तावत्** तदा **स वायुः** भुव्यवताराय भगवदादिष्टो वायुः **अंशेन अवतीर्य** भुवमागत्य **रूप्यपीठे** रूप्यपीठपुरे, तत्र वसन्तमिति शेषः, **विष्णुं प्रणम्य तदीयं** मध्यगेहभट्टस्य विद्यमानं **भवनं** गृहं **प्रययौ** ॥ २४ ॥

(त.चं.) अंशेन वायुरवतीर्य । अंशेन स्वलोकगः । सांशा हि देवाः ॥

सम्पूर्णलक्षणचणं नवराजमान-
द्वारान्तरं परमसुन्दरमन्दिरं तत् ।
राजेव सत्पुरवरं भुवनाधिराजो
निष्कासयन् परमसौ भगवान् विवेश ॥ २५ ॥

(भा.प्र.) लक्षणचणं लक्षणैः प्रसिद्धम् । 'तेन वित्तश्चुञ्चुप्चणपौ' इति । नवशब्दः एकोनदशके भद्रे च । परमस्य सुन्दरमन्दिरम् । परमाणि सुन्दर-मन्दिराणि नगरे । परं शत्रुं च ॥

(प.दी) **सम्पूर्णे**ति । **भुवनाधिराजः** सकलभुवनानामधिपतिः **भगवान्** षड्-गुणसम्पन्नः **असौ** वायुः **सम्पूर्णलक्षणचणं** सम्पूर्णैः द्वात्रिंशल्लक्षणैः प्र-सिद्धम् । 'तेन वित्तश्चुञ्चुप्चणपौ', तेन प्रसिद्ध इत्यस्मिन्नर्थे चुञ्चुप्चणपौ प्रत्ययौ भवत इति प्रसिद्धार्थे चणप्प्रत्ययः । **नवराजमानद्वारान्तरं** नवसङ्ख्या-विशिष्टराजमानद्वारविशेषम् । **परमसुन्दरमन्दिरं** परमस्य हरेः सुन्दर-मन्दिरभूतं **तत्** तदानीं विप्रपत्न्युदरसम्भूतं **सत् पुरवरं** निर्दोषं शरीरश्रेष्ठं **विवेश** । किं कुर्वन्? **परम्** अन्यं प्रसूतिपर्यन्तं गर्भे स्थितं जीवं **निष्कासयन्** देहान्निर्यापयन् । स्वयं गर्भवासरहितः सन् गर्भवासदुःखं जन्मदुःखं चानु-भूय तावता चरितार्थं जीवं तस्माद् देहान्निष्काळ्य तं देहं सहसा विवेशेति भावः । कः किमिव? **परं** शत्रुं विजित्य तं नगरात् **निष्कासयन् राजा**

सम्पूर्णैः नगरलक्षणैः चणं[१] लेपनधवळीकरणादिना शोभमानद्वारविशेषं अतिसुन्दरमन्दिरविशिष्टं सत्पुरवरमिव ॥ २५ ॥

(त.चं.) सम्पूर्णलक्षणचणम् । 'तेन वित्तश्चुञ्चुप्चणपौ'[५.२.२६] । तद्यथा विद्यया वित्तो विद्याचुञ्चुः,विद्याचणः । सम्पूर्णशरीरलक्षणैः वित्तं प्रसिद्धं सम्पूर्णलक्षणचणम् । लक्षणैः चणं प्रसिद्धमिति न विग्रहीतव्यम् । नहि चणपदं पठ्यते । प्रत्ययो हि सः । नवराजमानद्वारान्तरम् । 'नवद्वारे पुरे देही' इति भगवद्वचनम् । नेत्रे श्रोत्रे नासापुटे मुखं पायुरुपस्थश्च नव द्वाराणि । अथच पुरमेकादशद्वारमपि भवति । नाभ्या च सहस्रारद्वारेण शिरसा च सहेति ॥ २५ ॥

सन्तुष्यतां सकलसन्निकरैरसद्भिः
खिद्येत वायुरयमाविरभूत् पृथिव्याम् ।
आख्यानितीव सुरदुन्दुभिमन्द्रनादः
प्राश्रावि कौतुकवशैरिह मानुषैश्च ॥ २६ ॥

(प.दी.) **सन्तुष्यताम्** । इह भुवि **मानुषैश्च सुरदुन्दुभिमन्द्रनादः** सुरदुन्दुभीनां गम्भीरध्वनिः **कौतुकवशैः** सम्भ्रमपरवशैः **प्राश्रावि** विश्रुतः । कथम्भूतः? इति **आख्यानिव** वदन्निव । **सकलसन्निकरैः** सर्वसत्समूहैः **सन्तुष्यतां** सन्तोष्टव्यम् । **असद्भिः** दुर्जनैः **खिद्येत** खेदः प्राप्यताम् । कुतः? **अयं वायुः पृथिव्यां आविरभूत्** यस्मात् तस्मादिति । अयं भावः– तदवतारसमयमौत्पत्तिकं सुरदुन्दुभिमन्द्रनादं श्रुत्वा सतां सन्तोषोऽभूदसतां मनसि खेद इति वस्तुगतिः । तत्र सद्भिः सन्तुष्यतामसद्भिः खिद्येतेत्याख्यानिवेत्युत्प्रेक्ष्यते ॥ २६ ॥

(त.चं.) प्राश्रावि प्रकटमश्रावि ॥ २६ ॥

१.सम्पातायातम् । वित्तं प्रसिद्धमिति वा वक्तव्यम् ।

नाथं निषेव्य भवनानतिदूरमाप्तः
प्राज्ञो महप्रकृतदुन्दभिनादपूर्वात् ।
पुत्रोद्भवश्रवणतो महदाप्य सौख्यं
ज्ञानं परोक्षपदमप्यमतेष्टहेतुम् ॥ २७ ॥

(भा.प्र.) विवाहाय गच्छतां केषाञ्चिद्दुन्दुभिनादपूर्वात्। एवमपरश्च तदनन्तरमेव दुन्दुभिनादोऽश्रावीति भावः ॥

(प.दी.) नाथमिति । **नाथं** स्वकुलदैवं रजतपीठपुराधिवासं स्वामिनं **निषेव्य भवनानतिदूरं** स्वमन्दिरसमीपं **आप्तः** प्राप्तः **प्राज्ञः** स द्विजेन्द्रः **महप्रकृतदुन्दुभिनादपूर्वात्** कैश्चनोत्सवाय उपक्रान्तदुन्दुभिनादश्रवणपूर्वकात् **पुत्रोद्भवश्रवणतः** स्वस्य पुत्रजन्मश्रवणात् **महत् सौख्यमाप्य परोक्षपदं** परोक्षार्थविषयम् **अपि ज्ञानमिष्टहेतुं** सुखहेतुम् **अमत** ज्ञातवान् । अपरोक्षज्ञानमेव सुखसाधनमिति नायं नियमः, किन्तु परोक्षज्ञानमपि सुखसाधनार्थं भवत्येवेत्यनुभवसिद्धत्वादिति निश्चितवानिति भावः। तथाचोक्तं भगवत्पादैः– 'अपरोक्षं परोक्षं वा ज्ञानमिष्टस्य साधनम्' इति [अनु.१.१.५४] ॥२७ ॥

(त.चं.) महप्रकृतदुन्दुभिनादपूर्वात् । कस्यचिद् विवाहमहे प्रकृतो यो मानुषदुन्दुभिनादः तच्छ्रवणपूर्वकात्, ततश्च महे पवनजननोत्सवे प्रकृतो यः सुरदुन्दुभिनादः तच्छ्रवणपूर्वकात् पुत्रोद्भवश्रवणतः । तथाहि भावप्रकाशिकायाम् ॥ २७ ॥

आविश्य वेश्म निजनन्दनमिन्दुवक्त्रं
भूयोऽभिनन्द्य स मुकुन्ददयां प्रवन्द्य ।
जातस्य तस्य गुणजातवहस्य जात-
कर्मादिकर्मनिवहं विदधे सुकर्मा ॥ २८ ॥

(प.दी.) आविश्य। **सुकर्मा,** शोभनानि कर्माणि यस्य स सुकर्मा, **सः**

वेश्म आविश्य इन्दुवक्त्रं सद्योजातमपि इन्दुवक्त्रं इन्दुवदनं निजनन्दनं **भूयः** अतितराम् **अभिनन्द्य मुकुन्ददयां** कृपां **प्रवन्द्य** नमस्कृत्य स्तुत्वा वा, 'वदि अभिवादनस्तुत्योः' इति धातुः । **जातस्य गुणजातवहस्य तस्य** स्वनन्दनस्य **जातकर्मादिकर्मनिवहं** कर्मसमूहं **विदधे** ॥ २८ ॥

(त.चं.) मुकुन्ददयां प्रवन्द्य अभिष्टूय । जातकर्मादिकर्मनिवहम् । आदिना चोपनिष्क्रमणं नामकरणं अन्नप्राशनं चौलं च । 'गर्भाधानं पुंसवनं सीमन्तोन्नयनं तथा । अथ विष्णुबलिश्चैव जातकर्म ततः परम् । उपनिष्क्रमणं नामकरणं च ततः परम् । अन्नप्राशनचौले च तथोपनयनं महत् । महाव्रतानि चत्वारि विवाहो विहृतिर्वसोः । षोडशैताः क्रियाः' इति च योगदीपिकायाम् । चौलं चूडाकर्म । महाव्रतं उपनिषद्व्रतं महानाम्नीव्रतं गोदानं चेति चत्वारि महाव्रतानि । वसुविहृतिरग्निहोत्रवरणम् ॥ २८ ॥

ज्ञानार्थमेव यदभूदसुदेव एष
यद् वासुदेवपदभक्तिरतः सदाऽसौ ।
तद् वासुदेवपदमन्ववदन् सुरेन्द्रा-
स्तातेन यन्निगदितं सुतनामकर्त्रा ॥ २९ ॥

(भा.प्र.) वा ज्ञानम् । 'वा गतिगन्धनयोः' । 'आतो मनिन्क्वनिब्वनिपश्च' इति न्यायात् । 'तस्येदम्' इत्यणि वासुदेवभक्तोऽपि वासुदेवः । आत एव वृद्धित्वात् ॥

(प.दी.) **ज्ञानार्थम्** । **सुतनामकर्त्रा** सुतस्य नाम कुर्वता **तातेन** पित्रा **निगदितम्** उक्तं **यद् वासुदेवपदं** वासुदेव इति पदं नाम **तत् सुरेन्द्राः अन्ववदन्** । अस्य वासुदेवनाम अन्वर्थकत्वात् साध्वित्यन्ववदन्निति भावः । तस्य अन्वर्थकत्वमेव आह– **ज्ञानार्थमि**त्यादिना पूर्वार्धेन । **एषः असुदेवः** प्राणदेवः **ज्ञानार्थमेवाभूत् यत्** तस्मात् वासुदेवः । वासुदेव इत्यत्र 'वा' इत्येतत् पदं विच्प्रत्ययान्तं ज्ञानवाचकम् । 'वा गतिगन्धनयोः' इति धातोः

गतिवाचकत्वात् । गत्यर्थानां च धातूनां ज्ञानार्थवाचकत्वात् । एवं च सति वार्थं जातः असुदेवः वासुदेव इति मध्यमपदलोपीसमास इति भावः । **असौ सदा वासुदेवपदभक्तिरतः** इति **यत्** यस्मात् तस्मात् वासुदेवः । अस्मिंश्च पक्षे वासुदेवशब्दात् तस्येदमित्यस्मिन्नर्थे अणप्रत्ययः । वासुदेवसम्बन्धित्वाद् वासुदेव इत्यर्थः । वासुदेवसम्बन्धित्वं च तद्भक्तत्वमेव । एवमर्थद्वयपर-तयाऽन्वर्थकमस्य वासुदेवनामेति भावः ॥ २९ ॥

(त.चं.) तत्र नामकरणं विशिष्याऽह– **ज्ञानार्थमेव** । अत्र भावप्रका-शिका– 'आतो मनिन्कनिब्वनिपश्च' [३.२.७४] इति न्यायात् । अयमर्थः– यद्यप्यनेन सूत्रेण नात्र रूपसिद्धिः । सुप्युपपदे केवलं छन्दसि खल्वेतत् । अत आह– न्यायादिति । अनेनैव न्यायेनान्येषामपि भवतीत्युत्तरसूत्राद् रूपसिद्धिः । तथाह्युत्तरसूत्रम्–'अन्येभ्योऽपि दृश्यन्ते' [३.३.१३०] । 'अपिशब्दः सर्वोपाधिव्यभिचारार्थः' इति जयादित्यः । तेनाच्छन्दस्यपि भवति । निरुपपदादपि भवति । नन्वत्र न मनिन् । न क्वनिप् । नापि वनिप् । मा भूत् । विच् खल्वपि भवति । विजपि खलु सौत्रेण चकारेण समुच्चितः । 'चकाराद् विज् भवति' इति हि जयादित्यः । वातीति वाः । तद् यथा– विश्वपाः । गोपाः । एवं वासुदेवस्यायं भक्तो वासुदेवः । 'तस्येदम्' [४.३.१२०] इत्यणप्रत्यये सत्यात एव वृद्धित्वात् न पुनर्वृद्धिः प्रसज्यते ॥ २९ ॥

पातुं पयांसि शिशवे किल गोप्रदोऽस्मै
पूर्वालयः स्वसुतसूनुतया प्रजातः ।
निर्वाणहेतुमलभिष्ट परात्मविद्यां
दानं ध्रुवं फलति पात्रगुणानुकूल्यात् ॥ ३० ॥

(भा.प्र.) पूर्वालयस्य 'मूडिल्लाय' इत्यपभ्रष्टभाषा ॥

(प.दी.) पातुम् । पयांसि पातुमस्मै शिशवे गोप्रदः पूर्वालयः स्वसुतसूनुतया

जन्मान्तरे स्वपुत्रस्य सूनुत्वेन **प्रजातः** सन् श्रीमध्वाचार्यात् **निर्वाणहेतुं** मोक्षहेतुं **परात्मविद्यां** परमात्मतत्वज्ञानम् **अलभिष्ट** लेभे **किल** । एतदुपपन्नमेव– **दानं पात्रगुणानुकूल्यात्** प्रतिग्रहीतृगुणानुसारेण **फलति, ध्रुवं** एतन्निश्चितम् । अत्र गोप्रदाने अस्य शिशोरुत्तमपात्रत्वात् गोप्रदः पूर्वालयः क्षिप्रं स्वसुतसूनुत्वेन प्रजातः श्रीमध्वशिष्यो भूत्वा परमात्मतत्वं ज्ञात्वा क्रमेण मुक्तोऽभूदिति भावः ।। ३० ।।

(त.चं.) ग्राममध्ये यस्य गृहं स मध्यगेहः 'नडिल्लाय'[ನಡಿಲ್ಲಾಯ] इति, यस्य पूर्वभागे स पूर्वालयः'मूडिल्लाय'[ಮೂಡಿಲ್ಲಾಯ] इति, दक्षिणभागे दक्षिणालयः 'तेङ्किल्लाय'[ತೆಂಕಿಲ್ಲಾಯ] इति, पश्चिमभागे पश्चिमालयः 'पडिल्लाय'[ಪಡಿಲ್ಲಾಯ] इति उत्तरभागे तूत्तरालयः 'बडकिल्लाय'[ಬಡಕಿಲ್ಲಾಯ] इति दिग्विभागेनान्वर्थानि तौळवनामानि भवन्ति । एवं द्रुमाद्युपलक्षणेनापि भवन्ति नामधेयानि । तद्यथा यस्य गृहे सहकारद्रुः स चूतालयः 'कुक्किल्लाय' [ಕುಕ್ಕಿಲ್ಲಾಯ] इति, यस्य सरः स पद्माकरालयः 'केदिल्लाय' [ಕೆದಿಲ್ಲಾಯ] इति, यस्य लिकुचः स लिकुचान्वयः 'पेजत्ताय'[ಪೆಜತ್ತಾಯ] इत्यादि । ननु कथमलभिष्ट? अनिडयं पठ्यते धातुः 'डु लभष् प्राप्तौ' इति । सत्यम् । नियोगपर्यनुयोगानर्हा महान्तः क्वचिदनिटं वेटमिच्छन्ति यत्र श्रवणसुभगता । इष्टं लाभमलब्धेति चमत्करोतीव कविः । दानं ध्रुवं फलतीत्याद्यर्थान्तरन्यासः । 'अप्रस्तुतविशेषार्थान्तरन्यसनपूर्वकम् । सामान्यप्रस्तुतस्यार्थान्तरन्यासः समर्थनम्' इति मन्दारमरन्दे कृष्णावधूतः ।। ३० ।।

अत्रस्तमेव सततं परिफुल्लचक्षुः
कान्त्या विडम्बितनवेन्दु जगत्यनर्घम् ।
तत् पुत्ररत्नमुपगृह्य कदाचिदाप्तः
स्वस्वामिने बुध उपायनमार्पयत् सः ।। ३१ ।।

(भा.प्र.) अत्रस्तं अभयम्, अदुष्टं च । 'मणिदोषस्त्रासः' इति च ।।

(प.दी.) **अत्रस्तम्** । **बुधः** ज्ञानी **सः सततं अत्रस्तं** भयरहितं **एव परिफुल्लचक्षुः** विकसितनयनं **कान्त्या** प्रतिदिनं वर्धमानया स्वरूपकान्त्या [1] **विळम्बितनवेन्दु** अनुकृतपूर्वपक्षोदितचन्द्रं **जगति अनर्घम्**, असदृशमिति भावः, एवम्भूतं **तत् पुत्ररत्नं** पुत्राख्यरत्नम् **उपगृह्य** आदाय **कदाचिदाप्तः** रजतपीठवासं स्वनाथं प्राप्तः तस्मै **स्वस्वामिने तत् पुत्ररत्नमुपायनम् आर्पयत्** समर्पयामास । यथा कश्चिद् **अत्रस्तं** त्रासरहितम्, त्रास इति मणिदोषः । 'त्रासश्च मणिदोषः स्यात्' इत्यभिधानम् । **परिफुल्लचक्षुः** मलापनयादिना संस्कारेण परिफुल्ललोचनं जगति मूल्यरहितं कान्त्या विळम्बितचन्द्रं रत्नं **स्वस्वामिने उपायनं** समर्पयेत् तद्वदिति श्लेषाभिप्रायः ॥ ३१ ॥

(त.चं.) 'त्रासो भये मणेर्दोषे' इत्यभिधानम् । येन मणिं दधत् त्रस्यत्युद्विजते । पुत्ररत्नमपि अत्रस्तमेव । एवकारस्त्रासेऽन्वेति । यस्य शिशोरपि सतः भयमेव नास्ति अतिमहत्यपि सति भयहेतौ । चक्षुस्तेजसि च । तेन परिफुल्लचक्षुरिति भास्वरं रत्नम् । सूत्रयोजनरन्ध्रं वा चक्षुः । उपायनं प्राभृतम् । 'उड्डुगरे'[ಉಡುಗರೆ]' इति भाषायाम् ॥ ३१ ॥

नत्वा हरिं रजतपीठपुरालयं तं
बालस्य सम्पदमनापदमर्थयित्वा ।
साकं सुतेन परिवारजनान्वितोऽसौ
प्रायान्निशीथसमये निजमेव धाम ॥ ३२ ॥

(प.दी.) **नत्वा** । **असौ** द्विजेन्द्रः **रजतपीठपुरालयं तं** नाथं **हरिं नत्वा बालस्य** स्वशिशोः **अनापदं** आपत्सम्बन्धरहितां **सम्पदं** श्रेयः **अर्थयित्वा** प्रार्थयित्वा [2] **सुतेन साकं परिवारजनान्वितः** सन् **निशीथसमये** अर्धरात्रे काल **एव निजं धाम** गृहं **प्रायात्** ॥ ३२ ॥

१.प्राचीनलिपिकाराः प्रायेण डकारस्थाने ळकारमेव लिखन्ति । नायुक्तमेतत् । अज्मध्यस्थत्वात् । अथापि 'तेषां विडम्बनायैव' इत्याद्याचार्यपादप्रयोगात् 'विडम्बितनवेन्दु' इत्येव मूलपाठोऽत्राऽऽदृतः ।

२.'प्रार्थ्य' इति पर्याप्तम् ।

(त.चं.) प्रायः सम्पद् विपदं सूते । अत आह– अनापदं सम्पदम् ॥३२॥

दोषेयुषां सममनेन वनेऽतिभीमे
तत्क्रीडितग्रह इहैकतमं तुतोद ।
उद्भ्रान्तरक्तमवलोक्य तमभ्यधायि
केनाप्यहो न शिशुतुत् कथमेष इत्थम् ॥ ३३ ॥

(प.दी.) दोषा । **अनेन** बालेन **समं दोषा** रात्रौ । दोषा इत्यव्ययं रात्रि-वाचकम् । **अतिभीमे वने ईयुषां** गच्छतां सतां **तत्क्रीडितग्रहः** तस्मिन् वने क्रीडां कर्तुं कृतोपक्रमः । क्रीडितेति 'आदिकर्मणि क्तः कर्तरि च' इति क्तप्रत्ययः कर्तरि । ग्रहः कश्चिद् भूतविशेषः । **इह** एषां मध्ये **एकतमं तुतोद** बबाधे । **केनापि** तत्र केनचित् पुरुषेण **उद्भ्रान्तरक्तं तं** ग्रहपीडितं पुरुष-मवलोक्य **इत्थमभ्यधायि** उक्तम् । कथम्? **एष** ग्रहः **कथं शिशुतुत्** शिशु-बाधको **न** अभूत् । **अहो** एतदाश्चर्यम् ॥ ३३ ॥

(त.चं.) 'दोषा रात्रिमुखे रात्रौ' इति च । केनाप्यभ्यधायि । किमिति? अहो न शिशुतुत् कथमेष इत्थमिति । बलिनमपि पुरुषं तुदन्नयं ग्रह इत्थमुद्भ्रमनादिना कथं न शिशुं तुतोद । अहो शिशोर्भागधेयमिति ॥ ३३ ॥

आविश्य पूरुषमुवाच महाग्रहोऽसा-
वस्मद्विहारसमयोपगतान् समस्तान् ।
यच्छक्तिगुप्तिरहितानलमस्मि हन्तुं
लोकेश्वरः स बत बालतमः किलेति ॥ ३४ ॥

(प.दी.) आविश्य । **असौ महाग्रहः पूरुषम्** उद्भ्रान्तरक्तं तमेव पुरुषम् **आविश्य** इत्युवाच । **अस्मद्विहारसमयोपगतान्** अस्मत्क्रीडासमये अस्मत्समीपं गतान् **समस्तान् यच्छक्तिगुप्तिरहितान्** यस्य श्रीमुख्यवायोः शक्त्या सामर्थ्येन गुप्त्या रक्षया रहितान् **हन्तुमलं** समर्थः अस्मि । 'अलं

भूषणपर्याप्तिशक्तिवारणवाचकम्' इत्यमरः । **स लोकेश्वरो** वायुः **बालतमः किल** । **बत** विस्मये । अहो एनं लोकेशमयं बालतम इत्याहेति ॥ ३४ ॥

(त.चं.) अयं बालतमः लोकेश्वरः किल । किलेत्यनुनये । अयं लोकेश्वरः बालतमः किल । यदाहायम्— 'न शिशुतुत् कथम्' इति । अहो भवतामज्ञतेति किलेति विस्मयेऽरुचौ च । 'किलशब्दस्तु वार्तायां सम्भाव्यानुनयार्थयोः' इति । 'वार्तायामरुचौ किल' इति च ॥ ३४ ॥

स्तन्येन बालमनुतोष्य मुहुः स्वधाम्नो
माता कदाचन ययौ विरहासहाऽपि ।
विश्वस्य विश्वपरिपालकपालनाय
कन्यां निजामनुगुणां किल भीरुरेषा ॥ ३५ ॥

(प.दी.) **स्तन्येन** । **भीरुः** भयशीला **एषा माता कदाचन** बालं **स्तन्येन** स्तनक्षीरेण **मुहुरनुतोष्य** स्तन्यपानेन सन्तोषयित्वा[1] **विरहासहाऽपि स्वधाम्नः** स्वमन्दिरादन्यत्र **ययौ** । **किल** ऐतिह्ये । किं कृत्वा? **विश्वपरिपालकपालनाय** विश्वपरिपालकस्य रक्षणार्थमनुगुणां वशवर्तिनीं **निजां कन्यां विश्वस्य** इयमिमं बालकं रक्षितुं समर्थेति विश्वस्य, बालं पालयेत्युक्त्वा, कार्यविशेषवशात् स्वमन्दिरादन्यत्र जगामेति भावः ॥ ३५ ॥

(त.चं.) ग्रहेण ज्ञातलोकेश्वरताऽपि पुत्रस्यान्यतोऽपायाद् भीरुः ॥

सा बालकं प्ररुदितं परिसान्त्वयन्ती
मुग्धाक्षरेण वचसाऽनुनिनाय मुग्धा ।
मा तात तात सुमुखेति पुनः प्ररोदी-
र्माता तनोति रुचितं त्वरितं तवेति ॥ ३६ ॥

(भा.प्र.) प्ररुदितं प्ररोदनम् । 'आदिकर्मणि क्तः कर्तरि च' इति ॥

---

१. 'सन्तोष्य' इति पर्याप्तम् ।

(प.दी.) सा । **मुग्धा सा** कन्या **प्ररुदितं** प्रकर्षेण रुदन्तं **बालकं परिसान्त्वयन्ती** बहुभिरुपायैः सामवचनैश्च रोदं शमयन्ती **मुग्धाक्षरेण** अव्यक्ताक्षरेण **वचसा अनुनिनाय** अनुनिन्ये । कथम्? **तात तात सुमुख,** इति एवं **पुनः मा प्ररोदीः, माता त्वरितं** क्षिप्रं **तव रुचितं** स्तन्यदानं कदळीफलदानं च **तनोति** करोति । तस्मात् मा प्ररोदीः **इति** ॥ ३६ ॥

(त.चं.) प्ररुदितं प्रकृतरोदनम् । आदिभूते क्रियाक्षणे भूतत्वेन विवक्षिते यः क्तो विहितः स कर्तरि च भवतीति स्मरन्ति– 'आदिकर्मणि क्तः कर्तरि च' [३.४.७१] । इति एवम्, यथेदानीं रोदिषि तथा पुनरपि मा प्ररोदीः । प्रकर्षेणोच्चकैः । हस्तपादं ताडन्ताडम् ॥ ३६ ॥

रोदे क्रियासमभिहारत एव वृत्ते
पोतस्य मातरि चिरादपि नाऽगतायाम् ।
जग्राह बालमथ चैक्षत मातृमार्गं
साऽपि क्रियासमभिहारत एव बाला ॥ ३७ ॥

(भा.प्र.) पौनःपुन्यं भृशार्थो वा क्रियासमभिहारः ॥

(प.दी.) रोदे । **पोतस्य** बालस्य **रोदे क्रियासमभिहारत एव** पुनःपुनरतितरां **वृत्ते** सति, **मातरि अपि** जनन्यां च **चिरात् नाऽगतायां** सत्याम्, **सा बाला** कन्या **अपि बालं** रुदन्तं इतस्ततो लुठन्तं **जग्राह** । **अथ च** एतदन्तरे च **मातृमार्गं** मातुरागमनमार्गं **क्रियासमभिहारत** एव पुनःपुनः **ऐक्षत** ॥ ३७ ॥

(त.चं.) बाला । अत एव किङ्कर्तव्यतामूढा मातृमार्गमैक्षत निरैक्षत च ॥

कर्तव्यमौढ्यमभिपद्य निरूप्य सा तं
प्राभोजयत् खलु कुलस्थकुलं प्रपक्वम् ।
शीतं पयोऽपि सततं परिपाययन्ती
यस्योष्णरोगमतिवेलमशङ्कताम्बा ॥ ३८ ॥

(प.दी.) **कर्तव्येति** । **सा** कन्या **कर्तव्यमौढ्यं** कर्तव्यविषये मूढत्वमज्ञत्वम् **अभिपद्य** प्राप्य तथाऽपि क्रमेण **निरूप्य** किमत्र कुर्यामिति विचार्य **तं** बालं **प्रपक्वं** सम्यक् पक्वं **कुलस्थकुलं** कुलस्थाख्यधान्यसमूहं **प्राभोजयत्** खलु । खल्विति वाक्यालङ्कारे । 'निषेधवाक्यालङ्कारजिज्ञासानुनये खलु' इत्यमरः । **अम्बा** बालस्य जननी **यस्य** स्वबालस्य **अतिवेलम्** अतितराम् **उष्णरोगमशङ्कत** शङ्कितवती, अत एव **पयोऽपि** क्षीरमपि **सततं शीतं** शीतळं **परिपाययन्ती** । माता यस्योष्णरोगशङ्कया क्षीरमपि शीतळं पाययति तस्मै शिशवे अत्युष्णं कुलस्थं भक्षयितुमदादिति भावः ॥ ३८ ॥

(त.चं.) कुलस्थकुलम् । कौ भूमौ लग्नं तिष्ठतीति कुलस्थम् । कुलत्थ-मिति कोशकाराः । कुलित्थमिति प्रचलितपाठस्तु प्रमाद एव । 'हुरुळि' [ಹುರುಳಿ] इति भाषायाम् । शीतं पयः पाययन्त्यप्युष्णरोगमशङ्कतेति च शङ्काया अतिवेलतां विशदयति ॥ ३८ ॥

नूनं पिपासुरतिरोदिति हन्त बालो
धिङ्मां दयाविरहितां परकृत्यसक्ताम् ।
इत्याकुला गृहमुपेत्य तदा प्रसन्नं
पूर्णोदरं सुतमवैक्षत विप्रपत्नी ॥ ३९ ॥

(प.दी.) **नूनम्** । **तदा विप्रपत्नी** ब्राह्मणजाया **इत्याकुला** सम्भ्रान्ता सती **गृहमुपेत्य प्रसन्नं पूर्णोदरं सुतमवैक्षत** ददर्श । कथमाकुला? **बालः पिपासुः** स्तन्यं पातुमिच्छन् **अतिरोदिति** अतितरां **रोदिति नूनं हन्त** । हन्तेत्येतत् अनुकम्पायां विषादे वा । **दयाविरहितां परकृत्यसक्तां मां धिक्** इत्याकुला सती गृहमुपेत्येत्यन्वयः ॥ ३९ ॥

(त.चं.) नूनं निश्चयेन ॥ ३९ ॥

पृष्ट्वाऽवगम्य सकलं च ततः प्रवृत्तं
यूनां च दुस्सहमिदं शिशुनोपभुक्तम् ।

इत्थं विचिन्त्य तनयां बहु भत्सयन्त्या
भीतं तयोत कुपितं मनसाऽनुतप्तम् ॥ ४० ॥

(प.दी.) पृष्ट्वा । **ततः** स्वमन्दिरगमनानन्तरं **पृष्ट्वा,** किमित्ययं बालः पूर्णोदरो वर्तते किं त्वया दत्तमिति पृष्ट्वा, तद्वचनात् **प्रवृत्तं सकलं च अवगम्य** कुलस्थभक्षणेनोदरपूर्तिं ज्ञात्वा, **शिशुना उपभुक्तं** भक्षितं **इदं यूनां च दुस्सहं** जरयितुमशक्यम्, **इत्थम्** एवं **विचिन्त्य तनयां बहु** अतितरां **भत्सयन्त्या तया** मात्रा **भीतं** तनयस्य क्षेमापायभयं प्राप्तम् । **कुपितमुत** । तनयां प्रति कोपः कृतः । **मनसाऽनुतप्तं** मदुपेक्षया खल्वेवमभूदिति पश्चात्तापश्च कृतः ॥ ४० ॥

(त.चं.) प्राचीनकोशेषु बहुशः 'भत्स'इत्येव पठ्यते। अत्रापि 'भत्सयन्त्या' इत्येव वेदाङ्गतीर्थीये । ग्रन्थान्तरेष्वपि । किं 'भत्स' इत्येव प्रतनो धातुपाठः,'भर्त्स' इत्यर्वाचीनो लिपिकृतां प्रमादेनाऽगतः पाठः? विमृश्यमेतत् । महान् हि धातुपाठे प्रमादो वैयाकरणानाम्[१] । उत कुपितम्, कुपितं च । उत मनसाऽनुतप्तम्, मनसाऽनुतप्तं च । 'उतापी द्वौ च बाढार्थौ' इति च । बाढार्थौ समुच्चिनुतः,निश्चिनुतश्च समुच्चयमिति ॥ ४० ॥

आरोग्यशालिनि पुरेव तदाऽपि पुत्रे
विस्मेरतामुपजगाम जनन्यमुष्य ।
यस्य त्रिलोकजननी जननी विषेऽपि
पीते न विस्मयमवाप समस्तशक्तेः ॥ ४१ ॥

(भा.प्र.) विषे पीते–

'वायुरस्मा उपामन्थत् पिनष्टि स्मा कुनन्नमा ।
' केशी विषस्य पात्रेण यद् रुद्रेणापिबत् सह ' इति श्रुतिः[२] ॥

---

१. विवृतमेतदुपरि [६.१९] तत्वचन्द्रिकायाम् । विस्तरस्तु तत एवावगन्तव्यः ।
२. क्वचित्– 'यद् रुद्रेणेति श्रुतिः' इतीयदेव पठ्यते ।

(प.दी.) आरोग्येति । **पुत्रे तदाऽपि** कुलस्थकुले भक्षितेऽपि **पुरेव** कुलस्थकुलभक्षणात् प्रागिव **आरोग्यशालिनि** शरीरारोग्यचतुरे सति **अमुष्य जननी विस्मेरतां** विस्मययुक्तताम् **उपजगाम** । अस्य महिमानमविदित्वा विस्मयं जगाम । बालस्य तु नैतद्विचित्रमिति भावः । तथाहि– **त्रिलोकजननी** त्रैलोक्यस्य माता सती **समस्तशक्तेः यस्य** श्रीमुख्यवायोः **जननी** श्रीः **विषे** अमृतमथने काळकूटविषे वायुना **पीतेऽपि विस्मयं नावाप** । प्राग् वायुना विषे पीतेऽपि अस्य माता श्रीः विस्मयं नावाप । एवं विषं पीतवतस्तस्य कुलस्थकुलभक्षणेन किमनिष्टं भवेत्? एतदविदित्वा माता विस्मेरतामापेति भावः ॥ ४१ ॥

(त.चं.) विस्मेरतां विस्मयनशीलताम् । 'नमि-कम्पि-स्मि-अजस-कम-हिंस-दीपो रः'[३.२.१६७] । तद् यथा– नम्रम् । कम्प्रम् । स्मेरम् । अजस्रम् । कम्रम् । हिंस्रम् । दीप्रम् । विषेऽपि पीते । तथाह्यृग्वेदे–

> **वायुरस्मा उपामन्थत् पिनष्टि स्मा कुनन्नमा ।**
> **केशी विषस्य पात्रेण यद् रुद्रेणापिबत् सह** ॥ [१०.१३६.७]

अयमर्थः– केशी भास्वरकिरणः । केश इति किरणनाम । क इति विष्णुनाम । स एवेशत्वेनास्यास्तीति वा । वायुरस्मै रुद्राय समुद्रमथनजं विषं हस्तेनोपामन्थत् । निर्मथ्य च पुनः पिनष्टि स्म । शुष्कपेषं निष्पिपेष च । कुत्सितान् पुनःपुनर्नमयतीति कुनन्नमा । ततः पात्रेण पात्रा, विषपानेन जगदरक्षदिति ख्यातिं गमिष्यता रुद्रेण सह विषस्य विषमपिबदिति ॥

> **स्तन्यं मुहुः किल ददौ जननी गृहीत्वा**
> **क्षेमाय तं किल दधज्जनको जजाप ।**
> **अन्यो जनोऽपि किल लाळयति स्म किन्तु**
> **सर्वोऽपि तन्मुखसुहासरसायनोत्कः** ॥ ४२ ॥

(भा.प्र.) किल अपरमार्थे ॥

(प.दी.) स्तन्यम् । **जननी गृहीत्वा मुहुः स्तन्यं ददौ किल** । **जनकः तं दधत्** दधानः **क्षेमाय** क्षेमार्थं **जजाप** । धान्वन्तरादिमन्त्रान् शान्तिसूक्तानि च जप्तवान् **किल** । अन्यो जनोऽपि लाळयति **स्म** अलाळयत् । स्मातीते । मात्रादीनां स्तन्यपानादिकं सर्वमपरमार्थत इति वक्तुं वाक्यत्रयेऽपि किलशब्दः । तर्हि कुत्र तात्पर्यमिति पृच्छति–**किन्त्विति** । उत्तरमाह–**सर्वोऽपीत्यादिना** । **सर्वोऽपि जनः तन्मुखसुहासरसायनोत्कः** तस्य बालस्य मुखे यः सुहासः सुन्दरमन्दस्मितम्, सुहास एव रसायनं सर्वजनाह्लादकरत्वात्, तस्मिन् उत्कः उत्कण्ठावान् । मात्रादिकः सर्वोऽपि जनः तन्मुखसुहासरसायनोत्कत्वादेव स्तन्यदानादिकं चकारेति[१] भावः ॥ ४२ ॥

(त.चं.) उद्गतं मनोऽस्येत्युत्कः । उत्कण्ठित इत्यर्थः । 'उत्क उन्मनाः' [५.२.८०] इति हि पाणिनिर्निपातयति ॥ ४२ ॥

देवादिसद्भिरनुपालितयाऽऽदरेण
देव्याऽऽत्मनेव विलसत्पदया नितान्तम् ।
अव्यक्तया प्रथमतो वदनेऽस्य वाण्या
शालीनयेव भुवनार्चितया विजह्रे ॥ ४३ ॥

(भा.प्र.) पदं पादविन्यासो वाक्यावयवश्च । शालीनयेव अधृष्टयेव ॥

(प.दी.) देवादीति । **अस्य** बालस्य **वदने देवादिसद्भिरादरेण अनुपालितया** कदा वाऽयं वदिष्यतीति प्रतीक्षितया, **विलसत्पदया,** विलसन्ति पदानि यस्याः सा विलसत्पदा तया, **प्रथमतः** आदौ **अव्यक्तया** अत एव **शालीनयेव** अधृष्टयेव **भुवनार्चितया** भुवनमान्यया **वाण्या देव्या** वाग्देव्या **नितान्तं विजह्रे** । कथम्भूतया वाण्या देव्या? **आत्मना** स्वमूर्तिमत्या **इव** । सरस्वती स्वयं देवादिसद्भिरनुपालिता ब्रह्मसदसि क्रीडार्थं कदा आगमिष्यतीति

१. 'स्तन्यपानादिकं च करोतीति' इति क्वचित् पाठो नातिस्वरसः ।

प्रतीक्षिता सती विलसत्पदविन्यासा प्रथमतोऽव्यक्ता यवनिकाच्छन्ना लज्जया अधृष्टा सती ब्रह्मसदसि तत्पुरतः यथा विहारं कुर्यात् तद्वदिति भावः ॥

(त.चं.) शालीनयेव अप्रगल्भया लज्जमानयेव । गृहान्तःशालामेवार्हति न पुनर्बहिः सञ्चारमिति शालीना । तेनाप्रगल्भार्थे शालीनशब्दो निपात्यते– 'शालीनकौपीने अधृष्टाकार्ययोः'[५.२.२०] इति । कौपीनं पापम् ॥

प्राग् रिङ्गणं स्वयमथ स्थितिमेष चक्रे
पश्चाद् गतिं परिचयेन किल क्रमेण ।
विश्वस्य चेष्टितमहो यदनुग्रहेण
सर्वं तदस्य पवनस्य विडम्बनं हि ॥ ४४ ॥

(प.दी.) **प्रागिति** । **एषः प्राग्** आदौ **रिङ्गणं** जानुभ्यां हस्ताभ्यां च गमनं **चक्रे** । **अथ** अनन्तरं **स्वयं स्थितिं** मातृहस्तस्तम्भभित्त्याद्यालम्बनं विना स्थितिं **चक्रे** । **पश्चाद् गतिं** गमनं **क्रमेण परिचयेन** गोष्ठं गन्तुमयं मार्गः, कूपं गन्तुमयम्, तटाकं गन्तुमयमित्यादिना परिचयपूर्वकं चक्र इति भावः । **किल** इत्येतदपरमार्थे । कुतः? **विश्वस्य** सर्वस्य **चेष्टितं** स्पन्दनादि-चेष्टा **यदनुग्रहेण** यस्य वायोरनुग्रहेण वर्तते, **अस्य पवनस्य तत् सर्वं** रिङ्ग-णादिकं **विडम्बनं** मूढजनानुकरणमेव **हि** । अहो एतदाश्चर्यम् ॥ ४४ ॥

(त.चं.) रिङ्गणं रिङ्गणम् । केचिद् रिखिं न पठन्ति । केवलं रिगिं पठन्ति । 'द्रमिडानां रिखिरपि' इति क्षीरस्वामी । रिङ्गणं स्खलनमित्येके । पतन-मित्यपरे । हस्तपादगमनमित्यन्ये । अन्धाः करिणं विवृणते । आहोस्विदियं गजनिमीलिका । वस्तुतस्तु सस्खलनं सपतनं हस्तपादगमनं रिङ्गणमिति । अभ्यासपरिचयेन क्रमेण चक्रे किल । लोकविडम्बनमेवैतत् । न वस्तुतः ॥

पुच्छान्तमच्छमवलम्ब्य कदाचिदेष
प्रातर्व्रजाद् व्रजत एव निजर्षभस्य ।

प्रायात् प्रियस्य सहसा स्वजनैरदृष्टो
नानावनेषु चरतश्चरतस्तृणानि ॥ ४५ ॥

(भा.प्र.) चरतश्चरतः । 'चर गतिभक्षणयोः' ॥

(प.दी.) पुच्छान्तम् । एष बालः **कदाचित् प्रातः** [एव] **व्रजात्** गोष्ठात्, 'गोष्ठाध्वनिवहा व्रजाः' इति नानार्थवर्गे, **व्रजतः** निर्गच्छतः **प्रियस्य** आत्मनः प्रियस्य **नानावनेषु** विविधारण्येषु **चरतः** अटतः **तृणानि चरतः** भक्षयतः, 'चर गतिभक्षणयोः' इति धातुः, **निजर्षभस्य** स्वकीयानडुहः **अच्छं** निर्मलं **पुच्छान्तं** बालाग्रं **अवलम्ब्य** गृहीत्वा **सहसा** अतर्कितम्, 'अतर्किते तु सहसा' इत्यमरः, **प्रायात्** वनं ययौ । कथम्भूतः? **स्वजनैः** स्वपित्रादिभिः **अदृष्टः** ॥ ४५ ॥

(त.चं.) व्रजात् । 'गोचर-सञ्चर-वह-व्रज-व्यज-आपण-निगमाश्च' [३.३.११९] करणाधिकरणयोरेते शब्दा निपात्यन्ते । व्रजन्ति गावोऽत्रेति व्रजः । 'व्रजो गोष्ठाध्ववृन्देषु' इत्यभिधानम् । निजर्षभस्य । ननु सर्वमपि तस्य निजम् । अत एव विशिष्यते– प्रियस्य । व्रजाद् व्रजत्सु गोष्वयं विशिष्य प्रिय इति । अहो भाग्यं तस्यर्षभस्य ॥ ४५ ॥

उत्तुङ्गशृङ्गलसितस्य महिष्ठमूर्तेः
पादावृतावनितळस्य सुरन्ध्रकस्य ।
आश्रित्य तस्य शुशुभेऽवयवैकदेशं
बालो दिवाकर इवोदयपर्वतस्य ॥ ४६ ॥

(भा.प्र.) शृङ्गं विषाणं शिखरं च । पादाश्च प्रत्यन्तपर्वताश्च ॥

(प.दी.) उत्तुङ्गेति । बालः **उत्तुङ्गशृङ्गलसितस्य** उन्नतविषाणविराजितस्य **महिष्ठमूर्तेः** अतिबृहत्कायस्य **पादावृतावनितळस्य** चरणैर्यथासम्भव-माच्छादितभूतळस्य **सुरन्ध्रकस्य** शोभननवद्वारकस्य **तस्य** अनडुहः **अवय-**

वैकदेशं पुच्छाख्यावयवस्यैकदेशमग्रम् **आश्रित्य शुशुभे** रेजे । क इव? **बालो दिवाकरः** बालसूर्यः उन्नतशिखरविराजितस्य बहुयोजनविस्तीर्णस्य पादैः प्रत्यन्तपर्वतैः आवृतभूतळस्य, 'पादाः प्रत्यन्तपर्वताः' इत्यमरः, **सुरन्ध्रकस्य** शोभनगुहायुक्तस्य **उदयपर्वतस्य अवयवैकदेशं आश्रित्येव** ॥

(त.चं.) सुरन्ध्रकस्य सुकुहरघोणस्य ॥ ४६ ॥

लीलां करोति नु गृहान्तरगो नु बालः
कूपान्तरे नु पतितः प्रकृतिस्वतन्त्रः ।
इत्थं विचिन्त्य स मुहुः स्वजनो विमृग्य
हन्तानवेक्ष्य तनयं हृदि तापमाप ॥ ४७ ॥

(प.दी.) लीलाम् । **सः** पित्रादिः **स्वजनः** बालस्य स्वजनः **इत्थं विचिन्त्य** विचार्य **मुहुः विमृग्य** अन्विष्य **अनवेक्ष्य** अदृष्ट्वा **हृदि** मनसि **तापं** खेदम् **आप** । कथं विचिन्त्य? **प्रकृतिस्वतन्त्रः** स्वभावत एव स्वेच्छाधीनवृत्तिः **बालः लीलां करोति नु** क्रीडते वा? नु वितर्के वर्तते । 'नु पृच्छायां वितर्के च' इत्यमरः । **गृहान्तरगो नु**? मन्दिरान्तरगो नु । **कूपान्तरे** कूपान्तः **पतितो नु**? **हन्त**, 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः' इत्यमरः ॥ ४७ ॥

(त.चं.) हन्त हर्षे च । बाललीलाविडम्बनं स्मारंस्मारं हन्तेति हृष्यति कविः स्वयम् ॥ ४७ ॥

बालस्य बालपरिलम्बनगोचरं तद्
व्यश्वस्यतापि वचनं वनगोचरोक्तम् ।
यत् सायमैक्षत जनः शिशुमाव्रजन्त-
मेकाब्दकं वृषभबालकृतावलम्बम् ॥ ४८ ॥

(प.दी.) **बालस्येति** । **बालस्य** शिशोः **बालपरिलम्बनगोचरं** बालपरिलम्बनविषयं 'वृषभबालमवलम्ब्य वनं गच्छन् बालः प्रातर्मया दृष्टः'

इति **वनगोचरोक्तम्,** केनचिद् वनगोचरेण वनचारिणोक्तं **वचनमपि** वक्ष्यमाणकारणात् **व्यश्वस्यत** विश्वस्तम् । कुतः? **जनः** पित्रादिः **सायं** सायङ्काले **एकाब्दकं वृषभबालकृतावलम्बं** वृषभबालेन कृताश्रयं **आव्रजन्तं शिशुं** बालं **ऐक्षत यत्** । वृषभबालं गृहीत्वा वनाद् गृहं प्रत्याव्रजन्तं बालं सायङ्काले दृष्ट्वा पश्चाद् वनगोचरोक्ते वचने विश्वासोऽभूदिति भावः ॥

(त.चं.) बालपरिलम्बनगोचरम् । बालः पुच्छम् । 'बालो ना कुन्तलेऽश्वस्य गजस्यापि च बालधौ' इति । अश्वस्य गजस्यापीत्यशिष्यम् । वृषभस्यापि बालधौ । गाव इन्द्रियाणि चरन्त्यत्रेति गोचरो विषयः । व्यश्वस्यतापि एकाब्दबालविषये वस्तुतोऽविश्वसनीयमपि व्यश्वस्यत ॥ ४८ ॥

चिन्तामणीन्द्रमिव चिन्तितदं दरिद्रो
विज्ञानमार्गमिव विष्णुपरं मुमुक्षुः ।
नष्टं च नन्दनमिति स्वजनोऽस्य लब्ध्वा
नाथस्य तस्य तमनुग्रहमेव मेने ॥ ४९ ॥

(प.दी.) चिन्तामणीति । **दरिद्रः** निर्धनः **चिन्तितदं** प्रार्थिताखिलप्रदं **चिन्तामणीन्द्रमिव** चिन्तामणिनामकं मणिश्रेष्ठमिव, **मुमुक्षुः** संसारान्मोक्षमिच्छन् पुमान् **विष्णुपरम्,** विष्णुः परः उत्कृष्टः यस्मिन् विज्ञानमार्गे तम्, **विज्ञानमार्गमिव** विशिष्टतत्वज्ञानाख्यं मार्गमिव, **अस्य स्वजनः** बालस्य पित्रादिः **इति च** एवमन्विष्यापि **नष्टं** अदृष्टम्, 'नश अदर्शने' इति धातोः । नचात्र नाशो विवक्षितः । तथात्वे पुनर्लाभायोगात् । **चिन्तितदं विष्णुपरं** विष्णुनिष्ठं **नन्दनं लब्ध्वा** तं पुत्रदर्शनाख्यलाभं **तस्य नाथस्य** रूप्यपीठपुरवासिनो हरेः **अनुग्रहमेव मेने** । पुत्रदर्शनं नाम तस्यानुग्रहमेव मेन इति भावः ॥ ४९ ॥

(त.चं.) चिन्ताविषयश्चिन्तितलाभाय चिन्तनीयो मणीन्द्रः, चिन्तामणिनामा मणीन्द्रो वा चिन्तामणीन्द्रः ॥ ४९ ॥

लीलावसानसमये सहसा कदाचि-
दार्योऽमुनाऽभ्यवहृतिं प्रति चोद्यमानः ।
रोद्धैष नोऽस्ति धनिको वृषविक्रयीति
प्रोवाच नन्दनमुखेन्दुमवेक्ष्य मन्दम् ॥ ५० ॥

(प.दी.) लीलेति । **कदाचित् लीलावसानसमये** क्रीडावसानकाले **सहसा** अतर्कितमागत्य **अमुना** बालेन **अभ्यवहृतिं प्रति चोद्यमानः** भोक्तुं प्रेर्यमाणः **आर्यः** पिता **नन्दनमुखेन्दुमवेक्ष्य मन्दं** शनैः **इति प्रोवाच** । शनैरित्यनेन लाळनमवगम्यते । क्रुद्धश्चेदुच्चैर्ब्रूयात् । कथं प्रोवाच? **नः** अस्माकं **वृषविक्रयी** निष्कं पश्चाद् देहीत्युक्त्वा मूल्यार्थं वृषदः **एष धनिकः रोद्धा** निष्कमदत्वा न भोक्तव्यमिति स्वयं चानशनमुपविष्टो भोजनविघ्नकारी **अस्ति** वर्तते । तस्मान्नाहमिदानीं भोक्ष्ये, त्वमेव भुङ्क्ष्वेत्यर्थः ॥ ५० ॥

(त.चं.) वृषविक्रयी धनिकः । 'कक्रसेट्टि' [ಕಕ್ಕ, ಸೆಟ್ಟಿ] इति तस्य नामेति सम्प्रदायविदो वदन्ति । तद्वंशीया अधुनाऽपि पाजकपरिसरे निवसन्ति । विक्रयी वित्तार्थं पदार्थानां विक्रेता ॥ ५० ॥

लीलाकरेण स करेण सुकोमलेन
बीजान्तराणि किल कानिचिदाशु तस्मै ।
स्मित्वाऽर्भकोऽभिमतनिष्कपदे यदाऽदा-
दादत्त तानि धनिको बहुमानपूर्वम् ॥ ५१ ॥

(भा.प्र.) बीजान्तराणि तिन्त्रिणीबीजाख्यानि ॥

(प.दी.) लीलाकरेण । **सः अर्भकः लीलाकरेण,** लीलानामाकर आश्रयः, तेन **सुकोमलेन करेण आशु, अभिमतनिष्कपदे,** अभिमतं सङ्ख्याविषये उभयसम्मतं यन्निष्कं तत्पदे तत्स्थाने, **कानिचित् बीजान्तराणि** बीजविशेषान् । तत्रापि तिन्त्रिणीबीजानीत्यैतिह्यम् । **स्मित्वा** ईषद् हसनं कृत्वा

तस्मै धनिकाय **यदा अदात्** तदा **धनिकः तानि बहुमानपूर्वम्,** क्रियाविशेषणम्, **आदत्त किल** स्वीचकार किल । मम द्रव्यमागतमित्युक्त्वा जगाम च ॥

(त.चं.) बीजान्तराणि । 'हुणसेबीज' [ಹುಣಸೆಬೀಜ] इति भाषायाम् ॥

लब्धं सुतादिति वदन् द्विजपुङ्गवेन
कालान्तरे निजधने प्रतिदित्सितेऽपि ।
साक्षादमानवनवाकृतितः स लेभे
बीजच्छलेन पुरुषार्थमहो विशिष्टम् ॥ ५२ ॥

(प.दी.) लब्धम् । **द्विजपुङ्गवेन** तेन भट्टेन **कालान्तरे** अन्यस्मिन् काले **निजधने प्रतिदित्सितेऽपि** प्रतिदातुमिष्टेऽपि तव **सुतात्** धनं **लब्धमिति वदन् स** धनिकः **अमानवनवाकृतितः,** अमानवो देवः श्रीमुख्यवायुः, तस्य नवाकृतिः अवतारस्वरूपं ततः **बीजच्छलेन** बीजमिति च्छलं तेन **साक्षात्** मुख्यतः **विशिष्टं पुरुषार्थं** मोक्षाख्यं ज्ञानद्वारा **लेभे । अहो** आश्चर्यमस्य चरित्रमिति ॥ ५२ ॥

(त.चं.) बीजच्छलेन बीजव्याजेन । 'छलं छद्मस्खलितयोः' इति च ॥

वासुदेवमिह वाऽसुदेवतासत्कलामभिननन्द तं जनः ।
वासुदेवमिति वासुदेवसन्नामकं विविधलीलमर्भकम् ॥ ५३ ॥

(भा.प्र.) वासुदेवं वासुदेवं वा वसुदेवसुतं हरिमिव ॥

(प.दी.) वासुदेवमिति । **जनः इह** भुवि असुदेवताया मुख्यप्राणदेवस्य **सत्कलां** सदंशभूतम्, इति उक्तप्रकारेण **विविधलीलम्, वासुदेवसन्नामकम्,** वासुदेव इति सन्नाम यस्य तं **अर्भकम्, वासुदेवं** वसुदेवपुत्रं **वासुदेवं वा** कृष्णमिव, 'वा विकल्पोपमानयोः' इत्यमरः, **अभिननन्द** दृष्ट्वा श्रुत्वा च सन्तुतोष ॥ ५३ ॥

(त.चं.) सर्वत्र वसतीति वासुः । वसन् दीव्यति क्रीडतीति देवः । वसुदेवपुत्र इति च । सत्कलां ज्ञानप्रधानकलाम् । बलं हि प्रधानं पूर्वावतारयोः । सन्नामकमन्वर्थनामकम् । ज्ञानार्थमवतीर्णोऽसुदेव इति हि निरवाचि । रथोद्धता । शचीदेवतस्त्रिष्टुब्भेदः । रथस्येवोद्धता गतिरस्या इति । 'रथोद्धता रनरला गो यतिर्न पदान्तरे' इति तल्लक्षणम् ॥ ५३ ॥

इति विहरति मह्यां विष्णुदासेऽपि गूढे
समजनि सुजनानां चित्तमानन्दपूर्णम् ।
उदयति घनमालालीनभानौ च भानौ
ननु जननयनाब्जैर्लभ्यतेऽलं विकासः ॥ ५४ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते द्वितीयः सर्गः

—०—

(भा.प्र.) समजनि। 'दीपजनबुधपूरितायिप्यायिभ्योऽन्यतरस्याम्' इति कर्तरि चिण्॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां द्वितीयः सर्गः ॥

—०—

(प.दी.) इति । [विष्णुदासे] विष्णोः दासे वायौ **मह्यां** भुवि **गूढेऽपि** मानुषजात्यनुकरणेन गूढसामर्थ्येऽपि **इति विहरति** सति **सुजनानां चित्तं आनन्दपूर्णं समजनि** जातम् । तथाहि– **घनमालालीनभानौ,** घनानां मेघानां माला पङ्क्तिः, तया लीना भानवः रश्मयः यस्य तस्मिन् , **भानौ** सूर्ये **उदयति** सति [**जननयनाब्जैः**] जनानां नयनैः अब्जैश्च **अलं विकासः** उन्मीलनं **लभ्यते ननु** ॥ ५४ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां द्वितीयः सर्गः

—०—

(त.चं.) समजनि। 'दीप-जन-बुध-पूरि-तायि-प्यायिभ्योऽन्यतरस्याम्' [३.१.६१] इति कर्तरि चिणिति भावप्रकाशिका। एतेभ्यो धातुभ्योऽन्यतरस्यां चिणादेशो भवति। तथाच रूपद्वयम्– अदीपि, अदीपिष्ट। अजनि, अजनिष्ट। अबोधि, अबुद्ध। अपूरि, अपूरिष्ट। अतायि, अतायिष्ट। अप्यायि, अप्यायिष्ट। ननु कथमुदयति? ई गताविति धातोरिति गृहाण। तथाहि प्रयोगः– 'उदयति दिननाथो याति शीतांशुरस्तम्' इति, 'उदयति विततोर्ध्वरश्मिरज्जौ' इति माघे। भातीति भानुः। अंशुरपि भाति। अंशुमानपि भाति। 'भानुरंशौ रवौ' इति च। नयनाब्जैः। नयनैश्च कमलैश्च वा। नयनकमलैर्वा। मालिनी। पञ्चदशाक्षरोऽतिशक्करीप्रभेदः। तेन सर्वदेवस्त्रिय एव देवताः। 'मालिनी स्यान्नन्मयया शिवमूर्तिस्वरैर्यतिः' इति च लक्षणम्। नन्मयया इति ननमयया इत्यर्थः॥ ५४॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे।
सर्गं द्वितीयं व्याचख्यौ सुधियां धीविशुद्धये॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां
तत्वचन्द्रिकायां द्वितीयः सर्गः

—०—

[आदितः श्लोकाः– ५५+५४=१०९]

तृतीयः सर्गः

[मातापितृभ्यां सह त्रिवर्षस्य वासुदेवस्य बन्धुगृहगमनम्। ततस्तस्यैकाकितया निर्गमनम्। 'कोडवूरु' देवालयम्, 'ताळेकुडे' देवालयं च गत्वा ततो रजतपीठपुरं प्रति गमनम्। तमन्विष्यता पित्राऽनन्तासनमन्दिरे तस्य दर्शनम्। पित्रा पुत्रस्याक्षरपरिचायनम्। नेयम्पळ्ळीग्रामे शिवमडिनायाह्वयस्य पुराणवाचने वासुदेवेन दोषोद्घाटनपूर्वकं पुराणस्य वास्तवार्थकथनम्। पितरि पुराणं कथयति वासुदेवेन वाचनम्। तदनुदितस्य लिकुचशब्दार्थस्य कथनम्। वासुदेवस्योपनयनम्। लोकगुरोर्वटुभावलीला। सर्पमयस्यासुरस्य पदाङ्गुल्या निष्पिष्य मारणम्। 'तोटन्तिल्लाय' गृहेऽध्ययनम्। क्रीडासु सहपाठिनः पराभाव्य भीमबलप्रदर्शनम्। गुरोः पुरतोऽनधीतस्यापि वेदभागस्य समामननम्। गुरुपुत्रस्य शिरोवेदनोपशमनम्। गुरोरैतरेयोपनिषदर्थविवरणव्याजेन गुरुदक्षिणादानम्।]

अथ कदाचन सुन्दरनन्दन-
स्मितमुखेन्दुदृशां दयितौ नृणाम् ।
महमतो निजबन्धुमुदे मुदा
प्रययतुः स्वजनैः सह दम्पती ॥ १ ॥

(भा.प्र.) बन्धुगृहस्य 'नडुवैरि' इत्यपभ्रष्टभाषा ॥

(प.दी.) पुनर्लीलाविशेषान् वक्तुमारभते– **अथे**ति । **अथ कदाचन [सुन्दरनन्दनस्मितमुखेन्दुदृशाम्]**, सुन्दरः नन्दनः बालकः, तस्य स्मितं मन्दहाससहितं यन्मुखं तदेवेन्दुः तं पश्यन्तीति तथोक्तास्तेषां **नृणां दयितौ** प्रियौ **दम्पती** जायापती **स्वजनैः सह [निजबन्धुमुदे]** निजा आत्मीया ये बन्धवस्तेषां मुदे तोषाय, **[महम्]** मह उत्सवस्तमुद्दिश्य **अतः** स्वमन्दिरात् **मुदा प्रययतुः** ॥ १ ॥

(त.चं.) बन्धुगृहस्य 'नडुवैरि' [ನಡುವೈರಿ] इत्यपभ्रष्टभाषेति भावप्रकाशिका । सम्प्रति तु 'निडियूरु' [ನಿಡಿಯೂರು] इति व्यपदिशन्ति । दम्पती इति । 'जायापती । जम्पती । दम्पती' इति राजदन्तादिषु पठन्ति वैयाकरणाः । तेषां पक्षे जायाशब्दस्य जम्भावो दम्भावश्च निपात्यते । दमिति जमिति च जायावाचकं पदमेवेत्यन्ये । 'दं कळत्रे नपुंसकम्' इत्यमरमाला । 'पत्न्यां जं दमलिङ्गत्वे' इत्यलिङ्गतामाह नामप्रपञ्चः । सर्गेऽस्मिन्नाचतुःपञ्चाशं पद्यं द्रुतविळम्बितं छन्दः । लक्षणं तूक्तम् ॥ १ ॥

स्वजनतापगमागमसङ्गम-
प्रतिसभाजितपूर्वकसम्भ्रमे ।
अविदुषी जननीति स बालकः
शरणतो रणतो निरगान्नृभिः ॥ २ ॥

(प.दी.) स्वजनतेति । नृभिः रणतः ध्वनिं कुर्वतः, जनसम्भाषणादिध्वनियुक्तात् **शरणतः** गृहात् **स बालकः, [स्वजनतापगमागमसङ्गमप्रतिसभाजितपूर्वकसम्भ्रमे]** स्वजनता स्वबन्धुसमूहः, तस्या अपगमः उत्सवमन्दिरान्निर्गमः, आगमः प्रवेशः, सङ्गमः सम्मेळनम्, प्रतिसभाजितं परस्परसत्कारः तानि पूर्वाणि यस्य स चासौ सम्भ्रमश्च तस्मिन् **जननी** माता **अविदुषी** मामजानती अथवा मन्निर्गमनमजानती **इति** मत्वा **निरगात्** ॥ २ ॥

(त.चं.) 'सभाज प्रीतिदर्शने' । प्रीत्या दर्शने । 'सभाज प्रीतिसेवनयोः' इत्यन्ये । 'प्रीतिदर्शनयोः' इत्येके । यत् श्रयन्ति यत्र श्रीणन्ति तच्छरणम् । गृहं शरणम् । रक्षणं शरणम् । रक्षिता च शरणम् । 'रण शब्दक्रियायाम्' । नृभी रणतः कलकलवतः । बालकस्त्रिवर्षः । तथाहि स्वयमेवाऽह प्रमेयनवमालिकायाम्– 'अगमद् यस्त्रिवर्षोऽमरौकः' इति ॥ २ ॥

क्व नु यियाससि तात न साम्प्रतं
स्वजनसन्त्यजनं तव साम्प्रतम् ।
इति विभुः पथिकैरुदितो व्रजन्
स्मितमनाकुलमुत्तरमातनोत् ॥ ३ ॥

(प.दी.) क्व नु । तात वत्स **क्व नु यियाससि** यातुमिच्छसि? **साम्प्रतं** इदानीं 'एतर्हि सम्प्रतीदानीमधुना साम्प्रतं तथा' इत्यमरः । **तव स्वजनसन्त्यजनं** बन्धुजनपरित्यागः **साम्प्रतं** युक्तं **न** । 'युक्ते द्वे साम्प्रतं स्थाने' इत्यमरः । साम्प्रतं स्थाने इति द्वे अव्यये युक्तमित्यर्थे वर्तेते इत्यभि-

धानार्थः । **इति पथिकैः** पान्थैः **उदितः व्रजन् विभुः** समर्थः बालः **अनाकुलं** सम्भ्रमरहितं **स्मितं** मन्दहासं **उत्तरमातनोत्** अकरोत् । पथिकवचनं श्रुत्वा मन्दहासं चकारेति भावः ॥ ३ ॥

(त.चं.) विभुः विलक्षणो भवत्ययमितरशिशुभ्यः। विशिष्टो भवति। विगत-भीरपि भवति। पन्थानं गच्छन्तीति पथिकाः । पथः ष्कन् [५.१.७५] । पुंस्त्वमविवक्षितम् । पथिकीभिश्च पथिकैश्च ॥ ३ ॥

> **त्वरितमेत्य स काननदेवता-**
> **सदनमत्र ननाम रमापतिम् ।**
> **अपि ततः प्रगतो लघु नाळिके-**
> **र्युपपदान्तरसद्मगतं च तम् ॥ ४ ॥**

(भा.प्र.) काननदेवतासदनस्य 'कुडुवूरु' इत्यपभ्रष्टभाषा। अन्तरं अवटम्। [१]नाळिकेर्युपपदान्तरस्य 'ताळेकुडे' इत्यपभ्रष्टभाषा॥

(प.दी.) त्वरितम्। स बालकः त्वरितं शीघ्रं यथा भवति तथा [**काननदेवता-सदनम्**] कानने अधिष्ठिता या देवता तस्याः **सदनं** मन्दिरं **एत्य** आगत्य **अत्र** सदने **रमापतिं ननाम** । अस्य काननस्य 'कुडवूरुकान' इत्यपभ्रष्ट-सञ्ज्ञा । **ततः अपि** काननदेवतासदनादपि **लघु** क्षिप्रम्, 'लघुक्षिप्रमरं द्रुतम्' इत्यमरः । **प्रगतः** यातः **नाळिकेर्युपपदान्तरसद्मगतम्**,नाळिकेर एव नाळिकेरी उपपदं यस्य तन्नाळिकेर्युपपदम् । नाळिकेर्युपपदं च तदन्तरं चेति नाळिकेर्युपपदान्तरम्। तत्र च उपपदस्य नाळिकेरीशब्दस्य 'ताळे' इत्यपभ्रष्ट-सञ्ज्ञा । अन्तरशब्दस्य च 'कुडे' इति । तथा च नाळिकेर्यन्तरशब्दस्य 'ताळेकुडे' इत्यपभ्रष्टभाषायां समुदायार्थः । 'ताळेकुडे' इति शिवळ्ळिग्रामे कस्यचिद् देशविशेषस्य सञ्ज्ञा । नाळिकेर्युपपदान्तरे यत् सद्म देवालयः तत्र गतं च तं हरिं **ननाम** ॥ ४ ॥

१.'नारिकेळ्युपपदा–' इति पाठान्तरम् ।

(त.चं.) काननदेवतासदनम् । 'कुडुवूरु'[ಕುಡುವೂರು], 'कुडवूरु'[ಕುಡವೂರು], 'कुडवूरुकान'[ಕುಡವೂರುಕಾನ] इत्यादिनामानि प्राचीनटीकासु । अद्यत्वे 'कोडवूरु'[ಕೊಡವೂರು] इति व्यपदिशन्ति । यस्य च 'पडुमुन्नूरु' [ಪಡುಮುನ್ನೂರು] इति व्यपदेशान्तरम् । यत्र च शङ्करनारायणसदनं तं प्रदेश-विभागं 'कानङ्गि'[ಕಾನಂಗಿ] इति व्यवहरन्ति । अत एव च गन्थकृत् कानन-देवतासदनमित्याह । नाळिकेर एव नाळिकेरी । पिबतः कण्ठनाळीं केलयति रमयतीति । वर्णविपर्ययः । नाळिकेळी नारिकेळीति च । यं 'ताळेकुडे' [ತಾಳೆಕುಡೆ] इति व्यवजह्रुस्तमद्य ग्रामं 'बन्नञ्जे'[ಬನ್ನಂಜೆ] इति वदन्ति । तत्रत्यं सद्म शिवमन्दिरम् । तं सद्मगतं शिवान्तर्यामिणं रमापतिं ननाम ॥

नळिननाभनिभालनसम्मदागमविकस्वरभास्वरलोचनः ।
जनमनोनयनाम्बुजभास्करो रजतपीठपुरं प्रययावसौ ॥ ५ ॥

(प.दी.) नळिनेति । **नळिननाभनिभालनसम्मदागमविकस्वर-भास्वरलोचनः**, नळिननाभस्य पद्मनाभस्य निभालनेन दर्शनेन सम्मदः सन्तोषः नळिननाभनिभालनसम्मदः । '–प्रमोदामोदसम्मदाः' इत्यमरः । तस्य आगमेन प्राप्त्या विकस्वरे विकासं प्राप्ते भास्वरे शोभमाने लोचने यस्य स तथोक्तः । **जनमनोनयनाम्बुजभास्करः**, जनानां मनसां नयना-म्बुजानां च भास्करः । जनमनोनयनानां सन्तोषकारी **असौ रजतपीठपुरं प्रययौ** ॥ ५ ॥

(त.चं.) शिवसद्मनि शिवान्तर्यामिणो नळिननाभस्य निभालनेन । 'भल आभण्डने । आभण्डनं निभालनम् । निभालयते' इति क्षीरस्वामी । 'आमण्डने' इत्यन्ये । विकसतीति विकस्वरम् । भासत इति भास्वरम् । 'स्थेशभासपिसकसो वरच्'[३.२.१७५] इति हि वैयाकरणाः । तद् यथा–स्थावरः । ईश्वरः । पेस्वरः । पिसृ गतौ, गतिशीलः । विकस्वरः ॥ ५ ॥

सुहयमेधगणातिशयालवो हरिनमस्कृतयः सुकृता इमाः ।
इति सुरैरपि भूसुरमण्डलैः समनमत् स सविस्मयमीक्षितः ॥ ६ ॥

(प.दी.) सुहयेति । **सुकृताः** अष्टाङ्गविशिष्टतया सम्यक् कृताः **इमाः हरिनमस्कृतयः** हरये कृताः नमस्काराः **सुहयमेधगणातिशयालवः** शोभनाश्वमेधगणानतिशयिष्णवः **इति सुरैः** देवैः **भूसुरमण्डलैः** द्विजसमूहैः **अपि सविस्मयं** विस्मयसहितं यथा भवति तथा **ईक्षितः** दृष्टः **स समनमत्** ॥

(त.चं.) यथाविधानं विहितोऽश्वमेधः सुहयमेधः । सभक्तिश्रद्धं कृताः सुकृताः । तथाहि महाभारते भीष्मस्तवराजे [शान्ति.४६.१२३]– 'एकोऽपि कृष्णस्य कृतः प्रणामो दशाश्वमेधावभृथेन तुल्यः । दशाश्वमेधी पुनरेति जन्म कृष्णप्रणामी न पुनर्भवाय' इति । तुल्य इति च स्थूलं वचः । वस्तुतस्तु कृष्णप्रणामी न पुनर्भवाय । चीर्णेऽपि दशाश्वमेधावभृथे न तेन तुल्यः कृष्णप्रणाम इत्येव वस्तुस्थितिः । तदेतदाह– अतिशयालव इति । आलुचि शीङः कृपेश्च ग्रहणं कर्तव्यम्[१] । समनमत् प्रथमं पूर्वसद्मगतं ततः पश्चिमसद्मगतं शिवान्तर्यामिणं रमापतिम् ॥ ६ ॥

न हि हरिं सततं न नमत्यसौ
नच न पश्यति नापि न वन्दते ।
अपि तथेति विधाय विशेषतः
स ननु साधुजनान् समशिक्षयत् ॥ ७ ॥

(प.दी.) न हि । **असौ सततं हरिं न नमति** इति **न हि** । **न पश्यति** इति **च न हि** । **हरिं न वन्दते** इति **अपि न हि** । **तथाऽपि** सदा हरिनमस्कारादिकं कुर्वन्नपि **स इति विशेषतो विधाय** नमस्कारादिकं कृत्वा **साधुजनान् समशिक्षयन्ननु,** शिक्षितवान् हि ॥ ७ ॥

---

१. विवृतमेतदुपरिष्टात् [१०.९]।

(त.चं.) न वन्दते न स्तौति ॥ ७ ॥

अनवलोक्य सुतं सुतवत्सलो मृगयते स्म महीसुरपुङ्गवः ।
मुहुरपृच्छदमुष्य गतिं नरान् पथिपथि प्रगतोऽनुपदं द्रुतम् ॥ ८ ॥

(प.दी.) अनवलोक्य । **सुतवत्सलः** पुत्रस्नेहयुक्तः **महीसुरपुङ्गवः** ब्राह्मणेन्द्रः **सुतमनवलोक्य** अदृष्ट्वा **मृगयते स्म** मार्गयामास । स्मातीते । **अमुष्य गतिं** गमनं **नरान् पथिपथि** मार्गेमार्गे **मुहुरपृच्छत्** । 'दुहियाचि–'[१] इत्यादिना द्विकर्मत्वम् । कथम्भूतः? **अनुपदं** तस्य पदमनुसृत्य **द्रुतं प्रगतः** अन्विष्य गतः । **अनुपदं** निरन्तरं पुत्रनिर्गमनानन्तरमेव प्रगत इति वा ॥ ८ ॥

(त.चं.) प्रगतः धावन्धावं गतः । प्रकृष्टं भगवन्तं मनसा गतश्च । 'अ-क-य-प्र-वि-सं-भू-म-स-ख-हा विष्णुवाचकाः' इत्येकाक्षराभिधानम् । भगवतोऽनुग्रहेण सपदि सुताननं पश्येयमिति ॥ ८ ॥

जनसदागतिसूचितवर्त्मना प्रतिपदं व्रजता परया तृषा ।
द्विजमहामधुपेन मनोहरं स्मितमलाभि सुताननवारिजम् ॥ ९ ॥

(प.दी.) **जनेति** । **प्रतिपदं** प्रतिक्षणं **जनसदागतिसूचितवर्त्मना** अभिमुखमाव्रजता जनाख्यवायुना सूचितेन मार्गेण । 'श्वसनः स्पर्शनो वायुर्मातरिश्वा सदागतिः' इत्यमरः । **परया तृषा** उत्कण्ठया **व्रजता** पुत्रमन्विष्य गच्छता **द्विजमहामधुपेन** ब्राह्मणाख्येन महाभ्रमरेण **मनोहरं स्मितं** विकसितं मार्गश्रमाभावादम्लानमिति भावः । 'मनोहरस्मितम्' इति वा पाठः । सुतानन-

---

१. 'दुहि-याचि-रुधि-प्रछि-भिक्षि-चिञामुपयोगनिमित्तमपूर्वविधौ । ब्रुवि-शासिगुणेन च यत् सचते तदकीर्तितमाचरितं कविना' इति समग्रः पाठः । कविना सूत्रकारेणाकीर्तितमाचरितं कर्मेत्युक्तमित्यर्थः । तथाहि प्रयोगः– गां पयो दोग्धि । रमणीं रतिं याचते । पान्थं पन्थानं रुणद्धि । पान्थं पन्थानं पृच्छति । दातारमन्नं भिक्षते । लतां कुसुमान्यवचिनोति । माणवकं धर्मं ब्रूते । माणवकं धर्मं शास्ति ।

वारिजम् **अलाभि** प्राप्तम् । कमलपरिमळमादायाऽव्रजन्तं वायुमभिगच्छता कमलमन्विष्यता भ्रमरेण विकसितं वारिजमिवेति श्लेषाभिप्रायः ॥ ९ ॥

(त.चं.) प्रतिपदं प्रतिपादन्यासम् । प्रतिक्षणमिति फलितम् । सुतानन-स्मितमेव महामधु ॥ ९ ॥

विरहदूनतयोद्गमनोन्मुखं
न्यरुणदश्रु पुरा स ययोर्दृशोः ।
अथ तयोः प्रमदोत्थितमप्यदः
प्रतिनिरुध्य गिरं गुरुरब्रवीत् ॥ १० ॥

(प.दी.) विरहेति । **स गुरुः** पिता **गिरं** वाचं **अब्रवीत्** । किं कृत्वा? **पुरा** सुतान्वेषणकाले **विरहदूनतया** सुतवियोगाद् दुःखितत्वेन **उद्गमनोन्मुखं** निर्यातुमुद्युक्तं **अश्रु ययोर्दृशोः न्यरुणत्** अमङ्गलशङ्कया निरुद्धवान् **अथ** पुत्रदर्शनानन्तरमपि **प्रमदोत्थितं** तद्दर्शनानन्दादुद्गतं **अदः** तद् बाष्पं [**अपि**] **तयोः** एव **दृशोः प्रतिनिरुद्ध्य** अमङ्गलभयान्निरुद्ध्य ॥ १० ॥

(त.चं.) प्रमदः प्रमोदो हर्षोत्कर्षः । मदी हर्षे ॥ १० ॥

अयि सुतेदमुदाहर तत्त्वतो
ननु समागतवानसि साम्प्रतम् ।
स्वजनतारहितस्य तु कोऽत्र ते
सहचरोऽर्भक दीर्घतमे पथि ॥ ११ ॥

(प.दी.) अयि । **अयि** इत्यव्ययं प्रश्नेऽनुनये वा वर्तते । 'प्रश्ने चानुनये त्वयि' इत्यमरः[1] । **सुत साम्प्रतं समागतवान्** इयन्तं दूरमागतवान् **असि**

१.सम्पातायातम् । 'ऊं प्रश्नेऽनुनये त्वयि' इत्यमरपाठः । प्रश्न इति पूर्वान्वयि । ऊं प्रश्ने । अनुनये त्वयि ।

ननु तदस्तु तावत् । **अर्भक** बालक **स्वजनतारहितस्य ते** तव **अत्र तु** त्वये-दानीमतीत्याऽगते **दीर्घतमे** अतिदूरे **पथि** मार्गे **सहचरः** सहायभूतः **कः?** **इदं** मया पृष्टं **तत्त्वतः** यथार्थतः **उदाहर** कथय ॥ ११ ॥

(त.चं.) दीर्घतमे योजनद्वयमिते । 'एकाकी योजनाभ्यां व्यवहितमगमद् यस्त्रिवर्षोऽमरौकः' इति हि प्रमेयनवमालिकायाम् । हस्तचतुष्टयं धनुः । धनुःसहस्रं क्रोशः । क्रोशद्वयं गव्यूतिः । गव्यूतिद्वयं योजनम् । हस्तद्वयं 'गज'[गज] इति भाषायाम् । इयमेका गणनपद्धतिः । अन्यान्या योजना भवन्ति । यथायोगं हि योजनीयं योजनं भवति । तद् यथा– 'शतयोजन-मुच्छ्रितः' इति वर्ण्यते वृक्षः । ग्रन्थकृद्विवक्षितं योजनमपीतः किञ्चिन्न्यूनं सामान्यतो गव्यूतितुल्यप्रमाणं स्यादिति भाति ॥ ११ ॥

जनकवाचमिमामवधारयन्
कळमुदाहरदम्बुरुहेक्षणः ।
स्वपदमाव्रजतो व्रजतोऽप्यतो
ननु सखा मम काननगो विभुः ॥ १२ ॥

(प.दी.) **जनकेति** । **इमां** एवमुक्तां **जनकवाचमवधारयन्** एकाग्रचित्तः शृण्वन् **अम्बुरुहेक्षणः** कमललोचनः **कळं** अव्यक्तमधुरं यथा भवति तथा **उदाहरत्** उवाच । **स्वपदं** स्वस्थानं प्रति । 'पदं व्यवसितत्राणस्थान-लक्ष्माङ्घ्रिवस्तुषु' इत्यमरः । **आव्रजतः** उत्सवमन्दिरान्निर्गत्याऽव्रजतो **मम** **अतः** काननालयात् **व्रजतोऽपि** मम **काननगः** काननामरालयस्थः **विभुः** भगवान् **सखा ननु** सहायो ननु ॥ १२ ॥

(त.चं.) अतो व्रजतः । काननदेवतासदनात् नाळिकेर्युपपदान्तरं व्रजतः । काननगो विभुः शिवान्तर्यामी रमापतिः ॥ १२ ॥

तदितरायतनात्तु यदाऽगमं
कृतरतिः खलु तत्र हरिः सखा ।

अहमिहापि महेन्द्रदिगालयं
प्रणतवानुत यावदधीश्वरम् ॥ १३ ॥

(प.दी.) तदिति । अहं **तदितरायतनात्** [तु] तस्मात् काननायतनाद् इतरस्मादायतनात्, नाळिकेर्युपपदान्तरायतनादिति यावत्, **यदाऽगमं** निरगां तदानीमारभ्य तत्र नाळिकेर्यन्तरालये **कृतरतिः** कृतविहारः **हरिः सखा खलु** । वाक्यालङ्कारे खल्विति । कियत्कालमित्यपेक्षायामाह–**इहापि** रजतपीठेऽपि **यावन्महेन्द्रदिगालयम्** । **उत** समुच्चये । महेन्द्रदिशि आलयो यस्य सः तथोक्तस्तम्, **अधीश्वरं** हरिं **यावद्** यदा **प्रणतवान्** तावत्कालं स नाळिकेर्यन्तरालयो हरिः सखेति भावः ॥ १३ ॥

(त.चं.) पूर्वदिगालयश्चन्द्रमौळिगतो हरिः । पूर्वस्यां दिशि हि चन्द्रमौळि-मन्दिरम् । पश्चिमालयोऽनन्तासनः ॥ १३ ॥

अपि ततोऽहमुपेत्य सहामुना
भगवतेऽत्र सते प्रणतिं व्यधाम् ।
इति निगद्य विभाति शिशुः स्म वि-
स्मितसभाजनचीर्णसभाजनः ॥ १४ ॥

(प.दी.) रजतपीठपुरे अमरालयद्वयं वर्तते । पूर्वालयस्थः प्रथमतो नम्यः, पश्चिमालयस्थः पश्चान्नम्य इति नियमः । तस्मात् पूर्वालयस्थमादौ नत्वा ततः पश्चिमालयस्थं नन्तुमागच्छतः कः सखेत्यपेक्षायामाह– **अपीत्या-**दिना । **अहं ततः** महेन्द्रदिगालयात् **अपि अमुना** महेन्द्रदिगालयस्थेन **सह उपेत्य अत्र** पश्चिमदिगालये **सते** वर्तमानाय **भगवते प्रणतिं व्यधाम्** । **शिशुः** बालः **इति** उक्तप्रकारेण **निगद्य विभाति स्म** अशोभत । अतीतार्थे स्मेति । कथम्भूतः? **विस्मितसभाजनचीर्णसभाजनः** । सभायां स्थितो जनो सभाजनः, विस्मितश्चासौ सभाजनश्चेति विस्मितसभाजनः । विस्मित-

सभाजनेन चीर्णं कृतं सभाजनं सम्भावनं यस्य सः विस्मितसभाजन-चीर्णसभाजनः ॥ १४ ॥

(त.चं.) अत्र सते विद्यमानाय सते निर्दोषाय भगवते । चीर्णं चरितम् । चरतेर्नक् ईकारश्चेति वैयाकरणाः । जॄधातुवत् चॄधातुरपि पुरा पठितः स्यादिति सम्भाव्यते । सभा देवायतनपुरःशाला संहतिर्वा । सह भान्त्यत्रेति ॥

विरहितस्वजनं चरणप्रियं
विविधभूतभयङ्करवर्त्मनि ।
अयि कृपालय पालय बालकं
लघुशुभस्य ममेत्यनमद् द्विजः ॥ १५ ॥

(प.दी.) विरहितेति । अयि प्रार्थने । 'अनुनये त्वयि' इत्यमरः । **कृपालय** कृपामन्दिर, **विरहितस्वजनं** सन्तमपि **विविधभूतभयङ्करवर्त्मनि** नानाविधभूतैः भयङ्करे मार्गे **चरणप्रियं** सञ्चरणप्रियं सञ्चरणशीलं **लघुशभस्य** अल्पभाग्यस्य **मम बालकं पालय** रक्ष इति अभिधाय **द्विजः** भट्टः **अनमत्** ॥

(त.चं.) स्वजनं विरहय्य एकाकितया सञ्चरणप्रियम् । रह त्यागे । लघुशुभस्य । 'लघुरगुरौ' इत्यभिधानम् ॥ १५ ॥

तमुपगृह्य सुतं सुतपोनिधि-
र्गृहमसौ गृहिणीसहितो ययौ ।
उदयतीति हि बालदिवाकरे
स्मितमभूत् सुजनाननवारिजम् ॥ १६ ॥

(प.दी.) तम् । **सुतपोनिधिः** शोभनानां तपसां निधिः **असौ तं सुतमुपगृह्य** आदाय **गृहिणीसहितः** सन् **गृहं ययौ** । **बालदिवाकरे** अस्मिन् बालात्मके सूर्ये **इति** उक्तप्रकारेण **उदयति** सति क्रमेणाभिव्यज्यमानसामर्थ्ये

सति **सुजनाननवारिजं** सुजनानामाननाख्यवारिजं **स्मितं** विकसितम् **अभूत्** हि ॥ १६ ॥

(त.चं.) 'स्मिङ् ईषद्धसने'। 'ष्मिङ्' इत्येके। स्मितं मन्दहासेनामन्दहर्षजेन विकसितमुल्लसितम् ॥ १६ ॥

वरविमानगिरावपि चण्डिका शिशुमहो जननी तमलाळयत् ।
अपरथा परितुष्टमनाः कथं चिरमिहैष वसेद् विसहायकः ॥१७॥

(प.दी) वरेति । **वरविमानगिरौ** पाजकक्षेत्रमध्ये वर्तमाने विमाननाम्नि पर्वते वर्तमाना **जननी** माता **चण्डिका** दुर्गा **अपि तं शिशुम् अलाळयत् अहो । अपरथा** तल्लाळनाभावे **विसहायकः** सहायरहितः **एष इह** भुवि **परितुष्टमनाः** परितुष्टमानसः **कथं चिरं वसेत्** ॥ १७ ॥

(त.चं.) वरविमानगिरौ। 'कुञ्जारु' [ಕುಂಜಾರು] इति भाषायाम्। चण्डिका तमोमानिनी दुर्गा । अलाळयत् । लड उपसेवायाम् । 'लड विलासे' इति भ्वादिर्वा । 'लड विकासे' इत्यन्ये ॥ १७ ॥

सकलशब्दमयी च सरस्वती
सततमानमति स्वयमेव यम् ।
द्विजवरोऽथ कदाचन मातृकाः
किल सुतं परिचाययति स्म तम् ॥ १८ ॥

(प.दी.) सकलेति । **अथ द्विजवरः कदाचन तं सुतं मातृकाः** अक्षराणि **परिचाययति स्म** ज्ञापयामास **किल** । बालस्याक्षरजिज्ञासाभावाख्या-मपरमार्थतामाह किलशब्देन। तत् कुतः? **सकलशब्दमयी** सर्वशब्दाभिमानिनी **सरस्वती च यं** एनं वायुं **स्वयमेव सततमानमति** सम्यङ् नमति । तस्मात् सरस्वतीनम्यस्य नेदानीं मातृकापरिचयेन भाव्यमिति भावः ॥ १८ ॥

(त.चं.) मान्यन्त इति मातृकाः । मान पूजायाम् । 'वाचो मा मातरः' इति प्रचीनम् । 'मातु'[ഥാതു] इति भाषायाम् । एतदेव पाश्चात्यानां 'मौत्' [mouth] बभूव ॥ १८ ॥

लिपिकुलं ननु तात गते दिने लिखितमेव पुनर्लिखितं कुतः ।
इति निजप्रतिभागुणभावितं हरिपदस्य वचस्तमनन्दयत् ॥१९॥

(प.दी.) लिपिकुलम् । **ननु** प्रश्ने । **तात** पितः, **गते दिने** पूर्वेद्युः **लिखितं लिपिकुलं** अक्षरजातं **एव पुनः** अद्यापि **कुतः** कस्मात् **लिखितम्?** **इति** एवं **निजप्रतिभागुणभावितम्,** स्वाभाविकप्रतिभागुणेन भावितमुत्पादितम्, उक्तमिति यावत्, **हरिपदस्य,** हरिवाचकं पदं यस्य स हरिपदः, हरिवाचक-वासुदेवनाम्ना वाच्यस्येति यावत्, **वचः तं** पितरम् **अनन्दयत्** ॥ १९ ॥

(त.चं.) प्रतिभा प्रत्यग्रमुन्मिषन्ती प्रज्ञा । भावितं सम्भावितं वासितमुद्गतं परिभावितं वा । 'भावितं वासिते प्राप्ते' इत्यभिधानम् । तथा च पठन्ति– 'निपाताश्चोपसर्गाश्च धातवश्च त्रयोऽप्यमी । अनेकार्थाः स्मृताः सद्भिः पाठस्तेषां निदर्शनम्' इति,'सत्तायां मङ्गले वृद्धौ निवासे व्याप्तिसम्पदोः । अभिप्राये च शक्तौ च प्रादुर्भावे गतौ च भूः' इति च । हरिपदस्य भगवद्वेदिनः । हरिं पद्यत इति, प्रपद्यत इति च ॥ १९ ॥

शिशुरसौ प्रतिभाम्बुधिरित्यलं
जनमनोवचनग्रहपीडना ।
न भवतादिति तं विजनस्थले
स्वतनयं समशिक्षयदेषकः ॥ २० ॥

(प.दी.) शिशुः । **एषकः,** एष एव एषकः, **तं स्वतनयं विजनस्थले** रहसि **समशिक्षयत्।** किमिति? **असौ शिशुः अलं प्रतिभाम्बुधिरिति जनमनोवचनग्रहपीडना** पश्यतां जनानां मनोवचनात्मकग्रहस्य पीडना **न भवतात्** मा भूद् **इति** मत्वेति शेषः ॥ २० ॥

(त.चं.) शिक्ष विद्योपादाने ॥ २० ॥

महवता स्वजनेन समीरित-
स्वजननीसहितेन कदाचन ।
रुचिरवाचनयाऽर्चितवाक्छ्रिया
प्रतियये प्रभुणा घृतवल्ल्यपि ॥ २१ ॥

(भा.प्र.) [[१]घृतवल्लीत्यस्य 'नेयम्पळ्ळि' इत्यपभ्रष्टभाषा॥]

(प.दी.) **महवता । कदाचन महवता** उत्सववता **स्वजनेन** स्वबन्धुजनेन **समीरितस्वजननीसहितेन** प्रेरितया स्वमात्रा सहितेन **रुचिरवाचनया** मनोहरया वाचनया अक्षरजयेन, सकलपुस्तकादिवाचनशक्त्येति भावः । **अर्चितवाक्छ्रिया,** अर्चिता सर्वैः सम्भाविता वाक्श्रीः वचनसम्पद् यस्य सः अर्चितवाक्छ्रीः, तेन **प्रभुणा घृतवल्ली**[२] **अपि** घृतवल्ली[२]नामको देशविशेषोऽपि **प्रतियये** प्राप्ता । 'घृतवल्ली[२]' इत्यस्य 'नैय्यम्पळ्ळी' इत्यपभ्रष्टसञ्ज्ञा ॥

(त.चं.) घृतवल्ल्यपि । तौळवभाषायां 'नेयू'[ನೆಯ್] इति घृतस्य नाम । 'पळ्ळि'[ಪಳ್ಳಿ] इति पल्ल्याः । सा घृतपल्ली यत्र घृतं विक्रीय जीवन्ति प्रायेण । तेन घृतपल्लीति स्वरसम् । न घृतवल्लीति । तथात्वे 'नेयम्बळ्ळि' [ನೆಯಂಬಳ್ಳಿ] इत्येव पुरा व्यवाहरिष्यत । तद्यथा 'वारम्बळ्ळि' [ವಾರಂಬಳ್ಳಿ], 'करम्बळ्ळि'[ಕರಂಬಳ್ಳಿ] इत्यादि । भाषायामपि सन्धौ प्रायस्तृतीयो निपात्यते । तेन पकारस्य बकारभावे 'नेयम्पळ्ळि' इति पदमेव नेयम्बळ्ळि' इति भवति । ग्रन्थकृता तु यथाश्रवणमन्ववादीति वक्तव्यम् । सम्प्रति तु सर्वव्याख्यासु 'नेयम्पळ्ळि'[ನೆಯಂಪಳ್ಳಿ] इत्येव पाठ उपलभ्यते । तदनुसारेण 'घृतपल्ल्यपि' इत्यपि मूलपाठः सम्भाव्यते ॥ २१ ॥

१.इदं प्राचीनकोशेषु न पठ्यते ।

२.क्वचित् कोशेषु 'घृतवळ्ळी' इति पठ्यते ।

परिषदा नितरां परिवारितः
शिवपदः किल धौतपटोद्भवः ।
इह कथां कथयन् ददृशे ततः
पृथुधिया पृथुकाकृतिनाऽमुना ॥ २२ ॥

(भा.प्र.) [धौतपटस्य **'मडिनाय'** इत्यपभ्रष्टभाषा[1] ॥]

(प.दी.) **परिषदा । ततः इह** घृतवल्ल्यां **कथां** पुराणकथां **कथयन् परिषदा** पुराणकथां शृण्वता परिषज्जनेन **नितरां परिवारितः** संहत्या परिवृतः **शिवपदः** शिवनामा **धौतपटोद्भवः** धौतपटसञ्ज्ञके कुले जातः । धौतपट इत्यस्य 'मडिनायि' इत्यपभ्रष्टसञ्ज्ञा । **पृथुधिया** सम्पूर्णधिया **पृथुकाकृतिना** बालरूपिणा । 'पृथुको बालकः शिशुः' इत्यमरः[2] । **अमुना** वासुदेवनाम्ना मारुतिना **ददृशे** दृष्टः **किल** ॥ २२ ॥

(त.चं.) परितः सीदन्त्यस्यामिति परिषत् सभा । धौतपटस्य 'मडिनाय' [ಮಡಿನಾಯ], 'मडिनायि' [ಮಡಿನಾಯಿ] इति द्वेधा भाषानाम पठ्यते प्राचीनटीकासु । प्रादेशिक उच्चारभेदः । पृथुकाकृतिना । प्रथत इति पृथुकः । प्रथ प्रख्याने । 'अर्भकपृथुकपाका वयसि' [३.५०] इति हि दशपादिकायाम् । 'पृथु विस्तारे' इत्यतो वा । 'पृथु व्याप्तौ' इत्येके ॥ २२ ॥

इदमुवाच विचारविचक्षणः
शुचि वचः शनकैः स जनान्तरे ।
अपरथा कथितं कथक त्वया
ननु मतान्महतामिति सस्मितम् ॥ २३ ॥

(प.दी.) इदमिति । **विचारविचक्षणः** पदार्थानां पदानां च वाच्यवाचक-

---

१. इदमपि वाक्यं क्वचिन्न पठ्यते ।

२. सम्प्रति तु 'पृथुकः शावकः शिशुः' इति पाठ उपलभ्यते ।

भावविचारविदग्धः **सः** **जनान्तरे** जनमध्ये **सस्मितं** स्मितसहितं यथा भवति तथा **शुचि** शब्दसौष्ठवोपेतं **इदं** वक्ष्यमाणं **वचः** **शनकैरित्युवाच** । कथम्? **कथक** हे पौराणिक, **त्वया** अत्र किञ्चित् **महतां** व्यासशुकादीनां **मतात्** सिद्धान्तात् **अपरथा** अन्यथा **कथितं** **ननु** । महत्सिद्धान्त-विरुद्धमिति भावः ॥ २३ ॥

(त.चं.) शुचि शुद्धम्, शब्दतोऽर्थतश्च ॥ २३ ॥

अगणयन्न शिवं जनता तदा सवचने वसुदेवसुताह्वये ।
मुखरमिच्छति को मृगधूर्तकं प्रकृतहुङ्कृतसिंहशिशौ सति ॥ २४॥

(प.दी.) **अगणयत्** । **तदा** **वसुदेवसुताह्वये** वासुदेवनामके **सवचने** वचनयुक्ते सति, एवं वदति सतीति भावः, **जनता** जनसमूहः **शिवं** शिवनामकं कथकं **नागणयत्**, न सम्भावयामास । तथाहि— **प्रकृतहुङ्कृतसिंहशिशौ सति,** प्रकृतमुपक्रान्तं हुङ्कृतं हुङ्कारो येन स तथोक्तः, गम्भीरं हुङ्कारं कर्तुमुपक्रम्य सिंहशिशौ वर्तमाने सति, **मुखरं** वाशन्तं **मृगधूर्तकं** सृगालं **कः** विवेकी **इच्छति** सम्भावयितुमिच्छति । 'स्त्रियां शिवा भूरिमायो गोमायुर्मृगधूर्तकः'[1] इत्यमरः ॥ २४ ॥

(त.चं.) जनता जनसमूहः । समूहार्थे तल् भवति ग्रामजनबन्धुगजसहायेभ्यः ॥

अथ कथं कथयेति तदा जने गदितवत्युचितार्थमुदाहरन् ।
स समलाळ्यत विस्मयिभिर्नरैरपि सुरैर्विजयाङ्कुरपूजकैः ॥ २५॥

(प.दी.) **अथ** । अथेति पक्षान्तरे । **अथ** कथकोदितवाक्यार्थो महता-मभिमतो न चेदिति यावत् । तर्हि **कथं** महदभिमतार्थः? **कथय** त्वं ब्रूहि इति **तदा** **जने** महाजने **गदितवति** सति । **उचितार्थं** कथकेनान्यार्थतयोक्तस्य वाक्यस्य उचितमर्थं **उदाहरन्** **स** वासुदेवो **विस्मयिभिर्नरैः** **विजयाङ्कुरपूजकैः** **सुरैरपि** **समलाळ्यत** ॥ २५ ॥

---

१. 'भूरिमायगोमायुमृगधूर्तकाः' इति प्रचलितः पाठः ।

(त.चं.) अथेति प्रश्ने वा । तत्ववादविजयमहाद्रुमस्यायमभिनवोद्गम इति पूजकैः । 'अङ्कूरश्चाङ्कुरः प्रोक्तः' इत्यभिधानम् । अकि लक्षणे । तत उरच-माहुः । अङ्कयत इत्यङ्कुरः । खर्जूरादित्वादूरश्च । तेनाङ्कूरश्च ॥ २५ ॥

स जननीसहितो जनकं गृहे
प्रगतवांस्तमुदन्तमवेदयत् ।
निगद तात शिवः कथकः स किं
वितथगीरथवाऽहमितीरयन् ॥ २६ ॥

(प.दी.) सः । जननीसहितः प्रगतवान् गृहं गतः **सः गृहे** स्वमन्दिरे वर्तमानं **जनकं** पितरं **तं** घृतवल्ल्यां प्रवृत्तं **उदन्तं** वार्तां **अवेदयत्** ज्ञापयामास । **तात, निगद** त्वमेवैतद् वद **कथकः स शिवः** शिवनामा **वितथगीः किम्?** अयथार्थवादी किम्? **अथ** न चेत् **अहं वा वितथगीः इतीरयन्** अवेद-यदित्यन्वयः ॥ २६ ॥

(त.चं.) गृहं प्रगतवानथ च प्रकृतं कथकव्याख्यानोदन्तं मनसा गतवान् । 'उदन्तः साधुवार्तयोः' इत्यभिधानम् । तथागताद् विपरीतं वितथम् ॥

ननु सुतावितथं कथितं त्वये-
त्यमुमुदीर्य सविस्मयमस्मरत् ।
प्रकृतितः कृतिता खलु मे शिशो-
र्मदधिनाथदयोदयजेत्यसौ ॥ २७ ॥

(प.दी.) ननु । असौ भट्टः **सुत, त्वया अवितथं** सत्यम्, तद्वाक्यस्याभिमतार्थ इति यावत्, **कथितं ननु । इति** इत्थं **अमुं** सुतम् **उदीर्य सविस्मयं** विस्मयसहितं यथा भवति तथा **इत्यस्मरत् । मे शिशोः प्रकृतितः** स्वभावतः **कृतिता** चतुरता **मदधिनाथदयोदयजा** मम स्वामिनो रजतपीठपुरवासिनः कृपोदयाज्जाता **खलु** । इत्यस्मरदित्यन्वयः ॥ २७ ॥

(त.चं.) कृतिता पाण्डित्यम् । 'कृती स्यात् पण्डिते योग्ये' इत्यभिधानम् । प्रशस्तं कृतमस्येति । यदेव विद्यया करोति तदेव प्रशस्तमिति कृती विद्वान् । 'यदेव विद्यया करोति श्रद्धयोपनिषदा' इति श्रुतेः ॥ २७ ॥

कथयतां प्रथमे कथयत्यलं स्वजनके जनसङ्घवृते कथाम् ।
सकललोकमनोनयनोत्सवश्चतुरधीः स कदाचिदवाचयत् ॥२८॥

(प.दी.) **कथयताम् । कदाचित् कथयतां** कथकानां **प्रथमे जनसङ्घवृते** श्रावकजनसमूहपरिवृते **स्वजनके कथां** पौराणिकभगवत्कथां **अलं कथयति** सति **सकललोकमनोनयनोत्सवः चतुरधीः सः** वासुदेवनामा **अवाचयत्** वाचयामास ॥ २८ ॥

(त.चं.) कथयतां प्रथमे प्रधाने । 'प्रथमस्तु भवेदादौ प्रधानेऽपि च वाच्यवत्' इत्यभिधानम् । प्रथ प्रख्याने । 'प्रथेरमच्'[द.पा.७.४६] इति वैयाकरणाः । 'प्रथन्तेऽस्माद् द्वितीयादयः सङ्ख्याशब्दा इति प्रथमः' इति वृत्तिकारः । चतुरधीः, चतुरा दक्षा शीघ्रगामिनी धीर्यस्य । चते याचने च । चकारात् सत्वरग्रहणे च । तत उरच् । चतत इति चतुरः ॥ २८ ॥

विविधशाखिपदार्थनिवेदने
लिकुचनाम्नि तदाऽनुदितार्थके ।
किमिति तात तदर्थमवर्णयन्
कथयसीति शनैरयमब्रवीत् ॥ २९ ॥

(प.दी.) **विविधेति । तदा** पुराणकथनावसरे **विविधशाखिपदार्थनिवेदने** विविधशाखिपदानां नानावृक्षवाचकानां नानापदानामर्थनिवेदने अर्थज्ञापने, प्रस्तुते सतीति शेषः, **लिकुचनाम्नि** लिकुचाख्ये पदे **अनुदितार्थके** अनुक्तार्थे सति **अयं** वाचकः **तात, तदर्थं** तस्य पदस्य अर्थं **अवर्णयन् किमिति कथयसीति शनैः अब्रवीत्** ॥ २९ ॥

(त.चं.) अयं वासुदेवः शनैरब्रवीत् सगौरवम् । शेरत आसु पक्षिण इति शाखाः विटपाः । शीङो धातोः खप्रत्यय आकारश्चान्तादेशः । 'वृक्षावयव आ च'[३.५६] इति हि दशपादिका ॥ २९ ॥

अवदतीति पितर्यपि चोदिते
प्रतिबुभुत्सुषु तत्र जनेष्वपि ।
अयमुदीर्य तदर्थमवाप्तवान्
परिषदो ह्यसमानसमाननाम् ॥ ३० ॥

(प.दी.) अवदति । इति एवं **चोदिते** लिकुचपदार्थवर्णनाय प्रेरिते **अपि पितरि अवदति** लिकुचपदस्यार्थं अवर्णयति सति **तत्र जनेष्वपि प्रतिबुभुत्सुषु** प्रतिबोद्धुमिच्छुषु सत्सु **अयं** वासुदेवः **तदर्थं** तस्य पदस्यार्थं **उदीर्य परिषदः** सभायाः **असमानसमाननां** असदृशीं पूजाम् **अवाप्तवान्** हि ॥ ३० ॥

(त.चं.) प्रतिबुभुत्सुषु प्रतिर्वीप्सायाम् । प्रत्येकं बुभुत्सुषु । समज्यायामेकैकोऽप्यबुभुत्सदिति । असमानसमाननाम् । असमानां अथाप्यस्य वासुदेवस्य समानां उचितां माननाम् । माननायामपि समानस्य वक्तव्यः सः । सम्मानना वा । तद्यथा संहितं सहितं भवति । सन्ततं सततं भवति । ननु 'समो वा हिततयोः' इति विहितमेतत् । उपलक्षणमेतत् । माननायाश्चेति वक्तव्यम् । 'असमानसुमाननाम्' इत्यपि पठन्ति ॥ ३० ॥

बहुविधैश्चरितैरिति चारुभिः सकललोककुतूहलकारिणम् ।
द्विजवरेण वयस्युचिते स्थितं तमुपनेतुमनेन दधे मनः ॥३१॥

(प.दी.) बह्विति । अनेन **द्विजवरेण** भट्टेन **चारुभिः** इति **बहुविधैश्चरितैः सकललोककुतूहलकारिणं** सकललोकानामाश्चर्यकारिणम् **उचिते** उपनयनस्य योग्ये **वयसि स्थितम्,** गर्भाष्टमं जन्माष्टमं वा संवत्सरं प्राप्तमिति भावः, **तं** स्वपुत्रम् **उपनेतुम्** उपनीतं कर्तुं **मनो दधे** धृतम् ॥ ३१ ॥

(त.चं.) उपनेतुम् । ब्रह्मचरणेनोपरि नेतुम् ॥ ३१ ॥

समुचितग्रहयोगगुणान्वितं समवधार्य मुहूर्तमदूषणम् ।
प्रणयबन्धुरबान्धववानसौ द्विजकुलाकुलमुत्सवमातनोत् ॥३२॥

(प.दी.) समुचितेति । प्रणयबन्धुरबान्धववान् प्रणयेन स्वकृतेन स्नेहेन बन्धुराः आत्मनि स्निग्धाः बान्धवाः अस्य सन्तीति प्रणयबन्धुरबान्धववान् । 'नतं नम्रं च बन्धुरम्' इति हलः । **असौ समुचितग्रहयोगगुणान्वितं** सम्यगुचितग्रहयोगाख्यगुणेन अन्वितम्, अष्टमशुद्ध्यादिगुणयुक्तम्, **अदूषणम्** इतरसमस्तदोषरहितं **मुहूर्तं** लग्नं **समवधार्य** निश्चित्य **द्विजकुलाकुलं उत्सवं** उपनयनोत्सवं **आतनोत्** चकार ॥ ३२ ॥

(त.चं.) समुचितः ग्रहाणां योगः । शुभग्रहयोग इत्येतत् । 'बन्धूरबन्धुरौ रम्ये नम्रे' इत्यभिधानम् । 'बान्धवो बन्धुमित्रयोः' इति च । द्विजकुलाकुलम् । द्विजकुलं द्विजनिकायः । द्विजसन्ततिर्वा । 'कुलं जनपदे गोत्रे सजातीयगणेऽपि च' । तेनाऽकुलं सङ्कीर्णं व्याप्तमित्येतत् ॥ ३२ ॥

विविधवेदतया विजिहीर्षवो वदनरङ्गपदेऽस्य चिराय याः ।
सुरवरप्रमदा अपि सप्रिया अभिननन्दुरहो वियतो महम् ॥३३॥

(प.दी.) विविधेति । याः चिराय चिरात् **अस्य** वासुदेवाह्वयस्य **वदनरङ्गपदे** वदनात्मकरङ्गस्थाने **विविधवेदतया** नानाविधवेदात्मकत्वेन **विजिहीर्षवः** विहर्तुमिच्छवः ताः **सप्रियाः** स्वपतिसहिताः **सुरवरप्रमदाः** वेदाभिमानिन्यो देवाङ्गना **अपि वियतः** आकाशात्, तत्र स्थित्वेति यावत्, **महं अभिननन्दुः । अहो** आश्चर्यम् । इयन्तं कालमस्यानुपनीतत्वेन वेदोच्चारणायोगादस्य वदनरङ्गे वेदतया विहर्तुमशक्यत्वादुपनयनं प्रतीक्ष्य स्थिता वेदाभिमानिन्यो देवाङ्गना इदानीमुपनयनोत्सवं ज्ञात्वा आकाशे विमानारूढाः सत्यस्तमुत्सवमभिननन्दुरिति भावः ॥ ३३ ॥

(त.चं.) वियतः आकाशं प्राप्य। ल्यब्लोपनिमित्ता पञ्चमी। महमुप-नयनोत्सवम्। स्वाहादयश्छन्दोमानिन्यः सुरवरप्रमदाः। तथाहि श्रुतिः– 'अग्नेर्गायत्र्यभवत् सयुग्वोष्णिहया सविता सम्बभूव। अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत्। विराण्मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः। विश्वान् देवान् जगत्या विवेश' [ऋ,१०.१३०.४-५] इति। गायत्र्याः स्वाहाऽग्निभार्या देवता। उष्णिहः सूर्यभार्या सञ्ज्ञा। अनुष्टुभश्चन्द्रभार्या रोहिणी। बृहत्या बृहस्पतिभार्या तारा। विराजो मित्रावरुणयोर्भार्ये रेवती गङ्गा च। त्रिष्टुभ इन्द्रभार्या शची। जगत्या इमाः सर्वा देवस्त्रियः। अतिच्छन्दसां च। उमाद्याश्च वाङ्मानिन्यः ॥ ३३ ॥

विहितसाधनसाधितसत्क्रियो ज्वलनमुज्ज्वलधीर्ज्वलयन्नयम्।
उपनिनाय सुतं सुकुमारकं कुशलिनं कुशलीकृतशीर्षकम् ॥३४॥

(प.दी.) **विहितेति।** **विहितसाधनसाधितसत्क्रियः**, उपनयनकर्मणि विहितैरुपकरणैर्निर्वृत्तसत्कर्मा, **ज्वलनम्** अग्निं **ज्वलयन्** स्वयं हुतिक्रियां कुर्वन् **उज्ज्वलधीः** निर्मलचित्तः **अयं** भट्टः **सुकुमारकं** कोमलरूपं **कुशलिनं** स्वस्थम्, रोगादिरहितमिति वा, **कुशलीकृतशीर्षकं** क्षुरकर्मणा भद्रीकृत-मस्तकं **सुतमुपनिनाय** उपनीतमकरोत् ॥ ३४ ॥

(त.चं.) उज्ज्वलधीः उज्ज्वला विकसनशीला विशदा दीप्ता वा धीर्यस्य। 'उज्ज्वलस्तु विकासिनि। शृङ्गारे विशदे दीप्ते' इत्यभिधानम्। सुकुमार-कम्। काम्यत इति कुमारः कमनीयो बालः। कमेरारन् उच्चोपधाया इति वैयाकरणाः। कुमारयतीति वा कुमारः। कुमार क्रीडायाम्। त्रीणि वर्षाणि शैशवम्। ततस्त्रीणि पौगण्डम्। तत आचतुर्दशं कौमारम्। तत आ-पीच्यम्। आवीच्यं वा। ततो यौवनमाषोडशादिति। सम्प्रत्येव कौमारमारूढ इति कुमारकः। तदपि न क्रीडादिना विफलीचकारेति सुकुमारकः। कुत्सितो मारोऽस्येति विशिष्य ब्रह्मचारी कुमारः। कुत्सितं पापं मारयतीति

च । 'कुः पापेषदर्थयोः' । सुकोमलश्च सुकुमारकः । कुशलिनम् । कुश वैदुष्यारोग्ययोः । कोशति कोशनं वा । कलप्रत्ययः । तद्यथा वर्षतीति वृषळः । दीव्यतीति देवलः । तेन कुशलिनं मेधाविनमनामयं च । कुशलीकृत-शीर्षकम् । भद्राकृतशीर्षकम् । भद्रं कुशलमित्येकार्थम् । भद्राकरोति मङ्गलं मुण्डनं करोतीत्यर्थः । भद्रशब्दात् डाच्प्रत्यय इति वैयाकरणाः ॥ ३४ ॥

परिचराग्निगुरू चरितव्रतः
सुचरणः पठ साधु सदागमान् ।
इति गुरोस्त्रिजगद्गुरुशिक्षणे
स्फुटमहासि सुरैः कृतसाक्षिभिः ॥ ३५ ॥

(भा.प्र.) आदित्यचन्द्रादयो धर्मसाक्षिणः ॥

(प.दी.) परीति । **सुचरणः** शोभनाचारः सन् **अग्निगुरू** अग्निं च गुरुं च **परिचर** शुश्रूषस्व । **चरितव्रतः** व्रतबन्धोपेतः **सदागमान्** निर्दोषागमान् वेदादीन् **साधु पठ इति गुरोः** पितुः **त्रिजगद्गुरुशिक्षणे** त्रैलोक्यगुरोर्वायुनन्दनस्य शिक्षणे कृते सति **कृतसाक्षिभिः** कृतस्य सर्वैः क्रियमाणस्य कर्मणः साक्षिभूतैः **सुरैः**, '[१]आदित्यचन्द्रावनिलानलौ च द्यौर्भूमिरापो हृदयं मनश्च[२] । अहश्च रात्रिश्च उभे च सन्ध्ये धर्मश्च जानाति नरस्य वृत्तम्'[३] इति कर्मसाक्षिभिः सुरैः **स्फुटं** सम्यग् **अहासि** हासः कृतः ॥ ३५ ॥

(त.चं.) सुचरणमाचरणम् । 'आचार इति स प्रोक्तः कर्माङ्गत्वेन शुद्धिदः । अशुद्धिदस्त्वनाचारश्चरणं तूभयं मतम्' इति हि स्मरन्ति । चरितव्रतः परिचर । सुचरणः पठ ॥ ३५ ॥

---

१. '–वनिलोऽनलश्च' इति पाठान्तरम् । महाभारते शकुन्तलावचनमिदम् [आदि.९८.११] ।
२. 'यमश्च' इति भारते पाठान्तरम् । 'दिशश्च' इति च ।
३. 'वृत्तिम्' इति क्वचित् ।

जितकुमारगुणं सुकुमारकं
निजकुमारमवेक्ष्य निरन्तरम् ।
समुचिताचरणे चतुरं स्वतः
क्षितिसुरो मुदमायत शिक्षयन् ॥ ३६ ॥

(प.दी.) जितेति । **जितकुमारगुणं** जितस्कन्दगुणं **सुकुमारकं** सुकोमलं **निजकुमारं शिक्षयन्** शौचाचमनसन्ध्यावन्दनादिकर्मसु शिक्षयन् **क्षितिसुरः स्वतः** शिक्षामनपेक्ष्य **निरन्तरं समुचिताचरणे** स्ववर्णाश्रमोचिताचरणे **चतुरमवेक्ष्य मुदं** सन्तोषं **आयत** अगात् ॥ ३६ ॥

(त.चं.) जितकुमारगुणम् । कुमारः सनत्कुमारः । गुणो ब्रह्मचर्यादिः । स किलाग्रणीरूर्ध्वरेतस्सु । आयत । अय गतौ ॥ ३६ ॥

सपटखण्डमकिञ्चनवत् क्वचित् स्वविभवानुचितं चरणादिकम् ।
भुवनभर्तुरहो स्वनिगूहनं सुरसभासु कुतूहलमातनोत् ॥ ३७ ॥

(प.दी.) सपटेति । **क्वचित् अकिञ्चनवत्** दरिद्रवत् **सपटखण्डं** वस्त्रखण्ड-सहितं यथा भवति तथा, **स्वविभवानुचितं** स्वस्य सम्पदामनुचितमननुसारि, **चरणादिकं** एकाकिनोऽपीतस्ततः सञ्चरणादिपूर्वकं **भुवनभर्तुः** सर्व-लोकनाथस्य **स्वनिगूहनं** स्वविभवादिनिगूहनं **सुरसभासु कुतूहलमातनोत्**, अहो ॥ ३७ ॥

(त.चं.) सपटखण्डं सकौपीनम् ॥ ३७ ॥

अविरळैर्गरळोष्मभिराकुलीकृतसमस्तजनो विचचार यः ।
क्वचिदमुं निजिघांसुरशान्तिमानुपससर्प स सर्पमयोऽसुरः ॥३८॥

(प.दी.) अविरळैः । **अशान्तिमान्** मन्त्रौषधादिभिरुपशमरहितः **यः सर्प-मयः** सर्पाकारः **असुरः अविरळैः** निबिडैः **गरळोष्मभिः** विषोष्मभिः विष-बाष्पैः । ऊष्मा बाष्पः । **आकुलीकृतसमस्तजनः** भीषितसमस्तजनः **विचचार**

लोके विचचार। **सः अमुं द्विजसुतं निजिघांसुः** हन्तुमिच्छन् **कचित् उपससर्प** प्राप । 'सृप्लृ गतौ' इति धातुः ॥ ३८ ॥

(त.चं.) 'गरळं पन्नगविषे' इत्यभिधानम् । ऊष्मा घर्मः । आकुलीकृतं विह्वलं भयग्रस्तमित्येतत् ॥ ३८ ॥

त्वरितमुद्यतविस्तृतमस्तकः प्रतिददंश यदैनमविक्षतम् ।
प्रभुपदारुणचारुतराङ्गुलीविहृतिपिष्टतनुः प्रतताम सः ॥ ३९ ॥

(प.दी.) त्वरितम् । सः सर्पमयोऽसुरः **त्वरितं** शीघ्रं **उद्यतविस्तृतमस्तकः** प्रभुपाददंशनायोन्नतविस्तृतफणः सन् **यदा अविक्षतं** क्षतरहितं **एनं प्रतिददंश,** तदा **प्रभुपदारुणचारुतराङ्गुलीविहृतिपिष्टतनुः,** प्रभोः पादस्य अरुणायाः चारुतरायाः अङ्गुल्याः विहृत्या लीलया पिष्टतनुः निष्पिष्टतनुः **प्रतताम** भ्रान्तोऽभूत् । 'तमु ग्लानौ' इति धातुः ॥ ३९ ॥

(त.चं.) उद्यतमुन्नमितम् । प्रतिददंश । प्रतीक्ष्य ददंश । दन्श दशने ।'दशनं दन्तकर्म' इति क्षीरस्वामी । 'दंश दंशने' इत्यन्ये । प्रतताम नितरां जग्लौ ॥

गरुडतुण्डमिव प्रतिपन्नवान् द्विजकुमारपदं स ममार च ।
समुचितं चरितं महतामिदं सुमनसो मनसेष्टमपूजयन् ॥ ४० ॥

(प.दी.) गरुडेति । **द्विजकुमारपदं प्रतिपन्नवान्** प्राप्तः सः **ममार च** । किं प्रतिपन्नवानिव? **गरुडतुण्डमिव । सुमनसः** देवाः **महतां समुचितं** इष्टम्, दुष्टनिग्रहत्वात् सतामभीष्टम्, **इदं चरितं** कर्म **मनसा अपूजयन्** सम्भावयामासुः ॥ ४०॥

(त.चं.) अरुणचारुतराङ्गुलीपिष्टतनुतया प्रतान्तः स तया वेदनया द्विजकुमारस्य वटोर्वासुदेवस्य पदं गरुडतुण्डमिव प्रतिपन्नवान् निर्ज्ञातवान् । एवं गरुडतुण्डखण्डनजामिव यातनामनुभवन् ममार च । प्रतिपूर्वो हि पद्यतिरवगतिवचनः । प्रतिपन्नवान् प्राप्तवानित्यपि व्याचक्षते । प्रतिरविवक्षितार्थ इति च तेषां मतम् । तद्यथा प्रतिगतवान् ॥ ४० ॥

गिरिशगुर्वमरेन्द्रमुखैश्च य-
च्चरणरेणुरधारि सुरेश्वरैः ।
क्षितिसुराङ्घ्र्यभिवन्दनपूर्वकं
स विदधेऽध्ययनं छलमानुषः ॥ ४१ ॥

(प.दी.) गिरिशेति । **यच्चरणरेणुः** यस्य पादरजः **गिरिशगुर्वमरेन्द्रमुखैः सुरेश्वरैश्च अधारि** धृतम्, **सः छलमानुषः क्षितिसुराङ्घ्र्यभिवन्दनपूर्वकं** ब्राह्मणपादाभिवन्दनपूर्वकं यथा भवति तथा **अध्ययनं** वेदाध्ययनं **विदधे** अकरोत् ॥ ४१ ॥

(त.चं.) गिरिरस्ति निवासतयाऽस्येति गिरिशः शिवः । तद्यथा लोमशः । गुरुः सुरगुरुः । ननु गुरुगिरिशामरेन्द्रमुखैरिति वक्तव्यम् । न नियमेन वक्तव्यम् । यदाह काशिकायाम्– 'बहुष्वनियमः । शङ्खदुन्दुभिवीणाः । वीणाशङ्खदुन्दभयः' इति । ननु तथाऽपि न निस्तारः । अभ्यर्हितं किल पूर्वं निपततीति गिरिशामरेन्द्रगुरुप्रमुखैरिति वक्तव्यम् । सत्यम् । यद्यपि गुरुः स्वरूपतोऽनभ्यर्हितोऽपि पदतोऽभ्यर्हित इति पूर्वमुच्यते । स किल गुरुरिन्द्रस्यापि । वस्तुतस्तु समानाक्षराणामेवायं नियमः । तद्यथा हरिहरावित्येव । न क्वापि हरहरी इति । इह त्वसमानाक्षराणि पदानीति बहुष्वनियम एव । 'गॄ शब्दे' । गृणाति तांस्तानर्थविशेषानिति गुरुराचार्यः पूज्यो वा जनः । 'कृग्रोरुच्च' [१.१०९] इति हि दशपादिका । इदम्प्रवर इदङ्गोत्र इदंसूत्र इदंशाखाध्याय्यहमित्यभिवादपूर्वकं वन्दनमभिवन्दनम् । छलमानुषः । छलेनैव मानुषो न वस्तुत इति ॥ ४१ ॥

करतळे खलु कन्दुकवत् सदा
सकलया कलया सह विद्यया ।
अरिधरेण समं स्फुरितं गुरो-
र्मनसि तस्य विडम्बयतो जनान् ॥ ४२ ॥

(प.दी.) **करे**ति । **जनान्** अज्ञजनान् **विडम्बयतः गुरोः** सकलजगद्गुरोः **तस्य मनसि सकलया** समस्तया **विद्यया** वेदादिविद्यया **कलया** इतरकलाविद्यया **सह करतळे कन्दुकवत् सदा स्फुरितं** विलसितं **खलु** । कथम्? **अरिधरेण** सकलविद्याप्रतिपाद्येन हरिणा **समं** सह । भगवन्तं च सदा करतळामलकवत् जानात्येव । तथाऽप्यसुरजनव्यामोहायाध्ययनं विदध इति भावः ॥ ४२ ॥

(त.चं.) प्रतिपाद्येनारिधरेण नारायणेन समं सकलया विद्यया । उक्तं हि पण्डिताचार्येण– 'गन्धर्वविद्यानिपुणस्य तस्य गन्धर्ववर्यैरनुगीतकीर्तेः । कलाश्च शेषा हृदये गुरोर्नः करोल्लसत्कन्दुकवद् विभान्ति' इति तत्व-दीपिकायाम् ॥ ४२ ॥

अनधिकैरधिकैश्च वयस्यथो
बहुभिरध्ययनोपरमान्तरे ।
अनिकटे वटुभिः पटुभिर्गुरोः
स विजहार सुखी सखिभिः समम् ॥ ४३ ॥

(प.दी.) **अनधिकै**रिति । **अथो सुखी सः अध्ययनोपरमान्तरे** अध्ययन-विराममध्ये **वयस्यनधिकैः** समैः हीनैश्च **अधिकैश्च** वयस्यधिकैश्च **बहुभिः पटुभिः** चतुरैः **सखिभिः वटुभिः समं** सह **गुरोरनिकटे** दूरे **विजहार** ॥

(त.चं.) पाटयतीति पटुश्चतुरः । पट गतौ । 'फलि-पाटि-नमि-मनि-जनां गुक्-पटि-नाकि-ध-तश्च' [१.१०३] इति दशपादिका । एभ्यो धातुभ्यो यथासङ्ख्यं गुगागमः, पटि-नाकि-ध-त इत्येते चाऽदेशा भवन्ति । उश्च प्रत्ययः । तद् यथा– फलतीति फल्गुः । पटुः । नाकुः वल्मीकम् । मधु । जतु । विजहार चिक्रीड ॥ ४३ ॥

पदमुदीर्य जवेन यियासितं
द्रुतसखिष्वभवत् स पुरस्सरः ।

अयमयत्नतयेति न विस्मयो
ननु मनोजवजित् पवनोऽसकौ ॥ ४४ ॥

(प.दी.) पदम् । सोऽयं **जवेन यियासितं** यातुमिष्टं **पदं** स्थानं **उदीर्य**, 'अवधित्वेन सम्प्रतिपन्नं स्थानमाद्रुत्य यः प्रथमतः प्राप्नोति सोऽस्मास्वधिकः' इत्येतं सङ्केतं कृत्वेति भावः । **द्रुतसखिषु**[१] धावत्सु सखिषु, धावतां सखीनां मध्ये इति यावत् । द्रुतेति द्रु गतावित्यस्माद्धातोः 'आदिकर्मणि क्तः कर्तरि च' इति कर्तरि क्तप्रत्ययः । **अयत्नतया** आयासरहिततया **पुरस्सरः** धावद्भ्यः सखिभ्योऽप्यतिशीघ्रमाद्रुत्य पुरोगन्ता **अभवदिति विस्मयः** आश्चर्यं **न** । कुतः? **असकौ** असौ **मनोजवजित् पवनः** मनोजवं जितवान् वायुः **ननु** ॥

(त.चं.) द्रुतसखिषु । कथमेतत्? 'राजाहःसखिभ्यष्टच् [५.४.९१] इति टचि 'द्रुतसखेषु' इति भाव्यम् । सत्यम् । अथापि प्राचीनकोशे 'द्रुतसखिषु' इत्येव पठ्यते । समासान्तो विधिरनित्य इति सङ्गमनीयम् । तद् यथा– 'गङ्गासङ्गेन नैर्मल्यं रथ्याद्भिर्लभ्यते यथा', 'शुच्यम्पि तटाकानि' इत्यादि ॥ ४४ ॥

प्लवनतेजसि हन्त न केवलं
विजितवान् स तदा सकलान् जनान् ।
प्रभुनिदेशकरो हनुमत्तनौ
ननु जिगाय स वालिसुतादिकान् ॥ ४५ ॥

(प.दी.) प्लवनेति । **सः प्लवनतेजसि** प्लवनसामर्थ्ये **सकलान् जनान् केवलं तदा** द्विजकुमारत्वे **विजितवान् हन्त** इति **न** । किन्तु **हनुमत्तनौ** हनुमदवतारे **प्रभुनिदेशकरः** श्रीरामस्य आज्ञां कुर्वन् **सः वालिसुतादिकान्** अङ्गदादिकान् समुद्रतरणादौ **जिगाय ननु** ॥ ४५ ॥

---

१. प्राचीनकोशे त्वेवं पठ्यते । अर्वाचीनास्तु 'द्रुतसखेषु' इत्येव पाठमादृत्य व्याचक्षते ।

(त.चं.) 'तेजो दीप्तौ प्रभावे च' इत्यभिधानम् । स वासुदेवः । स वायुदेव इति द्वितीयतच्छब्दार्थः । हन्त हर्षे सम्भ्रमे च ॥ ४५ ॥

जलविहारपराजयिभिः स्पृधा
सखिभिरीरितवारिपरिश्रितम् ।
वदनमाकुललोचनमादधे
स्मितममुष्य हि कञ्चन विभ्रमम् ॥ ४६ ॥

(प.दी.) जलेति । **जलविहारपराजयिभिः,** जलविहारे जलक्रीडायां पराजय-युक्तैः, **सखिभिः** वयस्यैः **स्पृधा** स्पर्धया **ईरितवारिपरिश्रितम्,** ईरितैः अञ्जलिभिः क्षिप्तैः वारिभिः परितः श्रितम्, अत एव **आकुललोचनं स्मितं** मन्दस्मितोपेतं **अमुष्य वदनं कञ्चन विभ्रमं** यङ्कञ्चित् शोभाविशेषं **आदधे** दध्रे **हि** ॥ ४६ ॥

(त.चं.) आकुलं व्यस्तम् । चञ्चलमित्येतत् । विभ्रमः शोभाविशेषः । 'विभ्रमः शोभायां संशये हावे' इत्यभिधानम् ॥ ४६ ॥

स शनकैर्बलिनोऽयुगपद् गतान्
प्रविहृतेषु सखीन् निरपातयत् ।
अशनकैर्युगपत् प्रकृताहवान्
सहसितो द्विजसूनुरयत्नवान् ॥ ४७ ॥

(प.दी.) **सः** । **सहसितः** सस्मितः **स द्विजसूनुः प्रविहृतेषु** क्रीडासु **अयुगपत्** पृथक् **गतान्** आत्मानं पातयितुमागतान् **प्रकृताहवान्** उपक्रान्तक्रीडायुद्धान् **बलिनः सखीन् शनकैः** शनैरेव **निरपातयत्** पातयामास । **अथ युगपत्** आगतान् **प्रकृताहवान् सखीन् अशनकैः** आशु **अयत्नवान्** आयासरहितः **निरपातयत्** । अयत्नादेव **सहसितः** ॥ ४७ ॥

(त.चं.) प्रकृताहवान्। प्रारब्धनियुद्धान्। स्पृधाऽऽह्वानमाहवः। ह्वेञ् स्पर्धायां शब्दे च। मल्लो मल्लमाह्वयते ॥ ४७ ॥

ग्रहणनिग्रहणे ग्रहणे दृढे
गुरुभरोद्धरणादिविधौ पटौ।
इह विभावुपचारधिया नृणा-
मृतमयं ननु भीम इतीरितम् ॥ ४८ ॥

(प.दी.) **ग्रहणेति**। **ग्रहणनिग्रहणे** अन्योन्यकृतस्य स्वहस्तादिग्रहणस्य निग्रहणे विमोचने, **दृढे** विमोचयितुमशक्ये **ग्रहणे**, **गुरुभरोद्धरणादिविधौ** गुरुभारोद्धरणादिव्यापारे **पटौ** चतुरे **इह विभौ उपचारधिया** सिंहो देवदत्त इतिवदुपचारबुद्ध्याऽपि **अयं भीम इति नृणां ईरितं** वचनम् **ऋतं** सत्यं **ननु**। अयं भावः– आत्मानं कश्चिद्धस्तादौ गृह्णाति चेदाशु मोचयति। स्वयं गृह्णाति चेत् तं न कश्चिन्मोचयति। अतिगुरुपाषाणादिकमप्ययत्नेनोद्धरति। एवंविधमेनं जनः 'अयं साक्षाद् भीमः' इत्युपचारबुद्ध्याऽपि यदुवाच तत् सत्यमेव। वस्तुगत्याऽस्यैव भीमत्वादिति ॥ ४८ ॥

(त.चं.) उपचारधिया। गौरवप्रकटनाय सादृश्यगर्भाऽतिशयोक्तिरुपचारः। तद्यथा– सिंहो देवदत्तः। अग्निरयं माणवक इति ॥ ४८ ॥

विहरतीति पठत्यपि न स्फुटं
स्वगृहगामिनि चाद्रुतमायति।
परितुतोष न तत्र जगद्गुरौ
स किल पूगवनान्वयजो द्विजः ॥ ४९ ॥

(भा.प्र.) पूगवनस्य 'तोटन्तिल्लाय' इत्यपभ्रष्टभाषा॥

(प.दी.) **विहरतीति**। **इति** उक्तप्रकारेण **विहरति** क्रीडमाने, **स्फुटं** सम्यङ् **न पठत्यपि** वेदपाठं सम्यगकुर्वाणे च, **स्वगृहगामिनि** भोजनादिकमुद्दिश्य

स्वमन्दिरगमनशीले **च अद्रुतं** शनैः **आयति** आगच्छति । **तत्र** तस्मिन् **जगद्गुरौ पूगवनान्वयजः** पूगवनाख्यवंशजातः **स द्विजः** उपाध्यायः **न परितुतोष किल** । ऐतिह्ये किलशब्दः । पूगवनस्य 'तोटोंतिल्लाय' इत्यपभ्रष्टसञ्ज्ञा ॥

(त.चं.) पूगवनान्वयजः। 'तोटन्तिल्लाय'[ತೋಟಂತಿಲ್ಲಾಯ] इति भावप्रकाशिका । 'तोटोन्तिल्लाय'[ತೋಟೋಂತಿಲ್ಲಾಯ] इति पदार्थदीपिका । प्रादेशिक उच्चारणभेदः । यद्यपि 'तोट'[ತೋಟ]पदं तरुनिकुरम्बवाचि । न विशिष्य पूगवनस्य । तथाऽपि तत्र पूगानामेव बाहुल्यमासीदिति पूगवनान्वयज इत्युक्तम् । सम्प्रति त्वेतद् द्विजगृहम्, 'दण्डतीर्थ'[ದಂಡತೀರ್ಥ] इति कथ्यते, यत्र वासुदेवः कैशोरे पपाठ । मध्वेन दण्डेन निर्मितं तीर्थमत्रेति ॥ ४९ ॥

अथ कदाचन सोऽध्ययनान्तरे
तमवदत् कुपितोऽन्यमनस्विनम् ।
पठसि नो शठ ते सखिभिः समं
किमिति नित्यमुदासितधीरिति ॥ ५० ॥

(प.दी.) अथेति । **अथ कदाचन** क्वचित् **सः** द्विजः **अध्ययनान्तरे** अध्ययनमध्ये **कुपितः अन्यमनस्विनं** अध्ययनमध्ये अन्यविषयमानसं **तं** वासुदेवं इत्य**वदत्** । कथम्? **शठ** व्याजिन्, **ते सखिभिः समं** सह **किमिति** किमर्थमेवं **नो पठसि? नित्यमुदासितधीः** उदासीनबुद्धिः **किमिति** वर्तस इति शेषः ॥ ५० ॥

(त.चं.) शठ कैतवे । कैतवमनार्जवं धूर्तता । कोपोक्तिरियम् ॥ ५० ॥

गुणनिका चरणादिकगोचरा न मम हृद्दयितेत्युदितेऽमुना ।
वद विशारदवाद यथेप्सितं त्वमुपरीत्यवदद् धरणीसुरः ॥ ५१ ॥

(प.दी.) गुणनिका । चरणादिकगोचरा पादार्द्धर्चादिविषया **गुणनिका** गुणनम्, पुनःपुनरुच्चारणमिति यावत् । **मम हृद्दयिता न** मम मनसः प्रिया

न भवति **इत्यमुना** वासुदेवेन **उदिते** सति **धरणीसुरः** ब्राह्मणः पूगवनजः **इत्यवदत्** । **विशारदवाद,** विशारदो विद्वान्, विशारदवद्वदतीति विशारदवादः, तस्य सम्बुद्धिः विशारदवाद, **त्वं उपरि** इदानीं पठ्यमानाद् वर्गादुपरि **यथेप्सितं वद** । पादादिगुणनं तव प्रियं न चेदित उपरि वर्गशः संहितां पदं वाऽन्यं वा यथेप्सितं वदेत्युपाध्यायोऽवददिति भावः ॥ ५१ ॥

(त.चं) 'विशारदः पण्डिते च धृष्टे' इत्यभिधानम् ॥ ५१ ॥

सकललक्षणशिक्षणमूलभूः
श्रुतिसमामननं स्खलनोज्झितम् ।
न खलु केवलमस्य गुरोर्व्यधात्
सुमनसामपि तत्र कुतूहलम् ॥ ५२ ॥

(प.दी.) सकलेति । **सकललक्षणशिक्षणमूलभूः** वेदोच्चारणस्य यानि लक्षणानि तेषां सकलानां लक्षणानां शिक्षणस्य मूलभूमिः उत्पत्तिस्थानभूतं **स्खलनोज्झितं** स्खलनरहितं **अस्य** वासुदेवस्य **श्रुतिसमामननं** वर्गशः श्रुत्युच्चारणं **केवलं गुरोः** उपाध्यायस्य **कुतूहलं न व्यधात्** । किन्तु **तत्र सुमनसां** देवानां **अपि कुतूहलं** आतनोत् **खलु** ॥ ५२ ॥

(त.चं.) श्रुतिसमामननं श्रुतिसमाम्नानम् ॥ ५२ ॥

प्रियवयस्यशिरोगुरुवेदनामशमयत् सहजामपि दुस्सहाम् ।
स विपिने विजने मुखवायुना श्रवणगोचरितेन कदाचन ॥५३॥

(भा.प्र.) प्रियवयस्य उपाध्यायपुत्रः । तस्यानन्तातीतानि जन्मानि प्रकाशितवान् श्रीमध्वः ॥

(प.दी.) प्रियेति । **सः** वासुदेवः **कदाचन विजने** निर्जने **विपिने** अरण्ये, प्रियवयस्येन सह वर्तमान इति शेषः, **दुस्सहां** सोढुमशक्यां **सहजामपि**

जन्मप्रभृत्यनुवर्तमानामपि तदानीमाविर्भूतां **प्रियवयस्यशिरोगुरुवेदनाम्,** आत्मनः प्रियस्य वयस्यस्य सख्युः शिरसि वर्तमानां गुर्वीं वेदनाम्, **श्रवणगोचरितेन** श्रवणरन्ध्रेण प्रहितेन **मुखवायुना** स्ववदनपवनेन **अशमयत्** शान्तामकरोत् । वयस्यो गुरुपुत्र इति प्रथा ॥ ५३ ॥

(त.चं.) वातानुगणं वेपत इति विपिनम् । टुवेपृ कम्पने । वेपतेरिनन् । 'वेपितुह्योर्ह्रस्वश्च'[५.१८] इति हि दशपादिका । तुहिर् अर्दने । तोहतीति तुहिनम् । न केवलं शिरोवेदनामपनिनाय । तद्व्याजेनातीतानां जन्मनां स्मृतिमप्यनुजग्राहेति भावप्रकाशिकायां स्फुटम् ॥ ५३ ॥

अधिगतोपनिषच्च सकृच्छ्रुता
प्रकटभागवतीति न विस्मयः ।
अधिगता ननु जात्वपि नश्रुताः
प्रतिभया श्रुतयः शतशोऽमुना ॥ ५४ ॥

(भा.प्र.) प्रकटभागवती श्रीमन्नारायणोपनिषत् ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां तृतीयः सर्गः

—०—

(प.दी.) अधिगतेति । **अमुना** वासुदेवाह्वयेन **सकृत्** एकदा **श्रुता प्रकटभागवती** स्पष्टं भगवत्सम्बन्धिनी तत्स्वरूपप्रतिपादिकेति भावः, **उपनिषच्च** श्रीमन्महैतरेयोपनिषदपि **अधिगता** ज्ञाता **इति विस्मयो न** । उपाध्यायेन मूलादारभ्याऽपरिसमाप्तेः सकृन्निगदितोपनिषदेतेन ज्ञातेत्याश्चर्यं न भवतीति भावः । कुतः? **जात्वपि** कदाचिदपि **नश्रुताः शतशः श्रुतयो** वेदाः **प्रतिभया** स्वरूपप्रज्ञया अमुना **अधिगता ननु** ज्ञाता हि । अश्रुतप्रतिबोद्धुरस्य न श्रुताधिगमो विस्मय इति भावः ॥ ५४ ॥

(त.चं.) प्रकटं नाम्नैव भगवत्परतां स्फुटमुद्घोषयन्ती प्रकटभागवती श्रीमन्नारायणोपनिषदिति भावप्रकाशिका । श्रीमन्महैतरेयोपनिषदिति पदार्थदीपिका । उभयथाऽपि शक्यं व्याख्यातुम् । वक्तृतात्पर्यं तु निर्णयते ॥

साक्षादथोपनिषदो विभुरैतरेय्याः
पाठच्छलेन विजनेऽर्थरसं ब्रुवाणः ।
अध्यापकाय विततार विमोक्षबीजं
गोविन्दभक्तिमुचितां गुरुदक्षणां सः ॥ ५५ ॥

(प.दी.) **साक्षात्** । **अथ सः विभुः विजने** रहसि **ऐतरेय्याः** इतरायाः सुतेन श्रीमहिदासाभिधेन हरिणा दृष्टायाः **उपनिषदः पाठच्छलेन** उपाध्यायात् पाठव्याजेन **अध्यापकाय साक्षात्** स्पष्टम्, 'साक्षात् प्रत्यक्षतुल्ययोः' इत्यमरः, **अर्थरसं** अर्थसारं **ब्रुवाणः उचितां** उपाध्यायस्य योग्यां **विमोक्षबीजं गोविन्दभक्तिं गुरुदक्षिणां विततार** ददौ । श्रीमन्महैतरेयोपनिषदर्थकथनेन तस्य योग्यतानुसारेण श्रीविष्णुभक्तिमुपाध्यायस्योत्पादितवान् । सैव तस्य गुरुदक्षिणेवाभूदिति भावः ॥ ५५ ॥

(त.चं.) साक्षादर्थरसं परममुख्यार्थसारम् । साक्षात् स्वयमेव ब्रुवाणः । 'साक्षात् तुल्यसमक्षयोः' इत्यभिधानम् । वसन्ततिलका छन्दः ॥ ५५ ॥

अयि स्वामिन् दुष्टान् दमयदमय स्पष्टमचिराद्
गुणान् गूढान् विष्णोः कथयकथय स्वान् प्रमदयन् ।
तदाऽनन्दं तन्वन्निति सुमनसां सोऽनुसरता-
मनुज्ञामादत्त त्रिभुवनगुरुर्ब्राह्मणगुरोः ॥ ५६ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये आनन्दाङ्किते तृतीयः सर्गः

—०—

(प.दी.) अयीति। **स्वामिन्** नाथ, **दुष्टान्** दुर्जनान् **दमयदमय** निराकुरु। **स्वान्** स्वकीयान् सज्जनान् **प्रमदयन्** सन्तोषयन् **गूढान्** नैर्गुण्यवादिभिः निगूहितान् **विष्णोः गुणान् अचिरात् स्पष्टं** शीघ्रं **कथयकथय**। **अयि** इत्यव्ययं प्रार्थनावाचकम्। दमयकथयेत्यादिद्विर्वचनमादरद्योतकम्। इति एवं **अनुसरतां** अनुवृत्तिं कुर्वतां **सुमनसां** देवानां **आनन्दं तन्वन् तदा सः त्रिभुवनगुरुः** श्रीवासुदेवः **ब्राह्मणगुरोः** उपाध्यायात् **अनुज्ञामादत्त** स्वीकृतवान्॥ ५६॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां वेदाङ्गतीर्थमुनिकृतायां तृतीयः सर्गः

—०—

(त.चं.) अयि स्वामिन्। अयीत्यनुनयन्त आहुः। शिखरिणी छन्दः। सप्तदशाक्षराऽत्यष्टिः।'यम्नाः सभ्लाः शिखरिणी गौ रसैः शङ्करैर्यतिः' इति तल्लक्षणम्। यमनसभाः लघुगुरू चेति॥ ५६॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे।
सर्गं तृतीयं व्याचख्यौ सुधियां धीविशुद्धये॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां तत्वचन्द्रिकायां तृतीयः सर्गः

—०—

[आदितः श्लोकाः– १०९+५६=१६५]

चतुर्थः सर्गः

[वासुदेवस्य सन्यासस्वीकारनिर्धारः। अच्युप्रज्ञ-कथा। गुरुणाऽच्युतप्रज्ञस्य चरमसन्देशः। अच्युतप्रज्ञे-नानन्तासनसेवा। वासुदेवेनाच्युतप्रज्ञं प्रत्युपसदनम्। पितृभ्यां नतिपूर्वकं सन्यासनिवारणप्रयत्नः। नमनेनैव सन्यासाभ्यनुज्ञा भगवता दापितेति वासुदेवस्य प्रतिवचनम्। 'कुत्याडि' मठे पुनः पुत्रेण समागमः। कोपाकुलेन पित्रा साहसप्रतिश्रवः। वासुदेवेन पितुः सान्त्वनम्। वासुदेवानुजस्य जननम्। कथञ्चिन्मा-त्राऽपि सन्यासाभ्यनुज्ञानम्। वासुदेवेन सन्यास-स्वीकारः। तस्य पूर्णप्रज्ञ इति नामकरणम्। कञ्चित् पुरुषं प्रविष्टेनानन्तासनेन मत्सेवाफलं गृहाणेति अच्युतप्रज्ञाय पूर्णप्रज्ञप्रदानम्। रजतपीठपुरतटाके गङ्गोद्भवः। पूर्णप्रज्ञेन वासुदेवपण्डितादीनां तार्किकाणां पराजयः। अच्युतप्रज्ञेनेष्टसिद्धिग्रन्थपाठः। पूर्णप्रज्ञेन तन्मङ्गळपद्य एव द्वात्रिंशद्दोषोद्घाटनम्। पूर्णप्रज्ञेन मायासमयप्रवचनम्। भागवतश्रवणसमये पूर्णप्रज्ञेन व्यासाभिमतस्य शुद्धपाठस्याऽविष्करणम्। एवं पूर्ण-प्रज्ञस्य कीर्तिप्रसरः।]

अथैष सल्लोकदयासुधार्द्रया
सदागमस्तेननिरासकामया ।
रमावरावासभुवा विशारदो
विशालयाऽचिन्तयदात्मनो धिया ॥ १ ॥

(प.दी.) अथेति । **अथ** गुरुकुलवासानन्तरं **विशारदः** विदग्धः **एष** वासुदेवाह्वयः **सल्लोकदयासुधार्द्रया,** सन्तश्च ते लोकाश्चेति सल्लोकाः, सन्तो जनाः, 'लोकस्तु भुवने जने' इत्यमरः, सत्सु जनेषु या दया सैव सुधेव सल्लोकदयासुधा, तयाऽऽर्द्रया क्लिन्नया, अकठिनयेति भावः । **सदागमस्तेननिरासकामया,** सन्तश्च ते आगमाश्चेति सदागमा वेदाद्याः, तेषां स्तेनः तस्करः सङ्करः, तन्निरासे कामो यस्याः सा तथोक्ता तया । **रमावरावासभुवा,** रमावरो हरिः, तस्याऽवासभूः आवासभूमिः, भगवन्निवासस्थानमिति यावत्, तया एवम्भूतया **विशालया आत्मनो धिया** बुद्ध्या **अचिन्तयत्** इत्थं विचिन्तयामास ॥ १ ॥

(त.चं.) सदागमस्तेननिरासकामया । चतुर्विधा हि सदागमस्तेना भवन्ति प्रक्षेपका अपक्षेपका व्यत्यासकाः सर्वलोपकाश्चेति । केचिद् ग्रन्थान् प्रक्षिप्य ग्रन्थाशयमपघ्नन्ति । केचिद् विद्यमानं पाठं स्वानभिमतमन्तरितं कृत्वा । केचिद् ग्रन्थपाठक्रमं व्यत्यस्य । अन्ये बुद्धिपूर्वं विपरीतं व्याख्याय सर्वं प्रमेयजातं विलोप्य, ये प्रधानस्तेनाः । विशारदः पण्डितः । शरः स्वतन्त्रः । शारं स्वातन्त्र्यं सर्वशास्त्रेष्वप्रतिहतां गतिं ददातीति शारदा ब्रह्मविद्या ।

तथा हि तन्त्रव्याकरणे– 'शरः स्वतन्त्रं हृदयं स्फुरत्ता परमेशिता । शारश्चेत्युदिताः शब्दाः सर्वे पर्यायवाचकाः' इति । 'बुधः सुधीः कृती कृष्टिः कविर्व्यक्तो विशारदः' इत्यभिधानम् । विशालया सकलजगद्ग्राहिण्या धिया प्रज्ञया । सर्गेऽस्मिन् आद्विपञ्चाशं पद्यं जगतीभेदो वंशस्थं छन्दः । 'वंशस्थं स्याज्जतजरा गुहास्यक्रतुभिर्यतिः' इति हि तल्लक्षणमामनन्ति । कविवंशे स्थिरं तिष्ठतीति वंशस्थम् ॥ १ ॥

अनन्यसङ्गाद् गुणसङ्गिता हरे-
र्जनस्य मानं तु विशिष्टचेष्टितम् ।
असङ्गमस्मात् प्रकटीकरोम्यहं
निजं भजन् पारमहंस्यमाश्रमम् ॥ २ ॥

(प.दी.) विचारप्रकारमेव दर्शयति– **अनन्येति** । **अनन्यसङ्गात्** भगवदितरसङ्गराहित्यात् **हरेर्गुणसङ्गिता** श्रीहरिस्मरणश्रवणमननादिष्वादरवत्त्वम्, घटत इति शेषः । **जनस्य विशिष्टचेष्टितं तु** विशिष्टानामुत्तमानामाचरणमेव **मानं** प्रमाणम् । विशिष्टाचरणमेव प्रमाणीकृत्येतरे जनाः प्रवर्तन्त इति भावः । 'यद्यदाचरति श्रेष्ठः' इति वचनात् । **अस्मात्** कारणात्, विशिष्टाचारस्य प्रमाणत्वादिति यावत्, **अहं पारमहंस्यं** परमहंससम्बन्धिनं **आश्रमं भजन् निजं** मम स्वभावभूतं **असङ्गम्,** भावप्रधानो निर्देशः, असङ्गत्वमिति यावत्, **असङ्गं** सङ्गाभावं वा, **प्रकटीकरोमि** सर्वेषां प्रदर्शयामि ॥ २ ॥

(त.चं.) हरेर्गुणेषु सङ्गिता । जनस्य मानं तु विशिष्टचेष्टितम्– 'यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः । स यत् प्रमाणं कुरुते लोकस्तदनुवर्तते' इति ॥

मम प्रभोर्नापरथा हि शोभते
द्विषत्सु विष्णुं यददण्डधारणम् ।
हरिस्वसा नन्वचिरादसद्भिदे
भवेदतो नास्मि च दण्डधारकः ॥ ३ ॥

(प.दी.) मम । विष्णुं द्विषत्सु मायिषु **यत् अदण्डधारणम्,** भगवद्-द्वेषिणां मायिप्रभृतीनां जिह्वाच्छेदादिदण्डाकरणं **यत्** तत् **प्रभोः मम** भगवद्द्वेषिषु दण्डधारणे समर्थस्य मम **अपरथा** यत्याश्रमस्वीकारं विना **न शोभते हि** । तर्हि क्रियतां दण्डधारणम् । किमिति पारमहंस्यमाश्रीयत इत्यत आह– **हरिस्वसा** दुर्गा **असद्भिदे** असन्निरासाय **अचिरात्** शीघ्रं **भवेत्** अवतारं कुर्यात् **ननु । अतः** तया दुर्गया असद्दण्डस्य करिष्यमाणत्वात् अहं **च दण्डधारको नास्मि** । अयं भावः– श्रीहरिद्वेषिणां देहादिदण्डनं कार्यमेव । तदप्यचिराद् दुर्गया करिष्यते । तस्मादस्मिन्नवसरे नाहं करोमि । तस्माद् दण्डधारणायोग्यं यत्याश्रममेव स्वीकरोमीति ॥ ३ ॥

(त.चं.) अपरथा । दण्डधारणे समर्थस्यापि तदधारणं नाम कर्तव्यच्युतिरेव स्यादिति ॥ ३ ॥

विचिन्तयन्नित्थमनन्तचिन्तकः
समस्तसन्न्यासनिबद्धनिश्चयः ।
असावनुज्ञार्थमथानमद्धरिं
समस्तसंव्यापिनमात्मदायगम् ॥ ४ ॥

(प.दी.) विचिन्तयन् । अनन्तचिन्तकः भगवच्चिन्तानिरतः **असावित्थं विचिन्तयन् अथ समस्तसन्न्यासनिबद्धनिश्चयः,** समस्तस्य गृहक्षेत्रादेः सन्न्यासे परित्यागे निबद्धः निरूढः निश्चयो यस्य स तथोक्तः, **अनुज्ञार्थं** गन्तुमनुज्ञां स्वीकर्तुं **समस्तसंव्यापिनं** समस्तव्यापनशीलं **आत्मदायगम्,** आत्मदाये स्वक्षेत्रादौ स्थितं **हरिमनमत्** ॥ ४ ॥

(त.चं.) अनन्तचिन्तकः । आह च स्वयमेव–'सन्ततं चिन्तयेऽनन्तम्' इति । 'दायो भागार्हपित्र्यरिक्थे' इति हलायुधः ॥ ४ ॥

निजे जने किं नमसीति पृच्छति
ब्रुवन् स्ववस्तुप्रणतिं व्यधामिति ।

गुरोः किलान्वेषणवान् जगद्गुरु-
स्तदा जगामाखिललोकशिक्षकः ॥ ५ ॥

(भा.प्र.) स्ववस्तु। स्वस्वामिनं नित्याप्रतिहतं ब्रह्म ॥

(प.दी.) **निजे**। तदा **निजे जने** स्वपित्रादौ **किं नमसि** किमर्थं नमस्करोषि इति पृच्छति सति तं प्रति **स्ववस्तुप्रणतिं व्यधामिति ब्रुवन्**। अत्र स्ववस्तुशब्देन मुख्यतः स्वस्वामिभूतं नित्यं वस्तु ब्रह्माख्यं [उच्यते]। तस्मै प्रणतिं व्यधामिति भावः। अमुख्यया वृत्त्या वस्तुशब्देन धनक्षेत्रादीतरपदार्थस्यापि वाच्यत्वात् तत्प्रणतिं व्यधामिति ब्रुवन्निव पृच्छतामुत्तरं दत्त्वा **जगद्गुरुः** सकलसद्गुरुरपि **गुरोरन्वेषणवान् जगाम किल**। किलेत्यपरमार्थे। भगवदितरस्य सर्वस्याप्ययं गुरुः। तस्मादस्य गुरोरन्वेषणं लोकविडम्बनार्थमिति भावः। एतदेवाऽऽह– **अखिललोकशिक्षक** इति। अयं भावः– अज्ञस्य हि गुर्वपेक्षा। नचायमज्ञः। तथाऽपि ज्ञानिनां देवानां मानुषादिजन्मसु स्वज्ञानादिगुणानप्रकाश्याज्ञवत् श्रवणादिकं कर्तव्यमिति लोकशिक्षार्थमेव गुर्वन्वेषणार्थं जगामेति। तथोक्तम्– 'धर्मो हि सर्वविदुषामपि दैवतानां प्राप्ते नरेषु जनने नरवत् प्रवृत्तिः। ज्ञानादिगूहनमुताध्ययनादिरत्र' इति ॥ ५ ॥

....

(त.चं.) स्ववस्तु। स्वं स्वामित्वेन स्वीयम्, स्वतन्त्रं वा, वस्तु अन्तर्बहिरप्रतिहतं नित्यं ब्रह्म। तथाहि भागवते– 'वेद्यं वास्तवमत्र वस्तु शिवदम्' इति। व्याचख्यौ च स्वयमेवाऽऽचार्यः– 'वस्तु अप्रतिहतनित्यम्। स्कान्दे च– वसनाद् वासनाद् वस्तु नित्याप्रतिहतं यतः। वासेनेदं यतस्तुन्नमतस्तद् ब्रह्म शब्द्यते' इति। वसति सदा सर्वत्रेति वस्तु। वासनमाच्छादनम्। वस्ते वासयति वा सर्वमिति च वस्तु नारायणाख्यम्। 'अन्तर्बहिश्च तत् सर्वं व्याप्य नारायणः स्थितः' इति हि श्रुतिः। 'वस च्छेदने' इति चुरादौ धातुपाठः। आच्छादने चेति वक्तव्यम्। अपिच यस्य वासेनेदं विश्वं तुन्नं प्रेरितम्, पेशनेन निष्पन्नरूपं च येन तद् वस्तु। तत्तदाकारतया तत्रतत्र

स्थितः तत्तद्रूपप्रद इति । वसति तुदति चेति । तुद व्यथने इति पठन्ति । प्रेरणे अवयवकरणे चेति पठनीयम् । प्रयोगतो हि धात्वर्थोऽवगम्यते । आह च पाणिनिः– 'अर्थस्यान्यप्रमाणत्वात्' [१.३.५६] इति । 'लोकत एवार्थावगतेः' इति काशिका । 'त्वष्टा रूपाणि पिंशतु' इति च श्रुतिः । अखिललोकशिक्षकः । 'प्राप्ते नरेषु जनने नरवत् प्रवृत्तिः' इति च महाभारततात्पर्यनिर्णये [१४.४] ॥ ५ ॥

यतिर्यतात्मा भुवि कश्चनाभवद्
विभूषणो भूरिविरक्तिभूषणः ।
न नाममात्राच्छुचिमर्थतोऽपि यं
जनोऽच्युतप्रेक्षमुदाहरत् स्फुटम् ॥ ६ ॥

(भा.प्र.) अच्युतप्रेक्षः । 'प्रेक्षा प्रज्ञा प्रतिभा' इति ॥

(प.दी.) **यतिः** । तस्मिन् काले **भुवि यतात्मा** नियतमानसः **विभूषणः** कुण्डलाङ्गदादिभूषणरहितः । स्वरूपकथनमेतत् । तथाऽपि **भूरिविरक्तिभूषणः** यत्याश्रमभूषणभूतबहळविरक्त्यलङ्कारः । एवम्भूतः **कश्चन यतिरभवत्** । **जनः शुचिं** कायवाङ्मनोभिः शुद्धं **यं** यतिं **स्फुटं अर्थतोऽपि** सम्यगन्वर्थतया **अच्युतप्रेक्षं** अच्युतप्रज्ञनामानं **उदाहरत्** । अच्युतप्रेक्षशब्दार्थपर्यालोचनया तस्य अन्वर्थकत्वमवगम्यते । तथाहि प्रेक्षाशब्दो ज्ञानवाचकः । 'प्रेक्षोपलब्धिश्चित् संवित् प्रतिपज्ज्ञप्तिचेतनाः' इत्यमरः । ततश्च अच्युतस्य प्रेक्षा ज्ञानं यस्य सः अच्युतप्रेक्ष इत्यर्थः । अतो **नाममात्रात्** डित्थडिबित्थादिवन्नाममात्रेणाच्युतप्रेक्षं **नोदाहरत्** इति ॥ ६ ॥

(त.चं.) अच्युतप्रेक्षं अच्युतप्रज्ञम् । 'अच्युतप्रज्ञनामानम्' इति हि वेदाङ्गतीर्थीयम् । 'अच्युते आत्मा बुद्धिः प्रज्ञाऽस्येति अच्युतात्मा अच्युतप्रज्ञः' इति चोपरि भावप्रकाशिकायाम् । ननु यद्येवमभविष्यत् महता कण्ठेन 'जनोऽच्युतप्रज्ञमुदाहरत् स्फुटम्' इत्येव किमिति नावक्ष्यत्?

रीतिरियं पण्डिताचार्यस्य यत् समानार्थकपदैः प्रायः प्रवेदयति नामानि । यथा पूर्णप्रज्ञं पूर्णबोधमाह– 'पूर्णबोध इत्यमुष्य नाम' इति । यथा नरहरितीर्थं नरसिंहतीर्थमाह–'नरसिंहपदाधाराः' इति । व्याचख्यौ च हि स्वयमेव– 'प्रेक्षा प्रज्ञा प्रतिभा' इति हलायुधवचनेन ॥ ६ ॥

पुरैष कृष्णाकरसिद्धशुद्धिमद्-
वरान्नभुक्त्या किल पाण्डवालये ।
विशोधितात्मा मधुकृत्प्रवृत्तिमान्
चचार कांश्चित् परिवत्सरान् मुदा ॥ ७ ॥

(प.दी.) पुरा । **एष** यतिः **पुरा** पूर्वजन्मनि यतिः सन् **मधुकृत्प्रवृत्तिमान्** मधुकरव्रतनियतः, **कृष्णाकरसिद्धशुद्धिमद्वरान्नभुक्त्या**, द्रौपदीकरेण सिद्धत्वात् निष्पन्नत्वात् शुद्धिमत्त्वेन वरस्य उत्तमस्य अन्नस्य भुक्त्या **विशोधितात्मा** निर्मलीकृतचित्तः सन् **पाण्डवालये कांश्चित् परिवत्सरान् मुदा चचार** । तत्र प्रवृत्तोऽभूत् **किल** । ऐतिह्ये किलशब्दः । अत्र पाण्डवा-नामालयः पाण्डवालय इति तत्पुरुषत्वे अन्तःपुरे चचारेति स्यात् । न च तद् युक्तम् । तस्मात् पाण्डवानामालयो यस्मिन् देशे स पाण्डवालय इत्येव युक्तम् । पाण्डवालयश्च हस्तिनपुरादिः ॥ ७ ॥

(त.चं.) पाण्डवालये धर्मराजसदने द्रौपदीकरसिद्धवरान्नभुक्त्या विशोधि-तात्मा पाण्डवानामालये हस्तिनपुरे चचार कांश्चित् परिवत्सरान् । मधु-कृत्प्रवृत्तिमान्– 'स्तोकंस्तोकं ग्रसेद् ग्रासं देहो वर्तेत यावता । गृहान् व्रजेत् समातिष्ठन् वृत्तिं माधुकरीं मुनिः । अणुभ्यश्च महद्भ्यश्च शास्त्रेभ्यः कुशलो नरः । सर्वतः सारमादद्यात् पुष्पेभ्य इव षट्पदः । सायन्तनं श्वस्तनं वा न सङ्गृह्णीत भिक्षुकः' इत्यादि चावधूतगीतायाम् ॥ ७ ॥

अभूत् कुशास्त्राभ्यसनं न पातकं
क्रमागताद् विप्रतिसारतो यतेः ।

यथा कुशास्त्राध्यसनं मुरद्विषः
पदाम्बुजे व्याधवरस्य गर्हितम् ॥ ८ ॥

(भा.प्र.) विप्रतिसारः पश्चात्तापः ॥

(प.दी.) अभूत् । **यतेः** अच्युतप्रज्ञस्य **क्रमागतात्** क्रमप्राप्तात् **विप्रतिसारतः** पश्चात्तापात् **कुशास्त्राभ्यसनं** कुत्सितमायिशास्त्रश्रवणादिरूपाभ्यसनं **पातकं** अधःपातकारणं **नाभूत्** । मायिप्रणीतकुत्सितशास्त्रश्रवणादिकं नित्यनिरय-पातकारणमप्यस्य पातकारणं नाभूत् । कुतः? श्रीमध्वशास्त्रश्रवणानन्तर-मुत्पन्नात् पश्चात्तापात् । पातकिनामपि पश्चात्तापेन पातकनिवृत्तिसम्भवादिति भावः । तत्र दृष्टान्तमाह– **यथेति** । **मुरद्विषः** श्रीकृष्णस्य **पदाम्बुजे** पादाम्भोजे **व्याधवरस्य** जरानाम्नो व्याधस्य **गर्हितं कुशास्त्राध्यसनं** कुत्सितं च तत् शास्त्राध्यसनं चेति कुशास्त्राध्यसनं तत् तस्य पश्चात्तापात् **यथा पातकं नाभूत्** तद्वदितिभावः ॥ ८ ॥

(त.चं.) क्रमागतात् । मध्वशास्त्रश्रवणानन्तरं क्रमेणाऽगताद् विप्रति-सारतः । 'विप्रतिसारोऽनुशयः पश्चात्तापोऽनुतापः स्यात्' इति हलायुधः । स्वकृतिविरुद्धं मनसः प्रतिसरणं विप्रतिसारः ॥ ८ ॥

विनीतमाम्नायशिरोविशारदं
सदैव तत्वं प्रबुभुत्सुमादरात् ।
गुरुर्विदित्वोपनतां निजां मृतिं
कदाचिदूचे तमुपह्वरे गिरम् ॥ ९ ॥

(प.दी.) **विनीतम्** । **गुरुः** अच्युतप्रज्ञगुरुः **कदाचित् निजां मृतिमुप-नतां** समीपवर्तिनीं **विदित्वा विनीतं** विनयोपेतं **आम्नायशिरोविशारदं** उपनिषद्विचारविचक्षणं **सदा तत्वमेव** भगवत्तत्वमेव **प्रबुभुत्सुं** प्रकर्षेण याथार्थ्येन बोद्धुमिच्छुं **तं** स्वशिष्यं **उपह्वरे** रहसि । 'रहोऽन्तिकमुपह्वरे' इत्यमरः । **आदराद् गिरमूचे** ॥ ९ ॥

(त.चं.) आदराद् बुभुत्सुमादरादूचे । आदरोऽभिनिवेशः। उपह्वरे रहसि । 'रहः प्रच्छन्नमेकान्तं निःशलाकमुपह्वरम्' इति च ॥ ९ ॥

अहं स्वयं ब्रह्म न किञ्चिदस्ति मत्
परं विजृम्भेत यदा स्फुटं चितिः ।
इतीह मायासमयोपपादितं
निरन्वयात् सुव्रत मा स्म विश्वसीः ॥ १० ॥

(प.दी.) कथमिति तत्राऽह– **अहमिति** । **सुव्रत** शोभनव्रतयुक्त, **अहं स्वयं ब्रह्म** अहमेव साक्षाद् ब्रह्म, **चितिः** ज्ञानं **यदा स्फुटं** सम्यक् **विजृम्भेत** परिपक्वं भवेत् तदा **मत्** मत्तः **परं** व्यतिरिक्तं **किञ्चिन्नास्ति इति इह** तत्व-विषये **मायासमयोपपादितं** मायाशास्त्रसमर्थितम्, प्रमेयमिति शेषः, **मा स्म विश्वसीः** अत्र विश्वासं मा कार्षीः । कुतः? **निरन्वयात्** भावप्रधानो निर्देशः । निरन्वयत्वादिति यावत् । अन्वय उपपत्त्यादिलिङ्गम् । तद्रहित-त्वात् । निर्युक्तिकत्वादिति भावः ॥ १० ॥

(त.चं.) अन्वयान्निष्क्रान्तं निरन्वयम् । निष्क्रान्तमन्वयनं वा निरन्वयः ॥

यदेतदात्मैक्यमुपास्तिचोदितं
न मे गुरोरप्यपरोक्षतां गतम् ।
पुरातनानामपि सौम्य कुत्रचित्
ततो मुकुन्दं भज संविदे मुदा ॥ ११ ॥

(प.दी.) यत् । **उपास्तिचोदितं** उपासनाय चोदितं मायिप्रोक्तं **यत् आत्मैक्यम्**, आत्मनां चेतनानामैक्यम्, सर्वेषामात्मनां ब्रह्माभेद इति भावः, **एतत् मे गुरोरपि अपरोक्षतां** प्रत्यक्षतां **न गतम्** । न केवलं मे गुरोरेव । किन्तु **पुरातनानामपि कुत्रचित् अपरोक्षतां न गतं** हे **सौम्य** । **ततः** आत्मैक्यस्य

प्रत्यक्षागोचरत्वाद् युक्त्यादिरहितत्वाच्च **मुकुन्दं** मोक्षप्रदं हरिं सदा **मुदा** प्रसन्नबुद्धिः सन्निति भावः, **संविदे** ज्ञानाय **भज** तत्वज्ञानं प्रार्थयन् भजेति भावः ॥ ११ ॥

(त.चं.) 'सौम्यो बुधे मनोज्ञे स्यादनुग्रे' इत्यभिधानम् ॥ ११ ॥

इतीदमादिश्य वचो वचस्विनि
स्वके गुरौ लोकमथान्यमीयुषि ।
असेवताऽलोच्य मुहुर्गुरोर्गिरं
स रूप्यपीठालयमिन्दिरावरम् ॥ १२ ॥

(भा.प्र.) वचस्विनि। 'अस्मायामेधास्रजो विनिः' इति विनिः॥

(प.दी.) इति । वचस्विनि चतुरवचसि **स्वके गुरौ इतीदं वचः आदिश्य** उक्त्वा **अन्यं लोकं** परलोकं **ईयुषि** सति, **अथ सः** अच्युतप्रज्ञः[1] **गुरोर्गिरं** 'मुकुन्दं भज संविदे मुदा' इत्यन्तां वाचं **मुहुः** पुनःपुनः **आलोच्य** गुरूक्त-प्रकारेण कुर्यां नवेति विचार्य, अन्ततः करोमीत्येव निश्चित्य **रूप्य-पीठालयम्,** रूप्यपीठमालयो यस्य स तथोक्तः तम्, **इन्दिरावरं रमापतिं असेवत** ॥१२ ॥

(त.चं.) 'अस्-माया-मेधा-स्रजो विनिः'[५.२.१२१]। असन्तात् प्राति-पदिकात् माया मेधा स्रज् इत्येतेभ्यश्च मत्वर्थे विनिः प्रत्ययो भवति । असन्ताद् यथा- वचस्वी । मनस्वी । यशस्वी । तपस्वी । तथा मायावी मेधावी स्रग्वी च । प्रशस्तवचा वचस्वी ॥ १२ ॥

सुभक्तिना तेन स भक्तवत्सलो
निषेवितस्तत्र परं बुभुत्सुना ।

१.'अच्युतप्रेक्षः' इत्यपि क्वचित् । सम्पातायातम् । अन्यथा प्रायपाठविरोधः । आन्तं 'अच्युतप्रज्ञः' इत्येव श्रवणात् ।

भविष्यतः शिष्यवराद्धि विद्धि मा-
मिति प्रविष्टः पुरुषं तमभ्यधात् ॥ १३ ॥

(प.दी.) सुभक्तिना । परं सर्वोत्तमं हरिं **बुभुत्सुना** जिज्ञासुना **सुभक्तिना,** शोभना भक्तिर्यस्यासौ सुभक्तिः, तेन सुभक्तिना **तेन** अच्युतप्रज्ञेन **तत्र** रूप्यपीठे **निषेवितः** नितरां सेवितः **भक्तवत्सलः** भक्तप्रियः **स** हरिः **पुरुषं** कञ्चन पुरुषं **प्रविष्टः** सन् **तं** [अच्युतप्रज्ञम्,] **मां भविष्यतः शिष्यवराद् विद्धि** जानीहि **इति** इत्थं **अभ्यधात् हि** । तत्वजिज्ञासुना त्वया सेवितोऽहं परितुष्टोऽस्मि । तस्मात् मत्प्रसादादेव तव शिष्यवरो भविष्यति । तदुक्त-प्रकारेण मां जानीहीत्यभ्यधादिति भावः ॥ १३ ॥

(त.चं.) अयं सुभक्तिः । स च भक्तवत्सलः । अत एव वात्सल्यात् तम-भ्यधात् कश्चित् पुरुषं प्रविश्य ॥ १३ ॥

प्रतीक्षमाणं तमनुग्रहं मुदा
निषेवमाणं पुनरम्बुजेक्षणम् ।
सतां गुरुः कारणमानुषाकृति-
र्यतिं प्रशान्तं तमुपाससाद सः ॥ १४ ॥

(प.दी.) प्रतीक्षमाणम् । सतां गुरुः कारणमानुषाकृतिः स वासुदेवनामा तं हरिकृतं **अनुग्रहं प्रतीक्षमाणं पुनर्मुदा अम्बुजेक्षणं** हरिं **निषेवमाणं प्र-शान्तं तं यतिं** अच्युतप्रज्ञं **उपाससाद** शिष्यभावमाप्तुं सिषेवे ॥ १४ ॥

(त.चं.) तत्ववादाविष्करणेन कारणेन मानुषाकृतिः । प्रशान्तं निर्जित-मानसम् । सादरमुपगमनमुपासदनम् ॥ १४ ॥

सुतं यतीन्द्रानुचरं विरागिणं
निशम्य सन्न्यासनिषण्णमानसम् ।

सुवत्सलौ रूप्यतळालयस्थितं
वियोगतान्तौ पितरौ समीयतुः ॥ १५ ॥

(प.दी.) सुतम् । **सुवत्सलौ वियोगतान्तौ पितरौ सुतं यतीन्द्रानुचरं विरागिणं** विरक्तं **सन्यासनिषण्णमानसं रूप्यतळालयस्थितं निशम्य समीयतुः** द्रष्टुं सन्यासं निवारयितुमप्यागतौ ॥ १५ ॥

(त.चं.) सुवत्सलौ । 'वत्सांसाभ्यां कामबले'[५.२.९८] । वत्सशब्दाल्लच् कामवत्यर्थे । अंसशब्दाच्च बलवति । नचात्र वत्सः पुत्रः । नाप्यंसो भुजशिरः । वत्सांसशब्दौ कामबलवचनौ तद्वति प्रत्ययमुत्पादयतः । सुवत्सलौ सुते सुतरां प्रीतिमन्तौ । भाविना सम्भावितेन वा सुतवियोगेन तान्तौ परिग्लानौ । 'तमु काङ्क्षायाम्' । ग्लानौ चेति वक्तव्यम् । पितरौ । 'पिता मात्रा' [१.२.७०]। मात्रा सहवचने पितृशब्दः शिष्यते । माता च पिता च पितरौ ॥ १५ ॥

वराश्रमस्ते जरतोरनाथयो-
र्न जीवतोः स्यादयि नन्दनाऽवयोः ।
सयाचनं वाक्यमुदीर्य ताविदं
परीत्य पुत्राय नतिं वितेनतुः ॥ १६ ॥

(प.दी.) वरेति । **तौ** पितरौ **अयि नन्दन**, अयीत्यव्ययं प्रार्थने वर्तते, अयि सुत, **जरतोः** स्थविरयोः **अनाथयोः** अन्ते वयसि त्वां विना पालकरहितयोः **आवयोः जीवतोः** सतोः **ते वराश्रमः** यत्याश्रमः **न स्यात्** न भवेत् इति **सयाचनं** प्रार्थनासहितं **इदं वाक्यमुदीर्य परीत्य** प्रदक्षिणीकृत्य **पुत्राय नतिं** नमस्कारं **वितेनतुः** चक्रतुः ॥ १६ ॥

(त.चं.) अयीत्यनुनये । 'अयि प्रश्ने चानुनये' इति । 'नन्दनस्तु तनये हर्षकारिणि' इति च । कथं नन्दनो भवन् दुःखकारी भूयाः? ॥ १६ ॥

नतिर्न शुश्रूषुजनाय शस्यते
नतं भवद्भ्यां स्फुटमत्र साम्प्रतम् ।
अहो विधात्रा स्वयमेव दापिता
तदभ्यनुज्ञेति जगाद स प्रभुः ॥ १७ ॥

(प.दी.) **नतिः** । **शुश्रूषुजनाय** सेवकजनाय **नतिः** नमस्कारः **न शस्यते** न प्रशस्यते । तथाऽपि **अत्र** सेवके मयि **साम्प्रतं** इदानीं **स्फुटं** सर्वजनसमक्षं **भवद्भ्यां नतं** नमनं कृतम्, तत एव **विधात्रा** सर्वप्रेरणादिकर्त्रा हरिणा **स्वयमेव** मत्प्रार्थनं विनैव **तदभ्यनुज्ञा** यत्याश्रमानुज्ञा **दापिता** प्रदापिता **इति स प्रभुः जगाद** । **अहो** एतदाश्चर्यम् । अयं भावः– उत्तमो नम्यः हीनो नन्तेति विधिविहितो नियमः । तथा च भवद्भ्यां नतत्वान्मम प्रकृतयत्याश्रमनिबन्धन-मुत्तमत्वं भविष्यतीति विधिना सूचितम् । तस्माद् विधिना दत्ताभ्यनुज्ञ-कत्वान्मम वराश्रमो न परिहार्य इति जगादेति ॥ १७ ॥

(त.चं.) साम्प्रतं सम्प्रति । 'वर्तमाने च युक्ते च साम्प्रतं सम्प्रचक्षते' इति च । प्रभुः प्रसङ्गस्य स्वानुकूलतासम्पादनसमर्थः ॥ १७ ॥

अनुत्तरज्ञः स तमर्थयन् पुन-
र्यतीन्द्रमानम्य गतः प्रियायुतः ।
गृहे वसन् कल्पसमान् क्षणान् नयन्
सुताननेन्दोरनिशं ततोऽस्मरत् ॥ १८ ॥

(भा.प्र.) सुताननेन्दोरस्मरत् । 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी ॥

(प.दी.) **अनुत्तरे**ति । **सः** भट्टारकः **अनुत्तरज्ञः** पुत्रोक्तवाक्यस्य प्रत्युत्तर-मजानन् **प्रियायुतः पुनस्तं** पुत्रं **अर्थयन्** 'अयि नन्दन, त्वया यत्याश्रमो नाङ्गीकर्तव्यः' इति प्रार्थयन् तं **यतीन्द्रं** अच्युतप्रज्ञं **आनम्य** नत्वा । **अर्थयन्** 'अस्मै यत्याश्रमो न दातव्यः' इति प्रार्थयन्निति च योजना । **गतः** स्वमन्दिरं

गतः सन् **ततः** स्वगृहप्राप्त्यनन्तरं **गृहे वसन् क्षणान्** एकैकक्षणं **कल्पसमान्** एकैककल्पसमं **नयन्** गमयन् **अनिशं** निरन्तरं **सुताननेन्दोः** पुत्राननचन्द्रं **अस्मरत्** । सुताननेन्दोरिति 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी । अधीगर्थाः स्मरणार्थाः । कल्पसमानिति दुःखिनां क्षणोऽपि कल्पायते, सुखिनां कल्पोऽपि क्षणायत इति प्रसिद्धः ॥ १८ ॥

(त.चं.) अर्थयन् । अर्थधातुरात्मनेभाष इति वैयाकरणाः । परस्मैभाषमपि बहुलं प्रयुञ्जते । 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इत्यादि । सुताननेन्दोरस्मरत् । 'अधीगर्थदयेशां कर्मणि'[२.३.५२] । स्मरणार्थानां दयतेरीशतेश्च कर्मणि कारके शेषत्वेन विवक्षिते षष्ठी भवति । शेषत्वे चाविवक्षिते द्वितीयैव । सुतस्य स्मरति । सुतं स्मरति । 'दय दानगतिरक्षणेषु' । सर्पिषो दयते । सर्पिर्दयते । 'ईश ऐश्वर्ये' । जगत ईष्टे । जगदीष्टे । अनिशम्– नास्ति निशाऽपि यत्र ॥१८॥

स चिन्तयन् पुत्रमनोरथं शुचा
पुनश्च तीर्त्वोपगतो महानदीम् ।
यतीश्वरानुव्रतमात्मनन्दनं
तमैक्षत ग्रामवरे मठान्तरे ॥ १९ ॥

(भा.प्र.) महानदी 'नेत्रावती' । ग्रामवरस्य 'कार्यूरु' इत्यपभ्रष्टभाषा । मठान्तरस्य 'कुत्याडि' इत्यपभ्रष्टभाषा ॥

(प.दी.) सः । **शुचा** दुःखेन **पुत्रमनोरथं** सुतस्य सन्न्यासविषयेच्छां **चिन्तयन्** स भट्टः **पुनश्च महानदीं** नेत्रावतीं **तीर्त्वा उपगतः** प्राप्तः ग्रामवरे 'कारेयूर्' इत्यपभ्रष्टनामके ग्रामश्रेष्ठे **मठान्तरे** 'कुत्याडि' इत्यपभ्रष्टनाम्नि मठविशेषे **यतीश्वरानुव्रतम्,** यतीश्वरस्य अच्युतप्रज्ञस्य अनुकूलं व्रतं चरित्रं यस्य सः यतीश्वरानुव्रतः, **तं आत्मनन्दनं ऐक्षत** ॥ १९ ॥

(त.चं.) यतीश्वरमनुवर्तमानम् ।'कार्यूरु'[ಕಾಯೂರು] इति ग्रामस्य

'कुत्याडि'[ಕುತ್ಯಾಡಿ] इति च तत्रत्यमठस्य भाषानामेति भावप्रकाशिकायां स्थितम् । अद्यत्वे तु 'कार्नूरु'[ಕಾರ್ನೂರು] इति ग्रामनाम । तत्समीपगतं च प्रदेशम्, यत्र मठ आसीत्, 'कोटयाडि'[ಕೊಟ್ಯಾಡಿ] इति व्यवहरन्ति ॥

स जातकोपाकुलितो धरासुरो
महात्मनां लङ्घनभीरुरप्यलम् ।
सुतस्य कौपीनधृतौ हि साहस-
प्रतिश्रवो मे दृढ इत्यभाषत ॥ २० ॥

(प.दी.) **स** इति । **सः धरासुरः** ब्राह्मणः **अलं** अतितरां **महात्मनां लङ्घनभीरुरपि** महात्मनां लङ्घनादतिक्रमादतितरां भीरुः सन्नपि **जात-कोपाकुलितः** सूनुः स्ववाक्यं न करोतीति जातेन कोपेनाऽकुलितः **इत्य-भाषत** । कथम्? **सुतस्य** मे सुतस्य **कौपीनधृतौ**, उपलक्षणमेतत्, कौपीन-दण्डादिधृतौ सत्यामिति भावः, **मे साहसप्रतिश्रवः** किञ्चित् साहसं कुर्यामिति प्रतिज्ञा, दृढः केनाप्यनिवर्त्य **इत्यभाषत हि** ॥ २० ॥

(त.चं.) महात्मनां लङ्घनभीरुरपि यतीश्वरानुव्रतं तनयं दृष्ट्वा सहसा यती-श्वरेऽपि जातकोपाकुलितः । लङ्घनमतिक्रमः । जात इति तनयो वा । तनये कोपाकुलितः । अच्युतप्रज्ञस्याग्रत एव इत्यभाषत । 'साहसं तु दमे दुष्कर-कर्मणि । अविमृश्यकृतौ धाष्ट्र्ये' इति च ॥ २० ॥

क्षणेन कौपीनधरो निजं पटं
विदार्य हे तात कुरुष्व साहसम् ।
इतीममुक्त्वा प्रभुरब्रवीत् पुनः
शुभान्तरायं न भवांश्चरेदिति ॥ २१ ॥

(प.दी.) **क्षणेने**ति । **प्रभुः** 'सुतस्य कौपीनधृतौ मे साहसप्रतिश्रवो दृढः' इति पितृवाक्यं श्रुत्वा **क्षणेन निजं पटं विदार्य कौपीनधरः** सन् **हे तात,**

चिकीर्षितं **साहसं कुरुष्व इतीमं** तातं **उक्त्वा पुनरब्रवीत्। हे तात, भवान्** विज्ञातभारतादिशास्त्रसारो भवान् **शुभान्तरायं** शुभस्य विघ्नं **न चरेत्** न करोतु **इत्यब्रवीत्** ॥ २१ ॥

(त.चं.) 'वप्ता च तातो जनकः पिता च' इति च। प्रभुः प्रभवति तात-मनुनेतुमिति ॥ २१ ॥

न पुत्र पित्रोरवनं विना शुभं
वदन्ति सन्तो ननु तौ सुतौ मृतौ।
निवर्तमाने न हि पालकोऽस्ति नौ
त्वयीति वक्तारमिमं सुतोऽब्रवीत् ॥ २२ ॥

(भा.प्र.) वदन्ति सन्तः–

'वृद्धौ च मातापितरौ साध्वी भार्या[1] सुतः शिशुः।
अप्यकार्यशतं कृत्वा भर्तव्या[2] मनुरब्रवीत्' इति॥

(प.दी.) ननु यदुक्तं सन्यासस्य शुभत्वाभिप्रायेण शुभान्तरायं न चरे-दिति, तदसत्, पुत्रस्य पितृशुश्रूषाव्यतिरिक्तशुभस्याभावादित्याह पिता– **न पुत्रेत्यादिना। पुत्र** हे सुत, **सन्तो** धर्मशास्त्रप्रवर्तका मन्वादयः **सुतस्य पित्रोरवनं** शुश्रूषादिरूपमवनं रक्षणं विना अन्यं **शुभं** न वदन्ति। तथाहि 'वृद्धौ च मातापितरौ सती भार्या सुतः शिशुः। अप्यकार्यशतं कृत्वा वोढव्या मनुरब्रवीत्' इति। तस्मात् तव यत्याश्रमादपि स्थविरयोरावयोरवनमेव शुभम्। न तत्र मयाऽन्तरायः क्रियते। तस्मात् किमुच्यते त्वया शुभान्तरायं न चरेदितीति पितुरभिप्रायः। सत्यं युवयोः पालकान्तराभावे मया भवच्छु-श्रूषणमेव कार्यम्। सति चान्यपालके कथं युवयोरनाथत्वम्, कथं च मम भवत्पालनमेव शुभमिति चेत् नेत्याह– **नन्विति। तौ सुतौ** तव भ्रातरौ **मृतौ ननु?** त्वमपि जानासि हीत्यभिप्रायः। तस्मात् **त्वयि निवर्तमाने** सति

१. 'सती भार्या' इति वेदाङ्गतीर्थीयपाठः। २. 'वोढव्या' इति च।

निवृत्तिमार्गं यत्याश्रममङ्गीकृतवति सति **नौ** आवयोः **पालको नास्ति हि । इति वक्तारमिमं** पितरं **सुतोऽब्रवीत्** ॥ २२ ॥

(त.चं.) ननु तौ सुतौ मृतौ । प्रायः पूर्वजातौ । त्वयि च गृहान्निवर्तमाने, निवृत्तिमार्गं चानुसरति ॥ २२ ॥

यदा विरक्तः पुरुषः प्रजायते
तदैव सन्न्यासविधिः श्रुतौ श्रुतः ।
न सङ्गहीनोऽपि परिव्रजामि वा-
महं तु शुश्रूषुमकल्पयन्निति ॥ २३ ॥

(भा.प्र.) 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति श्रुतौ श्रुतः ॥

(प.दी.) कथम्? ननु यदुक्तं 'वृद्धौ च मातापितरौ' इत्यादिना न तत् सर्वाधिकारिविषयम् । किन्तु अविरक्तविषयमेव । न विरक्तविषयमेतद् वाक्यम् । तथात्वे श्रुतिविरोधादित्याह– **यदेति । पुरुषो यदा** यस्मिन् काले **विरक्तः प्रजायते तदैव** तस्मिन्नेव काले **सन्न्यासविधिः** सन्न्यासविधानं **श्रुतौ श्रुतः** प्रसिद्धः । सा च श्रुतिः 'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति । तर्हि 'त्वयि निवर्तमाने सत्यावयोः पालको नास्ति' इत्यस्योत्तरमाह– **न सङ्गहीनोऽपीति** । अहं [सङ्गहीनोऽपि] निःसङ्गोऽपि **वां** युवयोः **शुश्रूषुं** सेवकं **अकल्पयन् न परिव्रजामि** सन्न्यासं न गृह्णामि इत्यब्रवीदित्यन्वयः ॥

(त.चं.) शुश्रूषा परिचर्या । श्रोतुमिच्छा च शुश्रूषा । तदङ्गभूता परिचर्या च शुश्रूषा ॥ २३ ॥

बहुश्रुतत्वाद् यदि तत् सहे बला-
न्न सा सवित्री विरहं सहेत ते ।
इति द्विजेनाभिहितेऽनमत् स तं
भवाननुज्ञां प्रददात्विति ब्रुवन् ॥ २४ ॥

(प.दी.) बह्विति । यदि यद्यपि **बहुश्रुतत्वात्** बहुशास्त्रश्रवणबलेन विवेकित्वात् **बलाद्** धैर्यात् **तत्** तव परिव्रजनं **सहे** सोढुं समर्थः । तर्ह्यपि **ते** तव **सा सवित्री** माता **ते विरहं न सहेत इति द्विजेनाभिहिते** सति **सः भवान् अनुज्ञां** उत्तमाश्रमानुज्ञां **प्रददात्विति ब्रुवन्** तं पितरं **अनमत्** ॥ २४ ॥

(त.चं.) भवांस्तावदनुजानातु । मातरं पश्चादनुनेष्यामि ॥ २४ ॥

विचिन्त्य विद्वान् स निरुत्तरीकृत-
स्तथाऽस्तु माताऽनुवदेद् यदीति तम् ।
उदीर्य कृच्छ्रादुपगम्य मन्दिरं
प्रियासकाशे तमुदन्तमब्रवीत् ॥ २५ ॥

(प.दी.) विचिन्त्य । एवं **निरुत्तरीकृतः स विद्वान् विचिन्त्य** अथ किमत्र वक्ष्यामीति विचार्य **यदि माता** तव जननी **अनुवदेत्** संवादं कुर्यात् तर्हि **तथा** त्वदुक्तप्रकारेण **अस्तु इति तं** सुतं **उदीर्य कृच्छ्रात्** सुतवियोगासहत्वात् क्लेशेन **मन्दिरमुपगम्य प्रियासकाशे तं** सुतस्य आत्मनश्च विवादरूपं **उदन्तं** वृत्तान्तं **अब्रवीत्** ॥ २५ ॥

(त.चं.) अनुवदेत् त्वदनुमतं वदेत् ॥ २५ ॥

निशाचरारेरिव लक्ष्मणः पुरा
वृकोदरस्येव सुरेन्द्रनन्दनः ।
गदोऽथ शौरेरिव कर्मकृत् प्रियः
सुभक्तिमान् विश्वविदोऽनुजोऽभवत् ॥ २६ ॥

(प.दी.) निशाचरेति । **अथ पुरा निशाचरारेः** श्रीरामस्य **लक्ष्मण इव कर्मकृत्** सेवकः । **वृकोदरस्य सुरेन्द्रनन्दन इव** अर्जुन इव **प्रियः** । **शौरेः** श्रीकृष्णस्य **गद इव** गदनामक इव **सुभक्तिमान्** । एवं त्रिभिर्गुणैः त्रिभिः समः **विश्वविदः** सर्वज्ञस्य वासुदेवाह्वयस्य **अनुजोऽभवत्** ॥ २६ ॥

(त.चं.) कर्मकृत् प्रियः सुभक्तिमान् । गदो रौहिणेयः प्रियकृष्णः । कृष्णं हि गदाग्रजं गदन्ति । त्रीण्यपि विशेषणानि त्रिष्वपि यथायोग्यम् ॥

कदाचिदाप्यालयबुद्धिरालयं
निवेदयन् पालकमेतमेतयोः ।
दृढस्वसन्न्यासनिषेधनिश्चयां
धवानुमत्येदमुवाच मातरम् ॥ २७ ॥

(प.दी.) **कदाचित्** । **अलयबुद्धिः** प्रळयेऽपि लयरहितबुद्धिः **कदाचिदालयं** मन्दिरं **आप्य** एतं स्वानुजं **एतयोः** पित्रोः **पालकं निवेदयन्** अयं वां पालक इति वदन् **धवानुमत्या** पत्युरनुमतेन **दृढस्वसन्न्यासनिषेधनिश्चयाम्,** दृढमति-निर्बन्धेन स्वसन्न्यासनिषेधे कृतनिश्चयां **मातरमिदमुवाच** ॥ २७ ॥

(त.चं.) आ आप्य । अलयबुद्धिः । न लयमेति बुद्धिरस्येति । आलय-बुद्धिरिति वा । आ लयं लयकालव्यापिनी प्रज्ञाऽस्येति । प्रळयेऽपि प्रतिभात-परावर इत्येतत् । 'पतिर्वरयिता भर्ता च भोक्ता धवः' इति च । स्वाभिप्रायेण धुवति धूनोति धुनोति वा । 'धू विधूनने' । 'धूञ् कम्पने' । प्रेरणे च ॥

वराश्रमाप्तिं मम संवदस्व मां
कदाचिदप्यम्ब यदीच्छसीक्षितुम् ।
यदन्यथा देशमिमं परित्यजन्
न जातु दृष्टेर्विषयो भवामि वः ॥ २८ ॥

(प.दी.) **वराश्रमेति** । **अम्ब, यदि कदाचिदपि मामीक्षितुं** द्रष्टुं **इच्छसि** तर्हि **मम वराश्रमाप्तिं संवदस्व** अनुजानीहि । **अन्यथा** संवादं न करोषि चेत् **इमं देशं परित्यजन् जातु** कदाचिदपि **वः दृष्टेर्विषयो न भवामि यत्** यस्मात् तस्मात् संवदस्वेति भावः ॥ २८ ॥

(त.चं.) वः । तव च सर्वेषां चैतद्देशगतानाम् । गौरवाद् वा बहुवचनम् ॥

इति ब्रुवाणे तनये कदाचिद-
प्यदर्शनं तस्य मृतेर्निदर्शनम् ।
विचिन्त्य पर्याकुलिता चिकीर्षितं
सुतस्य कृच्छ्रान्न्यरुणन्न सा शुभा ॥ २९ ॥

(प.दी.) इतीति । **तनये इति ब्रुवाणे** सति **पर्याकुलिता** किमत्र कार्यमिति सम्भ्रान्ता **सा कदाचिदप्यदर्शनं मृतेः** मरणस्य **निदर्शनं** दृष्टान्तम्, समानमिति यावत्, इति **विचिन्त्य** विचार्य **तस्य सुतस्य चिकीर्षितं** कर्तुमिष्टं **कृच्छ्रात् न न्यरुणत्** न निरुद्धवती । कुतः? **शुभा** स्वभावतः शुभा, अनुकूला ॥

(त.चं.) निदर्शनं ज्ञापकं सूचकमित्येतत् । कृच्छ्रात् । 'करणे च स्तोकाल्पकृच्छ्रकतिपयस्यासत्ववचनस्य'[पा.२.३.३३] इति पक्षे पञ्चमी । मनः कृन्ततीति कृच्छ्रं दुःखम् । कृत्यते वाऽनेन । कृती छेदने । 'कृतेश्छक् क्रू च' [८.३७] इति दशपादिका । कृतेर्धातो रक्प्रत्ययो भवति; छक् क्रू चाऽगमादेशौ भवतः । छ इति क्षीरस्वामी । कृच्छ्रम् । क्रूरम् । 'कृच्छ्रमंहसि कष्टे सान्तपने' इति च ॥ २९ ॥

अथोपगम्यैष गुरुं जगद्गुरुः
प्रसाद्य तं देववरप्रसादितः ।
सदा समस्ताश्रमभाक् सुरेश्वरो
विशेषतः खल्वभजद् वराश्रमम् ॥ ३० ॥

(प.दी.) अथेति । **अथ** अनुज्ञास्वीकारानन्तरं **देववरप्रसादितः** देववरैः प्रसादाभिमुखीकृतः **जगद्गुरुः सुरेश्वरः एषः गुरुं** अच्युतप्रज्ञं **उपगम्य तं प्रसाद्य** स्वगुणैस्तं सन्तोषयित्वा[१] **सदा समस्ताश्रमभाक्** सर्वदा युगपत् समस्ताश्रमभाक् सन्नपि **विशेषतः वराश्रमं** यत्याश्रमं **अभजत् खलु** ।

१.'तोषयित्वा' इति,'सन्तोष्य' इति वा स्वरसम् ।

देवानां युगपत् समस्ताश्रमभाक्त्वं च– 'कृत्स्ना ह्येव गृहिणो देवाः कृत्स्ना ह्येते यतयः । एतेषां न पुत्रा दायमुपयान्ति न चैते गृहान् विसृजन्त्यरागा अद्वेषा अलोभाः सर्वभोगाः सर्वयज्ञाः सर्वकर्तारः' इति श्रुतिसिद्धम् । 'देवा एव ब्रह्मचारिणो देवा गृहस्था देवा वनस्थाः' इति च श्रुतिः ॥ ३० ॥

(त.चं.) जगद्गुरुरपि गुरुमुपगम्य । देववरैः प्रसादितोऽपि मानुषं गुरुं प्रसाद्य । समस्ताश्रमभागपि वराश्रमं पारमहंस्यमभजत् । कुत एष जगद्गुरुः? कुत एष देववरप्रसादितः? कुतश्च समस्ताश्रमभाक्? यतः सुरेश्वरः ॥

क्रियाकलापं सकलं स कालविद्
विधानमार्गेण विधाय केवलम् ।
सदा प्रसन्नस्य हरेः प्रसत्तये
मुहुः समस्तन्यसनं समभ्यधात् ॥ ३१ ॥

(भा.प्र.)[१]**भक्षणादि(?)समस्तकर्म कृत्वा । 'भूः सन्यस्तं मया' इत्यादि समस्तन्यसनाभिधानम् ॥**

(प.दी.) **क्रियेति** । **कालवित्** कालविशेषज्ञः **सः सकलं क्रियाकलापं** यत्याश्रमे कर्तव्यं तद्विधानोक्तं जीवश्राद्धादिसमस्तक्रियाजातं **विधानमार्गेण** तद्विधानोक्तमार्गेण **केवलं** सम्यग् **विधाय सदा प्रसन्नस्य हरेः प्रसत्तये** प्रसादाय **मुहुः समस्तन्यसनं** भूः सन्यस्तं मयेत्यादि देहेन्द्रियात्मनां सन्यसनं भगवति समर्पणाभिधायकं वचनं **समभ्यधात्** प्रैषोच्चारणमकरोदिति भावः ॥ ३१ ॥

(त.चं.) सदा प्रसन्नस्य मुहुः प्रसादविशेषाय केवलम् । समस्तन्यसनं प्रैषोच्चारणम् । तथाहि विदधति–'अथोर्ध्वबाहुः सूर्याभिमुखो भूत्वा ॐ भूः सन्यस्तं मया, ॐ भुवः सन्यस्तं मया, ॐ स्वः सन्यस्तं मया, ॐ

१.सर्वत्रैवं पाठः । अर्थस्तु न स्फुटः । स्फुटं लिपिकृतः प्रामाद्यन् । 'भद्राकरणादि समस्तकर्म कृत्वा' इति स्यात् ।

भूर्भुवःस्वः सन्न्यस्तं मयेति प्रैषोच्चारं ब्रूयात्' इति । भूरित्यव्ययम् । तेन भूः सन्न्यस्ता मयेत्यपपाठः । विधानं विधायकं कल्पादि । तदुक्तमार्गेण पूर्वभाविनं क्रियाकलापं सकलं विधाय । 'कलापः संहतौ बर्हे' इति च । 'आत्मन्यग्नीन् समारोप्य वेदिमध्ये स्थितो हरिम् । ध्यात्वा हृदि त्वनुज्ञातो गुरुणा प्रैषमीरयेत्' इति कात्यायनः । 'विधिवत् प्रैषमुक्त्वाऽथ त्रिरुपांशु त्रिरुच्चकैः । अभयं सर्वभूतेभ्यो मत्तः स्वाहेत्यपो भुवि । निनीय दण्डशिक्यादि गृहीत्वाऽथ बहिर्व्रजेत्' इति कपिलः । शिक्यं काचः । 'जोळिगे'[ಜೋಳಿಗೆ] इति भाषायाम् ॥ ३१ ॥

अनन्तमात्रान्तमुदाहरन्ति यं
त्रिमात्रपूर्वं प्रणवोच्चयं बुधाः ।
तदाऽभवद् भाविचतुर्मुखाकृति-
र्जपाधिकारी यतिरस्य सूचितः ॥ ३२ ॥

(प.दी.) अनन्तेति । **बुधाः** ज्ञानिनः **त्रिमात्रपूर्वम्,** अकार उकारो मकार इति तिस्रो मात्राः पूर्वा आद्या यस्य स त्रिमात्रपूर्वः तं **यं प्रणवोच्चयं** प्रणववर्णसमुदायं **अनन्तमात्रान्तम्,** अनन्ताः मात्राः वर्णाः यस्य वेदस्य सः अनन्तमात्रः तेन अनन्तमात्रेण अन्तः निर्णयः यस्य सः अनन्तमात्रान्तः, तमेवम्भूतं **उदाहरन्ति** । अकारादिवर्णत्रयपूर्वकं अष्टाक्षरात्मकं यं प्रणववर्णसमुदायं अनन्तमात्रेण प्रणवव्याख्यानरूपेण वेदेन निर्णीयमानं प्रवदन्ति ज्ञानिन इति भावः । **अस्य** एवंविधस्य प्रणवस्य **तदा** तस्मिन् काले **सूचितः** सम्यगुचितः **जपाधिकारी यतिरभवत्** । यतिमात्रस्यास्ति प्रणवजपाधिकारः । तस्य मुख्याधिकारी तदाऽभवदिति भावः । कुतः? **भाविचतुर्मुखाकृतिः** भविष्यच्चतुर्मुखः । चतुर्मुखस्यैव वेदोक्तानुष्ठाने मुख्याधिकारित्वात्, अस्य च भविष्यच्चतुर्मुखत्वात् प्रणवानुष्ठाने चायमेव मुख्याधिकारीत्युक्तं भवति ॥ ३२ ॥

(त.चं.) त्रिमात्रो भगवान् । विश्वस्तैजसः प्राज्ञ इति । स एव पूर्वः प्रथमोपास्यो यस्य स प्रणवोच्चयः । क्रमेणानन्तमात्रोऽनन्तरूपो भगवानन्तत उपास्य इत्यनन्तमात्रान्तः । 'अमात्रोऽनन्तमात्रश्च द्वैतस्योपशमः शिवः' इति च श्रुतिः । प्रणवस्य उच्चयः वर्णत्रयसंहतिः ॥ ३२ ॥

गुणानुरूपोन्नति पूर्णबोध इ-
त्यमुष्य नाम द्विजवृन्दवन्दितः ।
उदाहरद् भूरियशा हि केवलं
न मन्त्रवर्णः स च मन्त्रवर्णकः ॥ ३३ ॥

(भा.प्र.) 'दशप्रमतिं जनयन्त' इति मन्त्रवर्णः ॥

(प.दी.) **गुणेति** । **गुणानुरूपोन्नति,** गुणानामनुरूपा उन्नतिः अर्थोन्नतिः यस्य तद् गुणानुरूपोन्नति, अन्वर्थकमिति यावत्, **पूर्णबोध इति** पूर्णप्रज्ञ इति **अमुष्य नाम केवलं मन्त्रवर्णो** वेद एव **नोदाहरत्** किन्तु **स मन्त्रवर्णकश्च** मन्त्रस्य वर्णकः वक्ता उपदेष्टा गुरुरिति यावत् । **स च उदाहरत्** । अयं भावः– 'तृतीयमस्य वृषभस्य दोहसे दशप्रमतिं जनयन्त योषणः' इति मन्त्रवर्णो वेद एव केवलमस्य पूर्णप्रज्ञ इत्यन्वर्थकं नामोदाहरदिति न, किन्तु नामकर्ता गुरुरपि यदृच्छया अस्य पूर्णप्रज्ञ इति नामाकरोदिति भावः । **द्विजवृन्दवन्दितः भूरियशाः** इति विशेषणद्वयं मन्त्रवर्णस्य मन्त्रवर्णकस्य च साधारणम् । 'तृतीयम्' इत्यस्य चार्थः– अस्य वृषभस्य वायोः तृतीयं रूपं योषणः योषित्, आदराद् बहुवचनम्, दोहसे ज्ञानदोहाय जनयन्त अजनयत्, दशप्रमतिं पूर्णप्रज्ञनामकम् । 'दशेति सर्वमुद्दिष्टं पूर्णं सर्वमिहोच्यते । प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः' इति स्मृतेश्चेति ॥

(त.चं.) पूर्णमयं बुबोधेति पूर्णबोधः पूर्णप्रज्ञः । मन्त्रात्मको वर्णसमुदायो मन्त्रवर्णः । मन्त्र इति यो वर्ण्यते । अत एव द्विजवृन्देनाभिष्टुतः–'शब्दब्रह्म सुदुर्बोधम्','सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत',

'पावका नः सरस्वती' इत्यादिना । भूरि यशो भगवद्गुणकीर्तनेऽनन्यतया यस्य । मन्त्रान् वर्णयन् गुरुश्च द्विजवृन्देनाभिवन्दितः । मन्त्राणामर्थवर्णनेनैव लब्धभूरियशाश्च । 'सह नौ यशः' इति हि मन्त्रवर्णः ॥ ३३ ॥

निरङ्गरागं मुखरागवर्जितं
विभूषणं विष्टपभूषणायितम् ।
अमुं धृताषाढमवेक्ष्य मेनिरे
स्वभावशोभाऽनुपमेति जन्तवः ॥ ३४ ॥

(प.दी.) निरङ्गरागम् । जन्तवः निरङ्गरागं अङ्गरागरहितं[१] चन्दनाद्यङ्गरागरहितं **मुखरागवर्जितं** ताम्बूलाञ्जनादिमुखालङ्काररहितं **विभूषणं** काञ्चीकटककेयूराङ्गुलीयकादिभूषणवर्जितम्, एवंभूतं **अमुं** पूर्णप्रज्ञाचार्यं **धृताषाढम्,** 'आषाढो व्रतिनां दण्डः' इत्यमरः[२], **विष्टपभूषणायितं** त्रैलोक्यालङ्कारभूतं **अवेक्ष्य स्वभावशोभा** अकृत्रिमशोभा **अनुपमा** असदृशा **इति मेनिरे** ॥ ३४ ॥

(त.चं.) 'अङ्गरागो विलेपनम्' इति च । चन्दनादिविलेपनम् । विगतभूषणमपि स्वत एव विष्टपभूषणम् । आषाढः पालाशो वर्णिनां दण्डः । आषाढी पूर्णिमा प्रयोजनमस्येत्याषाढः । 'विशाखाषाढादण् मन्थदण्डयोः' [५.१.११०] । वैशाखो मन्थः । आषाढो दण्डः ॥ ३४ ॥

भुजङ्गभूतेशविहङ्गपादिकैः
प्रवन्दितः सावसरप्रतीक्षणैः ।

---

१. 'अङ्गरागरहितम्' इत्यधिकं लिपिकृत्प्रमादायातं स्यात् ।

२. इदममरकोशे न पठ्यते । पठ्यते चाभिधानरत्नमालायाम् । 'आषाढो व्रतिनां दण्डे' इति च मेदिनी ।

ननाम सोऽयं गुरुपूर्वकान् यती-
नहो महीयो महतां विडम्बनम् ॥ ३५ ॥

(प.दी.) भुजङ्गेति। यः **सावसरप्रतीक्षणैः** कदाऽवसरो भविष्यतीत्यवसर-प्रतीक्षणसहितैः **भुजङ्गभूतेशविहङ्गपादिकैः**, भुजङ्गेशः शेषः, भूतेशः रुद्रः, विहङ्गपो गरुडः, भुजङ्गभूतेशविहङ्गपा आदयो येषां देवानां ते भुजङ्ग-भूतेशविहङ्गपादयः, स्वार्थे कप्रत्ययः, तैः **प्रवन्दितः सोऽयं** शेषाद्यशेष-देववन्दितः श्रीपूर्णप्रज्ञाचार्यः **गुरुपूर्वकान् यतीन् ननाम**। तथाहि **महतां** महापुरुषाणां विद्यमानं **विडम्बनं** प्राकृतजनानुकरणं **महीयः** अतिमहत्, **अहो** आश्चर्यम् ॥ ३५ ॥

(त.चं.) प्रकर्षेण सभक्तिश्रद्धं नतः स्तुतश्च। अथापि आश्रमज्येष्ठान् यतीन् ननाम। विडम्बनं लोकानुकरणम्। 'डबि मर्दने' इति पठति काश-कृत्स्नः। 'अनुकारे च' इति पठनीयम् ॥ ३५ ॥

वराश्रमाचारविशेषशिक्षणं
विधित्सुरस्याऽचरितं निशामयन्।
विशेषशिक्षां स्वयमाप्य धीरधी-
र्यतीश्वरो विस्मयमायताऽन्तरम् ॥ ३६ ॥

(प.दी.) वरेति। **धीरधीः यतीश्वरः** अच्युतप्रज्ञः **अस्य** श्रीपूर्णप्रज्ञाचार्यस्य **वराश्रमाचारविशेषशिक्षणं** वराश्रमे कर्तव्यस्याऽचारस्य विशेषशिक्षणं **विधित्सुः** विधातुमिच्छन् **अस्य आचरितम्** आचारं **निशामयन्** पश्यन् **स्वयं** तस्माद् **विशेषशिक्षामाप्य आन्तरं** मानसं **विस्मयमायत** प्रपेदे। अय पय गतावित्यस्माद्धातोः लङ्, आत्मनेपदम् ॥ ३६ ॥

(त.चं.) आयत। अय गतौ। आन्तरं विस्मयमयते स्म। अन्तरेव वि-सिष्मिये। न बहिः प्रकटीचकारेति ॥ ३६ ॥

स रूप्यपीठालयवासिने यदा
ननाम नाथाय महामतिर्मुदा ।
तदाऽमुनाऽग्राहि नरप्रवेशिना
भुजे भुजेनाऽशु भुजङ्गशायिना ॥ ३७ ॥

(प.दी.) स इति । **सः महामतिः** श्रीपूर्णप्रज्ञाचार्यः **यदा रूप्यपीठालयवासिने नाथाय** स्वामिने **मुदा ननाम तदा नरप्रवेशिना** कस्मिंश्चित् पुरुषे प्रविष्टेन, **अमुना भुजङ्गशायिना भुजेन** हस्तेन **भुजे** हस्ते **आशु अग्राहि** गृहीतः ॥ ३७ ॥

(त.चं.) 'भुजो बाहुर्भुजा च स्मर्यते बुधैः' इति च । भुञ्जन्त्यनेनेति भुजो बाहुः । भुञ्जतेऽनेनेति भुजः करः ॥ ३७ ॥

चिरात् सुतत्वं प्रबुभुत्सुना त्वया
निषेवणं मे यदकारि तत्फलम् ।
इमं ददामीत्यभिधाय सोऽमुना
तदा प्रणीय प्रददेऽच्युतात्मने ॥ ३८ ॥

(भा.प्र.) अच्युते आत्मा बुद्धिः प्रज्ञाऽस्येति अच्युतात्मा अच्युतप्रज्ञः ॥

(प.दी.) **चिरात्** । **तदा अमुना** नरप्रवेशिना हरिणा हस्ते गृहीत्वा **प्रणीय** अच्युतप्रज्ञसमीपमानीय **इत्यभिधाय अच्युतात्मने** अच्युतप्रज्ञाय **सः प्रददे** दत्तः । कथमभिधाय? **सुतत्वं** शोभनं तत्वं **प्रबुभुत्सुना** बोद्धुमिच्छता **त्वया चिरात्** बहुकालं **मे निषेवणं** सेवा **अकारि** कृता **यत्** तस्मात् **तत्फलं** तस्य मन्निषेवणस्य फलं फलभूतम् **इमं ददामि** इत्यभिधाय प्रददे इति योजना । मत्प्रसादात् प्राप्तोऽयं तव मम तत्वमुपदेक्ष्यतीत्युक्त्वा प्रददाविति भावः ॥

(त.चं.) अच्युतप्रज्ञाय सः पूर्णप्रज्ञः प्रददे । तत्वं प्रबुभुत्सवे तत्ववादाचार्यः ॥

अनुग्रहं तं प्रतिगृह्य साग्रहं
मुदाऽऽत्मनाऽऽप्तां कृतकृत्यतां स्मरन् ।
अभूदसङ्गोऽपि स तत्सुसङ्गवा-
नसङ्गभूषा ननु साधुसङ्गिता ॥ ३९ ॥

(भा.प्र.) असङ्गभूषा–

'सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते ।
सद्भिः सह स कर्तव्यः सन्तः सङ्गस्य भूषणम्'[1] इति ॥

(प.दी.) **अनुग्रहम्** । **सः** अच्युतप्रज्ञः **तं** भगवत्कृतं **अनुग्रहं साग्रहं** सादरं **प्रतिगृह्य** अङ्गीकृत्य **आत्मना कृतकृत्यतां आप्तां मुदा स्मरन् असङ्गोऽपि** प्राकृतसङ्गरहितोऽपि **तत्सुसङ्गवान्** तस्मिन् सम्यक् सङ्गवान् अभूत् । युक्तमेतत् । कुतः? **साधुसङ्गिता** साधुषु सङ्गिता सङ्गवत्त्वं साधुसङ्गिता **असङ्गभूषा ननु** । असङ्गानां सतामलङ्कारो हि । असङ्गस्य सङ्गाभावस्य भूषेति वा । तथाहि– 'सङ्गः सर्वात्मना त्याज्यः स चेत् त्यक्तुं न शक्यते । सद्भिः सह स कर्तव्यः सन्तः सङ्गस्य भूषणम्' इति श्रुतिः । एवं चात्यक्तसङ्गानां सत्सङ्गः सङ्गत्यागकारणम्, त्यक्तसङ्गानां तु भूषणमेव हीत्युक्तं भवति ॥

(त.चं.) साग्रहं साभिनिवेशम् ॥ ३९ ॥

यियासति स्वस्तटिनीं मुहुर्मुहु-
र्नमत्यनुज्ञार्थिनि भूरिचेतसि ।
तमस्मरत् स्वामिनमेव दूनधी-
र्गुरुर्भविष्यद्विरहाग्निशङ्कया ॥ ४० ॥

(प.दी.) **यियासतीति** । **स्वस्तटिनीं** गङ्गां **यियासति** यातुमिच्छति **भूरिचेतसि** श्रीपूर्णप्रज्ञाचार्ये **अनुज्ञार्थिनि मुहुर्मुहुः नमति** सति **भविष्य-**

---

१. 'भेषजम्' इति क्वचित् पाठान्तरम् ।

द्विरहाग्निशङ्कया दूनधीः दुःखितमानसः **गुरुः तं** रजतपीठगतं **स्वामिनमेव अस्मरत्** ॥ ४० ॥

(त.चं.) स्वस्तटिनी सुरतरङ्गिणी। 'भागीरथी सुरसरिद् विष्णुपदी जाह्नवी तथा गङ्गा । मन्दाकिनी त्रिपथगा सरिद्वरा त्रिदशदीर्घिका प्रोक्ता' इति च । 'सिन्धुः स्रवन्ती तटिनी तरङ्गिणी' इति च ॥ ४० ॥

इतस्तृतीये दिवसे द्युनिम्नगा
त्वदर्थमास्माकतटाकमाव्रजेत् ।
अतो न याया इति तं तदाऽवदत्
प्रविश्य कञ्चित् करुणाकरो हरिः ॥ ४१ ॥

(प.दी.) इतः । **तदा करुणाकरो हरिः कञ्चित् प्रविश्य** इत्य**वदत् तं** पूर्णप्रज्ञमिति । **द्युनिम्नगा** स्वर्गनदी गङ्गा **त्वदर्थं इतः** इदानीं वर्तमानात् कालात् **तृतीये दिवसे आस्माकतटाकं** अस्मदीयतटाकम् **आव्रजेत्** आगमिष्यति । **अतः** अत्रैव स्नातुं शक्यत्वात् **न यायाः** गङ्गायां स्नातुं दूरं न गच्छ **इत्यवदत्** इति योजना ॥ ४१ ॥

(त.चं.) 'नदी धुनी निर्झरिणी च निम्नगा' इति च । कञ्चित् पुरुषं प्रविश्य करुणया ॥ ४१ ॥

तदाज्ञयोपागतजाह्नवीजले
जनोऽत्र सस्नौ सह पूर्णबुद्धिना ।
ततः परं द्वादशवत्सरान्तरे
सदाऽऽव्रजेत् सा तदनुग्रहाङ्किनी ॥ ४२ ॥

(प.दी.) तदिति । **जनः तदाज्ञया** तस्य हरेराज्ञया **अत्र उपागतजाह्नवीजले पूर्णबुद्धिना सह सस्नौ** । **सा** गङ्गा **ततः परं द्वादशवत्सरान्तरे** द्वादशवत्सरमध्ये **सदा** नियमेन **आव्रजेत्**। रजतपीठपुरतटाकमागच्छेत्। कथम्भूता?

तदनुग्रहाङ्किनी । द्वादशवत्सरान्तरे गङ्गाया आगमनं तदनुग्रहस्य तस्मिन् काले भगवता श्रीमध्वाचार्ये कृतस्यानुग्रहस्य अङ्कः चिह्नम्, ज्ञापकमिति यावत्, तदनुग्रहाङ्कः अस्या अस्तीति तदनुग्रहाङ्किनी। भगवता श्रीमध्वाचार्ये कृतस्यानुग्रहस्य चिह्नभूतद्वादशवत्सरान्तरागमनवतीति भावः ॥ ४२ ॥

(त.चं) सदाऽऽव्रजेत् । यत् साम्प्रतमपि प्रत्यक्षमनुभूयते ॥ ४२ ॥

गते दिनानां दशके समासके
वराश्रमं प्राप्य सपत्रलम्बनम् ।
जिगाय जैत्रान् बहुतर्ककर्कशान्
स वासुदेवाह्वयपण्डितादिकान् ॥ ४३ ॥

(भा.प्र.) त्रिदिनं य उपन्यासं व्यधाद् विद्वान् निरन्तरम्।
वैशेषिकाग्र्यो विजितो वासुदेवाह्वयोऽमुना॥

(प.दी.) **गते** । **सः** श्रीपूर्णप्रज्ञाचार्यः स्वयं **वराश्रमं प्राप्य समासके** माससहिते **दिनानां दशके गते** सति **बहुतर्ककर्कशान्** बहुविधैः तर्कैः कर्कशान्, परनिराकरणनिर्दयान्, अत एव **जैत्रान्** जयशीलान् **वासुदेवाह्वय-पण्डितादिकान्**, वासुदेवपण्डित इति कश्चिद् वैशेषिकाग्रणीः, सः आदिर्येषां ते तदादिकाः, तान् तदादिकान् **सपत्रलम्बनं** पत्रलम्बनसहितं यथा भवति तथा **जिगाय** । 'त्रिदिनं य उपन्यासं व्यधाद् विद्वान् निरन्तरम् । वैशेषि-काग्र्यो विजितो वासुदेवाह्वयोऽमुना' इति च ऐतिह्यम् ॥ ४३ ॥

(त.चं.) सपत्रलम्बनम् । पत्रलम्बनं नाम 'यो येन विजितस्तेन तस्मै जयपत्रं देयम्' इत्यादावेव कथानियमं पत्रे विलिख्य सभायां लम्बनम्। लबि अवस्रंसने। वासुदेवपण्डितो नाम यस्त्रिदिनं निरन्तरमुपन्यस्य स्वपक्षं समर्थ्य विद्वत्सभां विस्मापयामास । तेनाऽदिमन्तः तत्सहचरास्तर्ककण्ठाः ॥

गुरोः स्वशिष्यं चतुरं चिकीर्षतः
प्रचोदनाच्छ्रोतुमिहोपचक्रमे ।

अथेष्टसिद्धिश्छलजातिवारिधि-
र्निरादरेणापि महात्मनाऽमुना ॥ ४४ ॥

(प.दी.) **गुरोः** । **अथ महात्मनाऽमुना** श्रीपूर्णप्रज्ञाचार्येण **इष्टसिद्धिः** इष्टसिद्धिनामको ग्रन्थः **श्रोतुमुपचक्रमे** उपक्रान्तः। कथम्भूतः? **छलजातिवारिधिः** छलोत्तरैर्जात्युत्तरैश्च पूर्णा । कथम्भूतेन? **इह** अस्मिन् ग्रन्थे **निरादरेणापि** आदररहितेनापि । तर्हि कुतः श्रोतुमुपचक्रमे? **स्वशिष्यं चतुरं** विदग्धं **चिकीर्षतः गुरोः** अच्युतप्रज्ञस्य **प्रचोदनात्** ॥ ४४ ॥

(त.चं.) इह रजतपीठपुरे श्रोतुमुपचक्रमे । इष्टसिद्धिरिति मायिनामाकरग्रन्थोऽव्ययात्मयतेः शिष्येण विमुक्तात्मयतिना रचितः । कश्चिदाह गामानयेति । अपर उत्तरति– कथमचला भूरानीयेतेति । तदिदं छलमुच्यते । जातिर्व्याहतं वचः । तद् यथा कश्चिदाह– नग्निकेयमस्य जननी । यथा वा– सर्वं मिथ्येति सत्यं वचः । ननु भोः, एतद् वचोऽपि सर्वस्मिन् गतम् । सेयं जातिरुच्यते । 'जनकस्यात्ययो जातिः' इत्याचार्यवचनम् ॥ ४४ ॥

तदाद्यपद्यस्थमवद्यमण्डलं
यदाऽवदत् षोडशकद्वयात्मकम् ।
उपर्यपास्तं तदिति ब्रुवत्यसौ
गुरौ तमूचे प्रणिगद्यतामिति ॥ ४५ ॥

(प.दी.) **तदिति** । **असौ** श्रोता **तदाद्यपद्यस्थं** तस्य श्रोतुमुपक्रान्तस्येष्टसिद्धिनामकस्य ग्रन्थस्य [**आद्यपद्यस्थं**] आद्यपद्यगतं **षोडशकद्वयात्मकं** द्वात्रिंशत्सङ्ख्याकम् **अवद्यमण्डलं** दोषसमूहं **यदाऽवदत्** उद्भावितवान् तदा **तत्** अवद्यमण्डलं **उपरि** उपरितनवाक्ये **अपास्तं** परिहृतम् **इति गुरौ ब्रुवति** सति तर्हि मदुद्भावितदूषणपरिहारमुत्तरमिदानीं **प्रणिगद्यतां इति तमूचे** ॥ ४५ ॥

(त.चं.) तदाद्यपद्यस्थम् । तथाहि तदिदमसह्यं तदाद्यपद्यद्वयम्– 'याऽनुभूतिरजाऽमेयाऽनन्ताऽऽत्मानन्दविग्रहा । महदादिजगन्मायाचित्रभित्तिं नमामि ताम् । इष्टानिष्टाप्तिहानीच्छोस्तत्सिद्धिर्यद्दृशा श्रुतेः । तं मां नत्वेष्टसिद्ध्यर्थं विवृणोम्यात्मसंविदे' इति । उपरितने ग्रन्थे ॥ ४५ ॥

भवत्प्रवक्तृत्वसमर्थता न मे
सकोपमित्थं वदति व्रतीश्वरे ।
अपीह मायासमये पटौ नृणां
बभूव तद्दूषणसंशयाङ्कुरः ॥ ४६ ॥

(प.दी.) **भवदि**ति । इह अस्मिन् **मायासमये** मायिप्रणीते शास्त्रे **पटौ** चतुरे **अपि व्रतीश्वरे** अच्युतप्रज्ञे **मे भवत्प्रवक्तृत्वसमर्थता** भवतो व्याख्यातृत्वे समर्थत्वं **न** । **इत्थं** एवं **सकोपं** कोपसहितं यथा भवति तथा **वदति** सति **नृणां** गुरुशिष्यविवादं शृण्वतां पुरुषाणां **तद्दूषणसंशयाङ्कुरः** तस्य शास्त्रस्य दूषणं सद्वा असद्वेति संशयाङ्कुरः **बभूव** । एतावत्कालं निर्दोषत्वेन निश्चितस्य मायिसमयस्येदानीं सदोषत्वसंशयाङ्कुरोऽभूदिति भावः ॥ ४६ ॥

(त.चं.) तस्य तेनोदितस्य षोडशकद्वयात्मकस्यावद्यमण्डलस्य दूषणं केनापि शक्यं वेति संशयाङ्कुरः । समयः सिद्धान्तः । समीयते अनेनेति । 'स्मृताः कृतान्तराद्धान्तसिद्धान्तसमयाः समाः' इति च ॥ ४६ ॥

बुधोऽभिधानं श्रवणं बुधेतरो
ध्रुवं विदध्याद् विमुमुक्षुरात्मनः ।
यतिर्विशेषादिति लोकचोदनात्
प्रवक्ति मायासमयं स्म पूर्णधीः ॥ ४७ ॥

(प.दी.) बुधः । **आत्मनो विमुमुक्षुः** आत्ममोक्षमिच्छन् **बुधो** विद्वान् **ध्रुवं** निस्संशयं **अभिधानं** व्याख्यां **विदध्यात्** कुर्यात् । **बुधेतरो** मुमुक्षुः अविद्वान्

श्रवणं विदध्यात् । एवं तावत् सर्वसाधारणम् । तत्रापि **यतिः विशेषात्** व्याख्यां श्रवणं वा कुर्यात्, 'उपनिषदमावर्तयेदुपनिषदमावर्तयेत्' इति श्रुतेः व्याख्याश्रवणादिरूपेण शास्त्रावृत्तिमन्तरेण कर्तव्यान्तराभावाद् **यति-विशेषात्** गृहस्थादिभ्योऽतिशयेन व्याख्यानं श्रवणं वा कुर्यादिति **लोकचोद-नात्** तदा तत्र मिळितानां जनानां चोदनात् वाचा प्रेरणात् **पूर्णधीः** श्रीपूर्ण-प्रज्ञाचार्यः **मायासमयं** मायिशास्त्रं **प्रवक्ति स्म** व्याचख्यौ । स्मातीते ॥

(त.चं.) अभिधानं प्रवचनम् । 'स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः' इति हि श्रुतिः । प्रवक्ति दोषान् प्रकटयन् वक्ति ॥ ४७ ॥

अखण्डितोपन्यसनं विसंशयं
ससम्प्रदायं प्रवचो दृढोत्तरम् ।
समागमन् श्रोतुममुष्य साग्रहा
जनाः श्रुताढ्याश्चतुरा बुभूषवः ॥ ४८ ॥

(प.दी.) अखण्डितेति । **श्रुताढ्याः** श्रुतसम्पन्नाः **जनाः चतुराः** युक्ति-विशेषज्ञानेन विदग्धाः **बुभूषवः** भवितुमिच्छवः सन्तः **अखण्डितोपन्यसनं** निरन्तरोपन्यासयुक्तं **विसंशयं** निःसंशयं **दृढोत्तरं** इतस्ततश्चोदकानां दूष-णरहितोत्तरोपेतं **ससम्प्रदायममुष्य प्रवचो** व्याख्यानं **श्रोतुं साग्रहाः** आग्रहोपेताः **समागमन्** ॥ ४८ ॥

(त.चं.) सम्प्रदायः समीचीनः प्रकृष्टश्च दायः । पुरातनी सम्पत् । ज्ञाना-नुष्ठानपरम्परा । 'आम्नायः सम्प्रदायः स्यात् पारम्पर्यं गुरुक्रमः' इति च । 'अथ प्रवचनं वेदे प्रकृष्टवचनेऽपि च' इति च । साग्रहाः । 'आग्रहोऽनुग्र-हासक्त्योः' इति च । श्रुताढ्या भवितुमिच्छवः । तेन चतुरा बुभूषवः ॥

गुरोरुपान्ते श्रवणे रतैर्द्विजैः
स पञ्चषैर्भागवते कदाचन ।

बहुप्रकारे लिखितेऽपि वाचिते
प्रकारमेकं प्रभुरभ्यधाद् दृढम् ॥ ४९ ॥

(प.दी.) गुरोः । **कदाचन गुरोरुपान्ते** समीपे **श्रवणे** श्रीभागवतश्रवणे **रतैः** निरतैः **पश्चषैः द्विजैः बहुप्रकारे लिखिते** बहुप्रकारत्वेन भिन्नपाठत्वेन लिखिते **भागवते वाचितेऽपि स प्रभुः** श्रीपूर्णप्रज्ञाचार्यः दृढं निःसंशयं **एकं प्रकार-मभ्यधात्** । श्रीभागवतव्याख्यानावसरे श्रोतृजनैः स्वस्वपुस्तकेषु पृथक्पृथक् भिन्नपाठत्वेन लिखिते भागवते वाचितेऽपि स प्रभुरेकमेव प्रकारं पाठप्रकारं दृढमभ्यधात् । अयमेव पाठो व्यासाभिमत इत्यभ्यधादिति भावः ॥ ४९ ॥

(त.चं.) लिखिते भागवते बहुप्रकारे सत्यपि एकं प्रकारं व्यासाभिमतं दृढमभ्यधात् । प्रभुः । आह हि स्वयमेव– 'तत्प्रसादबलोद्धतः' इति ॥

परप्रकारेष्वपि सम्भवत्सु ते
विनिर्णयोऽस्मिन् कथमित्युदीरिते ।
मुकुन्दबोधेन महाहृदब्रवीत्
प्रकारमेनं भगवत्कृतं स्फुटम् ॥ ५० ॥

(प.दी.) **परेति** । **परप्रकारेष्वपि** पाठान्तरेष्वपि **सम्भवत्सु** सत्सु **ते** तव **अस्मिन्** भवदुक्तेऽस्मिन् पाठे **विनिर्णयः** अयमेव साम्प्रदायिकः पाठो नान्य इति निश्चयः **कथमिति मुकुन्दबोधेनोदीरिते** सति **महाहृत्** श्रीपूर्णप्रज्ञा-चार्यः **एनं प्रकारं** आत्मनाऽभिहितं पाठप्रकारं **भगवत्कृतं** श्रीवेदव्यासकृतं **स्फुटं** सम्यक् सोपपत्तिकं **अब्रवीत्** ॥ ५० ॥

(त.चं.) मुकुन्दबोधेनाच्युतप्रज्ञेन ॥ ५० ॥

निगद्यतां गद्यमिहैव पश्चमे
जगद्गुरोर्वेत्थ कृतिस्थितिं यदि

इति ब्रुवाणे यतिसत्तमे स्वयं
तदुक्तमार्गेण जगाद भूरिहृत् ॥ ५१ ॥

(प.दी) **निगद्यतामिति** । **यदि जगद्गुरोः** श्रीवेदव्यासस्य **कृतिस्थितिं** निर्माणप्रकारं **वेत्थ** जानासि तर्हि **इहैव** श्रीभागवत एव **पञ्चमे** पञ्चमस्कन्धे **गद्यं निगद्यतां** पाठतोऽर्थतश्च निगद्यताम्, **इति यतिसत्तमे** अच्युतप्रज्ञे **ब्रुवाणे भूरिहृत्** श्रीपूर्णप्रज्ञाचार्यः **स्वयं तदुक्तमार्गेण** श्रीवेदव्यासोक्त-मार्गेण **जगाद** पाठतोऽर्थतश्चावदत् ॥ ५१ ॥

(त.चं.) यतिसत्तमे । 'अग्रेसरं सत्तममुत्तमं च' इति च । प्राज्ञतमो वा सत्तमः । 'सूरिः पण्डितः सन् मनीषी' इति च । तदुक्तमार्गेण । यथा जगद्-गुरुणा व्यासेन शुकायोक्तम् ॥ ५१ ॥

अशेषशिष्यैश्च तदाज्ञया तदा
परीक्षणायैक्षि समस्तपुस्तकम् ।
स तत्र हन्तैकतमे स्थितं त्यजन्
न तावदध्यायनिकायमभ्यधात् ॥ ५२ ॥

(प.दी.) अशेषेति । तदा **तदाज्ञया** गुरोराज्ञया **अशेषशिष्यैश्च परीक्षणाय** तदुक्तप्रकारेण पाठः पुस्तकेष्वस्ति नास्ति वेति परीक्षणार्थं **समस्तपुस्तकं** पञ्चमस्कन्धात्मकसमस्तपुस्तकं **ऐक्षि** दृष्टम् । **सः** श्रीपूर्णप्रज्ञाचार्यः **तत्र** अशेषपुस्तकमध्ये **एकतमे स्थितं** शुद्धपाठात्मकैकतमे पुस्तके दृष्टं पाठं **न त्यजन्** पुस्तकापेक्षां विना पञ्चमे गद्यं वदन्नपि शुद्धपाठात्मकैकतमपुस्तक-गतपाठानुसारेण वदन्निति भावः । **तावत्** तदा पञ्चमस्कन्धे **अध्याय-निकायं** अध्यायसमूहं **अभ्यधात्,** पाठतश्चार्थतश्चावदत् । **हन्त** अहो आ-श्चर्यम् ॥ ५२ ॥

(त.चं.) एकतमे पुस्तके स्थितं पाठं न त्यजन् । अध्यायनिकायम् । ननु

कथमिदम्? 'सङ्घे चानौत्तराधर्ये'[३.३.४२] इति किल सूत्रं पठति पाणिनिः। प्राणिनां समुदायो हि सङ्घः। उत्तराधरभावरहिते हि सङ्घे वाच्यमाने चिनोतेर्घञ् भवति, चकारस्य च ककार इति हि तदर्थः। तेन निचीयत इति निकायः। स्याद् भिक्षुनिकायः। स्याद् ब्राह्मणनिकायः। कथमध्यायनिकायः? विशिष्टवचनमिदम्। तस्मिन्नर्थे पदमिदं भवति। नतु तस्मिन्नेव। अप्राणिसमुदायेऽपि भवति। तथाहि मेदिनीकारः–'निकायस्तु पुमान् लक्ष्ये सधर्मिप्राणिसंहतौ। समुच्चये' इति च। तद्यथा संस्तवः परिचय इति विशिष्टवचनम्। सम्यक् स्तवनमपि भवत्येव संस्तवः। अयोगव्यवच्छेद एवायम्। नान्ययोगव्यवच्छेदः ॥ ५२ ॥

अत्र जन्मनि न यत् पठितं ते
जैत्र भाति कथमित्यमुनोक्ते।
पूर्वजन्मसु हि वेद पुरेदं
सर्वमित्यमितबुद्धिरुवाच ॥ ५३ ॥

(भा.प्र.) वेद पुरा। वेदेत्यस्य लडादेशत्वात् 'पुरि लुङ् चास्मे' इति सूत्रादतीतार्थत्वम्॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य भावप्रकाशिकाख्यटीकायां चतुर्थः सर्गः

—०—

(प.दी.) अत्रेति। जैत्र जयशील, **ते** त्वया **अत्र जन्मनि** अस्मिन् जन्मनि **यद्** वेदपुराणादिकं कथितं **न पठितं** तत् **कथं भाति** प्रतिभाति इति **अमुना** गुरुणा **उक्ते** सति **अमितबुद्धिः** श्रीपूर्णप्रज्ञाचार्यः **इदं सर्वं पूर्वजन्मसु** अतीतजन्मसु **वेद पुरा** व्यज्ञासिषं इत्यु**वाच हि**। वेद पुरेत्यत्र 'यावत् पुरानिपतयोर्लट्' इति सूत्रेणातीतार्थे लडादेशः। तस्य च 'विदो लटो वा' इति णलादेशः ॥ ५३ ॥

(त.चं.) वेद पुरा। 'विदो लटो वा'[३.४.८३]। लिडादेशाः णलादयः

विदधातोर्लटोऽपि भवन्ति विकल्पेन। तेन वेत्ति वेद च। 'पुरि लुङ् चास्मे' [३.२.१२२]। पुराशब्द उपपदे स्मशब्दवर्जिते लुङ् भवति, लडपि भवति। तेन वेद पुरा, अवेदिषं पुरा। अत्र यत् प्राचीनटीकासु पठ्यते–'यावत् पुरा-निपातयोर्लट्' इति सूत्रेणातीतार्थे लडिति, तल्लिपिकृत्प्रमादपतितं प्रतीमः। भविष्यदर्थे हि तत्र लड् विधीयते, नातीतार्थे। अत्र रथोद्धता त्रिष्टुप् छन्दः ॥ ५३ ॥

इति बहुविधविश्वाश्चर्यचित्तप्रवृत्ते-
र्जगति विततिमापन्नूतनाऽप्यस्य कीर्तिः।
क्षपिततततमस्का भास्करीव प्रभाऽलं
सुजनकुमुदवृन्दानन्ददा चन्द्रिकेव ॥ ५४ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते चतुर्थः सर्गः

—०—

(प.दी.) इतीति। इति एवं **बहुविधविश्वाश्चर्यचित्तप्रवृत्तेः**, बहुविधा नानाविद्याविषया विश्वाश्चर्या सर्वलोकानामाश्चर्यभूता चित्तस्य प्रवृत्तिर्यस्य स तथोक्तः, तस्य **अस्य** श्रीपूर्णप्रज्ञाचार्यस्य **कीर्तिर्नूतनाऽपि जगति [अलं] विततिं** व्याप्तिं **आपत्** ययौ। केव? **भास्करी** सूर्यसम्बन्धिनी **प्रभेव**। कथम्भूता? **क्षपिततततमस्का** क्षपितं निरस्तं ततं व्याप्तं सर्वजनहृद्गतं तमः अज्ञानं यया सा तथोक्ता। भास्करी प्रभा निरस्तजगद्व्याप्तान्धकारा। पुनः कथम्भूता? **चन्द्रिकेव सुजनकुमुदवृन्दानन्ददा** सज्जनाख्यकुमुदसमूहा-नन्दकरी। चन्द्रिका कुमुदवृन्दानन्दकरी ॥ ५४ ॥

इति श्रीमध्वविजयटीकायां पदार्थदापिकायां
वेदाङ्गतीर्थमुनिकृतायां चतुर्थः सर्गः

—०—

(त.चं.) चित्तस्य प्रवृत्तिः, चित्तं च प्रवृत्तिश्च वा । मालिनी छन्दः । अतिशक्करी । लक्षणं तूक्तम् ॥ ५४ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
सर्गं चतुर्थं व्याचख्यौ सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां तत्वचन्द्रिकायां चतुर्थः सर्गः

—०—

[आदितः श्लोकाः– १६५+५४=२१९]

त्वरितमुद्यतविस्तृतमस्तकः प्रतिददंश यदैनमविक्षतम् ।
प्रभुपदारुणचारुतराङ्गुलीविहतिपिष्टतनुः प्रतताम सः ॥ [३.३९]

पञ्चमः सर्गः

[पूर्णप्रज्ञाचार्यस्य वेदान्तसाम्राज्येऽभिषेकः। आनन्दतीर्थ इति नामकरणम्। अच्युतप्रज्ञसुहृदः कस्यचिद् यतेः सशिष्यगणस्याऽऽगमनम्। तच्छिष्याणां तार्किकाणामानन्दतीर्थविजिगीषा। आनन्दतीर्थेन तदुक्तिखण्डनम्। तेषां पराजयः। आनन्दतीर्थस्य विद्वत्सभासु अनुमानतीर्थ इति प्रशंसा। बुद्धिसागरवादिसिंहयोर्वादार्थमागमनम्। आनन्दतीर्थेन तयोः पराजयः। पराजितयोस्तयोर्निशायामेव पलायनम्। आनन्दतीर्थेन परभाष्यदोषाविष्करणम्, सूत्रार्थवर्णनं च। स्वतनयोत्कर्षदर्शनेन मध्यगेहभट्टस्य प्रसन्नता। अच्युतप्रज्ञेन भाष्यरचनप्रचोदना। ज्येष्ठयतिना सूत्रप्रवचनप्रचोदना। आचार्यस्य सगुरोर्दक्षिणदेशयात्रा। भिक्षावसाने द्विशताधिकानां कदलीफलानां भक्षणम्। पयस्विनीतीरे भाविन्याश्चण्डिकायाः स्मरणम्। अनन्तपुरे सूत्रव्याख्यानम्। 'कुदुपुस्तूरु'जातेन सङ्करेण तदाक्षेपः। तत्पक्षीयैः स्वगुरोः पीनस्फिक्शंसनम्। सङ्करेण मध्वदण्डखण्डनप्रतिज्ञा। रामेश्वरयात्रा। तत्र मिथ्याप्रतिज्ञस्य सङ्करस्यापहास्यता। रामेश्वरे चातुर्मास्यम्। श्रीरङ्गयात्रा। प्रत्यागमने पयस्विनीतीरगतदेवालये निवासः। मध्वदिदृक्षया तत्र जनतासमागमः।]

वेदान्तविद्यानिजराज्यपालने सङ्कल्प्यमानो गुरुणा गरीयसि ।
अदभ्रचेता अभिषिच्यते पुरा स वारिभिर्वारिजपूरितैरथ ॥ १ ॥

(प.दी.) वेदान्तेति । **अथ सः अदभ्रचेताः**, दभ्रमल्पम्, अदभ्रमनल्पं परिपूर्णं चेतो यस्य सोऽदभ्रचेताः, **गुरुणा वारिजपूरितैः** शङ्खपूरितैः **वारिभिः** जलैः **अभिषिच्यते पुरा** अभिषिक्तः । 'यावत्पुरानिपातयोर्लट्' इत्यतीतार्थे(?) लट् । कथम्भूतः? **गरीयसि** अतिमहति **वेदान्तविद्यानिजराज्यपालने,** वेदान्तविद्या ब्रह्ममीमांसाशास्त्रम्, तदेव निजराज्यम्, तस्य पालने व्याख्यानेन शिष्यादिषु सम्प्रदायप्रवर्तनाख्यरक्षणे तत्प्रतिकूलादिनिवारणे च **सङ्कल्प्यमानः** । वेदान्तव्याख्यानादिष्वयं समर्थस्तत्र प्रवर्ततामिति मनसा सङ्कल्प्य गुरुणा योगराज्येऽभिषिक्तोऽभूदिति भावः ॥ १ ॥

(त.चं.) अदभ्रचेताः । 'विपुलं पुष्कळं पुष्टमदभ्रमभिधीयते' इत्यभिधानम् । अभिषिच्यते पुरा अभ्यषिच्यत । 'पुरि लुङ् चास्मे' इत्युक्तम् । वारिजपूरितैः । 'जलजं कमले शङ्खे' इति च । सर्गेऽस्मिन्नापञ्चाशं श्लोकं इन्द्रवंशावंशस्थयोः संसृष्टिरुपजातिर्जागतं छन्दः, ऋते पञ्चमादेकविंशाच्चतुर्विंशात् त्रयस्त्रिंशाच्च । जतौ जरौ वंशस्थम् । ततौ जराविन्द्रवंशा । पञ्चमं वंशस्थबद्धम् । एकविंशं चतुर्विंशं त्रयस्त्रिंशं चेन्द्रवंशाबद्धम् । अत्रोत्तरार्द्धे वंशस्थम् ॥ १ ॥

आनन्दरूपस्य परस्य पात्रधी-
रानन्दसन्दायिसुशास्त्रकृत् स यत् ।
आनन्दतीर्थेतिपदं गुरूदितं
बभूव तस्यात्यनुरूपरूपकम् ॥ २ ॥

(भा.प्र.) आनन्दाय तीर्थं शास्त्रमस्येत्यानन्दतीर्थः । आनन्देन विष्णुना शुद्ध इति वा॥

(प.दी.) आनन्देति । **आनन्दतीर्थ इति गुरूदितं** गुरुणाऽभिहितं **पदं** नाम **तस्य** श्रीपूर्णप्रज्ञाचार्यस्य **अत्यनुरूपरूपकं** अतिशयेन अनुकूलस्वरूपं **बभूव** । कुतः? **सः** श्रीपूर्णप्रज्ञाचार्यः **आनन्दरूपस्य परस्य** सर्वोत्तमस्य हरेः **पात्रधीः** पात्रभूतबुद्धिः **यत्** यस्मात् । आनन्दाख्यस्य हरेरावासभूतबुद्धित्वादानन्दतीर्थ इत्यर्थः । अत्र तीर्थशब्देन पात्रमुच्यते । आनन्दस्य तीर्थभूतः आनन्दतीर्थ इति विग्रहः । इतोऽप्यानन्दतीर्थनामान्वर्थकमित्याह–**आनन्दसन्दायी**त्यादिना । **सः आनन्दसन्दायिसुशास्त्रकृत्**, आनन्दसन्दायि आनन्दसन्दानशीलं सुशास्त्रं शोभनं शास्त्रं कृतवानिति आनन्दसन्दायिसुशास्त्रकृत्, **[यत्]** यस्मात् तस्माच्चानन्दतीर्थनामान्वर्थकमित्यर्थः । अत्र तीर्थशब्देन शास्त्रमुच्यते । अस्मिन्नर्थे आनन्दप्रदं तीर्थं शास्त्रं यस्य स आनन्दतीर्थ इति विग्रहः । शङ्खोदकैरभिषिच्य **आनन्दतीर्थेति** गुरूदितं नामात्यर्थमन्वर्थकमासीदित्यभिप्रायः ॥ २ ॥

(त.चं.) यस्य धीरानन्दमयस्य ब्रह्मणः पात्रमधिष्ठानं स आनन्दतीर्थः । 'वायुरनिलममृतम्' इति किल श्रुतिः । अ इत्यानन्दमयः । तस्य निलयनमनिलः । स एवाऽनन्दतीर्थः । यस्य तत्वावादाख्यं शास्त्रं सतामानन्दाय स आनन्दतीर्थः । 'पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद् दर्शनेषु च' इति । आनन्देन विष्णुना तीर्थः पवित्र इति चाऽनन्दतीर्थः । पवित्रं हि तीर्थमुच्यते । 'पा-तॄ-तुदि-वचि-रिचि-सिचिभ्यस्थक्' [६.३२] इति दशपादिका । पा पाने । पिबति तेजांसीति पीथः सूर्यः । तॄ प्लवनतरणयोः । तरत्यनेन संसारमलमिति तीर्थस्तीर्थं वा । तुद व्यथने । तुदत्यनेनेति तुत्थं द्रव्यम् । वच परिभाषणे । उच्यत इत्युक्थं साम । रिचिर् विरेचने । रिच्यत इति रिक्थं

धनम् । षिच क्षरणे । सिच्यत इति सिक्थं मधूच्छिष्टम् । वयं तु न वैयाकरणानामेव पन्थानमतिपतामः । निर्वचनान्तरं च भवति । तथाहि– पार तीर कर्मसमाप्तौ । पारयतीति पार्थः । तीरयतीति तीर्थस्तीर्थं वा । आनन्दतीर्थ इति पदमानन्दतीर्थेतिपदम् । तद्यथा राम इति पदं रामपदम् । तथाहि प्रयोगः–'शुद्धोदनेत्येव जिनेति चोक्तः' इति । तुरीयपादे वंशस्थम् । इन्द्रवंशाऽन्यत्र ॥ २ ॥

कदाचिदत्रोपययौ यतिः सखा
गोविन्दबुद्धेर्बहुशिष्यसंवृतः ।
अमुष्य शिष्या अनुमानशिक्षिता-
स्तदाऽजिगीषन् गुरुबुद्धिमुद्धताः ॥ ३ ॥

(प.दी.) कदाचिदिति । **कदाचित्** कस्मिंश्चित् काले **बहुशिष्यसंवृतः गोविन्दबुद्धेः** अच्युतप्रज्ञाचार्यस्य **सखा यतिरत्रोपययौ । तदा अमुष्य** आगतस्य यतेः **शिष्याः अनुमानशिक्षिताः** तर्कशास्त्रचतुराः अत एव **उद्धताः** अहङ्कारिणः सन्तः **गुरुबुद्धिं** श्रीपूर्णप्रज्ञाचार्यं **अजिगीषन्** जेतुमैच्छन् ॥

(त.चं.) अनुमानशिक्षिताः। येऽनुमानेनानुभवमपि निराचिकीर्षन्ति । तर्कनिश्चितचित्तवृत्तयः । येऽतर्क्यमपि तितर्कयिषन्ति । द्वितीयवर्जं वंशस्थम् । एवमुत्तरत्रापि ॥ ३ ॥

भिदा सुसाध्येत्यनुमानमत्र तैः
प्रायुज्यताऽशु प्रतिपक्षभीषणम् ।
अखण्डयद् व्यक्तमखण्डधीरिदं
स पक्षदक्षः फणिनं विराडिव ॥ ४ ॥

(भा.प्र.) अत्र भिदायाम्। अनुमानम् – 'विमतौ भिन्नौ नियम्यनियाम-

कत्वात्, राजपुरुषवदि'ति। किमिदं विशेषणं पक्षाद् भिन्नमाहोस्विदभिन्नमुत भिन्नाभिन्नम्। नाऽदिमः, सम्बन्धापेक्षयाऽनवस्थानात्। न मध्यमः, पक्षमात्रस्य विशेषणमात्रस्य वाऽभिप्रेतत्वप्रसङ्गात्। न चान्तिमः, उभयदोषापातात्। व्यवस्थाया अपरिदृश्यमानत्वादित्यखण्डयत्। इदं च विशेषविनिर्मुक्तानां विशेषनिग्राहकम् ॥

(प.दी.) भिदेति। **तैः** शिष्यैः **भिदा** भेदः **सुसाध्या** सुखेन साधयितुं शक्या इति एवमुक्त्वा **अत्र** भेदसाधने **प्रतिपक्षभीषणं** प्रतिवादिभयङ्करं **अनुमानमाशु प्रायुज्यत** प्रयुक्तम्। तदनुमानं किमिति चेदुच्यते– विमतौ जीवपरमात्मानौ भिन्नौ नियम्यनियामकत्वात्, राजपुरुषवदिति। **सः अखण्डधीः इदं** अनुमानं **व्यक्तं** सम्यक् **अखण्डयत्**। कथम्भूतः? **पक्षदक्षः** अभ्युपगतपक्षसमर्थने तद्दूषणपरिहारे च समर्थः चतुरः। कः कमिव? **विराट्** पक्षिराजः **फणिनं** सर्पं **इव**। विराडपि पक्षाभ्यां दक्षः। खण्डनप्रकारश्चोच्यते। किमिदं विशेषणं भिन्नत्वलक्षणं पक्षाद् भिन्नमाहोस्विदभिन्नमुत भिन्नाभिन्नम्? न प्रथमः। तथाहि– भिन्नयोर्विशेषणपक्षयोः सम्बद्धयोर्विशेषणविशेष्य-भावोऽसम्बद्धयोर्वा? तत्र द्वितीयेऽतिप्रसङ्गात् सम्बद्धयोरेव विशेषण-विशेष्यभावो वाच्यः। सम्बन्धश्च भिन्नयोरेव न चाभिन्नयोः। सम्बन्धस्य द्विष्ठत्वात्। तथा च विशेषणस्य भेदस्य विशेष्ययोर्भेदिनोश्च परस्परसम्बद्ध-योरेव विशेषणविशेष्यभावो वक्तव्यः। तत्रापि सम्बन्धान्तरविवक्षायां तत्रापि भेदापेक्षया भवितव्यम्। एवं भेदपरम्परापेक्षयाऽनवस्था स्यात्। न द्वि-तीयः। विशेषणमात्रस्य वा विशेष्यमात्रस्य वाऽभ्युपगमेन द्वयाभावप्रस-ङ्गात्। न तृतीयः। प्राचीनपक्षद्वयोक्तदोषद्वयापातात्। व्याहतेश्च। तस्मात् प्रतिज्ञाया एवासम्भवाद् भेदसाधनमशक्यमेवेत्यखण्डयत् ॥ ४ ॥

(त.चं.) यद्यप्यस्ति भिदा। अथापि विशेषं भेदप्रतिनिधिमनङ्गीकुर्वतां न सुसाध्येत्यखण्डयत्। अखण्डा पूर्णा धीः प्रज्ञा। स्वपक्षसाधने परपक्षबाधने च दक्षः। विराड् गरुडः। 'पक्षी विर्विष्किरस्तथा विकिरः' इति च। सोऽपि पक्षाभ्यां डयने फणिमर्दने च समर्थः। व्यक्तं स्फुटम् ॥ ४ ॥

अथापि मिथ्या विमतं मतत्वतो
विवादनिर्मुक्तवदित्यवादि तैः ।
अनेन सत्यं विमतं मतत्वतो
यथा घटादीत्यनुमा न्यगद्यत ॥ ५ ॥

(प.दी.) **अथापि** । अथ भेदसाधनखण्डनानन्तरं **अपि तैरित्यवादि** । **विमतं** सत्यत्वमिथ्यात्वाभ्यां विप्रतिपत्तिविषयभूतं वियदादिकं **मिथ्या, मतत्वतः** दृश्यत्वात् । **विवादनिर्मुक्तवत्** विप्रतिपत्तिरहितवत् । मतत्व-मिथ्यात्वाभ्यां सम्प्रतिपन्नशुक्तिरजतादिवदिति यावत् । **अनेन** श्रीपूर्णप्रज्ञा-चार्येण **इत्यनुमा** अनुमानं **न्यगद्यत** निगदिता । कथम्? **विमतं** सत्यत्व-मिथ्यात्वाभ्यां विमतिविषयभूतं वियदादिकम्, **सत्यं** अबाध्यम्, **मतत्वतः** दृश्यत्वात् । **यथा घटादि** । घटादिवस्तु यथा दृश्यत्वात् सत्यं तद्वदिति ॥

(त.चं.) मा भूद् भिदा । इष्टं हि तत् । मिथ्या हि भिदा । विश्वस्य मिथ्यात्वात् । तर्हीदमापतितमभिदा सुसाध्येति । तदिदमनुमिमते– अथापि मिथ्या ॥ ५ ॥

हेतोरतिव्याप्तिरवादि तैर्यदा
सकौतुकैस्तूर्णमसाववित्स्मयः ।
न शुक्तिरूप्यादि मतं यदन्यथा
मतं तदित्यादि वदन् जिगाय तान् ॥ ६ ॥

(भा.प्र.) घटादिनिदर्शनमसम्प्रतिपन्नमिति चेत्, शुक्तिरजतादि च बाध्यत्वाद-सत्त्वेनानुभूयमानं सदसद्विलक्षणतया न सम्प्रतिपन्नम् । तत् साधयिष्यते चेदिदं प्रत्यक्षेण साधितमित्युत्तरमिति 'इत्यादि'शब्दाभिप्रेतम् ॥

(प.दी.) **हेतोः** । **सकौतुकैः** ससम्भ्रमैः **तैः यदा तूर्णं हेतोः** दृश्यत्वापर-पर्यायस्य मतत्वहेतोः **अतिव्याप्तिः** अनैकान्तिकता **अवादि** उक्ता । प्रपञ्च-

सत्यत्वसाधने प्रयुक्तस्य दृश्यत्वापरपर्यायस्य मतत्वहेतोः मिथ्याभूते शुक्तिरजतादौ विपक्षेऽपि वर्तमानत्वादनैकान्तिकत्वेन न तेन प्रपञ्चसत्यत्वसाधनं शक्यमिति तैरुक्तमिति भावः। तदा **अविस्मयः असौ** श्रीमध्वाचार्यः **इत्यादि वदन् तान् जिगाय**। कथम्? भवेदिदं मतत्वहेतोरनैकान्तिकत्ववर्णनं यदि शुक्तिकादौ प्रतीतस्य रजतादेर्मतत्वं दृश्यत्वं स्यात्। न चैतदस्ति। तदाह– **नेति**। **शुक्तिरूप्यादि** शुक्तिरजतादि सत्यत्वेन प्रतीताकारात् **अन्यथा** असत्यत्वेन **मतं** अनुभवसिद्धं **यत्** यस्मात् तस्मात् **[तत्] न मतम्**। विपक्षे शुक्तिरजतादौ न मतत्वं वर्तत इति न तस्यानैकान्तिकत्वमिति। अयं भावः। दृश्यत्वं नाम दृग्दृश्ययोः सम्बन्धः। तत्र च शुक्तिकादौ प्रतीतस्य रजतादेः 'असदेवेदं रजतं प्रत्यभात्' इत्यादिना बाधोत्तरकालमसत्त्वानुभवादसता च सम्बन्धायोगान्न शुक्तिरूप्यादिना दृक्सम्बन्धः। किन्तु शुक्तिकादिसन्निकृष्टमेवेन्द्रियं दोषवशादत्यन्तासद्रजताद्याकारेणावगाहत इति शुक्तिकादेरेव दृश्यत्वाभ्युपगमान्न मिथ्याभूतरजतादेः दृश्यत्वमिति नानैकान्तिकता हेतोरिति। ननु सत्यत्वसाधनानुमाने घटादिनिदर्शनमसम्प्रतिपन्नम्। घटादेरस्माभिर्मिथ्यात्वाभ्युपगमात्। तथा च दृष्टान्तः साध्यविकल इति चेत्, तर्हि मिथ्यात्वसाधनानुमाने शुक्तिरजतादिनिदर्शनमस्माकमसम्प्रतिपन्नम्। तथा हि– विमतं मिथ्या मतत्वादित्यत्र मिथ्याशब्देन न तावदसत्त्वं विवक्षितम्। तथात्वे मायिनामपसिद्धान्तप्रसङ्गात्। तस्मात् मिथ्याशब्देन सदसद्विलक्षणत्वमेव विवक्षितम्। एवं च सदसद्विलक्षणसाधने शुक्तिरजतादिकं निदर्शनत्वेनोपात्तम्। न च तत् सदसद्विलक्षणत्वेनास्माकं सम्प्रतिपन्नम्। असदेव रजतं प्रत्यभादिति बाधोत्तरकालं तस्यासत्त्वानुभवात्। तथा च शुक्तिरजतादौ सदसद्विलक्षणत्वाभावात् मिथ्यात्वसाधनानुमानेऽपि निदर्शनं साध्यरहितमिति भावः। ननु शुक्तिरजतादिकं सदसद्विलक्षणमेवावगन्तव्यमित्यत्रार्थापत्तिरस्ति। तथा हि– सच्चेन्न बाध्येत, असच्चेन्न प्रतीयेत, बाध्यते प्रतीयते चेदम्, अतः

ख्यातिबाधान्यथानुपपत्त्या सदसद्विलक्षणमिति चेन्न। सत्त्वेन ख्यातिरसत्त्वेन बाध इति सदसदात्मकत्वेनाप्युपपत्तेः । नन्वेतद् विरुद्धमिति चेत् । हन्त तर्हि सदसद्विलक्षणत्वमपि किमिति न विरुद्धम्? विमतमनिर्वचीयं बाध्यत्वात्, यन्नानिर्वचनीयं न तद् बाध्यम्, यथाऽऽत्मेत्यनुमानेनानिर्वचनीयत्वं शुक्तिरजतादेः साधयाम इति चेत् तर्हि घटादेरपि सत्यत्वं 'सन् घटः सन् पटः' इत्यादिप्रत्यक्षेण सिद्धमित्युत्तरमित्यादिकमादिशब्देनोक्तम् ॥ ६ ॥

(त.चं.) हेतोरतिव्याप्तिरिति दुष्परिहरेयं वाचोयुक्तिः । अथ कथमुत्तितीर्षतीति सकौतुकैः । 'कौतुकं च कुतूहलम्' इति च । अविस्मयोऽसम्भ्रान्तः ॥ ६ ॥

तत्त्वेऽप्यतत्त्वे विमतेऽनुमां वदन्
तदप्रतिष्ठां प्रतिपादुकः स्वयम् ।
विजित्य विश्वान् विदुषां सभास्वसौ
जगाम नाम्नाऽप्यनुमानतीर्थताम् ॥ ७ ॥

(भा.प्र.) तदप्रतिष्ठां प्रतिपादुकः। 'लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्' इत्युकञ्प्रत्ययः॥

(प.दी.) तत्त्वे । **असौ** श्रीपूर्णप्रज्ञाचार्यः **विदुषां सभासु विमते** तत्रतत्र प्रस्तुते तत्तत्प्रमेये विप्रतिपन्ने सति, तत्तत्प्रमेयमेवमनेवमिति च विवादे सतीति यावत् । **तत्त्वे** तस्य प्रमेयस्य तत् स्वरूपमुपपन्नमित्येतस्मिन्नर्थे, **अतत्त्वेऽपि** तस्य तत्स्वरूपत्वमनुपपन्नमित्येतस्मिन्नर्थे च **अनुमां वदन् विश्वान्** सर्वान् **विजित्य नाम्नाऽपि अनुमानतीर्थतां जगाम** । तस्य भावस्तत्त्वमिति चात्र विग्रहः । नन्वेवं परस्परविरुद्धार्थद्वयसाधनेऽप्यनुमानोपन्यासे सत्यनुमानयोः परस्परविरुद्धत्वेन अप्रतिष्ठत्वं स्यादिति चेन्नेदमनिष्टमित्याह – **तदिति** । **स्वयं तदप्रतिष्ठां** तस्यानुमानस्याप्रतिष्ठां प्रतिष्ठाभावं **प्रतिपादुकः** प्रतिपादनशीलः । प्रतिष्ठा नाम नियतप्रामाण्यम् । तदभाव-

मनुमानस्य साधयन्निति भावः । तर्ह्यनुमानप्रामाण्याभ्युपगमविरोध इति चेन्न। प्रत्यक्षाद्यनुरूपस्यैव प्रामाण्याभ्युपगमात् । केवलस्य तदनभ्युपगमात् । तथा च स्वयमेवोक्तम्– 'न चानुमानस्य नियतप्रामाण्यम् । सर्वत्र शक्यते कर्तुमागमं हि विनाऽनुमा । तस्मान्न सा शक्तिमती विनाऽऽगममुदीक्षितुम् । प्रत्यक्षागममाहात्म्यादनुमानं प्रमाणताम् । याति नैवान्यथा तस्य नियतत्वं क्वचिद् भवेत्' इति। प्रतिपादुक इति, 'लषपतपदस्थाभूवृषहनकमगमशॄभ्य उकञ्' इति उकञ्प्रत्यायः । अत एव तदप्रतिष्ठामित्यत्र 'न लोकाव्ययनिष्ठाखलर्थतृनाम्' इत्यनेन सूत्रेण षष्ठीप्रतिषेधः ॥ ७ ॥

(त.चं.) ननु भिदामपि खण्डयति, अभिदामपि । कथमिदम्? अन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वात्। आह– तत्त्वेऽप्यतत्त्वे। तस्या अनुमाया अप्रतिष्ठाम्। 'तर्काप्रतिष्ठानात्' इति सूत्रम्। 'नैषा तर्केण मतिरापनेया' इति श्रुतिः । अनुसृत्य मानं ह्यनुमानं नाम । तत् कथं किमपि केवलं साधयेत्? प्रतिपादुकः । 'लष-पत-पद-स्था-भू-वृष-हन-कम-गम-शॄभ्य उकञ्' [३.२.१५४] । लषादिभ्यस्तच्छीलादिषु कर्तृषु उकञ्प्रत्यय इत्युक्तं प्रथमे । अत एव 'तदप्रतिष्ठाम्' इति द्वितीया । तथाहि पाणिनिः– 'न लोकाव्ययनिष्ठाखलर्थतृनाम्'[२.३.६९] इति । ल-उ-उक-अव्यय-निष्ठा-खलर्थ-तृनां प्रयोगे 'कर्तृकर्मणोः कृति' [२.३.६५] इति प्राप्ता षष्ठी न भवति। तथाहि मुख्यतः शतृशानचौ लादेशौ । हरिं भजन् भजमानो वा । हरिं भजिष्णुः । तदप्रतिष्ठां प्रतिपादुकः । कमेर्भाषायामप्रतिषेधः । दास्याः कामुकः । हरिं ध्यात्वा । हरिं ध्यातुम् । 'क्तक्तवतू निष्ठा'। मनसा हरिं गतः । मनसा गतवान् हरिम् । 'ईषद्दुःसुषु कृच्छ्राकृच्छ्रार्थेषु खल्' [३.३.१२६] इत्युक्तः खलर्थः । ईषत्करं सुकरं वा योगिभिर्ध्यानम् । दुष्करं भवता । अपवादान् वदिता । अनुमानतीर्थः अनुमानेनैव तरति कथायाः पारमिति ॥ ७ ॥

समस्तवादीन्द्रगजप्रभङ्गद-
श्चरन्नवन्यां प्रतिपक्षकाङ्क्षया ।
वेदद्विषां यः प्रथमः समाययौ
स वादिसिंहोऽत्र सबुद्धिसागरः[1] ॥ ८ ॥

(भा.प्र.) वैशेषिकविशेषज्ञो वादिसिंहाभिधो द्विजः ।
महीं विजित्य सम्प्राप्तो बौद्धाग्र्यं बुद्धिसागरम् ।
खण्डितस्तेन पाण्डित्यात् तत्पक्षापेक्षकोऽभवत् ॥
तौ श्रुत्वा मध्ववैदग्धीं प्राप्तौ तद्गुरुमूचतुः ।
वादिनौ वादकामौ द्वौ भगवंस्त्वामिताविति ।
बुद्ध्यब्धिबुद्धिमाश्रित्य परो वादी कथां व्यधात् ॥

(प.दी.) **समस्तेति** । **समस्तवादीन्द्रगजप्रभङ्गदः** सर्ववादिश्रेष्ठाख्यगजानां पराजयप्रदः । **अवन्यां** भुवि **प्रतिपक्षकाङ्क्षया** प्रतिवादीच्छया **चरन्,** क्वास्ति प्रतिवादीत्यन्विष्यावन्यां पर्यटन्, **वेदद्विषां** बौद्धानां **प्रथमः** अग्रणीः **यः बुद्धिसागरः** बुद्धिसागरनामा बौद्धः **सः अत्र** अच्युतप्रज्ञसमीपं प्रति **सवादिसिंहः** आत्मना वादे विजित्य स्वपक्षे निक्षिप्तेन वादिसिंहाख्येन द्विजेन सहितः **समाययौ** । तच्चोक्तम्– 'वैशेषिकविशेषज्ञो वादिसिंहाभिधो द्विजः । महीं विजित्य सम्प्राप्तो बौद्धाग्र्यं बुद्धिसागरम् । खण्डितस्तेन पाण्डित्यात् तत्पक्षापेक्षकोऽभवत् । तौ श्रुत्वा मध्ववैदग्धीं प्राप्तौ तद्गुरुमूचतुः । वादिनौ वादकामौ द्वौ भगवंस्त्वामिताविति । बुद्ध्यब्धिबुद्धिमाश्रित्य परो वादी कथां व्यधात्' इति ॥ ८ ॥

(त.चं.) यः पूर्वं वेदवादी सन्नपि बुद्धिसागरमतावलम्बेन वेदद्विषां प्रथमः सम्बभूव सः समस्तवादीन्द्रगजप्रभङ्गदो वादिसिंहः सबुद्धिसागरः समाययौ । युक्तं चैवमन्वयनम् । सिंहो हि गजप्रभङ्गदः । न सागरः ॥ ८ ॥

---

१. 'सवादिसिंहः अत्र सः बुद्धिसागरः' इति वेदाङ्गतीर्थसम्मतः पदपाठः । नातिरुचिरमेतत् ।

तस्योरुदुर्गर्ववतो जिगीषया निशातमादत्त मुकुन्दधीर्द्रुतम् ।
स्वशिष्यहस्तेन मठान्तरेषुधेः सुपक्षदक्षं सुखतीर्थमार्गणम् ॥ ९ ॥

(प.दी.) **तस्येति** । **मुकुन्दधीः** अच्युतप्रज्ञः **उरुदुर्गर्ववतः** अहमेव विद्वदग्रणीः, मत्समः कोऽस्तीति दुरहङ्कारवतः **तस्य** बुद्धिसागरस्य[1] **जिगीषया निशातं** अतितीक्ष्णबुद्धिं **सुपक्षदक्षं** शोभनस्वसिद्धान्ते चतुरं **सुखतीर्थमार्गणं** श्रीमदानन्दतीर्थाख्यशरं **मठान्तरेषुधेः** मठान्तराख्यनिषङ्गात् **स्वशिष्यहस्तेन द्रुतमादत्त** । प्राप्तप्रतिवादिनिराकरणाय सुखतीर्थाचार्यमन्यमठगतं स्वशिष्येणाऽह्वयामास, प्रतिभटनिरासाय निषङ्गाद् बाणमिवेति भावः ॥ ९ ॥

(त.चं.) सिंहस्येव उरुदुर्गर्ववतस्तस्य वादिसिंहस्य जिगीषया सुखतीर्थाख्यं मार्गणमादत्त । मार्गणोऽपि हि निशातो भवति । सुपक्षदक्षश्च भवति । निशातो निशितः । सुपक्षैः शोभनपतत्रैः सञ्जातवेगतया लक्ष्यवेधदक्षः । तस्य बुद्धिसागरस्येति न स्वरसम् । वादिसिंहो हि पूर्वप्रस्तुतः । 'बुद्ध्यब्धिबुद्धिमाश्रित्य परो वादी कथां व्यधात्' इति स एव हि कथां व्यधात् । 'स वादिसिंहस्य गिरम्–' इत्युपरि परामर्शाच्च । अपिच सिंहजिगीषया मार्गणमाददीत । न सागरजिगीषया ॥ ९ ॥

जैत्रं प्रजिज्ञासु कुतूहलाकुलं
नृणां कुलं प्रत्वरितं निशामयन् ।
अवन्दतोपेत्य गुरुं गरिष्ठधीः
स रूप्यपीठायतनोत्तमस्थितम् ॥ १० ॥

(प.दी.) **जैत्रमिति** । **जैत्रं** वादे जयशीलम्, तत्सामर्थ्ययुक्तमिति यावत्, **प्रजिज्ञासु** ज्ञातुमिच्छत्, **कुतूहलाकुलं** सम्भ्रमविवशम्, **प्रत्वरितं** अतिवेगयुक्तम्, **नृणां** पुरुषाणां **कुलं** समूहं **निशामयन्** पश्यन् **सः गरिष्ठधीः** श्रीपूर्णप्रज्ञाचार्यः **रूप्यपीठायतनोत्तमस्थितं गुरुमुपेत्य अवन्दत** ॥ १० ॥

---
१. 'वादिसिंहस्य' इति तु स्वरसम् ।

(त.चं.) प्रजिज्ञासु अतिवेलजिज्ञासम् । अत एव प्रत्वरितं अतित्वरम् । 'निभालनं निशामनं निध्यानमवलोकनम्' इति च ॥ १० ॥

स वादिसिंहस्य गिरं गरीयसी-
मखण्डयत् पण्डितमण्डलान्तरे ।
तीक्ष्णेन वाक्येन मितेन वेगिना
गदां शरेणेव विशारदो मुहुः ॥ ११ ॥

(प.दी.) सः । **विशारदः** परनिराकरणचतुरः **सः** श्रीपूर्णप्रज्ञाचार्यः **तीक्ष्णेन** प्रतिवादिना सोढुमशक्येन **मितेन** शब्दापेक्षयाऽल्पेन **वेगिना** वक्तुमुचितं कालमनतिक्रम्योक्तेन **वाक्येन गरीयसीं वादिसिंहस्य गिरं पण्डितमण्डलान्तरे** विद्वत्समूहमध्ये **मुहुरखण्डयत्** । केन कामिव? **विशारदः** युद्धपण्डितः **तीक्ष्णेन** निशितेन **मितेन वेगिना शरेण गदामिव** ॥ ११ ॥

(त.चं.) मुहुरसकृदखण्डयत् । गरीयसीं गदां तीक्ष्णेन मितेन वेगिना शरेणेव । विशारदः प्रगल्भः । 'विशारदः पण्डिते च धृष्टे' इति च ॥ ११ ॥

असावसूयन् द्विनवप्रकारतो
व्यचीक्लृपत् कश्चिदथार्थमुच्चकैः ।
जगद्विजेतुश्च जये ससंशय-
स्तावज्जनोऽजायत पूर्णचेतसः ॥ १२ ॥

(प.दी.) असौ । अथ श्रीमध्वेन स्ववाक्यखण्डनानन्तरमपि **असूयन्** असूयां कुर्वन् **असौ** वादिसिंहः **कश्चिदर्थं** पदार्थं **उच्चकैः** उच्चैः ध्वनिना **द्विनवप्रकारतः** अष्टादशप्रकारेण **व्यचीक्लृपत्** कल्पयामास । **तावत्** तदा **जनः** तत्र मिळितो जनः **जगद्विजेतुः पूर्णचेतसः** श्रीपूर्णप्रज्ञाचार्यस्य **च जये** जयविषये **ससंशयः** श्रीमध्वो विजेष्यति[1] नवेति संशययुक्तः **अजायत** अभूत् ॥ १२ ॥

---

१. 'विजेष्यते' इति स्वरसम् ।

(त.चं.) व्यचीक्लृपत् विकल्पयामास । विविधं समर्थयामास वा । कृपू सामर्थ्ये । 'कृपे रो लः'[८.२.१८] । 'कृपो रो लः' इत्येके पठन्ति ॥

विकल्पकोटीरथ खण्डयन् द्रुतं
रेजेऽधिकं स्मेरमुखो बृहन्मतिः ।
तमस्ततीर्वा द्युमणिर्विशुद्धया
गवा श्रितो विष्णुपदं सदास्पदम् ॥ १३ ॥

(भा.प्र.) सदास्पदम्, नक्षत्रास्पदं च ॥

(प.दी.) विकल्पेति । **अथ विकल्पकोटीः** वादिसिंहकृतविकल्पपक्षान् **द्रुतं** अविळम्बितं **विशुद्धया गवा** वाचा **खण्डयन्** । **विष्णुपदं** श्रीहरिचरणं **श्रितः** आश्रितः । **स्मेरमुखः** स्मितवक्त्रः । अनेनाऽयासाभावः सूचितः । **बृहन्मतिः** श्रीपूर्णप्रज्ञाचार्यः **अधिकं रेजे** अशोभत । क इव? **सदास्पदं** सतामाश्रयभूतं प्राणिनामाश्रयं वा **विष्णुपदं** आकाशमाश्रितः **द्युमणिः** सूर्यः **विशुद्धया गवा** स्वतेजसा **तमस्ततीर्वा** तमोनिकरमिव । 'वा विकल्पोपमानयोः' ॥ १३ ॥

(त.चं.) विकल्पकोटीः विकल्पप्रभेदान् । गवा वाङ्मुखेन मयूखेन च । विष्णुपदं श्रितः । 'विष्णोः पदे परमे मध्व उत्सः' इति हि श्रुतिः । द्युमणिश्च विष्णुपदमाकाशम् । 'तिमिररिपुर्द्युमणिरंशुमानंशुः' इति च । 'व्योमाम्बरं विष्णुपदं च खम्' इति च । सन्ति सीदन्ति वा सन्तः सञ्चावन्तः सज्जना वा । दोषा ळसन्ति दिवा सीदन्तीति सन्ति नक्षत्राणि । हरिचरणं सतामास्पदमाश्रयः । आकाशं तु सतां नक्षत्राणामास्पदम् ॥ १३ ॥

अगाधमात्मन्यतिवेलमुद्धतं
तिरस्कृताशेषसरस्वतीततिम् ।
कामं महामानसकुम्भसम्भवो
लघूचकारेत्यपि बुद्धिसागरम् ॥ १४ ॥

(भा.प्र.) सरस्वत्यो वाण्यो नद्यश्च ॥

(प.दी.) **अगाधम्** । **महामानसकुम्भसम्भवः** श्रीपूर्णप्रज्ञाचार्यागस्त्यः **अगाधं** गम्भीरबुद्धिम्, **आत्मनि** आत्मविषये **अतिवेलं** अतितरां **उद्धतं** अविनीतम्, **तिरस्कृताशेषसरस्वतीततिं** निराकृताशेषविद्वज्जनवाग्जालं **बुद्धिसागरमपि,** न केवलं वादिसिंहमेव किन्तु वादिसिंहनिराकरणानन्तरमतिसंरम्भात् प्रत्यवतिष्ठमानं बुद्धिसागरमपि **इति** वादिसिंहनिराकरणप्रकारेण **कामं** यथेच्छम्, अनायासेनेति यावत्, **लघूचकार** खण्डिताहङ्कारं चकार । प्रागगस्त्यः **अगाधं** अतळस्पर्शं **आत्मनि** स्वस्मिन् **अतिवेलं** वेलामतिक्रम्य **उद्धतं तिरस्कृताशेषसरस्वतीततिं** निराकृताशेषसरित्समूहं सागरमिवेति श्लेषाभिप्रायः ॥ १४ ॥

(त.चं.) 'अतलस्पर्शमगाधम्' इति च । 'वाग् वाणी भारती भाषा गौर्गीर्ब्राह्मी सरस्वती' इति च । 'नदी धुनी निर्झरिणी च निम्नगा कूलङ्कषा शैवलिनी सरस्वती' इति च । कुम्भसम्भवोऽगस्त्यः, मित्रावरुणयोरुर्वश्यां जातः । 'अथागस्त्यः कुम्भयोनिरगस्तिः कलशीसुतः' इति च । 'अगस्त्यश्च वसिष्ठश्च मित्रावरुणयोर्ऋषी । रेतः सुषिचतोः कुम्भे उर्वश्याः सन्निधौ तथा' इति च भागवते । 'तयोरादित्ययोः सत्रे दृष्ट्वाऽप्सरसमुर्वशीम् । रेतश्चस्कन्द तत् कुम्भे न्यपतत्' इति चान्यत्र ॥ १४ ॥

श्व एव वादोऽस्त्विति वादिनौ खला-
वद्योत्तरं भाति यदीर्यतामिति ।
मध्वे ब्रुवाणेऽमत तौ जितौ जनः
स निश्चिकायापि निशापलायनात् ॥ १५ ॥

(प.दी.) **श्व** इति । वादः **श्व एवास्तु इति वादिनौ** वदन्तौ **खलौ** दुष्टौ वादिसिंहं बुद्धिसागरं च **मध्वे** श्रीमध्वाचार्ये **यद्युत्तरं** अस्मद्युक्तिखण्डनोत्तरं **भाति** प्रतीयते तर्हि **अद्य** इदानीं **ईर्यतां** उच्यताम् । अन्यथा 'प्रत्युत्तरा-

प्रतिपत्तिरप्रतिभा' इति अप्रतिभानाम निग्रहस्थानं युवयोः **इति ब्रुवाणे** सति **जनः** तूष्णीं स्थितौ **तौ** दृष्ट्वा **जितौ** पराजितौ **अमत** मेने । **सः** जनः **निशापलायनात्** निशायामेव पलायनात् **निश्चिकायापि** । तौ निशायामेव पलायितौ श्रुत्वा पराजिताविति निश्चयमकरोच्च ॥ १५ ॥

(त.चं.) अमत अमनिष्ट । मनु अवबोधने । स जनस्तौ जिताविति निश्चिकायापि निशापलायनात् ॥ १५ ॥

बुद्ध्यब्धिना वादिवरेण चाऽर्जितां
जयश्रियं भूपरिवर्तिना चिरात् ।
अहो मुहूर्तादयमप्रयत्नवा-
नवाप्तवानित्यतिविस्मितं जनैः ॥ १६ ॥

(प.दी.) बुद्धीति । **अयं** श्रीमध्वाचार्यः **भूपरिवर्तिना** भुवं पर्यटता **बुद्ध्यब्धिना** बुद्धिसागरेण **वादिवरेण च** वादिसिंहेन च **चिरात् आर्जितां जयश्रियं मुहूर्तात्** मुहूर्तमात्रेण **अप्रयत्नवान्** आयासरहितः **अवाप्तवान्** प्राप । अपहृतवानिति भावः । **अहो इति जनैः अतिविस्मितम्** ॥ १६ ॥

(त.चं.) चिरादर्जिताम्, अपिच भूपरिवर्तनादिना महता प्रयत्नेनार्जितां मुहूर्तादयमप्रयत्नवानवाप्तवान् ॥ १६ ॥

व्याख्यान् कदाचिन्मणिमद्विनिर्मितं
भाष्यं जनैस्तर्कविशारदैर्वृतः ।
उवाच वाचं परिहासहासवान्
सम्मोदतीर्थः सुरमोददायिनीम् ॥ १७ ॥

(प.दी.) व्याख्यानिति । **कदाचित् मणिमद्विनिर्मितं** सङ्करनाम्ना भुव्युत्पन्नेन मणिमता विरचितं **भाष्यं** ब्रह्मसूत्रभाष्यं **व्याख्यान्** व्याकुर्वन् **तर्कविशारदैः** तर्कशास्त्रचतुरैः **जनैर्वृतः सम्मोदतीर्थः** श्रीमदानन्दतीर्थाचार्यः **परिहास-**

हासवान् परिहासरूपहासयुक्तः **सुरमोददायिनीं** सुराणां सन्तोषदायिनीं **वाचमुवाच** ॥ १७ ॥

(त.चं.) व्याख्यान् प्रकटं दोषोद्घाटनेन विवृण्वन् । तर्कपण्डितैर्वृतः । शारद इत्यप्रतिभानवानुच्यते । तद्विपरीतः प्रतिभासम्पन्नो विशारद उच्यते । परिहासहासवान् नर्मणा हसन् ॥ १७ ॥

सत्सूत्रभावे प्रविचारिते पृथग्
भाष्याभिसन्धौ च विशुद्धबुद्धिभिः ।
निगृह्य गूढाग्रहमुग्रमेतयो-
र्मान्योऽन्वयोऽन्योन्यमहो न दृश्यते ॥ १८ ॥

(प.दी.) **सदिति** । **विशुद्धबुद्धिभिः** निर्मलचित्तैः पुरुषैः **उग्रं** नरकाद्यनर्थप्रदं **गूढाग्रहं** विचारमार्गमपहाय एवमेव तत्वमित्येवंरूपमाग्रहं **निगृह्य** परित्यज्य **सत्सूत्रभावे** शोभनब्रह्मसूत्राभिप्राये **पृथक्** भाष्यं विहाय **प्रविचारिते**, **भाष्याभिसन्धौ** भाष्याभिप्राये **च** **प्रविचारिते** सति **एतयोः** सूत्रसाङ्कर-भाष्ययोः **अन्योन्यं** मिथः **मान्यः** परस्परविरोधाभावेनाङ्गीकर्तुमुचितः **अन्वयः** व्याख्यानव्याख्येयरूपः सम्बन्धः **न दृश्यते** । **अहो** एवंविधेऽप्यस्मिन् भाष्ये महाजनस्य कथमादर इति भावः । तथाहि– सूत्रेषु विष्णोरनन्तगुणपरिपूर्णत्वं निर्दोषत्वं चेतनाचेतनात्मकसर्वप्रपञ्चविलक्षणत्वं मुख्यतो वचनवृत्त्या सर्ववेद-प्रतिपाद्यत्वं मुक्तौ सर्वजीवनियामकत्वं प्रपञ्चसत्यत्वमित्यादयोऽर्थाः प्रति-पाद्यन्ते । हन्त भाष्ये तु विष्णोर्निर्गुणत्वं जीवाभेदेन सकलदोषभाजनत्वं सर्वशब्दावाच्यत्वं प्रपञ्चमिथ्यात्वं मुक्तौ जीवब्रह्मैक्यमित्यादयोऽर्थाः सूत्र-विरुद्धाः प्रतिपाद्यन्ते । तस्मात् परस्परविरुद्धयोः सूत्रभाष्ययोः कथं व्याख्येय-व्याख्यानभावलक्षणसम्बन्धः? कथं च प्रमाणतमसूत्रविरुद्धभाष्ये महाजनानां प्रमाणत्वाभिमान इति भावेन **अहो** इत्युक्तमिति भावः ॥ १८ ॥

(त.चं.) गूढाग्रहमन्तर्निलीनमसदभिनिवेशनम् । सद्भिर्मान्योऽन्वयो न दृश्यते ॥

इति ब्रुवाणे प्रतिपादयत्यलं
भाष्येऽत्र दोषान् प्रबलान् मुहुर्मुहुः ।
तस्मिंस्तु विस्मेरधियोऽपि यत्नतो
न स्थेयसः पर्यहरन्निमानमी ॥ १९ ॥

(प.दी.) इतीति । इति [तु] **ब्रुवाणे तस्मिन्** श्रीमध्वाचार्ये **अत्र भाष्ये प्रबलान्** दुष्परिहारान् **दोषान् मुहुर्मुहुरलं** सम्यक् **प्रतिपादयति** सति **विस्मेरधियः** विस्मितचित्ताः **अमी** पर्यासीनाः तर्कविशारदाः जनाः **स्थेयसः** अतिस्थिरान् **इमान्** श्रीमध्वेन उद्भावितान् दोषान् **यत्नतोऽपि न पर्यहरन्** ॥

(त.चं.) स्थेयसः स्थिरतरान् दोषान् । स्थिरस्य ईयसुनि परे स्थादेशः । 'प्रिय-स्थिर-स्फिर-उरु-बहुल-गुरु-वृद्ध-तृप्र-दीर्घ-वृन्दारकाणां प्र-स्थ-स्फ-वरु-बंहि-गरु-वर्षि-त्रब्-द्राघि-वृन्दाः' [६.४.१५७] । प्रेयान् । स्थेयान् । स्फेयान् बहुलतरः । वरीयान् । बंहीयान् बहुलतरः । गरीयान् । वर्षीयान् वृद्धतरः । त्रपीयान् अतिशयेन तर्पकः । तृप्रः पुरोडाश इति सायणादयः । तृप्रमाज्यं काष्ठं चेति दशपादिकावृत्तिकारः । तृप्रं दुःखमित्येके । तृप्रस्तर्पक इति तु स्वरसम् । द्राघीयान् अतिदीर्घः । अतितरां वृन्दारकः मनोज्ञो मुख्यो वा वृन्दीयान् । एवमिष्ठनि इमनिचि च प्रेष्ठः प्रेमेत्यादि ॥

नन्वस्य सूत्रस्य परोऽर्थ उच्यतां
यद् भाष्यमात्रं भवता निरस्यते ।
भवादृशैर्यः कविभिर्न दूष्यते
कथञ्चनेत्यूचुरिमे वचस्विनः ॥ २० ॥

(प.दी.) **नन्विति** । **वचस्विनः** वाग्मिनः **इमे इत्यूचुः** । **ननु** इति शङ्कार्थेऽव्ययम् । **अस्य सूत्रस्य** ब्रह्मसूत्रस्य **भवता परः** अन्यः **अर्थः उच्यताम्** । कुतः? **भवता भाष्यमात्रं निरस्यते यत्** यस्मात् । भाष्यमेव बहुधा निरस्यते, सूत्रं

तु न प्रकाश्यते, तस्मात् सूत्रस्यान्योऽर्थ उच्यताम् । **यः** अन्योऽर्थः **भवादृशैः** भवत्सदृशैः **कविभिः** विद्वद्भिः **कथञ्चन** केनापि प्रकारेण **न दूष्यते** स उच्यतामिति ॥ २० ॥

(त.चं.) भाष्यमात्रं सर्वं प्राचीनभाष्यजातमिति वा । वचस्विनः समयोचित-वचनाः ॥ २० ॥

अक्लिष्टशब्दान्वयमेष सम्भवत्-
सूत्रार्थमुच्चैर्वचनं तदाऽऽददे ।
मानीकृताम्नाययुतस्मृति क्षणा-
देष्यत्कथाताण्डवसूत्रधारकम् ॥ २१ ॥

(प.दी.) अक्लिष्टेति । **एषः** श्रीमध्वाचार्यः **तदा उच्चैर्वचनं** उपन्यासरूपं वचनं **क्षणादाददे** वक्तुमुपचक्रमे । कथम्भूतं वचनम्? **अक्लिष्टशब्दान्वयम्** । शब्दानामन्वयः शब्दान्वयः, अक्लिष्टः शब्दान्वयः यत्र तत् अक्लिष्टशब्दा-न्वयम् । शब्दान्वयो नाम वाचकानां शब्दानां स्वस्य वाच्यार्थैः सम्बन्धः । तस्याक्लिष्टत्वं च शब्दानां तत्तत्पदार्थेषु योगेन रूढ्या वा प्रवृत्तिः । योगेन रूढ्या वा तत्तत्पदार्थवाचकत्वशक्तिमच्छब्दैरेव विवक्षितार्थकथनादर्थानां शब्दानां च परस्परवाच्यवाचकभावलक्षणसम्बन्धं ज्ञापयदिति भावः । अक्लिष्टाः शब्दाश्चान्वयाश्च यस्मिन्निति वा । पुनः कथम्भूतम्? **सम्भवत्सूत्रार्थम्** । सम्भवन् उपपद्यमानः सूत्रार्थो यत्र तत् सम्भवत्सूत्रार्थम् । **मानीकृताम्नाययुतस्मृति** । मानीकृताः उक्तार्थे प्रमाणत्वेनोदाहृताः आम्नाययुताः वेदयुक्ताः स्मृतयः पुराणादीनि यस्मिन् तन्मानीकृताम्नाययुतस्मृति । **एष्यत्कथाताण्डवसूत्रधारकम्** । एष्यत्कथा स्वयं करिष्यमाणभाष्यात्मकवाक्यप्रबन्धः, 'कथ वाक्यप्रबन्धे' इति धातोः, एष्यत्कथात्मक-ताण्डवस्य सूत्रधारकं पूर्वरङ्गभूतम्, एवं मया भाष्यं करिष्यत इत्येतत् सूचयदिति भावः । एवंविशिष्टं तद्वचनमाददे इत्यन्वयः ॥ २१ ॥

(त.चं.) शब्दानां परस्परमर्थेन चान्वयः। सम्भवन् स्वमूलग्रन्थादनतिरिक्तः, तदनुगुण इति यावत्, सूत्रार्थः यत्र। 'सहाये सम्भवो हेतावुत्पत्तौ मेलकेऽपि च। आधारानतिरिक्तत्वेऽप्याधेयस्य निगद्यते' इति च। सूत्रस्य धारकम्। सूत्रधार इव एष्यत्कथायाः परिचायकं वा। आम्नायाः, आम्नाययुताः अर्थत आम्नायादपृथग्भूता आम्नायानुसारिण्यः स्मृतयश्च। 'युतो युक्तेऽपृथग्भूते' इति च ॥ २१ ॥

बुभुत्सया मत्सरवर्जितान् जनान्
समत्सरान् वा विजिगीषयाऽऽगतान्।
श्रुतप्रवीणानतितार्किकान् मुहु-
र्भङ्ग्याऽनया भङ्गमुपानिनाय सः ॥ २२ ॥

(प.दी.) बुभुत्सया। सः श्रीमध्वाचार्यः **श्रुतप्रवीणान्** श्रुतेन शास्त्रश्रवणेन प्रवीणान् चतुरबुद्धीन्, अत एव **अतितार्किकान् जनान् मत्सरवर्जितान्**, अत एव **बुभुत्सया** तत्वजिज्ञासया **आगतान् वा**। अथ **समत्सरान्** मत्सरयुक्तान्, अत एव **विजिगीषया आगतान् वा**। एवं द्विविधानपि **जनान् अनया भङ्ग्या मुहुर्भङ्गमुपानिनाय** निरुत्तरत्वं प्रापयामास। 'नीवह्योः'[१] इत्यादिना द्विकर्मकत्वम्। तत्रतत्र जिज्ञासयाऽऽगतानां प्रश्नस्योत्तरदानेन संशयनिरासद्वारा, समत्सराणां विजिगीषूणां विजिगीषया [आगतानां] युक्तिखण्डनद्वारा भङ्गमुपानिनायेति विवेकः ॥ २२ ॥

(त.चं.) श्रुतप्रवीणान् शास्त्रनिष्णातान्। 'श्रुतमाकर्णिते शास्त्रे' इति च। वेदाः पञ्चरात्रं भारतं मूलरामायणं पुराणानि च शास्त्रम्। यच्चानुकूलमेतेषाम्। प्रकृष्टा हि शरीररूपा दैवी वीणाऽस्येति प्रवीणः। 'अथ खल्वियं दैवी वीणा भवति' इत्यैतरेयी श्रुतिः। प्रकृष्टं वेणतीति वा। 'वीणृ ज्ञानचिन्ता-

---

१. 'गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः' इति वार्तिकम् [१.४.५२]। कर्मसञ्ज्ञानिषेधकमिदं नात्रोपयुक्तम्। परस्तात् केनचिदुपक्षिप्तं स्यात्।

निशामनेषु' । 'दक्षः कुशलोऽभिज्ञो निष्णातः शिक्षितः प्रवीणश्च' इत्यभिधानम् । श्रुतप्रवीणान् । अत एव मत्सरवर्जितान् । अत एव च बुभुत्सयाऽऽगतान् । अतितार्किकान् । अत एव समत्सरान् । अत एव च विजिगीषयाऽऽगतान् । अनया भणितिभङ्ग्या भङ्गमुपानिनाय । भङ्गि-र्व्याख्यानशैली । 'व्याकृतिर्भङ्गिरुच्यते' इति च । भङ्गी वा । प्रश्नभङ्ग-मुपानिनाय । जिज्ञासानिरसनेन जिगीषानिरसनेन च । विच्छेदो भङ्गः ॥

कदाचिदेनं प्रतिगम्य सौम्यधीः
स मध्यगेहार्यवरः प्रसेदिवान् ।
हेतोः कुतश्चिद् विमनीकृतोऽप्यहो
गुणाब्धिलुब्धः सुजनः प्रसीदति ॥ २३ ॥

(प.दी.) कदाचित् । **सौम्यधीः** कोमळचित्तः **सः मध्यगेहार्यवरः** श्रीमध्वा-चार्यपिता **कदाचिदेनं प्रतिगम्य** श्रीमध्वाचार्यं प्रतिगम्य प्राप्य **प्रसेदिवान्** प्रसन्नोऽभूत् । प्राक् **कुतश्चिद्धेतोः** कारणात् **विमनीकृतोऽपि** कलुषीकृत-चित्तोऽपि तदा तं दृष्ट्वा प्रसन्नचित्तोऽभूदिति भावः । **अहो सुजनः** सज्जनः **गुणाब्धिलुब्धः** गुणबाहुल्यं दृष्ट्वा तद्धातुमशक्तः **प्रसीदति** प्रकर्षेण सीदति तत्र सक्तो भवति । प्रतीयमानाल्पदोषम[वि]गणय्येति भावः ॥ २३ ॥

(त.चं.) सौम्यधीः शान्तमनाः । 'सौम्यो ज्ञे ना त्रिष्वनुग्रे' इति च । अविमना विमनाः सम्पद्यमानः कृतो विमनीकृतः । 'अरुर्मनश्चक्षुश्चेतोर-होरजसां लोपश्च' [५.४.५१] इत्यन्तलोपः । तद् यथा– अरूभवति । अरुरिति व्रणः । विमनीभवति । उच्चक्षूभवति । विचेतीभवति । विरही-भवति । विरजीभवति । अहो इत्यास्वादयति ॥ २३ ॥

तेजोऽमृतं नन्दनगात्रपात्रगं
नेत्राञ्जलिभ्यामपिबत् सदाऽव्ययम् ।

विद्यासुधां चास्य वचोमहाघटे
पूर्णामसौ कर्णपुटेन पण्डितः ॥ २४ ॥

(प.दी.) तेज इति। **पण्डितः** विद्वान् **असौ** मध्यगेहार्यवरः **नन्दनगात्रपात्रगं सदा अव्ययं** अक्षयं **तेजोऽमृतं** तेजोऽभिधममृतं **नेत्राञ्जलिभ्यामपिबत्** । सादरं ददर्शेति यावत्। **अस्य** श्रीमध्वाचार्यस्य **वचोमहाघटे** प्रवचनात्मक-वचःकुम्भे **पूर्णां विद्यासुधां च कर्णपुटेन** कर्णद्वयाख्यपात्रेण **अपिबत्** । चित्रं तत्प्रवचनं च सादरमशृणोदिति भावः ॥ २४ ॥

(त.चं.) लिङ्गसाम्याय तेजोऽमृतमिति विद्यासुधामिति चाऽह। विद्यासुधां चाव्ययाम् ॥ २४ ॥

लीलाविवादे गुरुणा जगद्गुरोः
प्रसङ्गतस्तत्र च तादृशे सति ।
सूत्रार्थविच्चेत् कुरु भाष्यमञ्जसे-
त्याक्षेपपूर्वं गुरुरभ्यधादिमम् ॥ २५ ॥

(भा.प्र.) प्रसङ्गे तादृशे सति दुर्भाष्यदूषणादिरूपे ॥

(प.दी.) लीलेति । **जगद्गुरोः** श्रीपूर्णप्रज्ञाचार्यस्य **गुरुणा** अच्युतप्रज्ञेन **प्रसङ्गतः** तत्वविचारप्रसङ्गतः **तत्र च** गुरुणा सह प्रसङ्गकाले च **तादृशे** 'सत्सूत्रभावे प्रविचारिते पृथक्' इत्यादिना प्रागुक्तप्रकारेण सङ्करभाष्यनिरा-करणरूपे **लीलाविवादे सति,** लीलया मत्सरराहित्येन भाष्यं सूत्रसम्मतं भवति न भवतीति विप्रतिपत्तौ सत्याम्, **गुरुः** अच्युतप्रज्ञः **इमं** श्रीमध्वाचार्यं **आक्षेपपूर्वमित्यभ्यधात्** । कथम्? त्वं **सूत्रार्थवित् चेत्** ब्रह्मसूत्राणामर्थं सम्यग् जानासि चेत् **भाष्यमञ्जसा** सम्यक् **कुरु इति** ॥ २५ ॥

(त.चं.) तत्र तस्मिन् विवादजनिते तादृशे दुर्भाष्यदूषणादिरूपे प्रसङ्गतः

प्रसङ्गे सति । अञ्जसा सपदि तत्वतो वा । 'अञ्जसाशब्द आख्यातस्तत्व-तूर्णार्थयोरपि' इति च । आक्षेपपूर्वमाक्षेपगर्भम् । आक्षेपः पूर्वो यथा भवति तथा । आक्षेप आक्रोशः ॥ २५ ॥

विधानमात्रं तदुपाददे[१] तदा
पयो यथाऽच्छं परमः स हंसराट् ।
तल्लीनमाक्षेपमुपैक्षताफलं
वारीव सन्तो हि गुणांशतोषिणः ॥ २६ ॥

(प.दी.) विधानेति । **सः परमः हंसराट्** परमहंसश्रेष्ठः **तदा तत्** 'भाष्यमञ्जसा कुरु' इत्येवंरूपं **विधानमात्रं** केवलं विधानमेव **आददे** अङ्गीचकार । कथमिव? **हंसराट्** हंसश्रेष्ठः **अच्छं** निर्मलं **पयः** क्षीरं **यथा** तथा । **तल्लीनम्** , तस्मिन् लीनम्, 'सूत्रार्थविच्चेत् कुरु भाष्यमञ्जसा' इत्यस्मिन् वाक्ये गूढम्, **आक्षेप-मुपैक्षत** उपेक्षितवान् । कथम्भूतम्? **अफलं** निष्फलम् । किमिव? **हंसराट् तल्लीनं** क्षीरलीनं **वारीव** । अयं भावः– एतद्भाष्यं सूत्रसम्मतं नेत्युक्ते तदसहमानो गुरुः इममाक्षेपपूर्वकं 'तर्हि त्वमञ्जसा भाष्यान्तरं कुरु' इत्य-ब्रवीत् । तदाऽयं श्रीमध्वः तद्वाक्ये काकुवेद्यमाक्षेपं हित्वा भाष्यमञ्जसा कुर्विति विधानमात्रं गुर्वनुज्ञारूपत्वेनाऽददे । यथा हंसः सनीरं क्षीरं पुरो-वर्ति दृष्ट्वा नीरमपहाय क्षीरं पिबेत् तद्वदिति । एतदेव सतां युक्तमित्याह– **सन्तो ही**ति । **सन्तः** सज्जनाः **गुणांशतोषिणो हि** यस्मात् । सत्यपि दोषे तमनादृत्य गुणलेशं दृष्ट्वा तमेवाऽद्रियन्त इति भावः ॥ २६ ॥

(त.चं.) लीनमन्तर्गतम् । लीङ् श्लेषणे, लीयते दिवादिः । ली श्लेषणे वा, लिनाति लीनाति वा क्र्यादिः । आक्षेपोऽपि प्रेमगर्भः । अत एवा-फलः । अत एव चोपैक्षत ॥ २६ ॥

१.व्याख्याने 'आददे' इत्येव पठ्यते । न 'उपाददे' इति । तेन 'तदुताऽददे' इति वेदाङ्गतीर्थसम्मतः पाठः सम्भाव्यते । विश्वपतितीर्थीयेऽपि तथा ।

वैराग्यवैयात्यसुवाक्त्वपूर्वकै-
र्युतो गुणैः पारमहंस्यभूषणैः ।
ज्येष्ठो यतिर्यो लिकुचान्वयोद्भव-
स्तं भूरिभक्तिः स कदाचिदब्रवीत् ॥ २७ ॥

(प.दी.) वैराग्येति । **पारमहंस्यभूषणैः**, पारमहंस्यं परमहंसत्वं यतित्वम्, तस्य भूषणभूतैः, **वैराग्यवैयात्यसुवाक्त्वपूर्वकैः**, ऐहिकामुष्मिकफलोपभोगापेक्षाभावो वैराग्यम्, वैयात्यं धाष्टर्यम्, शोभना वाग् यस्यासौ सुवाक्, तस्य भावः सुवाक्त्वम्, वाग्मित्वमिति यावत्। एवं **वैराग्यवैयात्यसुवाक्त्वपूर्वकैर्गुणैर्युतः**, अत एव वैराग्यवैयात्यसुवाक्त्वयुक्तत्वादेव **भूरिभक्तिः लिकुचान्वयोद्भवः** लिकुचवंशसम्भवः **यः ज्येष्ठो यतिः स कदाचित् तं** श्रीमध्वाचार्यं **अब्रवीत्** ॥ २७ ॥

(त.चं.) वैयात्यं साङ्ख्ये च योगे चाविकम्पा प्रतिपत्तिः प्रगल्भता नाम । अनवनत आत्मप्रत्यय इत्येतत् । 'वियातो धृष्ट उच्यते' इति । ञिधृषा प्रागल्भ्ये। सुवाक्त्वं सकलमनोहृदयावर्जनी वाग्मिता। मठे वसत्सु यतिषु ज्येष्ठ आश्रमज्येष्ठः । अच्युतप्रज्ञशिष्येषु वा ज्येष्ठः ॥ २७ ॥

विरोधि वेदान्तकृतान्तसम्पदां
भाष्यादिकं चेदिदमस्तु का क्षतिः ।
अस्मभ्यमाचक्ष्व विचक्षणोचितं
भावं तु सूत्रोपनिषद्विवक्षितम् ॥ २८ ॥

(प.दी.) विरोधीति । इदं सङ्करप्रणीतं **भाष्यादिकं** ग्रन्थजातं **वेदान्तकृतान्तसम्पदां** वेदान्तशास्त्रसिद्धान्तसम्पदां **विरोधि चेदस्तु**, तत् तथेति **का क्षतिः?** नः का हानिः? हे **विचक्षण**, सूत्रोपनिषदाद्यर्थविचारविचक्षण, त्वं **अस्मभ्यं सूत्रोपनिषद्विवक्षितं** ब्रह्मसूत्रैरुपनिषद्भिश्च वक्तुमिष्टं **उचितं**

पूर्वोत्तरविरोधाभावेन प्रमाणान्तरसम्मत्या युक्तियुक्ततया चाङ्गीकर्तुमुचितं **तु भावं** अर्थम् **आचक्ष्व** वद ॥ २८ ॥

(त.चं.) कृतोऽन्तो निर्णयो येन यस्य वा स कृतान्तः सिद्धान्तः । तस्य या ज्ञानसम्पदः । 'स्मृताः कृतान्तराद्धान्तसिद्धान्तसमयाः समाः' इति च । मायिभाष्यादिकम् । विविधं चष्टे व्याचष्टे चेति विचक्षणः । 'विचक्षणश्च मेधावी सङ्ख्यावान् मतिमान् मतः' इति च । ब्रह्मसूत्राणामुपनिषदां च तात्पर्यविषयीभूतं भवता विवक्षितं च भावम् ॥ २८ ॥

इत्यस्य वाचा शरदेव भासिता
यदाऽखिलाशाः शुभपूर्णया बभौ ।
प्रमोदतीर्थाननचन्द्रचन्द्रिका
व्याख्याभिधा विष्णुपदप्रकाशिनी ॥ २९ ॥

(भा.प्र.) शुभपूर्णया । शुभेन सुकृतादिना पूर्णया । शरदश्च शुभा पूर्णा तिथिः ॥

(प.दी.) इतीति । इति एवमुक्तया **शुभपूर्णया** शुभेन सम्पूर्णया, परम-मङ्गळयेति यावत्, **अस्य** लिकुचसम्भवस्य यतेः **वाचा,** 'अस्मभ्यमाचक्ष्व विचक्षणोचितं भावं तु सूत्रोपनिषद्विवक्षितम्' इत्यनया वाचा, **यदा अखिलाशाः** सकलसज्जनानामाशाः, 'को न्वस्माकं सूत्रोपनिषदाद्यर्थं सम्यग् वक्ष्यति, कं नु पृच्छामः?' इत्यादिरूपाः सतामभिलाषाः **भासिताः** प्रकाशिताः । 'ब्रह्मसूत्राद्यर्थजिज्ञासारूपाभिलाषः सज्जनानामस्ति, तस्मात् त्वं सूत्राद्यर्थं सम्यग् वद' इत्यस्य वाचा यदा सर्वेषामभिलाषोऽभिव्यञ्जित इति भावः । **अखिलाशाः** अखिलदिशः **शुभपूर्णया** शोभना पूर्णा पूर्णिमा यस्याः सा शुभपूर्णा तया **शरदेव** । तदा **व्याख्याभिधा** व्याख्यानाह्वया, **विष्णुपद-प्रकाशिनी,** पद्यते मुक्तैर्गम्यत इति पदं स्वरूपम्, विष्णुपदं भगवत्स्वरूपं प्रकाशयतीति विष्णुपदप्रकाशिनी । **प्रमोदतीर्थाननचन्द्रचन्द्रिका,** श्रीमदानन्दतीर्थार्यस्याऽननाख्यस्य चन्द्रस्य चन्द्रिका कौमुदी **बभौ** सूत्रादि-

व्याख्यानमकरोत् । तद्व्याख्यानं चन्द्रिकेव सदानन्दकरमभूदिति भावः । चन्द्रिका च विष्णुपदमाकाशं प्रकाशयन्ती यथा शोभते तद्वदिति ॥

(त.चं.) शुभेन पुण्येन पूर्णया । पुण्यबलादेव हीदृशी वाक् प्रससार । अखिलाशानामियं मुखवाणी बभूव । 'आशाः ककुभः काष्ठाः हरितश्च दिशा दिशः समाख्याताः' इति च । शुभा पूर्णा पूर्णचन्द्रा राका पूर्णिमाऽस्या-मिति शरदपि शुभपूर्णा ॥ २९ ॥

जेष्यन् कदाचित् किल कालपालितां
दिशं प्रयातोऽच्युतबुद्धिना सह ।
समग्रधीर्मण्डितविष्णुमङ्गलं
विष्णुं जगन्मङ्गलमाननाम सः ॥ ३० ॥

(प.दी.) **जेष्यन्** । **सः समग्रधीः** श्रीपूर्णप्रज्ञाचार्यः **कदाचित् जेष्यन् अच्युतबुद्धिना सह कालपालितां दिशं** दक्षिणां दिशम्, इयन्तं कालं स्वावासभूतरजतपीठापेक्षया दक्षिणां दिशं **प्रयातः, मण्डितविष्णुमङ्गलम्,** मण्डितोऽलङ्कृतो विष्णुमङ्गलाख्यो देशो येन स तथोक्तम्, **जगन्मङ्गलं** जगतां मङ्गलप्रदानाद्वा जगति शोभनत्वाद्वा जगन्मङ्गलं **विष्णुमाननाम,** सादरं ननाम **किल** ॥ ३० ॥

(त.चं.) मण्डितं विष्णुमङ्गलाख्यमायतनं येन तं विष्णुम् । निकषा यदायतनं लिकुचान्वयानामायतनं बभूव । अयं प्रदेशः सम्प्रति 'कासरगोडु' [ಕಾಸರಗೋಡು] इति व्यवह्रियते ॥ ३० ॥

भिक्षाप्रदात्राऽत्र परीक्षितुं मुहु-
र्दत्ते प्रभुक्ते कदळीफलोच्चये ।
अनेन निर्यत्नमवार्यविस्मय-
स्तमार्यवर्यं विजनेऽवदद् गुरुः ॥ ३१ ॥

(प.दी.) **भिक्षेति** । अत्र विष्णुमङ्गले **भिक्षाप्रदात्रा** भिक्षां ददता गृहस्थेन **परीक्षितुं** लोकप्रसिद्धमस्य माहात्म्यं वास्तवं नवेति परीक्षणाय भिक्षावसाने **मुहुः** पुनःपुनः **दत्ते** **कदळीफलोच्चये** कदळीपक्वफलसमूहे **अनेन** श्रीमध्वाचार्येण **निर्यत्नं** आयासरहितं यथा भवति तथा **प्रभुक्ते** सति **अवार्यविस्मयः** अवार्यविस्मययुक्तः सः **गुरुः** अच्युतप्रज्ञः **आर्यवर्यं** महतामुत्तमं तं श्रीमध्वं **विजने** रहसि इति **अवदत्** ॥ ३१ ॥

(त.चं.) प्रकटं भुक्ते । प्रतूर्णं प्रभूतं च भुक्ते । उच्चयः समुच्चयः । समाहार इत्येतत् ॥ ३१ ॥

भिक्षावसाने द्विशताधिकैः फलै-
र्व्यूढैः प्रभुक्तैः परिपूरितेऽपि ते ।
तनूदरे नास्ति गरिष्ठता कथं
सुचित्त सत्यं वदताद् भवानिति ॥ ३२ ॥

(प.दी.) **भिक्षावसाने** । हे **सुचित्त**, **भिक्षावसाने** **प्रभुक्तैः** **द्विशताधिकैः** **व्यूढैः** महद्भिः **फलैः** **परिपूरितेऽपि ते** **तनूदरे** तनावपि कुक्षौ **गरिष्ठता** गुरुता **कथं** **नास्ति** **भवान्** **सत्यं** **वदतात्** वदतु इति अवददित्यन्वयः ॥ ३२ ॥

(त.चं.) व्यूढैः पृथुलैः । 'व्यूढः संहतविन्यस्तपृथुलेष्वभिधेयवत्' इति च । अतिशयेन गुरुता गरिष्ठता । पिचण्डिलतेति यावत् । अतिमात्रभक्षणेन नापि चित्ते व्यग्रतेत्याह– सुचित्त ॥ ३२ ॥

अङ्गुष्ठमात्रं जठरप्रतिष्ठितं[1]
जाज्वल्यमानं मम जातवेदसम् ।
नित्यं हितं विश्वदहं च वित्त तं
विश्वेशचेता इति सोऽब्रवीत् तदा ॥ ३३ ॥

---

१. 'जठरे प्रतिष्ठितम्' इति च पाठान्तरम् ।

(प.दी) अङ्गुष्ठेति । **तदा विश्वेशचेताः,** विश्वेशे हरौ चेतः यस्य स तथोक्तः **सः** श्रीमध्वाचार्यः **इत्यब्रवीत्** । **मम जठरप्रतिष्ठितं जातवेदसं** अग्निं **अङ्गुष्ठमात्रं** अङ्गुष्ठपरिमितं **जाज्वल्यमानं** भृशं ज्वलन्तं **वित्त** जानीध्वम् । गुरुत्वाद् बहुवचनम् । **नित्यं हितं** एवमपि मम हितं **वित्त** । नानेन मम किञ्चिदनिष्टमिति भावः । तं जठरप्रतिष्ठितं जातवेदसमग्निं **विश्वदहं च** प्रळये विश्वदहनदक्षं च **वित्त** ॥ ३३ ॥

(त.चं.) अङ्गुष्ठमात्रम् । अनेन स्वस्य वृकोदरत्वं ज्ञापयति । 'यस्य तीक्ष्णो वृको नाम जठरे हव्यवाहनः । मया दत्तः स धर्मात्मा तेन चोक्तो वृकोदरः' इति पुराणं वचनम् । नित्यं मम जठरप्रतिष्ठितम् । नित्यं च मम हितम् । तं जातवेदसं विश्वदहं च वित्त । तमच्युतप्रज्ञमित्यब्रवीदिति वा ॥ ३३ ॥

पर्याकुलानेकसरस्वतीततीन्
न्यायोपपन्नान् विविधार्थसंयुतान् ।
अतीत्य देशान् समयांश्च चारुधी-
रसौ जगामाभिमतेन वर्त्मना ॥ ३४ ॥

(भा.प्र.) न्याया युक्तयो धर्मप्रवृत्तयश्च । वर्त्मना मार्गेण सिद्धान्तेन च ॥

(प.दी.) पर्याकुलेति । **असौ चारुधीः** श्रीपूर्णप्रज्ञाचार्यः **अभिमतेन** महाजन-सम्मतेन, श्लाघ्येनेति यावत्, **वर्त्मना** मार्गेण **जगाम,** विष्णुमङ्गलादपि दक्षिणतो ययौ । किं कृत्वा? **देशान्** प्रान्तान्प्रान्तान् देशान् **समयांश्च** तत्तद्वा-दिभिः प्रस्तुतानि शास्त्राणि च **अतीत्य** । तत्र देशान् अतिलङ्घ्य, समयान् निराकृत्येति भावः । **पर्याकुलानेकसरस्वतीततीन्**, पर्याकुलानां सम्पूर्णानाम् अनेकानां सरस्वतीनां नदीनां ततिः समूहो येषु देशेषु ते पर्याकुलानेक-सरस्वतीततयः तान् । समयांश्च पर्याकुलानेकसरस्वतीनां वाचां तति-युक्तान् । **न्यायोपपन्नान्,** तत्तज्जनपदधर्मोपपन्नान् । समयपक्षे तु तत्तच्छास्त्र-न्याययुक्तानिति । **विविधार्थसंयुतान्** नानाविधपदार्थविशेषसंयुतान् । विविधार्थाः नानाविधप्रमेयविशेषाः, तत्संयुतान् समयांश्च ॥ ३४ ॥

(त.चं.) न्यायोपपन्नान् तत्तत्समयसाधकयुक्त्युपेतान् समयान् । तत्तद्देशोचितधर्मप्रवृत्त्युपपन्नान् देशान् । उचिताद् धर्माचरणादभ्रेषो न्यायः । अभिमतेन वर्त्मना सिद्धान्तपद्धत्या समयानतीत्य निराकृत्य । गन्तुमभिमतेन वर्त्मना मार्गेण देशानतीत्य ततोऽपि दक्षिणां दिशं जगाम ॥ ३४ ॥

स्वहेळया पातितपार्थिवव्रजां
धीशुद्धिदां केरळभूषणायिताम् ।
पयस्विनीं प्रेक्ष्य पथि द्विजार्चितां
स भाविनीमस्मरदत्र चण्डिकाम् ॥ ३५ ॥

(भा.प्र.) अस्मरदत्र पयस्विनीतटे ॥

(प.दी.) स्वेति । **सः** श्रीमध्वाचार्यः **पथि** मार्गे **स्वहेळया** स्वप्रवाहलीलया **पातितपार्थिवव्रजां** निपातितवृक्षसमूहाम्, **धीशुद्धिदां** स्नानपानादिना चित्तशुद्धिप्रदाम्, **केरळभूषणायितां** केरळमण्डलभूषणायितां **द्विजार्चितां** ब्राह्मणैः पक्षिभिश्च पूजितां **पयस्विनीं** पयस्विनीनामनदीं **प्रेक्ष्य अत्र** तटे **भाविनीं** अवतारं करिष्यन्तीं **चण्डिकां** दुर्गां **अस्मरत्** । कथम्भूताम्? **स्वहेळया** स्वगमनलीलया **पातितपार्थिवव्रजां** निपातिततुरुष्कादिदुष्टराजसमूहाम्, **धीशुद्धिदां** स्मरणकीर्तनादिना चित्तशुद्धिदाम्, **केरळभूषणायितां** केरळदेशेऽवतारात् तदलङ्कारभूताम्, **द्विजार्चितां** ब्राह्मणपूजिताम् ॥ ३५ ॥

(त.चं.) साधर्म्यं स्मरणहेतुमाह– स्वहेळया । मर्यादामनादृत्य स्वच्छन्दा लीला हेळा । पार्थिवा महीरुहा महीपतयश्च । पृथिव्या इमे भवन्ति । अत्र पयस्विन्याम् । पयस्विनीतट इति यावत् ॥ ३५ ॥

ततः क्रमेण प्रचलन्नुपेयिवा-
नवन्दतेन्दीवरसुन्दरच्छविम् ।
अम्भोजनाभं स भुजङ्गशायिनं
श्रीवल्लभं श्रीमदनन्तसत्पुरे ॥ ३६ ॥

(प.दी.) ततः । **सः** श्रीमध्वाचार्यः **ततः** पयस्विनीतटात् **प्रचलन्** गच्छन् **क्रमेण श्रीमदनन्तसत्पुरे** श्रीमति अनन्तपुराख्ये क्षेत्रे **इन्दीवरसुन्दरच्छविं** इन्दीवरसुन्दरकान्तिम् **अम्भोजनाभं भुजङ्गशायिनं श्रीवल्लभं** रमानाथं **उपेयिवान्** प्राप्तः सन् **अवन्दत** ॥ ३६ ॥

(त.चं.) इन्दीवरं नीलाब्जम् । 'श्यामं शितिकण्ठनीलं कुवलयमिन्दीवरं च नीलाब्जम्' इति च । इन्दिरया स्ववासाय वरणादिन्दिवरमिन्दीवरं वा । इन्दीवारमित्यपि पठन्ति । 'इन्दिवरोदरदळनयना' इत्याचार्याः । अनन्तस्य अनन्तशय्यस्य सत्पुरम् । 'स्यानन्दूरम्' इति प्रतनाः । 'तिरुवनन्तपुरम्' इत्यधुना भाषायाम् । अनन्तपुरे गतं अम्भोजनाभमुपेयिवानवन्दत ॥

वेदान्तसूत्राणि कृतान्तवित्तमो
व्याख्यादसौ शिष्यगणाय संसदि ।
विलक्षणं जीवगणाद् गुणार्णवं[१]
ब्रह्माच्युताख्यं प्रतिपादयन् मुहुः ॥ ३७ ॥

(प.दी.) वेदान्तेति । **कृतान्तवित्तमः,** कृतान्तः सिद्धान्तः, 'कृतान्तौ यम-सिद्धान्तौ' इत्यमरः, कृतान्तविदां ब्रह्मसूत्रसिद्धान्तविदामुत्तमः **असौ** श्री-मध्वाचार्यः **संसदि** विद्वत्सभायां **शिष्यगणाय वेदान्तसूत्राणि व्याख्यात्** व्याचख्यौ । किं कुर्वन्? **अच्युताख्यं ब्रह्म गुणार्णवम्,** अत एव **जीवगणाद् विलक्षणं** भिन्नं **मुहुः प्रतिपादयन्** । ब्रह्मशब्दस्य जीवादिष्वपि रूढत्वाद-च्युताख्यं ब्रह्मेत्युक्तम् । तत्र ब्रह्मशब्दो विष्णुवाचीत्युक्तं भवति । तस्य च जीवगणाद् विलक्षणत्वे गुणार्णवत्वं हेतुः । जीवस्याल्पगुणत्वात् तस्माद् विरुद्धधर्मत्वयुक्त्या जीवब्रह्मणोर्भेदं प्रतिपादयन् व्याचख्यौ ॥ ३७ ॥

(त.चं.) वेदान्तानि सूत्राणि । वेदानामन्तो निर्णयो येभ्यो येषु वा ।

---

१. 'गुणार्णवं जीवगणाद् विलक्षणम्' इत्यपि पाठः सम्भाव्यते ।

'समाजः संसदास्थानी सभा स्यात् परिषत् सदः' इति च । नाच्योष्ट नापि च्युतो भविष्यतीत्यच्युतः । न विद्यते च्युतं च्यवनं जीवगणविलक्षणाद् गुणार्णवात् स्वभावाद् यस्य । 'न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप' इत्यादेः । गुणार्णवमिति प्रथमाध्यायार्थः । जीवगणाद् विलक्षणमिति द्वितीयस्य । हेतुहेतुमद्भावप्रदर्शनाय क्रमव्यत्ययः । 'गुणार्णवं जीवगणाद् विलक्षणम्' इति वा पाठः । ब्रह्मेति तृतीयार्थः । 'ब्रह्मदृष्टिरुत्कर्षात्' [ब्र.सू. ४.१.५] इत्यादेः । साधनाध्यायसारो हि सः । मुक्तावपि जीवगणाद् विलक्षणमिति तुरीयार्थः । अच्युताख्यमिति च । मुक्ता अप्यच्युताः । न च्युता भविष्यन्तीति । 'पादोदकं च निर्माल्यं मस्तके यस्य सोऽच्युतः' इत्यादिप्रयोगाच्च । तेऽस्य सन्त्यधीना इत्यच्युताख्यम् । अच्युतिरेव साधर्म्यमित्येतत् । 'मम साधर्म्यमागताः । सर्गेऽपि नोपजायन्ते प्रळये न व्यथन्ति च' इति हि गीतायाम् ॥ ३७ ॥

अप्रांशुनूत्नोपपदाधिवासजः
स सङ्करो वैरपरायणः पुनः ।
असूययोचेऽत्र महानतिक्रमः
सूत्रार्थवादोऽकृतभाष्यकेष्विति ॥ ३८ ॥

(भा.प्र.) 'अप्रांशुनूत्नोपपदाधिवासः' इत्यस्य 'कुदुपुस्तूरु' इत्यपभ्रष्टभाषा ॥

(प.दी.) अप्रांश्विति । **वैरपरायणः** श्रीमुख्यप्राणे द्वेषानुसन्धानयुक्तः **स सङ्करः पुनः** जन्मान्तरे **अप्रांशुनूत्नोपपदाधिवासजः**, अप्रांशुनूत्नाधिवासाख्ये कुले जातः । अप्रांशुनूत्नाधिवासस्य 'कुरुंपुत्तूर्' इत्यपभ्रष्टसञ्ज्ञा । कुरुंपुत्तूराख्ये कुले जातः **असूयया अत्र** अनन्तपुरे **इत्यूचे** । कथम्? **अकृतभाष्यकेषु**, अकृतं भाष्यं यैस्ते अकृतभाष्यकाः, तेषु वर्तमानः **सूत्रार्थवादः महानतिक्रमः** मर्यादातिक्रमः । अयं भावः– ये भाष्यकृतः तेषां भाष्यनिरपेक्षं सूत्रार्थवादो युक्तः । अकृतभाष्याः पुरुषा यदि भाष्यनिरपेक्षं सूत्रार्थं वदन्ति तर्हि महान् मर्यादातिक्रम इति ॥ ३८ ॥

(त.चं.) नूत्नः 'पुसत्त्'[ಪುಸತ್ತ್] इत्युच्यते तौळवभाषायाम् । अधिवासो ग्रामः 'ऊरु'[ಊರು] इति । नूत्नोपपदोऽधिवासः 'पुसत्तूरु'[ಪುಸತ್ತೂರು] इति, 'पुस्तूरु'[ಪುಸ್ತೂರು] इति, 'पुत्तूरु'[ಪುತ್ತೂರು] इति च । प्रांशुरुन्नतः 'एत्तर'[ಎತ್ತರ] इति भाषायाम् । अप्रांशुः 'कुद्यो'[ಕುದ್ಯೊ]इति 'कुद्य'[ಕುದ್ಯ] इति च । तदेवं 'कुद्योपुस्तूरु'[ಕುದ್ಯೊಪುಸ್ತೂರು]नामधेयं ग्रामं 'कुद्यपुस्तूरु' [ಕುದ್ಯಪುಸ್ತೂರು], 'कुदुपुस्तूरु'[ಕುದುಪುಸ್ತೂರು], कुदिपुस्तूर्'[ಕುದಿಪುಸ್ತೂರ್], 'कुदुम्पुत्तूरु'[ಕುದುಂಪುತ್ತೂರು], 'कुरुम्पुत्तूर्'[ಕುರುಂಪುತ್ತೂರ್] इत्यादि बहुधा व्यवाहरन् । पूर्वं 'कालडि'[ಕಾಲಡಿ]ग्रामे जात एव पुनः अप्रांशुनूत्नोपपदाधिवासजो बभूव ॥ ३८ ॥

वदोत्तरं भाति यदीह कुर्महे
भाष्यं कृतिर्नास्य हि दण्डवारिता ।
जगद्गुरूणामिति तां गुरोर्गिरं
जनः समस्तोऽभिननन्द सस्मिताम् ॥ ३९ ॥

(प.दी.) वदेति । इह अस्माभिरुक्ते सूत्रार्थे **यद्युत्तरं** अस्मदुक्तसूत्रार्थनिराकरणसमर्थमुत्तरं **भाति** तर्हि **वद** । **भाष्यं कुर्महे,** भाष्यमपेक्षितं चेत् करिष्यामः । **अस्य** भाष्यस्य **कृतिः** निर्माणं **दण्डवारिता न हि** । भाष्यकरणे सत्ययं दण्डो भविष्यति तस्माद् भाष्यं न कर्तव्यमिति केनचिद् राजादिना दण्डेन वारिता न हीति भावः। **जगद्गुरूणां** रुद्रादीनां **गुरोः** श्रीमध्वाचार्यस्य इति एवमुक्तां **सस्मितां तां गिरं समस्तो जनोऽभिननन्द** ॥ ३९ ॥

(त.चं.) भाष्यं कुर्महे । 'वर्तमानसामीप्ये वर्तमानवद् वा'[३.३.१३१] ॥

प्राज्ञैर्महापूरुषसर्वलक्षणैः
सम्पन्नदेहोऽयमितीरिते प्रभौ ।
परे परस्याप्यतिपीनतादृशः
स्फिङ्मात्रसंशंसनमेव चक्रिरे ॥ ४० ॥

(प.दी.) प्राज्ञैः । **प्रभौ** श्रीमध्वाचार्ये **प्राज्ञैः** पुरुषलक्षणशास्त्राभिज्ञैः पूरुषैः, **अयं महापूरुषसर्वलक्षणैः** महापूरुषाणां यानि सर्वाणि लक्षणानि तैः, **सम्पन्नदेहः**, सम्पन्नः सम्पूर्णो देहो यस्य स तथोक्तः, **इतीरिते** सति **परेऽपि** अप्रांशुनूत्नाधिवासजस्य पक्षीया अपि **परस्य स्फिङ्मात्रसंशंसनमेव चक्रिरे** । कथम्भूताः? **अतिपीनतादृशः** स्फिक्पीनतां पश्यन्तः । सभायामयं महापुरुषलक्षणसम्पूर्णदेह इति श्रीमध्वाचार्ये प्रशस्यमाने सति तदसहमानाः परे स्वकीयस्याप्रांशुनूत्नाधिवासजस्य अतिस्थूलस्फिङ्मात्रसंशंसनं चक्रुः । तस्मिन् प्रशंसनीयलक्षणान्तरमपश्यन्त इति भावः ॥ ४० ॥

(त.चं.) प्यायते स्मेति पीनः स्थूलकायः । ओप्यायी वृद्धौ । 'प्यायः पी' [६.१.२८] । ननु तर्हि क्तयोगे पीतः स्यात् । न स्यात् । 'ओदितश्च' [८.२.४५] इति ओकारेतो धातोर्निष्ठातकारस्य नकारविधानात् । स्फिचौ कटिपृष्ठमांसपिण्डौ । 'कटिप्रोथौ स्फिचौ युजौ' इति च । पीने स्फिचौ स्त्रीलक्षणम् । तामेव पुरुषलक्षणं मन्वाना भ्रान्ताः स्फिङ्मात्रसंशंसनमेव चक्रिरे ॥

स्फिग्दूषणानि प्रतिपादयत्यलं
सम्पूर्णसङ्ख्येऽस्य तु लक्ष्मशास्त्रतः ।
तद्दण्डसङ्खण्डनसंश्रवं व्यधात्
तदक्षमोऽसौ प्रकृतिर्हि साऽसताम् ॥ ४१ ॥

(प.दी.) स्फिगिति । **सम्पूर्णसङ्ख्ये** श्रीपूर्णप्रज्ञाचार्ये **तु लक्ष्मशास्त्रतः** लक्षणशास्त्रेण **अस्य स्फिग्दूषणानि अलं** सम्यक् **प्रतिपादयति** सति, **असौ तद्दण्डसङ्खण्डनसंश्रवम्,** तस्य श्रीमध्वाचार्यस्य दण्डसङ्खण्डने [संश्रवं] प्रतिश्रवं प्रतिज्ञां **व्यधात्** । कथम्भूतः? **तदक्षमः,** तस्मिन् तद्दण्डखण्डने अक्षमः अशक्तः । तर्हि किमिति प्रतिश्रवं व्यधादिति चेदाह– **प्रकृतिरिति** । **सा असतां प्रकृतिर्हि** स्वभावो हि । अशक्यकार्यप्रतिज्ञानमसतां स्वभाव इति भावः ॥ ४१ ॥

(त.चं.) तेषां बालिशतां प्रकाशयन् मध्वोऽपि परिजहासेव स्फिग्दूषणानि प्रतिपादयन् । 'प्रतिश्रवः संश्रवः प्रतिज्ञा च' इति च ।। ४१ ।।

स्नात्वाऽत्र तीर्थेष्वचिरेण कन्यका-
तीर्थे सुतीर्थे सुखतीर्थ आप्लुतः ।
समुद्रसेतौ च निमज्ज्य विष्णवे
श्रीरामनाथाय नमश्चकार सः ।। ४२ ।।

(भा.प्र.) कन्यातीर्थे । [१]अत्र दुर्गा सन्निहिता सुजलावतारस्थाने ।।

(प.दी.) **स्नात्वेति** । **सः सुखतीर्थः** श्रीमदानन्दतीर्थाचार्यः **अत्र** अनन्तपुरक्षेत्रे विद्यमानेषु **तीर्थेषु स्नात्वा अचिरेण** अविलम्बितं **सुतीर्थे** सु शोभनं च तत् तीर्थं चेति तस्मिन् सुतीर्थे **कन्यकातीर्थे** कन्यातीर्थे **आप्लुतः** स्नातः सन् **समुद्रसेतौ च** धनुष्कोटाविति यावत्, **निमज्ज्य** स्नात्वा **श्रीरामनाथाय,** श्रीरामश्चासौ नाथश्चेति श्रीरामनाथः, तस्मै **विष्णवे नमश्चकार** नमस्कारं कृतवान् । तस्मिन् क्षेत्रे श्रीरामेण प्रतिष्ठापिते रामनाथाख्यलिङ्गे सन्निहिताय हरये ननामेति भावः ।। ४२ ।।

(त.चं.) कन्यकातीर्थे, 'कन्यातीर्थम्' इति प्रथिते क्षेत्रे, यत् कन्याकुमारीत्यधुना विदितम्, यत्र दुर्गा कन्याभिधाना सन्निहिता । 'कन्या कमनीया भवति' इति नैरुक्ताः । तत्र सुतीर्थे सुजलावतारस्थान आप्लुतः । सुतीर्थे वा कन्यकातीर्थे स्नातः । 'सु पूजायाम्' । पूज्यं तीर्थं जलावतारस्थानम्, स्नानघट्ट इत्येतत्, यत्र । 'आप्लवनं स्नानमिष्यते सवनम्' इति च । समुद्रसेतौ । मयाऽपि बाल्ये समुद्रसेतौ निमज्ज्य श्रीरामनाथः नमस्कृतः । सम्प्रति त्वयं समुद्रगर्भे निलीनः । रामेश्वरक्षेत्रगताय श्रीरामनाथाय विष्णवे ।।

तमाव्रजन्तं यतिवेषधारिणं
दण्डं प्रकाश्यैष हसन्नभाषत ।

---

१. 'यत्र' इति मूलपाठः स्यात् ।

खण्ड्येत दण्डो यदि चण्ड न त्वया
त्वं पण्डकोऽपण्डित वन्ध्यवागिति ॥ ४३ ॥

(प.दी.) **तम्**। एष श्रीमध्वाचार्यः **आव्रजन्तं यतिवेषधारिणं तं** अप्रांशुनूत्नाधिवासजम्, **दण्डं** स्वहस्तगतं दण्डं **प्रकाश्य** तस्मै [१]प्रदर्शयित्वा, **हसन्नित्यभाषत**। कथम्? **चण्ड** क्रूर, **अपण्डित** मूर्ख, **यदि त्वया दण्डः** अस्मद्दण्डः **न खण्ड्येत** तर्हि **वन्ध्यवाक्** अनृतवचनः **त्वं पण्डकः** नपुंसकः इत्यभाषतेति योजना ॥ ४३ ॥

(त.चं.) पण्डकः क्लीबः। पण्डते। पडि गतौ। 'पण्डः षण्डे धियि स्त्री स्यात्' इति च। सा वन्ध्या वाक्, या न कमप्यर्थं प्रसूते ॥ ४३ ॥

लज्जानतः स्वार्थमथार्थयन्नस-
न्नुपैक्ष्यतासौ द्विजनायकैस्तदा।
आनन्दयन्तं वदनेन्दुना जगत्
तं द्वेष्टि कः प्राज्ञमिहेति वादिभिः ॥ ४४ ॥

(प.दी.) लज्जेति। **अथ लज्जानतः** लज्जया अधोमुखः **स्वार्थं** स्वप्रयोजनमुद्दिश्य **अर्थयन्** ब्राह्मणान् प्रार्थयन् 'भवद्भिरत्र मम साहाय्यं कार्यम्' इति प्रार्थयन् **असन्** दुष्टः **असौ तदा द्विजनायकैः** ब्राह्मणश्रेष्ठैः **उपैक्ष्यत** उपेक्षितोऽभूत्। कथम्भूतैः? **वदनेन्दुना जगदानन्दयन्तं इह** भुवि **प्राज्ञं तं को द्वेष्टि** विवेकी को द्विष्यात् **इति वादिभिः** ॥ ४४ ॥

(त.चं.) असन् अपण्डितो वा। अत एव शास्त्रखण्डनं विहाय दण्डखण्डने प्रववृते ॥ ४४ ॥

यायाः प्रसक्ताः परिषत्सु पूरुषै-
र्विद्या विदग्धैर्विविधैः समागमे।

---

१. 'प्रदश्य' इति पर्याप्तम्। भवन्ति चैवंविधाः प्रयोगाः। तद् यथा– समर्थयित्वा।

स तासुतासु प्रतिभातिभासुरो
विद्यासु विद्याधिपतिर्जिगाय तान् ॥ ४५ ॥

(प.दी.) **यायाः** । **परिषत्सु** विद्वत्सभासु **विविधैः** नानाविधविशेषवद्भिः **विदग्धैः** तत्तद्विद्यासु चतुरैः **पूरुषैः समागमे** सति **यायाः विद्याः प्रसक्ताः** प्रस्तुताः **तासुतासु** विद्यासु **प्रतिभातिभासुरः**, प्रतिभया अत्यन्तं भासुरः, **विद्याधिपतिः** सर्वविद्यानामधिपतिः **सः** श्रीमध्वाचार्यः **तान्** तत्तद्विद्यावतो विदुषः **जिगाय** ॥ ४५ ॥

(त.चं.) प्रतिभया अतिभासुरः । 'भञ्ज-भास-मिदो घुरच्' [३.२.१६१]। तद् यथा– भङ्गुरः संसारः । भासुरमहः । मेदुरो गजः । 'प्रज्ञा नवनवोन्मेष-शालिनी प्रतिभा मता' इति च ॥ ४५ ॥

अचाल्यमानः सगुरुः स चापलै-
रसज्जनानामबलीयसामिह ।
उवास मासांश्चतुरो महामनाः
सिंहो गुहान्तोपगतः शुनामिव ॥ ४६ ॥

(भा.प्र.) **असज्जनानां चापलैः–**

अप्रांश्वाद्याश्च तत्रोषुश्चातुर्मास्यं ततो विभोः ।
दीक्षाविघ्नं चिकीर्षन्तस्ताडनं चाभवत् खलु ॥

(प.दी.) **अचाल्यमानः** । **सगुरुः** गुरुसहितः **अबलीयसां** अतिदुर्बलानां **असज्जनानां चापलैः** अल्पीयसां क्षोभकरैः चपलचेष्टाभिः **अचाल्यमानः** अप्रकम्प्यमानः **सः महामनाः** श्रीपूर्णप्रज्ञाचार्यः **इह** समुद्रसेतौ **चतुरो मासा-नुवास** चातुर्मास्यमुवास । क इव? **शुनां चापलैरचाल्यमानः गुहान्तोपगतः सिंह इव** ॥ ४६ ॥

(त.चं.) सगुरोर्मध्वस्य चातुर्मास्यदीक्षाभङ्गं चिकीर्षतामप्रांशुनूत्नाधि-वासस्य परिवारजनानां ताडनादिचापलैः ॥ ४६ ॥

शृङ्गारसिन्धुं स भुजङ्गशायिनं
श्रीरङ्गवासं कृतमङ्गलं सताम् ।
अमन्दधीर्देवमवन्दताऽगतः
कवेरकन्याहिमवायुसेवितम् ॥ ४७ ॥

(प.दी.) शृङ्गारेति । आगतः श्रीरङ्गक्षेत्रमागतः **सः अमन्दधीः** श्रीपूर्णप्रज्ञाचार्यः **शृङ्गारसिन्धुं** सौन्दर्यसागरं **भुजङ्गशायिनं श्रीरङ्गवासं** श्रीरङ्गक्षेत्रे वासो यस्य स तथोक्तस्तम्, **सतां कृतमङ्गलम्**, कृतं मङ्गलं श्रेयो येन स तथोक्तस्तम्, **कवेरकन्याहिमवायुसेवितं** कावेरीजलसम्पर्कातिशीतळपवनसेवितं **देवं** क्रीडादिगुणयुक्तं श्रीहरिं **अवन्दत** ॥ ४७ ॥

(त.चं.) शृङ्गमियर्ति शृङ्गारः । इयर्त्यनेन वा । 'शृङ्गारभृङ्गारौ' [८.६.६] इति दशपादिका निपातयति । शृणाति माधुर्येण चक्षूंषि च मनांसि चेति शृङ्गारः सौन्दर्यसारः । बिभर्ति उदकमिति भृङ्गारो जलकलश इति । कवेरकन्या कवेरगिरिसम्भवा कावेरी । कं जलमयं वेरं शरीरमस्येति कवेरो गिरिः । यमधुना ब्रह्मगिरिं गिरन्ति ॥ ४७ ॥

ततो निवृत्तः परमेव पूरुषं
प्रणम्य नानायतनेषु सञ्चरन् ।
प्रकाशयन् स्वातिशयानमानुषा-
नाशामुदीचीं प्रययावसौ क्रमात् ॥ ४८ ॥

(भा.प्र.) स्वातिशयान्–

त्रिंशद्वाराहमनुवित् कश्चिद्योग्यास विस्मितः ।
सूचितेष्वेव सर्वेषु मध्वेनाभ्यधिकेष्वपि ॥

(प.दी.) ततः । असौ श्रीमध्वाचार्यः ततः श्रीरङ्गक्षेत्रात् **निवृत्तः सञ्चरन्** नानादेशेषु सञ्चरन् **नानायतनेषु** शैवस्कान्दसौरादिनानावस्थानेषु **परं पूरुषमेव**

परमपुरुषं श्रीहरिमेव **प्रणम्य क्रमादुदीचीमाशां प्रययौ** । किं कुर्वन्? **अमानुषान्** मनुष्येष्वविद्यामानान् **स्वातिशयान्** स्वमाहात्म्यानि **प्रकाशयन्** ॥ ४८ ॥

(त.चं.) स्वातिशयान् । अतिशयनमतिशयः । स्वोत्कर्षान् । तेष्वेकोऽतिशयो भावप्रकाशिकायां विवृतः ॥ ४८ ॥

ततस्ततो विस्मितलोचनैर्नरै-
र्निरीक्ष्यमाणोऽतिसुलक्षणाकृतिः ।
ग्रामोत्तमान् प्राप्य पयस्विनीतटे
विवेश देवायतनं स किञ्चन ॥ ४९ ॥

(प.दी.) ततस्ततः । **विस्मितलोचनैः** स्वसन्दर्शनेन विस्मितनयनैः **नरैः ततस्ततो निरीक्ष्यमाणः अतिसुलक्षणाकृतिः** अतितरां शोभमानद्वात्रिंशल्लक्षणात्मकदेहः, हेतुगर्भं विशेषणमेतत्, अतिसुलक्षणाकृतित्वाद्, विस्मितलोचनैर्नरैर्निरीक्ष्यमाणः **ग्रामोत्तमान्** नानाविधग्रामश्रेष्ठान् **प्राप्य सः पयस्विनीतटे** पयस्विन्याख्यनदीतीरे **किञ्चन देवायतनं विवेश** ॥ ४९ ॥

(त.चं.) ततस्ततः तत्रतत्र । किञ्चन देवायतनम् । 'अड्रूरु' [ಅಡೂರು] ग्रामे श्रीमहालिङ्गेश्वरदेवायतनमिति वदन्ति ॥ ४९ ॥

अधीत्य धर्मेण षडङ्गमागमं
तदर्थसंवर्णननिर्णयान्विताः ।
प्रापुर्द्विजेन्द्रास्तमपूर्वपूरुषं
जिज्ञासवः सुप्रथितं जगत्त्रये ॥ ५० ॥

(प.दी.) अधीत्य । **धर्मेण** स्वाध्यायाध्ययनोचितधर्मेण **षडङ्गम्**, षट् शीक्षादीनि अङ्गानि यस्य स तथोक्तः तम्, **आगमं** वेदं **अधीत्य तदर्थसंवर्णननिर्णयान्विताः**, न केवलमध्ययनमात्रेण चरितार्थाः, किन्तु स्वाधीतागमानामर्थसंवर्णने सम्यक्कथने निर्णयेनान्विताः, व्याकरणनिरुक्त्यादिभि-

रस्याऽगमस्यायमर्थ इति वक्तुं समर्थाः, **द्विजेन्द्राः** पयस्विनीतटनिवासिनो द्विजप्रवराः **जगत्त्रये** त्रैलोक्ये **सुप्रथितं** सुप्रसिद्धं **अपूर्वपूरुषं** जगत्त्रये सुप्रथितमपि स्वैः प्रागदृष्टं **तं** श्रीमध्वाचार्यं **जिज्ञासवः** महामहिमत्वेन श्रुतोऽयं कीदृश इति ज्ञातुमिच्छवः **प्रापुः** ॥ ५० ॥

(त.चं.) शीक्षा कल्पो व्याकरणं निरुक्तं छन्दो ज्यौतिषमिति षड् वेदाङ्गानि । स्मृतयश्च वेदाङ्गानि ॥ ५० ॥

सुस्मितेन्दुमरविन्दलोचनं स्वर्णवर्णमतिभद्रभाषणम् ।
वीतभूषमपि विश्वभूषणं तं दिदृक्षुरलमापतज्जनः ॥ ५१ ॥

(प.दी.) सुस्मितेति । **जनः सुस्मितेन्दुमरविन्दलोचनं स्वर्णवर्णमतिभद्रभाषणं वीतभूषमपि विश्वभूषणं तं दिदृक्षुरलमापतत्** । तत्र विद्वज्जनः तस्य विद्वत्तादिगुणजिज्ञासयाऽगमत्, इतरो जनः तत्स्वरूपदिदृक्षुरागमदित्यभिप्रायेण 'प्रापुर्द्विजेन्द्राः' इति 'तं दिदृक्षुरलमापतज्जनः' इति पृथगुक्तम् ॥ ५१ ॥

(त.चं.) भद्रं भव्यम् । माङ्गलिकमित्येतत् । रथोद्धता ॥ ५१ ॥

विद्योरुद्युतिधीरतारकतिरस्कारे पतङ्गायितो
दुर्वादीभकुतर्ककुम्भदलने सिंहप्रबर्हायितः ।
लोलालोककलोकदृक्कुमुदिनीसंह्लादनेऽब्जायितः
संसन्मण्डलमण्डनायित उत स्वानन्दतीर्थो बभौ ॥ ५२ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते पञ्चमः सर्गः

—०—

(भा.प्र.) अब्जपतङ्गौ चन्द्रार्कौ ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य भावप्रकाशिकाख्यटीकायां पञ्चमः सर्गः

—०—

(प.दी.) विद्येति । **विद्योरुद्युतिधीरतारकतिरस्कारे,** विद्याख्योरुद्युतीनां धीरतारकाणां विद्वदाख्यतारकाणां तिरस्कारे निरासे **पतङ्गायितः** सूर्यायितः । 'पतङ्गौ पक्षिसूर्यौ च' इत्यमरः । पतङ्गवदाचरतीति पतङ्गायितः । उद्यदादित्यो यथा नक्षत्रप्रभां नाशयेदेवं श्रीमध्वाचार्योऽपि विदुषां विद्वत्तां निराकरोतीति भावः । **दुर्वादीभकुतर्ककुम्भदलने,** दुर्वादिनामकानामिभानां गजानां कुतर्ककुम्भदलने भगवतो निराकारत्वनिर्गुणत्वजीवाभिन्नत्वपरिमितगुणत्वादिसाधककुतर्काख्यकुम्भस्थलस्य दलने विदारणे **सिंहप्रबर्हायितः** सिंहश्रेष्ठ इव वर्तमानः । सिंहप्रबर्हो यथा इभकुम्भमत्ययत्नं विदारयेदेवमसौ दुर्वादिनां कुतर्कविदारणे समर्थ इति भावः । **लोलालोककलोकदृक्कुमुदिनीसंह्लादनेऽब्जायितः** । लोलः चञ्चलः सम्भ्रान्तो वा आलोको दर्शनं यस्य सः लोलालोकः, स्वार्थे कप्रत्ययः, लोलालोक एव लोलालोककः, स चासौ लोको जनश्चेति लोलालोककलोकः, तस्य दृक्कुमुदिन्याः लोचनाख्योत्पलस्य संह्लादने **अब्जायितः** चन्द्रायितः । 'अब्जौ शङ्खशशाङ्कौ च' इत्यमरः । **संसन्मण्डलमण्डनायितः** संसन्मण्डलस्य सभामण्डलस्य मण्डनायितः अलङ्कारभूतः उत एवम्भूतः **स्वानन्दतीर्थः बभौ** ॥ ५२ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां वेदाङ्गतीर्थमुनिकृतायां पञ्चमः सर्गः

—०—

(त.चं.) 'भं नक्षत्रं तारकं तारका च' इति च । 'पतङ्गो भगः सूर्यः' इति च । 'प्रवरं प्रबर्हम्' इति च । 'सोमो राजा रोहिणीवल्लभोऽब्जः' इति च । शार्दूलविक्रीडितं छन्दः । अतिधृतिः । 'शार्दूलविक्रीडितं तु यत्र मः

सजसाः पुनः । ततगाः सूर्यऋषिभिर्विरतिस्तत्र कीर्तितम्' । यत्र मः सजसाः ततगाः तत् शार्दूलविक्रीडितं कीर्तितम् । तत्र च सूर्यऋषिभिर्विरतिरिति ॥ ५२ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याचख्यौ पञ्चमं सर्गं सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां
तत्वचन्द्रिकायां पञ्चमः सर्गः

—०—

[आदितः श्लोकाः– २१९+५२=२७१]

षष्ठः सर्गः

[भगवत्पादेन ऋङ्मन्त्रार्थकथनव्याजेन विष्णुसहस्र-नाम्नां शतार्थकत्वकथनम्; विश्वपदार्थविवरणं च। तद्ग्रहणेऽसमर्थानां विदुषां शरणागतिः। अन्यस्मिन्ना-यतने दानसूक्तार्थविवरणम्। अपालासूक्तविवरणम्। आचार्यस्य सर्वज्ञत्वख्यातिः। रजतपीठपुरं प्राप्य गीताभाष्यरचनम्। उत्तरभारतयात्रा। गङ्गातरणम्। बदरीक्षेत्रदर्शनम्। तत्र नारायणस्य गीताभाष्य-समर्पणम्। काष्ठमौनादिना नारायणतोषणम्। व्यासेन स्वाश्रमगमनार्थं चोदना। व्यासाश्रमं प्रति प्रस्थानम्। सत्यतीर्थेन तदनुगमनप्रयासः। भगवत्पादस्य पाणि-नाऽभिनयेन नुन्नस्य तस्य क्षणादशेषमार्गमतीत्य प्रत्यागमनम्। मध्वेन व्यासबदरीं गच्छता हिमवन्तं दृष्ट्वा भगवतो नारायणस्य स्मरणम्।]

ऐतरेयमथ किञ्चन सूक्तं
सूचयन् सदसि तत्र गरिष्ठः ।
श्रोतुमिच्छति सभा भगवद्भ्यः
सूक्तभावमिति तावदुवाच ॥ १ ॥

(प.दी.) ऐतरेयम् । **अथ** श्रीमध्वाचार्यसन्दर्शनानन्तरं **तत्र सदसि** सभायां **गरिष्ठः** श्रेष्ठः कश्चिद् विद्वान् **ऐतरेयं** ऐतरेयशाखायां विद्यमानं **किञ्चन सूक्तं सूचयन्** सन् **तावदित्युवाच** । **सभा** मिळितेयं सभा **भगवद्भ्यः सूक्तभावं** एतत्सूक्तार्थं **श्रोतुमिच्छति इति** ॥ १ ॥

(त.चं.) तावदुवाच । तावदित्यधिकारार्थः । अनया वाचोभङ्ग्या चर्चामारेभ इति । पाण्डित्यजिज्ञासासम्भ्रमेणेति वा । 'तावन्मानेऽवधारणे । सम्भ्रमे च परिच्छेदे तथा कात्स्न्याधिकारयोः' इति च । ऐतरेय्याः शाखाया ऐतरेयस्य वा भगवत इदमैतरेयम् । ऋक्संहितागतं किञ्चन सूक्तम् । 'उत्पत्तिमायतिं चैव भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति' इति च । अत्र आ चतुःपञ्चाशं श्लोकं त्रैष्टुभं स्वागतं छन्दः । रथोद्धतैव नवमदशमवर्णयोर्गुरुलघुव्यत्ययेन स्वागतं भवति । 'स्वागतं रो नभगगाः पादमध्ये यतिर्नहि' इति कृष्णावधूतः । स्वागतेत्यन्ये ॥ १ ॥

वर्णसौष्ठवगरिष्ठमतूर्णं तुल्यमात्रमतिमात्रसुलक्ष्म ।
व्यूढहृज्जलदघोषममुष्योच्चारणं विदधदभ्यधितार्थम् ॥ २ ॥

(प.दी.) वर्णेति । व्यूढहृत् श्रीपूर्णप्रज्ञाचार्यः **अमुष्य** तत्र प्रस्तुतस्य सूक्तस्य **अर्थमभ्यधित** उवाच । किं कुर्वन्? **वर्णसौष्ठवगरिष्ठम्,** वर्णानां सौष्ठवेन

स्पष्टतया गरिष्ठं अत्युत्तमं यथा भवति तथा । **अतूर्णम्,** अत्वरितं यथा भवति तथा । **तुल्यमात्रम्,** तुल्यमात्रं यथा भवति तथा । तुल्यमात्रत्वं नाम अकारादिवर्णानां ह्रस्वत्वेन उच्चारणे एकमात्रत्वं, दीर्घत्वे द्विमात्रत्वं, प्लुतत्वे त्रिमात्रत्वं, व्यञ्जनोच्चारणे त्वर्धमात्रत्वमिति । तथाह्युक्तम् 'एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रकम्' इति । एकमात्रत्वेन ह्रस्वोच्चारणम्, द्विमात्रत्वेन दीर्घोच्चारणमित्यादि तुल्यमात्रत्वमिति भावः । अत एव **अतिमात्रसुलक्ष्म,** अतिशयेन शोभन-लक्षणयुक्तं यथा भवति तथा । **जलदघोषम्,** मेघघोषवद् घोषयुक्तं यथा भवति तथा, **उच्चारणं** प्रकृतसूक्तोच्चारणं **विदधत्** कुर्वन् ॥ २ ॥

(त.चं.) वर्णानां सौष्ठवं सौस्थित्यम् । परस्परमवष्टब्धतयोच्चारणमित्ये-तत् । अपि च विशकलिततया श्रवणादतूर्णम् । अतिमात्रसुलक्ष्म । स्फुटत्व-मग्रस्तत्वमविलम्बितत्वं श्रुतिमधुरता चेत्यादीनि सुलक्षणानि शीक्षाशास्त्रेषु पठितानि । तद्यथा मार्जारी शिशुं दन्तैर्निष्पीड्य कण्ठे गृहीत्वा नयति न पातयेत्, नापि पीडयेत्, तथा वर्णानुच्चरेत् । कण्ठ्यनासिक्यादीन् यथास्थान-मुच्चरेदित्यादि । तद् यथा–'शँय्युः' इति तालव्योऽपि यकारो भवति, नासि-क्योऽपि । 'वाग्ग्मी' इति कण्ठ्योऽपि गकारो भवति, नासिक्योऽपि ॥

लक्षणान्विततया वचनेऽस्मिन्
देवतागुरुमसावतिशेते ।
मानमित्यपि विधाय धिया ते
तत् तु सूक्तमपरार्थमवोचन् ॥ ३ ॥

(प.दी.) लक्षणेति । ते द्विजेन्द्राः **तत् सूक्तं** श्रीमध्वाचार्येणोक्तार्थं सूक्तं **तु अपरार्थम्,** अपरः अर्थो यस्य तत् अपरार्थं श्रीमध्वोक्तार्थादन्यार्थं **अवो-चन्** । अस्य सूक्तस्य भवदुक्तोऽर्थो न भवतीत्यवोचन् इति भावः । किं

कृत्वा? **असौ लक्षणान्विततया** वेदोच्चारणोचितलक्षणयुक्ततया **अस्मिन् वचने** सूक्तोच्चारणतदर्थकथनादिरूपे वचने विषये **देवतागुरुं** बृहस्पतिं **अतिशेते इति धिया** मनसा **मानं** सम्भावनां **विधायापि** ॥ ३ ॥

(त.चं.) तत् तु सूक्तम् । भेदे पक्षान्तरे वा तुः । धिया मानं विधायापि वाचा वादं चिकीर्षवः । सहसा पराभवमनङ्गीचिकीर्षवः । मान पूजायाम् । आदर इत्येतत् । धीशब्दोऽत्र धीन्द्रियं मन आह । ध्यायत्यनयेति ॥

स्यात् तथेत्थमपि सम्भविताऽर्थ-
स्त्र्यर्थतां श्रुतिषु वित्त दशार्थम् ।
भारतं ननु शतार्थमपि स्याद्
वैष्णवं पदसहस्रतयं हि ॥ ४ ॥

(भा.प्र.) 'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते ।
विष्णोः सहस्रनामापि निरन्तरशतार्थकम्' इति ।
'सङ्ख्याया अवयवे तयप्' इति सहस्रतयम् ॥

(प.दी.) **स्यात्** । **अर्थः** एतत्सूक्तार्थः **तथा** अस्मदुक्तप्रकारेण **स्यात्** भवेत् । **इत्थमपि** भवदुक्तप्रकारेणापि **अर्थः सम्भविता** सम्भवति । तस्मादर्थद्वयमपि प्रामाणिकमेवेत्यर्थः । तत्कथमिति चेदाह– **त्र्यर्थतामित्यादि** । **श्रुतिषु** सर्ववेदेषु **त्र्यर्थतां** अर्थत्रययुक्ततां **वित्त** जानीत । **भारतं** श्रीमहाभारतं **दशार्थं वित्त** । **वैष्णवं** विष्णुवाचकं **पदसहस्रतयं** नामसहस्रकं **शतार्थमपि स्यान्ननु** । **हि** यस्मात् तस्मादर्थस्तथा स्यात्, इत्थमपि सम्भविता । तथाचोक्तम्– 'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते । विष्णोः सहस्रनामापि निरन्तरशतार्थकम्' इति ॥ ४ ॥

(त.चं.) सहस्रतयम् । 'सङ्ख्याया अवयवे तयप्' [५.३. ४२] । सहस्रं अवयवा अस्येति सहस्रतयम् । चतुष्टयं पञ्चतयमित्यादि ॥ ४ ॥

इत्युदीरयति विस्तृतचित्ते भूसुरा इह जिगीषव एनम् ।
ऊचुरर्थशतकं हरिनाम्नां वर्ण्यतामिति सहासमुखास्ते ॥ ५ ॥

(प.दी.) इतीति । विस्तृतचित्ते श्रीपूर्णप्रज्ञाचार्ये इति वेदादेस्त्र्यर्थतादिकमस्तीति उदीरयति सति इह वेदादेस्त्र्यर्थ[तादि]वर्णनविषये एनं जिगीषवः ते भूसुराः सहासमुखाः अत्रायं निरुत्तरो भविष्यतीति मत्वा स्मेरमुखाः सन्तो हरिनाम्नाम्, 'विश्वं विष्णुः' इत्यादीनां भगवन्नाम्नां अर्थशतकं [वर्ण्यतां] उच्यतां इत्यूचुः ॥ ५ ॥

(त.चं.) इह विष्णोः सहस्रनाम्नां निरन्तरशतार्थकत्वविषये ॥ ५ ॥

वर्णयामि तदहं सकलं वः
सौष्ठवादनुवदन्तु भवन्तः ।
तं वदन्तमिति तेऽथ वदन्तो
बाढमित्यतिदृढोद्यममापुः ॥ ६ ॥

(प.दी.) वर्णयामीति । अहं तत् सकलं अर्थशतकं वो वर्णयामि । भवन्तः सौष्ठवात् सुष्ठुभावेन अनुवदन्तु । मदुक्तप्रकारेणार्थशतकं भवन्तः सम्यगनुवदन्तु । अथ इति वदन्तं तं बाढं तथाऽस्तु इति वदन्तः ते द्विजाः अतिदृढोद्यममापुः । तेन वक्ष्यमाणार्थशतानुवादे सावधाना बभूवुरित्यर्थः ॥

(त.चं.) बाढमित्यङ्गीकारे वर्तते । 'अनुवदन्तु भवन्तः' इति यदुक्तं तदवश्यमूरीकृतमस्माभिरिरिति वदन्तः । अतिदृढं प्रयतनं चक्रुः ॥ ६ ॥

प्रत्ययप्रकृतिसङ्गमभङ्गीं
शब्दशास्त्रविहितां प्रतिदर्श्य ।
शुद्धधीः श्रुतिशिरःशतसिद्धा-
नभ्यधात् सपदि विश्वपदार्थान् ॥ ७ ॥

(भा.प्र.) 'विश प्रवेशने' इति धातोर्विष्टं ज्ञानरूपं च विश्वम् । टुओश्वि गतिवृद्ध्योरिति च। विना पक्षिणा श्वयतीति विश्वम्। 'तृतीयोऽतिशये'[१] इति विश्वम् । विशेषेण व्याप्तत्वाच्च, विशेषेण ज्ञानरूपत्वाच्च, विशेषेण नित्य-वृद्धत्वाच्च । 'विश्वमेव हि सर्वम्', 'सर्वं पूर्णमिहोच्यते' इति न्यायेन पूर्णत्वाच्च विश्वम्। एवं 'विश्वो हिरण्यगर्भोऽग्निर्यमः' इत्यादेर्विश्वस्य वायोरन्तर्यामि-त्वाच्च । जगत्प्रवर्तकस्य[२] विश्वनामकत्वादित्यादिना रूपेण पञ्चाशदधिका-र्थानभ्यधात्॥

(प.दी.) **प्रत्ययेति** । **शुद्धधीः** श्रीमध्वाचार्यः **सपदि** तदानीमेव **श्रुतिशिरः-शतसिद्धान्**, उपनिषच्छतेषु सिद्धान् प्रमितान् **विश्वपदार्थान्** 'विश्वं विष्णु-र्वषट्कारः' इत्यत्र विश्वपदस्यार्थान् **अभ्यधात्** । किं कृत्वा? **शब्दशास्त्र-विहितां** व्याकरणेऽभिहितां **प्रत्ययप्रकृतिसङ्गमभङ्गीं** प्रत्ययप्रकृतिसङ्गम-प्रकारं **प्रतिदर्श्य** दर्शयित्वा । धात्वादिरूपं प्राग्विद्यमानं शब्दस्वरूपं प्र-कृतिः । पश्चाद् विधीयमानः प्रत्ययः । तयोः सङ्गमः सम्बन्धः । तत्प्रकारं दर्शयित्वाऽभ्यधात् । तत् कथमिति चेदुच्यते । विश प्रवेशन इति धातो-रौणादिके क्वन्प्रत्यये कित्त्वादुपधागुणाभावे सति विश्वमिति रूपम् । विशतीति विश्वम् । 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति सर्वत्र प्रविष्टत्वाद् विश्वमित्यर्थः । सर्वत्र प्रविष्टत्वाद् ज्ञानरूपत्वाद् विश्वम् । तत्रायं विभागः– 'विश प्रवेशने' इति धातोः क्विप्, 'वा गतिगन्धनयोः' इत्यस्माद् डप्रत्यय-ष्टिलोपश्च । गत्यर्थस्य ज्ञानार्थत्वात् । विट् चासौ वं चेति विश्वमिति वि-ग्रहः । विः पक्षी गरुडः । विना श्वयति गच्छतीति वा विश्वम् । अस्मिन् पक्षे पक्षिवाचकाद् वीत्यतः परतः 'टु ओश्वि गतिवृद्ध्योः' इत्यस्मादच् प्रत्ययः । विशेषेण श्वयतीति व्याप्नोतीति वा विश्वम् । अस्मिन् पक्षे

१.अस्फुटोऽर्थः । वं ज्ञानबलरूपम् । 'तृतीयोऽतिशये' इति वचनाद् वि अतिशय-ज्ञानबलरूपम्, श्वयति चेति विश्वमिति स्यात् । प्रायो लुप्तमेकं वाक्यम् ।

२.'जाग्रत्प्रवर्तकस्य' इति च मूलपाठः सम्भाव्यते ।

वीत्युपसर्गः । विशेषेण वर्धत इति वा विश्वम् । परिपूर्णमिति यावत् । विश्वं वायुमन्तर्यामितया वर्तयतीति वा विश्वम् । अत्र च विश्वशब्दो वायुवाचकः । 'विश्वो हिरण्यगर्भोऽग्निर्यमो वरुणरुद्रेन्द्राः' इति प्रयोगात् । अत्र च विश्वशब्दादुत्तरतः वृतु वर्तन इति धातोः डप्रत्ययष्टिलोपश्च । विश्वं जगद्वर्तयतीति वा विश्वम् । उक्त एव धातुप्रत्ययविभागः । विश्वशब्दो जगद्वाचकः, इत्यादिरूपेण पञ्चाशदधिकानर्थानभ्यधात् ॥ ७ ॥

(त.चं.) प्रतिदर्श्य । प्रतिपदं दर्शयित्वा । १) विशतीति विश्वम् । औणादिकः क्वन् । 'अशू-प्रुषि-लटि-कणि-खटि-विशिभ्यः क्वन्' [८.१२५] इति हि दशपादिका । २) अन्त्यलोपेन विष्टं विश् । 'अन्तःप्रविष्टं कर्तारम्' इति श्रुतिः । वातीति वं ज्ञानरूपम् । वा गतौ । वमिति बलं च भवति । आनन्दश्च । ज्ञानानन्दबलरूपं सर्वान्तर्गतं विश्वम् । ३) 'पक्षी विर्विष्किरः' इत्यभिधानम् । विना गरुडेन श्वयति गच्छति विश्वम् । टु ओश्वि गतिवृद्ध्योः । ४) वमेव वि । अतिशयज्ञानानन्दबलरूपम् । तृतीयोऽतिशये । श्वं सर्वगतं चेति विश्वम् । ५) विशेषेण श्वयति व्याप्नोतीति विश्वम् । विशेषेण अश्नुते इति वा प्रथमाक्षरलोपेन वि अश्वं विश्वम् । अशू व्याप्तौ । ६) विशेषेण श्वयति अवगच्छतीति विश्वं सर्वज्ञम् । ७) विशेषेण नित्यं श्वयति वर्द्धते पूर्णो भवतीति विश्वम् । ८) विश्वं पूर्णम् । कालतो देशतो गुणतश्च । विशन्ति तस्मिन् सर्वे गुणा इति विष्टमनेन सर्वमिति । ९)विश्वो वायुः । सोऽस्यास्ति नियम्यत्वेनेति विश्वं वायोरन्तर्यामिकम् । १०) विश्वो जीवः । सोऽस्यास्तीति वा विश्वम् । ११) विश्वं जगत् । तद् वर्तयतीति विश्ववम् । 'लोपः समाने' इत्येकवकारलोपेन विश्वम् । १२) विविधं शं सुखं ज्ञानं चास्माल्लोकानामिति विश्वम् । १३) विशिष्टं शं सुखं वं ज्ञानं चास्येति विश्वम् । १४) विशः मनुष्याः । 'विट् पुंसि मनुजे वैश्ये' इति च । तान् वेति प्रसूत इति विश्वम् । 'वी गतिप्रजनकान्त्यसनखादनेषु' । १५) विशः प्रजा वेत्यन्तर्यमयितुमिति

विश्वम् । १६) विशिष्टं सर्वजीवाधिकं शं सुखमस्येति विशः शतानन्दः । तं वेति प्रथमं जनयतीति विश्वम् । १७) विशिष्टानां शं वेतीच्छतीति विश्वम् । १८) विशः फलभोगाय तत्तद्योग्यस्थानेष्वस्यति क्षिपतीति विश्वम् । १९) '–अशनखादनेषु' इत्यन्ये । अशनं व्याप्तिः । विशो वेत्यश्नुत इति विश्वम् । २०) विशोऽन्ते वेत्यत्तीति विश्वम् । २१) वयः श्वयन्ति गच्छन्ति पक्षिणोऽनेनेति विश्वम् । २२) वयो विशिष्टा मुनयः श्वयन्त्यवगच्छन्त्येनमनेनैवेति विश्वम् । २३) विश्वस्य तदधीनत्वाद् विश्वम् । २४) विश्वज्ञत्वाद् विश्वम् । २५) विश्वव्याप्तत्वाद् विश्वम् । २६) विश्वस्य प्रभवाप्ययहेतुत्वाद् विश्वम् । २७) विशिष्टान् वर्धयतीति विश्वम् । २८) विपरीतानां शं सुखं वेति नाशयतीति विश्वम् । २९) विशं सुखविरुद्धं दुःखं जनयति तेषामिति विश्वम् । ३०) सतां पुनर्विशिष्टं सुखं जनयति मुक्ताविति विश्वमित्यादयोऽनेकेऽर्थाः परिस्फुरन्ति चिन्तकानाम् । दिङ्मात्रं तु प्रदर्शितम् ॥ ७ ॥

यावदर्थशतकं न विशङ्कः सन्ततोक्तिकृदपूपुरदेषः ।
वर्णितावधृतिदुर्बलचित्तास्तावदाकुलहृदो ह्यभवंस्ते ॥ ८ ॥

(प.दी.) यावत् । **विशङ्कः** शङ्कारहितः, अत एव **सन्ततोक्तिकृत्** निरन्तरमर्थकथनं कुर्वन् **एषः यावत् अर्थशतकं** विश्वपदार्थशतकं **नापूपुरत्** न पूरयामास । यावदर्थशतकं सम्पूर्णं नावददिति भावः । **तावत् वर्णितावधृतिदुर्बलचित्ताः** वर्णितस्यावधारणे दुर्बलचित्ताः **ते** द्विजाः **आकुलहृदः** सम्भ्रान्तमानसाः **अभवन् हि** ॥ ८ ॥

(त.चं.) यावत् तावदित्यवधिपरिच्छेदे ॥ ८ ॥

साङ्गवेदचतुरा इतिहासे शिक्षिताः सुबहवोऽप्यतिधृष्टाः ।
नैतदीरितमहो जगृहुस्ते विश्वसंक्षयपयोऽन्धुगणा वा ॥ ९ ॥

(प.दी.) **साङ्गेति** । **साङ्गवेदचतुराः** शीक्षाद्यङ्गोपेतवेदे तदर्थकथने च चतुराः । न केवलमेतावत् । अपि तु **इतिहासे** भारते **शिक्षिताः** । उपलक्षणमेतत् । सकलविद्याविदग्धा इति भावः । **सुबहवो** मिळिता **अपि अतिधृष्टा अपि ते** द्विजाः **एतदीरितं** एतदुक्तं **न जगृहुः** । **अहो** आश्चर्यम् । के किमिव? **अन्धुगणाः** गर्तसमूहाः **विश्वसङ्क्षयपयो वा** प्रळयजलमिव । 'वा विकल्पोपमानयोः' इत्यमरः ॥ ९ ॥

(त.चं.) अन्धुगणाः । अमतेरौणादिको धुक् । अमन्ति गच्छन्त्येनं जलार्थमित्यन्धुः कूपः । अम्यत इति वा । अम गतौ । 'अर्जि-दृशि-कमि-अमि-पसि-बाधां ऋजि-पशि-तुग्-धु-दीर्घ-हकाराश्च'[१.१३] इति दशपादिका । तद् यथा– ऋजुः । पशुः । कन्तुः । अन्धुः । पांसुः । बाहुः । अन्धयतीत्यन्धुः कूप इत्यन्ये । अन्धुर्जलमित्येके ॥ ९ ॥

देवतास्वसुलभा प्रतिभा ते
मानुषेषु चपलेषु कथा का ।
क्षाम्य सौम्य सकलज्ञ नमस्ते
ते ब्रुवन्त इति तं किल नेमुः ॥ १० ॥

(प.दी.) देवतासु । **ते** द्विजाः **इति ब्रुवन्तः** वदन्तः **तं नेमुः किल** । कथम्? हे **सकलज्ञ, ते प्रतिभा देवतासु असुलभा** दुर्लभा । **चपलेषु** चञ्चलचित्तेषु **मानुषेषु का कथा?** असुलभेति किं कथ्यते? हे **सौम्य, क्षाम्य** अस्मच्चापलं क्षमस्व । **ते नमः इति ब्रुवन्तः** ॥ १० ॥

(त.चं.) देवतासु । देवा एव देवताः । 'देवात् तल्' [५.४.३७] देवशब्दात् स्वार्थे तल्प्रत्ययो भवतीति । चपलेषु । 'चुपेरच्चोपधायाः'[८.१११] इति दशपादिका । चुपेर्धातोः कलप्रत्ययः । अकारश्च उपधायाः । चुप मन्दायां गतौ । चोपति मुहुर्मुहुरिति चपलः । श्वेतवनवासी तु चपधातोरेव कलप्रत्ययं मन्यते । चप सान्त्वने । चपति चप्यते वा चपलः ॥ १० ॥

वेदशास्त्रचतुरैरिह विद्यावित्तलिप्सुभिरवाप्तमशेषैः ।
प्राप केरळसुमण्डलजातैरन्यदायतनमायतचेताः ॥ ११ ॥

(प.दी.) वेदेति । **आयतचेताः** विस्तृतचित्तः इह पयस्वनीतटे **अन्यदायतनं** **प्राप**। कथम्भूतम्? **वेदशास्त्रचतुरैः विद्यावित्तलिप्सुभिः**, विद्याधिक्यानुसारेण लभ्यं वित्तं धनं लिप्सुभिः लब्धुमिच्छुभिः, **अशेषैः** सर्वैः **केरळसुमण्डलजातैः** केरळाख्यप्रशस्तमण्डले प्रशस्तग्रामे जातैरिति भावः । **अवाप्तम्** ॥ ११ ॥

(त.चं.) वेदशास्त्रचतुरैः । चत्यते जनैरिति चतुरः पटुः । चते याचने । मन्दि-वाशि-मथि-चति-चङ्कि-अङ्किभ्य उरच्'[८.१] इति दशपादिका । मन्दुरा । वाशुरो गर्दभः । मथुरा । चतुरः । चङ्कुरो रथः । अङ्कुरः । अन्यदायतनम्– पयस्विनीतीरे एव 'बैलङ्गडि'[ಬೈಲಂಗಡಿ]नाम्नि ग्रामे गतं विष्णुमन्दिरमिति वदन्ति ॥ ११ ॥

तर्कतन्त्रकुशलानपि पुंसश्चर्करीति बत सोऽयममानान् ।
मानमानमयतीह कथं नो नैष मण्डलभुवां समितानाम् ॥१२॥

मन्त्रयन्त इति ते द्विजवर्या अन्यदेशजमुखास्तमपृच्छन् ।
सद्ददाददसुशंसननिन्दाकारिसूक्तगतमर्थमुपेत्य ॥ १३ ॥

(भा.प्र.) 'न वा उ देवा' इति सूक्तम् । 'दद दाने' इति ददो दाता । 'उतापृणन् मर्डितारं न विन्दते' इत्यददनिन्दा । अपृणन् अददत् पुमान् पालकं न विन्दते । 'स इद् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय' इति दातृप्रशंसनम् । भुङ्क्त इति भोजः । स एव भोज इह परत्र च यो गृहवे ग्रहणयोग्याय ददाति ॥

(प.दी.) तर्केति । 'इति मन्त्रयन्तः ते द्विजवर्याः तमुपेत्य अपृच्छन्' इत्युत्तर-श्लोकेनान्वयः । कथं मन्त्रयन्तः? **सोऽयं तर्कतन्त्रकुशलान्** तर्कशास्त्रे तन्त्रे च कुशलान् चतुरान् **अपि**, वैशेषिकादयस्तर्काः, तन्त्रं भाट्टम्, **पुंसः** पुरुषान् **अमानान्** खण्डिताहङ्कारान् **चर्करीति** करोति । **बत** खेदे । **एषः समितानां**

मिळितानां **मण्डलभुवां** अशेषकेरळमण्डलजातानां **नः मानं** अभिमानं **इह कथं नानमयति**, कथं न निराकुयात् ॥ * ॥ **इति मन्त्रयन्तः** । कथम्भूता अपृच्छन्? **अन्यदेशजमुखाः** देशान्तरजातद्विजमुखाः । अस्माभिरेव प्रश्नादिके कृते सति यद्यस्माकं पराजयः स्यात् तर्हि केरळमण्डलस्यैव पराजयः स्यात् । केरळमण्डलत्रिषष्टिग्रामजनानामत्र मिळितत्वादिति मत्वा देशान्तरादागतं कञ्चन द्विजं पुरस्कृत्य तन्मुखेनापृच्छन्निति भावः । किमपृच्छन्? **सद्ददाददसुशंसननिन्दाकारिसूक्तगतमर्थमपृच्छन्** । सद्भ्यो ददत इति सद्दः । दद दान इति धातोः । न ददत इत्यददः । तयोः सद्दा-ददयोः सुशंसनं च निन्दां च करोतीति सद्दाददसुशंसननिन्दाकारि । तच्च तत् सूक्तं चेति तथोक्तम् । तद्गतमर्थम् । तत् सूक्तं किम्? 'न वा उ देवा क्षुधमिद् वधं ददुरुताऽशितमुप गच्छन्ति मृत्यवः' इत्यादि । तत्र 'उतापृणन् मर्डितारं न विन्दते' इत्यददनिन्दनम् । अपृणन् अदाता मर्डितारं पालकं भगवन्तं न विन्दते न लभते । 'स इद् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय' इति ददस्य सुशंसनम् । अस्यार्थः– यः गृहवे गृहमागताय अन्नकामाय चरते तत्रतत्र पर्यटते कृशाय दरिद्राय ददाति, अन्नादिकमिति शेषः, स इत् स एव भोजः भोक्ता इहामुत्र चेति शेषः, एवमेतत्सूक्तप्रतिपाद्य-मर्थमपृच्छन् ॥ १२ ॥ १३ ॥

(त.चं.) तर्कशास्त्रे तन्त्रे पुराणादौ च कुशलान् । 'मानो गर्वो भवेद-हङ्कारः' इति च ॥ * ॥ ददत इति ददो दाता तस्य सुशंसनं प्रशंसा । अददोऽदाता । तस्य निन्दनम् । तयोरिदं सूक्तं भवति– 'न वा उ देवाः' [१०.११७.१-९] इति नवर्चम् । भिक्षुराङ्गिरस ऋषिः । आद्ये जगत्यौ । शिष्टास्त्रिष्टुभः । धनान्नदानप्रेरको भगवान् देवता । तथाह्यनुक्रमणिका– 'न वा उ भिक्षुर्धनान्नदानप्रशंसा । आद्ये जगत्यौ' इति ।

न वा उं देवाः क्षुधमिद् वधं ददुरुताऽशितमुपं गच्छन्ति मृत्यवः ।
उतो रयिः पृणतो नोपं दस्यत्युतापृणन् मर्डितारं न विन्दते ॥

न वै देवा क्षुधमेव ददुः । किन्तु तद्व्याजेन वधमेव ददुः । उत आशितं भुक्तवन्तमपि मृत्यवः उप गच्छन्ति । उत उ पृणतः । पृण दाने । ददतोऽपि रयिः धनं नोप दस्यति न नश्यति । अपृणन्नपि अदददपि मर्डितारं पातारं न लभते ॥ * ॥

य आध्राय चकमानाय पित्वोऽन्नवान् सन् रफितायोपजग्मुषे ।
स्थिरं मनः कृणुते सेवते पुरोतो चित् स मर्डितारं न विन्दते ॥

आध्राय आधरणीयाय पित्वः पितूनन्नानि चकमानाय कामयमानाय रफिताय दारिद्र्यपीडिताय । रफ हिंसायाम् । उपजग्मुषे गृहमागतयातिथये यः स्वयमन्नवान् सन्नपि स्थिरं कठोरं मनः कुरुते, न दातव्यमिति, उतो तस्यान्नदानात् पुरा पूर्वमेव स्वयमन्नं सेवते स चित् सोऽपि मर्डितारं न विन्दते ॥ * ॥

स इद् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय ।
अरमस्मै भवति यामहूता उतापरीषु कृणुते सखायम् ॥

स एव भुङ्क्त इति भोजो भोक्ता इह चामुत्र च, यः गृहवे प्रतिग्रहयोग्याय, अन्नकामाय, अन्नार्थं चरते कृशाय दरिद्राय ददाति । यज्ञं यान्तीति यामा देवाः । ते हूयन्तेऽत्रेति यामहूतिर्यज्ञः । तस्मिन् अस्मै दात्रे अरमलं पर्याप्तं फलं भवति । उत अपरीषु शत्रुसेनास्वपि सखायं कुरुते । शत्रवोऽपि सख्यमिच्छन्ति ॥ * ॥

न स सखा यो न ददाति सख्ये सचाभुवे सचमानाय पित्वः ।
अपास्मात् प्रेयान्न तदोको अस्ति पृणन्तमन्यमरणं चिदिच्छेत् ॥

सचाभुवे सहभाविने, सचमानाय सेवमानाय, सख्ये यः पितूनन्नानि न ददाति न स सखा । किन्तु किंसखा । अदातुस्तदोकः सदनमोक एव न भवति । यत्र नान्नदानं भवति; नापि सखायो भवन्ति । तस्मादस्मादोकसः अप प्रेयात् अपगच्छेत् । अथवा न तदोको अस्ति; क्षिप्रं नश्यति । तत अपप्रेत्य पृणन्तं दातारं कञ्चिदन्यमरणं शरणमिच्छेत् ॥ * ॥

पृणीयादिन्नाधमानाय तव्यान् द्राघीयांसमनु पश्येत पन्थाम् ।
ओ हि वर्तन्ते रथ्येव चक्राऽन्यमन्यमुप तिष्ठन्त रायः ॥

तवीयान् समृद्धः पुरुषः नाथमानाय पृणीयादित् दद्यादेव । तेन दीर्घतमं सुकृतस्य पन्थानमनु पश्येत् । रायः धनानि आ उ वर्तन्ते आवर्तन्त एव हि परिवर्तन्त एव हि रथ्यानीव चक्राणि । अन्यमन्यमुपतिष्ठन्ते । नैकत्रावतिष्ठन्ते ॥ * ॥

मोघमन्नं विन्दते अप्रचेताः सत्यं ब्रवीमि वध इत् स तस्य ।
नार्यमणं पुष्यति नो सखायं केवलाघो भवति केवलादी ॥

अप्रचेताः, यस्य प्रदाने न चेतः, मोघं व्यर्थमन्नं विन्दते । सत्यं ब्रवीमि, तदन्नं तस्य वध एव । सः अर्यमणं ज्ञेयस्य सर्वस्य ज्ञातारं भगवन्तं न पुष्यति । नो सखायं पुष्यति । केवलाघो भवति केवलादी । 'भुञ्जते ते त्वघं पापा ये पचन्त्यात्मकारणात्' इति हि भगवद्वचनम् ॥ * ॥

कृषन्नित् फाल आशितं कृणोति यन्नध्वानमप वृङ्क्ते चरित्रैः ।
वदन् ब्रह्माऽवदतो वनीयान् पृणन्नापिरपृणन्तमभि ष्यात् ॥

कृषिं कुर्वन् फालः कर्षकः आत्मानमाशितं भोक्तारं करोति । अध्वानं यन् यात्रिकः सुचरितैः धनमप वृङ्क्ते आवर्जयति । शास्त्रार्थं वदन् ब्राह्मणः अवदतो वनीयान् भजनीयतरः । पृणन् दाता आपिर्बन्धुः अपृणन्तमभिष्यात् अदातुरभ्यधिकः स्यात् ॥ * ॥

एकपाद् भूयो द्विपदो वि चक्रमे द्विपात् त्रिपादमभ्येति पश्चात् ।
चतुष्पादेति द्विपदामभिस्वरे सम्पश्यन् पङ्क्तीरुपतिष्ठमानः ॥

एकांशधनः द्विपदः द्विगुणधनस्य भूयो वि चक्रमे मार्गमनु गच्छति । द्विपात् पश्चात् त्रिपादधनमभिगच्छति । क्वचिद् चतुर्भागधनः पुनः द्विपदां त्रिपदामेकपदां वा पङ्क्तीरेति । किमिति? अभिस्वरे तदभिगमने स्वसमस्यायाः परिहारं सम्पश्यन् स्वतो हीनधनमपि तमुपतिष्ठमानः सेवमानः ॥ * ॥

समौ चिद्धस्तौ न समं विविष्टः सम्मातरा चिन्न समं दुहाते ।
यमयोश्चिन्न समा वीर्याणि ज्ञाती चित् सन्तौ न समं पृणीतः ॥

समावपि हस्तौ न समं विविष्टः कार्यं व्यापृतः । विष्ऌ व्याप्तौ । सम्मातराविति प्रतृण्णम् । वत्सप्रीत्या सङ्गते अपि मातरौ न समं पयो दुहाते । मातरौ न सन्दुहाते इति वा । अनियतं हि प्रतृण्णं भवति । यमयोरपि सहजयोर्न समानि वीर्याणि । ज्ञाती समानहृदयौ बन्धू अपि सन्तौ न समं दत्तः । न कदाऽपि द्वावेकरूपाविति । तथाहि भगवत्पादवचनम्– 'भिन्नाश्च भिन्नधर्माश्च पदार्था निखिला अपि' इति । तस्माद् यस्य यदस्ति तत् तेन देयमिति ॥ १२ ॥ १३ ॥

तं स्फुटं प्रकथयन् स पृणीयाच्छब्दमूलमवदत् पृणधातुम् ।
तं जिगीषुमथ विप्रमदः प्रीधातुमेष निगदन्तमुवाच ॥ १४ ॥

(भा.प्र.) 'पृणीयादिन्नाधमानाय –' इति पृणीयाच्छब्दस्य 'पृण दाने' इति परिपठितं पृणधातुमवदत् । **नाथमानाय याचमानाय । 'प्रीङ् प्रीणने'**[1] इति धातुं परोऽवदत् ॥

(प.दी.) तमिति । तं प्रस्तुतसूक्तार्थं **स्फुटं प्रकथयन् सः पृणीयाच्छब्दमूलं** 'पृणीयादिन्नाधमानाय तव्यान्' इत्यत्र पृणीयादितिशब्दस्य मूलं **पृणधातुं** पृण दान इति धातुं **अवदत्** । पृणीयादितिशब्दः पृण दान इति धातुमूलक इत्यवददिति भावः । **अथ** एवं कथनानन्तरं **एषः** श्रीमध्वः **अदः** पृणीयाच्छब्द-मूलं **प्रीधातुं** प्रीङ् प्रीणन इति धातुं **निगदन्तम्,** पृणीयादित्यत्र प्रीङ् प्रीणन इति धातुरिति वदन्तम्, जिगीषुं आत्मानं जेतुमिच्छन्तं तं स्वप्रत्यर्थिभूतं विप्रं **उवाच** ॥ १४ ॥

(त.चं.) सम्प्रति 'पृण दाने' इति धातुरेव न पठ्यते । 'पृण प्रीणने'

---

१. 'प्रीञ् प्रीणने' इति क्वचित् । तदेव स्वरसम् । प्रीणातीत्यादि हि तद्रूपम् ।

इति तुदादौ पठ्यते । यस्य लिङि पृण्यादिति रूपम्, न पृणीयादिति । तर्क्यते प्रायः पृण दान इति धातुः पुरा पर्यपठ्यत क्र्यादौ । यस्य पृणाति, पृणीयादित्यादि रूपं सम्भवति । इदानीं पॄधातुः पठ्यते 'पॄ पालनपूरणयोः' इति, न पृणधातुः । एवं प्रीधातुमित्यपि द्वेधा शक्यं व्याख्यातुम् । प्रीञ्धातुरिति प्रीङ्धातुरिति च । उभयथाऽपि कोशेषु पाठः । प्रीञ् प्रीणने, प्रीङ् प्रीणन इति च पठन्ति । सम्प्रति क्र्यादौ 'प्रीञ् तर्पणे कान्तौ च' इति पठ्यते । प्रीणातीत्यादि रूपम् । चुरादौ 'प्रीञ् तर्पणे' इति । प्रीणयति । दिवादौ च 'प्रीङ् तृप्तौ' इति । प्रीयते ॥ १४ ॥

प्रादिभेदमविदन् गुणय त्वं
मूढ पांसुषु लिखन् लिपिसङ्घम् ।
[१]भत्सयन्निति जहास सुहासो
मत्सराकुलधियो जडयन् सः ॥ १५ ॥

(भा.प्र.) जडयन्–

प्रहसति पश्यति तिर्यक् समधिकरक्तेन लोचनेन रुषा ।
करकिसलयेन चोरुं प्रहरति च तदा सभा चकम्पे च ॥

(प.दी.) प्रेति । **प्रादिभेदमविदन्** अजानन् । पृणीयादित्यत्र प्रीङ् प्रीणन इति धातुं वदन् अत एव प्रादिभेदं प्र पृ इत्यादि वर्णभेदमित्यर्थः । प्र पृ इति वर्णभेदं **अविदन्** अजानन् **मूढ** त्वं **पांसुषु लिपिसङ्घं लिखन् गुणय** इति एवमुक्त्वा **भत्सयन्** धिक्कुर्वन् **सुहासः सः जहास** । किं कुर्वन्? **मत्सराकुलधियः** मत्सरग्रस्तबुद्धीन् केरळमण्डलजातान् **जळयन्** जळीकुर्वन् ॥ १५ ॥

(त.चं.) गुणय आवर्तय । गुण आमन्त्रणे । अशिष्यमेतत् । 'क्रियावाचित्व-

---

१. प्राचीनकोशेषु 'भत्सयन्' इत्येव पठचते । नतु 'भर्त्सयन्' इति । वेदाङ्गतीर्थीयेऽपि तथा । श्रीहृषीकेशतीर्थादिभिरप्येवं लिखितं दृश्यते । किं भर्त्सधातोः प्रतनं रूपं भत्सेति, आहो धात्वन्तरमुतवा केवलं लिपिस्खलनमिति विशेषज्ञैर्विभावनीयम् ।

माख्यातुमेकोऽत्रार्थः प्रदर्शितः । प्रयोगतोऽनुगन्तव्या अनेकार्था हि धातवः' इति हि वदन्ति । अन्यत्र च– 'निपाताश्चोपसर्गाश्च धातवश्च त्रयोऽप्यमी । अनेकार्थाः स्मृताः सद्भिः पाठस्तेषां निदर्शनम्' इति । 'भत्सयन्' इत्येव बहुकोशानुसारी पाठः । 'भत्स' इत्येव प्राचीनो धातुपाठ इति भाति । महान्तः प्रमाणम् । उक्तं हि क्षीरतरङ्गिण्यामपि– 'पाठेऽर्थे चागमभ्रंशान्महतामपि मोहतः । न विद्मः किं नु जहिमः किं वाऽत्राऽदद्महे वयम्' इति । 'कौशिकस्तु दद धारणे दध दान इति पाठं व्यत्यास्थात् । वयं हि मतभेदप्रदर्शनमात्रेणैव कृतार्थाः । मुनिमुख्यानां वाक्यं कथङ्कारं विकल्पयामः । वयमपि हि स्खलन्तोऽन्यैः कियन्नोपालप्स्यामहे' इति च । 'यदेतद् भवत्यादिधातुपरिगणनं तद् बाहुल्येन निदर्शनत्वेन ज्ञेयम् । तेनापठिता मिलिक्लविप्रभृतयो लौकिकाः स्तभुस्तुम्भादयश्च सौत्राश्चुलुम्पादयश्च वाक्यकारीया धातव उदाहार्याः । वर्धते हि धातुगणः' इति च । 'गुर्दस्थाने दौर्गाः खुर्दं पेठुः । गुदस्थाने गुधेत्येके' इति च । काशकृत्स्नस्तूभयमपि पठति– 'कुर्द खुर्द गुर्द घुर्द क्रीडायामेव' इति । जडयन् जळयन्नित्युभयमपि साधु । 'जल घात्ये' इति पाणिनीयाः[१] । घात्यं जडत्वम् । 'जल धान्ये' इति काशकृत्स्नश्चन्द्रश्च । वस्तुतस्तु 'जड घात्ये' इत्येव पठनीयम् । अज्मध्यस्थत्वात् डस्य ळः । तेन जडयन् जळयन् । किङ्कर्तव्यतामौढ्यं जडनम् ॥ १५ ॥

तत्प्रसङ्गबलतोऽखिलविद्या-
पाटवं पृथुहृदः प्रतिबुद्ध्य ।
आनमन् सबहुमानममी तं
यं नमन्ति किल नाकिनिकायाः ॥ १६ ॥

(प.दी.) तदिति । **अमी** द्विजाः **तत्प्रसङ्गबलतः** तत्सूक्तार्थकथनप्रसङ्गबलात् **पृथुहृदः** श्रीपूर्णप्रज्ञाचार्यस्य **अखिलविद्यापाटवं** सकलविद्यासु चातुर्यं

१. अधिकं दशमसर्गे [११] तत्वचन्द्रिकायां द्रष्टव्यम् ।

प्रतिबुद्धय ज्ञात्वा **सबहुमानं** सादरं तं **आनमन्, नाकिनिकायाः** देवसमूहाः **यं नमन्ति किल** ।। १६ ।।

(त.चं.) प्रतिबुद्धय प्रत्यक्षं बुद्ध्वा ।। १६ ।।

कन्यकादृतसुरेन्द्रवपुःश्री-
दानवाचिवरसूक्तहृदुक्तौ ।
कुत्रचित् सदसि तावदपाला
कीर्तिताऽतितरुणीत्ययमूचे ।। १७ ।।

(भा.प्र.) 'कन्या३ वारवायती सोममपि स्रुताऽविदत्। अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा' इत्यादि सूक्तम् । पुरातनी कन्येति कम्पार्थः । सोमं अवायती जनयन्ती [वाः[1]] स्रुताऽपि प्राप्ता चालभत । गृहं प्रत्याहरन्तीत्यब्रवीत्– इन्द्रायेत्यादि । 'असौ य एषि वीरको गृहंगृहं विचाकशत्' इत्यादि चाऽदरेण । 'अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम्' इति वपुःश्रीदानम् । स्वपाणिभ्यां त्रिरभिमृज्य संशोध्येति । अपाला नवयौवनेति चोचे ।।

(प.दी.) कन्यकेति । अयं श्रीमध्वः **कुत्रचित् सदसि कन्यकादृतसुरेन्द्रवपुः-श्रीदानवाचिवरसूक्तहृदुक्तौ,** कन्यकया आदृतेन सुरेन्द्रेण कन्यकायाः वपुषः श्रीदानवाचिनः कान्तिदानवाचिनः उत्तमस्य सूक्तस्य अभिप्राय-कथने प्रस्तुते सति, तत्र सूक्ते **अपाला कीर्तिता** अपालेत्युक्ता **अति-तरुणी इत्यूचे तावत्** । किं तत् सूक्तम्? 'कन्या३ वारवायती सोममपि स्रुताऽविदत् । अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा' इत्यादि । पुरातनी कन्येति कम्पार्थः । सोममवायती जनयन्ती कन्या स्रुताऽपि प्राप्ताऽपि सोमलतामाहर्तुं गता अविदत् अलभत । अस्तं गृहं प्रति

१.अत्र टीकायां 'कन्या वाः–' इत्यृग्गतस्य 'वाः' इति पदस्य व्याख्यानं लुप्तम् । वेदाङ्गतीर्थीयेऽपि तथा । विश्वपतितीर्थीयेऽपि । अर्थपूरणाय [ ] एतच्छिह्नान्तर्गतं तत् पदं निक्षिप्तम् । मूलपाठानुपलम्भात् तदेव शरणम् ।

भरन्ती वहन्ती, अब्रवीत् इत्यवदत्– हे सोम, त्वामिन्द्राय सुनवै शक्राय सुनवै अवहन्याम् । तात्पर्यद्योतिका द्विरुक्तिः । 'असौ य एषि वीरकः' इत्यादि चाऽदरेण । 'अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम्' । असौ य एषीत्यादिना आदरेण प्रीतः इन्द्रः त्रिः त्रिवारं पूत्वी पूत्वा पूतां कृत्वा पाणिभ्यां परिमृज्य संशोध्य अपालां नवयौवनां सूर्यत्वचं सूर्यवत् प्रकाशमान-त्वचमकृणोत् चकार । अत्रापालाशब्देनातितरुणी कथ्यत इत्ययमूचे ॥

(त.चं.) कुत्रचित् सदसि । सम्प्रति 'चेम्नाडु'[ചെമ്നാട്] इति प्रसिद्धे, तुरुष्कबहुले, पुरा तु 'शम्भुनाडु' इति प्रख्याते शम्भुलिङ्गेश्वरदेवमन्दिरे निवृत्तेयं घटनेति वदन्ति । सम्प्रतीदं मन्दिरं तुरुष्कैराक्रान्तमिति च । सूक्तस्य हृत् हृदयं मनोगतम् । अभिप्राय इत्येतत् । पदेभ्य आह्रियत इति हृत् । अपाल्यते अपवार्यते स्वाच्छन्द्यादित्यपाला नवयौवना । अल भूषण-पर्याप्तिनिवारणेषु । 'अलञ्' इति काशकृत्स्नः । 'अलँ' इति क्षीरस्वामी । तथाह्यपालासूक्तम्–'कन्या वाः–' [८.९१] इति सप्तर्चम् । अपाला आत्रेयी ऋषिका । आद्ये पङ्क्ती । शिष्टा अनुष्टुभः । इन्द्रो देवता–

कन्या३ वारवायती सोममपि स्रुताऽविदत् ।
अस्तं भरन्त्यब्रवीदिन्द्राय सुनवै त्वा शक्राय सुनवै त्वा ॥

अत्रिकन्या अपाला सोममवायती जनयन्ती वाः जलं जलाशयसमीपं स्रुताऽपि प्राप्ता च सती अविदत् सोममलभत । विदॢ लाभे । लब्धं च तमस्तं गृहं प्रति आवहन्त्यब्रवीत्– परमेश्वराय देवाय अभिषुणवै त्वाम्, ममाभीष्टदाने शक्ताय देवाय सुनवै त्वामिति ॥ * ॥

असौ य एषि वीरको गृहङ्गृहं विचाकशत् ।
इमं जम्भसुतं पिब धानावन्तं करम्भिणमपूपवन्तमुक्थिनम् ॥

पुनरेवमाह– हे इन्द्र, योऽसौ वीरस्त्वं विचाकशत् भासमानः सोममिच्छन् गृहङ्गृहमेषि स त्वमिमं जम्भसुतं मम दन्तैरभिष्टुतं सोमं पिब । जभि ताडने ।

जम्भयति खाद्यमेभिरिति जम्भा दन्ताः। पानेन साकं खाद्यमपि दद्यामित्याह– धानावन्तम्। धाना भर्जिता यवाः। करम्भाः दधिसक्तवः। अपूपवन्तम्। उक्थेन शस्त्रेण च युक्तम्। स्तुतिपूर्वं सखाद्यं पेयं ददानीति ॥ * ॥

आ चन त्वां चिकित्सामोऽधि चन त्वा नेमसि।
शनैरिव शनकैरिवेन्द्रायेन्दो परि स्रव॥

आ चन सम्यगेव त्वा चिकित्सामः ज्ञातुमिच्छामः। अथ च त्वामेव नाधीमसि नाधिगच्छामः। इन्दो सोम, शनैःशनैरिव सादरं त्वमिन्द्राय परिस्रव ॥ * ॥

कुविच्छकत् कुवित् करत् कुविन्नो वस्यसस्करत्।
कुवित् पतिद्विषो यतीरिन्द्रेण सङ्गमामहै॥

पीत्वा च खादित्वा च स नः कुविद् बहु शकत् शक्तिमतः करोतु। बहु चास्मभ्यमन्नपानादिकं करोतु। बहु च वस्यसः वसुमतः करोतु। बहुवारं पत्या द्विष्टास्तत एव पतिं विहाय दूरं यतीः यान्त्यो वयं सम्प्रतीन्द्रेण सङ्गच्छामहै ॥ * ॥

इमानि त्रीणि विष्टपा तानीन्द्र वि रोहय।
शिरस्ततस्योर्वरामादिदं म उपोदरे॥

इन्द्र, तानीमानि त्रीणि विष्टपानि स्थानानि विरोहय। कानि त्रीणि? खल्वाटस्य मे तातस्य शिरो विरोहय केशयुक्तं कुरु। तातस्य उर्वरामुर्वीं च विरोहय सस्यशालिनीं कुरु। आत् अनन्तरम्, आराद् द्रुतं वा, इदं च मम उपोदरे गुह्यं च रोहय रोमशं कुरु। उपोदरे इदमुरो विरोहय पीनस्तनं कुर्विति वा ॥ * ॥

असौ च या न उर्वराऽऽदिमां तन्वं मम।
अथो ततस्य यच्छिरः सर्वा ता रोमशा कृधि॥

असौ या न उर्वी सस्यरहिता, ताम्, आत् अनन्तरं इमां च तन्वं मम, अथो तातस्य यच्छिरः तानि सर्वाणि रोमशानि कुरु । सस्यमेव उर्व्या रोम ॥

> खे रथस्य खेऽनसः खे युगस्य शतक्रतो ।
> अपालामिन्द्र त्रिष्पूत्व्यकृणोः सूर्यत्वचम् ॥

हे शतक्रतो सर्वज्ञ इन्द्र, स्वीयस्य रथस्य खे छिद्रे, शकटस्य वृषवाह्यस्य छिद्रे, युगस्य–'नोग'[ನೊಗ] इति भाषायाम्– छिद्रे च प्रवेश्य त्रिः पाणिभ्यामभिमृज्य पूत्वी संशोध्य मामपालां सूर्यत्वचमकरोः । 'तस्यास्त्वगपहता या पूर्वा सा शल्यकोऽभवत् । उत्तरा त्वभवद्गोधा कृकलासस्त्वगुत्तमा । इतिहासमिदं सूक्तमाहतुर्यास्कभागुरी' इति च बृहद्देवतायाम् ॥ १७ ॥

श्वित्रिणी भवति तत्पदवाच्येत्याग्रहेण वदतोऽविदुषोऽत्र ।
कश्चिदेष्यति विपश्चिदिहैनं पृच्छतेत्ययमगच्छदथोक्त्वा ॥ १८॥

(प.दी.) श्वित्रिणीति । अथायं श्रीमध्वः तत्पदवाच्या अपालापदवाच्या **श्वित्रिणी** कुष्ठवती **भवतीति आग्रहेण** प्रमाणं विना दुराग्रहमात्रेण **वदतः** ब्रुवाणान् **अत्र** इह **अविदुषः** अबुधान् **इत्युक्त्वा अगच्छत्** ततो ययौ । कथम्? इह **कश्चिद् विपश्चित्** विद्वान् **एष्यति** आगमिष्यति **एनं पृच्छत इत्युक्त्वा** ॥ १८ ॥

(त.चं.) वदतः अविदुषः अपालाशब्दार्थम् । विदुषो वा । विविधं पश्यतीति विपश्चित् । 'विपश्यच्चित्त्वं विपश्चित्त्वम्' इत्येके । 'प्रकृष्टं निश्चिनोतीति विपश्चित्' इत्यन्ये । पृषोदरादिः ॥ १८ ॥

देशमेनमचिरादुपयात-
स्तादृशाकृतिरहो कृतबुद्धिः ।

तांस्तथाऽभ्यधित तत्पदभावं
सूरिमौलिमणिनाऽत्र यथोचे ॥ १९ ॥

(प.दी.) देशम् । एनं **देशमचिरादुपयातः** आगतः **तादृशाकृतिः** श्रीमध्वाचार्योक्तलक्षणयुक्ताकारः **कृतबुद्धिः** विद्वान् **तान्** अपालापदार्थे विप्रतिपन्नान् द्विजान् **तत्पदभावं** अपालापदार्थं **तथा अभ्यधित** उवाच । कथम्? **सूरिमौलिमणिना** विद्वच्चूडामणिना **अत्र यथा ऊचे** उक्तम् । **अहो** आश्चर्यम् ॥ १९ ॥

(त.चं.) कृतबुद्धिर्निश्चितप्रज्ञः ॥ १९ ॥

केवलं न सकलाः श्रुतिविद्या मानपूर्वकसमस्तगिरोऽस्य ।
अप्यनागतगतप्रतिपत्तिं श्रद्दधुः पृथुलचेतस एते ॥ २० ॥

(प.दी.) केवलम् । एते द्विजाः **मानपूर्वकसमस्तगिरः** प्रमाणमूलसमस्तवचनस्य **अस्य पृथुलचेतसः** श्रीपूर्णप्रज्ञाचार्यस्य **केवलं सकलाः श्रुतिविद्याः न श्रद्दधुः** । अयं केवलं सकलवेदविद्याचतुर इत्येव न श्रद्दधुः । अपि तु **अनागतगतप्रतिपत्तिमपि** एष्यदतीतज्ञानमपि **श्रद्दधुः** विशश्वसुः ॥ २० ॥

(त.चं.) प्रमाणोदाहरणपूर्वकाणि समस्तवचनान्यस्येति ॥ २० ॥

यद्यदेव सपदि प्रकृतं स्यात् तत्तदेष यदवेदखिलं च ।
सर्वदा सदसि सर्वबुधानां सर्वविद्यतिरिति प्रथितोऽभूत् ॥ २१ ॥

(प.दी.) यदिति । **सर्वबुधानां सदसि सर्वदा सपदि** तत्तत्काले **यद्यदेव प्रकृतं स्यात्**, यत्रयत्र सदसि यद्यत् श्रुतिपुराणादिकं प्रकृतं भवेत्, **एषः** श्रीमध्वाचार्यः **तत्तदखिलं चावेत्** ज्ञातवान् । **यत्** तत् तस्मात् **सर्वविद्यतिः** सर्वज्ञो यतिः **इति प्रथितः** प्रसिद्धः **अभूत्** ॥ २१ ॥

(त.चं.) यतिरयं सर्वविदिति प्रथितोऽभूत् । सर्वविद्यतिः सर्वज्ञमुनिरिति समस्तं वा पदम् ॥ २१ ॥

अप्रयातमपि देशमशेषं
व्यानशे सुजनकैरवबन्धुः ।
पूर्णदृक् प्रततया निजकीर्त्या
पूर्णचन्द्र इव चन्द्रिकयाऽलम् ॥ २२ ॥

(प.दी.) अप्रयातम् । **सुजनकैरवबन्धुः** सज्जनाख्यकैरवबन्धुः **पूर्णदृक्** श्रीपूर्णप्रज्ञाचार्यः **प्रततया** व्याप्तया **निजकीर्त्या अप्रयातमपि अशेषं देशं अलं व्यानशे** व्याप्नोति स्म । क इव? कैरवबन्धुः **पूर्णचन्द्रः चन्द्रिकयेव** ॥

(त.चं.) व्यानशे । अशू व्याप्तौ । 'कैरवं कुमुदं विदुः' इति च । 'कैरवं चन्द्रकान्तं च गर्दभं कुमुदम्' इति च ॥ २२ ॥

सुन्दरेषु सुरमन्दिरवृन्दे-
ष्विन्दिरारमणवन्दनकृत्यम् ।
आचरन्नसुचिरात् सुविचारो
रूप्यपीठपतिमाप मुकुन्दम् ॥ २३ ॥

(प.दी.) सुन्दरेष्विति । **सुन्दरेषु** शोभनेषु **सुरमन्दिरवृन्देषु** देवालयसमूहेषु **इन्दिरारमणवन्दनकृत्यम्,** शैवादिनानामरालयेषु केवलमिन्दिरारमणवन्दनाख्यं कृत्यं स्वकर्तव्यम्, **आचरन् सुविचारः** शोभनविचारयुक्तः श्रीमध्वः **नसुचिरात्** नातिचिरात् **रूप्यपीठपतिं मुकुन्दमाप** ॥ २३ ॥

(त.चं.) नसुचिरात् । असुचिराद् वा । 'चिरं चिरात् चिरेणेति दीर्घकाले प्रयुज्यते' इति च । चिराय,चिरस्य, चिरे च ॥ २३ ॥

भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तवपुषं रुचिराङ्गीम् ।
सूत्रदीप्तमणिमालिकयाऽलं भूषितां भुवनभूषणभूताम् ॥ २४ ॥

(भा.प्र.) भूसुरप्रवराः श्रुतिद्रष्टारो मुनयः, याजोपयाजौ च । अङ्गानि शीक्षादीनि, करचरणादीनि च । सूत्राण्येव दीप्तमणयः, सूत्रे गुणे दीप्तमणयः ॥

पादसुन्दरपदक्रमभावैर्भासितां प्रकटवर्णगुणाढ्याम् ।
भारतोत्तमभृतामनुरूपाच्छादनां समधिकस्वरशोभाम् ॥ २५ ॥

(भा.प्र.) पादैः सुन्दरपदैः क्रमैः तदभिप्रायैश्च । चरणसुन्दरविन्यासक्रमविलासैश्च । भारतमुत्तमं येषु शास्त्रेषु । 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्' इति च । भारतेषूत्तमाः पाण्डवाः । आच्छादनं गूहनं वृषलादिषु, निवसनं च ॥

राजसूयमुखसन्मखवृत्तां वासुदेवगुणनिष्ठितभावाम् ।
सर्वधर्मपरिशिक्षणदक्षां वन्दितां जनतया जननीवत् ॥ २६ ॥

(भा.प्र.) राजसूयादिषु वृत्तां मन्त्रत्वेन, यज्ञपत्नीत्वेन च ॥

मौलिसङ्ग्रहविकर्षणदूनां
मायिना सदसि दुष्टजनेन ।
न्यायमार्गमपहाय महान्तं
स्वेश्वरत्वमपि साधयताऽलम् ॥ २७ ॥

(भा.प्र.) मौलिसङ्ग्रहणमुपनिषद्ग्रहणम्, केशग्रहणं च । मायी मायावादी, व्याजी दुःशासनादिश्च । स्वेश्वरत्वं स्वस्य ब्रह्मत्वम्, साम्राज्यभोक्तृत्वं च ॥

सज्जनैः कतिपयैरतिदीनैश्चालितैः कलिबलाच्छुभमार्गात् ।
अप्युपेक्षितविकर्षणदुःखां सातिशोकमपि कैश्चन दृष्टाम् ॥ २८ ॥

(भा.प्र.) सज्जनैः भीष्मादिभिश्च । सातिशोकमपि कैश्चन विदुरेण धर्मसाक्षिभिर्देवैश्च ॥

वासुदेव धरणीधर नाथेत्युच्चकैरपि मुहुः प्रवदन्तीम् ।
पूर्णसद्गुणमजं गतदोषं बिभ्रतीं हृदि विविक्तमशेषात् ॥ २९ ॥

(भा.प्र.) 'वासुदेवो वा इदमग्र आसीत्', 'दाधर्थ पृथिवीमभितो मयूखैः', 'आत्मेत्येवोपासीत' इत्यादि च । 'श्रीवासुदेव धरणीधर चक्रपाणे' इत्यादि च । हृदि स्वाभिप्राये, मनसि च ॥

वार्यतां बुधजनैर्ननु हाहा नैष धर्म इति चाभिदधानाम् ।
कृष्णलाळिततमामनवद्यामप्यनन्यशरणां शरणोत्काम् ॥ ३० ॥

(भा.प्र.) 'ततो भूय इव ते तमो य उ विद्यायां रताः', 'अथ हैनमुपाक्रोशत् सत्यं भिदा सत्यं भिदा सत्यं भिदा। मैवाऽरुवण्यो मैवाऽरुवण्यो मैवाऽरुत्रण्यः' इत्यादिना नैष धर्म इति च। एष ऐक्यवादः, सदसि केशापकर्षणादिश्च॥

वेदिजामिव पुरा भरताग्र्यः स स्वयं श्रुतिततिं खलु दृष्ट्वा ।
पुष्टबुद्धिरकरोत् करुणाब्धिर्दुष्टपक्षदमनस्थिरसन्धाम् ॥ ३१ ॥

(प.दी.) **भूसुरेति**। अन्त्यकुळकमेतत्। **करुणाब्धिः पुष्टबुद्धिः** श्रीमध्वाचार्यः **दुष्टपक्षदमनस्थिरसन्धाम्**, दुष्टानां मायिप्रभृतीनां पक्षाणां सिद्धान्तानां दमने निराकरणे स्थिरसन्धां स्थिरां प्रतिज्ञाम्, **अकरोत् खलु**। **सः** श्रीमध्वाचार्यः **स्वयं पुरा भरताग्र्यः** भरतकुलाग्र्य **इव** भीमरूपः सन् यथा। किं कृत्वा? **श्रुतिततिं** वेदसमूहं **दृष्ट्वा**। कामिव? **वेदिजामिव** द्रौपदीमिव ॥ * ॥ कथम्भूतां श्रुतिततिम्? **भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तवपुषम्**, भूसुर-प्रवराः श्रुतिद्रष्टारो महर्षयः, तेषां बुद्धिसमृद्ध्यभिव्यक्तयुक्तस्वरूपाम्। भूसुरप्रवरयोः याजोपयाजयोः बुद्धिसमृद्ध्या, बुद्ध्याधिक्येन पत्न्या प्राश्य-हविषो वह्नौ होमेनेति यावत्, अभिव्यक्तयुक्तस्वरूपां **वेदिजां दृष्ट्वेव**। पुनः कथम्भूताम्? **रुचिराङ्गीं** शोभनशीक्षाद्यङ्गयुक्ताम्। अन्यत्र रुचिरहस्त-पादाद्यङ्गीम्। **सूत्रदीप्तमणिमालिकया** ब्रह्मसूत्राख्यशोभनमणिमालिकया **अलं भूषिताम्**। सूत्रेषु तन्तुषु दीप्तानां मणीनां मालयाऽलं भूषिताम्। **भुवनभूषणभूतां** भुवनालङ्कारभूताम् ॥ * ॥ **पादसुन्दरपदक्रमभावैः**, पादैः ऋचां चतुर्थांशैः, सुन्दरपदैः, क्रमैः, भावैः तत्तदभिप्रायैश्च, **भासिताम्**। इतरत्र पादाभ्यां सुन्दरपदक्रमेण, पदक्रमः पदविन्यासः गमनं तेन, पादाभ्यां सुन्दरं यथा भवति तथा गमनेन, भावैः विलासैश्च भासिताम्। **प्रकट-वर्णगुणाढ्याम्**, प्रकटैः वर्णगुणैः स्पृष्टतादिभिः आढ्याम्। स्पृष्टत्वादयो

वर्णगुणाः 'स्पृष्टत्वमीषत्स्पृष्टत्वं संवृतत्वं तथैव च। विवृतत्वं च वर्णानामन्तः कारणमुच्यते' इति वचनात्। तत्र कादिवर्गपञ्चकस्य स्पृष्टत्वम्। यरलवानामीषत्स्पृष्टत्वम्। शषसहानां पञ्चदशस्वराणां च विवृतत्वम्। ह्रस्वाकारस्य संवृतत्वमिति। प्रकटेन वर्णेन कृष्णवर्णेन गुणैः श्रीविष्णुभक्त्यादिसद्गुणैरप्याढ्याम्। **भारतोत्तमभृताम्,** भारतं च तदुत्तमं उत्तमशास्त्रं चेति भारतोत्तमम्, भारताख्यमुत्तमशास्त्रमिति यावत्, तेन भृतां बृंहितां वर्धितार्थामिति भावः। उपलक्षणमेतत्। वेदव्याख्यारूपैर्भारतपुराणैर्महार्थतया व्याख्यातामिति भावः। 'इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्। बिभेत्यल्पश्रुताद् वेदो मामयं प्रचलिष्यति' इति वचनात्। इतरत्र भारतोत्तमैः पाण्डवैः भृतां ऊढाम्। **अनुरूपाच्छादनाम्,** अनुरूपं आच्छादनं वृषळादिषु गूहनं यस्याः सा तथोक्ता ताम्। अनुरूपवसनामित्यपरत्र। **समधिकस्वरशोभाम्**। समधिका उदात्तादिस्वराणां शोभा यस्याः सा तथा ताम्। अन्यत्र स्पष्टोऽर्थः॥ ※॥ **राजसूयमुखसन्मखवृत्ताम्,** राजसूयादिसद्यज्ञेषु मन्त्रत्वेन वृत्ताम्। राजसूयादियज्ञेषु यज्ञपत्नीत्वेन वृत्ताम्। **वासुदेवगुणनिष्ठितभावाम्,** वासुदेवस्य गुणे स्थिराभिप्रायाम्। 'अथ कस्मादुच्यते ब्रह्मेति, बृहन्तो ह्यस्मिन् गुणाः' इत्यादिना भगवतोऽनन्तगुणप्रतिपादनपरामिति भावः। अपरत्र वासुदेवस्य गुणेषु स्थिरचित्ताम्। **सर्वधर्मपरिशिक्षणदक्षाम्,** 'प्रातरुत्थायाथ सन्ध्यामुपासीत नमेद् देवान् जुहुयादग्निं वेदानावर्तयीत नान्यत् किञ्चिदाचरेन्न भृशं वदेत्' इत्यादिना सर्वधर्मपरिशिक्षणचतुराम्। कृष्णा च अन्तःपुरजनानां सर्वधर्मपरिशिक्षणदक्षा। **जनतया** जनसमूहेन **जननीवत्** मातृवत् **वन्दिताम्**। इतरत्राप्युक्त एवार्थः॥ ※॥ **सदसि** सभायां **दुष्टजनेन** दुर्जनेन **मायिना** मायावादिना **मौलिसङ्ग्रहविकर्षणदूनाम्,** मौलिसङ्ग्रहेण उपनिषद्ग्रहणेन यद् विकर्षणं तेन दूनां दुःखिताम्। अत्र विकर्षणं नाम 'एकमेवाद्वितीयम्' इत्यादि वाक्यजनितभ्रान्त्या अशेषोपनिषदां बलादद्वैतपरतया योजनम्। तेन दूनाम्। अन्यत्र **मायिना** व्याजिना

दुष्टजनेन दुःशासनेन **सदसि** सभायां मौलिसङ्ग्रहविकर्षणेन केशपाशेषु गृहीत्वाऽऽकर्षणेन दुःखिताम् । कथम्भूतेन मायिना? **महान्तं न्यायमार्गं** भगवत एव सर्वेश्वरत्वादिप्रतिपादकब्रह्ममीमांसाशास्त्रसिद्धान्तन्यायमार्गं **अपहाय** हित्वा **अलं स्वेश्वरत्वं** स्वस्यैव ईश्वरत्वं ब्रह्मत्वं **अपि साधयता** । इतरत्र पाण्डवानामर्धराज्यदानाख्यन्यायमार्गमपहाय स्वस्यैव ईश्वरत्वं साम्राज्यभोक्तृत्वं साधयता दुःशासनेन ॥ * ॥ **कलिबलात्** कलिसामर्थ्येन **शुभमार्गात् चालितैः** अत एव **अतिदीनैः** अतिदुर्बलैः **कतिपयैः सज्जनैरपि उपेक्षितविकर्षणदुःखाम्,** उपेक्षितेन विकर्षणेन दुःखं यस्याः सा तथा ताम् । सज्जना अपि मायिनमुपेक्षन्ते न निराकुर्वन्ति बतेति दुःखितामिति भावः । **कलिबलात् शुभमार्गात्** सन्मार्गात् **चालितैः अतिदीनैः कतिपयैः** भीष्मादिभिः **उपेक्षितविकर्षणदुःखाम्,** एतच्च– 'इत्युक्ता अपि भीष्माद्याः कल्यावेशेन मोहिताः । पृच्छ धर्मजमित्युक्त्वा तूष्णीमेव बभूविरे' इति वचनात् सिद्धम् । **कैश्चन सज्जनैः** ऋष्यादिभिः **सातिशोकं** अतिशोकयुक्तं यथा भवति तथा **दृष्टाम् [अपि]** । हा कष्टमयं मायी श्रुतिसिद्धमपि भगवन्माहात्म्यमपलपतीति तेषां शोकः । कैश्चन सज्जनैः विदुरेण कर्मसाक्षिभिरादित्यादिभिश्च ॥ * ॥ **वासुदेव धरणीधर नाथेति मुहुरप्युच्चकैः** अतितरां **प्रवदन्तीम्** । तथा हि –'वासुदेवो वा इदमग्र आसीत्' इत्यत्र वासुदेवेति, 'दाधर्थ पृथिवीमभितो मयूखैः' इत्यत्र धरणीधरेति, 'आत्मेत्येवापासीत' इत्यत्र नाथेति च वदति हि श्रुतिः । अन्यत्र– 'श्रीवासुदेव धरणीधर चक्रपाणे वाराह सिंह' इति भगवन्नामानि मुहुरुच्चकैरभिदधानाम् । **हृदि** स्वाभिप्राये **पूर्णसद्गुणं गतदोषं अशेषाद् विविक्तं** विलक्षणं **अजं** जन्मादिरहितं भगवन्तं **बिभ्रतीम्** । एवम्भूतभगवत्स्वरूपप्रतिपादनपरामिति भावः । अन्यत्र पूर्णसद्गुणादिरूपं भगवन्तं मनसा ध्यायन्तीमिति भावः ॥ * ॥ **बुधजनैः** विद्वज्जनैः **वार्यताम्,** वेदादेरैक्यपरतां प्रतिपादयन्मायिमतं निराक्रियतां **इत्यभिदधानां** वदन्तीम् । तथा हि– 'अन्धंतमः प्रविशन्ति

येऽविद्यामुपासते। ततो भूय इव ते तमो य उ विद्यायां रताः' इत्यत्र अविद्यां निराकृत्य केवलविद्यायामेव निरतानां भूयस्तमः प्राप्त्युक्त्या अविद्यानिराकरणं कर्तव्यमित्युच्यते। 'अथ हैनमुपाक्रोशत् सत्यं भिदा सत्यं भिदा सत्यं भिदा मैवाऽरुवण्यो मैवाऽरुवण्यो मैवाऽरुवण्यः' इत्यादिना चाभेदो निराक्रियते। **एषः** ऐक्यवादिवादः **धर्मो न ननु** धर्मो न खलु **इति चाभिदधानाम्।** इतरत्र बुधजनैर्वार्यतामेष दुर्योधनेन क्रियमाणो धर्मो नेति चाभिदधानाम्। **कृष्णलाळिततमाम्**। श्रीवेदव्यासेन अत्यर्थं लाळिताम्, यादवेश्वरलाळितां च। **अनवद्याम्,** अपौरुषेयत्वादप्रामाण्यकारणदोषरहिताम्। अज्ञानादिदोषरहितां कृष्णां च। **अनन्यशरणाम्,** स्वव्यतिरिक्तपालकरहिताम्, श्रीमध्वाचार्यमृते पालकरहितामित्यर्थः। अत एव **शरणोत्काम्,** शरणमिच्छन्तीमिति भावः। अपरत्रापि **अनन्यशरणाम्** भीमादन्यपालकरहिताम्, **शरणोत्काम्** दुःशासनेनाऽकर्षणसमये शरणमभिवाञ्छन्तीम्। 'शरणं गृहरक्षित्रोः' इत्यमरः। एवम्भूतां श्रुतिततिं दृष्ट्वेत्यन्वयः ॥ २४-३१ ॥

(त.चं.) ऐकत्रिंशं श्लोकमेकान्वयं कुळकम्। 'द्वाभ्यां युग्ममिति प्रोक्तं त्रिभिः श्लोकैर्विशेषकम्। कलापकं चतुर्भिः स्यात् तदूर्ध्वं कुळकं स्मृतम्' इति। श्रुतिततिं श्रुतिमानिन्या द्रौपद्या सहोपश्लेषयति– भूसुरेत्यादिना अष्टभिः श्लोकैः ॥ * ॥ 'अग्निमीळे पुरोहितम्' इत्यादिः पादः। प्रायेणर्चां चतुर्थांशः। त्रिपदासु तृतीयांशः। क्वचिद् द्वावेव पादौ। पञ्चपादा पङ्क्तिश्चेत् पञ्चमोंऽश इत्यादि। पादसंहितेत्येतत्। 'अग्निम्। ईळे। पुरोहितम्' इत्यादीनि पदानि। पदपाठः प्रतृण्णमित्येतत्। 'अग्निमीळे। ईळे पुरोहितम्' इत्यादिः क्रमपाठः। भावोऽभिप्रायः। 'भावोऽभिप्रायवस्तुनोः' इति च। पादाभ्यां सुन्दरं पदं पदनं गमनं तस्य क्रमविलासैः। पादयोर्वा यः सुन्दरः पदक्रमः विन्यासरीतिः। तस्य भावाः लीलाः। 'भावः क्रियालीलापदार्थेषु' इति च। 'विशदं प्रकटं स्पष्टम्' इति च। कृष्णा तु वर्णतः कृष्णा। शारीरै-

र्मानसैश्च गुणैः सौन्दर्यसौकुमार्यसौशील्यादिभिश्चाऽढ्या । भारतमुत्तमं येषु शास्त्रेषु इतिहासपुराणादिषु तानि भारतोत्तमानि । 'शास्त्रेषु भारतं सारः' इत्यादि च हि स्मरन्ति ॥ * ॥ वृत्तां वृताम् । वृत्यते स्म । 'वृत्तोऽतीतेऽप्यधीतेऽपि वर्तुलेऽपि सृते वृते' इति च ॥ * ॥ मौलयः श्रुतिशिरांस्युपनिषदः । 'मुण्डोत्तमाङ्गमस्तकमौलिशिरःशीर्षमूर्धकानि स्युः' इति च । मौलयः केशाश्च । 'किरीटे मौलिरक्लीबे चूडासंयतकेशयोः' इति च ॥*॥ कल्यावेशबलात् उपेक्षितं विकर्षणदुःखं यस्याः ॥ * ॥ आत्मेत्येवोपासीत । आत्मा स्वामी नाथ इत्येतत् । 'स्वामी विष्णुरिति ध्यानम्' इति च ॥ * ॥ कृष्णलाळिततमाम् । लड उपसेवायाम् । प्रीत्या आदरणमुपसेवा । लाळयति । लाडयति । शरणोत्काम् ॥*॥ यज्ञवेदिजा द्रौपदी । अहो श्रुतिततिरपि वेदिजा । वेदवेदिभिर्जायते व्यज्यत इति । '–बहुवेदवित् । वेद इत्येव यं पश्येत् स वेदः–' इति स्मरणात् ।'आगूः सङ्गरसन्धाप्रतिश्रवाः संश्रवः प्रतिज्ञा च' इति चाभिधानम् ॥ २४–३१ ॥

अव्ययं सततमप्युपभुक्त्या वित्तमग्र्यमिव दूरयियासुः ।
ज्यायसे सगुरवे हरिगीताभाष्यमेष विरचय्य तदाऽदात् ॥ ३२ ॥

(प.दी.) **अव्ययम्** । **एष** श्रीमध्वाचार्यः **तदा सगुरवे ज्यायसे** ज्येष्ठयतये, 'गुरुर्गीष्पतिपित्राद्योः पौरोहित्यकरे च ना' इति यादवः । **हरिगीताभाष्यं** श्रीभगवद्गीताभाष्यं **विरचय्य अदात्** । कः किमिव? **दूरयियासुः** दूरं जिगमिषुः स्वजनाय **सततमुपभुक्त्याऽप्यव्ययमग्र्यं वित्तमिव** ॥ ३२ ॥

(त.चं.) दूरं बदरिकातीरं यियासुरेष मध्वः सगुरवे अच्युतप्रज्ञसहिताय ज्येष्ठयतये स्वकृतं भगवद्गीताभाष्यं सततमुपभुक्त्याऽप्यव्ययमत एवाग्र्यं वित्तमिवादात् यदाऽयियासत् तदा ॥ ३२ ॥

हेतुवादिनि विशङ्कटबुद्धौ तीर्थमर्थयति गन्तुमनुज्ञाम् ।
तां दिदेश पुरुषोत्तमतीर्थश्चिन्तयन् स पुरुषोत्तमरक्षाम् ॥ ३३ ॥

(भा.प्र.) **'देहोपसङ्ग्रहस्यास्य यत् फलं दैवचोदितम् ।**
'तत् सिषाधयिषुर्यामि देवगुह्योपपादितम्' इति च हेतुवादिनि ॥

(प.दी.) हेत्विति । **हेतुवादिनि** –'देहोपसङ्ग्रहस्यास्य यत् फलं दैवचोदितम् । तत् सिषाधियिषुर्यामि देवगुह्योपादितम्' इति गुह्यं देवकार्यं साधयितुं यामीति हेतुवादिनि, **विशङ्कटबुद्धौ** श्रीपूर्णप्रज्ञाचार्ये, 'विशङ्कटं विशालं स्यात्' इति हलः, **तीर्थं गन्तुमनुज्ञां अर्थयति** याचयति[1] सति, **स पुरुषोत्तमतीर्थः**[2] तां अनुज्ञां **दिदेश** । कथम्भूतः? **पुरुषोत्तमरक्षां चिन्तयन्**, श्रीमध्वस्य इति शेषः ॥ ३३ ॥

(त.चं.) अच्युतप्रज्ञ इत्याश्रमनाम । पुरुषोत्तमतीर्थ इति तस्यैव वेदान्तसाम्राज्याभिषेकनाम । यथा पूर्णप्रज्ञ इति, आनन्दतीर्थ इति मध्वस्य । पुरुषोत्तमेन हरिणा मनसि धृतेन तीर्थः शुद्ध इति । वेदसाम्राज्ये तीर्थाभिषेकसमय एव तीर्थनाम दीयत इत्युक्तं विष्णुतीर्थीये ॥ ३३ ॥

नीरजा मलयमण्डलवृत्त्या
श्लाघितो भुवि सदा[ऽ]ळ्यनुयातः ।
साधुपान्थपरितापमपास्य-
न्नुत्तरां दिशमयान्मरुदंशः ॥ ३४ ॥

(भा.प्र.) रजो गुणविशेषो धूलिश्च । मलयमण्डलं मलयसन्निकृष्टविषयो मलयगिरिवलयं च । सतामाळिभिरनुयातः, सदा अळिभिश्च ॥

(प.दी.) **नीरजाः** । **मरुदंशः** श्रीमध्वाचार्यः **उत्तरां दिशमयात्** ययौ ।

१.'याचति सति' इत पर्याप्तम् । २. अत्र कोशे अधस्तादिदं वाक्यं पश्चान्निक्षिप्तम्– 'पुरुषोत्तमस्य तीर्थं शास्त्रं यस्य सः अच्युतप्रेक्षः । शास्त्रं च गीताभाष्यम्' इति । केनचिदुट्टङ्कितमिदं न टीकावाक्यम् । कथमन्यथा 'अच्युतप्रेक्षः' इति पदं स्यात् । वेदाङ्गतीर्थीये सर्वत्रापि अच्युतप्रज्ञ इत्येव पठ्यते, न क्वाप्यच्युतप्रेक्ष इति । नचापीदं निर्वचनं साधु ।

कथम्भूतः? **नीरजाः** रजोगुणरहितः। **मलयमण्डलवृत्त्या** मलयपर्वतसन्निकृष्टेषु मण्डलेषु विषयेषु वृत्त्या वर्तनेन, तद्गताखिलदुर्वादिनिराकरणेनेति भावः, **भुवि श्लाघितः** आदृतः। **सदाळ्यनुयातः** सतामाळ्या समूहेन अनुयातः। 'वीथ्याळिरावलिः पङ्क्तिः श्रेणी रेखास्तु राजयः[१]' इत्यमरः। **साधुपान्थपरितापं** सज्जनानां पथिकानां परितापं **अपास्यन्** निराकुर्वन्। **मरुदंशो** वातो यथा उत्तरां दिशं व्रजेत् तद्वदिति श्लेषार्थः। सोऽपि **नीरजाः** पांसुरहितः। **मलयमण्डलवृत्त्या** मलयपर्वतवलयेषु वृत्त्या **भुवि श्लाघितः** मलयपर्वतगतचन्दनवृक्षसम्पर्केण सुरभितया आदृतः। **सदा अळ्यनुयातः**, अळिभिः भ्रमरैः अनुयातः। '–पुष्पलिड्भृङ्गषड्पदभ्रमराळयः' इत्यमरः। **साधु** सम्यक् **पान्थपरितापं** पथिकानां परितापं **अपास्यन्** ॥ ३४ ॥

(त.चं.) नीरजाः। निर्गतं रजोऽस्मात्। निष्क्रान्तो रजसो वा। 'निरादयः क्रान्ताद्यर्थे पञ्चम्या' इति वार्तिकम्। मलयमण्डलं मलयदेशः मलयाचलनितम्बश्च। 'मण्डलं देशबिम्बयोः' इति च। अड उद्यमे। निरन्तरं मधुसङ्ग्रहार्थमडतीत्यळिः। आ समन्तादुद्यमनाद् गोरणात् समूहनादाळिः पङ्क्तिः। 'गोरु'[ಗೊರು] इति भाषायामपि ॥ ३४ ॥

बुद्धिशुद्धिकरगोनिकराढ्यं तीर्थजातमुभयं च धरण्याम्।
आत्ममज्जनत एव निकामं पर्यशोधयदमन्दमनीषः ॥ ३५ ॥

(भा.प्र.)श्रीभागवतादिशास्त्रस्याऽत्ममज्जनतः परिशोधनं प्रक्षेपोद्धारादिकम्॥

(प.दी.) बुद्धीति। **अमन्दमनीषः** श्रीपूर्णप्रज्ञाचार्यः **धरण्यामुभयं तीर्थजातं च आत्ममज्जनत एव निकामं** नितरां **पर्यशोधयत्**। तीर्थशब्देन शास्त्रं नद्यादिकं चाभिधीयते। तत्र शास्त्रे मज्जनं नाम पूर्वोत्तरपरामर्शः। अन्यत्रावगाहनम्। शास्त्रेषु पूर्वोत्तरपरामर्शेन पूर्वोत्तरविरुद्धव्याख्याननिराकरण-

---

१. 'रेखास्तु राजयः' इति नात्रातीवोपयुक्तं त्वन्तमुत्तरान्वयि। 'लेखास्तु राजयः' इति प्रचलितः पाठः।

पूर्वकं यथावद् व्याख्यानं भागवतादिषु प्रक्षेपोद्धारश्च परिशोधनम्। अन्यत्र आत्ममज्जनेन तत्रतत्र महिमातिशयाधानम्। कथम्भूतं तीर्थजातम्? **बुद्धिशुद्धिकरगोनिकराढ्यं** श्रवणादिना चित्तशुद्धिप्रदवचनसमूहाढ्यम्। चित्तशुद्धिप्रदजलनिकराढ्यमन्यत् ॥ ३५ ॥

(त.चं.) गावः इत्यापः। गौरिति वाणी। तीर्थमिति पुण्यक्षेत्रं च शास्त्रं च। 'गौर्नाऽऽदित्ये बलीवर्दे किरणक्रतुभेदयोः। स्त्री तु स्याद् दिशि भारत्यां भूमौ च सुरभावपि। नृस्त्रियोः स्वर्गवज्राम्बुरश्मिदृग्बाणलोमसु' इति, 'गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे पुमान्। स्त्रीसौरभेयीदृग्बाणदिग्वाग्भूष्वप्सु भूम्नि च' इति च। 'पुण्यक्षेत्रे तथा पात्रे तीर्थं स्याद् दर्शनेषु च' इति च ॥ ३५ ॥

वासुदेवपदसन्ततसङ्गी तेजसाऽप्यलमधःकृतशर्वः ।
अत्यवर्तत नितान्तमथासौ गाङ्गमोघमघनाशनकीर्तिः ॥ ३६ ॥

(भा.प्र.) नितान्तमतिवर्तनं गत्या[1] गुणैश्च। गाङ्ग ओघः सकृत्सङ्गी शिरसि स्थितिमात्रेणाधःकृतशर्वश्च ॥

(प.दी.) **वासुदेवेति**। **अथ अघनाशनकीर्तिः**, श्रवणादिना अघनाशनी कीर्तिर्यस्य स तथोक्तः, **असौ** श्रीमध्वाचार्यः **गाङ्गं** गङ्गासम्बन्धिनं **ओघं** प्रवाहं **नितान्तमत्यवर्तत** अतीत्यावर्तत। अतिवर्तनं नाम न केवलं तरणमात्रम्, किन्तु गुणतोऽप्यतिवर्तनमत्र विवक्षितमिति भावः। तदेवाऽह– **वासुदेवेत्यादिना** विशेषणद्वयेन। **वासुदेवपदसन्ततसङ्गी**। अयं श्रीमध्वः वासुदेवपदयोः सन्ततसङ्गवान्। गङ्गा तु सकृदेव तत्सङ्गवती। अयं **तेजसाऽपि** स्वसामर्थ्येनापि **अलमधःकृतशर्वः**, अधरीकृतरुद्रः, रुद्राद्युत्तमत्वादिति भावः। इत्यभिप्रायेणोक्तं नितान्तमत्यवर्ततेति। गङ्गाया अप्युत्तमोऽयं[2] श्रीमध्वः गङ्गां तीर्त्वा जगामेति फलितार्थः ॥ ३६ ॥

१.'गत्वा' इति पाठान्तरम्। २.'अत्युत्तमोऽयम्' इति पाठान्तरम्।

(त.चं.) गाङ्ग ओघ आसज्य निर्गतः । अयं तु सन्ततसङ्गी । गाङ्ग ओघ उपरिस्थितिमात्रेणाधःकृतशर्वः । बालोऽपि पितुः स्कन्धमारोहति । अयं तु तेजआदिगुणैरपि । गाङ्ग ओघः स्नानपानादिनाऽघनाशनः । अयं तु कीर्तनमात्रेण । सदा अतिवर्तते । इदानीं गत्याऽप्यत्यवर्तत ॥ ३६ ॥

तत्रतत्र स जगत्त्रयचित्रं कर्म शर्मदमनुस्मृतिमात्रात् ।
सञ्चरन् विदधदाप नराणां गोचरं बदरिकाश्रमपार्श्वम् ॥ ३७ ॥

(प.दी.) तत्रेति । **तत्रतत्र** तत्तत्तीर्थक्षेत्रविशेषेषु **सञ्चरन्, जगत्त्रय-चित्रम्, अनुस्मृतिमात्रात्** स्मरणमात्रेण **शर्मदं** पुंसां सुखप्रदं **कर्म विदधत्** कुर्वन् **सः** श्रीमध्वाचार्यः **नराणां गोचरं** गन्तुं योग्यं **बदरिकाश्रमपार्श्वं** हिमवद्दक्षिणतः स्थितबदरिकाश्रमस्य पार्श्वं **आप** ॥ ३७ ॥

(त.चं.) बदरिकाश्रमपार्श्वम् । बदरिकाश्रमं स्पृशतीति । 'स्पृशेः श्वण्-शुनौ पृ च'[१०.१३] इति दशपादिका । तद् यथा– पार्श्वः पार्श्वं वा । पर्शुः । पारं श्वयति गच्छत्यनेनेति वा । गौश्चक्षुः चरत्यस्मिन्निति गोचरः । पुंसि सञ्ज्ञायां घः । प्रायेणेति श्रवणाद् गोचरमित्यपि पठन्ति ॥ ३७ ॥

मण्डयन् भरतखण्डमखण्डं नादिरायणपदोऽत्र परो यः ।
तं नमन् प्रचुरधीर्हरिगीताभाष्यमार्पयदुपायनमस्मै ॥ ३८ ॥

(प.दी.) **मण्डयन्** । अत्र मनुष्यगोचरबदरिकाश्रमे, स्थित इति शेषः, **अखण्डं** समस्तं **भरतखण्डं** हिमवत्सेतुमध्यवर्तिप्रदेशं **मण्डयन्** अलङ्कुर्वन् **नादिरायणपदः**, नकारः आदिर्यस्य तन्नादि, रायण इति पदं रायणपदम्, नादि रायणपदं यस्य स नादिरायणपदः, नारायणपदवाच्य इति भावः । **यः परः** सर्वोत्तमो भगवान् **तं नमन् प्रचुरधीः** अस्मै श्रीनारायणाय **हरि-गीताभाष्यं** स्वकृतभगवद्गीताभाष्यम्, **उपायनमार्पयत्** उपायनत्वेन सम-र्पयामास ॥ ३८ ॥

(त.चं.) ना इत्यादौ यस्य तद् रायणपदम् । 'उपदा प्राभृते प्रोक्तमुपग्राह्यमुपायनम्' इति च । 'उडुगरे' [ಉಡುಗರೆ] इति भाषायाम् ॥ ३८ ॥

प्रीतयेऽस्य पुरतो वरभाष्यं
वाचयन् स जनतामपसार्य ।
वच्मि शक्तित उरुक्रमगीता-
भाष्यमित्यकथयत् पुरुसङ्ख्यः ॥ ३९ ॥

(प.दी.) प्रीतये । **जनतामपसार्य अस्य** श्रीनारायणस्य **प्रीतये** अस्य **पुरतः वरभाष्यं** स्वकृतमुत्तमं गीताभाष्यं **वाचयन् सः पुरुसङ्ख्यः उरुक्रमगीताभाष्यं शक्तितो वच्मीत्यकथयत्** । अयं भावः । गीताभाष्यमारभमाणः पुरुसङ्ख्यः 'देवं नारायणं नत्वा सर्वदोषविवर्जितम् । परिपूर्णं गुरूंश्चान् गीतार्थं वक्ष्यामि' इति ग्रन्थारम्भप्रतिज्ञां कुर्वन् श्लोकान्ते 'शक्तितः' इति पदमकथयदिति ॥ ३९ ॥

(त.चं.) प्रीतयेऽस्य पुरतः । कथं पुरतः? पूर्वशब्दस्य पुरादेशे असिः प्रत्ययः श्रूयते पुर इति । अस्तातिश्च श्रूयते पुरस्तादिति । तथाहि पाणिनिः— 'पूर्वाधरावराणामसि-पुर्-अध्-अवश्चैषाम्' [५.३.३९] इति । भवति पुरस्तिष्ठतीति । भवत्यधस्तिष्ठतीति । भवति चावस्तिष्ठतीति । 'अस्ताति च' [५.३.४०] तेन भवति पुरस्तादिति । कथं पुरत इति? सत्यं न श्रूयते । सम्प्रति श्रावयितव्योऽसि । पूर्वशब्दस्य देशवचनस्य पुरादेशे अतसुच्च भवतीति । ननु न पठितं पाणिनिना? पाणिनिना न पठितं कात्यायनेन पठ्यते । तेनाप्यपठितं सम्प्रति पाठ्यसे । ननु कः प्रत्ययः? बहुप्रयोगादेव प्रत्येषि । किं न स्मरसि प्रयोगशरणा वैयाकरणा इति । बहळो हि प्रयोगः पुरत इति विदुषाम् । 'परिपूर्णं गुरूंश्चाऽन् गीतार्थं वक्ष्यामि शक्तितः' इत्यकथयत् पुरुसङ्ख्यः पूर्णप्रज्ञः । 'सङ्ख्यैकादौ विचारे च' इति च ॥ ३९ ॥

एतदर्थमतिसूक्ष्ममपि त्वं शक्त एव न यदात्थ समस्तम् ।
तेन लेशत इतीह पदं स्यादित्यगद्यत जगज्जनकेन॥ ४० ॥

(प.दी.) एतदिति । **त्वमतिसूक्ष्मं** अतिदुर्विज्ञेयं **अपि एतदर्थं** एतस्या गीताया अर्थं **समस्तं** वक्तुं **शक्त एव** समर्थ एव सन् **नाऽत्थ यत्** सर्वं नोक्तवानसि यत् **तेन इह** नान्दीश्लोकान्ते **'लेशतः' इति पदं स्यात्** भवतु **इति जगज्जनकेन** नारायणेन **अगद्यत** उक्तम् । 'गीतार्थं वक्ष्यामि'इत्यतः परं 'शक्तितः' इति पदं हित्वा 'लेशतः' इति पदं प्रयुज्यतामिति भगवतोक्त-मिति भावः ॥ ४० ॥

(त.चं.) आत्थ ब्रवीषि । 'ब्रुवः पञ्चानामादित आहो ब्रुवः'[३.४.८४]। ब्रुवः परस्य लटः परस्मैपदानां पञ्चानामादिभूतानां आहशब्द आदेशो भवति । तद् यथा– ब्रवीति आह । ब्रूतः आहतुः । ब्रुवन्ति आहुः । ब्रवीषि आत्थ । ब्रूथः आहथुरिति । अथापि बहुलं भूतार्थ एव प्रयुञ्जते कवयः । तेन नाऽत्थ नोवक्थ । इह 'गीतार्थं वक्ष्यामि शक्तितः' इत्यस्य स्थाने 'गीतार्थं वक्ष्यामि लेशतः' इति पदं स्यात् ॥ ४० ॥

तेन तत्प्रवचने विहितेऽलं
शुश्रुवुः प्रशयिता अपि शिष्याः ।
उच्यतामिति मुहुः सपृथिव्या-
स्फालनं पदमहो हरिणोक्तम् ॥ ४१ ॥

(प.दी.) तेनेति । **तेन** श्रीमध्वाचार्येण **अलं** सम्यक् **तत्प्रवचने** तस्य श्रीगीताभाष्यस्य प्रवचने व्याख्याने **विहिते** सति, अनन्तरं **प्रशयिताः** शयानाः **शिष्या अपि सपृथिव्यास्फालनं** पृथिव्या आस्फालनसहितं **हरिणा मुहुरुक्तं उच्यतामिति पदं शुश्रुवुः** । **अहो** एतदाश्चर्यम् । रात्रौ व्याख्यान-समास्यनन्तरं शिष्येषु शयानेषु सत्सु तत्र प्रतिमागतेन हरिणा उच्यतां

पुनरपि व्याख्या क्रियतामिति मुहुरभिहितं शयानैः शिष्यैरपि श्रुतमिति भावः ॥ ४१ ॥

(त.चं.) प्रवचनं विधाय स्वयं च शिश्ये । प्रोत्थित इत्युत्तरत्र श्रवणात् । शिष्याश्च प्रशयिताः । अथापि शुश्रुवुः ॥ ४१ ॥

शब्दभेदमवधार्य तमर्चासन्निषण्णवपुषः परमस्य ।
तस्य भावविदमन्दमनीषः प्रोत्थितः प्रवचनं व्यधितैभ्यः ॥ ४२ ॥

(प.दी.) शब्देति । **अमन्दमनीषः** श्रीपूर्णप्रज्ञाचार्यः **अर्चासन्निषण्णवपुषः**, 'पूजाप्रतिमयोरर्चा' इत्यभिधानम्, प्रतिमायां सन्निहितस्वरूपस्य **परमस्य तं शब्दभेदं** उच्यतामित्युक्तं शब्दभेदं **अवधार्य** सावधानं श्रुत्वा **तस्य** उच्यतामिति पदस्य **भाववित्** अभिप्रायवित् उच्यतामित्यनेन पदेन पुनरपि व्याख्यानं क्रियतामिति हरिणोच्यत इति तदभिप्रायं जानन्निति भावः । **प्रोत्थितः** शयनादुत्थितः सन् **एभ्यः** शिष्येभ्यः **प्रवचनं** व्याख्यानं **व्यधित** अकरोत् ॥ ४२ ॥

(त.चं.) शब्दभेदं दिव्यं नादविशेषम् । तस्य परमस्य भाववित् ॥ ४२ ॥

मज्जनं व्यधित शीतलगङ्गा-
वारि नित्यमरुणोदयकाले ।
यत् स्पृशन्ति न नरा हिमभीता
अंश एष पृषतामधिपस्य ॥ ४३ ॥

(प.दी.) **मज्जनम्** । **पृषतां** वायूनां **अधिपस्य** मुख्यवायोः **अंश एषः** श्रीमध्वाचार्यः **नित्यं** प्रतिदिनं **अरुणोदयकाले शीतळगङ्गावारि** शीतळे गङ्गोदके **मज्जनं** स्नानं **व्यधित** चकार । **नराः** तत्रत्यपुरुषाः **हिमभीताः** सन्तः **यत्** तज्जलं **न स्पृशन्ति**, तत्र मज्जनं व्यधितेति ॥ ४३ ॥

(त.चं.) 'कं पानीयं सलिलमुदकं वारि वाः शम्बरं च' इति च ।

पृषतामधिपस्य मरुतोंऽश एष हि । पिपुरति चक्षुः पूरयन्ति इति पृषन्तो हरिणाः । हरन्ति मन इति हि हरिणाः । तेषामधिपो मरुत् । हरिणवाहनं हि तं पृषदश्वं वदन्ति– 'पृषदश्वः पवमानः प्रभञ्जनः' इति । पॄ पालनपूरणयोः । यद्वा पिपुरति पृणन्ति वा पालयन्तीति पृषन्तो मरुतः । तेषामधिपो मुख्यवायुः ॥ ४३ ॥

काष्ठमौनमदधादुपवासं शुद्धमप्यकृत शुद्धहृदिच्छन् ।
नित्यतुष्टहरितोषविशेषं चिन्तयन् प्रभुमनन्तमठान्तः ॥ ४४ ॥

(प.दी.) काष्ठेति । **नित्यतुष्टहरितोषविशेषं** आत्मनो नित्यं सन्तुष्टस्य हरेः **तोषविशेषं इच्छन् शुद्धहृत्** श्रीपूर्णप्रज्ञाचार्यः **अनन्तमठान्तः** अनन्तमठ इति मनुष्यगोचरबदरिकाश्रमे नारायणमन्दिरस्याऽख्या, तदन्तः **प्रभुं चिन्तयन्** श्रीमन्नारायणं **चिन्तयन्** ध्यायन् **काष्ठमौनं अदधात्** चकार । **शुद्धमुपवासमप्यकृत** चक्रे ॥ ४४ ॥

(त.चं.) काष्ठवन्मौनम् । लेखनादिनाऽपि प्रायः स्वाशयस्याप्रकटनम् । शुद्धं निर्जलम् । उपरि भगवत्येव वास उपवासः । तदर्थमनशनं चोपवासः ॥

प्रैरयत् स्वचरणे रतचित्तं मध्वमत्र दिनमण्डलमेनम् ।
स्वाश्रमोपगमनाय मुकुन्दो दीप्तिदृष्टिविदितागतिरन्यैः ॥ ४५ ॥

(प.दी.) **प्रैरयत्** । **मुकुन्दः** श्रीवेदव्यासः **अत्र** अनन्तमठे **दिनमण्डलम्**, 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया, **स्वचरणे** स्वकीयचरणे **रतचित्तम् एनं** मध्वं **स्वाश्रमोपगमनाय** स्वकीयाश्रमप्राप्तये **प्रैरयत्** प्रेरयामास । कथम्भूतः? **अन्यैः** श्रीमध्वेतरैः **दीप्तिदृष्टिविदितागतिः** प्रकाशविशेषदर्शनेन ज्ञातागमनः । श्रीवेदव्यासः रात्रावागत्य एनं श्रीमध्वं स्वकीयबदरिकाश्रममागन्तुं प्रेरयामास । तस्याऽगमनं तु शिष्यादिभिः प्रकाशविशेषं दृष्ट्वा ज्ञातमित्यभिप्रायः ॥ ४५ ॥

(त.चं.) दिनमण्डलं दिनकदम्बकम् । अष्टचत्वारिंशद् दिनानीति वदन्ति ॥

नक्तमेव भगवत्युपयाते प्रोदिते सति सहस्रमरीचौ ।
मौनवानलिखदुत्तमचित्तः शिष्यशिक्षणपरः करुणावान् ॥ ४६ ॥

(प.दी.) **नक्तम्** । **भगवति** श्रीवेदव्यासे **नक्तमेव** रात्रावेव **उपयाते** गते सति **सहस्रमरीचौ** सूर्ये **प्रोदिते सति मौनवान्** तथाऽपि **करुणावान्** शिष्येषु कृपावान् **उत्तमचित्तः अलिखत्** । कथम्भूतः? **शिष्यशिक्षणपरः** शिष्यशिक्षणाभिप्राययुक्तः, शिष्यशिक्षणार्थं यद् वक्तव्यं तत् पत्रेऽलिखदिति भावः ॥ ४६ ॥

(त.चं.) उत्तमं चित्तमुत्तमे च चित्तमस्येति मध्व उत्तमचित्तः । काष्ठमौनवानथापि करुणयाऽलिखत् ॥ ४६ ॥

नेदृशं स्थलमलं शमलघ्नं
नास्य तीर्थसलिलस्य समं वाः ।
नास्मदुक्तिसदृशं हितरूपं
नास्ति विष्णुसदृशं ननु दैवम् ॥ ४७ ॥

(प.दी.) नेति । अलं **शमलघ्नं** पापक्षयकृत् **ईदृशं** एतत्क्षेत्रसदृशं **स्थलं न,** अन्यत्र न विद्यते । **अस्य तीर्थसलिलस्य**-अस्य तीर्थजलस्य **समं वाः** जलमन्यत्र **न** । **अस्मदुक्तिसदृशं** अस्मद्वचनस्य समानं **हितरूपं** वचनं **न** । **विष्णुसदृशं दैवं** क्वचिदपि **नास्ति** न विद्यते **ननु** ॥ ४७ ॥

(त.चं.) तीर्थसलिलं पुण्यसलिलम् । सलिलस्य समम् । 'तुल्यार्थैरतुलोपमाभ्यां तृतीयाऽन्यतरस्याम्' [२.३.७२] । तुल्यार्थैः शब्दैर्योगे तृतीया भवत्यन्यतरस्यां तुलोपमाशब्दौ वर्जयित्वा । तद् यथा– सलिलस्य समम् । सलिलेन समम् । विष्णोः सदृशम् । विष्णुना सदृशम् । नन्वित्यनुनयति ॥

याति तावदधुनैव जनोऽयं
व्यासरूपमजितं प्रदिदृक्षुः ।

आव्रजेदिह न वा स हि वेद
स्वस्ति वोऽस्त्विति ययावथ मध्वः ॥ ४८ ॥

(प.दी.) याति । **अयं जनः व्यासरूपं** श्रीवेदव्यासनामकरूपं **अजितं** हरिं **प्रदिदृक्षुः** द्रष्टुमिच्छुः **अधुनैव** इदानीमेव **याति तावत्** । इह पुनः **आव्रजेन्न वा,** अयं जनः पुनरागमिष्यति वा न वा, तन्नाहं वेद । **स वेद हि** । सः श्रीवेदव्यासः जानाति हि । **वः स्वस्ति** सुखं **अस्तु** । 'स्वस्त्याशीःक्षेमपुण्यादौ' इत्यमरः । **इति** अलिखदिति पूर्वत्रान्वयः । **अथ** एवं लेखनानन्तरं **मध्वः ययौ** ॥ ४८ ॥

(त.चं.) 'अजितो ना हरौ त्रिषु । अनिर्जिते च' इति च । 'स्वस्ति मङ्गलाशीर्वादपापनिर्णेजनादिषु' इति च ॥ ४८ ॥

नाथनाथ बत नोऽत्र विनाथान्
मा त्यजोरुकरुणो भगवंस्त्वम् ।
नोदितं स्मृतमपीति हि शिष्यैः
स्वामिनोऽभिमतभङ्गभयेन ॥ ४९ ॥

(प.दी.) नाथेति । **नाथनाथ** स्वामिन्स्वामिन् , तात्पर्ये द्विरुक्तिः सम्भ्रमे वा, **भगवन्, उरुकरुणस्त्वं विनाथान्** नाथरहितान् **नः** अस्मान् **अत्र** विदेशे **मा त्यज** । बत खेदे । **शिष्यैरिति स्मृतमपि** एवं वक्ष्याम इति मनसा चिन्तितमपि **नोदितं** नोक्तं **हि** । कुतः? **स्वामिनो** गुरोः **अभिमतभङ्गभयेन** अभिमतस्य गमनस्य भङ्गः स्यादिति भयेन । अस्माभिरेवं विज्ञापिते सत्यसौ कृपालुत्वान्न गमिष्यति । तथा चाभिमतभङ्गः स्यादिति भयेन नोक्तमिति भावः ॥ ४९ ॥

(त.चं.) उदितम् । वद व्यक्तायां वाचि ॥ ४९ ॥

सद्गुरोर्न विरहं सहमानः
सत्यतीर्थयतिरन्वगमत् तम् ।
यस्त्रिवारमितरासुतशाखा-
स्वर्थमग्र्यमशृणोत् पुरुसङ्घात् ॥ ५० ॥

(प.दी.) सदिति । **सद्गुरोर्विरहं न सहमानः** सोढुमशक्तः **सत्यतीर्थयतिः तं** श्रीमध्वं **अन्वगमत्** । **यः** सत्यतीर्थयतिः **इतरासुतशाखासु** इतरायाः सुतेन दृष्टासु शाखासु प्रतिपाद्यं **अग्र्यमर्थं पुरुसङ्घात्** श्रीमध्वात् **त्रिवारमशृणोत्** । इतरासुतशाखास्वर्थमित्येकपदत्वे अर्थस्य सुशब्देन अग्र्यत्वोक्तेः पुनरग्र्यपदवैयर्थ्यं स्यात् ॥ ५० ॥

(त.चं.) इतरासुतस्य ऐतरेयस्य शाखा ऋक्शाखा । ऋक्संहितेत्येतत् । तस्याः सु अतिशयितं अर्थम् । अत एवाग्र्यम् । शाखासु अर्थमिति वा । त्रिवारमित्यनेन सत्यतीर्थस्यर्षितुल्यत्वमाह । यदाचार्यः स्वयमूचे–'अर्वाक् तु द्वादशावृत्तेरधीत्याप्यृषिरेव सः' इति ॥ ५० ॥

दुर्गमार्गगतमप्यनुधावन् नाऽप सोऽयमरुणीभवतीने ।
लीलया सजवमाक्रममाणं व्याश्रयान्तरसुदूरशिलासु ॥ ५१ ॥

(प.दी.) दुर्गेति । **सोऽयं** सत्यतीर्थः **दुर्गमार्गगतमपि,** दुर्गे अन्यैर्गन्तुमशक्ये मार्गे गतमपि, **अनुधावन्** अन्वेवाविळम्बत्वेन[१] धावन्नित्यर्थः । **इने** सूर्ये **अरुणीभवति** सति, अस्ताभिमुखे भवति सतीति यावत्, **नाऽप** आसाय-मनुधावन्नपि सायङ्काले प्राप्ते सति नानुगन्तुं शशाक । कथम्भूतम्? **व्याश्रयान्तरसुदूरशिलासु,** व्याश्रयं आश्रयरहितमन्तरं मध्यं यासां ताः व्याश्रयान्तराः, सुदूरे स्थिताः शिलाः सुदूरशिलाः, व्याश्रयान्तराश्च ताः सुदूरशिलाश्चेति तथोक्ताः तासु, गिरिमध्ये परिखारूपासु शिलासु **लीलया**

---

१. 'अविळम्बेन' इति पर्याप्तम् ।

अनायासेन **सजवं** सवेगं **आक्रममाणम्** आप्लुत्याप्लुत्य आक्रम्य गच्छन्तमिति भावः । तस्मात् स्वयमेवं गन्तुमशक्तत्वात् नाऽप । ततः परं नानुजगामेति भावः ॥ ५१ ॥

(त.चं.) अनुधावन्नपि, इनेऽरुणीभवत्यपि नाऽप ॥ ५१ ॥

आनिवृत्तवपुषा गुरुणाऽऽरात् पाणिना ह्यभिनयेन सुनुन्नः ।
त्रस्तधीरतिययौ स मुहूर्तात् तद्दिनोपगतमार्गमशेषम् ॥ ५२ ॥

(प.दी.) आनिवृत्तेति । **आनिवृत्तवपुषा** पृष्ठतो द्रष्टुमावृत्तदेहेन **गुरुणा** कर्त्रा **पाणिना** करणेन **अभिनयेन** पश्चाद्गमनसूचकेन पाणिचलनेन **आरात्** दूरे **सुनुन्नः** सम्यक् प्रेरितः **सः** सत्यतीर्थः **त्रस्तधीः** व्याघ्रादिभ्यस्त्रस्तबुद्धिः सन्नपि **तद्दिनोपगतमार्गं** तद्दिने उपगतं मार्गं उदयादारभ्य आसायं गतमार्गं **अशेषं** समस्तमपि **मुहूर्तादतिययौ** अत्यगात् [हि] ॥ ५२ ॥

(त.चं.) 'आराद् दूरे समीपे च' इति च ॥ ५२ ॥

आश्रमे निजजनानिह दृष्ट्वा तं प्रसादमहिमानममुष्य ।
प्रोच्य तत्प्लवनमप्यतिचित्रं तस्य तैः सह सदाऽस्मरदेषः ॥ ५३ ॥

(प.दी.) आश्रमे । एष सत्यतीर्थः इह **आश्रमे** अनन्तमठे **निजजनान् दृष्ट्वा** तेभ्यः **अमुष्य तं प्रसादमहिमानं** श्रीमध्वाचार्यकृतस्य मुहूर्तमात्रात् अतिदीर्घमार्गात्ययादिरूपस्यानुग्रहस्य महिमानं **प्रोच्य अतिचित्रं तत्प्लवनमपि प्रोच्य तैः** निजैः **सह** सदा **तस्य** तं श्रीमध्वं **अस्मरत्** । 'अधीगर्थदयेषां कर्मणि' इति कर्मणि षष्ठी ॥ ५३ ॥

(त.चं.) अमुष्य मध्वस्य प्रसादः प्रणयः । 'प्रसादः प्रणयो मतः' इति च ॥

वानरेन्द्र इव वायुजवोऽसौ भीमसेन इव दानवभीमः ।
उल्ललास गिरिपुङ्गवशृङ्गे स व्रजन् व्रजिननाशननामा ॥ ५४ ॥

(प.दी.) वानरेन्द्रः । समुद्रलङ्घने **वानरेन्द्रः** हनूमान् इव **वायुजवः असौ, भीमसेन इव** सौगन्धिकवनं गच्छन् भीमसेन इव, **दानवभीमः** दैत्यभयङ्करः सन् **गिरिपुङ्गवशृङ्गे व्रजन् व्रजिननाशननामा** पापक्षयसाधननामा **सः** श्रीमध्वाचार्यः **उल्ललास शुशुभे** ॥ ५४ ॥

(त.चं.) 'वृजिनं व्रजिनं दुःखमकं तोद इतीर्यते । तत्कारणत्वात् पापं च व्रजिनं नाम कथ्यते' इत्याचार्यवचनम् । वृज्यत इति वृजिनम् । व्रजन्ति दूरमस्मादिति व्रजिनम् ॥ ५४ ॥

बहुसत्त्वगणं सविकं समहाविषमोक्षमहाहिमवन्तमयम् ।
विषमोक्षमहा हिमवन्तमयन् नगमैक्षत फुल्लदृगस्तभयः ॥ ५५ ॥

(भा.प्र.) बहुसत्त्वगणमवन्तम्, समहाविषमोक्षमहानागम्, विषमऋषभतेजाः । अयन् गच्छन् ॥

(प.दी.) बह्विति । **बहुसत्त्वगणम्** । **सविकम्** । **समहाविषमोक्षमहाहिम्** । **अवन्तम्** । **अयम्** । **विषमोक्षमहाः** । **हिमवन्तम्** । **अयन्** । **नगम्** । **ऐक्षत** । **फुल्लदृक्** । **अस्तभयः** । **अयन्** गच्छन् **विषमोक्षमहाः** विषमवृषभतेजाः **फुल्लदृक् अस्तभयः अयं** श्रीमध्वः **हिमवन्तं नगं** गिरिं **ऐक्षत** ददर्श । कथम्भूतम्? **सविकं** पक्षिसहितम्, **समहाविषमोक्षमहाहिम्,** महाविषमोक्षेण विषविसर्गेण सह वर्तन्त इति समहाविषमोक्षाः, महाहयो महासर्पाः, समहाविषमोक्षाः महाहयो यस्मिन् स तथोक्तः तम् । **बहुसत्त्वगणं** बहूनां सत्त्वानां प्राणिनां गणं समूहम् **अवन्तं** रक्षन्तम् ॥ ५५ ॥

(त.चं.) विषमः अदान्तः उक्षा गळिः । 'गूळि'[ಗೂಳಿ] इति भाषायाम् । तस्यैव महस्तेजोऽस्येति विषमोक्षमहाः । अयन् गच्छन् हिमालयं नगमैक्षत । कथमयन्? 'ई गतौ' इत्येके । 'इ गतौ' इति काशकृत्स्नः । तोटकं जागतं छन्दः । 'सैश्चतुर्भिस्तोटकं स्यात्' ॥ ५५ ॥

सुहसितकमलाकरोपगूढं
सुजनसुखार्थमनन्तभोगशय्यम् ।
विकसितसुमनोघटागमुच्चं
मरतकरत्नमयस्थलाग्र्यशोभम् ॥ ५६ ॥

(भा.प्र.) सुफुल्लैः कमलाकरैः, सुहसितकमलायाः कराभ्यां च । गन्धर्वादि-सुजनानां सुखाय अपरिमितशय्यासहितम्, सुजनसुखप्रयोजनं च । विकसित-पुष्पसमूहवृक्षम्, देवसमूहगतं च । मरतकरत्नमयस्थलैरग्र्या शोभा यस्य, स्थल-वदग्र्यशोभं च ॥

पादोपान्तनमन्महामुनिगणं हेमप्रदीप्ताम्बरं
श्रीमद्रत्नकलापमग्र्यकटकैर्विभ्राजितं हाटकैः ।
दृष्ट्वा तं धरणीधरं सुवनमालोल्लासिनं सुन्दरं
स्वानन्दाकृतिमस्मरन्मुररिपुं स्वानन्दतीर्थस्तदा ॥ ५७ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये
महाकाव्ये आनन्दाङ्किते षष्ठः सर्गः

—०—

(भा.प्र.) स्वशृङ्गहेम्ना प्रदीप्तगगनम्, हेमवत्प्रदीप्तं वस्त्रं च । कलापः समूहः, काञ्ची च । कटको नितम्बः, वलयं च । धरणीधरं गिरिं नारायणं च ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां षष्ठः सर्गः

—०—

(प.दी.) सुहसितेति । तदा स्वानन्दतीर्थः तं धरणीधरं पर्वतं दृष्ट्वा **मुररिपुमस्मरत्** इत्यन्त्यकुळकम् । अत्रोक्तविशेषणानि गिरौ हरौ च यथायोग्यं योजनीयानि । कथम्भूतं धरणीधरं दृष्ट्वा? **सुहसितकमळा-**

करोपगूढम्, सुहसितैः अतिविकसितैः कमळाकरैः पद्मिनीभिः उपगूढं परिवृतम्। सुहसितायाः सुस्मितायाः कमळायाः रमायाः कराभ्यामुपगूढमाश्लिष्टम् । **सुजनसुखार्थं** सुजनानां सुकृतिनां सुखार्थम्, **अनन्तभोगशय्यं** अनन्तैः अपरिमितैः अविनाशिभिर्वा भोगैः स्रगादिभिः शय्याभिश्च युक्तम्। हिमवत्प्रदेशस्य भूस्वर्गत्वादिति भावः। **सुजनसुखार्थम्** । अनन्तस्य शेषस्य भोगः शरीरं शय्या यस्य स तथोक्तः (तम्) । सज्जनसुखार्थं हि भगवान् अनन्तशय्यो भवति । तच्च 'माधवश्चतुरो मासान् सर्वभूतसुखाय वै । स्वापं यास्यति शेषाङ्गे लक्ष्म्या सह जगत्पतिः' इति वचनात् सिद्धम् । **विकसितसुमनोघटागम्**, विकसितसुमनोघटाभिः पुष्पसमूहैः युक्तागैः वृक्षैः युक्तम् । विकसितदेवसमूहगतम् । **उच्चं** उन्नतमुत्तमं च । **मरतकरत्नमयस्थलाग्र्यशोभम्**, मरतकरत्नमयैः स्थलैः अग्र्या शोभा यस्य स तथोक्तः (तम्) । मरतकरत्नमयस्थलवत् अग्र्यशोभं मरतकमणिश्यामळमिति यावत् ॥ ❋ ॥ **पादोपान्तनमन्महामुनिगणम्**, पादाः प्रत्यन्तपर्वताः, तेषामुपान्ते समीपे नमन्तः नमनं कुर्वन्तः महामुनिगणाः यस्य तथोक्तः (तम्) । श्रीचरणसमीपे नमन्महामुनिगणम् । **हेमप्रदीप्ताम्बरम्**, स्वशिखरगतहेम्ना प्रदीपिताकाशम् । हेमवत् प्रदीप्तवसनम्, पीताम्बरमिति यावत् । **श्रीमद्रत्नकलापं** कान्तिमद्रत्नसमूहाढ्यम्। कान्तिमद्रत्नखचितभूषणाढ्यम्। 'कलापो भूषणे बर्हे' इत्यमरः । **हाटकैः** सौवर्णैः **अग्र्यकटकैः** उत्तमनितम्बैः **विभ्राजितम्**। **हाटकैः** सौवर्णैः **अग्र्यकटकैः** उत्तमहस्तवलयैः **विभ्राजितम्**। 'भूभृन्नितम्बवलयचक्रेषु कटकोऽस्त्रियाम्' इत्यमरः । धरणीधरत्वं च हरिगिर्योः साधारणम् । सुवनमालोल्लासिनम्, विकसितवनसमूहैः शोभमानम् । शोभमानया वनमालया उल्लासिनम् । **सुन्दरं** रमणीयम् । सुलळितम्, **स्वानन्दाकृतिं** निर्दोषस्वरूपभूतानन्दात्मकदेहम् ॥ ५६ ॥ ५७ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां षष्ठः सर्गः

—०—

(त.चं.) सुहसितेत्यादि युग्मकम् । सुजनसुखमेवार्थः प्रयोजनं यस्य तमनन्तशयनम् । 'छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम्' इति हि भागवते । 'अहेः शरीरं भोगः स्यात्' । अपरिमिता भोगार्थं शय्या यत्र तं च महीधरम् । विकसितानां सुमनसां पुष्पाणां घटा समूहः येषु तादृशा अगा वृक्षा यत्र तं महीधरम् । सुमनसां वृन्दारकाणां घटां वृन्दं गच्छत्यक्षिगोचरतयेति तं हरिम् । 'बहूनां घटना घटा' इति च । मरतकरत्नं मरतकमणिः । तन्मयैः स्थलैरग्र्यशोभं गिरिम् । मरतकमणिमयस्थलवदग्र्यनीलवर्णं हरिम् । 'मरतकं हरिन्मणिरिति स्मृतम्' इति च । अर्वाचीनास्तु मरकतमिति पठन्ति । निर्वदन्ति च 'मरकं तरन्त्यनेन' इति । मरं मरणं तकति मरतकमित्येव प्राचीनं निर्वचनम् । 'तक हसने' इति क्षीरस्वामी । मरणं परिहसतीत्यर्थः । 'तक सहने' इति दुर्गः । मरणं मर्षयतीत्यर्थः । 'तकेत् तङ्केद् यथासङ्ख्यं सहने कृच्छ्रजीवने' इति दैवम् । पुरुषकारकृत्तु विपरीतं वदन् बभ्राम– 'सहने इत्यपरः पाठः । तक सहने । क्षीरस्वामी पुनः 'सहने' इत्युक्त्वा 'हसन इति दुर्गः' इत्याह' इति । 'हसन इत्युक्त्वा, सहन इति दुर्ग इत्याह' इति तु शुद्धम् । पुष्पिताग्रा नाम विषमच्छन्दः । 'पुष्पिताग्रा ननरया युक्ते तु नजजा रगौ' ॥ * ॥ श्रीमद्रत्नकलापम् । रत्नमयकाञ्चीभूषणो भगवान् । 'कलापः संहतौ बर्हे काञ्च्यां भूषणतूणयोः' इति च । हटति हाटयति हाटकम् । 'हट दीप्तौ' । 'कटको वलयं तथा' इति, 'नितम्बः कटको ज्ञेयः सानु प्रस्थं तटं भृगुः' इति च । सुष्ठु आनन्दयन्ती आकृतिरस्येति गिरिरपि स्वानन्दाकृतिः । शार्दूलविक्रीडितम् ॥ ५६ ॥ ५७ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
षष्ठं हि सर्गं व्याचख्यौ सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां
तत्वचन्द्रिकायां षष्ठःसर्गः

—०—

[आदितः श्लोकाः– २७१+५७=३२८]

सप्तमः सर्गः

[व्यासाश्रमदर्शनम्। श्रीमध्वं दृष्ट्वा व्यासाश्रमवासिनां विमर्शः । आश्रमाङ्गणवृक्षदर्शनम् । तद्वेदिकायामासीनस्य भगवतो बादरायणस्य दर्शनम् । श्रीमध्वेन तत्पादादिकेशान्तचिन्तनम्। तत्पादपङ्कजयोः प्रणामः। व्यासेन परिरम्भणम्। व्यासशिष्यैरुचितासनदानम्। व्यासमध्वयोः सङ्कथाविनोदः।]

अथ हैमवते तटान्तरे बदरीषण्डविशेषमण्डितम् ।
परमाश्रममाश्रयं श्रियः सकलङ्कः स ददर्श विश्रुतम् ॥ १ ॥

(प.दी.) अथेति । **अथ** हिमवल्लङ्घनानन्तरं **स सकलङ्कः हैमवते** हिमवत्सम्बन्धिनि **तटान्तरे** अन्यस्मिन् तटे, उत्तरपार्श्वे इति यावत्, **बदरीषण्डविशेषमण्डितम्,** बदरीवृक्षसमूहैः विशेषतो मण्डितम्, **श्रियः** रमायाः शोभाया वा **आश्रयं विश्रुतं** प्रसिद्धं **परमाश्रमं** उत्तमाश्रमं **ददर्श** । बदरिकाश्रमं ददर्शेति भावः ॥ १ ॥

(त.चं.) बदरीषण्डविशेषमण्डितम् । विशेषतो बदरीवृक्षकदम्बमण्डितम् । 'तालव्यो मूर्धन्योऽब्जादिकदम्बे शण्डशब्दोऽयम् । मूर्धन्य एव वृषभे पूर्वाचार्यैर्विनिर्दिष्टः' । शडि सङ्घाते । शण्डते शण्डः शण्डं वा समूहे । 'षडि च' इति पठनीयम् । षण्डते षण्डः षण्डं वा समूहे । षण्ड उत्सृष्टे वृषभे । 'सङ्घातेऽपि ग्रामो भूतेन्द्रियशब्दविषयकरणानाम् । षण्डश्च पादपानां स्कन्धो नरकरितुरङ्गाणाम्' इति हलः । सर्गे चास्मिन्नापञ्चाशं पद्यं वियोगिनी विषमच्छन्दः । प्रथमतृतीययोर्दशाक्षरा । द्वितीयचतुर्थयोरेकादशाक्षरा । तथाहि तल्लक्षणमभिदधति– 'ओजो वियोगिनी सौ ज्गावनोजे सभरा लगौ' इति । वैतालीयं चैतच्छन्दो भवति । सुन्दरीत्यन्ये ॥ १ ॥

हिमवर्षरविप्रभासहाः पृथुसत्रप्रथिता द्विजाश्रयाः ।
अपि विष्णुपदस्पृशोऽलसन्नुभये यत्र विचित्रशाखिनः ॥ २ ॥

(भा.प्र.) सत्रं वनम्, यज्ञविशेषश्च । द्विजाः पक्षिणः, ब्राह्मणाश्च । शाखिनो वृक्षाः, ऐतरेय-कौषीतक-बाष्कल-शाकल्य-पैङ्गि-काठकादयश्च ॥

(प.दी.) **हिमेति** । **यत्र** बदरिकाश्रमे **उभये** उभयविधाः **अपि विचित्रशाखिनः** शाखिनो वृक्षाः । 'वृक्षो महीरुहः शाखी' इत्यमरः । ऋगादिशाखावन्तो विप्राश्च । **अलसन्** अशोभन्त । कथम्भूताः? **हिमवर्षरविप्रभासहाः** । वृक्षास्तु हिमादिनिवारकाभावात् **हिमवर्षरविप्रभासहाः** । विप्रास्तु तपस्वित्वाद् धैर्येण **हिमवर्षरविप्रभासहाः** । **पृथुसत्रप्रथिताः** महावनेषु प्रसिद्धाः । द्विजाश्च महायज्ञेषु प्रसिद्धाः । 'सत्रमाच्छादने यज्ञे सदादाने वनेऽपि च' इत्यमरः । **द्विजाश्रयाः** पक्षिणामाश्रयाः, ब्राह्मणानामाश्रयाश्च । 'दन्तविप्राण्डजा द्विजाः' इत्यमरः । **विष्णुपदस्पृशः** आकाशस्पृशः । 'वियद् विष्णुपदम्' इत्यमरः । द्विजाश्च श्रीहरिचरणाश्रयाः ॥ २ ॥

(त.चं.) हिमवर्षरविप्रभासहाः । हिमवर्षं रविप्रभामातपं च सहन्त इति । शीतोष्णसहाः । हिमपातं वृष्टिमातपं चेति वा । 'अरण्यमटवी सत्रम्' इति च । 'सवः सत्रं च कथ्यते' इति च । बहुभिः सम्भूय क्रियमाणो यज्ञविशेषः सत्रम् । सत्रयाग इति च वदन्ति । सीदन्त्यत्रेति सीदतेस्त्र इति दशपादिका– 'गु-धृ-वी-पचि-वचि-यमि-मनि-तनि-सदि-क्षदिभ्यस्त्रः'[८.८९] । त्रन् इत्यन्ये । सहत्राणात् सत्रमिति तु वयम् । कथं वनं सत्रम्? पथिकसार्थं प्राणिसार्थं वा तरुच्छायेन त्रायत इति । कथं सवः सत्रम्? त्रायते दीक्षितानपूर्वयोजनेनेति । विचित्रशाखिनः । ऐतरेयस्य शाखायामधीतिनः ऐतरेयाः शाखिनः । कौषीतकस्य कौषीतकाः । एवमन्यत्रापि ॥ २ ॥

श्रवणामृतगीर्गणैर्द्विजैः शुकमुख्यैः शुभपक्षिभिर्वृतम् ।
कमलेष्टतमस्थिरान्तरैरपि हंसैः परमैरमेचकैः ॥ ३ ॥

(भा.प्र.) श्रीशुकाचार्यमुखैः समयिभिश्च । कमलेष्टतमः कमलारमणः, कमलान्येवेष्टतमानि च । परमहंसैः, श्वेतच्छदश्रेष्ठैश्च । अमेचकैः श्वेतैः, निर्मलैश्च ॥

(प.दी.) कथम्भूतमाश्रमम्? **श्रवणामृतगीर्गणैः** श्रोत्रामृतायमानवचनसमूहैः **शुकमुख्यैः** शुकाख्यपक्षिविशेषमुख्यैः, शुकाचार्यमुख्यैश्च, **शुभपक्षिभिः** शोभनपतत्रैः शुभसिद्धान्तैश्च, **द्विजैः** पक्षिभिः, ब्राह्मणैश्च **वृतम्** । **कमलेष्टतमस्थिरान्तरैः** । कमलं च तदिष्टतमं च अतिप्रियं चेति कमलेष्टतमम्, तस्मिन् स्थिरान्तरैः स्थिरमानसैः । **अमेचकैः** शुभ्रैः । 'काळश्यामळमेचकाः' इत्यमर इति मेचकपदं कृष्णवाचकम्, अमेचकपदं शुभ्रवाचकम् । **परमैः** उत्तमैः **हंसैरपि वृतम्** । अतिप्रियकमले स्थिरचित्तैः शुभ्रैः हंसपक्षिभिरपि वृतमिति भावः । **कमलेष्टतमस्थिरान्तरैः**, कमलायाः रमायाः इष्टतमे हरौ स्थिरान्तरैः स्थिरमानसैः **अमेचकैः** निर्मलैः, त्रिकरणशुद्धैरिति यावत्, परमहंसैः संन्यासिभिश्च वृतम् ॥ ३ ॥

(त.चं.) कमलाख्ये इष्टतमे दृढचित्तैः । 'काळं नीलं च मेचकम्' इति । 'मेचकः कृष्णनीलः स्यादतसीपुष्पसन्निभः' इति च । अमेचकैः अच्छैः हंसैः । परमैर्हंसैः राजहंसैः । कथं हंसः? हन्त्यध्वानमिति हंसः । हन्तेः सः प्रत्ययो भवतीति दशपादिका– 'वृ-तॄ-वदि-हनि-कमि-कषि-यु-मुचिभ्यः सः' [९.२१] इति। तद् यथा– वृणातीति वर्षम् । तरन्त्यनेनेति तर्षः । वदतीति वत्सः । कामयत इति काम्यत इति वा कंसः । कष हिंसायाम् । कष्यते गवादिभिरिति कक्षः तृणम् । यु मिश्रणे । यूयत इति योषा । मोचनं मोक्षः । हम्मतेर्हंस इत्यपि वदन्ति । हम्म गतौ । सगर्वं चलन इत्येके ॥ ३ ॥

सुमनोनिकरेण पूरितं स्वमनोऽभीष्टदमल्पदुर्गमम् ।
अपरस्परमत्सरप्रजं ननु वैकुण्ठमिवाच्युतालयम् ॥ ४ ॥

(प.दी.) पुनःकथम्भूतमाश्रमम्? **वैकुण्ठमिव** वैकुण्ठवत् स्थितम् । कुतः? **सुमनोनिकरेण** पुष्पसमूहैः **पूरितम्** । अन्यो देवसमूहपूर्णः । **स्वमनोऽभीष्टदम्** । आत्मात्मीयज्ञातिधनवाची स्वशब्दः । अत्र च स्वशब्देन आत्मीया

उच्यन्ते । ते च स्वतन्त्रत्वात् स्वशब्दवाच्यभगवत्सम्बन्धिनः । तथाच स्वमनोभीष्टदमिति स्वेषां स्वतन्त्रभगवत्सम्बन्धिनां सतां मनसो यदभीष्टं तत् प्रयच्छन्तमिति भावः । वैकुण्ठोऽप्येवं स्वमनोऽभीष्टदः । पुनः कथम्भूतम्? **अल्पदुर्गमम्** । अल्पैः दुर्बलैः ज्ञानभक्त्यादिबलवर्जितैः दुर्गमं गन्तुमशक्यम् । वैकुण्ठोऽपि तथा हि । **अपरस्परमत्सरप्रजं** परस्परमत्सरवर्जितप्रजायुक्तम् । वैकुण्ठोऽपि अपरस्परमत्सरप्रजः । **अच्युतालयं** अच्युतस्य व्यासरूपस्य आलयम् । वैकुण्ठोऽपि अच्युतस्य विष्णोः आलयो **ननु** ॥

(त.चं.) सुखयन्ति मनांसीति सुप्रीतं मन आभिरिति सुमनसः प्रसूनानि । सुष्ठु मन्यन्त इति शोभनं मन एषामिति ज्ञानिनो देवाश्च । तत्र गतानां सुमनसां स्वमनसि गतमभीष्टं प्रयच्छति । माद्यति परव्यसनेष्विति मत्सर ईर्ष्या । मदी हर्षे इत्यतः सरन् । 'कृ-धू-मदिभ्यः सरन्' [८.५३] इति दशपादिका । क्रियत इति कृसरः । धूनोतीति धूसरः । मत्सरः । 'अप्रीतिर्मद्वशो नायमिति मत्सर ईरितः' इति च । मदेन सरणं वा ॥

तमिमं प्रविशन्तमाश्रमं द्व्यधिकत्रिंशदुदारलक्षणम् ।
गुणसारविदः कुतूहलादवलोक्यर्षय इत्यचिन्तयन् ॥ ५ ॥

(प.दी.) तमिति । **गुणसारविदः** । गुणानां सारासारविवेकज्ञाः **ऋषयः** **आश्रमं प्रविशन्तं द्व्यधिकत्रिंशदुदारलक्षणं** द्वात्रिंशदुदारलक्षणोपेतं **तमिमं** श्रीमध्वाचार्यं **अवलोक्य कुतूहलादित्यचिन्तयन्** ॥ ५ ॥

(त.चं.) त्रयो दशतस्त्रिंशत् । दशतो दकारलोपो बिन्दुश्च । उदाराणि उदीर्णानि महान्ति लक्षणानि यस्य । कानि तानि लक्षणानि? तानीमानि द्वात्रिंशल्लक्षणानि– 'पञ्चदीर्घः पञ्चसूक्ष्मः सप्तरक्तः षडुन्नतः । त्रिपृथुलघुगम्भीरो द्वात्रिंशल्लक्षणस्त्विति' इति । कानि पञ्च दीर्घाणि? बाहू नासा हनू अक्षिणी वक्षश्चेति । केचिद् हनू विहाय कुक्षिं पठन्ति । कानि पञ्च सूक्ष्माणि? अङ्गुलिपर्वाणि चाङ्गुलयश्च त्वक् च केशाश्च दन्ताश्च । 'अङ्गुलि-

पर्वाणि दन्तकेशनखत्वचः' इत्यपि केचित् । कानि सप्त रक्तानि? हस्त-तळमङ्घितळं नेत्रान्तस्तालु जिह्वाऽधरोष्ठश्च नखाश्च । कानि त्रीणि पृथूनि विस्तीर्णानि विशालानि वा? ललाटं वक्षश्च कटिश्च । ललाटं वक्षः शिरश्चेत्यन्ये । कानि त्रीणि लघूनि ह्रस्वानि? ग्रीवा जङ्घा च मेहनं च । कानि त्रीणि गम्भीराणि? अन्तःकरणं च नादश्च नाभिश्चेति । गुणसारविदः । गुणेष्वपि ये सारभूताः श्रेष्ठाः स्थिरा वा गुणाः । 'सृ स्थिरे'[३.३.१७] । चिरं तिष्ठन् कालान्तरं सरतीति सारः ॥ ५ ॥

कनकातुलतालसन्निभः कमलाक्षो विमलेन्दुसन्मुखः ।
गजराजगतिर्महाभुजः प्रतियान् कोऽयमपूर्वपूरुषः ॥ ६ ॥

(प.दी.) कनकेति । **कनकातुलतालसन्निभः** । कनकमयातुलताल-समानः । वृत्तपुष्टस्थूलदेह इति भावः । **कमलाक्षः विमलेन्दुसन्मुखः गज-राजगतिः महाभुजः प्रतियान्** व्यासं प्रति गच्छन् **अपूर्वपूरुषः** इतः पूर्वम-स्माभिरदृष्टः पुरुषः **अयं कः** ॥ ६ ॥

(त.चं.) कनकस्यायं कनकः । कनकनिर्मितः । कनकवर्णो वा । अत एवातुलः तालः । तेन तुल्यः । स्वर्णवर्णः पुष्टदीर्घकायश्चेति । विमलोऽकलङ्क इन्दुरिव सद् विलसदस्य मुखम् ॥ ६ ॥

अतिशान्तवपुर्निशाकरः स्वयमेकान्तखरो दिवाकरः ।
इति नास्य गुणार्णवाकृतेरुपमानं भुवनेषु लभ्यते ॥ ७ ॥

(प.दी.) अतीति । **निशाकरः** चन्द्रः **अतिशान्तवपुः**, **दिवाकरः** सूर्यः **स्वयं एकान्तखरः** नियमेन तीक्ष्णः **इति** अस्माद्धेतोः **गुणार्णवाकृतेः** गुणसमुद्रा-कृतेः **अस्य भुवनेषु उपमानं** निदर्शनं **न लभ्यते** ॥ ७ ॥

(त.चं.) स्थूलमेतदुपमानमित्याह– अतिशान्तवपुः । तर्हि दिवाकरेणोप-मीयताम् । तदप्याशामात्रमित्याह– स्वयमेकान्तखरः । एकान्तं नितान्तमति-तरां खरः कठोरातपः । अस्याऽकृतिः गुणानामर्णव इव निधानम् ॥ ७ ॥

परमाश्रमिणां गतश्रमो ननु चिह्नानि बिभर्ति धीरधीः ।
अपि मानुषभावविग्रहो विपुलं विस्मयमातनोति नः ॥ ८ ॥

(प.दी.) **परमेति** । **गतश्रमः** श्रमरहितः **धीरधीः** **परमाश्रमिणां** यतीनां **चिह्नानि बिभर्ति ननु** । **मानुषभावविग्रहो**ऽपि मनुष्यस्वभाववद्देहवानपि **नः** मुनीनामस्माकं **विपुलं विस्मयमातनोति** ॥ ८ ॥

(त.चं.) परमाश्रमः परमहंसाश्रमः । चिह्नानि लक्षणानि । विपुलं महान्तं विस्मयम् । पुल गतौ । पुल महत्त्वे । विपोलति ॥ ८ ॥

चतुरश्चतुराननः स्वयं
पवनो वा व्रतिरूप आव्रजन् ।
श्रुतिनाथदिदृक्षयाऽन्यथा
न खलु स्यान्निखिलाग्र्यलक्ष्मवान् ॥ ९ ॥

(प.दी.) **चतुर** इति । **श्रुतिनाथदिदृक्षया** श्रीवेदव्यासदिदृक्षया **व्रतिरूपः** यतिवेषः **आव्रजन्** **चतुरः** सर्वलक्षणचतुरः **चतुराननः** ब्रह्मा **स्वयं वा, पवनो वा** मुख्यवायुर्वा **अन्यथा** तयोरन्यतरो न चेत् **निखिलाग्र्यलक्ष्मवान्** उत्तम-समस्तलक्षणवान् **न स्यात् खलु** ॥ ९ ॥

(त.चं.) निखिलानि द्वात्रिंशदपि अग्र्याणि उदाराणि लक्षणानि । उक्तं हि– 'द्व्यधिकत्रिंशदुदारलक्षणम्' इति ॥ ९ ॥

अवलोकितलक्षणः स तैरिति सञ्चिन्त्य कुतूहलाकुलैः ।
अविळम्बगतिर्न्यशामयत् तरुमारात् सुरपादपोत्तमम् ॥ १० ॥

(प.दी.) अवेति । **कुतूहलाकुलैः तैः** मुनिभिः **इति** उक्तप्रकारेण **सञ्चिन्त्य** विचार्य **अवलोकितलक्षणः** विरिञ्चपवनयोरन्यतरत्वज्ञापकत्वेन ज्ञातलक्षणः

अविळम्बगतिः भक्त्यतिशयेन क्षिप्रगतिः **सः** श्रीमध्वः **आरात्** समीपे दूरे वा । **सुरपादपोत्तमं** सुरपादपवदुत्तमं **तरुं न्यशामयत्** ॥ १० ॥

(त.चं.) सुरपादपादप्युत्तमं तरुम् । भगवतो बादरायणस्य नित्यसम्बन्धात् । न्यशामयत् अपश्यत् । शमु उपशमे । शमयति रोगम् । निशामयति गुरुवचनम् । निशामयति रूपम् ॥ १० ॥

मसृणत्वचमुन्नतं ततं बहुशाखाफणसूनरत्नकम् ।
भगवन्तमनन्तमन्तिके स्थितमीशस्य निषेवणाय वा ॥ ११ ॥

अतिचित्रविचित्रपत्रिणं बहुवर्णं हरिगोनिवारकम् ।
मुनिनन्दनमिन्दरापतेरधिकेष्टं पततामिवाधिपम् ॥ १२ ॥

(भा.प्र.) पत्रं पलाशं पतत्रं च । हरिगौः सूर्यरश्मिः, इन्द्रवज्रं च । मुनीनां नन्दनम्, काश्यपपुत्रं च ॥

अमृतात्ममहाफलप्रदं दुरवापं हरिभक्तिवर्जितैः ।
श्रितसाधुपुराणभारतं निगमं मूर्तमिवोरुशाखिनम् ॥ १३ ॥

(भा.प्र.) अमृतं मोक्षश्च । श्रितानि साधुपुराणादिपुस्तकान्यस्मिन्, शाखासु प्रेङ्खेषु च ॥

(प.दी.) कीदृशं तरुमित्यतस्तद्विशेषणान्याह– **मसृणेत्यादिना** श्लोकत्रयेण । **ईशस्य** श्रीवेदव्यासस्य **निषेवणाय अन्तिके** तत्समीपे **स्थितम्** । **भगवन्तं** षड्गुणोपेतं **अनन्तं वा** शेषमिव । 'वा विकल्पोपमानयोः' । कथम्भूतम्? **मसृणत्वचं** स्निग्धत्वचम् । 'मसृणोऽकठिने स्निग्धे' इति हेमचन्द्रः । तथाविधो हि शेषोऽपि । **उन्नतं** उच्छ्रितम् । उत्तमः शेषः । **ततं** च्छत्राकारेण व्याप्य स्थितम् । बहुफणाभोगैः व्याप्य स्थितम् । **बहुशाखाफणसूनरत्नकम्** । बहुशाखाख्यफणेषु प्रसूनाख्यरत्नयुक्तम् । फणाग्रेषु रत्नवान् शेषः ॥ * ॥ पुनः कथम्भूतम्? **पततां** पक्षिणां **अधिपं** गरुडं **इव** । कुतः? **अति-**

चित्रविचित्रपत्रिणम्। अत्याश्चर्यनानावर्णपर्णोपेतम्, गरुडोऽपि नानावर्णपक्षयुक्तः। **बहुवर्णम्**। गरुडोऽपि बहुवर्णः। 'आजानुतः स्वर्णवर्ण आनाभेर्हारगौरभाः। माणिक्यशोण आकण्ठादाकेशाद्धरितप्रभः। नीलकेशो लसन्माल्यः' इति पञ्चवर्ण इति भावः। **हरिगोनिवारकम्,** सूर्यकिरणनिवारकम्, अनल्पच्छायमिति भावः। गरुडोऽपि इन्द्रवज्रनिवारकः। **मुनिनन्दनं** मुनीनां नन्दनं सन्तोषकरम्। अन्यो मुनेः काश्यपस्य नन्दनः। **इन्दिरापतेः** व्यासस्य अधिकेष्टम्। गरुडोऽपि रमापतिप्रियः ॥ * ॥ पुनः कथम्भूतम्? **मूर्तं** मूर्तिमन्तं **निगममिव** वेदमिव। **अमृतात्ममहाफलप्रदम्**। सुधामयमहाफलप्रदो हि वृक्षः। तत्फलास्वादनस्य जरामरणनाशकत्वात्। मोक्षाख्यफलप्रदमन्यत्र। वेदार्थविचारपूर्वकं भगवत्स्वरूपज्ञानेन हि मोक्षो भवति। **हरिभक्तिवर्जितैः दुरवापं** बदरिकाश्रमस्यावैष्णवदुर्गमत्वात्। वेदोऽप्यवैष्णवदुरवापः। 'अवैष्णवस्य वेदेऽपि ह्यधिकारो न विद्यते' इति वचनात्। **श्रितसाधुपुराणभारतं** शाखास्ववलम्बमानसाधुपुराणभारतपुस्तकमिति भावः। निगमोऽपि साधुभिः प्रमाणभूतैः पुराणैः भारतेन चाऽश्रितः। वेदार्थत्वात् तेषामित्यर्थः। **उरुशाखिनं** बहुशाखायुक्तम्। वेदोऽप्यैतरेय-कौषीतक-बाष्कल-शाकल-पैङ्गि-काठकाद्युरुशाखावान् ॥ ११–१३ ॥

(त.चं.) भगवन्तं भाग्यवन्तं पूज्यं वा। 'तत्रभवान् भगवानिति शब्दो विबुधैः प्रयुज्यते पूज्ये' इति च ॥ * ॥ हरिरिति सूर्यः। हरिरितीन्द्रः। गौरिति रश्मिः। गौरिति वज्रम्। 'भास्वान् विवस्वान् हरिः'। 'इन्द्रो दुश्च्यवनो हरिः' इति च। 'अर्क-मर्कट-मण्डूक-विष्णु-वासव-वायवः। तुरङ्ग-सिंह-शीतांशु-यमाश्च हरयो दश' इति। 'गौः स्वर्गे च बलीवर्दे रश्मौ च कुलिशे' इत्युक्तम्। मुनीनामानन्दनो वृक्षः। मुनेः काश्यपस्य नन्दनः पुत्रो गरुडः ॥ * ॥ अमृतात्ममहाफलप्रदम्। अमृतमयानि महान्ति फलानि प्रददाति वृक्षः। मोक्षाख्यं महापुरुषार्थं वेदः। 'तमेवं विद्वानमृत इह भवति' इति हि निगमयन्ति निगमाः। कथं निगमः? नितरां गमयति

भगवन्तमिति । श्रितानि पुराणादिपुस्तकानि यस्मिन् वृक्षे । शाखासु शाखानिबद्धप्रेङ्खेषु दोलासु च । प्रेङ्खतेऽनेनेन प्रेङ्खः । इखि गतौ । 'दोला प्रेङ्खः पुमान् प्रेङ्खा' इति च ॥ ११–१३ ॥

अथ तस्य स वेदिकान्तरे सुविशाले विमले मनोहरे ।
अवलोकितवाननन्तधीर्दिवि देवानिव तापसोत्तमान् ॥ १४ ॥

(प.दी.) अथेति । **अथ सोऽनन्तधीः** श्रीपूर्णप्रज्ञाचार्यः **तस्य** वृक्षस्य **सुविशाले** अतिविस्तारवति **विमले मनोहरे वेदिकान्तरे** वेदिकामध्ये **तापसोत्तमान्** मुनिवरान् **अवलोकितवान्** दृष्टवान् । कुत्र कानिव? **दिवि देवानिव** ॥ १४ ॥

(त.चं.) 'वेदिका च वितर्दिका' इति हलः । 'कट्टे' [ಕಟ್ಟೆ] इति, 'जगलि' [ಜಗಲಿ] इति भाषायाम् ॥ १४ ॥

अपि सप्ततया विराजितान्
गतसङ्ख्यान् गुणिनो गुणोज्झितान् ।
अपि मन्युमदादिवर्जितान्
गतभोगान् पवनाशनान् सदा ॥ १५ ॥

(भा.प्र.) सप्ततया जटासहिततया ॥

(प.दी.) अपीति । **गतसङ्ख्यान्** निस्सङ्ख्यान्, बहूनिति यावत् । पुनः कथम्भूतान्? **सप्ततया** जटासहितत्वेन, 'व्रतिनां सा जटा सटा'[१] इति हलः, **विराजितान्** शोभमानान् । विरुद्धालङ्कारोऽयम्, गतसङ्ख्यत्वस्य सप्ततया विराजितत्वस्य च विरुद्धत्वात् । **गुणिनः** ज्ञानभक्त्यादिगुणयुक्तान् । **गुणोज्झितान्** सत्त्वादिगुणरहितान् । अथवा गुणिनः, गुणः सूत्रं यज्ञोपवीतम्,

१. 'व्रतिनां तु जटा सटा' इति प्रचलितः पाठः ।

तत्सहितान् । ब्रह्मचार्यादिवानप्रस्थान्तानिति यावत् । अत्रापि गुणोज्झितत्वस्य विरुद्धत्वात् विरुद्धालङ्कारः । **गतभोगान्** स्रक्चन्दनादिभोगरहितान् **सदा पवनाशनान्** वाय्वाहारान् । अत एव **मन्युमदादिवर्जितान्** कामकोपाद्यरिषड्वर्गरहितान् । पवनाशनशब्दः सर्पवाचकः । 'पन्नगः पवनाशनः' इत्यमरः । भोगशब्दः सर्पशरीरवाचकः । 'भोगः सुखे स्त्र्यादिभृतावहेश्च फणकाययोः' इत्यमरः । तथा च पवनाशनानां गतभोगत्वं विरुद्धालङ्कारः ॥

(त.चं.) गतसङ्ख्यानपि सप्ततया सप्तसङ्ख्यतया विराजितानिति विरोधः । जटासहिततया विराजितानिति परिहारः । सप्तया सहिताः सप्ताः, तेषां भावः सप्तता, तया । 'सप्ता जटायां च राक्षस्यां पतने दुर्भगस्त्रियाम्' । अधोऽधः पततीति सप्ता जटा । पतन्त्यनयेति दुर्भगा च राक्षसी च । गुणोज्झितानपि गुणिन इति विरोधः । त्रिगुणवर्जितानपि सद्गुणभरितानिति परिहारः । गुणिन इत्युपवीतिनो वा । गुणोज्झितानुपवीतरहितान् यतीनिति वा । पवनाशनानपि गतभोगान् मन्युमदादिवर्जितानिति विरोधः । पवनाशनाः सर्पाः भोगिनश्च मन्युमदादिमन्तश्च भवन्ति । भोग इत्यहेः फटा । मन्युः कोपः । मदो गर्वः । मुनयश्च तपसे त्यक्ताहारतया वाताशनाः त्यक्तविषयभोगास्त्यक्तक्रोधाद्यरय इति परिहारः ॥ १५ ॥

मुनिमण्डलमध्यवर्तिनं त्रिजगन्मण्डलमण्डनायितम् ।
इह सत्यवतीसुतं हरिं परिपूर्णप्रमतिः समैक्षत ॥ १६ ॥

(प.दी.) मुनीति । **परिपूर्णप्रमतिः** इह वेदिकायां **मुनिमण्डलमध्यवर्तिनं त्रिजगन्मण्डलमण्डनायितं** त्रैलोक्यमण्डलस्यालङ्कारभूतं **सत्यवतीसुतं हरिं समैक्षत** ददर्श ॥ १६ ॥

(त.चं.) मुनीनां मण्डलं परिवारः । त्रयाणां जगतां मण्डलं चक्रवालं सङ्घातो वा ॥ १६ ॥

निजहृत्कमलेऽतिनिर्मले सततं साधु निशामयन्नपि ।
अवलोक्य पुनःपुनर्नवं तमसौ विस्मित इत्यचिन्तयत् ॥ १७॥

(प.दी.) निजेति । **असौ** श्रीमध्वः **अतिनिर्मले निजहृत्कमले साधु** सम्यक् **सततं निशामयन्** पश्यन् **अपि तं** श्रीवेदव्यासं **पुनःपुनर्नवं** पुनःपुनर्दर्शनेन नूतनं **अवलोक्य विस्मितः** सन् **इत्यचिन्तयत्** ॥ १७ ॥

(त.चं.) नवं नित्यनूतनं पुनःपुनः क्रियासमभिहारेणावलोक्य । प्रतिदर्शनं पुनर्नवं पुनरवलोक्येति वा । पुनःपुनर्नवं पुनःपुनरवलोक्येति वा ॥ १७ ॥

अगणय्यगुणार्णवोऽमलः स हि नारायण एष केवलम् ।
विधिनाऽनुसृतं पराशरात् सुषुवे सत्यवती किलात्र यम् ॥ १८॥

(प.दी.) अगणय्येति । **सत्यवती विधिना** ब्रह्मणा **अनुसृतं** अवताराय प्रार्थितं **यं पराशरात् अत्र** भुवि **सुषुवे** । **किल** इत्यपरमार्थे । वस्तुतो जन्मरहितत्वात् तस्य । **स एषः** सत्यवतीसुतः **केवलं** साक्षात् **नारायणः** । **हि** इति प्रसिद्धेर्द्योतकः । कथम्भूतः? [१]**अगणय्यगुणार्णवः** अगणितगुणसमुद्रः । **अमलः** निर्दोषः ॥१८ ॥

(त.चं.) विधिनाऽनुसृतम् । तथाहि भाष्ये–'ब्रह्मरुद्रादिभिरर्थितो भगवान् नारायणो व्यासत्वेनावततार' इति ॥ १८ ॥

धवळेऽस्य मनःपयोनिधौ सदनुक्रोशगिरीन्द्रलोळिते ।
प्रकटीभवति स्म सुन्दरी दयिता दैत्यरिपोस्त्रयीमयी ॥ १९ ॥

(प.दी) धवळ इति । **धवळे** निर्मले **अस्य मनःपयोनिधौ** मनःक्षीरसमुद्रे **सदनुक्रोशगिरीन्द्रलोळिते** सज्जनविषयकृपाख्यमन्दरगिरीन्द्रेण लोळिते मथिते सति तस्मान्मनःपयोनिधेः **दैत्यरिपोः** श्रीवेदव्यासस्य **दयिता** प्रिया **त्रयीमयी** वेदात्मिका **सुन्दरी** स्त्री **प्रकटीभवति स्म,** स्मातीते, प्रकटीबभूवेत्यर्थः ।

१.अगणय्यपदस्य साधुताविषये विवृतमुपरिष्टादष्टमे सर्गे [१३] तत्वचन्द्रिकायाम् ।

पयोनिधौ मन्दरमथिते सति तस्माद् यथा भगवद्दयिता रमा प्रादुर्बभूव तद्वत् सज्जनकृपोन्मथितादस्य मनसस्त्रयी प्रादुर्बभूवेति भावः ॥ १९ ॥

(त.चं.) लोळितः आलोडितः । लुड विलोडने । 'लुट विलोटने' इत्येके । 'लुट विलोडने' इत्यन्ये । 'लुठ' इत्यपरे । बहुधा सङ्कीर्णटवर्गो धातुपाठः । अत एव केचिद् 'रोडृ उन्मादे' इत्यतो लोळपदं मृगयन्ते । अथापि केचित् पठन्ति 'लौडृ उन्मादे' इति । किमु वक्तव्यं यदि धातुपाठकानामेवैव-मुन्मादः ॥ १९ ॥

इत एव पुराणगौरगौ समहाभारतपारिजातके ।
सति जातवति व्यजायत प्रवरं सूत्रगणामृतं स्वयम् ॥ २० ॥

(प.दी.) इत इति । इत एव श्रीवेदव्यासादेव **समहाभारतपारिजातके** महाभारताख्यपारिजातकसहिते **पुराणगौरगौ** पुराणाख्यचन्द्रे **जातवति सति प्रवरं** उत्तमं **स्वयं** साक्षात् **सूत्रगणामृतं** ब्रह्मसूत्रगणाख्यममृतं **व्यजायत** जज्ञे । पारिजातसहिते चन्द्रे जाते सति पयोनिधेरमृतं यथा जातं एवं भारत-पुराणोत्पत्त्यनन्तरमस्माद् भगवतो ब्रह्मसूत्रमपि जातमिति भावः ॥ २० ॥

(त.चं.) गौरा गावो रश्मयोऽस्येति गौरगुः शुभ्रांशुश्चन्द्रमाः । गौराणि वचनान्यस्येति पुराणमपि गौरगु । 'गोस्त्रियोरुपसर्जनस्य' [१.२.४८] इत्युप-सर्जनगोपदान्तस्य प्रातिपदिकस्य ह्रस्वभावः । 'महाभारतपारिजातमधुभूतां गीताम्' इति भगवत्पादवचनम् ॥ २० ॥

निरवग्रहमुर्वनुग्रहं विदधत् पाण्डुसुतादिसज्जने ।
अवनाववनाय संविदां सुचिरायैष चचार चारुगीः ॥ २१ ॥

(प.दी) **निरिति** । **चारुगीः** चारुवचनः **एषः** श्रीवेदव्यासः **पाण्डुसुतादि-सज्जने निरवग्रहं** अकुण्ठितं **उर्वनुग्रहं विदधत्** कुर्वन् **संविदां** ज्ञानानाम्, आश्रयविषयभेदात् बहुवचनम्, **अवनाय** रक्षणाय **अवनौ** भुवि **सुचिराय चचार** ॥ २१ ॥

(त.चं.) अवनाय संविदाम् । ज्ञानानां शास्त्राणां वा ॥ २१ ॥

अधुना कलिकालवृत्तये सवितेव क्षणदानुवृत्तये ।
जनदृग्विषयत्वमत्यजद् भगवानाश्रममावसन्निमम् ॥ २२ ॥

(प.दी.) अधुनेति । **अधुना** इदानीं **इममाश्रममावसन्** अस्मिन्नाश्रमे आवसन् **भगवान् कलिकालवृत्तये जनदृग्विषयत्वं** प्राकृतजनदृष्टिगोचरत्वं **अत्यजत्** । **क्षणदानुवृत्तये** रात्रिप्रवृत्तये **सवितेव** रविरिव । अयं भावः– सुरेषु मुनिषु च भुवि चरत्सु कलियुगधर्माः न प्रवर्तेरन्निति अधुना व्यासोऽयं जनदृग्विषयत्वं मुक्त्वा तस्मिन्नाश्रमे वसति । रात्रिप्रवर्तनार्थं सूर्यो यथाऽस्तं गच्छेत् तद्वदिति ॥ २२ ॥

(त.चं.) कलिकालप्रवृत्तये । आश्रममावसन् । 'उपान्वध्याङ् वसः' [१.४. ४८] । आश्रममुपवसति । अनशने तु आश्रमे उपवसति । आश्रममनुवसति । आश्रममधिवसति । आश्रममावसति ॥ २२ ॥

तदिदं वपुरस्य दृश्यते दळितेन्दीवरसुन्दरद्युति ।
परमाजिनयोगपीठगं मम चेतोनयनाभिनन्दनम् ॥ २३ ॥

(प.दी.) तदिति । **दळितेन्दीवरसुन्दरद्युति** विकसितेन्दीवरद्युतिसमानद्युति, **परमाजिनयोगपीठगम्**, उत्तमकृष्णाजिनात्मकयोगासनगतम्, **मम चेतोनयनाभिनन्दनम्**, चेतसो नयनयोश्चाभितः सन्तोषकरम्, **अस्य तदिदं वपुः दृश्यते** ॥ २३ ॥

(त.चं.) दळितं विकसितमिन्दीवरं नीलोत्पलम् । 'दळ विदारणे' दाळयति । दल विदारणे वा । दलति ॥ २३ ॥

अगणय्यगुणैः सुपूरितं परिपूर्णागणितात्मसद्गुणैः ।
इदमस्तसमस्तदूषणं सच्चिदानन्दमयं हि केवलम् ॥ २४ ॥

(**प.दी.**) **अगणय्येति** । **इदं** दृश्यमानं वपुः **अगणय्यगुणैः** अगणितगुण-युक्तैः, **परिपूर्णागणितात्मसद्गुणैः**, प्रत्येकं परिपूर्णैः अगणितैः आत्मभूतैः स्वरूपभूतैः सद्गुणैः दोषवर्जितैः गुणैः **सुपूरितम्**, **अस्तसमस्तदूषणं** निर-स्ताशेषदोषम्, **केवलं** साक्षात् **सच्चिदानन्दमयं** चित्सहितानन्दात्मकं **हि** ॥

(**त.चं.**) परिपूर्णा अगणिता आत्मभूताश्च ये सद्गुणास्ते प्रत्येकमपि अगणय्यगुणाः । 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे' इति हि भाग-वते । अस्तसमस्तदूषणमिति सत्पदार्थः । चिदानन्दौ वक्ष्यति । तेन संहृत्य सच्चिदानन्दमयमित्युक्तं भवति ॥ २४ ॥

कमलाकमलासनानिलैर्विहगाहीन्द्रशिवेन्द्रपूर्वकैः ।
पदपद्मरजोऽस्य धारितं शिरसा हन्त वहाम्यहं मुहुः ॥ २५ ॥

(**प.दी.**) **कमलेति** । **कमलाकमलासनानिलैः**, कमला श्रीः, कमलासनो ब्रह्मा, अनिलो मुख्यवायुः, एतैश्च **विहगाहीन्द्रशिवेन्द्रपूर्वकैः**, विहगेन्द्रो गरुडः, अहीन्द्रः शेषः, शिवश्च इन्द्रश्च पूर्वे येषां देवादीनां ते तथोक्ताः तैश्च **शिरसा धारितं अस्य** भगवतः **पदपद्मरजः अहं मुहुः वहामि** । 'वर्तमान-सामीप्ये वर्तमानवद्वा' इति लट् । **हन्त** इति हर्षे । 'हन्त हर्षेऽनुकम्पायां वाक्यारम्भविषादयोः' इत्यमरः ॥ २५ ॥

(**त.चं.**) विहगाह्योरिन्द्रौ गरुडशेषौ च शिवश्चेन्द्रश्च । 'या मारुताद् गर्भमधत्त पूर्वं शेषं सुपर्णं गिरिशं सुरेशम् । चतुर्मुखाभांश्चतुरः कुमारान् सा द्रौपदी नाम बभूव भूमौ' इति पौराणं वचः ॥ २५ ॥

प्रणमामि पदद्वयं विभोर्ध्वजवज्राङ्कुशपद्मचिह्नवत् ।
निजमानसरागपीडनादरुणीभूतमिवारुणं स्वयम् ॥ २६ ॥

(**प.दी.**) **प्रणमामि** । **ध्वजवज्राङ्कुशपद्मचिह्नवत्** ध्वजवज्राङ्कुशपद्मानां चिह्नयुक्तं **विभोः पदद्वयं** चरणयुग्मं **प्रणमामि** नमस्कुर्याम् । पुनः कथम्भूतम्?

स्वयं स्वत एव **अरुणं** लोहिततळमिति यावत् । **निजमानसरागपीडनात्** निजानां स्वभक्तानां मनसि विद्यमानस्य रागस्य विषयाकाङ्क्षायाः पीडनात् निराकरणादिति यावत्, **अरुणीभूतमिव** लोहितं जातमिव। भगवच्चरणारविन्दं पश्यतां हि रागो निवर्तते । 'रसोऽप्यस्य परं दृष्ट्वा निवर्तते' इति श्रीभगवद्वचनात् । स्वत एवारुणस्य निजमानसरागपीडनादरुणीकृतत्वमुत्प्रेक्ष्यते । लोके गैरिकाद्याक्रमेण पादारुणभावस्य दृष्टत्वात् ॥ २६ ॥

(त.चं.) प्रणमामि कायेन वाचा मनसा च । णम नम्रत्वे । 'णमु' इत्यन्ये । 'णो नः' [६.१.६५] इति धात्वादेर्णकारस्य नकारो भवति । 'सर्वे नादयो णोपदेशा भवन्ति नृती-नन्दि-नर्दि-नक्क-नाटि-नाथृ-नाधृ नृवर्जम्' इति काशिकायाम् । केचित् 'णक्क' धातुमेव पठन्ति । अन्ये णष्कधातुम् । अन्येऽप्यणोपदेशाः पठ्यन्ते काशकृत्स्नादिभिः । तद् यथा– नस कौटिल्ये । नाय हेतौ । नासृ शब्दे । निड निवासे । निष्क परिमाणे । नुङ् शब्दे । नुणुबि मर्दने । क्वचिच्च णो नो न भवति । तद् यथा–'णुङ् शब्दे' इति काशकृत्स्नः । नात्र नादेशः । णवत इत्येव रूपम्, न नवत इति । अन्यथा 'नुङ् शब्दे' इति पुनःपाठो न स्यात् ॥ २६ ॥

ननु केवलमेव वैष्णवं श्रितवन्तः पदमात्मरोचिषा ।
तमसोऽप्युभयस्य नाशका विजयन्ते नखरा नवं रविम् ॥ २७ ॥

(प.दी.) ननु । नखराः भगवत्पादनखाः **नवं रविं** उद्यदादित्यं **विजयन्ते** अतिशेरते **ननु** । कुतः? **केवलं** मुख्यतः,विष्णोः पदं विष्णुपदमिति योगसिद्धमिति भावः, **वैष्णवं** विष्णुसम्बन्धि **पदं** चरणं **एव श्रितवन्तः** आश्रिताः । रविस्तु रूढिमात्रेण विष्णुपदाभिधमाकाशमाश्रितः । **आत्मरोचिषा** स्वतेजसा **उभयस्यापि** द्विविधस्यापि **तमसो नाशकाः** । अन्धकारस्याज्ञानस्य च नाशका इति भावः । रविः बाह्यमेव तमो निराकुर्यात् ॥
(त.चं.) विष्णुपदगदितमप्याकाशं न केवलं वैष्णवं पदम् । विष्णवतिरिक्तस्यापि तदेव हि पदम् ॥ २७ ॥

सुकुमारतळाङ्गुलीमतोः पदयोरस्य निगूढगुल्फयोः ।
उपमानमहो न लभ्यते कविवर्यैरितरेतरं विना ॥ २८ ॥

(प.दी.) **सुकुमारेति** । **सुकुमारतळाङ्गुलीमतोः** अतिकोमळाभ्यां तळाभ्यामङ्गुलीभिश्च युक्तयोः । **निगूढगुल्फयोः** निगूढग्रन्थिकयोः । 'पादाग्रं प्रपदं पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् । तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णिरधस्तयोः'[१] इत्यमरः । **अस्य पदयोः** चरणयोः **कविवर्यैः इतरेतरं** अन्योन्यं **विना उपमानं** दृष्टान्तो **न लभ्यते, अहो** आश्चर्यम् । दक्षिणपादस्य सव्यपादो दृष्टान्तः, तस्य च दक्षिणपाद इति भावः ॥ २८ ॥

(त.चं.) अङ्गुल्यः अङ्गुलयः । 'अङ्गुलिः करशाखायाम्'। पदशाखायामिति च वक्तव्यम् । पादग्रन्थी गुल्फौ ॥ २८ ॥

उचितां गुरुतां दधत् क्रमाच्छुचि तेजस्वि सुवृत्तमुत्तमम् ।
भजतोऽत्र च भाजयत्यदो विभुजङ्घायुगळं सरूपताम् ॥ २९ ॥

(प.दी.) **उचिताम्** । **क्रमादुचितां गुरुतां दधत्** गुल्फादूर्ध्वं जानुमण्डलपर्यन्तं क्रमेण यावदुचितं तावत् स्थूलतां दधत् । **शुचि** निर्दोषं **तेजस्वि सुवृत्तं** सम्यग्वर्तुलं **उत्तमं अदः** तत् **विभुजङ्घायुगळं** विभोर्व्यासस्य जङ्घायुगळं **भजतः** उपासकान् पुरुषान् **अत्र च** मुक्तेः प्रागपि **सरूपतां** सारूप्यं **भाजयति** प्रापयति । विभुजङ्घायुगळस्य यथा शुचित्वं क्रमेण गुरुत्वं तद्वदुपासका अपि क्रमेण शुचयो निर्दोषाः, गुरवः स्वावराणां उपदेशकर्तारः, सुवृत्ताः शोभनाचाराः, तेजस्विनः, उत्तमाः ज्ञानभक्त्यादिगुणैरुत्तमाश्च भवन्तीति भावः । अतः **सरूपतां भाजयति** । किमु मुक्तावित्यर्थः ॥ २९ ॥

(त.चं.) सरूपतां भाजयति । भज विश्राणने ॥ २९ ॥

अचलासनयोगपट्टिका वरकक्ष्या सकृदाप्तमिष्टदम् ।
परितोऽपि हरिं स्फुरन्त्यहो अनिशं धन्यतमेति मे मतिः ॥ ३० ॥

---
१. 'पार्ष्णिस्तयोरधः' इति प्रचलितः पाठः ।

(भा.प्र.) हरिं परितः। 'अभितः परितःसमयानिकषाहाप्रतियोगेऽपि' इति कर्मत्वम्॥

(प.दी.) अचलेति । **वरकक्ष्या** वरा च सा कक्ष्या चेति वरकक्ष्या । कक्ष्या नाम मध्यबन्धनम् । 'कक्ष्या प्रकोष्ठे हर्म्यादेः काञ्च्यां मध्येभबन्धने' इत्यमरः। मध्यबन्धने इभबन्धने चेत्यर्थः। **वरकक्ष्या** उत्तममध्यबन्धनभूता **अचलासनयोगपट्टिका** अचलासनार्था स्थिरासनार्था योगपट्टिका अचलासनयोगपट्टिका । योगपट्टिकया मध्यबन्धने कृते सति स्थिरासनत्वं भवति । एवं मध्यबन्धनभूता योगपट्टिका **सकृदाप्तं** एकदा प्राप्तं **अपि इष्टदं** अभीष्टप्रदं **हरिं परितः** भगवतस्समन्तात् **अनिशं** निरन्तरं **स्फुरन्ती** सती **धन्यतमेति** अतिधन्येति **मे मतिः** । पुंसां सकृद्भगवत्प्राप्त्या धन्यत्वमभीष्टप्राप्तिश्च भवति । योगपट्टिका त्वनिशमपि हि परितः स्फुरतीति **अहो** आश्चर्यम् । तस्माद् धन्यतमेति मम मतिरिति भावः । 'अभितःपरितःसमया' इत्यादिना द्वितीया ॥ ३० ॥

(त.चं.) अचलासनयोगपट्टिका। आजानु पादौ स्वस्तिकीकृत्य किञ्चिदुन्नमय्य, अचलत्वाय चाऽऽसनस्य या वस्त्रबन्धनी जङ्घे चावलग्नं च परितो बध्यते । वरकक्ष्यावती च सा । मौञ्जी मेखला कक्ष्या । गुह्यपिधानं च कक्ष्या। 'कक्ष्या गुह्यपिधाने काञ्च्याम्' इति च। 'वरकक्ष्या उत्तममध्यबन्धनभूता' इति प्राचीनटीकाकाराः । 'मध्येभबन्धनं कक्ष्या' इति तु कोशकाराः । 'इभ' इत्यविवक्षितम्, केवलं मध्यबन्धनं च भवतीति वक्तव्यम् । परितोऽपि हरिम् । 'अभितः-परितः-समया-निकषा-हा-प्रति-योगेऽपि दृश्यते' इति कात्यायनः । द्वितीया दृश्यते । अभितो ग्रामम् । परितो ग्रामम् । समया ग्रामम् । निकषा ग्रामम् । हा देवदत्तम् । बुभुक्षितं न प्रति भाति किञ्चित् । स्फुरन्त्यहो अनिशम् । ओदन्तो हि निपातः प्रगृह्यसञ्ज्ञो भवति । तथाहि स्मरन्ति– 'ओत्' [१.१.१५] ॥ ३० ॥

रुचिरेण वरैणचर्मणा रुचिराजद्युतिचारुरोचिषा ।
परमोरुनितम्बसङ्गिना परमाश्चर्यतया विराज्यते ॥ ३१ ॥

(प.दी.) रुचिरेति । **परमोरुनितम्बसङ्गिना** परमस्य उरुकटिस्थलसम्बन्धिना । परमस्य ऊर्वोः नितम्बे च सम्बन्धिनेति वा । **रुचिरेण** रमणीयेन, **रुचिराजद्युतिचारुरोचिषा** । रुचिराजः सूर्यः, रुचिराजस्य द्युतिवत् चारुरोचिषा । 'रोचिश्शोचिरुभे क्लीबे' इत्यमरः । **वरैणचर्मणा** वरेण एणचर्मणा कृष्णमृगस्य चर्मणा **परमाश्चर्यतया** अत्याश्चर्यतया **विराज्यते** । 'राजृ दीप्तौ' भावे लट् । तस्य श्रीवेदव्यासस्य बहिर्वासोभूतमेणचर्मातितरां विराजत इति भावः ॥ ३१ ॥

(त.चं.) यद्यपि स्त्री नितम्बिनी भवति । तथाऽपि नितम्ब इति नैकान्ततः स्त्रीकट्याः पश्चाद्भागः । 'आरोहश्च नितम्बः कटी कटीरं त्रिकस्थानम्' इति हलायुधः । तबि मर्दने । तम्ब्यते निभृतं मर्द्यते सुरतसङ्गमेष्विति नितम्बः । निभृतं तम्यते कामिभिः कामिनीभिर्वा । तमु काङ्क्षायाम् । नितम्बसङ्गिना वरैणचर्मणा । एणस्य चर्मणा । ऐणेन वा चर्मणा । 'एणः कुरङ्गो हरिणो मृगः स्यात्'। रुचिराजद्युतिचारुरोचिषा । रुचिभी रश्मिभी राजत इति रुचिराजो भास्वान् । रुचीनां वा राजा ॥ ३१ ॥

तनुनिम्नसुनाभिशोभिते वलिभे वारिजनाभ आदधे ।
प्रतनावतिसुन्दरे मृदावुदरेऽस्मिन् जगदण्डमण्डलम् ॥ ३२ ॥

(भा.प्र.) 'तुन्दिवलिवटेर्भः' इति ॥

(प.दी.) तन्विति । **वारिजनाभः** पद्मनाभः । **तनुनिम्नसुनाभिशोभिते** सूक्ष्मगम्भीरशोभननाभिशोभिते **वलिभे** रेखात्रययुक्ते । 'तुन्दिवलिवटेर्भः' इति मत्वर्थे भप्रत्ययः । **प्रतनौ** अत्यल्पे **अतिसुन्दरे मृदौ अस्मिन्नुदरे जगदण्डमण्डलं** ब्रह्माण्डमण्डलं **आदधे** सम्यग्दधार । मृदुप्रतनूदरे ब्रह्माण्डधारणमतिचित्रमिति भावः ॥ ३२ ॥

(त.चं.) वलिभे त्रिवलिशोभिते । 'तुन्दि-वलि-वटेर्भः'[५.२.१३९] ।

भः प्रत्ययो भवति मत्वर्थे । तुन्दिरित्युद्गता नाभिरुच्यते । साऽस्यास्तीति तुन्दिभः । वलिः त्वक्सङ्कोचः । औदरी रेखा । तद्वान् वलिभः । वटिः तन्तुः । वटिभस्तन्तुवेष्टनः । जगन्ति अण्डानीव । तन्मानी ब्रह्मा जीवसमुदायश्च । तेषां मण्डलम् । भूतानि भवन्ति भविष्यन्ति च ब्रह्मादिजीवजातानि ॥

हृदये कृतसज्जनोदये सुविशाले विमले मनोहरे[१] ।
उभयं वहति त्रयीमयं भगवान् ब्रह्मसुसूत्रमुत्तमम् ॥ ३३ ॥

(भा.प्र.) हृदये अन्तर्बहिश्च । ब्रह्मसूत्रं वेदान्तसूत्रमुपवीतं च ॥

(प.दी) हृदये । भगवान् कृतसज्जनोदये कृतः सज्जनानामुदयः सम्पद् येन तत् तथोक्तं तस्मिन् **सुविशाले विमले मनोहरे हृदये त्रयीमयमुत्तमं उभयं** द्विविधं **ब्रह्मसुसूत्रं** शोभनं ब्रह्मसूत्रं **वहति** । हृदयान्तर्वेदान्तसूत्रं बहिर्यज्ञोपवीतं वहतीति भावः । उभयस्य त्रयीमयत्वं नाम वेदान्तसूत्रस्य वेदार्थनिर्णायकत्वम्, इतरस्य वेदाभिमानिभिरभिमन्यमानत्वं वेदसिद्धत्वं वा ॥ ३३ ॥

(त.चं.) हृदये मनसि ब्रह्मसूत्रं वेदान्तसूत्रम् । सर्वेषामपि वेदानां ब्रह्मपरता-निर्णयनमेव सुष्ठुता सूत्रस्य । निर्विशेषितसूत्रत्वमित्येतत् । हृदये उरसि ब्रह्मसुसूत्रं यज्ञोपवीतम् । देवर्षिपितृतर्पणादिदं सूत्रं सुसूत्रं भवति ॥

असमेऽनधिके सुसाधिते निजताते रविराशिदीधिति ।
प्रददौ त्रिजगज्जयध्वजं विधिरेतद् गळसङ्गि भूषणम् ॥ ३४ ॥

(भा.प्र.) 'नास्ति नारायणसमम्' इति पत्रालम्बनश्लोको ब्रह्मसदसि ॥

(प.दी.) असमे । विधिः ब्रह्मा **निजताते** श्रीनारायणे **असमे** समानरहिते **अनधिके** उत्तमरहिते **सुसाधिते** व्यासेन 'नास्ति नारायणसमं न भूतं न भविष्यति' इति श्लोकेन पत्रालम्बनं कृत्वा श्लोकार्थे सम्यक्साधिते

---

१. 'सुविशाले मुनिवंशशेखरः' इत्यर्वाचीनाः पठन्ति । न कापि प्राचीनकोशेषु । सम्भाव्यते चतुर्दशश्लोकस्य द्वितीयपादेनापौनरुक्त्याय कैश्चिद् व्यत्यस्तं स्यादिति ।

सति **अस्मै त्रिजगज्जयध्वजं** त्रैलोक्यजयध्वजायमानं **रविराशिदीधिति गळसङ्गि एतत् भूषणं** कण्ठभूषणं **प्रददौ** । 'सहस्रार्थानृषीनेष यौगपद्येन पृच्छतः । सहस्रोत्तरदानेन युगपत् पर्यतोषयत्' इति वचनात् जगज्जयः प्रसिद्धः ॥ ३४ ॥

(त.चं.) 'नास्ति नारायणसमं न भूतं न भविष्यति । एतेन सत्यवाक्येन सर्वार्थान् साधयाम्यहम्' इति प्रतिज्ञाश्लोकमादौ पत्रगतं कृत्वा, तस्मिंश्च साधिते । एतस्य गळसङ्गि । एतद् वा गळसङ्गि । 'कौस्तुभमास कण्ठे' इति हि भागवते ॥ ३४ ॥

अरिवारिजलक्षणोल्लसत्सुकुमारारुणपाणिपद्मयोः ।
पृथुपीवरवृत्तहस्तयोरुपमां नैव लभामहेऽनयोः ॥ ३५ ॥

(प.दी.) अरीति । **अरिवारिजलक्षणोल्लसत्सुकुमारारुणपाणिपद्मयोः** रेखा-रूपारिवारिजचिह्नाभ्यामुल्लसत्सुकोमळतर[1] पाणिपद्मवतोः **अनयोः पृथु-पीवरवृत्तहस्तयोः** स्थूलपुष्टवर्तुलबाह्वोः **उपमां** दृष्टान्तं **नैव लभामहे** ॥

(त.चं.) अरिश्चक्रम् । वारिजः शङ्खः । पृथुपीवरवृत्तहस्तयोः । हस्त इति बाहुवचनोऽपि भवति । प्रकोष्ठवचनोऽपि भवति । पाणिमात्रवचनोऽपि । 'कै' [कै] इति भाषायां यथा । कथं हस्तः? हसतीति हस्तः । हसतेस्तन्निति वैयाकरणाः। तथाहि दशपादिका– 'हसि-मृ-गॄ-इण्-वामि-दमि-तमि-लू-पू-धूर्विभ्यस्तन्' [६.७] इति । हन्तीति हस्तः इति नैरुक्ताः । साधु चे-दम् । हस्तेन ह्यायुधेनारीन् हन्ति हिनस्ति । हन्ति केवलम्, न हसति । अस्य बाहुवचनत्वादेव व्याहरन्ति गजं हस्तीति करीति । शुण्डादण्डं हस्तिहस्त इति ॥ ३५ ॥

भजतां वरतर्कमुद्रया द्यति हस्ताग्रमबोधमीशितुः ।
अधिजानु समर्पितं परं कृतभूयोभयभङ्गमङ्गलम् ॥ ३६ ॥

---

१. '–तरारुणपाणिपद्मवतोः' इति पठनीयम् ।

(प.दी.) भजताम् । **ईशितुः** श्रीवेदव्यासस्य **हस्ताग्रं वरतर्कमुद्रया** उत्तम-ज्ञानमुद्रया **भजतामबोधं** अज्ञानं **द्यति** खण्डयति । 'दो अवखण्डने' इति धातुः । **अधिजानु** जानुन उपरि **समर्पितं** न्यस्तं **परं** वामहस्ताग्रं **कृतभूयोभय-भङ्गमङ्गलम्**, भूयोभयं महद् भयम्, संसारलक्षणं भयम्, तस्य भङ्गो नाशः, कृतः भूयोभयभङ्गो येन तत् कृतभूयोभयभङ्गम्, तच्च तन्मङ्गलं चेति कृतभूयो-भयभङ्गमङ्गलम् । दक्षिणवामबाहू ज्ञानाभयमुद्राङ्किताविति भावः ॥ ३६ ॥

(त.चं.) दक्षिणहस्ताग्रं भजतामबोधं द्यति । परं वामं हस्ताग्रं अभयमुद्रया कृतभूयोभयभङ्गमङ्गलम् ॥ ३६ ॥

सततं गळता स्वतः श्रुतित्रितयेनेव निकाममङ्कितः ।
सुविडम्बितकम्बुरीक्ष्यते वररेखात्रयवान् गुरोर्गळः ॥ ३७ ॥

(प.दी.) सततम् । **स्वतः** स्वस्मात् **सततं गळता** निर्गच्छता **श्रुतित्रितयेन** ऋगादित्रितयेन **निकामं** सम्यक् **अङ्कित इव** चिह्नित इव **वररेखात्रयवान्** अत एव **सुविडम्बितकम्बुः** मध्येरेखात्रयवत्त्वेन सम्यगनुकृतशङ्खः **गुरोर्गळः** कण्ठः **ईक्ष्यते** दृश्यते ॥ ३७ ॥

(त.चं.) 'रेखात्रयाङ्किता ग्रीवा कम्बुग्रीवेति कथ्यते' इति च । जगद्गुरूणां गुरोः । विशेषतः स्वस्य ॥ ३७ ॥

सकलास्तकलङ्ककाळिमस्फुरदिन्दुप्रकरोरुविभ्रमम् ।
अधरीकुरुते स्वशोभया वदनं देवशिखामणेरिदम् ॥ ३८ ॥

(प.दी.) सकलेति । **देवशिखामणेः** देवश्रेष्ठस्य **इदं वदनं स्वशोभया** स्वकान्त्या **सकलास्तकलङ्ककाळिमस्फुरदिन्दुप्रकरोरुविभ्रमम्**, सकलानां कलासहितानाम्, सम्पूर्णानामिति यावत्, अस्तकलङ्ककाळिम्नां निरस्तशश-लाञ्छनाख्यकार्ष्ण्यवतामत एव स्फुरतां शोभमानानां इन्दूनां प्रकरस्य यः उरुविभ्रमः उर्वी कान्तिः तां **अधरीकुरुते** निराकरोति । सम्पूर्णाकलङ्कचन्द्र-प्रकरकान्तेरपि भगवद्वदनकान्तिरधिकेति भावः ॥ ३८ ॥

(त.चं.) प्रकरः समुदयः ॥ ३८ ॥

अरुणाश्मदलान्तरोल्लसन्नवमुक्तावलिमस्य लज्जयेत् ।
हसतः सितदन्तसन्ततिः परमश्रीररुणोष्ठरोचिषः ॥ ३९ ॥

(प.दी.) अरुणेति । **अरुणोष्ठरोचिषः** रक्तोष्ठद्वयकान्तिमतः **हसतः** मन्दस्मितं कुर्वतः **अस्य** श्रीवेदव्यासस्य **परमश्रीः** उत्तमकान्तिमती **सितदन्तसन्ततिः** शुभ्रदन्तपङ्क्तिः, **अरुणाश्मदलान्तरोल्लसन्नवमुक्तावलिम्,** अरुणाश्मदलस्य अन्तरे मध्ये उल्लसन्तीं नवमुक्तावलिं नवमौक्तिकपङ्क्तिं **लज्जयेत्** । हसतोऽस्यारुणोष्ठद्वयमध्यगता सितदन्तसन्ततिः पद्मरागदलमध्यगतमुक्तावलिमतिशेत इति भावः ॥ ३९ ॥

(त.चं.) 'शोणाश्मा पद्मरागः स्यात्' इति च ॥ ३९ ॥

द्विजवृन्दकृतं कुतूहलादनुयोगान्धुसहस्रमुत्तमम् ।
इयमेकपदे सरस्वती श्रुतिभर्तुः परिपूरयत्यहो ॥ ४० ॥

(भा.प्र.) सहस्रार्थानृषीनेष यौगपद्येन पृच्छतः ।
सहस्रोत्तरदानेन युगपत् पर्यतोषयत् ॥

(प.दी.) द्विजेति । **श्रुतिभर्तुः** श्रीवेदव्यासस्य **इयं सरस्वती** वाणी **कुतूहलात्** सम्भ्रमेण **द्विजवृन्दकृतं उत्तमं अनुयोगान्धुसहस्रं** प्रश्नाख्यकूपसहस्रम् । 'प्रश्नोऽनुयोगः पृच्छा च' इति, 'पुंस्येवान्धुः प्रहिः कूपः' इति चामरः । **एकपदे,** 'तत्क्षणैकपदे तुल्ये' इति हलः, युगपदेव **परिपूरयत्यहो** । नदीप्रवाहो यथाऽभिवृद्धः सन् तीरगतकूपसहस्रं युगपदेव पूरयति तद्वदियं बहून् प्रश्नान् युगपदेव सहस्रोत्तरदानेन परिपूरयति ॥ ४० ॥

(त.चं.) 'प्रश्नः स्यादनुयोगः' इति, 'अन्धुः कूपः' इति च । सरस्वती नदी च वाक् च ॥ ४० ॥

जलजायतलोचनस्य मामवलोकोऽयमुपेत्य लाळयन् ।
कुरुते परिरभ्य पूरितं भुवनानन्दकरस्मितान्वितः ॥ ४१ ॥

(प.दी.) जलजेति । **जलजायतलोचनस्य** अरविन्दायतलोचनस्य श्रीवेद-व्यासस्य **भुवनानन्दकरस्मितान्वितः अयमवलोको** दृष्टिपातो **लाळयन् मामुपेत्य परिरभ्य पूरितं** कृतार्थं **कुरुते** ॥ ४१ ॥

(त.चं.) पूरितं परिपूर्णम् । पॄ पालनपूरणयोः । पूरी आप्यायने वा । पूर्णाभिलाषमित्येतत् ॥ ४१ ॥

उपकर्णममुष्य भासिता तुळसी मन्त्रयतीव लाळिता ।
मम नाथ पदं न मत्सराज्जलजाद्यानि हरेयुरित्यलम् ॥ ४२ ॥

(प.दी.) उपेति । **अमुष्य उपकर्णं** कर्णसमीपे **भासिता** भगवता स्वकर्णारोपणेनालङ्कृता **लाळिता** स्वकर्णारोपणेनैवाऽऽदृता सती **तुळसी** इति **अलं मन्त्रयतीव**, उपकर्णमेवमलं गुप्तभाषणं करोतीव । 'मत्रि गुप्त-परिभाषणे' इति धातुः । कथम्? **नाथ** स्वामिन्, **जलजाद्यानि** कमलादीनि पुष्पाणि **मत्सरात् मम पदं** स्थानं कर्णप्रदेशं **न हरेयुरिति** । अयं भावः– भगवता स्वकर्णे तुळसी धृता; सा मन्त्रयतीवेत्युत्प्रेक्षा ॥ ४२ ॥

(त.चं.) अलं निरन्तरं मन्त्रयतीव रहसि कथयतीव । मत्रि गुप्तभाषणे । लाळिता लाडिता । लड उपसेवायाम् । लड विलासे । लाळयति प्रसादयति बालम् । जिह्वाक्रियायां तु लडयति लळयति दधि ॥ ४२ ॥

विभवाभिभवोद्भवादिकं भुवनानां भुवनप्रभोर्भ्रुवोः ।
अनयोरपि दभ्रविभ्रमात् सभवाम्भोजभवात्मनां भवेत् ॥ ४३ ॥

(प.दी.) विभवेति । **भुवनप्रभोः अनयोः भ्रुवोः दभ्रविभ्रमात्** अल्पविला-सात् **अपि सभवाम्भोजभवात्मनां** रुद्रब्रह्माख्यस्वामिसहितानां **भुवनानां विभवाभिभवोद्भवादिकं** विभव ऐश्वर्यम्, अभिभवः संहारः, उद्भव उत्पत्तिः एतदादिकं नियमनाज्ञानादिकं **भवेत्** ॥ ४३ ॥

(त.चं.) अभिभवः पराभवः संहारश्च । उद्भवः सृष्टिर्मुक्तिश्च । अम्भोजभव आत्मा चित्तमानी जीवकलामानी च । भव आत्मा । मनोमानित्वात् ॥

त्रिजगत्तिलकाळिकान्तरे तिलकोऽयं परभागमाप्तवान् ।
हरिनीलगिरीन्द्रमस्तकस्फुटशोणोपलपङ्क्तिसन्निभः ॥ ४४ ॥

(प.दी.) त्रीति । **त्रिजगत्तिलकाळिकान्तरे** त्रिजगत्तिलकस्य अळिकान्तरे ललाटमध्ये, 'ललाटमळिकं गोधिः' इत्यमरः, **परभागम्**, वर्णान्तरसंयोगेन लभ्य उत्कर्षः परभागः, 'परभागो गुणोत्कर्षः' इति हलः, तं **आप्तवान्** नीलभगवल्ललाटे रक्तद्रव्येण कृतः **अयं तिलकः**, **हरिनीलगिरीन्द्रमस्तकस्फुटशोणोपलपङ्क्तिसन्निभः**, इन्द्रनीलगिरिशिरसि विराजत्पद्मरागपङ्क्तिसदृशः, तथा विराजत इति भावः ॥ ४४ ॥

(त.चं.) त्रिजगतां तिलकायितः । अडति । अड उद्यमे । अळिकमळीकं वा ललाटम् । इकन् ईकन् वा । अत एव वदन्ति 'अळिकं ह्रस्वदीर्घमध्यम्' इति । 'भाले गोध्यळिकाळीकललटानि' इति चाभिदधति ॥ ४४ ॥

नवमम्बुधरं विडम्बयद् वरविद्युद्वलयं जगद्गुरोः ।
अवलोक्य कृतार्थतामगां सजटामण्डलमण्डनं वपुः ॥ ४५ ॥

(प.दी.) नवेति । **वरविद्युद्वलयं** उत्तमविद्युन्मण्डलोपेतं **नवं** नूतनम्, नीलमिति भावः, **अम्बुधरं** मेघं **विडम्बयत्** अनुकुर्वत्, **जगद्गुरोर्वपुः** देहं **अवलोक्य कृतार्थतां** कृतकृत्यतां **अगाम्** । कथम्भूतं वपुः? **सजटामण्डलमण्डनं** जटामण्डलालङ्कारसहितम् । जटा विद्युद्वर्णेति भावः ॥ ४५ ॥

(त.चं.) जटामण्डलमेव मण्डनम् । तेन सहितं वपुः ॥ ४५ ॥

न रमाऽपि पदाङ्गुलीलस-
न्नखधूराजदनन्तसद्गुणान् ।

गणयेद् गणयन्त्यनारतं
परमान् कोऽस्य परो गुणान् वदेत् ॥ ४६ ॥

(भा.प्र.) नखधूराजदिति। 'अत्रोपसृष्टमिति चास्मृतमिन्दिरायाः' इति च॥

(प.दी.) नेति। **रमा अस्य पदाङ्गुलीलसन्नखधूराजदनन्तसद्गुणान्** पदाङ्गुल्यां लसन्नखस्य धुरि व्यापारे राजतः शोभमानान् अनन्तसद्गुणान् **अनारतं** निरन्तरं **गणयन्त्यपि न गणयेत्** साकल्येन गणयितुं न समर्था। 'गण सङ्ख्याने' इति धातुः। भगवद्गुणक्रियादीनां भगवताऽभिन्नत्वाद् भगवन्नख-धुरोऽप्यगणितानन्तगुणत्वम्। तस्मात् **परः** अन्यः पुमान् **अस्य परमान् गुणान् को वदेत्** साकल्येन ब्रूयात्? न कोऽपीति भावः॥ ४६॥

(त.चं.) धूरिति यानपुरोभाग उच्यते। अत्र तु पुरोभागमात्रम्। नखाग्र-मित्येतत्। धूर्व्यापार इति प्राचीनटीकायाम्। न रमाऽपि गणनां पूरयेत्। तथाहि भागवते–'अत्रोपसृष्टमिति चास्मृतमिन्दिरायाः स्वानां धिया विरचितं बहुसौष्ठवाढ्यम्। मह्यं भवस्य भवतां भजनीयमङ्गं नेमुर्निरीक्ष्य न वितृप्तदृशो मुदा कैः'[३.१६.४२] इति चतुर्मुखवचनम्॥ ४६॥

न कुतूहलिता कुतूहलं तनुमेनामवलोक्य सद्गुरोः।
सनवावरणाण्डदर्शिनो गृहबुद्ध्या मम निष्कुतूहलम्॥ ४७॥

(प.दी.) नेति। यस्मादेवं रमाऽप्यस्यागणितानन्तगुणत्वं दृष्ट्वा कुतूहलिनी तस्मात् **सद्गुरोः एनां तनुमवलोक्य मम कुतूहलिता** कुतूहलयुक्तता **कुतूहलं** आश्चर्यं **न**। कथम्भूतस्य मम? **निष्कुतूहलं गृहबुद्ध्या** गृहमिति बुद्ध्या **सनवावरणाण्डदर्शिनः** अबग्नीरनभोऽहङ्कृन्महत्तत्वगुणत्रयाख्यनवावरणेनोपेतं ब्रह्माण्डं पश्यतः। अथवैवं योजना– **निष्कुतूहलं गृहबुद्ध्या सनवावरणाण्ड-दर्शिनः मम सद्गुरोः** सतां गुरोः **एनां तनुमवलोक्य नकुतूहलिता** कुतू-हलित्वाभावः **कुतूहलम्** इति। नकुतूहलितेति नसमासेनैकं पदम्। तथा

च भगवत्तनोः सर्वेषां मनोनयनवाचां कुतूहलविषयत्वम् । तां दृष्ट्वा कुतूहलित्वाभाव एव कुतूहलम् । मम त्वेनां तनुं दृष्ट्वा कुतूहलं जायत इत्येतन्न कुतूहलमिति भावः ॥ ४७ ॥

(त.चं.) 'सदिति प्राणः'। तद्गुरोः ॥ ४७ ॥

इति चिन्तयता महाधिया पदवीं बाह्यगतामतीयुषा ।
स मनोनयनैः पुरा गतस्तत आपे वपुषाऽपि वेदराट् ॥ ४८ ॥

(प.दी.) इतीति । इति 'अगणय्यगुणार्णवोऽमलः स हि नारायण एष केवलम्' इत्यारभ्य **चिन्तयता बाह्यगतां** आश्रमाद् बाह्यप्रदेशगतां **पदवीं** मार्गं **अतीयुषा** अतीत्य गच्छता **महाधिया** श्रीपूर्णप्रज्ञाचार्येण **मनोनयनैः** मनसा नयनाभ्यां च **पुरा** आश्रमप्रवेशात् पूर्वमेव **गतः** प्राप्तः **स वेदराट्** श्रीवेदव्यासः **ततः वपुषा** देहेन **अपि आपे** प्राप्तः । वपुषोऽप्यतिसामीप्यमभूदिति भावः ॥ ४८ ॥

(त.चं.) तत इदानीं वपुषाऽपि स्पर्शक्षम आसीत् ॥ ४८ ॥

गुरुभक्तिभरानताकृतिर्विरचय्याञ्जलिबन्धमञ्जसा ।
क्षणमामुकुळीकृतेक्षणः स गुरुं केवलमभ्यवन्दत ॥ ४९ ॥

(प.दी) गुर्विति । **गुरुभक्तिभरानताकृतिः** गुरुणा भक्तिभरेण आनता प्रवणा आकृतिर्यस्य स तथोक्तः। अत एव **क्षणमामुकुळीकृतेक्षणः** आनन्दाश्रुभिर्मुकुळीकृतनयनः **सः** श्रीमध्वाचार्यः **अञ्जसा अञ्जलिबन्धं विरचय्य केवलं गुरुं** आत्मनो मुख्यगुरुं **अभ्यवन्दत** । 'वदि अभिवादनस्तुत्योः' इति धातुः ॥ ४९ ॥

(त.चं.) केवलं मनसाऽभ्यवन्दत प्रथमम् ॥ ४९ ॥

विनयाभरणेन भूषितः स्फुटमष्टाङ्गविशिष्टचेष्टितः ।
भगवत्तमपादपङ्कजे भगवान् स प्रणनाम भाग्यवान् ॥ ५० ॥

(भा.प्र.) ‘उरसा शिरसा दृष्ट्या मनसा वचसा तथा ।
पद्भ्यां कराभ्यां जानुभ्यां प्रणामोऽष्टाङ्ग ईरितः’ इति च ॥

(प.दी) प्रणामस्तु वक्ष्यते– **विनयेति** । **विनयाभरणेन** विनयाख्यालङ्कारेण **भूषितः स्फुटमष्टाङ्गविशिष्टचेष्टितः** उरश्शिरोदृष्टिमनोवचनपादहस्तजान्वाख्याष्टाङ्गविशिष्टनमस्काराङ्गचेष्टाविशेषयुक्तः **भाग्यवान् भगवान् सः** श्रीमध्वाचार्यः **भगवत्तमपादपङ्कजे** भगवत्तमस्य षड्गुणवतामुत्तमस्य श्रीवेदव्यासस्य चरणारविन्दे **प्रणनाम** ॥ ५० ॥

(त.चं.) विशिष्टचेष्टितः । उरसा शिरसा पद्भ्यां कराभ्यां जानुभ्यां भूमौ दण्डवन्निपत्य । मनसा ध्यायन्ध्यायम् । वचसा स्तावंस्तावम् । दृष्ट्या च तमेव दर्शन्दर्शम् ॥ ५० ॥

स निरीक्ष्य पराशरात्मजः प्रणतं प्रेष्ठमशेषसद्गुणैः ।
करयोर्युगळेन वल्गुना तमुदस्थापयदाशुपातिना ॥ ५१ ॥

(प.दी.) **स** इति । **पराशरात्मजः** पराशरपुत्रः **सः** श्रीवेदव्यासः **अशेषसद्गुणैः प्रेष्ठं** अतिप्रियं **तं** श्रीमध्वाचार्यं **प्रणतं** नमस्कुर्वन्तं **निरीक्ष्य वल्गुना** कोमलेन **आशुपातिना** अतिशीघ्रं प्रसार्यमाणेन **करयोर्युगळेन उदस्थापयत्** उत्थापयामास ॥ ५१ ॥

(त.चं.) वल्गुना । वल संवरणे । वलतीति वल्गु । सरसं दर्शनीयं च । ‘वलेर्गुक् च’[१.१०४] इति दशपादिका । वल्गतीति वा वल्गु । गत्यर्थो हि वल्गतिः पठ्यते ॥ ५१ ॥

अमितप्रमतिं श्रुतीश्वरः परिरेभे परिगृह्य तं द्रुतम् ।
प्रणयामृतपूर्णमानसः स्मितवक्त्रः परिफुल्ललोचनः ॥ ५२ ॥

(प.दी.) अमितेति । **प्रणयामृतपूर्णमानसः** अत एव **स्मितवक्त्रः परिफुल्ललोचनः श्रुतीश्वरः तं अमितप्रमतिं द्रुतं परिगृह्य परिरेभे** ॥ ५२ ॥

(त.चं.) 'आलिङ्गनमुपगूहनमाहुः परिरम्भणं परिष्वङ्गम्' इति च ॥

यमजाम्युदवास[1] ऊर्जितो यदि जाम्बूनदवारि संव्रजेत् ।
कनकद्युतिमध्वसङ्गवानुपमीयेत स तेन नीलभाः ॥ ५३ ॥

(भा.प्र.) उदवासः[2] । 'पेषंवासवाहनधिषु च' इति ककारलोपः ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां सप्तमः सर्गः

—०—

(प.दी.) **यमेति** । **यदि ऊर्जितः** प्रभूतः **यमजाम्युदवाहः** यमस्वसृजलप्रवाहः, 'जामिः स्वसृकुलस्त्रियोः' इत्यमरः । **जाम्बूनदवारि** जाम्बूनदसम्बन्धिजलं **संव्रजेत्** प्राप्नुयात् तर्हि **नीलभाः** नीलकान्तिः **कनकद्युतिमध्वसङ्गवान्** कनकवत् पिङ्गलद्युतिमध्वसङ्गवान् **सः** श्रुतीश्वरः **तेन** यमुनाजलेन सङ्गत-जाम्बूनदवारिणा **उपमीयेत** । अभूतोपमेयम् ॥ ५३ ॥

(त.चं.) यमजाम्युदवासः । 'भगिनी जामिः स्वसा च विज्ञेया' इति च । यमजामिर्यमस्वसा यमुना । तस्या उदवासः उदकस्य वासः आशयः । 'पेषं-वास-वाहन-धिषु च'[६.३.५८] इति उदकस्य ककारो लुप्यते । उदपेषं पिनष्टि । उदकस्य वासः उदवासः । उदकस्य वाहन उदवाहनः । उदकं धीयतेऽस्मिन्नित्युदधिः । 'यमजाम्युदवासः' इत्येव मूलपाठ इति भाति । अथापि 'यमजाम्युदवाहः' इत्येव सर्वास्वपि टीकासु । तदा सूत्रे वाह-शब्दोऽपि वाहनपदेनोपलक्ष्यते ॥ ५३ ॥

यदि राजविभूषणैर्युतौ द्विजवर्यान्वयजाविमौ हरी ।
नृपगोत्रभुवोः पुराऽऽत्मनोः स्फुटतुल्यावुपगूढयोर्मिथः ॥ ५४ ॥

१.'उदवाह–' इति सर्वत्र पाठः । 'उदवास–' इत्येव साधुरिति भाति ।
२.'उदवाहः' इति पाठान्तरम् ।

(प.दी.) यदीति । **द्विजवर्यान्वयजौ** वसिष्ठस्य मध्यगेहाख्यस्य द्विजस्य च वंशयोः जातौ **इमौ हरी** विष्णुवायू **यदि राजविभूषणैः युतौ**, स्यातामिति शेषः, तर्हि **पुरा नृपगोत्रभुवोः** यदुकुरुनृपवंशसम्भवयोः कृष्णभीमाभिधयोः **मिथः** परस्परं **उपगूढयोः आत्मनोः स्फुटतुल्यौ** सम्यक् सदृशौ स्यातामिति सम्बन्धः ॥ ५४ ॥

(त.चं.) हरी विष्णुवायू । 'यमानिलेन्द्रचन्द्रार्ककपिमण्डूकवाजिषु । शुककेशवसिंहांशुवर्णादिषु हरिं स्मरेत्' इति प्रतनः श्लोकः । वर्ण इति कपिलवर्णो रुग्मकपिलो वा ॥ ५४ ॥

इदमाप शुकोऽपि लाळनं न समग्रं जगतां पितुः पितुः ।
अलभिष्ट यदेष धन्य इत्यतिकौतूहलमापि तापसैः ॥ ५५ ॥

(प.दी.) इदमिति । धन्यः कृतार्थः **एषः यत् लाळनं** सम्भावनां **अलभिष्ट** लेभे **समग्रमिदं लाळनं शुकोऽपि जगतां पितुः** जगज्जनकात् **पितुः** स्वपितुः सकाशात् **नाप इति तापसैः** मुनिभिः **अतिकौतूहलं आपि** प्राप्तम् ॥ ५५ ॥

(त.चं.) अलभिष्ट । अनिटमपि कचिद् वेटमिच्छन्ति महान्त इत्युक्तम् । अत एव निर्वहिष्यतीति सुधायाम् । 'अनपेक्षो गुणैः पूर्णो धन्य इत्युच्यते बुधैः' ॥ ५५ ॥

अमुष्य शिष्या विनयेन तस्मै गुरोरभिप्रायविदो विदग्धाः ।
तदाऽनुरूपं ददुरासनं ते चतुर्मुखायेव मुकुन्ददासाः ॥ ५६ ॥

(प.दी.) अमुष्येति । तदा **गुरोरभिप्रायविदः विदग्धाः** चतुराः **ते अमुष्य** श्रीवेदव्यासस्य **शिष्याः विनयेन तस्मै** श्रीमध्वाय **अनुरूपं** स्वामिसम्भावनानुरूपं **आसनं ददुः** । कस्मै क इव? **मुकुन्ददासाः** भगवत्पार्षदाः **चतुर्मुखायेव** ॥ ५६ ॥

(त.चं.) विनयेनोपलक्षिताः । 'उपेन्द्रवज्रा जतजा गौ बाणऋतुभिर्यतिः' ॥

आस्यतामित्युदीर्योपविष्टे
सत्यवत्याः सुते सत्यवाचि ।
नन्दयन् मन्दहासावलोकै-
स्तान् मुनीन्द्रानिहोपाविशत् सः ॥ ५७ ॥

(प.दी) आस्यतामिति । **सत्यवाचि** सत्यवचने **सत्यवत्याः सुते आस्यतामित्युदीर्य उपविष्टे** सति **मन्दहासावलोकैः** मन्दहासयुतैर्दर्शनैः **तान् मुनीन्द्रान् नन्दयन् सः इह उपाविशत्** ॥ ५७ ॥

(त.चं.) नन्दयन् आनन्दयन् । सत्यवाचि । न तामसेष्वपि पुराणेषु मिथ्या वक्ति । न बुद्धादिरूपेष्वपि । अन्यथा हि ग्रहणं श्रोतृशेमुषीदोषादेव भवति । पङ्क्तिभेदस्त्रयी नाम च्छन्दः । रैस्त्रिभिर्गुरुणा च त्रयी भवति ॥

अवगम्य तं मुनिगणा वरिष्ठतो
विधिवद् व्यधुर्विधिविदोऽस्य माननाम् ।
अपि सङ्कथाः श्रुतिसुखाः कवीन्द्रयो-
रनयोर्निशम्य परमां मुदं ययुः ॥ ५८ ॥

(प.दी.) अवेति । **मुनिगणाः वरिष्ठतः** श्रीवेदव्यासात् **तं अवगम्य** श्रीमुख्यप्राणावतारं ज्ञात्वा **विधिविदः** सन्तः **अस्य विधिवत् माननां** पूजां **व्यधुः** चक्रुः । **कवीन्द्रयोः अनयोः श्रुतिसुखाः** श्रोत्रसुखाः **सङ्कथा अपि निशम्य परमां मुदं ययुः** ॥ ५८ ॥

(त.चं.) विधिविदः सत्कारविधानं विदन्तीति । अतिजगती मञ्जुभाषिणी । 'न विच्छिन्ना पदि सजसजगा मञ्जुभाषिणी' ॥ ५८ ॥

सज्ज्ञानायाऽनन्दविज्ञानमूर्ती
प्राप्तौ पृथ्वीमाश्रमे तत्र तावत् ।

जाज्वल्येते विष्णुवायू स्म देवौ
वेदव्यासानन्दतीर्थाभिधानौ ॥ ५९ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते सप्तमः सर्गः

—०—

(प.दी.) सदिति। **सज्ज्ञानाय** सतां ज्ञानाय **पृथ्वीं प्राप्तौ** श्री**वेदव्यासानन्दतीर्थाभिधानौ** **आनन्दविज्ञानमूर्ती** आनन्दज्ञानस्वरूपौ तौ **विष्णुवायू देवौ तत्र आश्रमे तावत्** साकल्येन **जाज्वल्येते स्म** अतितरामशोभेताम् ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां सप्तमः सर्गः

—०—

(त.चं.) सज्ज्ञानाय सतां सात्विकानां सतो नारायणस्य ज्ञानाय । सते निर्दुष्टाय च ज्ञानाय । शालिनी त्रिष्टुप् । 'शालिनी मतता गौ च यतिः श्रुतितुरङ्गमैः' इति ॥ ५९ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याचख्यौ सप्तमं सर्गं सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां
तत्वचन्द्रिकायां सप्तमः सर्गः

—०—

[आदितः श्लोकाः– ३२८+५९=३८७]

अष्टमः सर्गः

[पूर्णप्रज्ञस्य वेदनायकोपसत्तिः । व्यासेन सह नारायणाश्रमं प्रति गमनम् । नारायणदर्शनम् । पूर्णप्रज्ञेन नारायणध्यानम् । तदवताराणां मत्स्यकूर्मादीनामैक्य-चिन्तनम् । नारायणं प्रणम्योपसदनम् । ब्रह्मसूत्राणां भाष्यकरणाय नारायणेनाऽदेशः । पूर्णप्रज्ञेन तदाश्रम एव वासेच्छाप्रकटनम् । सज्जनोद्दिधीर्षया गन्तव्यमिति नरायणादेशः ।]

प्रतिभाप्रभाप्रमुखसद्गुणैर्निजै-
रतिविस्मयं नियमिनां मनो नयन् ।
पुरुधीः कदाचिदथ वेदनायकं
विजने शनैरुपससाद तं वने ॥ १ ॥

(प.दी.) प्रतिभेति । अथ **निजैः** स्वाभाविकैः **प्रतिभाप्रभाप्रमुखसद्गुणैः**, प्रतिभा ज्ञानम्, प्रभा तेजः, एतत्प्रमुखसद्गुणैः **नियमिनां** मुनीनां **मनः अतिविस्मयं नयन्** प्रापयन् **पुरुधीः** श्रीपूर्णप्रज्ञाचार्यः **कदाचित् तं वेदनायकं वने विजने** रहसि **शनैः उपससाद** उपसत्तिमकरोत् । श्रोतव्यभागं श्रोतुं रहस्युपसत्तिमकरोदिति भावः ॥ १ ॥

(त.चं.) प्रतिभा मानसो गुणः । नवन्नवं प्रतिभानम् । प्रभा शारीरः । अतिजगती मञ्जुभाषिण्येव आपश्चाशम् ॥ १ ॥

सुविशेषशेषवदशेषवर्णित-
प्रतिबोद्धुरस्य ननु शिष्यतोचिता ।
गुरुमानसस्य गुरुताऽपि सत्पते-
रिति सोपसत्तिरमरैरमान्यत ॥ २ ॥

(प.दी.) सुविशेषेति । **सुविशेषशेषवदशेषवर्णितप्रतिबोद्धुः** शोभनानां विशेषाणां गोप्यतत्वविशेषाणां शेषवतः अवशेषयुक्तस्य अशेषवर्णितस्य

प्रतिबोद्धुः ज्ञातुः **अस्य गुरुमानसस्य** श्रीपूर्णप्रज्ञाचार्यस्य **सत्पतेः शिष्यता उचिता ननु** । **सत्पतेः** श्रीवेदव्यासस्य **गुरुताऽपि** श्रीमध्वगुरुताऽपि **उचिता इति सा उपसत्तिः अमरैरमान्यत** अपूज्यत । अयं भावः– यद्यपि ब्रह्मादीनां सर्वेषामपि भगवानेव परतत्वं वर्णयति, तथाऽपि ब्रह्मवाय्वोर्यथा वर्णयति न तथा रुद्रादीनाम्; किन्तु कांश्चन विशेषान् [१]अवशेषयित्वैव वर्णयति । तेषां योग्यतायास्तथात्वात् । तस्माद् रुद्रादीनां तत्वकथनावसरे ये सुविशेषाः शोभनतत्वविशेषाः अवशेषिताः तैः भगवतः सुविशेषशेषैर्युक्तमेवाशेषतत्वं वर्णयति ब्रह्मवाय्वोरिति स्थितिः । ततश्चायं मध्वोऽपि वायुत्वात् सुविशेष-शेषवतः शोभनविशेष[शेष]युक्तस्याशेषवर्णितस्य प्रतिबोद्धा । तस्मादेवम्भूत-स्यास्य व्यासशिष्यतोचिता, तस्यापि तद्गुरुतोचितेति सा गुरूपसत्तिः गुरु-प्राप्तिरमरैरमान्यतेति ॥ २ ॥

(त.चं.) सत्पतेः प्राणपतेः । 'प्राणस्य प्राणः' इति च ॥ २ ॥

पुर एव पूरितमपूरयत् पुन-
र्ननु कृष्ण एष परमार्थसङ्ख्यया ।
भगवन्मनः पुरमिवाऽयतं पुरा
निजधाम तां च जगृहे तदद्भुतम् ॥ ३ ॥

(भा.प्र.) कृष्णो देवकीपुत्रश्च । परमार्थसङ्ख्यया परमार्थज्ञानेन, भार-कोट्यादिरूपया च ॥

(प.दी.) **पुर** इति । **एष कृष्णः** श्रीवेदव्यासः **निजधाम** स्वावासस्थानभूतं **आयतं** विस्तीर्णं **भगवन्मनः** श्रीमध्वाचार्यस्य मनः **पुरः** पूर्वं **एव**, 'स्यात् पुरः पुरतोऽग्रतः' इत्यमरः, **परमार्थसङ्ख्यया** परमार्थज्ञानेन **पूरितं** परिपूर्ण-मपि **पुनरपूरयत् ननु** । पूर्वमेव सम्पूर्णज्ञानस्यापि पुनरपि ज्ञानमुपदिदेशेति

१. 'अवशेष्यैव' इति स्वरसम् । 'समर्थयित्वा' इतिवद् वा योजनीयम् ।

भावः । कथमिव? **एष पुरा कृष्णः** वसुदेवसुतः सन् **आयतं निजधाम** स्वमन्दिरं **पुरं** द्वारकां **परमार्थसञ्चयेव** । यावनमागधभौमादीन् निर्जित्याऽहृतया परमया अर्थसञ्चयया भारकोट्यादिरूपया धनसञ्चयेव । **तत्** भगवन्मनः पुरं च **तां** परमार्थसञ्चयां **च जगृहे तदद्भुतम्** । पूर्वं परिपूर्णमपि पुनरानीय निहितं **जगृहे** स्वान्तर्गतं चकारेत्येतदाश्चर्यमिति भावः ॥ ३ ॥

(त.चं.) पूरितं पूर्णम् ॥ ३ ॥

इतिहाससुन्दरपुराणसूत्रसत्-
प्रियपञ्चरात्रनिजभावसंयुतम् ।
अशृणोदनन्तहृदनन्ततोऽचिरात्
परमार्थमप्यगणितागमावलेः ॥ ४ ॥

(प.दी.) इतिहासेति । **अनन्तहृत्** श्रीपूर्णप्रज्ञाचार्यः **अनन्ततः** श्रीवेदव्यासात् **अगणितागमावलेः** अगणितवेदसमूहस्य **परमार्थमपि** उत्तमार्थमपि **अचिरादशृणोत्** । कथम्भूतम्? **इतिहाससुन्दरपुराणसूत्रसत्प्रियपञ्चरात्रनिजभावसंयुतम्** । इतिहासस्य श्रीमहाभारतस्य सुन्दराणां पुराणानां च सूत्रस्य च ब्रह्मसूत्रस्य च सत्प्रियस्य सतां प्रियस्य पञ्चरात्रस्य च निजभावसंयुतं मुख्याभिप्राययुतम् ॥ ४ ॥

(त.चं.) इतिहासपुराणादीनां प्रामाण्यमूरीकुर्वन्तोऽपि पञ्चरात्रस्य केचित् प्रामाण्यं नाभ्युपयन्ति । असन्त एव त इत्याह– सत्प्रियपञ्चारात्रेति । पुराणेष्वपि कानिचिदेव सुन्दराणि । अपराणि त्वसुन्दराणि तामसानीति केचिदनभिज्ञा अवतिष्ठन्ते । अतः सर्वाणि पुराणानि सुन्दराणीत्याह । तामसानीति कोऽर्थः? न हि स्वतस्तामसानि । भगवद्वचनत्वात् । किन्तु मुखतस्तामसार्थप्रत्यायकानि तामसानामिति । सात्विकानां तु सुन्दरमर्थान्तरमन्तर्लीनमवगमय्याऽऽनन्दयन्ति ॥ ४ ॥

ऋजुपुङ्गवस्य परिजानतः स्वयं
सकलं तदप्यलमनन्तजन्मसु ।
स्वकृतोर्वनुग्रहबलादमुष्य तां
विशिशेष शेषशयनः पुनर्धियम् ॥ ५ ॥

(प.दी.) ऋज्विति । **शेषशयनः** श्रीवेदव्यासः **अनन्तजन्मसु** अतीतानन्तजन्मसु **स्वकृतोर्वनुग्रहबलात्** आत्मकृतमहानुग्रहबलात् **तत् सकलमपि** इदानीं श्रूयमाणं सर्वमपि **स्वयं** आत्मना **अलं परिजानतः** स्वप्रतिभाबलेनैव सम्यग् जानतः सतः **अमुष्य ऋजुपुङ्गवस्य तां धियं पुनर्विशिशेष** विशेषयामास । ऋजुपुङ्गवस्येत्यत्र ऋजूनां पुङ्गवः ऋजुपुङ्गव इति षष्ठी-तत्पुरुषो न युज्यते । ऋजूनां सर्वेषामपि समत्वात्, एकस्मादेकस्योत्तमत्वाभावात् । तस्माद् ऋजुश्चासौ पुङ्गवश्चेति कर्मधारय एव युक्तः । पुङ्गवः श्रेष्ठः शिवादिभ्यः इत्यर्थः । अथवा ऋजुशब्दस्य सज्जनवाचित्वमभ्युपेत्य ऋजूनां सर्वसज्जनानां पुङ्गवस्येति वा व्याख्येयम् । वायुर्हि सर्वोत्तमाधिकार्युत्तमः ॥ ५ ॥

(त.चं.) ऋजुपुङ्गवस्य । ऋजुश्चासौ पुङ्गवश्चेति प्राचीनटीका । ऋजूनां पुङ्गव इत्येव स्वरसम् । सत्यं सर्वेऽप्यृजवः समानाः । अथाप्यसमानाः । पदकृतवैशेष्यात् । साधनवैशेष्याच्च । यदि प्रतिकल्पं न कोऽपि विशेषः । ननु भोः किं फलं तर्हि शतकल्पसाधनपरम्परया । आह च पुनर्ग्रन्थकृदत्रैव– 'विशिशेष शेषशयनः पुनर्धियम्' इति । 'स माननीय एव मे' इति चाऽचार्यवचनम् । विशिशेष । शिष्लृ विशेषणे । 'विशेषणं गुणान्तरोत्पादनम्' इति क्षीरस्वामी । 'शिषृ' इत्येके । 'शिष असर्वोपयोगे' वा । 'आसर्वोपयोगे' इति पठन्तो भ्रान्ताः । विपूर्वश्चायमतिशये वर्तते ॥ ५ ॥

अथ बादरायणसहायसम्पदा प्रययौ प्रणन्तुममितान्तरो युतः ।
अपि नादिरायणपदोदितं हरेर्वपुरन्तरं लसितमाश्रमान्तरे ॥ ६ ॥

(प.दी.) अथेति । **अथ बादरायणसहायसम्पदा** बादरायणाख्यसहाय-सम्पदा **युतः** संयुतः **अमितान्तरः** श्रीपूर्णप्रज्ञाचार्यः **आश्रमान्तरे** अन्य-स्मिन्नाश्रमे **लसितं** विराजितं **नादिरायणपदोदितं** नकारादिरायणनामा-भिहितम्, नारायणपदाभिहितमिति यावत्, **हरेर्वपुरन्तरमपि** भगवतो रूपान्तरमपि **प्रणन्तुं प्रययौ** । आश्रमान्तरस्थं नारायणाख्यं भगवद्रूपं प्रणन्तुं श्रीवेदव्यासेन सह प्रययाविति भावः ॥ ६ ॥

(त.चं.) नादिरायणः नरायणः नारायणो वा । 'वासुर्नरायणपुनर्वसु-विश्वरूपाः' इत्यभिधानम् । नादिरा नराः । तेषामयमयनः । अथचानादे रमणस्यायनः । अनादिश्चायं रायण इति नारायणपदसमानार्थकं चेदम् । अमितान्तरः अमितमनाः । लसितम् । लस श्लेषणक्रीडनयोः ॥ ६ ॥

तमपश्यदाश्रमवरे प्रभूतधी-
र्ज्वलनं ज्वलन्तमिव धूमवर्जितम् ।
वरवल्कलाकलितमौञ्जिमेखलं
विलसज्जटावलयमादिपूरुषम् ॥ ७ ॥

(प.दी.) तमिति । **प्रभूतधीः** श्रीपूर्णप्रज्ञाचार्यः **आश्रमवरे** तं नारायणनामानं **अपश्यत्** । कथम्भूतम्? **धूमवर्जितं ज्वलन्तं ज्वलनमिव** । **वरवल्कला-कलितमौञ्जिमेखलम्,** वरेण वल्कलेन आकलिता सम्बद्धा मौञ्जिमयी[1] मेखला यस्य स तथोक्तः तम् । 'वल्कं वल्कलमस्त्रियाम्' इत्यमरः । **विलसज्जटावलयं** विराजमानजटामण्डलोपेतं **आदिपूरुषम्** ॥ ७ ॥

(त.चं.) 'शरो मुञ्ज इति स्मृतः' । कुशसदृशस्तृणविशेषः, येन वटूनां मेखला विरच्यते । मुञ्जनिर्मिताया मेखलाया मौञ्जीति सञ्ज्ञा । मौञ्जी मेखला यस्य स मौञ्जिमेखलः । 'ङ्यापोः सञ्ज्ञाछन्दसोर्बहुलम्' [६.३.६३] इति ङीबन्तस्य सञ्ज्ञायां ह्रस्वः । वलते वल्यते वा वल्कः वल्कलो वा

१.'मौञ्जी मुञ्जमयी' इति मूलपाठः सम्भाव्यते ।

वासो वृक्षत्वग् वा । वल संवरणे । 'शुकवल्कोल्काः'[३.२०] इति दशपादिकायां वल्कशब्दः कप्रत्ययान्तो निपातितः । शोभत इति शुकः । वलत इति वल्कः । ओषतीति उल्का । वल्कं लातीति वल्कल इति क्षीरस्वामी । कलप्रत्यय इत्यन्ये । 'त्वग् वल्कं वल्कलं प्रोक्तम्' इत्यभिधानम् । वल्कयतीति वल्कमित्यपि निर्वदन्ति । 'वल्क परिभाषणे' इति हि पठन्ति ॥ ७ ॥

अतिदुर्जयेन्द्रियजयादिरूपिणा
तपसा वसन्तमिव सन्ततं वने ।
निजरूपभूतनिरपेक्षनिर्मल-
प्रचुरात्मसौख्यरतमप्यनारतम् ॥ ८ ॥

(प.दी.) पुनरपि कथम्भूतमित्यपेक्षायामाह–**अतीत्यादि** । **सन्ततं** निरन्तरं **अतिदुर्जयेन्द्रियजयादिरूपिणा** अत्यन्तं जेतुमशक्यानां इन्द्रियाणां जयादिरूपिणा इन्द्रियनिग्रहाद्यात्मकेन **तपसा वने वसन्तमिव** । ब्रह्मचर्यादितपःक्लेशमनुभवतीत्यज्ञप्रतीतिरेवेति वक्तुमिवेत्युक्तम् । तर्हि वस्तुतः कथम्भूतोऽयमित्यपेक्षायामाह– **निजरूपेत्यादिना** । **अनारतं** निरन्तरं **निजरूपभूतनिरपेक्षनिर्मलप्रचुरात्मसौख्यरतमपि** । निजरूपभूते स्वस्वरूपभूते निरपेक्षे बाह्यविषयापेक्षारहिते निर्मले परिमितत्वादिदोषरहिते प्रचुरे परिपूर्णे आत्मसौख्ये स्वसुखे रतमपि । एवम्भूतमपश्यदित्यन्वयः ॥ ८ ॥

(त.चं.) इन्द्रियजयादिकं रूपयति निरूपयतीति इन्द्रियजयादिरूपिणा तपसा हेतुना । तपसोपलक्षितं वा । स्वरूपभूतं प्रचुरं निरवधिकमात्मसौख्यम् ॥ ८ ॥

नयनद्वयेन नळिनप्रभामुषा
परिफुल्लताविलसितेन विस्मयात् ।
तमवेक्ष्य धर्मजमधर्मदुर्लभं
मनसेति भूरितरमानसोऽस्मरत् ॥ ९ ॥

(प.दी.) नयनेति। **भूरितरमानसः** श्रीपूर्णप्रज्ञाचार्यः **परिफुल्लताविलसितेन** परिफुल्लतया शोभमानेन अत एव [**नळिनप्रभामुषा**] विकसितनळिन-प्रभामुषा **नयनद्वयेन अधर्मदुर्लभं** अधर्मेण प्राप्तुमशक्यं **तं धर्मजं** यमसूनुं श्री-नारायणं **अवेक्ष्य मनसा विस्मयात् इत्यस्मरत्** ॥ ९ ॥

(त.चं.) अपूर्वदर्शनजनिताद् विस्मयाद् या परिफुल्लता तया विल-सितेन। फुल्ल विकसने। विस्मयादवेक्ष्य वा। विस्मयादस्मरद् वा। अधर्म-दुर्लभम्। अधर्मेण अधर्मभिर्वा दुर्लभम्। 'धर्मादनिच् केवलात्' [५.४.१२४]। अविद्यमानो धर्म एषामित्यधर्माणः। मनसाऽस्मरत्। ननु मनसैव स्मर्यते? तर्हि नयनाभ्यामेवावेक्ष्यते। न वक्तव्यं नयनद्वयेनेति। अवेक्ष्ये-त्येव पर्याप्तम्। न पर्याप्तम्। विशिशेषयिषति हि नयनद्वयं नळिनप्रभा-मुषेति। कथं विशेष्यमनुपादाय विशेषयेत्। तर्हीदमपि विशेषणगर्भमिति गृहाण। भूरितरेण स्मरणदक्षेण मनसाऽस्मरदिति। यतो भूरितरमानसः। अथवा किमाहोपुरुषिकया? प्रथमं कायिकं कर्मोक्तम्। अथ मनसा किं चकारेतीदानीमाह– मनसाऽस्मरत् ॥ ९ ॥

जगतां चतुर्दशतयं चतुर्मुख-
प्रमुखैर्युतं प्रळयमानिनाय यः।
सममुल्लसन् कमलयैव केवलं
परमः स एष हि पुराणपूरुषः ॥ १० ॥

(प.दी.) जगतामिति। **केवलं कमलयैव समं** सह **उल्लसन् यः चतुर्मुख-प्रमुखैर्युतं जगतां चतुर्दशतयं** चतुर्दशभुवनाश्रयजगद्द्विसप्तकम्। चतुर्दश-तयमिति 'सङ्ख्याया अवयवे तयप्' इति तयप्प्रत्ययः। **प्रळयमानिनाय** प्रापयामास। **परमः** उत्तमः **पुराणपूरुषः** अनादिपुरुषः **सः** सर्वसंहारस्य कर्ता **एष हि** पुरोवर्ती यमसूनुतयाऽवतीर्णो हि ॥ १० ॥

(त.चं.) चतुर्दश अवयवा अस्येति चतुर्दशतयम् । 'सङ्ख्याया अवयवे तयप्'[५.२.४२] इत्युक्तम् ॥ १० ॥

त्रिगुणाकृतिप्रकृतितो गुरुं तत-
स्त्रिविधामहङ्कृतिममर्त्यखान्यतः ।
अपि भूतपञ्चकमितोऽण्डमण्डलं
भगवानसाविह जगन्ति चासृजत् ॥ ११ ॥

(प.दी.) न केवलमयं संहर्ता किन्तु स्रष्टाऽपीत्याह– **त्रिगुणे**त्यादिना । **भगवान्** षड्गुणसम्पन्नः **असौ** पुराणपुरुषः **त्रिगुणाकृतिप्रकृतितः** सत्वादि-गुणत्रयात्मिकायाः प्रकृतेः **गुरुं** महत्तत्वं तदभिमानिनं ब्रह्माणमपि **असृजत्** । **ततः** महत्तत्वाभिमानिब्रह्मणः **त्रिविधां** वैकारिकतैजसतामसभेदेन त्रिविधां **अहङ्कृतिं** अहङ्कारतत्वं तदभिमानिनं रुद्रं **चासृजत्** । **अतः** त्रिविधाहङ्कारात् **अमर्त्यखानि** अमर्त्यान् देवान् खानि इन्द्रियाणि **भूतपञ्चकमप्यसृजत्** । तत्रायं भावः– वैकारिकादहङ्काराद् दशेन्द्रियाभिमानिदेवानसृजत् । तैजसाहङ्काराद् दशेन्द्रियाण्यसृजत् । तामसाहङ्कारात् शब्दादितत्तद्गुणैः सहाऽकाशादिपञ्चभूतान्यसृजदिति । **इतः** मिळितेभ्य एतेभ्यः **अण्डमण्डलं** ब्रह्माण्डं **असृजत्** । **इह** अस्मिन् ब्रह्माण्डे **जगन्ति च** द्विसप्तकलोकान् लोकिनश्च **असृजत्** ॥ ११ ॥

(त.चं.) गुरुं जगद्गुरुं ब्रह्माणं प्राणं च । म्रियन्त इति मर्ता एव मर्त्याः । अमर्त्यान् इन्द्रियाभिमानिनः । खानीन्द्रियाणि च । 'खमक्षमिन्द्रियं स्रोतो हृषीकं करणं स्मृतम्' ॥ ११ ॥

विधिवायुवीन्द्रशिवकौशिकेशका-
नमरामरानुगनरासुरादिकान् ।
सृजति प्रपालयति हन्ति सन्ततं
स्वगतिं प्रयापयति चैष लीलया ॥ १२ ॥

(प.दी.) विधीति । एष भगवान् **विधिवायुवीन्द्रशिवकौशिकेशकान्** विधिवायुवीन्द्रशिवकौशिकाः ब्रह्मवायुगरुडरुद्रपुरन्दराः, 'वृद्धश्रवाः कौशिकः' इति हलः, ईशकाः स्वामिनो येषां अमरादीनां तथोक्ताः, स्वार्थे कप्रत्ययः, भगवत एव सर्वस्वामित्वादीषत्स्वामिन इत्यर्थे वा, तान् **अमरामरानुगनरासुरादिकान्,** अमरा देवाः, अमरानुगा गन्धर्वाः, नरा मनुष्याः, असुराश्च आदयो येषां ते तथोक्तास्तान् । **सन्ततं** प्रवाहरूपेणाखण्डितं **सृजति प्रपालयति हन्ति** । सृष्टिकाले सृजति, प्रळयकाले हन्ति, तन्मध्ये परिपालयतीति भावः । तत्रोत्तमजीवान् **स्वगतिं प्रयापयति च,** चशब्दादसुरान् तमश्च प्रापयति । एतत् सर्वं च **लीलया,** नतु क्लेशेनेति भावः ॥ १२ ॥

(त.चं.) अमरानुगा देवभृत्याः । गन्धर्वा अप्सरसः सिद्धाश्चारणा विद्याधराः किन्नरादयश्च । सर्गे सृजति । प्रळये हन्ति । स्थितौ सृजति च हन्ति च प्रपालयति च । तदेव भगवतः प्रपालनम् । यत् सृष्ट्वाऽपि पालयति । हत्वाऽपि पालयति । स्वयोग्यां गतिं च प्रयापयति । केषाञ्चिन्निर्बाणम् । केषाञ्चिन्नित्यनिरयम् । केषाञ्चित् त्रिदिवनिरयभूगोचरं निरन्तरपरिभ्रमणम् ॥

अगणय्यसद्गुणगणो विदूषणः
स्ववशाखिलोऽप्यनुपचारतः स्वयम् ।
स्मृतिकीर्तनप्रणतिभिर्विमुक्तये
स्वजनस्य यात्ययमनेकरूपताम् ॥ १३ ॥

(प.दी.) अगणय्येति । **अगणय्यसद्गुणगणः** अपरिगणितसाधुगुणसमूहः **विदूषणः** निर्दोषः **अनुपचारतः** मुख्यतः **स्वयं** आत्मना स्वसामर्थ्येनैव **स्ववशाखिलोऽपि** स्वाधीनसमस्तकोऽपि **स्मृतिकीर्तनप्रणतिभिः** स्वावताररूपगुणकर्मणां स्मरणादिभिः **स्वजनस्य** स्वभक्तजनस्य **विमुक्तये** मोक्षाय **अयमनेकरूपतां** बहुरूपतां **याति** । न त्वेकेनैव रूपेण सर्वकार्याक्षमत्वादित्यर्थः ॥ १३ ॥

(त.चं.) अगणय्यसद्गुणगणः । ननु किमिदं क्रियासमभिहारेणोच्यते अगणय्यअगणय्येति । किमिति नोच्यते महता कण्ठेन– 'अगणेयसद्गुणगणः' इति? गणयितुं योग्यं गणेयं गणनीयं च भवति । गणयितुं शक्यं गणय्यं भवति। अयोग्यमप्यगम्यागमनं शक्यं भवति। भगवद्गुणा अप्ययोग्या गणयितुम्। नावैधत्वात्। किन्त्वशक्यत्वात्। तदिदमवगमयितुं क्रियासमभिहारेण सतात्पर्यमाह– अगणय्यगुणो भगवानिति । आकूतमवगतम् । पदार्थः साधुः । पदं त्वसाधु । अयि साधो पठ्यतां तर्हि 'क्षय्य-जय्य-गणय्याः शक्यार्थे' इति। पठेम नाम । अपितु पाणिनीयम्मन्याः कुप्यन्ति । किमित्यकारणं कुप्यन्ति? अपठितानपि पाणिनिना पाश्चात्याः पठन्ति प्रयोगानुगुण्याय । तद् यथा– 'अक्षादूहिन्यां वृद्धिर्वक्तव्या' इति । अत्रापि नञः परो गणधातुरुपसङ्ख्यायताम्। मा स्म भूद् गणय्य इति। स्यादेवागणय्य इति । व्याकरणेष्वधीती भवान्। सर्वशास्त्रेष्वधीती तत्रभवान् ग्रन्थकारः । महतां प्रयोगशरणा हि वैयाकरणाः । अथापि कुप्यन्ति । कामं कुप्यन्तु । जानन्ति ते किमपि तान् प्रति नैष यत्नः । विदूषणः । अविदूषणो वा । यानि गुणपूर्णताविरोधीनि दूषणानि तान्यस्मिन् न सन्ति । यानि बहुभुक्त्वादीनि लोके दूषणानि तान्यस्य न दूषणानि। तेनाविदूषण इत्याह । स्मृतिकीर्तनप्रणतिभिः । उपलक्षणं नवलक्षण्या अपि भक्तेः । 'श्रवणं कीर्तनं विष्णोः स्मरणं पादसेवनम्। अर्चनं वन्दनं दास्यं सख्यमात्मनिवेदनम्' इति ॥ १३ ॥

चतुराननाय चतुरः पुराऽगमान्
प्रददावसावनिमिषेश्वरः प्रभुः ।
विनिहत्य हि श्रुतिमुषं पुरातनं
वपुषोद्धतं हयमुखेन सद्रिपुम् ॥ १४ ॥

(भा.प्र.) अनिमिषेश्वरो मत्स्येश्वरो हयमुखेन वपुषोद्धतमसुरं निहत्य। सुरेश्वरो हयग्रीवेण वपुषा मधुम् ॥

(प.दी.) चतुराननायेति । **असौ प्रभुः पुरा अनिमिषेश्वरः** मत्स्येश्वरः मत्स्यरूपः सन्निति भावः, **हयमुखेन** हयस्य मुखमिव मुखं यस्य तद्धयमुखं तेन **वपुषा उद्धतं श्रुतिमुषं** वेदांश्चोरयित्वा हृतवन्तं **पुरातनं सद्रिपुं** सतां रिपुं हयग्रीवासुरं **विनिहत्य चतुराननाय** ब्रह्मणे **चतुरः आगमान्** वेदान् **प्रददौ हि**। इतः परं 'परमात्मने सततमेकरूपिणे'[४२] इत्येतच्छ्लोकपर्यन्तं श्लोकानामर्थद्वयं योजनीयम्। **प्रभुरसौ अनिमिषेश्वरः** देवानामीश्वरः **हयमुखेन वपुषा** हयग्रीववपुषा हयग्रीवरूपेणावतीर्णः सन् **श्रुतिमुषमुद्धतं** उद्धृतं पुरातनं **सद्रिपुं** मधुं **विनिहत्य चतुराननाय** चतुरो वेदान् **प्रददौ** ॥

(त.चं.) इतः सप्तविंशत्या श्लोकैः भगवदवतारान् स्मरति । एकैकेन श्लोकेन द्वौद्वाववतारौ । प्रथमतः मत्स्यं च हयग्रीवं च । 'अनिमिषा देवास्तथा दैवतम्' इत्यभिधानम् । 'अनिमिषश्च मीनः शकली शल्की च विज्ञेयः' इति च । श्रुतिमुषम् । मुष स्तेये ॥ १४ ॥

अमरेन्द्रवैरिभुजदण्डमण्डल-
प्रतिकर्षपुष्करपतद्धरोद्धृतिः ।
विदधे वराहवपुषाऽमुनोर्मिमत्-
सृतिसिन्धुकच्छपतयाऽऽप्तरक्षिणा ॥ १५ ॥

(भा.प्र.) अमराणामिन्द्रवैरिणां च, अमरेन्द्रवैरिणो हिरण्याक्षस्य च। धरस्य गिरेः, धराया भुवश्च। वराहवान् पुष्णातीति स्वभावकथनम्, वराहो वपुश्चास्य। वीचिमद्व्याप्तिके समुद्रे कूर्मतया । गर्भीभावजननवृद्धिपरिणामापक्षयविनाशाख्योर्मिमत्संसृतिसमुद्रस्य कच्छं मोक्षं च पाति॥

(प.दी.) अमरेति । **वराहवपुषा** वरश्चासावाहवश्चेति वराहवः उत्तमयुद्धं पुष्णातीति वराहवपुष् । स्वरूपकथनमेतत् । अर्थान्तरघटनार्थं च । तेन वराहवपुषा **आप्तरक्षिणा** शरणागतपालकेन **अमुना** नारायणेन **ऊर्मिमत्सृति-सिन्धुकच्छपतया,** ऊर्मिमती तरङ्गवती सृतिर्व्याप्तिः यस्य सः ऊर्मिमत्सृतिः,

ऊर्मिमत्सृतिश्चासौ सिन्धुश्चेति ऊर्मिमत्सृतिसिन्धुः तस्मिन्, कच्छपतया कूर्मतया, 'कूर्मः कमठकच्छपौ'[१] इत्यमरः, तरङ्गयुक्तव्याप्तिमति समुद्रे कूर्मत्वेन **अमरेन्द्रवैरिभुजदण्डमण्डलप्रतिकर्षपुष्करपतद्धरोद्धृतिः**। अमराणां देवानाम्, इन्द्रवैरिणां असुराणां च, भुजदण्डमण्डलैः दोर्दण्डसमूहैः, प्रतिकर्षेण आकर्षणेन पुष्करे जले, 'पुष्करं करिहस्ताग्रे वाद्यभाण्डमुखे जले। व्योम्नि खड्गफले पद्मे तीर्थौषधिविशेषयोः' इत्यमरः, पततः धरस्य मन्दरपर्वतस्य, 'धरः कूर्माधिपे गिरौ' इति हेमचन्द्रः, उद्धृतिः उद्धरणं **विदधे** अकारि । **ऊर्मिमत्सृतिसिन्धुकच्छपतया** गर्भीभावजन्मवृद्धिपरिणामक्षयविनाशाख्यषडूर्मिमतः सृतिसिन्धोः संसारसमुद्रस्य कच्छपतया, कच्छस्य पारस्य, मोक्षस्येति यावत्, 'तीरं कूलं तटं कच्छः' इति हलः, तस्य पालकतया **आप्तरक्षिणा** शरणागतमोक्षदानेन शरणागतरक्षिणा **अमुना** श्रीनारायणेन **वराहवपुषा** वराहस्वरूपेण सता **अमरेन्द्रवैरिभुजदण्डमण्डलप्रतिकर्षपुष्करपतद्धरोद्धृतिः**। अमरेन्द्राणां वैरिणः हिरण्याक्षस्य भुजदण्डमण्डलाभ्यां प्रतिकर्षेण पुष्करे जले पतन्त्याः निमज्जन्त्याः धरायाः भुवः उद्धृतिः **विदधे** ॥ १९ ॥

(त.चं.) अथ कूर्मवराहावाहत्य स्तौति। भुजदण्डानां मण्डलेन, मण्डलाकाराभ्यां भुजदण्डाभ्यां च । वराहव+पुषा, वराह+वपुषा च । यद्यपि कच्छपतया न वराहवान् पुष्णाति । अथापि सर्वाण्यपि विशेषणानि सर्वेष्वपि रूपेषु समानानीति दर्शयितुं स्वभावकथनमेतत् । 'अस्ति, जायते, वर्धते, विपरिणमते, अपक्षीयते, नश्यति' इति षडूर्मयः ॥

नरसिंह एष विददार दारुणं
प्रतिघोदये नखर[प्रतिघोदयेन खर]चक्रतेजसा ।
स्वरिपुं क्षणेन सरसः स्फुरत्तनुं
पृथुसत्त्वमिष्टजनभीतिभञ्जनः ॥ १६ ॥

---

१. 'कूर्मे कमठकच्छपौ' इति प्रचलितः पाठः ।

(भा.प्र.) नरसिंहः पुरुषोत्तमश्च। कोपोदये सति नखरमण्डलपराक्रमेण। कोपोदयेन खरचक्रतेजसा च। सरसः सवीर्यः। कासाराच्च। पृथुस्थैर्यं स्वस्य रिपुं दैत्यं च। पृथुभूतं सत्वं स्वकीयस्य रिपुं नक्रं च॥

(प.दी.) नरेति। एषः श्रीनारायणः **नरसिंहः** नरसिंहरूपः सन् **सरसः** सवीर्यः, 'शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः' इत्यमरः, **प्रतिघोदये** कोपोदये सति, 'रोषः प्रतिघ उच्यते' इति हलः, **नखरचक्रतेजसा** नखसमूहसामर्थ्येन **स्फुरत्तनुं** चलत्तनुं शोभमानदेहं वा, **पृथुसत्त्वम्**, 'द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुषु' इत्यमरः, महाबलं **दारुणं** क्रूरं **स्वरिपुं** हिरण्यकशिपुं **क्षणेन विददार**। **नरसिंहः** पुरुषोत्तमः **एष** श्रीनारायणः **दारुणं** क्रूरं **स्वरिपुम्**, स्वकीयो गजेन्द्रः, तस्य रिपुम्, **स्फुरत्तनुं पृथुसत्त्वं** महाप्राणिविशेषं नक्रं **प्रतिघोदयेन** स्वरिपुरयमिति कोपोदयेन **सरसः** ह्रदात्, आकृष्येति यावत्, **खरचक्रतेजसा** क्रूरसुदर्शनतेजसा **क्षणेन विददार**। कथम्भूतः? **इष्टजनभीतिभञ्जनः** ॥ १६ ॥

(त.चं.) अथ नरसिंहतापसौ। तापसो हि गजेन्द्रं मोचयति पुरा। तथाहि भागवते– 'चतुर्थ उत्तमभ्राता मनुर्नाम्ना च तापसः। हरिरित्याहुतो येन गजेन्द्रो मोचितो ग्रहात्' [८.१.१६] इति। 'चक्रेण नक्रवदनं विनिपाट्य तस्माद्धस्ते प्रगृह्य भगवान् कृपयोज्जहार' [२.७.१६] इति च। प्रतिघोदये सति नखरचक्रतेजसा नरसिंहः। प्रतिघोदयेन निमित्तेन खरचक्रतेजसा च तापसः। खनेर्डो वक्तव्यः। न खन्यत इति नखो नखं वा। खनेर्डरो वक्तव्यः। न खन्यत इति नखरो नखरं वा। स्फुरत्तनुं भयकम्पिताङ्गम्। स्फुर चलने। सीदन्त्यत्र क्रौर्यादय इति सत्त्वम् ॥ १६ ॥

अपि वामनो ललितबाल्यवानयं
प्रतिभाबलेन कृतदैत्यकौतुकः।
उपधेरधःकृतबलीन्द्रशात्रवः
स्वजनाय केवलमदात् परं पदम् ॥ १७ ॥

(भा.प्र.) वामनरूपकोऽपि अधःकृतबलिनामकासुरः स्वजनाय इन्द्राय पद-मदात्। बुद्धरूपो वामनोऽल्पशरीरो भूत्वा जिनस्य पुत्रतां प्रकाश्य अधःकृत-बलवदसुरः स्वजनायैव मोक्षमदात्॥

(प.दी.) अपीति। अयं श्रीनारायण एव **ललितबाल्यवान्** **वामनोऽपि** वामनाख्यावतारोऽपि सन् **प्रतिभाबलेन** बुद्धिबलेन **कृतदैत्यकौतुकः** उत्पादितदैत्यविस्मयः **उपधेः** त्रिपदच्छलात् **अधःकृतबलीन्द्रशात्रवः** त्रैलोक्याधिपत्याद् विमोच्य अधःकृतमहाबल्याख्येन्द्रशत्रुः **स्वजनाय** स्वभक्तजनायेन्द्राय **केवलं** मुख्यं **परं** उत्तमं **पदं** त्रैलोक्याधिपत्याख्यमिन्द्रपदम् **अदात्**। **अयं** नारायणो **वामनो** बालरूपः जिनस्य पुत्रतां प्रदर्श्य **ललितबाल्यवान्** कोमलबाल्ययुक्तः **प्रतिभाबलेन** बुद्धिबलेन **कृतदैत्यकौतुकः** कृतजिनादिदैत्यविस्मयः **उपधेः** व्याजेन 'विश्वमसत् क्षणिकं विज्ञानं शून्यमभावः' इत्युक्त्वा तान् मोहयित्वा **अधःकृतबलीन्द्रशात्रवः** नित्यनिरये पातितबलवज्जिनादीन्द्रशत्रुः **स्वजनाय** देवादिस्वभक्तजनाय **केवलं परं पदमदात्**। विश्वमसत् क्षणिकं विज्ञानमित्यादिशब्दानां स्वाभिमतार्थमुक्त्वा सर्वस्य स्वाधीनत्वबुद्धिं स्वस्य सर्वस्मादुत्तमत्वबुद्धिं चोत्पाद्य देवानां मोक्षमदादिति भावः॥ १७॥

(त.चं.) अथ वामनबुद्धौ। उपधेः। 'व्याजश्छद्मोपधिश्छलम्' इत्यभिधानम्। बलिर्नाम इन्द्रशात्रवः इन्द्रशत्रुः। 'द्वेषी वैरी च शात्रवः' इति च। बलिन इन्द्रशात्रवाश्च। 'बुद्धो नाम्ना जिनसुतः' इति भागवते। 'शुद्धोदनेत्येव जिनेति चोक्तः' इति चाऽऽचार्याः। केवलं दुःखाद्यसम्भिन्नम्॥ १७॥

कथयन्त्यमुं परशुभासमानगो-
हतमर्त्यदेवतमसं मुहुर्मुहुः।
जगतां हितं हरिमिवापरं हरिं
गुरुशक्तितापसवरान्वयोद्भवम् ॥ १८॥

(भा.प्र.) अमुं महाशक्तेस्तापसवरस्य भृगोरन्वयोद्भवं श्रीरामं कथयन्ति। त्रिलोकगुरोः शक्तितापसवरस्य च श्रीवेदव्यासम्। हरिमिव अर्कमिव। परशुरेव भासमानरश्मिरस्य। मर्त्यदेवा राजान एव तमः। पराः शुभाश्चासमानाश्च गावो वाचः। मर्त्यानां देवानां तमस्त्वज्ञानम्॥

(प.दी.) **कथयन्ती**ति। **अमुं** श्रीनारायणं **गुरुशक्तितापसवरान्वयोद्भवम्,** गुरुशक्तेः महाशक्तेः, तापसवरस्य भृगोः, अन्वयोद्भवं वंशेऽवतीर्णं **कथयन्ति**। कथम्भूतम्? **मुहुर्मुहुः** त्रिसप्तकृत्व इति यावत्, **परशुभासमानगोहतमर्त्यदेवतमसम्,** परशौ कुठारे भासमानाभिः गोभिः तेजोभिः निहतं मर्त्यदेवतमः क्षत्रियाख्यान्धकारः येन स तथोक्तः, तम्। पुनः कथम्भूतम्? **जगतां** स्वभक्तजगतां **हितं** सुखदम्। कमिव? **गुरुशक्तितापसवरान्वयोद्भवम्,** गुरोः महर्षीणां गुरोः, शक्तितापसवरस्य शक्तिनाम्नो मुनिवरस्य, अन्वयेऽवतीर्णम्, **अपरं हरिमिव** श्रीवेदव्यासमिव। कथम्भूतम्? **परशुभासमानगोहतमर्त्यदेवतमसम्,** पराभिरुत्तमाभिः, शुभाभिः शोभनाभिः, असमानाभिः गोभिः वाग्भिः हतं निहतं मर्त्यानां देवानां तमः अज्ञानं येन स तथोक्तः, तम्। अत एव **जगतां हितम्**। पुनः कथम्भूतं कमिव? **गुरुशक्तितापसवरान्वयोद्भवम्,** गुरुशक्तेः महाशक्तिमतः, तापसवरस्य काश्यपस्यान्वयोद्भवं **अपरं हरिमिव** सूर्यमिव। कथम्भूतम्? पराभिः शुभाभिरसमानाभिः गोभिः तेजोभिः निहतं मर्त्यानां देवानां च तमः अन्धकारो येन स तथोक्तः, तम्। अत एवान्धकारनिरोधात् **जगतां हितम्**॥ १८॥

(त.चं.) अथ भार्गवबादरायणौ। परशु +भासमान+गो +हत+मर्त्यदेव +तमसं श्रीभार्गवम्। पर+शुभ+असमान+गो+हत+मर्त्य+देव+तमसं च श्रीवेदव्यासम्। भार्गवो हरिः सूर्य इव। परशुरेव भासमानगौः प्रकाशमानरश्मिरिव। मर्त्यदेवा राजान एव तमांसीव। 'गौः स्वर्गे च बलीवर्दे रश्मौ च' इति च। परविद्यारूपा शोभना असमाना च गौर्वाणी

बादरायणस्य। तेन हतं मर्त्यानां च देवानां च तमोऽज्ञानम्। गुरुशक्तेस्तापसवरस्य भृगोरन्वयोद्भवो भार्गवः। शक्तिनाम्नस्तापसवरस्य बादरायणः। 'सूर्योऽपि परैरुत्तमैः शुभैरसमानैश्च गोभी रश्मिभिर्हतमर्त्यदेवतमाः। गुरुशक्तेस्तापसवरस्य मरीचेरन्वयोद्भवः काश्यपाददित्यां जातः' इत्यादि प्राचीनटीकासु। वस्तुतस्तु गोहततमस्कता हरेः सूर्यस्य धर्मः। तद् भार्गवे बादरायणे च हरौ समन्वीयते परशुभेत्यादि। तथाहि भावप्रकाशिका– 'परशुरेव भासमानरश्मिरस्य। मर्त्यदेवा राजान एव तमः। पराः शुभाश्चासमानाश्च गावो वाचः। मर्त्यानां देवानां तमस्त्वज्ञानम्' इति ॥ १८ ॥

करुणाकरः स वसु[सवसु]देवमोददो
भगवान् पुरा[ऽ]हिमकरान्वयेऽभवत्।
जितवान् दिशो दशरथो[दश रथो]ऽग्र्यसम्पदो
जनको बभूव भुवि यस्य वैरिहा ॥ १९ ॥

(भा.प्र.) सवसूनां देवानां मोददः पूर्वमहिमकरान्वयेऽभवत् श्रीरामः। यस्य जनको दशरथः। स हिमकरान्वयेऽभवत् श्रीकृष्णः। यस्य रथो दश दिशो जितवान् अग्र्याणां सम्पदां जनको बभूव॥

(प.दी.) करुणेति। **करुणाकरो भगवान् पुरा भुवि अहिमकरान्वये** सूर्यवंशे **अभवत्**। कथम्भूतः? **सवसुदेवमोददः** वसुभिः सहितानां देवानां मोदप्रदः। **यस्य** अहिमकरान्वयोद्भवस्य हरेः **दशरथो जनकः** पिता **बभूव**। कथम्भूतो जनकः? **अग्र्यसम्पदः** उत्तमसम्पदुपेताः **दिशो जितवान् वैरिहा** शत्रुहा। **स करुणाकरः पुरा हिमकरान्वये** सोमवंशे **अभवत्**। कथम्भूतः? **वसुदेवमोददः** वसुदेवस्य मोदप्रदः। **यस्य** वसुदेवसुतस्य **रथः अग्र्यसम्पदः** उत्तमैश्वर्यस्य **जनकः** उत्पादको **बभूव**। कथम्भूतो रथः? **दश दिशो जितवान् वैरिहा** च। तच्च 'न केशवरथे कश्चित् स्थितो याति पराभवम्' इति वचनात् सिद्धम् ॥ १९ ॥

(त.चं.) अथ रामकृष्णौ प्रस्तूयेते । 'करुणाकरः–'[१९] इत्यादिभिः 'अथ भार्यया–'[३४] इत्यन्तैः षोडशभिः श्लोकैः । स+वसु+देव+मोददः रामः । वसुदेव+मोददः स कृष्णः । कथं सवसूनां देवानाम् ? वसवोऽपि देवाः । सत्यम् । वसवो देवा एव । अथापि न वसव एव देवाः । तर्हि रुद्रा अपि आदित्या अपि पृथग् गृह्येरन् । रुद्रा देवा एव । आदित्या देवा एव । अथापि न रुद्रा एव देवाः । नाऽदित्या एव देवाः । किमस्ति शृङ्गं वसूनामिति? अस्ति शृङ्गम् । श्लेषोपयोगो हि वसुग्रहणे भवति । न रुद्रादिग्रहणे । अथवा नात्राष्टावपि वसव उच्यन्ते । किन्तु वसुप्रधानोऽग्निरुच्यते । 'वैश्वानरोऽग्निर्वसुः' इत्यभिधानम् । साग्निकानां देवानामित्युक्तं भवति । नन्वग्निरपि देवः? सत्यम् । कार्यविशेषसूचनाय पृथग् ग्रहणम् । कपित्वेनावतीर्णानां सर्वेषामपि देवानां मोददः । अग्नेरुद्धतायाः सीतायाः स्वीकारेण विशेषतोऽग्नेर्मोदद इति । अथवा नात्र वसव उच्यन्ते । किन्तु वसूनि । 'धनं हिरण्यं च वसु विभवः' इत्यभिधानम् । सविभवानां देवानामित्युक्तं भवति । किमविभवा अपि देवा भवन्ति? रावणेन हृतविभवा अभवन् । रामेण पुनः सविभवा अभवन्नितीदमुच्यते सवसूनां देवानां मोदद इति । पुरा अहिमकरान्वये सूर्यवंशे रामः । हिमकरान्वये च चन्द्रवंशे कृष्णः । यस्य रामस्य जनको दशरथः अग्र्यसम्पदो दिशो जितवान् । यस्य कृष्णस्य रथः अग्र्यसम्पदः जनकः सम्पादकः दशापि दिशो जितवान् । ननु कथं दिशो जीयन्ते? वैरिणां हननेनेत्याह– वैरिहा ॥ १९ ॥

भुजगेश्वरोऽपि भुवनेश्वरप्रियः
समजन्यथारिदरजन्म भुव्यभूत् ।
तममुष्य कान्तिविजितेन्दुमग्रजं
रमणीयमाहुरिह रामनामकम् ॥ २० ॥

(भा.प्र.) अथ शङ्खचक्रजन्म भरतशत्रुघ्नत्वेन । अरीणां भयजन्म च । तममुष्य लक्ष्मणस्याग्रजं श्रीराममाहुः । अमुष्य कृष्णस्य च ॥

(प.दी.) भुजगेति । **भुवनेश्वरप्रियः भुजगेश्वरः** शेषः **अपि समजनि** लक्ष्मणनामा जज्ञे । **अथ** तदनन्तरं **भुवि अरिदरजन्म** चक्रशङ्खाभिमानिनोः कामतत्पुत्रयोः भरतशत्रुघ्नत्वेन जन्म **अभूत्** । इह एतेषां मध्ये **अमुष्य** लक्ष्मणस्य **अग्रजं तं** भगवन्तं **रामनामकं** श्रीरामनामानं **आहुः** । कथम्भूतम्? **कान्तिविजितेन्दुं** मुखकान्त्या विजितेन्दुम् । अत एव **रमणीयम्** । **भुवनेश्वरप्रियः भुजगेश्वरोऽपि समजनि,** शेषोऽपि बलभद्रत्वेन जातः । **अथ** हरिशेषयोरवतारानन्तरं **अरिदरजन्म** अरीणां भगवद्द्वेषिणां दरस्य भयस्य जन्म **अभूत्** । **अमुष्य** वसुदेवसुतस्य **अग्रजं तं** शेषावतारं **रामनामकमाहुः** । **कान्तिविजितेन्दुं** शुभ्राङ्गमिति यावत् । **रमणीयं** दर्शनीयम् ॥

(त.चं.) भुजगेश्वरः लक्ष्मणः समजनि । अथ लक्ष्मणजननानन्तरमरेश्चक्रमानिनो भरतस्य दरस्य शङ्खमानिनो शत्रुघ्नस्य च जननमभूत् । अमुष्य लक्ष्मणस्याग्रजं रामनामकमाहुः । अनेन भरतं लक्ष्मणाग्रजं वदन्तः परास्ताः । ननु महाभारततात्पर्यनिर्णयटीका भावप्रकाशिकाऽपि भरतं लक्ष्मणाग्रजं निर्दिशति । सर्वग्रन्थविरुद्धं कथं निर्दिशेत्? निर्विवादं प्रक्षिप्तमेतत् । इयर्ति शत्रूनित्यरिश्चक्रम् । ऋ गतौ । इयर्ति विरोधमित्यरिः शत्रुः । द्रियत आद्रियत इति दरः शङ्खः । दृङ् आदरे । दरणं दरो भयम् । दॄ भये । भुजगेश्वरोऽपि समजनि पुरा । तममुष्य कृष्णस्याग्रजं बलरामनामकमाहुः । अथानयोर्जननान्तरं भुवि अरीणां भयं जातमिति ॥ २० ॥

जनकेन सोऽथ विरहासहिष्णुना
मुहुरीक्षितो[१] वनमनीयत प्रभुः ।
चकितेन दुष्टजनतस्तपस्विना
तत आसुरीं निशिचरीं जघान सः ॥ २१ ॥

---

१. 'जनकेन मुहुराद्दतः' इति भावप्रकाशिकानुसारेण 'मुहुराद्दतो वनमनीयत' इत्येव मूलपाठ इति भाति । टीकासु सर्वत्र 'मुहुरीक्षितः' इत्येव पाठः ।

(भा.प्र.) तपस्विना विश्वामित्रेण वनमनीयत, जनकेन मुहुरादृतः। जनकेनानीयत। दुष्टजनो मारीचादिः, कंसश्च। निशिचरीं ताटकाम्, पूतनां च॥

(प.दी.) जनकेनेति। अथ **प्रभुः** स रामः **दुष्टजनतः** राक्षसाख्यदुष्टजनात् **चकितेन** भीतेन **तपस्विना** विश्वामित्रेण **वनमनीयत** नीतः। कथम्भूतः? **विरहासहिष्णुना** पुत्रविरहमसहमानेन **जनकेन** पित्रा दशरथेन **मुहुरीक्षितः** दृष्टः। **ततः स** रामः **आसुरीं** असुरवर्गजातां **निशिचरीं** निशाचरीभूतां ताटकां **जघान**। **अथ प्रभुः स** कृष्णः **दुष्टजनतः** दुर्जनात् कंसात् **चकितेन तपस्विना जनकेन** पित्रा वसुदेवेन **वनं** नन्दगोपावासभूतं वनं **अनीयत**। कथम्भूतः? **विरहासहिष्णुना जनकेन मुहुरीक्षितः**। **ततः स** कृष्णः **निशिचरीं** रात्रिसञ्चारिणीं **आसुरीं** असुरस्वभावां पूतनां **जघान** ॥ २१ ॥

(त.चं.) तपस्विना विश्वामित्रेण वनमनीयत। तपस्विना तपःशीलेन, कंसाद् भीततयाऽनुकम्पनीयेन वा जनकेन वसुदेवेन वृन्दावनमनीयत। अवनमुद्दिश्य मुहुर्मुहुरीक्षितः सन् जनकेनानीयतेति वा। 'मुहुरादृतो वनमनीयत प्रभुः' इत्यपि पाठः सम्भाव्यते। 'जनकेन मुहुरादृतः' इति हि भावप्रकाशिका। चकितेन। चक तृप्तौ प्रतिघाते च। चकति चकते वा॥

मुनिसप्ततन्तुकृतवैरबन्धनं
कटुकेश्यरिष्टपदमुख्यदुर्जनम्।
क्षपयन्तमुद्यतसुबाहुमाहवे
तमथाभ्यनन्ददमरादिसद्गणः ॥ २२ ॥

(भा.प्र.) मुनीनां सप्ततन्तुर्यागः, सजटा सन्ततिश्च। क्रूरकेशवन्तमशुभस्थानं मुख्यं दुर्जनम्, उद्यतं सुबाह्वाख्यं राक्षसम्। केश्यरिष्टनामादिदुर्जनं क्षपयन्तम्, उद्यतसुन्दरहस्तम्॥

(प.दी.) मुनीति। अथ **अमरादिसद्गणः** देवादिसज्जनसमूहः **मुनिसप्ततन्तु-**

कृतवैरबन्धनम्, मुनीनां सप्ततन्तौ यज्ञे कृतवैरबन्धनं कृतवैरानुसन्धानम्, मुनियज्ञविरोधिनमिति यावत्, **कटुकेश्यरिष्टपदमुख्यदुर्जनम्,** कटुकेशी क्रूरकेशयुक्तः, तं कटुकेशिनम्, अरिष्टपदं अशुभस्याऽस्पदभूतम्, मुख्यदुर्जनं दुर्जनानां रक्षसां मुख्यम्, **उद्यतसुबाहुं** आत्मना योद्धुमुद्यतं सुबाहुनामानं राक्षसं **आहवे** युद्धे **क्षपयन्तं** नाशयन्तं तं श्रीरामं **अभ्यनन्दत्** । **अथ अमरादिसद्गणः मुनिसप्ततन्तुकृतवैरबन्धनम्,** मुनीनां सप्ततन्तौ, सया जटया सहिते सप्ते तन्तौ सन्ततौ कृतवैरबन्धनम्, 'चेरुश्च ते बालवधे सदोद्यताः' इत्यादिना बालघातिनमित्यर्थः, **कटुकेश्यरिष्टपदमुख्यदुर्जनम्,** कटुं क्रूरं केश्यरिष्टपदमुख्यं केश्यरिष्टपदौ केश्यरिष्टनामानौ तौ मुख्यौ यस्य कंसपरिवारभूतस्य दुर्जनस्य सः कटुकेश्यरिष्टपदमुख्यदुर्जनः, तं दुर्जनं **क्षपयन्तं** नाशयन्तं श्रीकृष्णं **अभ्यनन्दत्** । पुनः कथम्भूतम्? **आहवे युद्धे उद्यतसुबाहुं** उद्यतशोभनबाहुम् ॥ २२ ॥

(त.चं.) मुनेर्विश्वामित्रस्य मुनीनां वा सप्ततन्तौ यज्ञे कृतवैरबन्धनम् । 'सप्ततन्तुर्मखोऽध्वरः' इत्यभिधानम् । सप्तभिस्तन्यते विस्तीर्यत इति सप्ततन्तुः । कैः सप्तभिः? सप्तभिश्छन्दोभिर्गायत्र्यादिभिः, सप्तभिर्जिह्वाभिरग्नेः काळ्यादिभिः, सप्तभिरध्वरप्रभेदैरग्निष्टोमादिभिः । कानि सप्त च्छन्दांसि? गायत्री, उष्णिक्, अनुष्टुप्, बृहती, पङ्क्तिः,त्रिष्टुप्, जगती च सप्त च्छन्दांसि । काः सप्त जिह्वाः? काळी, कराळी, मनोजवा, सुलोहिता, सुधूम्रवर्णा, स्फुलिङ्गिनी, विश्वरुची च सप्त जिह्वाः । के च सप्ताध्वरप्रभेदाः? अग्निष्टोमः, अत्यग्निष्टोमः, पृष्ठ्यः, षोळशी, वाजपेयः, अतिरात्रः, आप्तोर्याम इत्यध्वरप्रभेदाः । अथ च मन्यन्ते जानन्ति अथापि न व्याहरन्तीति मुनयः । कंसभयादकृतप्रतिरोधा धृतमौनाः । 'मनेरुच्च' [१.५१] इति दशपादिका । मनेरिन् प्रत्ययो भवति मनिः, अकारस्य चोकारः, तेन मुनिः । मुनीनां सप्ततन्तुः । सया जटया सहितस्तन्तुः सप्ततन्तुः । सजटा बालसन्ततिः । अकृतचूडाकर्माणो हि बालाः सप्ता भवन्ति । कटुकेशी अराळोदग्र-

कराळकेशः, अरिष्टपदमशुभस्थानम्, 'अरिष्टमशुभे' इत्यभिधानम्, दुर्जनेषु मुख्यः प्रधानश्च । तादृशं यज्ञभङ्गायोद्यतायुधं सुबाहुम् । अथ च केशीति अरिष्ट इति पदं नाम ययोस्तौ केश्यरिष्टपदौ तन्मुख्यं दुर्जनं क्षपयन्तमुद्यत-सुन्दरबाहुं श्रीकृष्णम् ॥ २२ ॥

सवने[स वने]विकस्वरगुणस्वरद्विजे
स्फुरिते चरन् सकलगोकुलप्रियः ।
इतकामतापसरसार्द्रधीगिरः
प्रतिलाळयन्नरमतैष सुन्दरीः ॥ २३ ॥

(भा.प्र.) सवने यज्ञे । स कृष्णो वने । गावो नयनानि च । प्राप्तकामानां तापसानां स्नेहार्द्रधीगिरो रमणीर्भद्राः । प्राप्तकामतापाः सरसा आर्द्रधीगिरो गोपिकाश्च ॥

(प.दी.) स इति । **सकलगोकुलप्रियः** सर्ववेदसमूहप्रियः एष रामः **विकस्वर-गुणस्वरद्विजे,** विकस्वराः शोभमानाः, गुणस्वराः भक्त्यादिगुणाः वेदोच्चार-णाङ्गभूता उदात्तादिस्वराश्च येषां ते विकस्वरगुणस्वराः, तैः द्विजैः युक्ते **स्फुरिते** विराजमाने **सवने** विश्वामित्रादियज्ञे **चरन्** विघ्ननिरासाय तत्रतत्र सञ्चरन् **सुन्दरीः** रमणीयाः, श्रोत्रप्रिया इति यावत्, **इतकामतापसरसार्द्रधी-गिरः,** इतकामस्य निर्विघ्नं यज्ञनिष्पत्त्या प्राप्तवाञ्छितस्य तापसस्य विश्वा-मित्रस्य रसार्द्रधीगिरः स्नेहार्द्रधिया उक्ता गिरः वचनानि, 'त्वत्प्रसादा-दस्मद्यज्ञनिष्पत्तिरभूत्' इत्यादिरूपाणि विश्वामित्रवचनानि **प्रतिलाळयन् अरमत** रेमे । **स एष** वसुदेवसुतोऽयं कृष्णः **विकस्वरगुणस्वरद्विजे,** विकस्वरः शोभमानः गुणः यस्य सः विकस्वरगुणः, विलसन्माधुर्याख्यगुण इति भावः, विकस्वरगुणः स्वरः कूजितं येषां ते विकस्वरगुणस्वराः द्विजाः पक्षिणो यस्मिन् तद् विकस्वरगुणस्वरद्विजं तस्मिन्, **स्फुरिते** चन्द्रिकया विराजमाने **वने** वृन्दावने **चरन्** सञ्चरन् **अरमत** । कथम्भूतः? **सकलगोकुलप्रियः** समस्त-

गोसमूहस्य प्रियः । अथवा गोकुलं नाम नन्दादिगोपावासभूमिः, तत्प्रिय इति वा। तस्मिन् पक्षे गोकुलशब्देन तद्गतजन्तवोऽभिप्रेताः। पुनः कथम्भूतः? **इतकामतापसरसार्द्रधीगिरः**, इतः प्राप्तः कामतापः स्मरनिमित्तस्तापः सन्तापो याभिस्ताः इतकामतापाः, सरसार्द्रधीगिरः रसार्द्रधिया स्नेहार्द्रबुद्ध्या गीर्भिश्च रसार्द्रैर्वचनैश्च सहिताः सरसार्द्रधीगिरः, इतकामतापाश्च ताः सरसार्द्रधीगिरश्चेति इतकामतापसरसार्द्रधीगिरः ताः एवम्भूताः **सुन्दरीः** गोपाङ्गनाः **प्रतिलाळयन्** रमयन्निति भावः ॥ २३ ॥

(त.चं.) विकस्वरगुणस्वरद्विजे । विकस्वराः विकासशीलाः । व्यक्ता इत्येतत् । गुणाः स्पाष्टयसौष्ठवादयः यत्र तादृशः स्वरो येषाम् । ते द्विजा यत्र सवने। विकस्वर इति तच्छीलार्थे वरजित्युक्तम्[1]। सवनरक्षार्थं चरन् । सकलगोकुलप्रियः सकलमुनिजननयनवृन्दानन्दकरः । तथाहि भावप्रकाशिका–'गावो नयनानि च' इति । गच्छन्त्यवगमयन्ति वा रूपमिति स्त्रियां पुंसि वा गावो नयनानि । 'सर्ववेदसमूहप्रियः' इति तु प्रतनटीकायाम् । सुबाहुनिरासेन यज्ञसम्पत्त्या इतकाम+तापस+रसार्द्र+धी+गिरः । इतकामानां विश्वामित्रादीनां तापसानां स्नेहरसार्द्रया धिया बुद्ध्या उदिताः सुन्दरीः रुचिराः गिरः । 'सुन्दरी रुचिरेऽन्यवत्' इत्यभिधानम्। अथ गोकुलप्रियः स कृष्णः वने चरन् । इत+कामताप+सरस+आर्द्र+धी+गिरः । सरसाः व्यक्तशृङ्गारभावाः सरागा वा। प्रणयार्द्रे धीगिरौ यासां ता गोपसुन्दरीः प्रतिलाळयन् प्रत्येकं लाळयन् ॥ २३ ॥

सहजान्वितः सकलमित्रसंयुतो
मधुरां पुरीं जनकवल्लभां गतः[2] ।
प्रविशन्निमां स जगदेकसुन्दरो
नरनार्युदारनयनोत्सवोऽभवत् ॥ २४ ॥

१.उक्तं तृतीये [५]।

२.गतः प्रविशन्निति नातीव भिन्नार्थम्। 'जनकवल्लभां ततः' इत्यपि पाठः सम्भाव्यते।

(भा.प्र.) सकलमित्रसंयुतो विश्वामित्रयुतः, गोपयुतश्च । भद्रां जनकराजवल्लभाम्, मधुरां पितृप्रियाम्॥

(प.दी.) सहजेति। **सहजान्वितः** लक्ष्मणेन युक्तः **सकलमित्रसंयुतः** विश्वामित्रसंयुतः **मधुरां** रम्यां **जनकवल्लभां** विदेहराजप्रियां **पुरीं गतः** । **इमां पुरीं प्रविशन् जगदेकसुन्दरः स** रामः **नरनार्युदारनयनोत्सवः** तत्पुरगतनराणां नारीणां च उदारनयनानां उत्सवः हर्षजनकः **अभवत्** । **सहजान्वितः** बलभद्रसंयुतः **सकलमित्रसंयुतः** सकलैर्मित्रैः संयुतः **जनकवल्लभां** पितुर्वसुदेवस्य प्रियां **मधुरां** मधुरासञ्ज्ञां **पुरीं गतः** । **इमां पुरीं प्रविशन् जगदेकसुन्दरः स** कृष्णः **नरनार्युदारनयनोत्सवः अभवत्** ॥ २४ ॥

(त.चं.) सकलमित्र इति विश्वामित्रः । विश्वस्य मित्रं हि विश्वामित्रः । विश्वं मित्रं यस्य वा। 'मित्रो चर्षौ'[६.३.१३०'] सकलैर्मित्रैर्गोपालैश्च । मधुरां भद्रां जनकराजप्रियां विदेहनगरीम् । पितृप्रियां मधुरां पुरीं च । उदाराणि महान्ति भगवद्दर्शनभाग्यवन्ति नयनानि ॥ २४ ॥

अथ खण्डितेश्वरधनुः स लीलया
क्षपितोग्रसेननृपपुत्रपौरुषः ।
समुपास्य विप्रगुरुमब्जभूगुरुः
स्वजनानमोदयदमेयतेजसा ॥ २५ ॥

(भा.प्र.) ईश्वरधनुः स्वयंवरानीतम्, कंसेन पूज्यमानं च । क्षपितमुग्रसेनानां नृपपुत्राणां पौरुषमनेन धनुर्भङ्गेन। क्षपितः उग्रसेननृपपुत्रोऽपि येन तत् पौरुषमस्य कृष्णस्य। विप्रगुरुः विश्वामित्रः, सान्दीपनिश्च। अमेयेन स्वरूपतेजसा, जरासन्धविजयादिना पराक्रमेण च॥

(प.दी.) अथेति। **अथ** पुरप्रवेशानन्तरं **लीलया** खण्डितेश्वरधनुः खण्डितं भग्नं विदेहेन स्वयम्बरार्थमानीतं ईश्वरधनुः येन स तथोक्तः । अत एव **क्षपितोग्रसेननृपपुत्रपौरुषः** । उग्रा क्रूरा सेना येषां ते उग्रसेनाः, नृपाणां

पुत्राः नृपपुत्राः, उग्रसेनाश्च ते नृपपुत्राश्च उग्रसेननृपपुत्राः, उग्रसेननृपपुत्राणां पौरुषम्, क्षपितं धनुर्भङ्गेन निरस्तं उग्रसेननृपपुत्रपौरुषं येन स तथोक्तः। **अब्जभूगुरुः** ब्रह्मगुरुः **स** रामः **विप्रगुरुं** विश्वामित्रं **समुपास्य अमेयतेजसा** अमेयेन स्वौजसा **स्वजनान्** लक्ष्मणादीन् **अमोदयत्** अतोषयत्। **अथ स** कृष्णोऽपि मधुरापुरीप्रवेशानन्तरं **लीलया खण्डितेश्वरधनुः** खण्डितं ईश्वरधनुः ईश्वरेण कंसाय दत्तं धनुः येन स तथोक्तः। **क्षपितोग्रसेननृपपुत्रपौरुषः**। क्षपितं उग्रसेनाख्यनृपसूनोः कंसस्य पौरुषं येन स तथोक्तः, निहतकंस इति यावत्। **अब्जभूगुरुः स विप्रगुरुं** सान्दीपनिं **समुपास्य अमेयतेजसा** जरासन्धादिजयरूपेणापरिमितसामर्थ्येन। 'तेजः प्रभावे दीप्तौ च बले शुक्रेऽपि' इत्यमरः। **स्वजनान्** वसुदेवादीन् **अमोदयत्** ॥ २५ ॥

(त.चं.) क्षपितोग्रसेननृपपुत्रं नाशितकंसं पौरुषं यस्य। तथाहि भावप्रकाशिका। अब्जभूगुरुरपि स्वयं विप्रगुरुं समुपास्य। तदपि लीलया ॥

कमलामयं कमलपत्रलोचनां
भुवमागतां नृपसुतां गृहीतवान्।
निजलीलया विजितराजशात्रवो
मुदमापदाप्य पुरमब्धिदुर्गमम् ॥ २६ ॥

(भा.प्र.) नृपसुतां सीतां रुग्मिणीं च। राजशात्रवः परशुरामः, राजान एव शात्रवाश्च। अब्धिवद् दुर्गमम्, अब्धिना दुर्गमं च ॥

(प.दी.) **कमलामिति**। अयं रामः **कमलपत्रलोचनां नृपसुतां** विदेहराज्ञः सुतां **भुवमागतां** भुव्यवतीर्णां **कमलां गृहीतवान्** विवाहविधिनाऽङ्गीकृतवान्। स ततः स्वपुरं गच्छन् मार्गे **निजलीलया विजिराजशात्रवः** अज्ञदृष्ट्यपेक्षया विजितभार्गवः **अब्धिदुर्गमं** अब्धिवद्दुर्गमं **पुरं** अयोध्यां **आप्य मुदमापत्**। अथ **अयं** कृष्णोऽपि **कमलपत्रलोचनां नृपसुतां** भीष्मकसुतां **भुवमागतां कमलां गृहीतवान्** बलादपहृत्य गृहीतवान्। **निजलीलया**

विजितराजशात्रवः जरासन्धादिराजाख्यशत्रून् जितवान् सः **अब्धिदुर्गमं** अब्धिना दुर्गमं **पुरं** द्वारकां पुरं **आप्य मुदमापत्** ॥ २६ ॥

(त.चं.) निजलीलया लोकान् विडम्बयन् । राज्ञां शात्रवः शत्रुः परशुरामः । राजानश्च रुग्मिप्रमुखाः शात्रवाः ॥ २६ ॥

स जगाम मातृजनतुष्टये किल
त्वरितो[ऽ]वनं विदधदीप्सितं सताम् ।
सह भार्ययाऽपि शुभया महाजय-
ध्वजलक्ष्मणा[ऽ]ग्र्यसुहृदा विना[ऽ]मुदा ॥ २७ ॥

(भा.प्र.) स जगाम वनम्। स कृष्णः सतामवनं विदधत्। मातृजनः कैकेयी, अदितिश्च । महाजयध्वजेन लक्ष्मणाख्येन अग्र्यसुहृदा । अमुदा विना । महाविजयेन ध्वजचिह्नेन विना गरुडेन च ॥

(प.दी.) **स** इति । **सतां** ऋष्यादीनां **ईप्सितं** वाञ्छितं रावणनिग्रहादिकं **विदधत्** कुर्वन् **स** रामो **मातृजनतुष्टये किल त्वरितो** वेगवान् **वनं जगाम, शुभया भार्यया** सीतया **अपि सह, महाजयध्वजलक्ष्मणाग्र्यसुहृदा,** महतो जयस्य ध्वजभूतेन लक्ष्मणाख्येन अग्र्यसुहृदा उत्तमसुहृदा, अमुदेति च्छेदः, **अमुदा** दुःखेन **विना,** राज्याभिषेकं विहाय वनं गच्छतोऽस्य न दुःखमिति भावः । **ईप्सितं** आत्मनः अभीष्टं **सतां** ऋष्यादीनां **अवनं** रक्षां **विदधत् स** कृष्णो **मातृजनतुष्टये** नरकासुरेण हृतकुण्डलायाः अदित्यास्तुष्टये **त्वरितो मुदा जगाम किल** । नरकासुरेणोपद्रुतानां बदरिकाश्रमवासिनां मुनीनां रक्षां कर्तुमदितितुष्टये च नरकवधार्थं जगामेति भावः । **शुभया भार्यया** सत्यया **अपि सह । अग्र्यसुहृदा महाजयध्वजलक्ष्मणा** महाजयार्थस्य ध्वजस्य लक्ष्मणा चिह्नभूतेन **विना** पक्षिणा गरुडेन सह । 'लाञ्छनं लक्ष्म लक्षणम्'[1] इत्यमरः ॥ २७ ॥

---

१. 'लाञ्छनं च चिह्नं लक्ष्म च लक्षणम्' इत्यमरपाठः । 'लाञ्छनं लक्ष्म लक्षणम्' इति हलायुधः ।

(त.चं.) त्वरितो वनं जगाम रामः । सतामवनं विदधत् त्वरितो जगाम प्राग्ज्योतिषं कृष्णः । महाजय+ध्वज+लक्ष्मण+अग्र्यसुहृदा । महाजयस्य ध्वजेनेव उन्नतेन लक्ष्मणेन अग्र्यसुहृदाऽपि सह । विना अमुदा । तथाहि रामायणे– 'न वनं गन्तुकामस्य त्यजतश्च वसुन्धराम् । सर्वलोकातिगस्येव दृश्यते चित्तविक्रिया' इति । अथच अग्र्यसुहृदा महाजय+ ध्वज+ लक्ष्मणा महाजयेन रथध्वजलाञ्छनभूतेन विना गरुडेन, गरुडारूढः सन् मुदा जगाम ॥ २७ ॥

समतीतपर्वतपुरोगदुर्गमः
खरदूषणादिसुजनद्विषो बहून् ।
स निहत्य विश्वभयदं सुदुस्सहं
नरकं महातम उतानयत् क्रमात् ॥ २८ ॥

(भा.प्र.) पर्वतादिदुर्गमस्थानानि, गिरिदुर्गादीनि च । खरदूषणादीन् राक्षसान् विनिहत्य महातमो नरकमनयत् । क्रूरदोषान् आदिदैत्यान् मुरादीन् निहत्य नरकदैत्यं च महातमोऽनयत् ॥

(प.दी.) **समतीतेति** । स रामः **समतीतपर्वतपुरोगदुर्गमः** अतिक्रान्तचित्रकूटादिदुर्गमस्थानः सन् **बहून्** अनेकान् **खरदूषणादिसुजनद्विषः** खरदूषणप्रभृतीन् सज्जनद्वेषिणः **निहत्य**, **क्रमात्** प्रारब्धभोगानन्तरमिति भावः, **महातमः** महातमःसञ्ज्ञकं **नरकं** **उत** **अनयत्** प्रापयामास । कथम्भूतम्? **विश्वभयदं** श्रवणमात्रेण सर्वेषां भयप्रदम्, **सुदुस्सहं** अतिदुःखरूपत्वात् सुदुस्सहम् । **समतीतपर्वतपुरोगदुर्गमः** अतिक्रान्तनरकासुरपुरावरणभूतगिरिजलपाशदुर्गः स कृष्णो **बहून्** **खरदूषणादिसुजनद्विषः** खरदूषणान् क्रूरदोषान् आदिसुजनद्विषः आदित उत्पन्नान् दैत्यान् मुरादीन् **निहत्य** **क्रमात्** **नरकमुत** नरकासुरमपि **निहत्य** **महातमः** **अनयत्** । कथम्भूतम्? **विश्वभयदं** **सुदुस्सहम्** । उक्त एवार्थः ॥ २८ ॥

(त.चं.) खरदूषणान् प्रखरदोषान् आदिसुजनद्विषो मुरादीन् निहत्य तानपि नरकमुत नरकासुरमपि महातमोऽनयत् । 'उतापी द्वौ च बाढार्थौ' इत्यभिधानम् । नरकासुरोऽपि विश्वभयदः सुदुःसहः । महातमोऽपि विश्वभयदं सुदुःसहम् ॥ २८ ॥

रुचिराश्रमाजिरचिताग्र्यतेजसा
प्रियया प्रियो भुवनमान्यया समम् ।
भृशमाकुलीकृतमदप्रमादवत्-
सुरपारिजातहृदवाप धाम सः ॥ २९ ॥

(भा.प्र.) सुन्दराश्रमप्राङ्गणसम्बद्धतेजसा सीतया, अश्रमाजौ रचितोरुपराक्रमया सत्यया च । आकुलीकृतसुरपालकारिसमूहहृत्, सुराणां पारिजातहृत् । धाम तेजः, गृहं च ॥

(प.दी.) रुचिरेति । भृशं अतितरां **आकुलीकृतमदप्रमादवत्सुरपारिजातहृत्**, युद्धे आकुलीकृतं मदप्रमादवत् ऐश्वर्यादिमदेन प्रमादेन विस्मरणेन च युक्तम्, सुरपारिजातम्, सुरपस्य देवाधिपस्य इन्द्रस्य अरिजातं शत्रुनिकरं राक्षससमूहं हृतवान् संहृतवानिति आकुलीकृतमदप्रमादवत्सुरपारिजातहृत्, **प्रियः** स्वभक्तप्रियः **स** रामो **रुचिराश्रमाजिरचिताग्र्यतेजसा** रुचिराश्रमस्य शोभनस्याऽश्रमस्य, अजिरे प्राङ्गणे, 'अङ्गणं चत्वराजिरे' इत्यमरः, शोभनाश्रमप्राङ्गणे चितं सम्बद्धं अग्र्यं तेजो यस्याः सा रुचिराश्रमाजिरचिताग्र्यतेजाः, तया **भुवनमान्यया प्रियया** भार्यया सीतया **समं धाम** तेजः **अवाप** । **स** कृष्णोऽपि **धाम** गृहं द्वारकाख्यं **अवाप** । कथम्भूतः? **भृशं आकुलीकृतमदप्रमादवत्सुरपारिजातहृत्**, पारिजातोद्धरणेन आत्मना आकुलीकृतानां मदप्रमादवताम्, ऐश्वर्यादिमदेन, प्रमादेन अयं कृष्णोऽस्मत्स्वामी नारायण इत्येतद्विस्मरणेन च, युक्तानां सुराणां पारिजातमपहृतवान् इति तथोक्तः, **प्रियः** भक्तप्रियः, असुराविष्टांस्तान् विबोध्य

तेषां प्रियो भूत्वेति भावः । **भुवनमान्यया प्रियया** सत्यया **समं धाम अवाप** । कथम्भूतया? **रुचिराश्रमाजिरचिताग्र्ययतेजसा** रुचिरायां शोभमानायां अश्रमायां श्रमरहितायामाजौ युद्धे, पारिजातहरणसमये देवैस्सह क्रियमाणे युद्धे, रचिताग्र्यतेजसा प्रकटिताग्र्यसामर्थ्यया ॥ २९ ॥

(त.चं.) रुचिर+आश्रम+अजिर+चिताग्र्यतेजसा । रुचिर+अश्रम+आजि+रचिताग्र्यतेजसा च । आकुलीकृत+मद+प्रमादवत्+सुरप+अरिजात+ हृत् । सुर+पारिजात+हृत् च । आकुलं मदेन प्रमादि च सुरपस्येन्द्रस्यारिजातम् । अनिरीक्षितेन प्रसङ्गेन आकुलीकृतानां भोगमदेन प्रमादिनां सुराणां पारिजाततरुम् । 'तेजस्यपि धाम स्यात्' इति च ॥

हरितामधीशनरदेवमण्डलं
दशकं विजित्य परभीषणं मुहुः ।
स्फुरितामिह प्रियतमां निजश्रियं
भगवानुपैक्षत हरन्तमप्रियम् ॥ ३० ॥

(भा.प्र.) निजां श्रियं सीतां हरन्तं दशकं दशाननम्, हरितामधीशानां नराणां देवानां च मण्डलं विजित्य परभीषणमन्यभयङ्करम् । निजानां पाण्डवानां श्रियं हरन्तं सुयोधनम् । हरितां दशकमधिकेशनरदेवसमूहं विजित्य स्फुरिताम् ॥

(प.दी.) हरितामिति । **भगवान्** रामः इह आश्रमे **स्फुरितां** विलसितां **निजश्रियं प्रियतमां** सीतां **हरन्तमप्रियं** शत्रुं **दशकं** दशशिरसं **उपैक्षत** न निरुद्धवान् । कथम्भूतं दशकम्? **हरितां** दिशां **अधीशनरदेवमण्डलम्** अधीशानां नराणां देवानां च मण्डलं समूहं **मुहुर्विजित्य परभीषणं** अन्येषां भयङ्करम्, शत्रूणां वा । **भगवान्** कृष्णो **निजश्रियं** निजानां पाण्डवानां श्रियमैश्वर्यं **हरन्तं** द्यूतेनापहरन्तं **अप्रियं** सुयोधनं **उपैक्षत** । कथम्भूतां श्रियम्? **हरितां** दिशां **दशकं विजित्य परभीषणं** शत्रुभयङ्करं **अधीशनरदेवमण्डलं** च अधीशानां अधिकैश्वर्ययुक्तानां नरदेवानां राज्ञां मण्डलं समूहं च **विजित्य इह**

इन्द्रप्रस्थे **स्फुरितां** विलसितां **प्रियतमां** अतिशयेनाऽत्मप्रियाम् । स्वभावभक्तानामधिकैश्वर्यं हि भगवत्प्रियम् । 'तद्भोगोऽप्यतीव हरितोषकृत्' इति वचनात् ॥ ३० ॥

(त.चं.) दशकं दशकन्धरम् । 'मुण्डोत्तमाङ्गमस्तकमौळिशिरःशीर्षमूर्धकानि स्युः' । दिगीश्वराणां नराणां राज्ञां देवानां च मण्डलं विजित्य परभीषणम् । रामादन्येनाजेयत्वादन्यभयङ्करम् । अथच अधिकमीशते ये तेषां नरदेवानां राज्ञां मण्डलं यत्र तादृशं शत्रुजनभीषणं दिशां दशकं विजित्य राजसूये स्फुरितां निजानां पाण्डवानां श्रियं द्यूतेन हरन्तं दुर्योधनम् ॥

अभिनन्दितः पवननन्दनादिभिः
स कदाचिदिन्द्रसुतवर्धको गवा ।
निजराज्यमात्मदयिताय दत्तवान्
हरिसूनवे हतविपक्षमुत्तमम् ॥ ३१ ॥

(भा.प्र.) पवननन्दनो हनुमान्, भीमश्च । गवा इन्द्रसुतवर्धकः शरेण वालिच्छेदकः, वाचाऽर्जुनाप्यायकश्च । हरिसूनवे सुग्रीवाय, युधिष्ठिराय च ॥

(प.दी.) अभीति । **पवननन्दनादिभिः** ऋष्यमूके हनूमदादिवानरैः **अभिनन्दितः स** रामः **कदाचित् गवा** बाणेन **इन्द्रसुतवर्धकः** वालिच्छेदकः सन् **आत्मदयिताय हरिसूनवे** सुग्रीवाय **हतविपक्षमुत्तमं निजराज्यं** सुग्रीवस्य विद्यमानं राज्यम्, कपिराज्यमिति यावत्, **दत्तवान्** । **पवननन्दनादिभिः** भीमार्जुनादिभिः **अभिनन्दितः** अज्ञातवासमतीत्य उपप्लाव्ये दृष्ट्वा अभिनन्दितः सन्तोषितः **स** कृष्णः **कदाचित् गवा** हितात्मिकया वाचा **इन्द्रसुतवर्धकः** अर्जुनाप्यायकः । पापबुद्ध्या युद्धान्निवृत्तमपि गीतात्मिकया वाचा विबोध्य युद्धोन्मुखं कुर्वन्निति भावः । **आत्मदयिताय हरिसूनवे** यमसूनवे धर्मजाय **हतविपक्षं** हतधार्तराष्ट्रं **उत्तमं निजराज्यं दत्तवान्** ॥ ३१ ॥

(त.चं.) गवा बाणेन इन्द्रसुतं वालिनं वर्धयति । वर्ध च्छेदनपूरणयोः ।

गवा गीतारूपया इन्द्रसुतमर्जुनं वर्धयति । वृधु वृद्धौ । ज्ञानवृद्धं करोति ज्ञानेन पूरयति वा । अभिगच्छति शत्रूनिति गौर्बाणः । अवगच्छत्यनयेति गौर्वाक् । गच्छत्यालोमभ्य उपयोगमिति गौर्धेनुः । 'गमेर्डोः' [२.११] इति दशपादिका । 'वाग्-दिग्-भू-रश्मि-वज्रेषु पश्वक्षि-स्वर्ग-वाजिषु । नवस्वर्थेषु मेधावी गोशब्दमवधारयेत्' इति हि पठन्ति । वाजी बाणः । अश्व इत्यपि केचित् । वस्तुतस्तु एवं पठनीयमिति भाति– 'वाग्-दिग्-भू-रश्मि-वज्रेषु-पश्वक्षि-स्वर्ग-वाजिषु । दशस्वर्थेषु–' इति । अस्मिन् पाठे इषुरिति बाणः । वाजीत्यश्वः । तथाहि स्कन्दस्वाम्यृग्वेदभाष्ये–'अश्वा इह गाव उच्यन्ते' [१.३८.१] इति । हरिसूनवे सूर्यसूनवे सुग्रीवाय । यमसूनवे युधिष्ठिराय च ॥ ३१ ॥

मुदमाप्य तत्र दयितोरुवार्त्तया
मधुहा मरुत्सुतमुखप्रवृत्तया ।
हरितिग्मचक्रलसितोऽब्धिमध्यगं
प्रययौ स पुण्यजनसेवितं पुरम् ॥ ३२ ॥

(भा.प्र.) दयिताया दयितानां च उरुवार्त्तया, मरुत्सुतमुखेन प्रवृत्तया, मरुत्सुतादिप्रवृत्तया च । हरितिग्मचक्रं वानरतीक्ष्णसैन्यम्, रविवत् तीक्ष्णं चक्रं सुदर्शनं च । राक्षसाः पुण्यजनाश्च ॥

(प.दी.) मुदमिति । तत्र ऋष्यमूके स्थित एव **मधुहा** स रामो **मरुत्सुतमुखप्रवृत्तया** मरुत्सुतमुखेन प्रवृत्तया उक्तयेति भावः, **दयितोरुवार्त्तया** दयितायाः सीतायाः उरुवार्त्तया **मुदमाप्य हरितिग्मचक्रलसितः** वानरात्मकतीक्ष्णसैन्येन लसितः, 'चक्रं सैन्ये जलावर्ते रथाङ्गे चयराष्ट्रयोः । संसारे मण्डले वृत्ते च्छद्मभेदास्त्रभेदयोः' इति यादवः, **अब्धिमध्यगं पुण्यजनसेवितं** राक्षससेवितम्, 'रक्षस्सन्तौ पुण्यजनौ'[१] इत्यमरः, **पुरं** लङ्कां **प्रययौ** । **मधुहा**

१.नेदं सम्प्रत्यमरकोशे पठ्यते ।

स कृष्णः **तत्र** उपप्लाव्ये स्थितः **मरुत्सुतमुखप्रवृत्तया** भीमार्जुनादिभिरज्ञातवासे प्रवृत्तया **दयितोरुवार्त्तया** दयितानां पाण्डवानामुरुवार्त्तया कीचकनिग्रहादि-रूपेणोदन्तेन, 'वार्त्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्' इत्यमरः, **मुदं** सन्तोषं **आप्य हरितिग्मचक्रलसितः** हरिवत् सूर्यवत् तिग्मेन चक्रेण सुदर्शनेन लसितः **अब्धिमध्यगं पुण्यजनसेवितं** पवित्रजनसेवितम्, 'पूञो यत् णट् ह्रस्वश्च'[1] इत्यौणादिकं सूत्रम्, **पुरं** द्वारकां **प्रययौ** । पार्थान् उपप्लाव्ये संस्थाप्य स्वयं द्वारकां प्रययाविति भावः ॥ ३२ ॥

(त.चं.) हनुमन्मुखोदीर्णया दयितायाः सीताया उरुवार्त्तया । भीमप्रमुख-प्रवृत्तया दयितानां पाण्डवानां दयितया चोरुवार्त्तया । 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः' [५.२.१०१] । केचित्तु 'प्रज्ञाश्रद्धार्चाभ्यो णः' इति सूत्रं पठित्वा, 'वृत्तेश्च' इति वार्त्तिकं पठन्ति । प्रज्ञादिभ्यो मतुबर्थे णः प्रत्ययो भवति । प्रज्ञावान् प्राज्ञः । श्रद्धावान् श्राद्धः । अर्चावानार्चः । वृत्तिर्लोकवृत्तम् । तद्वती वार्त्ता । पुण्यजनसेवितं राक्षससेवितं सज्जनसेवितं च । 'अथ पुण्यजनो यक्षे राक्षसे सज्जनेऽपि च' इति । अपुण्यं पुण्यं ब्रूयादिति विरुद्धलक्षणया पुण्यजनो राक्षसः । देवानाम्प्रिय इति यथा । पुण शुभे कर्मणि । अथच पण्यजनं वा सन्तं पुण्यजनं वदन्ति । वर्णविपर्ययेण । पण व्यवहारे ॥

पृथुकुम्भकर्णगजराजमुद्धतं
ससहो[ऽ]दरं सविबुधेन्द्रशात्रवम् ।
धरणीभरं पृथुलचक्रमक्षिणो-
न्निशितेषुचक्रकृतविक्रमः प्रभुः ॥ ३३ ॥

(भा.प्र.) कुम्भकर्णाख्यगजराजमक्षिणोत्, ससहोदरं सरावणम्, सेन्द्रजितम्,

---

१. अत्र बहुधा पाठभेदः । केचित् 'पूञः' इति पठन्ति । केचित् 'पूङः' इति । केचित् 'णट्' इति । केचित् 'णुट्' इति । 'पूङो यण्णुड् ह्रस्वश्च' [दशपा.८.१६] इति तु साधी-यान् पाठः ।

पृथुसैन्यं भुवो भारायितम्। धरणीभरं पृथुसैन्यं च कृष्णः पृथुमस्तककर्णगजराजं ससहः सौजस्कम्, अदरं निर्भयम्, सदैत्यम्। इषूणां चक्रेण, इषुभिश्चक्रेण च ।।

(प.दी.) पृथ्विति। **निशितेषुचक्रकृतविक्रमः** निशितानां इषूणां बाणानां चक्रेण समूहेन कृतपराक्रमः **प्रभुः** स रामः **पृथुकुम्भकर्णगजराजं** स्थूलकुम्भकर्णाख्यगजश्रेष्ठं **अक्षिणोत्** जघान। कथम्भूतम्? **उद्धतं** बलादिमदोद्धतम्, **ससहोदरं** सोदरेण रावणेन सहितम्, **सविबुधेन्द्रशात्रवं** विबुधेन्द्रशत्रुणा इन्द्रशत्रुणा च सहितम्, **धरणीभरं** भूभारायितम्, **पृथुलचक्रं** बहुसैन्योपेतम्। **निशितेषुचक्रकृतविक्रमः** निशितेषुभिः चक्रेण च कृतविक्रमः, अर्जुनादिषु स्थितेनान्तर्यामिरूपेण इषुभिः कृतविक्रमः, स्वयं तु भीष्मं प्रति चक्रेण कृतविक्रमः, **प्रभुः** स कृष्णः **पृथुलचक्रं** पृथुलं बहुलं कौरवसैन्यं **अक्षिणोत्**। कथम्भूतम्? **पृथुकुम्भकर्णगजराजं** स्थूलैः कुम्भस्थलैः कर्णैश्चान्वितैः, गजराजैः युक्तम्, **उद्धतम्, ससहः** ओजसा सहितम्, **अदरं** अभ्यापततः शत्रून् दृष्ट्वाऽपि भयरहितम्, **सविबुधेन्द्रशात्रवं** भुवि नृपादिभावेन जातैः विबुधेन्द्राणां शत्रुभिः दैत्यैरपि सहितम्, अत एव **धरणीभरम्** ।। ३३ ।।

(त.चं.) पृथुकायः कुम्भकर्ण एव गजराज इव। विबुधेन्द्रस्य शात्रवः शत्रुरिन्द्रजित्। पृथुलं चक्रं सैन्यं यस्य तादृशम्। 'वाहिनी बलं सैन्यं चक्रम्' इत्यभिधानम्। इषूणां चक्रं चक्रवाळम्। 'चक्रं चक्रवाळं च मण्डलम्' इति च। अथच पृथुकुम्भैः पृथुकर्णैश्च गजराजैर्युतं कौरवसैन्यम्। ससहः अदरं च।अनभिभवनीयं पौरुषं सहः। अत एव अदरमभयम्। 'सहः प्रतापः पौरुषम्' इति च। 'दरस्त्रासश्च साध्वसम्' इति च। इषुभिः पाण्डवादिषु स्थित्वा, स्वयं चक्रेण सुदर्शनेन अक्षिणोत्। 'ऋ क्षि हिंसायाम्। केचित् 'ऋक्षि' इत्येकं धातुं मन्यन्ते– ऋङ्क्ष्णोति। अपरे धातुद्वयम्– ऋणोति, क्षिणोति। कातन्त्रधातुपाठव्याख्याने दुर्गस्तु 'रि क्षि' इति पठति–रिणोति, क्षिणोति। 'क्षिणु निरसने' इति तु काशकृत्स्नः ।। ३३ ।।

अथ भार्यया हुतवहं प्रविष्टया
सहितः सहोदरपुरस्सरैरपि ।
अयमाप्य धाम चिरमिष्टदः सतां
निजमूलरूपपरमैक्यमेयिवान् ॥ ३४ ॥

(भा.प्र.) हुतवहं प्रविष्टया शपथरूपेण । स्वर्गारोहणकाले रुग्मिण्या च । धाम अयोध्याम्, वैकुण्ठं च ॥

(प.दी.) अथेति। अथ कुम्भकर्णादिवधानन्तरं **हुतवहं प्रविष्टया** शपथार्थमग्निं प्रविष्टया **भार्यया** सीतया **सहोदरपुरस्सरैरपि** लक्ष्मणविभीषणपूर्वकैरपि **सहितः धाम** अयोध्यां **आप्य चिरं सतामिष्टदः** अभीष्टदः **अयं** रामः **निज-मूलरूपपरमैक्यं एयिवान्** प्राप । **अथ** पृथुलसैन्यक्षपणानन्तरं **चिरं सतामिष्टदोऽयं** कृष्णः **हुतवहं प्रविष्टया** स्वर्गारोहणकाले हुतवहं प्रविष्टया **भार्यया** रुग्मिण्या **सहोदरपुरस्सरैरपि** बलभद्रपूर्वकैरपि **सहितः** सन् **धाम** स्वमन्दिरं वैकुण्ठं **आप्य निजमूलरूपपरमैक्यमेयिवान्** ॥ ३४ ॥

(त.चं.) भार्यया सीतया रुग्मिण्या च । ननु कथं रुग्मिणी? 'युजि-रुचि-तिजां कुश्च' [७.३३] इति हि दशपादिका । तेन रोचत इति रुक्मं भवति । रुक्मवती च रुक्मिणी भवति। सत्यम्, रोचत इति रुक्मं भवति । रुजतीति रुग्मं भवति । रुजो भङ्गे । ननु 'युजि-रुचि-तिजाम्' इति सूत्रपाठः, 'न युजि-रुजि-तिजाम्' इति । अनिर्णीतधातुपाठानामनियत-सूत्रपाठानां प्रायः प्रमादोऽयं वैयाकरणानाम् । 'युजि-रुजि–' इत्येव प्रतनः पाठः स्यात् । यदि न पठितस्तथाऽपि रुजतिरुपसङ्ख्येयः । यतः सर्वत्र रुग्ममित्येव प्रतनाः पठन्ति; न रुक्ममिति । 'यदा पश्यः पश्यते रुग्मवर्णम्' इति हि प्राचीनः श्रुतिपाठः । ऐक्यं पूर्वमप्यासीत् । कथं पुनरेयिवान्? पुरा एकोऽपि द्वाविवाऽसीत् । तथा ददृशे । इदानीं दृष्टिगोचरं द्वित्वमपि न बभूव । तदिदमाह– परमैक्यमिति ॥ ३४ ॥

महिदासपूज्यचरणो द्विजादभूद्
विदितात् स विष्णुयशसोऽमलात्मनः ।
इह यो दधे जगति पापशान्तये
बहुधा महेतिमति [बहुधामहेतिमति]दीप्तगोस्थितिम् ॥ ३५ ॥

(भा.प्र.) विदिताद् विष्णुयशोनिमित्तादमलात्मनो द्विजान्महिदासनामा पूज्यचरणोऽभूत् । महिभिर्दासैः पूज्यचरणः कल्की विष्णयशसोऽभूत् । बहुधा प्रकारेण महोपद्रववति जगति स्फुटवाक्यस्थितिं वैष्णवतन्त्रशास्त्रविरचनया । बहुधामहेतिं बहुतेजस्कमायुधम् । अतिदीप्तवज्रवत्स्थितिम् ॥

(प.दी.) **महीति** । **स** भगवान् **विष्णुयशसः** विष्णुयशोनिमित्तात् **अमलात्मनः** विष्णुयशःश्रवणकीर्तनादिना निर्मलचित्तात् **विदितात्** प्रसिद्धात् **द्विजात्** विप्रात् विशालनाम्नः इतरादेव्यां **महिदासपूज्यचरणः** महिदासनामा पूज्यपाद आचार्यः **अभूत्** अवततार । **यः** महिदासाभिधः **महेतिमति** महोपद्रववति **इह जगति पापशान्तये** पापस्य शान्तये क्षयाय **बहुधा** बहुप्रकारेण **दीप्तगोस्थितिं** दीप्तानामतिस्पष्टानां गवां वैष्णवतन्त्रशास्त्ररूपाणां वाचां स्थितिं **दधे** विदधे । 'महिदासाभिधो जज्ञ इतरायास्तपोबलात् । साक्षात् स भगवान् विष्णुर्यस्तन्त्रं वैष्णवं व्यधात्' इति च भागवते[1] । **स** भगवान् **विदितात्** प्रसिद्धात् **अमलात्मनः** शुद्धमनसः **विष्णुयशसः** विष्णुयशोनामकात् **द्विजात्** ब्राह्मणाद् **अभूत्** कल्किनामाऽवततार । कथम्भूतः? **महिदासपूज्यचरणः** महिभिरुत्सवयुक्तैः दासैः दासभूतैः ब्रह्मादिभिः पूज्यमानाङ्घ्रिद्वयः **यः** कल्की **इह** जगति **पापशान्तये** पापानां दस्यूनां क्षयाय **अतिदीप्तगोस्थितिं** अतिदीप्तवज्रवत् स्थितियुक्तां **बहुधामहेतिं** बहुतेजस्कमायुधं **दधे** विदधे प्रयुयोजेति भावः ॥ ३५ ॥

(त.चं.) अथ दशस्ववतारेष्ववशिष्टः कल्की स्तूयते महिदास ऐतरेयश्च ।

---

१. 'भागवततात्पर्ये' इति तु साधुः पाठः ।

विदिताद् विष्णुयशसः विष्णुयशोगाथां विदित्वा निर्मलचित्तात् विशालनाम्नो द्विजात् महिदासाभिधः पूज्यपादो जज्ञे । महितैर्दासभूतैर्देवादिभिरपि पूज्यपादः कल्की विष्णुयशआख्याद् द्विजादभूत् । बहुधा महेतिमति जगति दीप्तगोस्थितिं विदधे महिदासः । ईतिरुत्पातः । 'ईतिरजन्यं च बुधैर्डमरो डिम्बश्च विप्लवः कथितः' इत्यभिधानम् । 'अतिवृष्टिरनावृष्टिर्मूषिकाः शलभाः शुकाः । अत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः' इति । अथच कल्की बहु+धाम+हेतिं अतिदीप्तगोस्थितिं दधे । कुलिशवद् दीप्तस्थितिम्, अत एव बहुधामवतीं हेतिं दधे । 'हेतिः शस्त्रं प्रहरणम्' इति च ॥ ३५ ॥

सुतपोरुचेरयमपापकर्दमा-
न्ननु मानवीतनयतामुपेयिवान् ।
समयेन भूरिनिजभक्तिपूरितान्
समजीजनत् सुमनसः स देवराट् ॥ ३६ ॥

(भा.प्र.) सुतपसो रुचिप्रजापतेः पापपङ्करहितात् । अपापात् कर्दमप्रजापतेः सुतपो-वाञ्छात् । मानवी आकूतिः, देवहूतिश्च । देवराड् इन्द्रः कालेन देवानजीजनत् । स देवश्रेष्ठः सुमनसः सज्जनान् सुभक्तिपूर्णानकरोत् साङ्ख्यसमयेन कृतेन ॥

(प.दी.) सुतप इति । **अयं** भगवान् **अपापकर्दमात्** पापाख्यकर्दमरहितात् **सुतपोरुचेः** सुतपसो रुचिप्रजापतेः **मानवीतनयताम्,** मानवी स्वायम्भुवमनोः सुता आकूतिः, तस्यास्तनयताम्, **उपेयिवान् ननु** अवाप खलु । **स** मानवीतनयो यज्ञनामा **समयेन** कालान्तरेण **देवराट्** इन्द्रः सन् **भूरिनिज-भक्तिपूरितान् सुमनसः** देवान् **समजीजनत्** दक्षिणाख्यायां रमायामुत्पाद-यामास । **अयं** भगवान् **सुतपोरुचेः** शोभनतपसि वाञ्छायुक्तात् । सुतपसि रुचिर्यस्येति विग्रहः । **अपापकर्दमात्** पापरहितात् कर्दमप्रजापतेः **मानवीतनयतां** मनुसुताया देवहूतेस्तनयतां **उपेयिवान्** अवाप **ननु** । **देवराट्** सर्वदेवोत्तमः **स** कपिलवासुदेवनामा सन् **सुमनसः** सुचित्तान् देवमुनिपूर्वान्

सज्जनान् **समयेन** स्वकृतसाङ्ख्ययोगशास्त्रेण **भूरिनिजभक्तिपूरितान्** **समजीजनत्** । आत्मनि भक्तिमुत्पादयामासेति भावः ॥ ३६ ॥

(त.चं.) अथ यज्ञकपिलौ । सुतपसो रुचिप्रजापतेराकूत्यां मानव्यां स्वायम्भुवमनुसुतायां यज्ञः । अपापात् कर्दमप्रजापतेः मनुसुतायां देवहूत्यां कपिलः । यज्ञो देवराडिन्द्रो बभूव समयेन प्रथममन्वन्तरावच्छिन्नेन । तदा सुमनसो देवांस्तुषिताख्यान् समजीजनत् । तथाहि भागवते—'प्रजापतिः स भगवान् रुचिस्तस्यामजीजनत् । मिथुनं ब्रह्मवर्चस्वी परमेण समाधिना । यस्तयोः पुरुषः साक्षाद् विष्णुर्यज्ञस्वरूपधृक् । या स्त्री सा दक्षिणा भूतेरंशभूताऽनपायिनी । आनिन्ये स्वगृहं पुत्र्याः पुत्रं विततरोचिषम् । स्वायम्भुवो मुदा युक्तो रुचिर्जग्राह दक्षिणाम् । तां कामयानां भगवानुवाह यजुषां पतिः । तुष्टायां तोषमापन्नोऽजनयद् द्वादशाऽत्मजान् । तोषः प्रतोषः सन्तोषो भद्रः शान्तिरिडस्पतिः । इध्मः कविर्विभुः स्वप्नः सुदेवो रोचनो द्विषट् । तुषिता नाम ते देवा आसन् स्वायम्भुवान्तरे' [३.४.३-८] इति । समयेन साङ्ख्यसिद्धान्तेन च कपिलः । 'स्मृताः कृतान्तराद्धान्तसिद्धान्त-समयाः समाः' इति च । समीयतेऽनेनेति समयः सिद्धान्तः । इण् गतौ । ई गतावित्यपि पठन्ति ॥ ३६ ॥

सुबृहत्पयोधरमिथःप्रसंहति-
प्रकटीभवत्परमयौवनाकृतिः ।
असुराहितां वरविलासिनी तनुः [वरविलासिनीतनुः]
प्रददावमुष्य सुरराशये सुधाम् ॥ ३७ ॥

(भा.प्र.) वरस्मितादिविलासवती धन्वन्तरितनुः, पयसां धरस्य च परस्परघट्टनात् प्रकटीभवन्ती नवयौवनाकृतिः । [वर]विलासिनीतनुः वरस्त्रीमूर्तिः स्तनपरस्पर-संहत्या स्पष्टयौवनवती आकृतिरस्याः । असुराणामहिताम्, असुरेष्वाहिताम् ॥

(प.दी.) सुबृहदिति । अमुष्य भगवतः सुबृहत्पयोधरमिथःप्रसंहतिप्रकटी-

भवत्परमयौवनाकृतिः । सुबृहतोरतिमहतोः पयसः सागरजलस्य धरस्य मन्दरपर्वतस्य च मिथः परस्परं प्रसंहत्या घट्टनेन प्रकटीभवन्ती आविर्भवन्ती परमयौवनवती आकृतिः स्वरूपं यस्याः सा तथोक्ता । **वरविलासिनी** उत्तमस्मितादिविलासवती **तनुः** धन्वन्तरिरूपम्, **असुराहिताम्**, असुराणामहिताम्, तेषामयोग्यामिति यावत्, **सुधां सुरराशये प्रददौ**[१] । सुबृहतोः पयोधरयोः परस्परसंहत्या प्रकटीभवन्ती परमयौवनवती आकृतिर्यस्याः सा तथोक्ता । एवम्भूता **अमुष्य** भगवतः **वरविलासिनीतनुः** उत्तमस्त्रीरूपम्, **असुराहिताम्**, असुरेष्वाहिताम्, धन्वतरिरूपेणाऽत्मना असुरवशे निहिताम्, **सुधां सुरराशये प्रददौ** अपाययदिति भावः ॥ ३७ ॥

(त.चं.) अथ धन्वन्तरिर्मोहिनी च । कथं धन्वन्तरिः? धन्वनि असारे संसारमरौ तरिरिव तारक इति । तरिः जलतरणिर्भवति । अयमहो धन्वन्यपि तरिरिति विस्मापयते । बिन्दुरवधारणार्थो विस्मयद्योतकः । वरविलासवती धन्वन्तरितनुः । विलासो दर्शनमात्रेण स्त्रीणां मनोविकारजननी लीला । 'विलासो हावभेदे स्याल्लीलायामपि' इति च । असुराहितामसुराणामहिताम् । अथाप्यसुराणां प्रददौ सुधाम् । सुरराशये मोहिनीरूपेण सुरवृन्दाय प्रदातुम् । अथच विलासिनीतनुर्मोहिनीरूपः धन्वन्तरिरूपेण असुरेष्वाहितां सुधां सुरराशये प्रददावपाययदिति । राशिपदेन सुराणामशनयोग्यतामाह । अश्नातीति राशिः । अश भोजने । 'अशिपणाय्यो रुड्लुकौ च' [१.६१] इति दशपादिका । अशिधातोः इण्प्रत्ययः रुट् चाऽगमः । तेन राशिः । पणायन्तेऽनेनेति पणतेः पाणिरिति ॥ ३७ ॥

सुजनाय दत्तपद आत्मशुद्धिदः
सुकुमाररूप्यभवदेष शाश्वतः ।
अनसूयया शुचिमनीषया धृतः
परमादरेण मुनिपुङ्गवोढया ॥ ३८ ॥

१.कोशे'सुबृहदिति' इति पुनः प्रतीकं पठित्वा 'सुबृहतोः पयोधरयोः–' इत्यादि पठ्यते ।

(भा.प्र.) दत्तनामा सुजनायाऽत्मशुद्धिदः सुकुमाररूपी भद्रः । सुजनाय दत्तं पदं पुनर्येन [स] कुमाररूपी । अत्रिणा ऊढया अनसूयया धृतः । मुनिश्रेष्ठैर्धृतया असूयारहितया शुद्धमनीषया ध्यातश्च ।।

(प.दी.) सुजनायेति । **सुजनाय** सज्जनाय **आत्मशुद्धिदः** चित्तशुद्धिदः **एषः शाश्वतः मुनिपुङ्गवोढया** मुनिपुङ्गवेन अत्रिणा ऊढया उदूढया **शुचिमनीषया** शुद्धज्ञानया **अनसूयया** अनसूयादेव्या **परमादरेण धृतः** गर्भे धृतः **सुकुमाररूपी** कोमलरूपः **दत्तपदः** दत्तात्रेयनामा **अभवत्** । **एष शाश्वतः अनसूयया** असूयारहितया **मुनिपुङ्गवोढया** मुनिश्रेष्ठैर्धृतया **शुचिमनीषया** शुद्धया मनीषया ज्ञानेन **परमादरेण धृतः**, 'अस्माकं ज्ञानमुपदेष्टुमायाहि भगवन्' इति ध्यातः, **सुकुमाररूपी** शोभनश्चासौ कुमारनामकरूपवांश्चेति सुकुमाररूपी **अभवत्** मुनीनां पुरस्तात् प्रादुरभूत् । कथम्भूतः? **सुजनाय** शोभनजनाय **दत्तपदः** प्रदत्तस्थानः । **आत्मशुद्धिदः सुजनाय** चित्तशुद्धिदः ।। ३८ ।।

(त.चं.) अथ दत्तात्रेयः सनत्कुमारश्च । दत्तपदः दत्तनामा । सुकुमाररूपी सनत्कुमारनामा । नाम्ना दत्तः अनसूयया धृतः । 'अनसूया तथैवात्रेर्जज्ञे पुत्रानकल्मषान् । दत्तं दुर्वाससं सोममात्मेशब्रह्मसम्भवान्' इति भागवते । असूयारहितया मनीषया धृतो ध्यातः कुमारोऽभवत् ।। ३८ ।।

दयितः सतामृषभ एष भूधरो
वपुरुद्वहन् परमहंसलक्षणम् ।
व्यहरद् वळक्षतमपक्षशोभनं
परतत्वलिप्सुसनकादिवन्दितः ।। ३९ ।।

(भा.प्र.) ऋषभो नाम राजा भूत्वा यतीन्द्रलक्षणं वपुरुद्वहन् । एष सतां दयित ऋषभः प्रियः स्वामी, धरणीधरः श्रेष्ठश्वेतच्छदलक्षणवपुरुद्वहन् ।।

(प.दी.) दयित इति । **सतां** सज्जनानां **दयितः** प्रियः **एष** नारायणः **ऋषभः** ऋषभनामा **भूधरो** राजा भूत्वा **परमहंसलक्षणं** परमहंसानां यतीनां लक्षणयुक्तं

वपुरुद्वहन् **व्यहरत्** विजहार। कथम्भूतं वपुः? **वळक्षतमपक्षशोभनं** वळक्षतमेन अतिनिर्मलेन पक्षेण सिद्धान्तेन शोभनम्। स्वयं कथम्भूतः? **परतत्वलिप्सुसनकादिवन्दितः,** परतत्वं लब्धुमिच्छुभिः सनकादिभिः वन्दितः स्तुतो नतो वा। वदि अभिवादनस्तुत्योरिति धातुः। **सतां दयितः** प्रियः **ऋषभः** स्वामी **भूधरः** धरणीधरः **एषः** नारायणः **परतत्वलिप्सुसनकादिवन्दितः** परतत्वं लिप्सुभिः जिज्ञासुभिः सनकादिभिर्वन्दितः स्तुतः। परतत्वमुपदेष्टुं प्रार्थित इत्यर्थः। **वळक्षतमपक्षशोभनम्,** अतिधवळपक्षाभ्यां शोभनम्, 'वळक्षो धवळोऽर्जुनः' इत्यमरः, **परमहंसलक्षणं** उत्तमहंसलक्षणयुक्तं **वपुः उद्वहन्,** तेषां मुनीनां परतत्वमुपदिशन् विजहार ॥ ३९ ॥

(त.चं.) अथ ऋषभो हंसश्च। सतां दयितः ऋषभनामा बभूव। आदौ भूधरो राजा सन् अन्ते स्वतनये भरते राज्यं निधाय परमहंसाश्रमलक्षणं वपुरुद्वहन् कुटजाचले विचचार। सतामृषभ एष भूधरः परमं हंसरूपं वपुरुद्वहन्। 'गोविन्दो धरणिधरः सुपर्णकेतुः' इति, 'गौरः श्वेतः सितः शुभ्रो वळक्षो धवळोऽर्जुनः' इति च। पक्षः परिग्रहश्च। सिद्धान्त इत्येतत्। 'देहावयव-मासार्ध-पतत्र-गृहभित्तिषु। परिग्रहे समीपे च षट्सु पक्षोऽभिधीयते' इति च ॥ ३९ ॥

उदपादि धर्मतनयो ह्ययं हरि-
र्नरदेवसोदर उदारविक्रमः।
अपि कृष्ण इत्यभिहितो मुदे सतां
स्वयमेव यस्य सहजो व्यजायत ॥ ४० ॥

(भा.प्र.) अयं हरिनामा उदपादि। हरिर्ह्ययं धर्मतनयो नारायणो नाम॥

(प.दी.) उदपादीति। **उदारविक्रमः** **अयं** भगवान् [सतां मुदे] **हरिः** हरिनामा **धर्मतनयः** यमतनयः **उदपादि हि** उत्पन्नः। कथम्भूतः? **नरदेवसोदरः**

शेषावतारभूतस्य नरदेवस्य सोदरः भ्राता। **कृष्ण इत्यप्यभिहितः। स्वयमेव यस्य** हरिनाम्नः **सहजो व्यजायत**। कृष्णनामाऽपि स्वयं यस्य हरेः सहोदरत्वेन धर्मतनयो व्यजायत स हरिरुदपादीति भावः। **अयं** पुरोवर्ती आश्रमे विराजमानः नारायणनामाऽपि **हरिः धर्मतनयः** यमतनयः **उदपादि**। न केवलं हरिकृष्णौ धर्मतनयौ किन्त्वयं नारायणोऽपि धर्मतनयः। कथम्भूतः? **नरदेव-सोदरः उदारविक्रमः स्वयमेव सतां मुदे कृष्ण इत्यभिहितोऽपि यस्य** नारायणस्य **सहजो व्यजायत**। अयं भावः– नर-नारायण-हरि-कृष्णाश्चत्वारो धर्मतनयाः। तत्र नरः शेषः। अन्ये त्रयो भगवदवतारा इति॥

(त.चं.) अथ धर्मतनया हरिकृष्णनारायणाः। अयं स्वयं हरिरेव हि नारायणो नाम धर्मतनय उदपादि। अयमेव हरिरिति नाम्ना च धर्मतनयो बभूव। कृष्णद्वैपायन इत्यभिहितोऽयमेव कृष्णनामा धर्मतनयोऽपि बभूव मूर्तिदेव्याम्। चतुर्षु तनयेषु नरनामा देव एव शेष इति। तथाहि भागवततात्पर्ये षाड्गुण्यवचनम्– 'नरो नारायणश्चैव हरिः कृष्णस्तथैव च। चत्वारो धर्मतनया हरिरेव त्रयो मताः। अनन्तो नरनामाऽत्र तस्मिंस्तु नरनामवान्। विशेषेण स्वयं विष्णुर्निवसत्यम्बुजेक्षणः। तस्माच्चतुर्धा धर्मस्य जातो विष्णुरितीर्यते' इति॥ ४०॥

परमात्मने सततमेकरूपिणे
दशरूपिणे शतसहस्ररूपिणे।
अविकारिणे स्फुटमनन्तरूपिणे
सुखचित्समस्ततनवे नमोनमः ॥ ४१ ॥

(प.दी.) परमात्मन इति। **परमात्मने** मुख्यत आत्मशब्दवाच्याय **सततं** सर्वदा **एकरूपिणे** प्रधानरूपिणे, स्वगतभेदवर्जितरूपिण इति वा, **दशरूपिणे** मत्स्यादिदशरूपाय, **शतसहस्ररूपिणे** नारायणादिशतरूपिणे विश्वादिसहस्ररूपिणे, **अविकारिणे** सदा रूपेष्वविकाराय **स्फुटं** स्पष्टं **अनन्त-**

रूपिणे । स्फुटमित्यनेनानन्तरूपत्वे–'अयं वै हरयोऽयं वै दश च सहस्राणि च बहूनि चानन्तानि च' इत्यादिश्रुतिः सूचिता । **सुखचित्समस्ततनवे** सुखज्ञानात्मकसर्वरूपाय ते **नमोनमः** । तात्पर्येण द्विरुक्तिः ॥ ४१ ॥

(त.चं.) अनन्तरूपोऽप्येकरूपः । निर्विशेषत्वात् । 'स एष दशधा प्रोक्तो विष्णुर्मत्स्यादिरूपकः । शतं नारायणाद्यात्मा विश्वाद्यात्मा सहस्रकः । परादिरूपो बहुधा सोऽनन्तात्माऽजितादिकः' इति नारायणश्रुतिः ॥

इति चिन्तयन्नविरळान्तरो हरिं
प्रणनाम सप्रणयमादृतोऽमुना ।
अजितौ परस्परसभाजितौ स तौ
निकषा निषीदति पुरोपवेशिनौ ॥ ४२ ॥

(प.दी.) इतीति । [इति] 'जगतां चतुर्दशतयम्–'[१०] इत्यारभ्य उक्तप्रकारेण **चिन्तयन्** मनसा चिन्तयन् **अविरळान्तरः** श्रीपूर्णप्रज्ञाचार्यः[१] **हरिं** नारायणाख्यं भगवन्तं **प्रणनाम** । **अमुना** नारायणेन **सप्रणयं** सस्नेहं **आदृतः** मानितः **सः** श्रीमध्वाचार्यः **परस्परसभाजितौ** अन्योन्यं कृतसम्भावनौ **उपवेशिनौ** निषण्णौ **तौ अजितौ निकषा** समीपे । 'अभितः-परितः-समया-निकषा-हा-प्रति-योगेषु दृश्यते' इति द्वितीया । परस्परं कृत-सम्भावनयोर्निषण्णयोस्तयोः अजितयोः समीप इत्यर्थः । **निषीदति पुरा** न्यषीदत् । 'यावत्पुरानिपातयोर्लट्'[२] इति लट् ॥ ४२ ॥

(त.चं.) सभाजनमालिङ्गनकुशलप्रश्नादिना प्रीतिदर्शनम् । सत्कारेणाऽ-नन्दनम् । सभाज प्रीतिदर्शने । निषीदति पुरा । न्यषीदत् । 'पुरि लुङ् चास्मे' इति वर्तमानलकार इत्युक्तम् ॥ ४२ ॥

१.ताळपत्रस्याधस्तात् पश्चादुपक्षिप्तं कोशवाक्यम्– ''अन्तरमवकाशावधिपरि-धानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिरवसरमध्येऽन्तरात्मनि च' इत्यमरः' इति ।
२.'पुरि लुङ् चास्मे' इति पठितव्यम् ।

विविधा विधाय किल तत्र सङ्कथा
वदनं मुनीन्द्रतनयस्य सुन्दरम् ।
अवलोक्य लोकपतिरानतं महा-
सुखतीर्थमाह रहसि स्म गामिमाम् ॥ ४३ ॥

(प.दी.) **विविधा** इति । **लोकपतिः** श्रीनारायणः **तत्र** **विविधाः सङ्कथाः** सम्भाषणानि **विधाय** **मुनीन्द्रतनयस्य** पराशरसुतस्य **सुन्दरं वदनमवलोक्य** **आनतं** भक्तिनम्रं **महासुखतीर्थं** **रहसि** **इमां** वक्ष्यमाणप्रकारां **गां** वाचं **आह स्म** अब्रवीत् किल ॥ ४३ ॥

(त.चं.) सङ्कथाः । 'सङ्कथाऽन्योन्यसङ्गीतिः' इत्यभिधानम् ॥ ४३ ॥

शृणु देवकार्यमवधार्य धैर्यवद्
यदुदीर्यमाणमिदमार्यसम्मतम् ।
भविताऽन्यदुष्करतरं विधाय तत्
तरुणं तवावतरणं महाफलम् ॥ ४४ ॥

(प.दी.) शृण्विति । **धैर्यवत्** धैर्ययुक्तं **उदीर्यमाणं** मया उच्यमानं **आर्यसम्मतं** श्रीवेदव्यासस्य प्रियं **यदिदं देवकार्यं तत् शृणु** । **अन्यदुष्करतरं** अन्येनात्यन्तं कर्तुमशक्यं **तद्** देवकार्यं **अवधार्य** श्रुत्वा **विधाय** **तरुणं** नूतनं **तवावतरणं** अवतारः **महाफलं** महाफलयुक्तं **भविता** । तत् शृण्विति ॥ ४४ ॥

(त.चं.) धैर्यवत् निर्धारयुक्तं वचनं शृणु । धैर्यवत् धैर्येण शृण्विति क्रियाविशेषणं वा । त्वमपि 'यदाज्ञाप्यते तत् क्रियते' इत्यवधार्य निश्चित्य शृणु । निर्धारेण वक्ष्यमाणं निर्धारेण शृण्विति । आर्याणां ज्ञानिनां सम्मतम् । आर्यत तत्वमेभिरित्यार्यास्तत्वविद उच्यन्ते । ज्ञानवृद्धाः कुलवृद्धाश्चेत्येतत् । 'अय्य'[അയ്യ] इति 'अज्ज'[അജ്ജ] इति च भाषायाम् ॥ ४४ ॥

अपिधाय सूत्रहृदयं सतां प्रियं
प्रविधाय भाष्यमधुना निजेच्छया ।
अपरैः श्रुतिस्मृतिनिजार्थदूषकैः
सुतरां तिरोभवति संविदाहता ॥ ४५ ॥

(प.दी.) अपिधायेति । **अधुना** इदानीं **श्रुतिस्मृतिनिजार्थदूषकैः** श्रुतीनां स्मृतीनां च निजार्थदूषकैः, साक्षाद् विवक्षितार्थदूषकैः, **अपरैः** सज्जनेभ्योऽपरैः अन्यैः, भुवि जातैरसुरैरिति यावत्, **आहता** नाशिता **संवित्** तत्वज्ञानं **सुतरां** अतितरां **तिरोभवति** विलीना भवति । 'स्त्री संविद् ज्ञानसम्भाषाक्रिया-काराजिनामसु' इत्यमरः । कथमाहता? **सतां** सज्जनानां **प्रियं सूत्रहृदयं** ब्रह्मसूत्राभिप्रायं **अपिधाय** छादयित्वा । 'अपिधानतिरोधानपिधा-नाच्छादनानि च' इत्यमरः । **निजेच्छया** स्वेच्छया स्वाभिमतजग-न्मिथ्यात्वादिप्रतिपादकत्वेन **भाष्यं** ऋक्सूत्रोपनिषदादिभाष्यं **प्रविधाय** आहता संवित् तिरोभवतीत्यन्वयः ॥ ४५ ॥

(त.चं.) तिरोभवति तिरोहिता वर्तते ॥ ४५ ॥

अपनेतुमेनमनयं कृतं खलैः
प्रतिनेतुमात्मजनतां शुभां गतिम् ।
कुरु सूत्रभाष्यमविलम्बितं व्रजेः
सुमतेन योजय कवे श्रुतिस्मृतीः ॥ ४६ ॥

(प.दी.) **अपनेतुमिति** । **खलैः** दुर्जनैः **कृतमेनं** निजेच्छया भाष्यनिर्माणा-दिरूपं **अनयम्**, नयो न्यायः सच्छास्त्रन्यायः, तद्विरुद्धमनयम्, **अपनेतुं** निराकर्तुम्, **आत्मजनतां** स्वकीयजनसमूहं **शुभां गतिं प्रतिनेतुं** प्रापयितुं **सूत्रभाष्यं** ब्रह्मसूत्रस्य भाष्यं **कुरु** । **अविलम्बितं** शीघ्रं **व्रजेः** गच्छ । **कवे** ज्ञानिन्, **श्रुतिस्मृतीः सुमतेन** सत्सिद्धान्तेन **योजय**, सिद्धान्तपरत्वेन योजय, व्याकुर्वित्यर्थः ॥ ४६ ॥

(त.चं.) कवे सर्वज्ञ । कौति कवते वा कविः । कु शब्दे । कुङ् अव्यक्ते शब्दे । तत 'इन्' ॥ ४६ ॥

अमितां मितामपि गिरं जगद्गुरो-
रिति तां निशम्य विरळेतरान्तरः ।
वदतां वरस्तमवदत् तदा तयो-
र्विरहाक्षमः खलु चराचरेशयोः ॥ ४७ ॥

(प.दी.) अमितामिति । **तदा वदतां वरः विरळेतरान्तरः** श्रीपूर्णप्रज्ञाचार्यः इति 'शृणु देवकार्यम्'[४४] इत्युक्तप्रकारां **मितामपि** शब्दतोऽल्पामपि **अमितां** अर्थतोऽनल्पाम्, बह्वर्थगर्भामिति यावत्, **जगद्गुरोः** श्रीनारायणस्य **तां गिरं निशम्य तं** श्रीनारायणं **अवदत्** । 'भवतोः–' [४८] इत्यारभ्य इतो न गमिष्यामीत्यर्थप्रतिपादकं वचनं ब्रुवतः कोऽभिप्राय इत्यपेक्षायामाह– **तयोरित्यादिना** । **तयोः चराचरेशयोः** पराशरधर्मतनययोः **विरहाक्षमः खलु** । विरहं वियोगं सोढुमसमर्थ एव, नतु सर्वथा इतो न गमिष्यामीत्यभिप्रायवानिति भावः ॥ ४७ ॥

(त.चं.) निशम्य श्रुत्वा ॥ ४७ ॥

भवतोरितः सततसेवनामृते
मम मङ्क्तुमस्तु भगवन्ननुग्रहः ।
न लभेय वल्लभतमेदृशं सुखं
जगतां त्रयेऽपि जगदेकमङ्गलम् ॥ ४८ ॥

(प.दी.) भवतोरिति । **भगवन्**, **इतः** अत्रैव, 'सार्वविभक्तिकस्तसिः' इति वचनात्, **भवतोः** युवयोः **सततसेवनामृते मङ्क्तुं** निमज्जनाय **मम अनुग्रहः अस्तु** । **वल्लभतम** प्रेष्ठ, **जगदेकमङ्गलं ईदृशं सुखं** सततभवत्सेवनामृतनिमज्जनसुखं **जगतां त्रयेऽपि न लभेय** न प्राप्नुयाम् ॥ ४८ ॥

(त.चं.) सततसेवनाख्येऽमृते । मङ्क्तुम् । टु मस्जो शुद्धौ । वल्लभतम । वल्ल संवरणे । वल्लतीति वल्लभो दयितः । 'रासिवल्लिभ्यां च' [द.पा. ७.२१] इत्यभच् । रासभः । वल्लभः ॥ ४८ ॥

कलिकालकालितगुणे धरातळे
सुजनो न नूनमधुनाऽस्ति योग्यधीः ।
परतत्ववर्णनमयोग्यतावते
ननु हव्यदानमिव निन्द्यते शुने ॥ ४९ ॥

(प.दी.) कलीति । अधुना **कलिकालकालितगुणे** कलिसामर्थ्येन नाशितज्ञानभक्तिवैराग्यादिगुणे **धरातळे योग्यधीः** तत्वज्ञानयोग्यबुद्धिः **सुजनः नूनं** प्रायेण **नास्ति** । **अयोग्यतावते** योग्यतारहिताय जनाय **परतत्ववर्णनं** परतत्वोपदेशः **निन्द्यते ननु** । किमिव? **शुने हव्यदानमिव** ॥ ४९ ॥

(त.चं.) कलिकालकालितगुणे । कल सङ्ख्याने । कल्यत इति कालः । तेन काल्यत इति कालितो निरस्तः । कल क्षपे । नूनं नास्ति नास्तीति तर्कये । 'तर्कनिश्चितयोर्नूनम्' । नास्ति विरळतरोऽस्तीति वा । अनुदरा कन्येतिवत् । तदा तु नूनं निश्चयेन ॥ ४९ ॥

इति तं ब्रुवाणमयमब्रवीद् विभु-
र्भुवि सन्ति सौम्य पुरुषा गुणोचिताः ।
विमलान् मणीनिव गुणोज्झितानिमान्
दयया विशोधय विशुद्धगोगणैः ॥ ५० ॥

(प.दी.) इतीति । **अयं विभुः** श्रीनारायणः **इति ब्रुवाणं तमब्रवीत्** । **सौम्य, भुवि गुणोचिताः** ज्ञानभक्त्यादिगुणानामुचिताः **पुरुषाः सन्ति** । **विमलानिमान्** गुणोचितपुरुषान् **गुणोज्झितान्** केवलं सत्संसर्गाद्यभावाद्

भक्त्यादिगुणवर्जितान् **दयया** कृपया **विशुद्धगोगणैः** विशेषेण शुद्धवचन-समूहैः **विशोधय** हताज्ञानादिदोषान् कुर्वित्यर्थः । कानिव? **गुणोचितान्** सुषिरवत्त्वेन गुणस्य सूत्रस्य उचितान् **गुणोज्झितान्** सूत्रच्युतान् **वि-मलान्** स्वतो निर्मलान् **मणीन्** रत्नानि [**विशुद्धगोगणैः**] विशुद्धैः निर्मलैः गोगणैः जलसमूहैः **इव** ॥ ५० ॥

(त.चं.) सौम्यः साधुगुणः । दयया गुणोज्झितेष्वपि गुणोचितेषु ॥ ५० ॥

तव कीर्तिरार्तिमतिमात्रमानये-
दशुभान् प्रभाकरविभेव कौशिकान् ।
कमलाकरानिव शुभान् प्रबोधयेत्
परमाज्ञया मम विशेषतोऽनिशम् ॥ ५१ ॥

(प.दी.) **तवेति** । **तव कीर्तिः अशुभान्** दुष्टान् **अनिशं** निरन्तरं **अतिमात्रं** अतितरां **आर्तिं** दुःखं **आनयेत्** प्रापयेत् । कानिव? **प्रभाकरविभा कौशि-कानिव** दिवान्धसञ्ज्ञकान् पक्षिविशेषानिव ।'दिवान्धः कौशिको घूकः'[1] इत्यमरः । कौशिका हि सूर्यप्रकाशे सत्यन्धा भवन्ति । **तव कीर्तिः शुभान्** सज्जनान् **प्रबोधयेत्** विकासयेत्,सन्तोषयेदिति यावत् । कानिव? [2]**प्रभाकर-विभा कमलाकरानिव** पद्माकरानिव । तव कीर्तिः सामर्थ्येनेत्थम्भूता । **मम परमाज्ञया विशेषतः** अशुभानार्तिमानयेत् शुभान् प्रबोधयेच्च ॥ ५१ ॥

(त.चं.) आर्तिम् । 'आर्तिः पीडा व्यथा तथा' इत्यभिधानम् । कौशिका उलूका अशुभाः पक्षिणः । ये घुक्कारेण भीषयन्ति । 'गूबे'[ગૂબડ઼] इति भाषायाम् ॥ ५१ ॥

इति सा महीधरमुखाद् विनिःसृता
जगतां सुखाय विशदा सरस्वती ।

१.नेदं सम्प्रत्यमरे पठ्यते । २.'दिवाकरविभा' इति पाठान्तरम् ।

द्विजराजगोविषयतातिपूरितं
प्रविवेश मध्वपृथुबुद्धिवारिधिम् ॥ ५२ ॥

(भा.प्र.) महीधरो गिरिर्हरिश्च। द्विजराजश्चन्द्रो व्यासश्च॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायामष्टमः सर्गः

—०—

(प.दी.) इतीति । **जगतां सुखाय इति महीधरमुखात्** धरणीधरस्य मुखात् **विनिःसृता** निर्गता **विशदा सा सरस्वती** वाक् **मध्वपृथुबुद्धिवारिधिं** श्रीमध्वस्य विपुलबुद्ध्याख्यसागरं **प्रविवेश** । कथम्भूतम्? **द्विजराजगोविषयतातिपूरितं** द्विजराजस्य श्रीवेदव्यासस्य गवां वचनानां विषयतया गोचरतया, व्यासोक्तवचसां हृदि वर्तमानत्वादिति यावत्, अतिपूरितम् । गिरिकन्दरान्निर्गता विशदा प्रसन्ना नदी चन्द्रकिरणसम्बन्धादतिपूर्णं सागरमिवेति श्लेषार्थः ॥ ५२ ॥

(त.चं.) महीधरो भगवान् नारायणः । 'महीधरो महाभागः' इति सहस्रनामसु । द्विजराजस्य चन्द्रस्य गवां किरणानां विषयतयाऽतिपूरितो वारिधिः समुद्रः ॥ ५२ ॥

मतमित्यवेत्य महितं महतो-
रभिधाय बाढमिति धीरमतिः ।
अनयोर्नियोगमधिरोपितवान्
स्वशिरस्यनन्यसुवहं प्रणमन् ॥ ५३ ॥

(प.दी.) **मतमिति** । **धीरमतिः** श्रीमध्वः **महतोः** श्रीवेदव्यासनारायणयोः

महितं मतं सिद्धान्तम् **इति** उक्तप्रकारेण **अवेत्य,** मम गमनमनयोरभिमत-मिति ज्ञात्वेति यावत्, **प्रणमन् बाढं** तथाऽस्तु इति इत्थं **अभिधाय, अनन्यसुवहं** अन्येन सुखेन वोढुमशक्यम्, अन्येन कर्तुमशक्यमिति यावत्, **अनयोर्नियोगम्** आज्ञां **स्वशिरस्यधिरोपितवान्**। शिरसि बद्धाञ्जलिर्भूत्वा **बाढमित्यभिधाय** तदाज्ञामङ्गीकृतवानिति भावः ॥ ५३ ॥

(त.चं.) मतमभिमतम्। अवश्यं करोमीति बाढमिति प्रतिज्ञायाम्। प्र-मिताक्षरा जागतं छन्दः। 'सजससैः प्रमिताक्षरा'। मञ्जुभाषिण्या अन्त्यगणस्य द्वितीयाक्षरलोपेनेयं प्रमिताक्षरा ॥ ५३ ॥

आम्नायास्त्रय इव तत्वबोधकास्ते
पापघ्नास्त्रय इव पावकाः प्रजानाम्।
लोका वा सकलभृतस्त्रयोऽत्र रेजुः
सानन्दा मुनिसुतधर्मसूनुमध्वाः ॥ ५४ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये आनन्दाङ्कितेऽष्टमः सर्गः

—०—

(प.दी.) आम्नाया इति। **सानन्दाः** आनन्दसहिताः ते **त्रयः मुनिसुत-धर्मसूनुमध्वाः अत्र** आश्रमे **रेजुः**। क इव? **त्रयः आम्नाया इव** वेदा इव **प्रजानां तत्वबोधकाः**। **त्रयः पावका इव** अग्नय इव **प्रजानां पापघ्नाः**। **त्रयो लोका वा** लोका इव **सकलभृतः** सर्वं दधानाः ॥ ५४ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां वेदाङ्गतीर्थमुनिकृतायामष्टमः सर्गः

—०—

(त.चं.) मुनिसुतो बादरायणः। धर्मसूनुर्नारायणः। अतिजगती प्रहर्षिणी च्छन्दः । 'प्रहर्षिणी मनौ ज्रौ गः' इति च ॥ ५४ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याचख्यावष्टमं सर्गं सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां तत्वचन्द्रिकायामष्टमः सर्गः

—०—

[आदितः श्लोकाः– ३८७+५४=४४१]

नवमः सर्गः

[नारायणाश्रमाद् व्यासाश्रमं प्रत्यागमनम् । व्यासमानम्य ततः प्रयाणम्। पूर्णप्रज्ञस्य स्वशिष्यैः समागमः। पञ्चषैरानीतस्य भिक्षान्नस्य कृत्स्नादनम्। स्वस्यैव प्रतिकृतिस्थानीयस्य भाष्यस्य रचना । सत्यतीर्थेन तदालिखनं च । बदरिकातटाद् गोदावरीतटप्राप्तिः । शोभनभट्टेन समागमः । शोभनभट्टेन मध्वशास्त्रप्रशंसा। रजतपीठप्राप्तिः। पूर्णप्रज्ञदर्शनेन अच्युतप्रज्ञस्य ज्येष्ठयतेश्च महान् प्रमोदः। कुमतलीनबुद्धयेऽच्युतप्रज्ञाय पूर्णप्रज्ञेन स्वसमयप्रबोधनम्। पूर्णप्रज्ञेन चक्रशङ्खाङ्कनरूपाया वैष्णवदीक्षायाः प्रदानम्। रजतपीठपुरे कृष्णप्रतिष्ठा । दुराग्रहिणं 'मरडित्ताय'नामानं पुरोहितं पराजित्य स्वानुजेन याजनम्। पुनरपि बदरिकाश्रमगमनम्। व्यासमानम्य पुनः प्रत्यागमनम्।]

चोदयन्तमथ गन्तुमादरात् तत्र धर्मजमजं प्रणम्य सः ।
सौख्यतीर्थकविलोकनायको वेदनायकपुरस्सरो ययौ ॥ १ ॥

(प.दी.) चोदयन्तमिति । अथ तत्र नारायणाश्रमे **सः सौख्यतीर्थकविलोकनायकः** श्रीमदानन्दतीर्थाख्यो कविलोकनायकः ज्ञानिलोकप्रियः **गन्तुं चोदयन्तम्, अजं धर्मजं** श्रीनारायणं **आदरात् प्रणम्य, वेदनायकपुरस्सरः,** वेदनायकः श्रीवेदव्यासः पुरस्सरः अग्रगामी यस्य स तथोक्तः, **ययौ** नारायणाश्रमात् श्रीवेदव्यासाश्रमं ययौ ॥ १ ॥

(त.चं.) धर्मजमथाप्यजम् । 'अजायमानो बहुधा विजायते' । कविलोकनायकः । 'नायको नेतरि श्रेष्ठे' । सर्गेऽस्मिन्नाद्विपञ्चाशं पद्यं रथोद्धता त्रैष्टुभं छन्दः । लक्षणं तूक्तम् ॥ १ ॥

आश्रमान्तरमवाप्य कृष्णतः
श्राव्यमेष सकलं च शुश्रुवान् ।
चित्तवृत्तिमनुवृत्तिमान् गुरोः
साध्ववेत्य गमनोन्मुखोऽभवत् ॥ २ ॥

(प.दी.) आश्रमान्तरमिति । एषः श्रीमध्वः **आश्रमान्तरं** अन्यदाश्रमं श्रीवेदव्यासाश्रमं **अवाप्य, गुरोः** श्रीवेदव्यासस्य **चित्तवृत्तिं साधु** सम्यग् **अवेत्य** ज्ञात्वा, **अनुवृत्तिमान्** अनुवृत्तिं कुर्वन्, **कृष्णतः सकलं श्राव्यं च** श्रोतव्यभागं च, **शुश्रुवान्** श्रुतवान् **गमनोन्मुखोऽभवत्** ॥ २ ॥

(त.चं.) कृष्णतः कृष्णद्वैपायनात् ॥ २ ॥

मन्दहासमृदुसुन्दराननं वन्दनीयमभिवन्द्य सत्पतिम् ।
प्राज्ञमौलिमणिरभ्यनुज्ञया तस्य तावदगमन्महामतिः ॥ ३ ॥

(प.दी.) मन्दहासेति । **प्राज्ञमौलिमणिः महामतिः** श्रीपूर्णप्रज्ञाचार्यः **मन्दहासमृदुसुन्दराननं वन्दनीयं सत्पतिं** श्रीवेदव्यासं **अभिवन्द्य तस्याभ्यनुज्ञया तावदगमत्** ॥ ३ ॥

(त.चं.) मन्दहासेन प्रीतिपूर्वमभ्यनुजानाति । वन्द्यं स्तुत्यमभिवादनीयं च । अभिवन्द्य अभिवाद्य । सनामग्राहं पादोपसङ्ग्रहणमभिवादः । 'अभिवादे स्त्रीवन्मा भूमेत्यध्येयं व्याकरणम्' इति हि पतञ्जलिः । सत्पतिम् । सतां सज्जनानां ज्ञानिनां वा पतिम् । सतो मुख्यप्राणस्य वा पतिम् । तावदगमदिति गन्तुमारेभ इत्यर्थः ॥ ३ ॥

तस्य वल्लभतमाऽऽस वासभू-
र्मानसात् पृथुलमानसस्य नो ।
नात्यजत् क्षणमपि ह्यसाविदं
नैष नाथविरही ततोऽभवत् ॥ ४ ॥

(प.दी.) तस्येति । **तस्य** श्रीवेदव्यासस्य, **पृथुलमानसस्य** श्रीपूर्णप्रज्ञाचार्यस्य **मानसात् वल्लभतमा** तन्मानसादतिप्रिया **वासभूः** आवासस्थानं **नो आस । हि** यस्मात् तस्मात् **असौ** श्रीवेदव्यासः **इदं** मध्वमानसं **क्षणमपि नात्यजत्** । ततः **एषः** श्रीमध्वः **नाथविरही** नाथस्य वियोगवान् **नाभवत्** ॥

(त.चं.) पृथुलमानसस्य मानसादपि वल्लभतमा काचिदपरा वासभूस्तस्य कृष्णद्वैपायनस्य नाऽस न बभूव । अस भुवि । ननु 'अस्तेर्भूः [२.४.५२] इत्यस्तेर्धातोरार्धधातुके भू इत्ययमादेश आदिश्यते । तेन बभूवेत्येव भवति । नाऽसेति । सत्यम् । अत एव 'आसेत्यसतेः' इत्याह वामनः काव्यालङ्कारे । 'अस गतिदीप्त्यादानेषु' इति भ्वादिगणे धात्वन्तरं पठ्यते । असते ।

असति । तस्येदं रूपमिति तदाशयः । वस्तुतस्तु अस्तेरेवेदं रूपमिति । अत एव चान्द्रैः 'क्वचिद् भूभावो नेष्यते' इत्यङ्गीकृतम् । अन्ये तु- आसेति बभूवार्थे, आहेत्युवाचार्थे चाव्ययमित्याचक्षते । एकवचनमविवक्षितम् । वचनान्तरेऽपि दृश्यते- आसुरिति, आहुरिति च ॥ ४ ॥

वीरदृष्टिकृतसिंहविभ्रमः शान्तदृष्टिकृतशान्तसम्मदः ।
तत्रतत्र पथि पथ्यविभ्रमः पर्वतादवततार सर्वधीः ॥ ५ ॥

(प.दी.) वीरेति । **वीरदृष्टिकृतसिंहविभ्रमः** वीराणां दृष्टीनां कृतसिंह-विलासः । **शान्तदृष्टिकृतशान्तसम्मदः** शान्तदृष्ट्या प्रसन्नदृष्ट्या कृतशान्त-प्राणिसन्तोषः । ये क्रूरप्राणिनः तेषां सिंहवद् भयङ्करः, ये पुनः शान्तप्राणिनः तेषां शान्तदृष्ट्या कृतसन्तोषः । एवं **पथि** मार्गे **पथ्यविभ्रमः तत्रतत्र** उचितविलासः **सर्वधीः** श्रीपूर्णप्रज्ञाचार्यः **पर्वतादवततार** ॥ ५ ॥

(त.चं.) क्वचिद् वीरया दृष्ट्या दर्शितसिंहविभ्रमः क्रूरेषु श्वापदेषु । क्वचिद् शान्तया दृष्ट्या कृतशान्तसम्मदः । कृतः शमयुक्तेषु जन्तुषु सम्मदो येन । पथोऽनपेतः पथ्यः । 'धर्म-पथि-अर्थ-न्यायादनपेते'[४.४.९२] । यत्र यथावर्तनं समयोचितं तथाविधं वर्तयन् भ्रमतीति । भ्रमणं सञ्चरणम् । पथ्यो विभ्रमः शोभाविशेषोऽस्येति वा । 'शोभार्थेऽपि प्रयुज्यन्ते लक्ष्मी-श्री-कान्तिविभ्रमाः' । पथिपथि अविभ्रमो वा । निःशङ्कः । 'शङ्का वितर्कः सन्देहः संशयो विभ्रमस्तथा' । भ्रमु चलने । अनवस्थाने वा । पादयोरन-वस्थानं देशान्तरगमनम् । मनसोऽनवस्थानं शङ्कातङ्कः । भ्रमति भ्राम्यति वा । सर्वो भगवान्, सर्वं च विश्वं यस्य धीविषयः स भवति सर्वधीः ॥

वानरेन्द्र इव तीर्णवारिधिर्वासुदेव इव रत्नराजवान् ।
भीमसेन इव सूनवर्यहन्निर्वृतिं स्वजनमानिनाय सः ॥ ६ ॥

(प.दी.) वानरेति । **सः** श्रीमध्वः **स्वजनं** अनन्तमठवर्तिनं स्वकीयं जनं

निर्वृतिं सन्तोषं **आनिनाय** प्रापयामास । क इव ? **तीर्णवारिधिः** सीतां दृष्ट्वा पुनस्तीर्णवारिधिः **वानरेन्द्रः** कपीन् इव । **रत्नराजवान्** जाम्बवन्तं जित्वा नीतस्यमन्तकाख्यरत्नश्रेष्ठवान् **वासुदेवः** यादवान् इव । **सूनवर्यहृत्** सौगन्धिकवनात् कुसुमश्रेष्ठहृत् **भीमसेनः** धर्मराजादीन् इव ॥ ६ ॥

(त.चं.) 'सूनं प्रसवपुष्पयोः' । सूनवर्यं सौगन्धिकम् । यत् सुगन्ध्येव सर्वदा । आकृत्या गन्धेन च महान् श्वेतोऽरविन्दप्रभेदः । ब्रह्मकमलमिति च व्याहरन्ति ॥ ६ ॥

अग्निशर्ममुखपञ्चषैर्द्विजैरन्नमाहृतमलं पृथक् समम् ।
कृत्स्नमाददयमित्यविस्मयः कृत्स्नमत्तुमलमेष हि क्षये ॥ ७ ॥

(भा.प्र.) सर्वेषामपि भक्तानामनुल्लङ्घ्यं क्षणं स्मरन् ।
गमनत्वरितो मध्वः सर्वेभ्योऽपि क्षणं ददौ ॥

(प.दी.) अग्नीति । **अयं** श्रीमध्वः **अग्निशर्ममुखपञ्चषैः** अग्निशर्मनामा कश्चिद् द्विजः तत्पुरस्सरैः पञ्चषैः **द्विजैः समं** युगपत् आहृतं भिक्षार्थममरालयं प्रत्यानीतं **पृथक्** प्रत्येकं **आहृतं** अपि **अलं** सपरिवारस्य स्वस्य पर्याप्तं **अन्नं कृत्स्नं** सर्वं च **आदत्** बुभुज **इत्यविस्मयः**, अद्भुतं न भवति । कुतः ? **एषः** मध्वः **क्षये** प्रळये **कृत्स्नं** सचराचरं सर्वं **अत्तुमलं** हि समर्थो हि । 'शीघ्रं जिगमिषुं मध्वं ज्ञात्वा सर्वे न्यमन्त्रयन् । अद्यैवाहं करिष्यामीत्येतत् श्रुत्वा दयापरः । सर्वेषामपि भक्तानामनुल्लङ्घ्यं क्षणं स्मरन् । गमनत्वरितो मध्वः सर्वेभ्योऽपि क्षणं ददौ । ते च प्रत्येकमाजह्रुरन्नं सोपस्करं बहु । यथा सपरिवारस्य पर्याप्तं स्यादयं पुनः । तत् सर्वं बुभुजे नैतच्चित्रमत्र समीरणे'[1] ॥

(त.चं.) 'अग्निशर्ममुखपञ्चषद्विजैः' इति मूलपाठः सम्भाव्यते । पञ्चषैर्द्विजैराहृतमन्नं कृत्स्नं न केवलम् । किन्तु कृत्स्नं विश्वमपि । अत्र

१. अपूर्वाण्येतानि पद्यानि मध्वचरितसम्बन्धीनि । भावप्रकाशिकायामप्येकमेव हि पद्यमुदध्रियत ।

भावप्रकाशिकायां 'सर्वेभ्योऽपि क्षणं ददौ' इति । क्षणं भिक्षार्थमवकाशं ददौ । अत एव ह्यतिथिः प्रार्थ्यते– 'क्षणः क्रियताम्' इति । 'कालविशेषेऽवसरे व्यापारे पारतन्त्र्ये च । मध्ये तथोत्सवे च क्षणशब्दः कथ्यते कृतिभिः' ॥

व्यासदेवहृदयातिवल्लभं वासुदेवमगणय्यसद्गुणम् ।
साधयत् सकलदोषवर्जितं ज्ञानभक्तिदमनन्तसौख्यदम् ॥ ८ ॥

उक्तमुक्तमभिधेयमुत्तमं
वेदवाक्यमनुवादयन्मुहुः ।
व्यञ्जयत् स्मृतिवचोभिरञ्जसा
तस्य चार्थमतियुक्तयुक्तिमत् ॥ ९ ॥

बालसङ्गमपि बोधयद् भृशं
दुर्निरूपवचनं च पण्डितैः ।
अप्रमेयहृदयं प्रसादवत्
सौम्यकान्ति च विपक्षभीषणम् ॥ १० ॥

अस्तदूषणमवन्ध्यभाषणं लक्षितं सकललक्षणैः समम् ।
माननीयमपि नाकिनायकै रूपमन्यदिव धन्यमात्मनः ॥ ११ ॥

एकविंशतिकुभाष्यदूषकं ब्रह्मसूत्रगणभाष्यमद्भुतम् ।
अप्यदूष्यमतनोदनन्तधीर्भूतभाविभवदात्मभिः क्वचित् ॥ १२ ॥

(भा.प्र.) भारतीविजय-संविदानन्द[1]- ब्रह्मघोष- शतानन्द- उद्वर्त- विजय- रुद्रभट्ट-वामन-यादवप्रकाश-रामानुज-भर्तृप्रपञ्च-द्रविड-ब्रह्मदत्त-भास्कर-पिशाच-वृत्तिकार-विजयभट्ट-विष्णुक्रान्त-वादीन्द्र-माधवदास-सङ्कर-कृतान्येकविंशतिकुभाष्याणि ॥

१.सच्चिदानन्द–'इति क्वचित् ।

(प.दी.) व्यासेति । **अनन्तधीः** श्रीपूर्णप्रज्ञाचार्यः **अद्भुतं ब्रह्मसूत्रगणभाष्यं अतनोत्** चक्रे । अन्त्यकुळकमेतत् । **आत्मनः** स्वस्य **धन्यम् अन्यत् रूपमिव** देहमिव । कथम्भूतम्? **व्यासदेवहृदयातिवल्लभं** श्रीवेदव्यासमनसोऽतिप्रियम् । व्यासेन स्वसूत्रेष्वभिप्रेतस्याभिप्रायस्यात्यनुकूलमिति वा । श्रीमध्वप्रणीतभाष्ये हि सूत्राभिप्रायः सम्यग् विवृतः । आत्मरूपं च व्यासदेवहृदयातिवल्लभम् । **वासुदेवमगणय्यसद्गुणं सकलदोषवर्जितं साधयत्** । अगणितसाधुगुणः सकलदोषवर्जितो भगवान् भाष्ये प्रतिपाद्यते । आत्मनः स्वरूपमप्येतादृक् । **ज्ञानभक्तिदम्** । श्रीमध्वशास्त्रश्रवणादिना हि ज्ञानभक्ती स्याताम् । श्रीमध्वः स्वयमपि ज्ञानभक्त्यादिदः । **अनन्तसौख्यदं** अनन्तसौख्यात्मकमोक्षप्रदम् । तद्भाष्यश्रवणादिनाऽप्यनन्तसौख्यं भवति । स्वयमप्यनन्तसौख्यदः । 'विष्णुर्हि दाता मोक्षस्य वायुश्च तदनुज्ञया' इति वचनात् ॥ * ॥ **उक्तमुक्तमुत्तमं अभिधेयं** अर्थं **मुहुर्वेदवाक्यमनुवादयत्** । भाष्यं हि स्वयमुक्तमुक्तं सूत्रार्थं वेदवाक्येनानुवादयति । **तस्य** वेदवाक्यस्य **अर्थं च स्मृतिवचोभिरञ्जसा व्यञ्जयत्** प्रकटीकुर्वत् । **अतियुक्तयुक्तिमत्**, न केवलं स्वोक्तार्थे श्रुतिस्मृत्युदाहरणमात्रम्, अत्यन्तमुपपन्ना युक्तयोऽपि दर्शिता इति भावः । श्रीमध्वः स्वयं च यंयमर्थं ब्रूयात् तन्तमर्थं श्रुतिस्मृतिसिद्धयुक्तिभिः साधयेत् ॥*॥ **बालसङ्घमपि भृशं बोधयत्** । अत्र बालशब्देन न स्तनन्धया उच्यन्ते, किन्तु स्थूलबुद्धयः । जिज्ञासून् स्थूलबुद्धीनपि भाष्यं बोधयति । स्वयमपि तथा । **पण्डितैश्च** विद्वद्भिरपि **दुर्निरूपवचनम्**, अस्य वचनस्यायमर्थ इति दुर्विज्ञेयवचनोपेतम् । सममेतत् स्वरूपेऽपि । **अप्रमेयहृदयम्** अप्रमेयाभिप्रायम् । **प्रसादवत्** प्रसन्नशब्दोपेतम् । स्वयं च अप्रमेयाभिप्रायः, प्रसादवांश्च सर्वसज्जनेष्वनुग्रहवांश्च । **सौम्यकान्ति च** सौम्यकान्तियुक्तमपि **विपक्षभीषणम्** अतिदृढयुक्तियुक्तत्वाद् विपक्षाणां प्रतिवादिनां भयङ्करम् । स्वरूपमप्येतादृक् ॥*॥ **अस्तदूषणं** अपशब्दादिदूषणरहितम् । स्वरूपं च सर्वदोषवर्जितम् । **अवन्ध्यभाषणं**

निष्फलभाषणरहितम् । स्वरूपं च सत्यभाषणम् । **सकललक्षणैः समं लक्षितम्** । 'सूत्रार्थो वर्ण्यते यत्र पदैः सूत्रानुकारिभिः[१] । स्वपदानि च वर्ण्यन्ते भाष्यं भाष्यविदो विदुः' इत्युक्तभाष्यलक्षणैः सह लक्षितं लक्षणयुक्तत्वेन वर्णितम् । स्वरूपं च सकलद्वात्रिंशल्लक्षणैः समं लक्षितम् । **नाकिनायकैरपि** देवश्रेष्ठैरपि **माननीयम्** । एतदप्युभयसाधारणम् ॥*॥ **एकविंशतिकुभाष्यदूषकम्** । ब्रह्मसूत्रगणानां वादिभिः कृतानि यान्येकविंशतिकुभाष्याणि तानि दूषयतीत्येकविंशतिकुभाष्यदूषकम् । तानि च भाष्याण्युच्यन्ते– 'भारतीविजयश्चैव संविदानन्द एव च । ब्रह्मघोषः शतानन्द उद्वर्तश्चैव पञ्चमः । विजयो रुद्रभट्टश्च[२] वामनाख्यस्तथाऽष्टमः । स यादवप्रकाशश्च नवमस्तत्र कीर्तितः । रामानुजस्तथा भर्तृप्रपञ्चो द्रविडस्तथा । ब्रह्मदत्तो भास्करश्च पिशाचो वृत्तिकारकः । तथा विजयभट्टश्च विष्णुक्रान्तस्तथैव च । वादीन्द्रस्तु ततः पश्चात् ततो माधवदासकः । ततः पश्चात् सङ्करश्चेत्येकविंशतिवादिभिः । प्रणीतानि निराचक्रे कुभाष्याणि महामतिः'। **भूतभाविभवदात्मभिः** भूतभविष्यद्वर्तमानजीवैः **क्वचिदप्यदूष्यम्** । [स्वरूपमपि तथा] ॥ ८ –१२ ॥

(त.चं.) व्यासदेवहृदयातिवल्लभम् । पञ्चभिः कुळकम् । भाष्यस्य भाष्यकृतश्च समानानि विशेषणानि । सकलदोषवर्जितम् । वासुदेवस्येदं विशेषणम् । न भाष्यस्य । अस्तदूषणमिति हि यावद् विशिनष्टि । अगणय्यसद्गुणं सकलदोषवर्जितं च वासुदेवं साधयद् रूपमन्यदिव मध्वस्य । उक्तउक्तेऽभिधेये संवादि वेदवाक्यमनुवादयत्, तेन च उक्तमुक्तमभिधेयमुत्तमं व्यञ्जयत् । अनूदितस्य वेदवाक्यस्य चार्थं स्मृतिवचोभिर्व्यञ्जयत् । अप्रमेयहृदयम् । हृदयमिति मनसः स्थानमुच्यते । हृदयमिति मन उच्यते । हृदयमिति मनसि गतमप्युच्यते । लक्षितं सकललक्षणैः समम् । न क्वचिदेकेन, अपरत्र चान्येन लक्षणेन लक्षितम् । किन्तु सर्वत्र सकललक्षणैः । कानि लक्षणानि?

---

१. 'सूत्रानुसारिभिः' इति च क्वचित् । २. 'रुद्रभट्टिश्च' इति पाठान्तरम् ।

अल्पाक्षरैर्विश्वतोमुखैश्च पदैः सूत्राणामर्थवर्णनम् । यत्र पुनरस्फुटता प्रमाण-सापेक्षता वा तत्र सप्रमाणोदाहरणं स्वपदानामप्यर्थवर्णनमिति । अन्ययोग-व्यवच्छेदाय वस्तुस्थितिपरिच्छेदाय च लक्षणानि भवन्ति । एकविंशतिकु-भाष्याणि भावप्रकाशिकायां स्फुटानि । कुभाष्यकृतां नामानि श्लोक-निबद्धानि टीकासु पठ्यन्ते । न सा पण्डिताचार्यकृतिः । पाश्चात्यैर्विरचितानि तानि पद्यानि । अत एव तत्र कालसाङ्गत्यं न दृश्यते । 'ततः पश्चात् सङ्करश्च' इत्यादिना तद्वचनेन सर्वेभ्यः पाश्चात्यमेकविंशं कुभाष्यं शाङ्करमिति प्रतीयते । तत् तन्नाऽदरणीयम् । नहि कालानुगुणेयमानुपूर्वी । किन्तु दोषा-नुगुणा । अत एव समस्तदोषाकरं शाङ्करं भाष्यमन्ते परिजगाद । ततोऽल्प-दोषान् भास्कररामानुजादीन् कालतः पाश्चात्यानपि पूर्वमुल्लिलेख । अहो कथङ्कारं पण्डिताचार्यस्य कृतज्ञतामर्पयामः । एतदुपज्ञं हि किलैवमेषां कुभाष्यकृतां नामानि श्रूयन्ते । पञ्चषाण्येव भाष्याणि सम्प्रति समुपलभा-महे । यद्यत्र नावक्ष्यत् पण्डिताचार्यः कदाऽपि नापारयिष्याम एकविंशतिकु-भाष्याणां वार्त्तामपि श्रोतुम् । भूतभाविभवदात्मभिः । 'भुवश्च' [६.५९] इति दशपादिका । गमेरिव भुवश्च धातोरिनिः प्रत्ययो भवति णिच्च भविष्य-दर्थे । आगमिष्यतीत्यागामी । भविष्यतीति भावी । ते भवन्तः, वर्तमाना इत्ये-तत्, ये सम्प्रति भवन्ति । ये भविष्यन्ति ते भाविन इति ॥ ८–१२ ॥

गाङ्गमङ्गलतरङ्गभङ्गदप्रान्तसुश्रिहरिवेश्मकृत्समः ।
यद्गतैकतमवर्णलेखकः सत्यतीर्थ इह भाष्यमालिखत् ॥ १३ ॥

(प.दी.) **गाङ्गे**ति । इह श्रीमद्भाष्यनिर्माणसमये **सत्यतीर्थः भाष्य-मालिखत्** । कथम्भूतम्? **यद्गतैकतमवर्णलेखकः**, यस्मिन् श्रीमद्भाष्ये विद्यमा-नस्य,एकतमस्याप्यक्षरस्य लेखनं कुर्वन् पुरुषः, **गाङ्गमङ्गलतरङ्गभङ्गद-प्रान्तसुश्रिहरिवेश्मकृत्समः**, गाङ्गानां गङ्गासम्बन्धिनां मङ्गलानां तरङ्गाणां भङ्गदे क्षयप्रदे प्रान्ते तीरे सुश्रिहरिवेश्मकृत्समः, शोभना श्रीर्यस्य तत् सुश्रि,

'ह्रस्वो नपुंसके प्रातिपदिकस्य' इति ह्रस्वः, सुश्रि च तद्धरिवेश्म च तथोक्तम्, तस्य कर्त्रा समः । गङ्गातीरे शोभनहरिमन्दिरनिर्माणेन यत् सुकृतं तत् तद्भाष्यगतैकतमाक्षरलेखनेन भवेदिति भावः । एतादृशं भाष्यमादौ सत्यतीर्थोऽलिखत् ॥ १३ ॥

(त.चं.) सुश्रिहरिवेश्म । शोभना श्रीरस्येति सुश्रि हरिमन्दिरम् । अजन्तस्य प्रातिपदिकस्य ह्रस्वः । 'ह्रस्वो नपुंसके प्रातिपदिकस्य' [१.२.४७] इति हि पाणिनिः । सत्यतीर्थ इह भाष्यमालिखत् । सत्यतीर्थः पत्रगतं चकार यद् भाष्यकारेण मनसि कृतम् । स्मरणं ग्रन्थकृतिः । आनुपूर्व्या मनसि करणम् । लेखनं तस्य लिपिकरणम् । लिख अक्षरविन्यासे । ग्रन्थकरणमन्यत् । लिपिकरणमन्यत् । क्वचिद् ग्रन्थकृदेव लिपिकृदपि स्यात् । तत्रापि समानाधिकरणतैव पदार्थयोः । नैकता । कश्चित् स्मरति । बहवः श्रावंश्रावं लिखन्ति । केचित् स्मरन्तो लिखन्ति; लिखन्त एव च स्मरन्ति । सत्यतीर्थः स्मरणसमकालं प्रथममालिखत् । अनन्तरं हृषीकेशतीर्थादयः । आदौ लिखनं ह्यालिखनं नाम । इह अनन्तमठे वा । सत्यतीर्थः अच्युतप्रज्ञस्य यः पीठमुत्तराधिकारी भवन्नारुरोह । यस्य मठद्वयं श्रूयते 'भण्डारकेरि' [ಭಂಡಾರಕೇರಿ]मठ इति 'भीमन कट्टे' [ಭೀಮನ ಕಟ್ಟೆ]मठ इति च । अयमपि चाच्युतप्रज्ञेनैव स्वीकृतसन्यासः सम्भाव्यते । 'मध्वविलासः' इति कश्चनार्वाक्तनोऽसङ्गतश्च ग्रन्थः सत्यतीर्थकृतिरिति केचित् । अनुपासितवृद्धानामनधीतप्रतनग्रन्थानामनवगतपरमार्थानामबोधविलसितमेव तत् ॥ १३ ॥

तत्र देवमभिवन्द्य यातवान् स्वामिनो वचनगौरवाद् द्रुतम् ।
सानुगो विविधभूरतीत्य गोदावरीतटमगादलेशधीः ॥ १४ ॥

(प.दी.) तत्रेति । तत्र अनन्तमठे **देवमभिवन्द्य स्वामिनः** नारायणस्य **वचनगौरवात्** 'अविळम्बितं व्रजेः'इति नारायणवचनगौरवात् **द्रुतं यातवान्** । ततो गतः सन् **अलेशधीः** श्रीपूर्णप्रज्ञाचार्यः **सानुगः** सपरिवारः

विविधभूः नानादेशान् **अतीत्य गोदावरीतटमगात्** प्राप्तः । तत्र विविध-भूरिति प्रयोगे गतिश्चिन्तनीया ॥ १४ ॥

(त.चं.) विविधभूः । ननु कथं शसि भूरिति? तर्हि त्वमपि पृच्छ्यसे कथं शसि स्त्रीरिति? ननु पाणिनिना मुखत उक्तम्–'स्त्रियाः' [६.४.७९] 'वाऽम्शसोः' [६.४.८०] इयङादेश इति । तर्हि अन्यदपि पठ्यतां सूत्रम्–'भुवो वा शसि' उवङादेश इति । ननु न पठितं प्राचीनैः । अत एवेदानीं पठ्यते । ननु पुरातनैः पठ्यते । पुरातनाः पेठुरिति वयमनुसराम एव केवलं चक्षुषी निमील्य । अहो वैयाकरणम्मन्य, अद्भुता प्रतिभा तत्रभवतः । उन्मीलय तावच्चक्षुषी । पाणिनिना न पठितमिति अक्षादूहिन्यामुपसङ्ख्यानं कात्यायनः पपाठ । केनाप्यपठितं पुंशब्दस्य सुपि 'पुङ्क्षु' इति रूपमनुभूति-स्वरूपाचार्यः पपाठ । कुर्मि कुर्वः कुर्म इति वाल्मीकिरपूर्वं पपाठ । बहुल-मेवंविधाः प्रयोगभेदा भवन्ति देशभेदेन च । पाणिनिरप्याह तत्रतत्र प्राचां मतेनेदं रूपमुदीचां मतेनेदं रूपमिति । ननु ते सर्वेऽपि पुरातनाः? तर्हीदमवगच्छ पुरातना अप्यधुनातना आसन् । अधुनातना अपि पुरातना भविष्यन्ति । ये तलस्पृशः, ये पारदृश्वानः ते कचिल्लीलया शास्त्रजलधिमतिक्रम्यापि जिगमिषन्ति । भूर्लोको भुवोलोकः स्वर्लोक इत्यादिश्रवणात् 'भूः' इति रेफान्तमव्ययं पदमित्यपि समादधते ॥ १४ ॥

प्राज्ञवित्तमयमाप्तुमागतैः
पण्डितैर्द्विनवशाखिभिः श्रुतीः ।
प्रस्तुता अभिदधौ परीक्षकैः
षट् च तत्र समयानखण्डयत् ॥ १५ ॥

(प.दी.) प्राज्ञेति । **अयं** श्रीपूर्णप्रज्ञाचार्यः **तत्र** गोदावरीतटे **प्राज्ञवित्तं** प्राज्ञलभ्यं वित्तम्, विद्याधिक्यतारतम्येन लभ्यमित्यर्थः । **आप्तुमागतैः द्विनव-**

शाखिभिः द्विनवशाखाभिज्ञैः **परीक्षकैः** आत्मानं परीक्षद्भिः **पण्डितैः** विद्वद्भिः **प्रस्तुताः** सूक्तखण्डादिमूलोच्चारणादिना प्रस्तुताः **श्रुतीः अभिदधौ** पाठतोऽर्थतश्चाभिदधौ । **षट् समयांश्चाखण्डयत्** । भाट्ट-भास्कर[1]-वैशेषिक-नैयायिक-बौद्ध-चार्वाकसमयान् निराचक्रे । 'समयाः शपथाचारकाल-सिद्धान्तसंविदः' इत्यमरः ।। १९ ।।

(त.चं.) द्विनवशाखिभिः । कास्ताः शाखाः? चतुर्विंशतिधा एकशतधा सहस्रधा द्वादशधा चेति संहत्य ११३७ शाखाः समस्तवेदानाम् । तासु द्विनवशाखास्तदात्वे प्रचलिता आसन्निति सम्भाव्यते । के च ते शाखिनः स्युः? ऐतरेयाः कौषीतकाः बाष्कलाः साङ्ख्यायनाः शाकलाः पैङ्गिन इत्यृक्शाखायाम् । तैत्तिरीयाः काठकाः कपिष्ठला मैत्रायणीयाः काण्वा माध्यन्दिनाश्चेति यजुष्षु । कौथुमा राणायनीया जैमिनीयास्तलवकारा इति सामसु । शौनकाः पैप्पलादा इत्यथर्वसु । सम्भावनामात्रं चेदम् । इदानीं नैतावत्योऽपि शाखा उपलभ्यन्ते । तदानीं काःका आसन्निति न स्फुटम् । तथ्यमन्वेष्टव्यं भवति । अष्टादश विद्याप्रभेदा वा द्विनवशाखा उच्यन्ते– चत्वारो वेदाः, षडङ्गानि, मीमांसा, न्यायशास्त्रम्, धर्मशास्त्रम्, पुराणानि चेति चतुर्दश । आयुर्वेदो धनुर्वेदो गान्धर्वमर्थशास्त्रं चेत्याहत्य द्विनव शाखाः । वेदशाखा इति स्वरसम् । उत्तरश्लोकसंवादात् । षट् च समयान् । के ते समयाः? साङ्ख्ययोगौ नैयायिकवैशेषिकौ भाट्टप्राभाकरौ चेति षड् वैदिकम्मन्याः समयाः । भाट्टप्राभाकरावेकीकृत्य पूर्वमीमांसा उत्तरमीमांसाकम्मन्या मायावादिमुखाश्चेति वा । साङ्ख्ययोगौ जैनबौद्धौ नैयायिकवैशेषिकौ चेति वा । भाट्ट-प्राभाकर-वैशेषिक-नैयायिक-बौद्ध-चार्वाकान् षट् समयानित्यपि वदन्ति ।। १९ ।।

ते पृथक्पृथगमुं स्वशाखया
दर्शनेन च परीक्ष्य निर्जिताः ।

---

१. 'प्राभाकर-' इति तु स्वरसम् ।

सर्ववित् त्वमसि मुख्यतः कवे
नास्ति ते सदृश इत्यथाब्रुवन् ॥ १६ ॥

(प.दी.) त इति । **ते** द्विजाः **अमुं** श्रीमध्वाचार्यं **पृथक्पृथक्** प्रत्येकं **स्वशाखया दर्शनेन च** स्वस्वशाखया स्वस्वसिद्धान्तेन च **परीक्ष्य निर्जिताः** सन्तः **अथ कवे** ज्ञानिन्, **त्वं मुख्यतः सर्ववित्** सर्वज्ञः **असि । ते सदृशो नास्ति इत्यब्रुवन्** ॥ १६ ॥

(त.चं) अथाब्रुवन् । कार्त्स्न्येनाब्रुवन् ॥ १६ ॥

यस्त्रयीसकलपक्षशिक्षकस्तत्र संसदि वरिष्ठसम्मतः ।
शोभनोपपदभट्टनामकः पूर्णसञ्ज्ञमनमन्मुहुर्मुदा ॥ १७ ॥

(प.दी.) य इति । **शोभनोपपदभट्टनामकः**, शोभनपदमुपपदं यस्य तत् शोभनोपपदम्, शोभनोपपदं भट्टनाम यस्य सः शोभनोपपदभट्टनामकः, शोभनभट्टाख्य इति यावत्, **पूर्णसञ्ज्ञं** श्रीपूर्णप्रज्ञाचार्यं **मुदा मुहुरनमत्** । **यः** शोभनभट्टः **त्रयीसकलपक्षशिक्षकः** त्रय्याः वेदस्य सकलपक्षाणां सर्वदर्शनानां च शिक्षकः, तत्रतत्र विप्रतिपत्तौ सत्यामेवमेवेति निर्णेता । **तत्र संसदि** तस्यां सभायां **वरिष्ठसम्मतः** अयमेव वरिष्ठ इति सर्वैः सम्मतः । अथवा वरिष्ठस्य श्रीमध्वाचार्यस्य सम्मतः प्रिय इति वा ॥ १७ ॥

(त.चं.) मुहुः क्रियासमभिहारेणानमत् ॥ १७ ॥

यस्तु तार्किकशिखामणिः सुधीर्वर्तमानसमयान् निराकरोत् ।
वेदभारतपुराणनिष्ठितो भाष्यमेतदशृणोत् स मध्वतः ॥ १८ ॥

(प.दी.) यस्त्विति । **यस्तु तार्किकशिखामणिः** तार्किकाणामुत्तमः **सुधीः वर्तमानसमयान्** तस्मिन् काले वर्तमानान् भाट्टादिसमयान् **निराकरोत्**

निराचक्रे । स्वयं तु **वेदभारतपुराणनिष्ठितः** वर्तमानसमयेष्वन्यतमपक्ष-पातं विहाय वेदभारतपुराणोक्ताचारोपासने निरतः । एवम्भूतः **सः** शोभनभट्टः **मध्वतः एतद् भाष्यं** श्रीमध्वाचार्यकृतब्रह्मसूत्रगणभाष्यं **अशृणोत्** ॥

(त.चं.) वेदभारतपुराणनिष्ठितः वर्तमानसमयान् निराकरोत् । अत एव वेदभारतपुराणप्रचुरं वर्तमानसमयान् निराकुर्वच्च भाष्यमशृणोत् ॥ १८ ॥

नापरेषु रतिमाययौ क्वचित् भाष्यमद्भुतमिदं स शुश्रुवान् ।
नारविन्दमकरन्दमाप्तवानच्छपिच्छ इव[1] वाञ्छतीतरत् ॥ १९ ॥

(प.दी.) नेति । स शोभनभट्टः **अद्भुतमिदं भाष्यं** श्रुतवान् **शुश्रुवान्**[2] । **अपरेषु** इतरशास्त्रेषु **रतिं** सुखं **नाऽययौ** । क इव? **अरविन्दमकरन्दं** अरविन्दस्य मकरन्दं **आप्तवान्**, 'मकरन्दः पुष्परसः' इत्यमरः, **अच्छपिच्छः** श्वेतच्छदः हंस इति यावत्, **इतरत्** अन्यत् पुष्पमधु **न वाञ्छतीव** । यथा न वाञ्छेत् तद्वदिति भावः ॥ १९ ॥

(त.चं.) 'भाष्यमद्भुतमिदं श्रुतवान् सः' इति क्वचित् पठ्यते । छन्दस्तु कुप्यति । रथोद्धता हि छन्दोगतिरत्र । रनरा लगौ च रथोद्धता । 'श्रुतवान् सः' इति पाठे स्वागतं नाम च्छन्दो भवति । रनभा गुरुद्वयं च हि स्वाग-तम् । अल्पीयान् भेदः । नवमदशमयोः गुरुलघुव्यत्ययेन छन्दोद्वयं भवति । तेन पाठसाङ्कर्यं सम्भाव्यते । अथ तथैव यदि मूलपाठः तर्हीयमुपजातिः स्वागतरथोद्धतयोर्मेळनेन । अपूर्वोऽयमुपजातिप्रभेद इति स्वागतं स्वागता-यापि च्छन्दसे ॥ १९ ॥

१.'इह वाञ्छतीतरत्' इति पाठः स्वरसः इति भाति ।

२.एतदनुसारेण 'भाष्यमद्भुतमिदं श्रुतवान् सः' इति मूलपाठ इति प्रतीयते । अन्यथा 'शुश्रुवान् श्रुतवान्' इत्यानुपूर्वी स्यात् । लिपिकृत्प्रमादः सम्भाव्यते । अन्यथा हि मूले छन्दोऽन्तरं स्यात् । अत एव विश्वपतितीर्थीये–'शुश्रुवान् श्रुतवान् सन्' इत्येव पठ्यते ।

तत्रतत्र स सभासु भासुरो
नन्दितीर्थसमयोक्तयुक्तिभिः ।
वादिनो विशकलय्य तान् समा-
क्रम्य वाचमुचितामुदाहरत् ॥ २० ॥

(प.दी.) तत्रेति । **भासुरः सः तत्रतत्र सभासु वादिनः** कुवादिनः **नन्दितीर्थसमयोक्तयुक्तिभिः** श्रीमदानन्दतीर्थाचार्यशास्त्रोक्तयुक्तिभिः **विशकलय्य** निराकृत्य **तान्** स्वनिराकृतान् वादिनः **समाक्रम्य** अगणयित्वा **उचितां वाचमुदाहरत्** ॥ २० ॥

(त.चं.) नन्दितीर्थः आनन्दतीर्थः । नन्दिरानन्दः । तद् यथा—'कौसल्यानन्दिवर्धनो रामः' इति । विशकलय्य खण्डयित्वा । शक्यते भेत्तुमिति शकलम् । शकेः कलः प्रत्ययः । शकलं करोति शकलयति । तत् करोतीति णिच् । समाक्रम्य, उद्धृत्य विजित्य ॥ २० ॥

चूर्णकृद् विविधशङ्खचूर्णक-
श्चूर्णनाय बहुधाऽप्यशक्नुवन् ।
अत्यजद् विफलधीः प्रदक्षिणा-
वर्तवारिजमनर्घमप्यहो ॥ २१ ॥

(प.दी.) चूर्णेति । **विविधशङ्खचूर्णकः** उच्चावचनानाविधशङ्खान् चूर्णयन् **चूर्णकृत्** ताम्बूलचर्वणाङ्गभूतचूर्णस्य कर्ता कश्चित् **अनर्घमपि प्रदक्षिणावर्तवारिजं** प्रदक्षिणावर्तशङ्खं **अत्यजत्** परित्यक्तवान् । कथम्भूतः? **बहुधाऽपि** मूषाग्निनिक्षेपणादिना नानाविधप्रयत्नेनापि **चूर्णनाय** चूर्णीकर्तुं **अशक्नुवन्** असमर्थः । अत एव **विफलधीः** निष्फलमेतदिति बुद्धियुक्तः । **अहो** आश्चर्यमेतन्मौढ्यमिति भावः ॥ २१ ॥

(त.चं.) चूर्णकृत् । चूर्णम्— 'सुण्ण'[ಸುಣ್ಣ] इति भाषायाम् । शङ्खः—

'चिप्पु' [ಚಿಪ್ಪು] इति भाषायाम् । विफलधीः । भगवद्दत्तामपि धियमयमहो विफलीचकारेति । प्रदक्षिणावर्तवारिजम् ।'बलमुरिशङ्ख'[ಬಲಮುರಿ ಶಂಖ] इति भाषायाम् ॥ २१ ॥

अप्रमेयमतिशास्त्रमीदृशं
यस्त्यजत्युपनतं सुदुर्लभम् ।
तस्य तुल्यमतिरेष दुर्जनो
नाथवाऽस्य सदृशोऽस्ति नीचधीः ॥ २२ ॥

(प.दी.) वक्ष्यमाणार्थे दृष्टान्तमभिधाय दार्ष्टान्तिकमाह –**अप्रमेये**ति । **यः** पुरुषः **उपनतं** संसर्गादिवशात् प्राप्तं **सुदुर्लभं** भाग्यरहितानामतिदुर्लभम्, **ईदृशं** प्रदक्षिणावर्तवारिजसदृशम् **अप्रमेयमतिशास्त्रं** श्रीपूर्णप्रज्ञाचार्यशास्त्रं **त्यजति** पुरुषार्थप्रदं न भवतीति बुद्ध्या परित्यजेत्, **एष दुर्जनः तस्य** प्रदक्षिणावर्तशङ्खं त्यक्तवतः **तुल्यमतिः** सदृशबुद्धिः । **अथास्य** श्रीमध्वशास्त्रं त्यजतः **सदृशो नीचधीः नास्ति वा** । अथेति पक्षान्तरसूचकम् ॥ २२ ॥

(त.चं.) अथवा अस्य सदृशोऽन्यो नीचधीरेव नास्ति । यद्ययं केनचिदुपमीयते तदोपमानस्यैवापमाननं स्यात् ॥ २२ ॥

कोऽपि तं गुणविशेषविच्च विक्रीय भूरि धनमाप पूरुषः ।
न ह्यनर्घगुणमूल्यमाप्यते भाग्यदैवमिह योग्यतानुगम् ॥ २३ ॥

(प.दी.) क इति । **गुणविशेषवित्** प्रदक्षिणावर्तशङ्खस्य गुणविशेषं जानन् **कोऽपि** कश्चित् **पूरुषः तं विक्रीय भूरि धनमाप च** । भूरि अपरिमितमेव धनमापेति भावः । तत् कुतः? **अनर्घगुणमूल्यम्,** अनर्घः अर्घरहितः गुणो यस्य पदार्थस्य सोऽनर्घगुणः, तस्य मूल्यं केनापि **नाऽप्यते** । **हि** यस्मात् तस्मात् तं विक्रीय स्वभाग्यानुसारेण भूरिधनमाप । तथाहि– **इह** लोके **भाग्यदैवं** भाग्याख्यादृष्टविशेषस्य नियामकं दैवतं **योग्यतानुगम्** । पुरुषस्य योग्यतामनुसृत्य फलं ददातीति भावः ॥ २३ ॥

(त.चं.) क्रायकाय विक्रीय । मूल्यं दत्वा वस्तुग्रहणं क्रयः । वस्तु दत्वा मूल्यग्रहणं विक्रयः । यद्यपि विक्रीय भूरि धनमाप । अथाप्यमूल्यस्य कियन्मूल्यं तत् । भाग्यदैवमिति भागधेयम् ॥ २३ ॥

व्यक्तमुन्नतिमितोऽप्ययं जन-
स्तस्य यन्न लभतेऽखिलं फलम् ।
स्तोकमानसतया ततो व्रजेत्
तस्य हन्त पुरुषस्य तुल्यताम् ॥ २४ ॥

(प.दी.) व्यक्तमिति । **अयं जनः**, आत्मन एव परोक्षतया निर्देशः, अहमिति यावत्, **व्यक्तं** सम्यक् स्वयोग्यतानुसारेण **उन्नतिं** ज्ञानभक्त्यादिगुणैराधिक्यम् **इतोऽपि** प्राप्तवानपि सन् **स्तोकमानसतया** अल्पज्ञानतया **तस्य** श्रीमध्वशास्त्रस्य **अखिलं** सम्पूर्णं **फलं न लभते** न प्राप्नोतीति यत् ततः तस्मात् **तस्य** प्रदक्षिणावर्तवारिजं विक्रीय भूरि धनमाप्तवतः **पुरुषस्य तुल्यतां व्रजेत्** । **हन्त** हर्षे ॥ २४ ॥

(त.चं.) 'स्तोकस्त्रिष्वल्पे चातके पुमान्' ॥ २४ ॥

क्रीतवान् नरपतिर्महादरं सादरं पुनरुदारचेष्टितः ।
अर्चयन् सततमाप सम्पदो या न ता वचनचित्तगोचराः ॥ २५ ॥

(प.दी.) क्रीतवानिति । **महादरं** महाशङ्खं **क्रीतवान्** धनं दत्वा स्वीकृतवान् प्राप्तवान्, **उदारचेष्टितः नरपतिः पुनः सादरं सततमर्चयन् याः सम्पदः आप ताः वचनचित्तगोचराः न** ॥ २५ ॥

(त.चं.) महान् दरः शङ्खः । शमयति पापमिति शङ्खः । शमेः खः । 'दर्शनादेव शङ्खस्य किम्पुनः स्पर्शनेन च । विलयं यान्ति पापानि तमः सूर्योदये यथा' । दरयति दारयति वा दैत्यनारीगर्भानिति दरः । 'गर्भा

देवारिनारीणां विशीर्यन्ते सहस्रधा। तव नादेन पाताळे पाञ्चजन्य नमोऽ-
स्तु ते' इति च ॥ २५ ॥

शास्त्रकल्पकतरोरमुष्य कः प्राप्नुयात् सकलमप्यहो फलम् ।
यस्तमुत्तमगुणं विडम्बयेदित्युदीर्य स जनानरञ्जयत् ॥ २६ ॥

(भा.प्र.) कः प्राप्नुयात् ? ब्रह्मा च॥

(प.दी.) **शास्त्रे**ति । **अमुष्य** श्रीमध्वाचार्यप्रणीतस्य **शास्त्रकल्पकतरोः** शास्त्राख्यकल्पवृक्षस्य **सकलमपि फलं कः प्राप्नुयात्?** न कोऽपि प्राप्नुयात् । **कः** ब्रह्मा **प्राप्नुयात्** इति । **अहो** ब्रह्मैव हि सर्वशास्त्रोक्ततत्तत्फलप्राप्तियोग्यः । **यः उत्तमगुणं** तं नरपतिं **विडम्बयेत्** प्रदक्षिणावर्तवारिजं क्रीत्वा सादरमर्चतो नरपतेः सम्पदो यथा न वचनचित्तगोचराः एवमेवैतच्छास्त्रकल्पतरोरखिलं फलं प्राप्तवतो विरिञ्चस्य सम्पदोऽपीति भावः । **स** शोभनभट्टः **इत्युदीर्य जनानरञ्जयत्** अतोषयत् ॥ २६ ॥

(त.चं.) सङ्कल्पितंसङ्कल्पितं कल्पयतीति कल्पकस्तरुः । विडम्बयेत् अनुकुर्यात् । क इति नारायणस्य चतुर्मुखस्य वायोर्दक्षप्रजापतेश्च नाम ॥

नेदृशैः कविभिरेव केवलं हन्त पूज्यचरणोऽभ्यपूज्यत ।
शर्वशक्रगुरुपूर्वदैवतैरप्यलं सुसमयोद्गमोत्सवे ॥ २७ ॥

(प.दी.) नेति । **पूज्यचरणः** श्रीमध्वाचार्यः **सुसमयोद्गमोत्सवे** शोभनशास्त्रनिर्माणोत्सवे **केवलमीदृशैः कविभिः** विद्वद्भिः **एव नाभ्यपूज्यत** । किन्तु **शर्वशक्रगुरुपूर्वदैवतैरप्यलमभ्यपूज्यत** । **हन्त** हर्षे ॥ २७ ॥

(त.चं.) गुरुर्देवगुरुर्बृहस्पतिः ॥ २७ ॥

निम्नभूरिव सतीः प्रजा व्रजन् वारिदर्तुरशनैरपूरि सः ।
प्राज्यतापहरदर्शनाम्बुना तुङ्गदेशमिव दुर्जनं तु नो ॥ २८ ॥

(प.दी.) निम्नेति। **व्रजन्** **सः** श्रीमध्वाचार्यः **प्राज्यतापहरदर्शनाम्बुना** बहळसंसारक्लेशहरेण दर्शनाख्येन जलेन **सतीः प्रजाः** सत्तत्वज्ञानयोग्याः प्रजाः **अशनैः** क्षिप्रं **अपूरि** पूरयामास । कः किमिव? **वारिदर्तुः** प्रावृट्कालः **निम्नभूरिव** निम्नप्रदेशानिव । **दुर्जनम्** अयोग्यजनं **तु नो** अपूरि । किमिव? **तुङ्गदेशमिव वारिदर्तुः** उन्नतस्थलमिव । तत्रतत्र व्रजन् मध्वः सद्भ्यः स्वदर्शनं श्रीतत्ववादाख्यदर्शनं ददौ; दुर्जनेभ्यो न ददाविति भावः ॥ २८ ॥

(त.चं.) निम्नभूरिव । दत्तोत्तरमेतत् । प्राज्यमदभ्रं बहळम् ॥ २८ ॥

कर्मभिः सकललोककौतुकैर्मानितः पथि जनैः समागतः ।
सन्ननाम शिवनामकीर्तनं राजतासनपुरे विराजितम् ॥ २९ ॥

(प.दी.) कर्मभिरिति । **पथि सकललोककौतुकैः** सकलजनकुतूहलकारणैः **कर्मभिः जनैर्मानितः** पूजितः सन् **समागतः**, **राजतासनपुरे** रजतासनसम्बन्धिनि पुरे **विराजितं शिवनामकीर्तनम्**, शिव इति नाम शिवनाम, तदेव कीर्तनम्, कीर्त्यते अनेनेति कीर्तनं वाचकं यस्य स तथोक्तः, तं **सन्ननाम** ॥ २९ ॥

(त.चं.) शिवनामकीर्तनं नारायणम् । अनन्तेश्वर इति जानपदाः । महादेव इति शासनेषु । सकललोकानां कौतुकं येभ्यः । 'कौतुकं त्वभिलाषे स्यादुत्सवे नर्महर्षयोः । तथा परम्परायातमङ्गले च कुतूहले' ॥ २९ ॥

अच्युतप्रमतिरच्युतप्रियं तं दशप्रमतिमागतं तदा ।
वन्दमानमवलोक्य यां मुदं प्राप्तवांस्तदवधिर्न विद्यते ॥ ३० ॥

(प.दी.) अच्युतेति । **तदा अच्युतप्रमतिः अच्युतप्रियं वन्दमानं तं दशप्रमतिं** श्रीपूर्णप्रज्ञाचार्यं **आगतमवलोक्य यां मुदं** सन्तोषं **प्राप्तवान् तदवधिः** तस्याः मुदोऽवधिरियत्ता **न विद्यते** ॥ ३० ॥

(त.चं.) अच्युतप्रमतिः । अच्युतप्रज्ञः । अच्युतप्रियं दशप्रमतिम् ।'दश-प्रमतिं जनयन्त योषणः' इति श्रुतिः । 'दशेति पूर्णमुद्दिष्टं सर्वं पूर्णमिहोच्यते । प्रज्ञा प्रमतिरुद्दिष्टा पूर्णप्रज्ञस्ततः स्मृतः' । आगतम्, आगत्य च वन्दमानमवलोक्य ॥ ३० ॥

प्रीतिमार्ययतिरुत्तमां पुरा
प्रेषिताप्रतिमभाष्यदृग् ययौ ।
अप्यतोऽतिशयिनीं शुचिस्मितं
तं विलोक्य सुचिराद् दिदृक्षितम् ॥ ३१ ॥

(प.दी.) प्रीतिमिति । **पुरा** एतदागमनात् पूर्वमेव **प्रेषिताप्रतिमभाष्यदृक्** श्रीमध्वाचार्येण पुरस्ताद् प्रेषितासदृशभाष्यं दृष्टवान् । **आर्ययतिः** ज्येष्ठयतिः **उत्तमां प्रीतिं ययौ** । इदानीं पुनः **सुचिराद् दिदृक्षितं** द्रष्टुमिष्टं **शुचिस्मितं तं** श्रीमध्वाचार्यं **विलोक्य अतोऽपि** प्रेषिततत्कृतभाष्यदर्शनजातायाः प्रीतेरपि **अतिशयिनीं प्रीतिं ययौ** ॥ ३१ ॥

(त.चं.) आर्ययतिरिति ज्येष्ठयतिः । वयसा वृद्धो ह्यार्य उच्यते । तथाहि रामायणे भरतवचनम्– 'यथाऽऽर्यो लक्ष्मणस्तथा' इति ॥ ३१ ॥

पूर्णदृष्टिजलधेर्गृहीतवान्
भाष्यसञ्ज्ञममृतं सुखावहम् ।
चित्रमेष यतिराड्धनाघनो
ग्राहयंश्च मनुजान् मुमोच नो ॥ ३२ ॥

(प.दी.) पूर्णेति । **पूर्णदृष्टिजलधेः** श्रीपूर्णप्रज्ञाचार्याख्यसमुद्रात् 'दृष्टिज्ञानेऽक्ष्णि दर्शने' इत्यमरः, **भाष्यसञ्ज्ञं** भाष्यनामकं **सुखावहममृतं** जलम्, 'पयः कीलालममृतं जीवनं भुवनं वनम्' इत्यमरः, **गृहीतवान्** सङ्गृहीतवान्

एष यतिराड्घानाघनः, लिकुचान्वययतिश्रेष्ठाख्यः घनाघनः वर्षुकाब्दः, 'शक्रघातुकमत्तेभवर्षुकाब्दा घनाघनाः' इत्यमरः[1], **मनुजान् ग्राहयंश्च** स्वयं **नो मुमोच**। **चित्रं** एतदाश्चर्यम्। अयं भावः– वर्षुकमेघो जलधेर्जलं सङ्गृह्य देशान्तरे वर्षन् स्वयं जलं मुञ्चति। रिक्तो भवतीत्यर्थः। अयं यतिश्रेष्ठस्तु श्रीमध्वाचार्याद् भाष्यं श्रुत्वा शिष्येभ्यो व्याकुर्वंश्च नो मुमोच, अतितरां तन्निरतोऽभूदिति भावः ॥ ३२ ॥

(त.चं.) हन्तीति घनाघनो मेघः। हन्तेर्घत्वं च, द्वित्वं चाचि, आक् चाभ्यासस्य। हन्ति गगने। हन्ति क्षामम्। यतिराडपि हन्ति जानाति शास्त्रार्थम्। हन्त्यज्ञानं जनानाम् ॥ ३२ ॥

सानुनीतिरथ नीतिमानयं
भाष्यसद्गुणगणानवर्णयत्।
शोभनाय गुरवे स्वभावतः
कालतः कुमतलीनबुद्धये ॥ ३३ ॥

(प.दी.) सानुनीतिरिति। **अथ** कस्मिंश्चित् समये **सानुनीतिः** अनुनयसहितः **नीतिमानयं** श्रीमध्वाचार्यः **स्वभावतः शोभनाय** सज्जीवाय **कालतः** कलिकालवशात् **कुमतलीनबुद्धये** कुत्सितमायिमतेन निगूढबुद्धये **गुरवे भाष्यसद्गुणगणान्** स्वकृतभाष्यसद्गुणसमूहान् **अवर्णयत्** ॥ ३३ ॥

(त.चं.) सानुनीतिः। अनुनीतिः सान्त्वनम्। अनुनयेन तमुल्लाघयन्। नीतिमानुपायज्ञः। गुरवेऽच्युतप्रज्ञाय ॥ ३३ ॥

उक्तिभिस्तमसकृत् सुयुक्तिभि-
र्बोधयन् बहळधीः प्रसङ्गतः।

---

१. 'शक्रो घातुकमत्तेभो वर्षुकाब्दो घनाघनः' इति प्रचलितः पाठः। अत्र यत् कोशेषु पठ्यते– 'घनाघनः वार्षुकाब्दः' इति, '–वार्षुकाब्दा घनाघनाः' इति, 'वार्षुकमेघो जलधेर्जलम्' इति च, स लिपिकृत्प्रमादः। 'वर्षुक' इत्येव साधुपदम्।

स्थेयसो भिषगिवास्य हृद्गतं
मूलदोषमरुचेरचिन्तयत् ॥ ३४ ॥

(प.दी.) उक्तिभिरिति । **बहळधीः** श्रीपूर्णप्रज्ञाचार्यः **प्रसङ्गतः सुयुक्तिभिः** शोभनयुक्तियुक्ताभिः **उक्तिभिः** वचनैः **तं** स्वगुरुं **असकृत्** बहुवारं **बोधयन्**, **स्थेयसः**, 'स्थास्नुः स्थिरतरः स्थेयान् एकरूपतया तु यः'[१] इत्यमरः, बहुयुक्तिभिः बोधनेऽपि मायिशास्त्रप्रवणैकप्रकारबुद्धेरिति भावः, **अस्य** स्वगुरोः **हृद्गतं अरुचेः** स्वशास्त्रे रुच्यभावस्य **मूलदोषमचिन्तयत्** । अस्य सच्छास्त्रेऽरुचिनिदानभूतो दोषः क इति विचारयामास । अत्र स्थेयस इति नारुचिविशेषणम् । तथात्वे स्थेयश्शब्दस्य उगित्त्वात् ङीपि कृते स्थेयस्या इति भवेत् । क इव? **भिषगिव** । कस्यचिद् रोगचिकित्सां कुर्वन् भिषग् यथा रोगिणोऽरुचिनिदानं दोषं विचारयेत् 'आधिर्व्याधिर्वा' इत्यादि, तद्वदस्यापि 'शास्त्रेऽरुचिः किंनिबन्धना? स्वभावतो दुष्टबुद्धित्वाद् वा? उतोपाधितः?' इत्यचिन्तयदिति भावः ॥ ३४ ॥

(त.चं.) बहळधीः । बंहत इति बहळा धीः । बहि वृद्धौ । उलचि बहुलम् । अळचि बहळम् । व्यवस्थिता चेयं विभाषा । उलजेव नोळच् । अळजेव नालच् । प्राक्तनग्रन्थेषु तथा प्रयोगनैयत्यात् । स्थेयसः मायिशास्त्र एव निरूढाभिमानस्य । अस्य अच्युतप्रज्ञस्य । अरुचेः अप्रीतेः । रुच दीप्तावभिप्रीतौ च । अभिप्रीतिरभिलाषः । यद्वा नास्ति रुचिरस्येति अरुचेर-च्युतप्रज्ञस्य । रुच्यभाववति गतं स्थिरत्वं विशेषणं रुच्यभावे पर्यवस्यति । तद् यथा—'नित्यः सर्वगतः—' इति नित्यत्वं सर्वगतत्वस्य विशेषणम् ॥

दक्षपक्षविहृतेन ताडयन्
भीषयन् समधिकस्वरश्रिया ।

१.वस्तुतस्तु 'स्थास्नुः स्थिरतरः स्थेयान्' इतीयदेव पठनीयम् । 'एकरूपतया तु यः' इति तु 'कालव्यापी स कूटस्थः' इत्युत्तरान्वयि ।

हंसराट् कलिमलं निराकरो-
देकदृष्टिमिव मानसाद् गुरोः ॥ ३५ ॥

(भा.प्र.) एकदृष्टिमिव काकमिव [१] रूपिणम्, ऐक्यज्ञानमिव च । **मानसात्** मनसः सरःश्रेष्ठाच्च ॥

(प.दी.) दक्षेति । **हंसराट्** परमहंसः श्रीमध्वाचार्यः **गुरोर्मानसात्** मनसः **कलिमलं** कल्यावेशनिमित्तं मलं सच्छास्त्रारुचिनिदानं बुद्धिदोषं **निराकरोत्** । किमिव? **एकदृष्टिमिव** मूर्तिमतीं जीवब्रह्मणोरेकत्वदृष्टिमिव । **हंसराट्** हंसराडाख्यो विहङ्गमः **मानसात्** मानससरसः **एकदृष्टिमिव** काकमिव । किं कुर्वन्? **दक्षपक्षविहृतेन** शोभनसिद्धान्तयुक्तिकथनात्मकलीलया **ताडयन् समधिकस्वरश्रिया भीषयन्** । हंसराडपि काकं पक्षाभ्यां ताडयन् स्वरेण भीषयन् निराकुर्यात् ॥ ३५ ॥

(त.चं.) एकैव दृष्टिर्दर्शनक्षमा यस्य । 'एकदृग् बलिभुग् ध्वाङ्क्षश्चिरजीवी च वायसः' । सर्वमेकमिति दृष्टिश्च । ऐक्यज्ञानम् । ताडयन् आघातं जनयन् । तड आघाते । ऐक्यश्रद्धां शिथिलयन्निति यावत् ॥ ३५ ॥

निष्कळङ्कमिव चन्द्रमण्डलं पुण्डरीकमिव फुल्लतां गतम् ।
वारि शारदमिव प्रसादवच्चित्तमच्युतमतेर्भृशं बभौ ॥ ३६ ॥

(प.दी.) निरिति । **अच्युतमतेः चित्तं भृशं बभौ** । किमिव? **निष्कळङ्कं चन्द्रमण्डलमिव** । **फुल्लतां** विकासभावं **गतं पुण्डरीकमिव** । 'पुण्डरीकं सिताम्भोजम्' इत्यमरः । **प्रसादवत्** नैर्मल्ययुक्तं **शारदं वारीव** ॥ ३६ ॥

(त.चं.) पुण्डरीकम् । पुण्डयति भूषयति सरांसीति । सिताम्भोजमिति

१.अनपेक्षितमिवेदं पदम् । अथाप्येतदनुसारेण व्याख्यातमिव वेदाङ्गतीर्थीये– 'मूर्तिमतीमेकत्वदृष्टिम्' इति ।

कोशकृतो वदन्ति । शोणं तु वेदेषु पठ्यते– 'तस्य यथा कप्यासं पुण्ड-रीकम्','एकपुण्डरीकं पश्यति' इत्यादौ । चित्तमपि निष्कळङ्कं बभौ । फुल्लं बभौ । प्रसन्नं बभौ ॥ ३६ ॥

आननन्द स हि मध्वशास्त्रमाकर्णयन् कुसमयाग्रही पुरा ।
मोहपीतलवणोदको मुहुः प्राक् पिपासुरमृतं पिबन्निव ॥ ३७ ॥

(प.दी.) आननन्देति । पुरा **कुसमयाग्रही** कुसमये कुत्सितसमये आग्र-होपेतः पश्चात् **मध्वशास्त्रमाकर्णयन् सः आननन्द हि । पिपासुः** पिपा-सितः **प्राक् मुहुर्मोहपीतलवणोदकः** लवणोदकमित्यविज्ञाय पीतलवण-जलः पश्चात् **अमृतं पिबन्निव सः** अच्युतप्रज्ञः **आननन्द** ।[1] पुरा तत्व-बुभुत्सुः सन् मायिसमय एव तत्वावगमक इति मत्वा तच्छ्रवणादिना प्रवृद्ध-मिथ्याज्ञानः पश्चान्मिथ्याज्ञाननिवर्तकं मध्वशास्त्रमाकर्णयन्निति भावः ॥

(त.चं.) आकर्णयन् । कर्ण भेदने । केचित् कर्णधातुं न पठन्ति । विक्षेपार्थात् कृधातोरेव कर्णशब्दं व्युत्पादयन्ति । कीर्यत इति कर्णः । तदा आ समन्तात् कर्णं ददाति आकर्णयति ॥ ३७ ॥

विस्तृतान्तरवियत्पदौ यती अस्यतां सुसमयप्रकाशनात् ।
तौ यथा विधुरवी अहो अहोरात्रमप्युरुतमो नृमोहकम् ॥ ३८ ॥

(भा.प्र.) सुसमयप्रकाशनात् सुशास्त्रव्याख्यानात्, सुकालोदयाच्च ॥

(प.दी.) विस्तृतेति । **विस्तृतान्तरवियत्पदौ**, विस्तृतान्तरः श्रीपूर्ण-प्रज्ञाचार्यः, विस्तृतान्तराख्यं वियत्[2] आकाशं पदं आश्रयः ययोस्तौ तथो-क्तौ **तौ यती** लिकुचान्वयजो ज्येष्ठयतिः, अच्युतप्रज्ञश्च, **अहोरात्रमपि**

१.इतः परं कोशे–'कथम्भूतः? पिपासुः मोहपीतलवणोदकः पश्चात् अमृतं पिबन्' इत्य-धिकं पठ्यते। ततः– 'पुरा तत्वबुभुत्सुः–' इत्यादि। नातीवोपयुक्तम्; पुनरुक्तमिव च।
२.'वियदाख्यम्' इति क्वचित् । सम्पातायातम् ।

सुसमयप्रकाशनात् शोभनशास्त्रस्य प्रकाशनात् तद्व्याख्यानादिति यावत्, **नृमोहकं उरुतमः** महदज्ञानं **अस्यतां** निराकुरुताम् । काविव? **वियत्पदौ विधुरवी सुसमयप्रकाशनात्** सुकाले प्रकाशनाद् **अहोरात्रमुरुतमः** उर्वन्धकारं **यथा** । **अहो** आश्चर्यमनयोर्भाग्यमिति भावः ॥ ३८ ॥

(त.चं.) विस्तृतान्तरवियत्पदौ । अत्र द्वेधा पाठो दृश्यते । 'यती अस्यताम्' इति, 'यती आस्यताम्' इति । अस्यतामित्येव प्राचीनः पाठः । षो अन्तकर्मणि । अन्तकर्म विनाशः । अस्यतां व्यनाशयताम् । 'आस्यताम्' इति पाठे– 'असु निरसने' । यती अस्यताम्– 'ईत्-ऊत्-एद्-द्विवचनं प्रगृह्यम्'[१.१.११] । अहो अहोरात्रम्– 'ओत्' [१.१.१५] इति ओदन्तो निपातः प्रगृह्यसञ्ज्ञो भवति ॥ ३८ ॥

सज्जनान् सह महादरेण नॄन् पापिनां प्रकृतितोऽप्रियाकृति ।
दारुणाघगणदारणं स्म स ग्राहयत्यपि सुदर्शनद्वयम् ॥ ३९ ॥

(भा.प्र.) महादरेण महाबहुमानेन, शङ्खेन च । सुदर्शनं सच्छास्त्रं चक्रं च ॥

(प.दी.) **सज्जनानिति** । **सः** मध्वाचार्यः **सज्जनान्** तत्वज्ञानयोग्यान् **नॄन्** पुरुषान् **सुदर्शनद्वयमपि** शोभनं श्रीतत्ववादाख्यदर्शनं सुदर्शनचक्रं च **ग्राहयति स्म** ग्राहयामास । **महादरेण** महता आदरेण **सह, महादरेण** महता शङ्खेन च **सह** । कथम्भूतः? **पापिनां प्रकृतितः** स्वभावतः **अप्रियाकृति** अप्रियस्वरूपम् । तथाहि– पापिनामेतद्दर्शनं सुदर्शनं चेति द्वयमपि स्वभावतो दुस्सहं हि । पुनः कीदृशम्? **दारुणाघगणदारणं** दारुणपापराशिविदारणं हि ॥ ३९ ॥

(त.चं.) 'सुदर्शनोऽस्त्रियां चक्रे' । दरो विष्णोः करगत इति महान् । अयं वैष्णवो भविष्यन्नित्यादरोऽपि महान् ॥ ३९ ॥

नन्वनन्यशरणात्मनां सतां सिद्धिविघ्नमुखदोषभेषजम् ।
ऐच्छदच्छलदयोदयादयं रूप्यपीठपुरगः कदाचन ॥ ४० ॥

(प.दी.) नन्विति । अयं श्रीमध्वाचार्यः **कदाचन रूप्यपीठपुरगः** सन् **अच्छलदयोदयात्** निर्व्याजसज्जनविषयकृपोदयात् **अनन्यशरणात्मनां सतां** अन्यशरणरहितमनसाम्, अस्माकं श्रीमध्वाचार्य एव शरणं नान्य इति मनोयुक्तानां सताम्, **सिद्धिविघ्नमुखदोषभेषजं** मोक्षविघ्नमुखानां दोषाणां भेषजमौषधं **ऐच्छन्ननु** । सतां मोक्षविघ्नादिदोषप्रतीकारत्वेन श्रीकृष्णप्रतिष्ठां करिष्यामीत्यैच्छदिति भावः ॥ ४० ॥

(त.चं.) नन्वित्यनुनये । अवधारणे वा ॥ ४० ॥

गोपिकाप्रणयिनः श्रियःपतेराकृतिं दशमतिः शिलामयीम् ।
शिष्यकैस्त्रिचतुरैर्जलाशये शोधयन्निह ततो व्यगाहयत् ॥ ४१ ॥

(प.दी.) गोपिकेति । दशमतिः गोपिकाप्रणयिनः गोपिकावल्लभस्य **श्रियःपतेः** श्रीवल्लभस्य **शिलामयीं आकृतिं** प्रतिमां **जलाशये** तटाके **त्रिचतुरैः शिष्यकैः शोधयन्** मलक्षाळनं कारयन् **ततः** शोधनानन्तरं **इह** तटाके **व्यगाहयत्** अवगाहयामास, अभ्यषिञ्चदिति भावः ॥ ४१ ॥

(त.चं.) श्रियःपतेरिति षष्ठ्या अलुक् । समास एव पतिशब्दस्य घिसञ्ज्ञाविधानात्– 'पतिः समास एव'[१.४.८] इति । वस्तुतस्तु 'षष्ठीयुक्तश्छन्दसि वा'[१.४.९] इत्यत्र छन्दसीति न वक्तव्यम् । लोकेऽपि वा भवति । श्रियः पत्ये । श्रियः पतये । श्रियः पत्युः । श्रियः पतेः । असमासेऽपि, अषष्ठीयोगेऽपि घिसञ्ज्ञा विभाषा भवतीति भगवत्पादाशय इति भाति । तथाहि महाभारततात्पर्यनिर्णये– 'अथो अहल्यां पतिनाऽभिशप्ताम्' इति । अध्याहारेण षष्ठीयोग इति त्वाहोपुरुषिकामात्रम् । तदिदमुच्यते नाम यद् व्यवस्थाय न व्यवस्थीयत इति । त्रयश्चत्वारो वा त्रिचतुराः । व्यगाहयत् निमज्जयामास । गाहू विलोडने । 'गाहृ' इत्यन्ये ॥ ४१ ॥

स्पर्शनाद् भगवतोऽतिपावनात् सन्निधानपदतां गतां हरेः ।
त्रिंशदुद्यतनरैः सुदुर्धरां लीलयाऽनयदिमामसौ मठम् ॥ ४२ ॥

(**प.दी.**) **स्पर्शनादिति** । **असौ** श्रीमध्वाचार्यः **भगवतः** षड्गुणसम्पन्नस्य **अतिपावनात् स्पर्शनात्** अवगाहनसमये स्वकरस्पर्शात् **हरेः सन्निधानपदतां गताम्**,अत एव **त्रिंशदुद्यतनरैः** त्रिंशत्सङ्ख्याकैः उद्धर्तुमुद्यतैः नरैः **सुदुर्धरां** सुतरां धर्तुमशक्याम् **इमां** प्रतिमां स्वयमेव **लीलया मठमनयत्** ॥

(**त.चं.**) भगवतः भगवदनुग्रहभाग्यसम्पन्नस्य स्वस्य अतिपावनात् स्पर्शनात् । स्वस्य करस्पर्शनाद् भगवतो हरेः सन्निधानपदतां गतामिति वा ॥

मन्दहासमृदुसुन्दराननं नन्दनन्दनमतीन्द्रियाकृतिम् ।
सुन्दरं स इह सन्न्यधापयद् वन्द्यमाकृतिशुचिप्रतिष्ठया ॥ ४३ ॥

(**प.दी.**) **मन्दहासेति** । **सः** श्रीमध्वाचार्यः **मन्दहासमृदुसुन्दराननम्, अतीन्द्रियाकृतिं** प्राकृतेन्द्रियागोचरस्वरूपं **सुन्दरं वन्द्यं नन्दनन्दनं** श्रीकृष्णम् **आकृतिशुचिप्रतिष्ठया** प्रतिमायाः शोभनप्रतिष्ठाविधानेन **इह** अस्यां प्रतिमायां **सन्न्यधापयत्** सन्निहितं कारयामास ॥ ४३ ॥

(**त.चं.**) अतीन्द्रियाकृतिः । अथापि मन्दहासमृदुसुन्दराननतया मनोनयनोत्सवः । आकृतेः प्रतिमायाः शुचिः शुद्धा विधिबद्धा या प्रतिष्ठा तया । अत्रैवं प्रतिष्ठासम्बन्धी इतिहासः श्रूयते । तथाहि रघुवर्यतीर्थविरचितायां प्रमेयनवमालिकाटीकायां सौरभप्रकाशिकायाम्– 'श्रीमध्वः कलियुगे सज्जनानां पूजनदर्शनादिना निःश्रेयसविघ्नादिदोषविघातार्थं श्रीकृष्णं प्रतिष्ठापयामीति सत्सु दययाऽकामयत । तदा द्वारकायां रुग्मिणीवनाख्यप्रदेशे गोपीचन्दनमध्ये लग्नां गोपीचन्दनबुद्ध्या सांयात्रिकैरानीतां रूप्यपीठसमीपे प्लवे भिन्ने जलधौ मग्नां श्रीकृष्णप्रतिमामानीय शिष्यैस्तटाके शोधयित्वा स्वयमभिषिच्य समन्त्रकं स्पृष्ट्वाऽत एव भगवत्सन्निधानातिशयभरितामत एव त्रिंशच्छिष्यैरपि सुदुर्धरां लोके बालकमिव स्वयमेवाऽनीय मठे प्रतिष्ठापयामास' इति । 'गोपीचन्दनलग्नत्वाद् गोपीचन्दनबुद्धयः ।

प्रतिमां तां समाजह्रुर्दैवात् सांयात्रिकाः कलौ । रूप्यपीठान्तिकग्रामे वार्धौ भिन्नोऽभवत् प्लवः । तदर्थसूचकेनासौ ग्रामो नाम्ना युतोऽभवत्' इति च । तदर्थसूचकेन नाम्ना 'ओडपाण्डेश्वर'[ಒಡಪಾಂಡೇಶ್ವರ] इत्येतेन नाम्ना । एतेन शाट्या वात्यानिवारणं नौकानायकेन गोपीचन्दनपिण्डस्यार्पण-मित्यादिका कथा पाश्चात्त्यैः कल्पितेति स्फुटम् । कृष्णावधूतादिभिरिय-मर्वाचीनैव कथाऽनुसृता । तथाहि मन्दारमरन्दे – 'पुरा पूर्द्वारकाऽत्राऽसीद् दाशार्हानन्दकारिका । मध्येवारिधि गोपस्त्रीलालसेनाभिपालिता । कदाचित् तत्र देवक्या बालकेलीः प्रदर्शय । इत्युक्तो रुग्मिणीकान्तः शुद्धान्ते बालकोऽ-भवत् । तदङ्कमारुह्य हसंस्तदास्यं पश्यन् स्तनं तत्र पपौ मुकुन्दः । तदाऽन-भिज्ञा विवशान्तरा सा सुखाम्बुराशौ विजहार देवी । दध्यमत्रं विभज्याथ नवनीतं प्रभक्षयन् । बिडालेभ्यो ददद् भूयो वैशाखं नेत्रमाहरत् । काल-मल्पं विहृत्यैवमत्यजद् बालकाकृतिम् । हृष्टाङ्गी देवकी दृष्ट्वा विस्मयं प्रययौ मुहुः । विलोक्य भैष्मी बत बालरूपिणं सदा तदभ्यर्चनकाङ्क्षया सती । कृष्णाज्ञया निर्जरशिल्पिना मुदा निर्मापयामास तदा तदाकृतिम् । रुग्मिण्यर्चितकृष्णार्चामर्जुनो द्वारकास्थिताम् । कृष्णावतारेऽवसितेऽस्थापयद् रुग्मिणीवने । गोपीचन्दनलिप्तां तां गोपीचन्दनबुद्धयः । सांयात्रिकाः समादाय समीपेऽस्य समाययुः । निमज्जद् वारिधावत्र मध्वाह्वस्य महात्मनः । मुने-र्दशान्तवातेन तीरं प्रापोडुपं तदा । प्रगृह्याऽनन्दतीर्थस्तां प्रतिष्ठाप्य मुदाऽ-न्वितः । नागासनस्य निकटेऽपूजयत् प्रतियातनाम्' इत्यादि । प्रतनं रघुवर्यतीर्थवचनम् । पश्चात्तनं कृष्णावधूतवचनम् । अन्तरङ्गं कृष्णपूजकस्य रघुवर्यतीर्थस्य वचनम् । बाह्यं दूरगस्य कृष्णावधूतस्य वचनम् । नारायण-पण्डितोऽत्र मौनमुवाहेति पाश्चात्त्या बहुधा बभ्रमुः ॥ ४३ ॥

मानिनोऽपि हि वशीचकार यो
दैवतप्रतिभयाऽऽत्मनः खलः ।

यायजूकगुणमात्मनः स्मरन्
यो जराघटितगोत्र उच्यते ॥ ४४ ॥

(भा.प्र.) दैवतप्रतिभया दैवतलब्धप्रज्ञया रुद्राख्यदेववरजप्रज्ञया च । जराघटितगोत्रो जरासम्बद्धगोत्रः 'मरडिताय' इत्यपभ्रष्टभाषा। जरासन्धश्च॥

आत्मनः प्रियतमक्रतोरमुं पापपूरुषमवेत्य घातकम् ।
तं निरस्य जनमप्यथाहितं सर्वभूधरसमर्थपूर्वकम् ॥ ४५ ॥

(भा.प्र.) प्रियतमः स्वोपाध्यायसुतः युधिष्ठिरश्च। भूधरो राजा। समर्थौ पूर्वपश्चिमपक्षाधिपौ । भूधरसमर्था राजश्रेष्ठाश्च॥

विश्वविस्मयकरः स्वतेजसा
वन्द्यमानचरणः पुनर्जनैः ।
चित्रदिग्विजयकीर्त्यकीर्तिमान्
मोदयन्ननुदिनं निजाः प्रजाः ॥ ४६ ॥

वासुदेवदयितो महिष्ठधीर्वासुदेवमथ साध्वयाजयत् ।
धर्मसूनुमिव धार्मिकं पुरा भीममूर्तिरयमेव भूसुरम् ॥ ४७ ॥

(प.दी.) **मानिन** इति । अन्त्यकुळकमिदम् । **अथ महिष्ठधीः वासुदेवं** वासुदेवनामानं स्वोपाध्यायसुतं **धार्मिकं भूसुरं** ब्राह्मणं **साधु** सम्यक् **अयाजयत्**। **पुरा भीममूर्तिरयमेव धर्मसूनुमिव**। किं कृत्वा? **अमुं पापपूरुषं आत्मनः** स्वस्य **प्रियतमक्रतोः** प्रियतमस्य स्वोपाध्यायसुतस्य क्रतोर्यज्ञस्य **घातकं** विघ्नस्य कर्तारं **अवेत्य तं सर्वभूधरसमर्थपूर्वकं निरस्य** । भूधरो राजा बालकन्यापुराधिपः[1] । समर्थः पूर्वालयः, तत्प्रतियोगी च । भूधरसमर्थपूर्वकसर्वसज्जनसमक्षं निरुत्तरं कृत्वेत्यर्थः । कथम्भूतम्? **यः खलः**

१.बालकन्यापुरम्– सम्प्रति 'बारकूरु' [ಬಾರಕೂರು] इति प्रथितम् ।

आत्मनः स्वस्य **दैवतप्रतिभया** दैवतेन लब्धया प्रतिभया **मानिनोऽपि** प्रबलानपि **वशीचकार हि** । **यायजूकगुणं** यष्टृत्वाख्यं गुणं **आत्मनः** स्वस्य **स्मरन्,** तस्मिन् अधिवासे स्वस्यैव यष्टृत्वं स्मरन्, अन्यस्य न सम्भवतीति च स्मरन्निति भावः, **यः जराघटितगोत्रः** जराघटितनामकः **उच्यते** । जराघटित इत्यस्य 'मरडित्तायि' इत्यपभ्रष्टसञ्ज्ञा । एवम्भूतो **यः खलः** मरडित्तायिनामकद्विजः **तं निरस्य** इत्यन्वयः । **अथ** ततोऽन्यं **अहितं जनमपि निरस्य** । कथम्भूतः? **स्वतेजसा** स्वसामर्थ्येन **विश्वविस्मयकरः पुनः जनैः वन्द्यमानचरणः** । पुनः कथम्भूतः? **चित्रदिग्विजयकीर्त्यकीर्तिमान् अनुदिनं निजाः प्रजाः मोदयन् वासुदेवदयितः** च । भीममूर्तिरप्येवम् । **यो जराघटितगोत्रो** जरासन्धनामोच्यते **तं निरस्य** । कथम्भूतम्? **यः आत्मनो दैवतप्रतिभया** रुद्रादिदेवतानां वरदाननिमित्तया प्रज्ञया **मानिनोऽपि** प्रबलानपि राज्ञो **वशीचकार, तमथ सर्वभूधरसमर्थपूर्वकं** सर्वराजश्रेष्ठपूर्वकं **अहितं जनमपि निरस्य** इति । अन्यदतिरोहितार्थम् ।। ४४–४७ ।।

(त.चं.) मानिनोऽपि हीत्यादिचतुर्भिः कलापकम् । 'मानो गर्वो भवेदहङ्कारः' । मानिनो मन्त्रविद्यागर्वितान् मरडित्तायनामा । बलगर्वितान् जरासन्धः । यायज्यते पुनःपुनर्यजत इति यायजूको यजनशीलः । तस्य गुणो यजनं याजनं वा । 'यजजपदशां यङः' [३.२.१६६] यजादीनां यङन्तानामूकः प्रत्ययो भवति । यायजूकः । जञ्जपूकः । दन्दशूकः । जराघटितगोत्रः । गोत्रं नाम । 'गोत्रं कुलाख्ययोः' । जरापदघटितनामा जरासन्धः । जरार्थकपदघटितनामा 'मरडित्ताय'[ಮರಡಿತ್ತಾಯ]सञ्ज्ञः पुरोहितः । एतेन पुरा किल तौळवभाषायाम्, 'मुदड्' [ಮುದಡ್] इतिवत् 'मरड्'[ಮರಡ್] इत्यपि जरानामाऽसीदिति विज्ञायते ।।*।। आत्मनः प्रियतमस्य स्वोपाध्यायसुतस्य वासुदेवस्य क्रतोः घातकं अहमेव यजने याजने चाधिकृतो नान्य इति वदन्तं मरडित्तायनामानं पुरोहितं निरस्य । आत्मनः प्रियतमस्य युधिष्ठिरस्य राजसूयस्य घातकं जरासन्धं निरस्य । सर्वे ग्रामीणाः । भूधरः 'बारकूरु'

[ಬಾರಕೂರು] इति भाषायां प्रथितस्य पुरस्य राजा । समर्थौ 'बल्लाळ' [ಬಲ್ಲಾಳ] इति भाषायां प्रथितौ द्वौ पक्षनाथौ विवादे निर्णायकौ । एकः रूप्यपीठस्य पूर्वभागेऽधिकृतः ।'मुडेबूडु'[ಮುಡೇಬೂಡು], 'चिट्पाडिबूडु' [ಚಿಟ್ಪಾಡಿಬೂಡು] इति भाषायाम् । अपरः पश्चिमभागे– 'पड्डेबूडु' [ಪಡ್ಡೇಬೂಡು] इति भाषायाम् । ते पूर्वे अग्रगाः साक्षिभूता यस्मिन् इति क्रियाविशेषणम् । तत्समक्षं मरडित्तायनामानं पापपूरुषं निरस्य अपरं च तत्पक्षीयं जनगणं निरस्य । सर्वे भूधरेषु समर्थाः शिशुपालादयो राजानस्ते पूर्वे प्रथमे यस्य तादृशमपरं च शत्रुगणं निरस्य ॥ ✻ ॥ स्वतेजसा विस्मयकरः । स्वतेजसा वन्द्यमानचरणः । तत्ववादेन दिग्विजयी मध्वः । बाहुबलेन भीमः ॥✻ ॥ वासुदेवस्य भगवतो दयितः प्रियः । भीमो मध्वश्च । वासुदेवस्य स्वोपाध्यायसुतस्य मध्वः । वासुदेवो दयितोऽस्येति वा ॥ ४४–४७ ॥

याज्यया समुचितानुवाक्यया
सप्रवर्ग्यविभवैरभिष्टवैः ।
विश्ववेत्तुरनुजोऽत्र होतृतां
प्राप्य दैवततीरतोषयत् **॥ ४८ ॥**

(भा.प्र.) अध्वर्युप्रैषानन्तरा प्रणवान्ता याज्या । पूर्वभाविनी ऋगनुवाक्या । वषट्कारान्ता याज्या, महावीरप्रस्तोतृसामादयः प्रवर्ग्यविभवाः । अनवरतमुच्यमानाः प्रणवान्ताः– 'ब्रह्म जज्ञानं प्रथमं पुरस्तात्' इत्याद्या ऋचोऽभिष्टवाः ॥

(प.दी.) याज्ययेति । **विश्ववेत्तुः** श्रीपूर्णप्रज्ञाचार्यस्य **अनुजः अत्र** यज्ञे **होतृतां प्राप्य समुचितानुवाक्यया** समुचितानुवाक्यायुक्तया, पूर्वभाविनी ऋगनुवाक्या, **याज्यया,** अध्वर्युप्रैषानन्तरा प्रणवान्ता याज्या तया च, **सप्रवर्ग्यविभवैः** प्रवर्ग्यविभवयुक्तैः,वषट्कारान्ता याज्या महावीरप्रस्तोतृसामादयः प्रवर्ग्यविभवाः, **अभिष्टवैः,** अनवरतमुच्यमानाः 'ब्रह्म जज्ञानं

प्रथमं पुरस्तात्' इत्याद्याः ऋचोऽभिष्टवाः, तैश्च **दैवततती:** देवसमूहान् **अतोषयत्** ॥ ४८ ॥

(त.चं.) याज्यया समुचितानुवाक्यया। अयमिह क्रमः– याजुषोऽध्वर्यु-र्भवति। बह्वृचो होता भवति। आहुतिरध्वर्युक्रिया। आहूतिर्होतुः। अध्वर्युः प्रथमं प्रैषमाह। कः प्रैषः? ऋचां शंसनार्थं प्रेरणं प्रैषः। 'अग्नये मथ्यमानायानुब्रूहि' [ऐ.आ. ३.५], 'अग्नये प्रणीयमानायानुब्रूहि' इत्यादिः प्रैष-मन्त्रः। ततोऽध्वर्युप्रेषितो होता अनुवाक्यामृचं पठति। ततो यजनार्थं वक्तव्यां याज्यामृचं पठति। ततोऽध्वर्युर्जुहोति। होत्रा मन्त्रेणाऽहूता देवता तामाहूतिमाहुतिं च स्वीकरोतीति। यदाहुः – 'पुरोऽनुवाक्यामनूच्य याज्यया जुहोति' इत्यादि। 'याः प्रायणीयस्य पुरोऽनुवाक्यास्ता उदयनीयस्य याज्याः कुर्यात्। या उदयनीयस्य पुरोऽनुवाक्यास्ताः प्रायणीयस्य याज्याः कुर्यात्' [ऐ. ब्रा. २.५] इत्यादि च ब्राह्मणम्। तद् यथा आतिथ्येष्टौ याज्यानुवाक्ये– 'इदं विष्णुर्वि चक्रमे, तदस्य प्रियमभि पाथो अश्यामिति वैष्णव्यौ। त्रिपदामनूच्य चतुष्पदया यजति' [ऐ. ब्रा. ३.६] इति। 'इदं विष्णुः' [ऋ. १.२२.१७] इति त्रिपदामनुवाक्यारूपेणोक्त्वा 'तदस्य प्रियम्–' [ऋ.१.१५४.५] इति चतुष्पदां याज्यारूपेण पठेदित्यर्थः। अन्या-अन्या याज्या भवन्ति। अन्याअन्याश्चानुवाक्याः। यतमाया याज्याया यतमाऽनुवाक्या समुचिता ततमाया एव तत्र पठनमित्याह– समुचिता-नुवाक्यया। याज्या च प्रणवान्ता भवति। तद् यथा– 'तदस्य प्रियमभिपाथो अश्यां नरो यत्र देवयवो मदन्ति। उरुक्रमस्य स हि बन्धुरित्था विष्णोः पदे परमे मध्व उत्सोम्'। सप्रवर्ग्यविभवैरभिष्टवैः। प्रवर्ग्यो नाम यज्ञे कर्म-विशेषः। यज्ञस्य पूर्णाङ्गत्वाय यः क्रियते। तथाहि श्रूयते–'यज्ञो वै देवेभ्य उदक्रामन्न वोऽहमन्नं भविष्यामीति। नेति देवा अब्रुवन्। अन्नमेव नो भवि-ष्यसीति। तं देवा विमेथिरे। स हैभ्यो विहृतो न प्रबभूव। ते होचुर्देवाः। न वै न इत्थं विहृतेऽलं भविष्यति। हन्तेमं यज्ञं सम्भरामेति। तथेति तं

सञ्जभ्रुः । तं सम्भृत्योचुरश्विनाविमं भिषज्यतमिति । अश्विनौ वै देवानां भिषजौ । अश्विनावध्वर्यू । तस्मादध्वर्यू घर्मं सम्भरतः । तं सम्भृत्याऽहतुः– ब्रह्मन् प्रवर्ग्येण प्रचरिष्यामो होतरभिष्टुहीति' [ऐ. ब्रा. ४.१] । 'ब्रह्म जज्ञानं प्रथमं पुरस्तादिति प्रतिपद्यते'[४.२] इत्यादि । अयं खण्डार्थः– प्रव्रज्यते घर्माख्यं हविरत्रेति प्रवर्ग्याख्ये कर्मणि यद् हविस्तद् देवानामन्नमुच्यते । प्रवर्ग्यमानी यज्ञदेवस्तन्न भविष्यामीत्याह । देवास्तमन्वनयन्त । तमगृहीतानुनयं देवा विमेथिरे ताडयामासुः । स हैभिः प्रहृतो न प्रभूतो बभूव । तदा देवा ऊचुः । इत्थं प्रहृतोऽप्ययं न नोऽलमन्नम् । इमं सम्भारैः पुष्टाङ्गं कुर्म इति । तथेति तं सम्बभ्रुः । अश्विनावध्वर्यू इत्यध्वर्युप्रतिप्रस्थातारौ । घर्म इति प्रवर्ग्यहविः । तं सम्भरतः । सम्भृत्य च ब्रह्माणं होतारं चैवं प्रैषमाहतुः– हे ब्रह्मन् प्रवर्ग्येण कर्मणा प्रचरिष्याम इति । हे होतरभिष्टुहीति । तदा होता 'ब्रह्म जज्ञानम्–' इत्यादिकानभिष्टवमन्त्रानाहेति ॥

अभिष्टवमन्त्रेषु भागद्वयं भवति । पूर्वपटलमुत्तरपटलं चेति । पूर्वपटले १०७ मन्त्राः । उत्तरपटले ३७ मन्त्राः । आहत्य– 'चत्वारिंशच्चतस्रश्च ऋचः शतमभिष्टवे । अवस्येत् प्रणवेनात्र ऋचं प्रोच्यानवानतः' । तथाह्याचक्षते – 'ऋचमनवानमुक्त्वा' इति । अनवानमित्यनुच्छ्वासम् । तदिदमुक्तम्-'अनवरतमुच्यमानाः प्रणवांता अभिष्टवाः' इति । कथं प्रणवान्ताः मन्त्राः पठ्यन्ते? उदाहरणार्थमेको मन्त्रः । 'गणानां त्वा गणपतिम्–' इत्येकान्नविंशत्यृचं सूक्तमभिष्टवेषु पठ्यते । तस्येयमाद्या ऋक् प्रणवान्ता भवति – 'गणानां त्वा गणपतिं हवामहे कविं कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पत आ नः सीदन्नूतिभिः सीद सादनोम्' इति । एवं सर्वत्र याज्यास्वप्यृक्षु प्रणवान्तता । 'प्रणवष्टेः'[८.२.८९] इति हि पाणिनिः स्मरति । तदेवं प्रवर्ग्यविभवा अभिष्टवा अभिहिताः ।

वषट्कारान्ता याज्या, महावीरश्च पात्रविशेषः, प्रस्तोत्रा प्रस्तूयमानं साम चेत्याद्याः प्रवर्ग्ये कर्मणि विभवविशेषाः ।

वषट्कारान्ता याज्या यथा । अध्वर्युः प्रैषमाह– 'घर्मस्य यज' इति, हविर्दानाय याज्यामृचं ब्रूहीति । अध्वर्युणैवं प्रेषितो होता– 'तप्तो वां घर्मो नक्षति स्वहोता–' इति, 'उभा पिबतमश्विना–'[ऋ.१.४६.१५] इति च ऋग्द्वयमुक्त्वा 'वौषट्' इत्याह। सोऽयं वषट्कारः। 'वौषळिति वषट्करोति' [ऐ.ब्रा.११.६] । यदैवं याज्याद्वयं सवषट्कारं होता पठति तदाऽध्वर्युः– 'अश्विना घर्मं पातम्' इति यजति । ततः पुनर्होता–' अग्ने वीहि वौषट्' इति पठति । वीहि भक्षयेत्यर्थः । सोऽयमनुवषट्कारः । तदाऽध्वर्युः 'स्वाहेन्द्रावट्' इत्युक्त्वा जुहोति। यदाहाऽपस्तम्बः 'अश्विना घर्मं पातमिति वषट्कृते जुहोति । 'स्वाहेन्द्रावडित्यनुवषट्कृते' [आप. श्रौ.सू. १५.१०. ११]। 'प्रेषितो यजति–' तप्तो वां घर्मो नक्षति स्वहोता प्र वामध्वर्युश्चरति प्रयस्वान् । मधोर्दुग्धस्याश्विना तनाया वीतं पातं पयस उस्रियायाः' 'उभा पिबतमश्विना' इति चोभाभ्यामनवानम्, 'अग्ने वीहि' इत्यनुवषट्कारो 'घर्मस्याग्ने वीहि' इति वा' इति चाऽश्वलायनः ।

अथ महावीरः कः प्रवर्ग्यविभवः? प्रवर्ग्यहविषो घर्मस्याऽश्रयभूतो मृण्मयः पात्रविशेषो महावीर इत्युच्यते ॥ ४८ ॥

स प्रयुज्य निशिता निशातधी-
वैश्वदेववरशस्त्रसन्ततीः ।
राक्षसासुरनिरासकृत् सुरान्
वीरवर्य इव भागमापयत् ॥ ४९ ॥

(भा.प्र.) वैश्वदैवाग्निमारुतमरुत्वतीयश्रेष्ठाः[१] विश्वदेवसम्बन्धिनीः तत्तन्मन्त्रसम्बन्धेनास्त्ररूपा आयुधसन्ततीश्च ॥

१.अस्फुटार्थम्। वैश्वदेवं शस्त्रं वरं प्रधानं यासां ता वैश्वदेववराः शस्त्रसन्ततयः। वैश्वदेव-

(प.दी.) स इति । **निशातधीः** निशितबुद्धिः **सः** श्रीमध्वानुजः **निशिताः** वीर्यवतीः **वैश्वदेववरशस्त्रसन्ततीः** वैश्वदेवाग्निमारुतमरुत्वतीयाः श्रेष्ठा विश्वदेवसम्बन्धिनीः तत्तन्मन्त्रसम्बन्धेन अस्त्ररूपाः ऋचः **प्रयुज्य राक्षसासुरनिरासकृत् सुरान्** देवान् हविर्भागं **आपयत्** प्रापयामास । क इव? **वीरवर्य इव** । यथा कश्चिद् वीरवर्यो वीरश्रेष्ठो न्यायमार्गे स्थितः **शस्त्रसन्ततीः प्रयुज्य** अन्यायेन धनादिभागमिच्छतो दुष्टान् निरस्य तद्भागार्हान् भागमापयेत् तद्वदिति भावः ॥ ४९ ॥

(त.चं.) वैश्वदेववरशस्त्रसन्ततीः । होत्रा शंसनीयः अप्रगीतो मन्त्रसमुदायः शस्त्रम् । सामगैः प्रगीयमानं स्तोत्रम् । षट् च शस्त्रसन्ततयो भवन्ति । प्रातःसवने द्वे– आज्यशस्त्रं प्रउगशस्त्रं चेति । माध्यन्दिनसवने द्वे– मरुत्वतीयं निष्केवल्यं चेति । द्वे च तृतीयसवने– वैश्वदेवमाग्निमारुतं चेति । अत्र पुनर्वैश्वदेवशब्देन न तृतीयसवनगतं वैश्वदेवाख्यमेव शस्त्रमुच्यते । किन्तु विश्वदेवसम्बन्धीनि त्रीणि शस्त्राण्युच्यन्ते । वैश्वदेवं आग्निमारुतं मरुत्वतीयं चेति । तथाहि भावप्रकाशिकायाम्–'वैश्वदेवाग्निमारुतमरुत्वतीयश्रेष्ठाः' इति । वैश्वदेवं तावत् स्फुटं विश्वदेवदैवत्यम् । अग्निर्मरुदुपलक्षिताः सर्वदेवाश्च देवता इत्याग्निमारुतमपि वैश्वदेवम् । मरुत्वानिन्द्रः मरुतः सर्वदेवाश्च देवता इति मरुत्वतीयमपि । तदेवं वैश्वदेवानि वैश्वदेवाग्निमारुतमरुत्वतीयानि वराणि सर्वदेवान्तर्गतभगवत्स्तुतिपरतया श्रेष्ठानि यासां ताः वैश्वदेववराः शस्त्रसन्ततयः । निष्केवल्यशस्त्रमाज्यशस्त्रं प्रउगशस्त्रं चेति । निष्केवल्यं केवलमिन्द्रनामानं परमेश्वरं स्तौति । आज्यशस्त्रमाग्नेयम् । अग्निनामानौ पवमानानारायणौ स्तूयेते । 'अन्याऽन्या देवता प्रउगे शस्यते'[ऐ. ब्रा.११.२] । वायवायाहीति वायव्यं त्र्यृचम् [ऋ.१.२.१-३] । तत ऐन्द्रवायवं

शब्देनाऽग्निमारुतमरुत्वतीयशस्त्रयोरपि ग्रहणे कारणं मृग्यम् । वेदाङ्गतीर्थीये तु 'वैश्वदेवाग्निमारुतमरुत्वतीयाः श्रेष्ठाः' इति पठ्यते । तदप्यसमीचीनमेव । उभयत्रापि शुद्धपाठान्तरं मृग्यम् ।

त्र्यृचम् [१.२.४-६]। ततो मैत्रावरुणम् [१.२.७-९]। तत आश्विनम् [१.३.१-३]। तत ऐन्द्रम् [१.३.४-६] ततो वैश्वदेवम् [१.३.७-९]। ततः सारस्वतम् [१.३.१०-१२]। इतीदं प्रउगं शस्त्रं भवत्येकविंशत्यृचम्। तत्र यद्यपि त्र्यृचेन विश्वे देवाः स्तूयन्त इति प्रउगमपि स्याद् वैश्वदेवम्। न स्यात्। एकदेशमात्रं हि तत्। एकेन त्र्यृचेन विश्वे देवाः। षड्भिरन्येऽन्य इति। अथवा वैश्वदेवपदेन षडपि शस्त्राणि गृह्यन्ते। वैश्वदेव्यः सर्वदेवतास्तुतिपराः अत एव वराः शस्त्रसन्ततयो मन्त्रसमूहाः। अथच वीरवर्यः कश्चित् वैश्वदेवीः विश्वदेवसम्बन्धिनीः तत्तद्देवतामन्त्रसम्बन्धेनास्त्ररूपाः शस्त्रसन्ततीरायुधसन्ततीः प्रयुज्य यथा तत्तद्योग्यान् तन्तं भागमापयेत्॥ ४९॥

वायुना त्रिरपि पूर्वपायिना
सर्वदैवतजिता तरस्विना।
योऽपरोक्षवपुषाऽप्यपेक्षितः
कोऽत्र वर्णयति तं महाक्रतुम् ॥ ५०॥

(भा.प्र.) 'देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन्। अहं प्रथमः पिबेयमहं प्रथमः पिबेयमित्येवाकामयन्त। ते सम्पादयन्तोऽब्रुवन्। हन्ताऽजिमयाम स यो न उज्जेष्यति स प्रथमः सोमस्य पास्यतीति। तथेति त आजिमयुः। तेषामाजिं यतामभिसृष्टानां वायुर्मुखं प्रथमः प्रत्यपद्यत। अथेन्द्रोऽथ मित्रावरुणावथाश्विनौ। सोऽवेदिन्द्रो वायुमुद् वै जयतीति। तमनु परापतत् सह नावथोज्जयावेति। स नेत्यब्रवीदहमेवोज्जेष्यामीति। तृतीयं मेऽथोज्जयावेति। नेति हैवाब्रवीदहमेवोज्जेष्यामीति। तुरीयं मेऽथोज्जयावेति। तथेति तं तुरीयेऽत्यार्जत। तत् तुरीयभागिन्द्रोऽभवत्। त्रिभाग् वायुः' इत्यैतरेयब्राह्मणे। 'अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु। त्वं हि पूर्वपा असि', '– देव दधिषे पूर्वपेयम्' इत्यादिश्रुतिसिद्धं तत्॥

(प.दी.) **वायुनेति** । **त्रिरपि** त्रिवारमपि **पूर्वपायिना** वेगेन सर्वान् देवान् विजित्य प्रथमत एव सोमं पीतवता **सर्वदेवतजिता** वेगेन सर्वान् देवान् जितवता **तरस्विना** वेगवता **वायुना यः** क्रतुः **अपरोक्षवपुषा** सर्वप्रत्यक्ष-गोचरवपुषा **अपि अपेक्षितः, अत्र तं महाक्रतुं को वर्णयति?** न कोऽपि तद्वर्णनसमर्थ इत्यर्थः । वायोः त्रिवारमपि पूर्वपायित्वं च 'देवा वै सोमस्य राज्ञोऽग्रपेये न समपादयन् । अहं प्रथमः पिबेयमहं प्रथमः पिबेय-मित्येवाकामयन्त । ते सम्पादयन्तोऽब्रुवन् । हन्ताऽजिमयाम स यो न उज्जेष्यति स प्रथमः सोमस्य पास्यतीति । तथेति त आजिमयुः । तेषामाजिं यतामभिसृष्टानां वायुर्मुखं प्रथमः प्रत्यपद्यत । अथेन्द्रोऽथ मित्रावरुणा-वथाश्विनौ । सोऽवेदिन्द्रो वायुमुद् वै जयतीति । तमनु परापतत् सह नाव-थोज्जयावेति । स नेत्यब्रवीदहमेवोज्जेष्यामीति । तृतीयं मेऽथोज्जयावेति । नेति हैवाब्रवीदहमेवोज्जेष्यामीति । तुरीयं मेऽथोज्जयावेति । तथेति तं तुरीयेऽत्यार्जत । तत् तुरीयभागिन्द्रोऽभवत् । त्रिभाग् वायुः' इत्यैत-रेयब्राह्मणे । 'अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु । त्वं हि पूर्वपा असि', '–देव दधिषे पूर्वपेयम्' इत्यादिश्रुतिसिद्धम् ॥ ५० ॥

(त.चं.) वायुना त्रिरपि पूर्वपायिना । कथा चेयमैतरेयब्राह्मणे श्रूयते नव-मेऽध्याये । उद्दधार च तं खण्डभागं भावप्रकाशिकायाम् । तदयं ब्राह्मण-खण्डार्थः– सोमस्य प्रथमपानविषये देवा न समपादयन् न सम्प्रतिपत्ति-मन्तोऽभवन् । सर्वेऽप्यहमेव प्रथमं पिबेयमिति विवदन्ते स्म । त एवमसम्पाद-यन्तः असम्प्रतिपत्तिमन्तः, सम्पादयन्तो वा सम्प्रतिपत्तिकामा अब्रुवन् । किमब्रुवन्? हन्ताजिमयाम । आजिं धावनावधिभूतां काञ्चन लक्षभूमिं यास्यामः । यो नः वेगेन धावित्वा प्रथममाजिं प्राप्य उज्जेष्यति स प्रथमं सोमं पास्यतीति । तथेत्यभ्युपगम्य ते लक्षभूमिं ययुः सोमं प्रथमं पिपासन्तः । तेषामाजिं गच्छतां अभितः सन्नद्धानां वायुर्मुखं बभूव । प्रथमं प्रापेत्येतत् । तत इन्द्रः प्रत्यपद्यत । तृतीयं मित्रावरुणौ प्रत्यपद्येताम् । अथाश्विनौ

चतुर्थम् । स व्यजानादिन्द्रो वायुम्– अयं वै न उज्जयति वेगेनेति । तमनु परा शीघ्रमपतत् । अयि वायो सहाऽवामुज्जयावेति । सह पानं चास्तु तवार्धं ममार्धमिति । स वायुर्नेत्यब्रवीत् । न सह । किन्त्वहमेवोज्जेष्यामीति चाब्रवीत् । अथेन्द्र आह– मा भूदर्धम् । तृतीयो भागो मेऽस्तु । द्वौ भागौ तव । तदर्थं सहोज्जयावेति । नेति हैवाब्रवीद् वायुः । अहमेवोज्जेष्यामीति च । पुनरिन्द्र आह– त्रयस्तव भागाः । तुरीयस्तु मे स्यादथ सहैवोज्जयावेति । तथाऽस्त्वित्याह वायुः । तमिन्द्रं तुरीयभागेऽत्यार्जत अभ्युपजगाम । तत् तत्र सोमग्रहे चतुर्थांशमिन्द्रोऽभजत् । त्रीनंशान् वायुः । याज्ञिका वदन्ति– 'चतुर्भागे ग्रहे त्वाद्यौ भागौ द्वौ वायुरग्रहीत् । तृतीयमिन्द्रश्चतुर्थं वायुस्तु पुनरग्रहीत्' इति । अत्र मन्त्रवर्णोऽपि भवति ।तद् यथा– 'अग्रं पिबा मधूनाम्–' [४.४६.१] इति, '–यस्य देव दधिषे पूर्वपेयम्' [७.९२-१] इति च ।

तथाह्यग्रं पिबेति सप्तर्चं वामदेवदृष्टं गायत्रं सूक्तम् । इन्द्रवायू देवते । आद्या केवलवायव्या । तथाचेयमाद्या ऋक्–

अग्रं पिबा मधूनां सुतं वायो दिविष्टिषु । त्वं हि पूर्वपा असि ॥

हे वायो, दिवे स्वर्गार्थमिष्यन्त इति दिविष्टिषु यज्ञेषु मधूनां मधुराणां सोमानां सुतं अभिषुतं रसं अग्रमिन्द्रादिभ्यः पूर्वं पिब । यतस्त्वं हि सर्वत्र पूर्वं पाताऽसि ॥

'आ वायो' इति पञ्चर्चं वसिष्ठदृष्टं त्रैष्टुभं सूक्तम् । वायुर्देवता । तथाचेयमाद्या ऋक्–

आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।
उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥

हे शुचिपाः, शुचेः सोमस्य पातः वायो, नः उप आगत्य भूष भूषय यज्ञम् । हे

विश्वैर्वरणीय, ते नियुतः रथे नियोक्तव्या वडवाः सहस्रं सन्ति। मद्यं सम्मोदकरं ते अन्धः अन्नं सोमाख्यं उप उ ते अयामि। उपगृहीतम्, पात्रे निहितम्। हे देव, यस्य सोमस्य त्वं पूर्वपेयं प्रथमपानं दधिषे धारयसीति ॥ ५० ॥

ब्रह्मवेदननिविष्टचेतसां कर्म तत्र करणान्तरं भवेत् ।
ज्ञापयन्निति परात्मवेदकः कर्म धर्ममपि स ह्यचीकरत् ॥ ५१ ॥

(प.दी.) ब्रह्मेति। **ब्रह्मवेदननिविष्टचेतसाम्,** ब्रह्मवेदने ब्रह्मज्ञाने निविष्टचेतसां निरतचित्तानाम्, ब्रह्मजिज्ञासूनामिति भावः, **तत्र** ब्रह्मज्ञाने **कर्म करणान्तरं** साधनान्तरं **भवेत्** । जिज्ञासुनाऽनुष्ठितं श्रवणादिकं यथा ज्ञानसाधनं भवेत् तद्वदेव जिज्ञासुना स्वर्गादिफले कामवर्जितत्वेनानुष्ठितं कर्मापि ज्ञानसाधनं भवेत्, **इति ज्ञापयन् सः** श्रीमध्वाचार्यः **कर्मापि** भगवद्विषयं यज्ञादिकर्मापि **धर्ममचीकरत्,** धर्मं कारयामास हि। कथम्भूतः? **परात्मवेदकः** परमात्मज्ञापने प्रवृत्त इति भावः ॥ ५१ ॥

(त.चं.) ज्ञानकर्मणोर्न सहभावः सम्भवति गोव्याघ्रयोरिवेति त्ववैदिकमित्याह– ब्रह्मवेदननिविष्टचेतसाम् ॥ ५१ ॥

यानियानि चरितानि यानिया-
नीरितानि च मनोहराण्यहो ।
तानितानि च वितानिचेतसो
विश्वविस्मयकराणि भान्ति हि ॥ ५२ ॥

(प.दी.) यानीति। **वितानिचेतसः** श्रीपूर्णप्रज्ञाचार्यस्य **यानियानि चरितानि मनोहराणि यानियानि ईरितानि तानि चरितानि तानि ईरितानि च विश्वविस्मयकराणि भान्ति** शोभन्ते **हि**। **अहो** ॥ ५२ ॥

(त.चं.) ईरितानि उपदेशवचनानि। वितानिचेतसः। वितानो विस्तारः।

सोऽस्यास्तीति वितानि विस्तृतं सर्वग्राहि चेतोऽस्येति वितानिचेताः । अहो नान्यत्र क्वापि दृष्टचरमेतदिति विस्मयते ॥ ५२ ॥

सरस्वतीर्वृत्तिकरीः शरीरिणा-
मतीत्य बह्वीः समतीतगोत्रकः ।
पुरेव कृष्णप्रियमापदश्रमं
पृथुप्रबोधः पुनरुत्तमाश्रमम् ॥ ५३ ॥

(भा.प्र.) सरस्वतीः गोदावर्यादिनदीः स्नानपानादिना वृत्तिकरीः, स्वर्गादिदानेन प्रवृत्तिकरीर्वाचोऽप्यतीत्य तासां सर्वासां विष्णुविषयत्वसाधनेन मोक्षप्रतिपादनेन। समतीतगोत्रकः समतीतविन्ध्यादिः, समतीतवैश्वामित्रादिगोत्रकर्मा च॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य भावप्रकाशिकाख्यटीकायां नवमः सर्गः

—०—

(प.दी.) **सरस्वतीरिति** । **पृथुप्रबोधः** श्रीमध्वाचार्यः **पुनः कृष्णप्रियं** श्रीवेदव्यासप्रियं **उत्तमाश्रमं** उत्तरबदरिकाश्रमम् **अश्रमं** श्रमरहितं यथा भवति तथा **आपत्** प्राप। किं कृत्वा? **शरीरिणां** पुरुषाणां **वृत्तिकरीः** स्नानपानादिवृत्तिकरीः **बह्वीः सरस्वतीः** गोदावर्यादिनदीः **अतीत्य** । पुनः कथम्भूतः? **समतीतगोत्रकः** समतीतसह्यविन्ध्यादिपर्वतः । कथमिव? **पुरेव** । पूर्वं यथा बदरिकाश्रममाप तद्वदिति भावः । कथमिव? **पुरेव** पुरा ब्रह्मचर्याश्रमानन्तरम् **उत्तमाश्रमं** यथा प्राप तद्वदिति भावः । किं कृत्वा? **शरीरिणां वृत्तिकरीः** स्वर्गादिदानेन प्रवृत्तिकरीः **सरस्वतीः** वाचः **अतीत्य**, 'ज्योतिष्टोमेन स्वर्गकामो यजेत' इत्यादीनामापाततः स्वर्गादिविषयत्वप्रतीतिमुत्पाद्याज्ञप्रवृत्तिकारिणां वचसां विष्णुविषयत्वसमर्थनेन मोक्षपरतां प्रतिपाद्येति भावः । कथम्भूतः?

समतीतगोत्रकः समतीतविश्वामित्रादिगोत्रविहिताचारविशेषः । कथम्भूत-मुत्तमाश्रमम्? **कृष्णप्रियं** भगवतः प्रियम् । 'यत्याश्रमे तुरीये वै प्रीतिर्मम गरीयसी' इति भगवद्वचनाद् यत्याश्रमः कृष्णप्रियो हि ॥ ५३ ॥

(त.चं.) सरस्वतीर्वृत्तिकरीः । वंशस्थं जागतं छन्दः । गोत्रोऽद्रिः । गोत्र-मन्वयः । 'गोत्रं क्षेत्रेऽन्वये' इति, 'गोत्रोऽद्रौ गोत्रा भुवि गवां गणे' इति च ॥ ५३ ॥

सहभोगमनन्यलभ्यमस्मै हनुमद्रूपवते ददौ पुरा हि ।
अनवेक्ष्य परं स्वभीष्टकर्त्रे प्रतिदातुं हरिरैधयत् तमेव ॥ ५४ ॥

(प.दी.) **सहभोगमिति** । हरिः **पुरा** रामावतारे **हनुमद्रूपवते अस्मै** श्री-मध्वाय **अनन्यलभ्यं** अन्येन लब्धुमशक्यं **सहभोगं** सहभोगनामकं विरिञ्च-पदं **ददौ हि** । इदानीं पुनः **स्वभीष्टकर्त्रे** सुष्ठु अभीष्टकर्त्रे वेदान्तशास्त्रविवर-णाद्यात्मकाभीष्टकर्त्रे **अस्मै प्रतिदातुं परं** अन्यत् **अनवेक्ष्य** अदृष्ट्वा **तमेव** पूर्वदत्तं सहभोगमेव **ऐधयत्** वर्धयामास । सातिशयमकरोदिति भावः ॥

(त.चं.) सहभोगमनन्यलभ्यम् । उक्तं हि –'सहभुजमकरोद् रामनामा मुकुन्दः । दुष्प्रापे पारमेष्ठ्ये' इति । अन्ते एकाक्षराधिका वियोगिन्येव फलिताग्रं नाम विषमच्छन्दः । प्रथमतृतीययोरेकादशाक्षरम् । द्वादशाक्षरं तृतीयचतुर्थयोः । तथाहि कृष्णावधूतः –'फलिताग्रं गाधिकाऽन्ते वियोगिन्येव साऽङ्घ्रिषु' इति । विषमे ससजा गुरुद्वयम् । समे सभरयाः । केचिदिमां चन्द्रिकामाहुः ॥ ५४ ॥

प्रणम्य गुरुमादरादथ नियोगतो योग्यतः
स तस्य जगतां हितं विदधतो गतः सानुगः ।

महिष्ठहृदयो महामहिमसिन्धुरानन्दतो
निजैरभिगतोऽनमद् रजतपीठवासं हरिम् ॥ ५५ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते नवमः सर्गः

—०—

(प.दी) **प्रणम्येति** । **सः** **महिष्ठहृदयः** श्रीपूर्णप्रज्ञाचार्यः **महामहिमसिन्धुः** सन् **गुरुं** श्रीवेदव्यासम् **आदरात्** **प्रणम्य** **अथ** **जगतां** **हितं** **विदधतः** कुर्वतः **तस्य** श्रीवेदव्यासस्य **योग्यतः** स्वेन कर्तुं योग्यात् **नियोगतः** नियोगात् आज्ञया **सानुगः** सपरिवारः सन् **गतः** बदरिकाश्रमे श्रीवेदव्यासं नत्वा तदाज्ञया ततो निवृत्तः सपरिवारः पुनरपि रजतपीठपुरं गत इति भावः । **आनन्दतः** सन्तोषात् **निजैः** स्वभक्तैः **अभिगतः** सन् **रजतपीठवासं** **हरिं** **अनमत्** ॥ ५५ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां नवमः सर्गः

—०—

(त.चं.) ततः व्यासाश्रमात् निर्गतः रजतपीठं गतः । शिष्यैरनुगतः । भक्तैरभिगतः । पृथ्वी नाम छन्दः । सप्तदशाक्षराऽत्यष्टिः । 'पृथ्वी जसौ जसौ यो लो गश्छिन्ना वसुभिर्ग्रहैः' ॥ ५५ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याचख्यौ नवमं सर्गं सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां
तत्वचन्द्रिकायां नवमः सर्गः

—०—

[आदितः श्लोकाः– ४४१+५५=४९६]

दशमः सर्गः

[केनचिद् दशमतिशिष्येण तद्यात्रावृत्तवर्णनम्। आलुपराजेन ईश्वरदेवेन मध्वं प्रति तटाकखननार्थं चोदना। तेन प्रकारप्रकटनाय प्रवृत्तेन विवशतया निरन्तरखननम्। सशिष्यस्य पूर्णप्रज्ञस्य गङ्गातीरगमनम्। शिष्यैः सहाप्लव-गङ्गातरणम्। तटान्तरे स्थितैस्तुरुष्कराजभटैः प्रतिभटनम्। सधैर्यं मध्वेन तीरगमनम्। तुरुष्कराजनिकटे तद्भाषयोत्तरदानम्। विस्मितेन राज्ञा राज्यार्ध-समर्पणम्। बदरिकाश्रममार्गे चोरान् मोहयित्वा मिथो घातनम्। अन्यत्र स्वशिष्येणोपेन्द्रतीर्थेन चोराणां विद्रावणम्। क्वचिच्छिलाभ्रमं जनयित्वा दस्यूनां वञ्चनम्। सत्यतीर्थं हन्तुमुद्यतस्य व्याघ्राकारस्य दैत्यस्य निरासः। नारायणेन शिलाप्रतिमाप्राप्तिः। महाभारततात्पर्यनिर्णयविरचनाय व्यासेन नियोजनम्। पुनर्गङ्गातीरे अप्लवेऽपि अनार्द्रवाससो गङ्गातरणम्। नदीतटे प्रवचनम्। हस्तिनपुरवासः। मूर्तिमत्या गङ्गया तत्सेवार्थमागमनम्। दूरे प्रणतायास्तस्या विस्मितैः शिष्यैर्दर्शनम्। वारणस्यां शिष्याणां गर्वभङ्गार्थं तैः सह नियुद्धम्। पञ्चदशशिष्याणां युगपदाक्रमणं निपातश्च। अमरेन्द्रपुर्या सह वादः। तन्निरासः। आचार्यस्य व्याख्यानवैखरी। कुरुक्षेत्रे भीमरूप-स्मरणम्। सत्यतीर्थादीनां पूर्वरूपहेतिप्रदर्शनम्। भाविमारीचस्य च प्रदर्श-नम्। आचार्यं प्रणन्तुमागतं शिवं दृष्ट्वा शिष्याणां विस्मयः। स्वप्ने शिवप्रेरितेन भक्तेनाऽऽहृताया भिक्षायाः स्वीकारः। इषुपाते भोजनानन्तर-मुरुकदळीसहस्रभक्षणम्। गोवाप्रदेशे शङ्कराख्येन दत्तानां गरिष्ठानां चतुः-सहस्रकदळीफलानां भक्षणं त्रिंशत्कलशपूर्णपयःपानं च। राजपुरुषैरदृष्ट-तया ततो निर्गमनम्। 'पशुपे'नामके प्रदेशे अनुपमगानेन वृक्षे पुष्प-फलविधानम्।]

सपदि समस्कुरुत भृशं माधवगुणसाधकोऽथ मध्वरविः।
भृगुकुलतिलकस्थानं तापकरः पापपान्थानाम् ॥ १ ॥

(भा.प्र.) समस्कुरुत। 'सम्परिभ्यां करोतौ भूषणे' इति सुडागमः। माधवः श्रीकान्तः, वसन्तोत्तरभागश्च । भृगुकुलतिलकस्थानं परशुरामक्षेत्रम्, शुक्रक्षेत्रं वृषभराशिं च ॥

(प.दी.) सपदीति। **अथ मध्वरविः** श्रीमध्वाख्यभानुः **सपदि भृगुकुलतिलकस्थानम्,** भृगुकुलतिलको भृगूद्वहः श्रीपरशुरामः, तस्य स्थानं तत्सृष्टं देशम्, तौळवमण्डलमिति भावः, **भृशं** सम्यक् **समस्कुरुत** अलञ्चक्रे । 'सम्पर्युपेभ्यः करोतौ भूषणे' इति सुडागमः। कथम्भूतः? **माधवगुणसाधकः** श्रीलक्ष्मीकान्तस्य गुणसाधकः। तस्य ज्ञानानन्दाद्यनन्तगुणाकरत्वप्रतिपादक इति भावः। पुनः कथम्भूतः? **पापपान्थानां** मायिप्रभृतिपापाख्याध्वगानां **तापकरः** सन्तापकारी। रविर्यथा **भृगुकुलतिलकस्थानम्,** भृगुकुलतिलकस्य शुक्रस्य स्थानं वृषभराशिं स्वावस्थानेनालङ्कुर्यात् तद्वदिति भावः। कथम्भूतो रविः? **माधवगुणसाधकः** । माधवो वसन्तोत्तरभागः । 'मधुश्च माधवश्च वासन्तिकावृतू'[1] [तै.सं.४.४.११.१] इति वचनात्। तस्य गुणा बकुळाशोकचम्पकादिनानाकुसुमरम्यता कोकिलकूजितादिवार्त्ता च । तेषां साधकः । रविप्रकाशेन हि सर्वं प्रकाशते। पुनः कथम्भूतः? **पापपान्थानां** [पापिनां] पथिकानां **तापकरः** । 'आर्या' इत्यादिमवृत्तनाम[2] ॥ १ ॥

---

१. ऋतुशब्दोऽत्र मासवचनः ।

२. इदमपि केनचित् प्रक्षिप्तं स्यात्। कथमन्यथाऽत्रैकत्रैव वृत्तनाम निरदिश्यत? विविधवृत्तत्वाद् वा निदर्शनतयोक्तं स्यात्। एवमुत्तरत्राप्यूह्यमिति ।

(त.चं.) सपदि समस्कुरुत। 'सम्परिभ्यां करोतौ भूषणे'[६.१.१३७] संस्कर्त्ता। परिष्तर्त्ता। 'सम्पर्युपेभ्यः करोतौ भूषणे' इत्यपरे। पाठोऽयं काशिकाकृदादिसम्मतः। स एव च वेदाङ्गतीर्थसम्मतः। भावप्रकाशिकाकारः 'सम्परिभ्याम्' इत्येव पपाठ। वस्तुतस्तु तावदेव पर्याप्तम्। उपस्य उपरितनसूत्रे वक्ष्यमाणत्वात्– 'उपात् प्रतियत्नवैकृतवाक्याध्याहारेषु च' [६.१.१३९] इति। ननु न तावता पूर्यते। सतो गुणान्तराधानमाधिक्याय, आहितगुणस्य वा तादवस्थ्याय समीहा प्रतियत्नः। प्रतियत्ने स्यात्– सहकारमुपस्कुरुत इति। विकृतमेव वैकृतम्। वैकृते स्यात्– उपस्कृतं भुङ्क्त इति। वाक्याध्याहारे स्यात्– पूर्वोक्तमत्राप्युपस्कर्तव्यमिति। ननु समवायेऽपि पठ्यते– हिङ्गुजीरकशुण्ठ्यादीनां समवायः उपस्कर उच्यते। भूषणेऽपि पठ्यते– कन्यामुपस्करोति। सत्यं पठ्यते। अथापि न पृथग् वक्तव्यम्। चकारादेव पूर्वोक्तयोरप्यर्थयोर्ग्रहणं भवति। भूषणे 'समवाये च' [६.१.१३८] इति। माधव इति वैशाखः। वसन्तोत्तरार्धः। चैत्रवैशाखयोर्वासन्तिकत्वात्। आर्या पथ्यार्या वा मात्राच्छन्दः। प्रथमतृतीययोर्द्वादश मात्राः। द्वितीयेऽष्टादश चतुर्थे पञ्चदशेति। १२+१८+१२+१५ इति च्छन्दोगतिः॥ १ ॥

दशमतिशिष्यः कश्चिच्छुभजनतायै कुतूहलनतायै।
विविधसुवृत्तं वाक्यं काव्यमिवोचे सनायकस्तवकम् ॥ २ ॥

(भा.प्र.)[सुवृत्तानि आर्यागीत्यादिकानि सुचरितानि च[१]।] नायकः काव्यप्रतिपाद्यगुणः स्वामी च॥

(प.दी.) दशेति। **कश्चिद् दशमतिशिष्यः** श्रीपूर्णप्रज्ञाचार्यशिष्यः **कुतूहलनतायै** बदरिकाश्रमगमनादिकं श्रुत्वा विस्तरेण श्रोतुं कुतूहलेन नम्रायै **शुभजनतायै** सज्जनसमूहाय **वाक्यमूचे**। किमिव? **काव्यमिव**। कथम्भूतम्? **विविधसुवृत्तम्**। नानाविधशोभनवृत्तैः श्रीमध्वाचार्यचरितैर्युक्तम्। काव्यमप्यार्यातोटकादिनानावृत्तयुक्तम्। पुनः कथम्भूतम्? **सनायकस्तवकम्**।

१. क्वचिदिदं वाक्यं न पठ्यते।

नायकः स्वामी श्रीमध्वाचार्यः । तस्य स्तवः स्तुतिः, तत्सहितम् । स्वार्थे कप्रत्ययः । काव्यमपि काव्यनायकस्तुतिसहितम् ॥ २ ॥

(त.चं.) पूर्वसर्गान्ते त्रिभिरेव श्लोकैर्बदरीगमनवार्त्तां सङ्क्षिप्योक्तां श्रुत्वा विस्तरेण ज्ञातुं कुतूहलनतायै जनतायै विविधसुवृत्तं दशमसर्गमयं काव्यमिव दशमतिशिष्यः कश्चिदित्यात्मानमेव चाऽह कविः । सनायकस्तवकम् । 'स्वामी प्रभुर्नेता च नायकः' इति च । 'स्तवः श्लाधा वर्णना च निगद्यते' इति च । गीतिर्मात्राछन्दः । आर्यापूर्वार्धसमं चेदुत्तरार्धमपि सा गीतिः । १२+१८+१२+१८ इति च्छन्दोगतिरत्र ॥ २ ॥

भुवनाद्भुतमध्वचेष्टितं न वदेमापि सुरायुषा वयम् ।
सकलं खलु किन्तु किञ्चिदप्यथ शुश्रूषुजनाय वर्ण्यते ॥ ३ ॥

(प.दी.) भुवनेति । वयं **भुवनाद्भुतमध्वचेष्टितं** सर्वलोकाश्चर्यभूतं श्रीमध्वाचार्यस्य चरित्रं **सुरायुषाऽपि सकलं न वदेम खलु** । सुरायुषाऽपि सर्वं वक्तुं न समर्था इति भावः । तर्हि नोच्यते किमित्याशङ्क्य परिहरति– **किन्त्वि**त्यादिना । **किन्तु अथापि शुश्रूषुजनाय** श्रोतुमिच्छते जनाय **किञ्चित्** अल्पं **वर्ण्यते** ॥ ३ ॥

(त.चं.) भुवनाद्भुतस्य मध्वस्य भुवनाद्भुतं चेष्टितम् । सकलं खलु । वाक्यालङ्कारेऽनुनये वा । 'खलु स्याद् वाक्यभूषायां जिज्ञासायां च सान्त्वने' इति च । किञ्चिदेवोक्तमिति नाऽक्रोष्टव्यम् । अशक्यं खलु समग्रवचनमिति । किन्तु तथाऽपीत्यर्थे । यद्यपि न शक्यम् । तथाऽपि वर्ण्यते । कथम्? किञ्चिदपि । अपिरवधारणेऽपि वर्तते । किञ्चिदेव । यथोचितमिति च । 'अपिः सम्भावनाप्रश्नशङ्कागर्हासमुच्चये । तथा युक्तपदार्थेऽपि' इति च । अथ श्रोतॄणां वक्तॄणां च माङ्गलिकत्वाद् वर्ण्यत इति । नवमसर्गान्ते सङ्क्षिप्य कथनानन्तरमथेदानीं किञ्चिद् विस्तृत्य प्रस्तूयत इति च । वियोगिनी छन्दः । सुन्दरीत्यन्ये । लक्षणं तूक्तं सप्तमे ॥ ३ ॥

क्वचिदीश्वरदेवमेष भूपं
खननं पान्थजनं विधापयन्तम् ।
स्वमपि प्रतिचोदयन्तमूचे
क्रियया नोऽकुशलान् प्रबोधयेति ॥ ४ ॥

(प.दी.) क्वचिदिति । **एषः** श्रीमध्वाचार्यः **क्वचित्** देशविशेषे **पान्थजनं** पथिकजनं **खननं विधापयन्तं** कारयन्तम्, **स्वमपि** आत्मानमपि **प्रतिचोदयन्तम्,** 'भवद्भिरपि खननं क्रियताम्' इति प्रतिचोदयन्तम्, **ईश्वरदेवं** ईश्वरदेवनामानं **भूपमूचे** । किमिति? **अकुशलान्** खननविषये चातुर्यरहितान् **नः** अस्मान् **क्रियया प्रबोधय** ज्ञापय । 'त्वमेव किञ्चित् खननं कृत्वा एवं क्रियतामित्यस्माकं दर्शय' **इत्यूच** इति भावः ॥ ४ ॥

(त.चं.) क्वचिदिति तौळवप्रान्त एव स्यात् । तदानीमीश्वरदेव इत्यालुपवंशीयस्तौळवो राजाऽसीदिति शिलाशासनादवगम्यते । एतच्छासनोपलम्भात् पूर्वं 'अयमीश्वरदेव इति महादेवनामा महाराष्ट्रीयः कश्चन राजा' इति प्रथाऽऽसीत् । फलिताग्रं छन्दः । वियोगिन्येव प्रतिपादमन्ते एकाक्षराधिका फलिताग्रं नाम छन्द इत्युक्तम् । चन्द्रिकेति च नामान्तरमिति च ॥

प्रकारं प्रकटीकर्तुमारभ्य विरराम नो ।
महीयोमतिमाहात्म्याद् वैवश्येन खनन् खलः ॥ ५ ॥

(प.दी.) प्रकारमिति । **खलः** ईश्वरदेवः **प्रकारं** खननप्रकारं **प्रकटीकर्तुं** स्वयं क्रियया स्पष्टीकर्तुं **आरभ्य महीयोमतिमाहात्म्यात् वैवश्येन** पारवश्येन **खनन् नो विरराम** ॥ ५ ॥

(त.चं.) विरराम नो । 'वि-आङ्-परिभ्यो रमः' [१.३.८३] । विरमति । आरमति । परिरमति । पथ्यावक्त्रं नामाऽनुष्टुभं छन्दः । अष्टाक्षरम् । 'सर्वपादेषु न स्यातां नसावाद्यक्षरात् परम् । युजोरब्धेर्जकारश्चेत्

पथ्यावक्त्रमुदाहृतम्' । युग्मविपुलेति च नामान्तरम्– 'युग्मयोः सप्तमो लश्चेत् सा युग्मविपुला मता' । श्लोक इति च ॥ ५ ॥

नानेनेनानेनानेनोनूनेन ननु नुन्नाः ।
नानाना नो नूनं नानेनानूननाऽनुन्नः ॥ ६ ॥

(भा.प्र.) न। अनेनेन। अनेन। अनेनोऽनूनेन। ननु। नुन्नाः। नानाऽऽनाः। नो। नूनम्। नानेनानूनना। अनुन्नः– इति पदच्छेदः। कथमिदं महीयोमति-माहात्म्यात् सम्भवतीत्याशङ्क्योच्यते। अनेन अनेनेन ननु नानानाः न नुन्नाः नो। अनेन प्राणांशेन[1] ननु नानाप्राणिनः न प्रेरिता नो। अनाः प्राणाः, तत्सम्बन्धित्वादानाः प्राणिनः। कीदृग्भूतेन? अनेनोऽनूनेन। अनेनाश्चायमनून-श्चेति। नूनं प्रायः। कुतः? नानेनानूनना नानेनेषु नानेश्वरेषु ब्रह्मरुद्रादिषु,अनूनना पूर्णपुरुषः अनेनाप्रेरितः॥

(प.दी.) महीयोमतिमाहात्म्यमुपपादयति– **नेत्यादिना । न । अनेनेन । अनेन। अनेनोऽनूनेन। ननु। नुन्नाः । नानानाः । नो। नूनम्। नानेना-नूनना । अनुन्नः** इति पदच्छेदः । **अनेन, अनेनेन** अनानां प्राणानामिनेन स्वामिना, **नानानाः** नानाविधाः प्राणिनः **न नुन्नाः** न प्रेरिताः, **नो ननु** न विद्यन्ते खलु । अनाः प्राणाः। तत्सम्बन्धित्वादानाः प्राणिनः। कथम्भूतेन? **अनेनोऽनूनेन** । अनेना एनोरहितः । निर्दोष इति यावत् । अनेनाश्चसाव-नूनश्चेति अनेनोऽनूनः। तेन। **नूनं** प्रायः **न नुन्नाः नो**। कुतः? **नानेनानूनना** नानेनेषु नानेश्वरेषु तारतम्येन नानाविधेषु सर्वजीवानामीश्वरेषु ब्रह्मादिषु, अनूनना, अनूनः पूर्णः ना पुरुषः श्रीमन्नारायणः **अनुन्नः** अनेन प्रेरितो न भवति । तस्मान्नूनमित्युक्तमिति भावः ॥ ६ ॥

(त.चं.) नूनं प्रायेण निश्चितम्। 'तर्कनिश्चितयोर्नूनम्' । प्रायेणेति किम्? यतो भगवान् न नुन्नः । अथापि नानाविधा आनाः प्राणिनो नुन्ना इत्यत्र

१. 'प्राणेशेन' इति मूलपाठः सम्भाव्यते। अनानां प्राणानामिनेन ईशेनेति हि स्वरसोऽर्थः।

तु नापवादः । उपगीतिर्मात्राछन्दः । 'उपगीतिस्तु दलयोः पथ्यार्योत्तरलक्ष्म चेत्' । १२+१५+ १२+१५ इति मात्रागतिः । पथ्यार्यायाः पूर्वार्धवदुत्तरार्धमपि चेत् सा गीतिः । उत्तरार्धवत् पूर्वार्धमपि चेत् सोपगीतिरिति ॥ ६ ॥

यमशेषभवप्रभवः स्मरता-
मसुखाब्धिरपैति न चित्रमिदम् ।
मरुतीदृशि भान्ति हि यत्स्तवने
यमशेषभवप्रभवः स्म रताः ॥ ७ ॥

(भा.प्र.) यं स्मरतामशेषसंसारप्रभवोऽसुखाब्धिरपैति। यत्स्तवने च रता यमानन्तरुद्रसमर्था भान्ति स्म ॥

(प.दी.) **यमिति** । यं श्रीमुख्यप्राणं **स्मरतां** सताम्, **अशेषभवप्रभवः**, अशेषश्चासौ भवप्रभवश्चेति विग्रहः, संसारे विद्यमानः सर्वोऽपीत्यर्थः, **असुखाब्धिः** दुःखाब्धिः **अपैति** अपगच्छति । किञ्च **यत्स्तवने** यस्य स्तुतौ **रताः** निरताः **यमशेषभवप्रभवः** यमानन्तरुद्राख्याः प्रभवः ईश्वराः, जगतामिति शेषः, **भान्ति स्म** । ईदृशि एतादृशि महागुणे **मरुति** श्रीमुख्यवायौ इदं 'वैवश्येन खनन् खलः नोपरराम' इतीदं **न चित्रम्**, आश्चर्यं न भवति हि । शेषभवादिप्रभूणामपि तदधीनत्वादिति भावः ॥ ७ ॥

(त.चं.) यमशेषभवप्रभवः । अशेषभवेषु प्रभवः । अशेषश्च भवप्रभवः । यमः लोकानां संहारे प्रभुः । तस्यापि प्रभू भवशेषौ । तोटकं जागतं छन्दः । 'सैश्चतुर्भिस्तोटकं स्यात्' ॥ ७ ॥

सञ्चरन्नञ्चनीयः कदाचिद् विभु-
र्विष्णुपद्यास्तटं वैष्णवाग्रेसरः ।
प्रापदाप्तैर्निजैरेष शिष्यैर्वृत-
स्त्यक्तविश्वप्लवं शात्रवातङ्कतः ॥ ८ ॥

(प.दी.) **सञ्चरन्निति** । **सञ्चरन्** तत्रतत्र पर्यटन् **अञ्चनीयः** पूज्यः **वैष्णवाग्रेसरः** श्रीविष्णुभक्ताग्रणीः **विभुः आप्तैः निजैः शिष्यैः वृतः एषः** श्रीमध्वाचार्यः **कदाचिद् विष्णुपद्यास्तटं** गङ्गायास्तीरं **प्रापत्** । कथम्भूतम्? **शात्रवातङ्कतः** शत्रुभयात् **त्यक्तविश्वप्लवं** त्याजितसमस्तनावम् ॥ ८ ॥

(त.चं.) विष्णुपद्यास्तटम् । 'विष्णुपदं नभोऽब्जयोः । विष्णुपदस्तु क्षीरोदे । विष्णुपदी सुरापगा' इति च । त्यक्तविश्वप्लवं शात्रवातङ्कतः । शातयतीति शत्रुः । शद्लृ शातने । 'रु-शातिभ्यां क्रुन्'[१.१५९] इति दशपादिका । रौते रुरुर्भवति । शातयतेः शत्रुर्भवति । शत्रुरेव शात्रवः । प्रज्ञादिषु हि पठ्यते बन्धुरिव शत्रुरपि । बन्धुर्बान्धवो भवति । शत्रुः शात्रवो भवति । 'तल्पं स्यादुडुपः प्लवः' इति । 'आतङ्को भयमाशङ्का दरस्त्रासश्च साध्वसम्' इति च । सगणमालया निबद्धतोटकः कविरिह रगणमालया स्रग्विणीं विरचयति । 'रैश्चतुर्भिः स्रग्विणी स्यात्' ॥ ८ ॥

इमान् स्वस्वपूर्वाश्रयानात्मवाक्यात्
सलीलं दयालुः स मूलाश्रयात्मा ।
निषेद्धॄननादृत्य चानन्यलङ्घ्यां
तदाऽत्याययत् तां नदीं संसृतिं वा ॥ ९ ॥

(प.दी.) इमानिति । दयालुः **मूलाश्रयात्मा** स्वयं सर्वेषां मूलाश्रयस्वरूपः **सः** श्रीमध्वाचार्यः **तदा आत्मवाक्यात्** स्ववाक्यात् **स्वस्वपूर्वाश्रयान्** स्वस्मात्स्वस्मात् पूर्वानाश्रितान् **इमान्** स्वशिष्यान् **अनन्यलङ्घ्यां** नावा विना अन्यैर्लङ्घितुमशक्यां **तां नदीं** गङ्गां **सलीलमत्यायय**त् तारयामास । किं कृत्वा? **निषेद्धॄन्** न गन्तव्यमिति निवारयतः पुरुषान् **अनादृत्य** अगणय्य[१] **च** । सर्वेषां मूलाश्रयत्वेनाग्रतो यान्तं मध्वं तद्वचनादेको जग्राह । तमन्यस्तमप्यन्य इति स्वस्वपूर्वाश्रयानत्याययदिति भावः । कामिव? **संसृतिं वा**

१.अविगणय्येति अगणयित्वेति वा पठितव्यम् । लिपिकृतः प्रमाद्यन्ति ।

संसारमिव। क्रमेण स्वोत्तमभक्तियुक्तान् सज्जनान् स्वयं यथा संसारं तारयति तद्वदिति भावः । किं कृत्वा? **निषेद्धून्** मोक्षविरोधिनः कामक्रोधादीन् **अनादृत्य** ॥ ९ ॥

(त.चं.) स्वस्वपूर्वाश्रयान् । स्वस्यस्वस्य स्वस्मात्स्वस्मात् पूर्वः आश्रयः नदीतरणसमये जलरयं सोढुमालम्बनभूतः अपतनहेतुराधारः येषाम् । दयालुः । 'स्पृहि-गृहि-पति-दयि-निद्रा-तन्द्रा-श्रद्धाभ्य आलुच्' [३.२. १५८] । ननु कथं तर्हि शयालुः? मा भूः संशयालुः। 'आलुचि शीङो ग्रहणं कर्तव्यम्' इत्युपसङ्ख्याति कात्यायनः । अथापि संशय्यते कथं कृपालुः? 'आलुचि कृपेरपि ग्रहणं कर्तव्यम्'। क एवमाह? ननु वयं वदन्तः स्मः । मितद्र्वादिकत्वं त्वगतिका गतिः । मूलाश्रयात्मा । स्वस्वपूर्वाश्रयाणां मूलाश्रयः सन् । सर्वेषां मूलाश्रयः नारायणः आत्मा स्वामी यस्य तादृशश्च सन् । गङ्गामत्याययत् तारतम्यक्रमेण स्वस्वपूर्वाश्रयान् संसृतिमिव । कथमत्याययत्? 'णौ गमिरबोधने'[२.४.४६] इतीणोऽबोधनेऽर्थे गमिरादेश आदिश्यते। अत्ययो हि तरणं न बोधनम् । तेन आययतीति न भवति । गमयतीति भवति । अबोधने इति कोऽर्थः? अप्रतियोगे इति किल विवक्षितम् । बोधनेऽर्थे प्रतियोगे प्रत्याययतीति भवति । अतियोगेऽपि भवति–अत्याययति । प्रयोगशरणा हि वैयाकरणाः । यैश्चतुर्भिः भुजङ्गवत् कुटिलं प्रयातीति भुजङ्गप्रयातं नाम जागतं छन्दः । 'तद् भुजङ्गप्रयातं यौ यौ यतिर्न पदान्तरे' इति च ॥ ९ ॥

वारयतवारयत वैरिसुहृदोऽमून्
मारयतमारयत पारगमनात् प्राक् ।
आपतत आलपत इत्यवददुच्चैः
स [1]त्वरकराजपुरुषानुचितवाचा ॥ १० ॥

---

१. 'त्वरगराज–' इति वेदाङ्गतीर्थसम्मतः पाठः इति भाति, यदि लिपिकृतः न प्रामाद्यन् ।

(प.दी.) वारयतेति । **सः** श्रीमध्वाचार्यः **त्वरगराजपुरुषान्** तुरुष्क-राजस्य भटान् **उचितवाचा** तान् प्रवक्तुमुचितया वाचा, तुरुष्कभाषये-त्यर्थः । **उच्चैरित्यवदत्** । कथम्भूतान्? **वैरिसुहृदः** अस्मद्वेषिप्रियान् **अमून्** **वारयतवारयत** निवारयन्तुनिवारयन्तु । **पारगमनात् प्राक्** पूर्वमेव **मारयतमारयत** । उभयत्रापि सम्भ्रमेण द्विरुक्तिः । **इत्यालपतः** भाषमाणान् **आपततः** अभितः पततः ॥ १० ॥

(त.चं.) वारयतवारयत । एकमिदं पदम् । वीप्साया ऐकपद्यनियमात् । 'योयो धूमवान्' इत्यादिषु भिन्नपदतां मन्यमानाः भ्रान्ताः । त्वरकराज-पुरुषान् । त्वरकराजस्य पुरुषान् । त्वरकानेव राजपुरुषान् । अविमृश्य वृथा त्वरन्त इति तुरुष्कान् परिहसन्निव त्वरकानाह । इन्दुवदना नाम चतुर्दशाक्षर-पादं शाकरं छन्दः । भजसनैर्गुरुद्वयेन च । 'प्रोक्तेन्दुवदना प्राज्ञैर्भजसनैः सगुरुद्वयैः' । आदिगुरुः मध्यगुरुः अन्तगुरुः सर्वलघुश्चेति गणक्रमः ॥

न जळा जले पतत साहसादहो
न भयं हि वो बहुतयाऽबहोर्जनात् ।
भवतां पतिं क्षितिपतिं दिदृक्षवः
प्रतियाम केन कलहं चिकीर्षथ ॥ ११ ॥

(प.दी.) नेति । हे **जळाः**, विवेकशून्याः, **साहसात् जले न पतत** । **अहो** आश्चर्यम् । भवतामविवेकितेति भावः । कुतः? **वः** युष्माकं **बहुतया** अस्मदपेक्षया बहुत्वात् **अबहोः** युष्मदपेक्षयाऽल्पसङ्ख्यकात् **जनात्** **भयं न हि** । इतश्च जले न पतत– वयं **भवतां पतिं** स्वामिनं **क्षितिपतिं** राजानं **दिदृक्षवः** द्रष्टुमिच्छवः **प्रतियाम** प्रत्यागच्छामः । तस्मात् **केन** केन कारणेन **कलहं चिकीर्षथ** कर्तुमिच्छथ इत्यवदत् इत्यन्वयः ॥ ११ ॥

(त.चं.) त्वरकत्वमेवाऽह – न जळा जले पतत साहसादहो । कथं जळाः? पाणिनीयम्मन्या मन्यन्ते– जलतीति जलः । लडयोरभेदाज्जड इति । कोऽर्थः?

'जल घात्ये । घात्यं जडत्वम् । अतैक्ष्ण्यमित्यर्थः' इति क्षीरस्वामी । 'जल धान्ये' इति काशकृत्स्नीयाश्चान्द्राश्च । 'धान्यमार्द्रीभावः' इति च व्याचक्षते । अहो लिपिकृतां प्रमादपरम्परा । अन्ये तु 'जल घातने' इति पठित्वा जलति घातयत्यात्मानमिति जलं जडं मन्यन्ते । 'इष्टं वाऽनिष्टं वा सुखदुःखं वा न वेत्ति यो मोहात् । परवशगः स भवेदिह नित्यं जडसञ्ज्ञकः पुरुषः' इति च वर्णयन्ति । वस्तुतस्तु नात्र लडयोरैक्यम् । किन्तु ळडयोः । तेन जळधातुरपि पठनीयः । काशकृत्स्नीयेऽपि 'जल चलने, जल धान्ये' इति जलधातुर्द्विः पठ्यते । भौवादिकस्यैव द्विः पठने कारणाभावादवश्यमेको जळधातुः स्यात् । कोऽर्थः? जळ जड वा मौर्ख्ये । जळति जडति वा जळो जडो वा मूर्खः । अविमृश्यकारिता च धृष्टता च साहसम् । अविवेकेन मान्यम्मन्यता धृष्टता । सजसजगैर्मञ्जुभाषिणी नामातिजगती ॥ ११ ॥

वचसेत्यनेन स परान् न्यरुणद्
भुजगान् नरेन्द्र इव मन्त्रबलात् ।
उदतारयत् परिजनं मृतिभी-
सरितश्च देवसरितश्च समम् ॥ १२ ॥

(प.दी.) वचसेति । **सः** श्रीमध्वाचार्यः इति एवमुक्तेन **अनेन वचसा परान्** द्विषतः **न्यरुणत्** रुरोध । कः कानिव? **नरेन्द्रः** कश्चिद् गारुडिकः । 'नरेन्द्रो विषवैद्ये च' इत्यभिधानम् । **मन्त्रबलात् भुजगानिव** । **परिजनं** स्वसेवकजनं **मृतिभीसरितः** तुरुष्केभ्यो मरणभयाख्यनद्याः **देवसरितश्च** गङ्गायाश्च **समं** युगपत् **उदतारयत्** उत्तारयामास ॥ १२ ॥

(त.चं.) भुजगान् नरेन्द्र इव । 'नरेन्द्रस्तु महीपाले विषवैद्ये च' इति च । प्रमिताक्षरा जागतं छन्दः । एकाक्षरन्यूना मञ्जुभाषिण्येव प्रमिताक्षरा भवति । एकादशलोपेन सजससैः । 'सज्ससैः प्रमिताक्षरा' इति च ॥

निर्विकारचरितोऽपि परीतः क्रूरकिङ्करसहस्रतयेन ।
स व्रजन्नुदलसज्जगदीशः सिंहराडिव सृगालसमूहे ॥ १३ ॥

(प.दी.) निरिति । सः जगदीशः श्रीमध्वाचार्यः **क्रूरकिङ्करसहस्रतयेन परीतोऽपि** क्रूरेण तुरुष्ककिङ्करसहस्रेण परीतोऽपि **निर्विकारचरितः** सन् **व्रजन्** गच्छन् **उदलसत्** शुशुभे । क इव? **सृगालसमूहे सिंहराडिव** ॥

(त.चं.) परीतः परिगतः । सृगालसमूहे । असृग् आलातीति असृगालं सन्तं सृगालमाचक्षते । स्वागतं नाम त्रैष्टुभं च्छन्दः । उक्तं षष्ठे ॥ १३ ॥

अप्रकम्प्यवपुषं सुरासुरैः
सिंहसंहननमेनमुन्नतम् ।
प्राप्तमात्मनगरान्तिकं नृपः
प्रेक्ष्य सौधशिखरे स्थितोऽब्रवीत् ॥ १४ ॥

(प.दी.) अप्रेति । **सौधशिखरे स्थितः नृपः** तुरुष्कराजः **सुरासुरैः अप्रकम्प्यवपुषं सिंहसंहननम्,** 'वराङ्गरूपोपेतो यः सिंहसंहननो हि सः' इत्यमरः, **उन्नतमेनं** श्रीमध्वाचार्यं **आत्मनगरान्तिकं प्राप्तं प्रेक्ष्य अब्रवीत्** ॥ १४ ॥

(त.चं.) सिंहसंहननम् । सिंहस्येव संहननमस्येति । सौधशिखरे । सुधाधवळितं धनवतां हर्म्यं सौधम् । रथोद्धता च्छन्दः । मञ्जुभाषिण्येवैकादशलोपेन प्रमिताक्षरा यथा तथा स्वागतमेव नवमदशमयोर्गुरुलघुव्यत्ययेन रथोद्धता भवति । रनभा गौ च हि स्वागतम् । रनरा लगौ च रथोद्धता । अपूर्वेयं छन्दःसंयोजना कवेः ॥ १४ ॥

रिपुनृपप्रणिधिप्रतिशङ्कया
पथिकपाटनकर्मणि दीक्षितैः ।
सुमुख मे पुरुषैः परुषैः कथं
यमभटैरिव नासि विहिंसितः ॥ १५ ॥

(प.दी.) रिपुनृपेति । हे **सुमुख**, **रिपुनृपप्रणिधिप्रतिशङ्कया** मम रिपुभूतस्य नृपतेः प्रणिधयो गूढपुरुषा इति प्रतिशङ्कया, 'प्रणिधिर्गूढपुरुषः'[१] इत्यमरः, **पथिकपाटनकर्मणि** पान्थानां पाटनकर्मणि **दीक्षितैः** तदेकनिरतैः **यम-भटैरिव परुषैः** क्रूरैः **मे पुरुषैः** भटैः **कथं विहिंसितो नासि** ॥ १५ ॥

(त.चं.) पथिकपाटनकर्मणि । पन्थानं गच्छन्ति पथिकाः । 'पथः ष्कन्' [५.१.७५] । पट भाषार्थः । भासार्थ इत्यपि पठन्ति । प्रमादोऽयम् । यस्मिन्नर्थे पटधातुं भाषन्ते स तस्यार्थ इति भाषार्थ इत्येव साधु । विभेदने स्यात्– घटं पाटयति । निर्मूलने स्यात्– तरुमुत्पाटयति । प्रतिघाते स्यात्– शत्रून् पाटयति । स्तेये स्यात्– सर्वस्वं पाटयामास । पाटनमेव व्रतमिति तत्र दीक्षिताः । दीक्ष मौण्ड्येज्योपनयननियमव्रतादेशेषु । वैदिकानां श्रद्धां परिहसन्निवाऽह तुरुष्काणां राजा– भवतां यमभटैरिव मे पुरुषैरिति । द्रुत-विलम्बितं छन्दो भवति जागतम् ॥ १५ ॥

अप्लवदेवनदीतरणं ते
हन्त कथं च चिकीर्षसि किं त्वम् ।
तं निगदन्तमितिप्रभृतीह
स्माह महापुरुषोत्तमदासः ॥ १६ ॥

योऽसौ देवो विश्वदीपः प्रदीप्तः
कुर्मः सर्वं तत्परानुग्रहेण ।
यामस्तावत् तूर्णमाशामुदीची-
मित्याद्यं तद्भाषया चित्रवाक्यम्[२] ॥ १७ ॥

१.नेदममरकोशे दृश्यते । 'चारश्च गूढपुरुषः' इत्यमरपाठः । 'प्रणिधिर्गूढपुरुषः' इति तु हलायुधः ।

२.क्वचित् सप्तदशश्लोकव्याख्यानतया भावप्रकाशिका पठ्यते । तद् यथा– 'किं ललाट

(प.दी.) अप्लवेति । **ते** तव **अप्लवदेवनदीतरणं** प्लवरहितगङ्गातरणं **कथं** केन प्रकारेण? **हन्त** प्लवरहितगङ्गातरणमाश्चर्यमिति भावः । **त्वं च किं** वा **चिकीर्षसि?** इतः परं किं कर्तुमिच्छसि । इत्यब्रवीदिति पूर्वेणान्वयः । **महापुरुषोत्तमदासः** श्रीमध्वाचार्यः **इह इतिप्रभृति** इत्यारभ्य, इत्यादीति यावत् । **निगदन्तं तं** नृपतिं **तद्भाषया** तस्य भाषया **इत्याद्यं चित्रवाक्यमाह स्म** इत्युत्तरश्लोकेनान्वयः ॥ ❋ ॥ य इति । **विश्वदीपः** विश्वप्रकाशकः **योऽसौ देवः प्रदीप्तः** प्रकाशते **सर्वम्** अशेषं कर्म **तत्परानुग्रहेण** तस्य परमानुग्रहेण **कुर्मः** । 'कथमप्लवदेवनदीतरणम्' इत्यादेरिदमुत्तरम् । **तावत् तूर्णमुदीचीमाशां यामः** । 'किं चिकीर्षसि' इत्यस्योत्तरमेतत् । **इत्याद्यं आह स्म** ॥ १६ ॥ १७ ॥

(त.चं.) इह तुरुष्कसेनामध्ये । महापुरुषोत्तमदासः महापुरुषा देवाः । तदुत्तमो नारायणस्तस्य दासोऽयम् । महांश्चायं पुरुषोत्तमस्य दासः । महा-पुरुषस्य वाऽयमुत्तमो दास इति । यामस्तावत् तूर्णम् । तावदित्यवधारणे । तूर्णं तावत् त्वरितमेव । तावदिति प्रशंसायाम् । प्रशस्तं नः प्रयाणमिति । तावदिति परिच्छेदे । प्रथमं तावदुदीचीं याम इति । तावदित्यधिकारे । यामस्तावत् आरब्धगमना वयमिति । 'तावत् कार्त्स्न्येऽवधारणे । प्रशंसायां परिच्छेदे मानाधीकारसम्भ्रमे' इति च । प्रथमं दोधकम् । भत्रयं गौ चेति त्रिष्टुप् । 'दोधकं भौ भगौ गः स्यात्' इति च । द्वितीयं शालिनी त्रिष्टुबेव । 'शालिनी मतता गौ च यतिः श्रुतितुरङ्गमैः' इति च ॥ १६ ॥ १७ ॥

गाम्भीर्यं धृतिमुरुवीर्यमार्यभावं
तेजोऽग्र्यं गिरमपि देशकालयुक्ताम् ।

इति पृष्टो राज्ञा करेण गदां भवन्तो बिभ्रन्ति(?) वयं ललाट इत्यूच इत्याद्यशब्दार्थः' इति । भवन्तो बिभ्रन्तीत्याद्यपपाठगर्भमिदमप्रबुद्धं वाक्यं संस्कृतभाषानभिज्ञैः प्रक्षिप्त-मिति स्फुटम् । तुरुष्कराजाः करे गदामबिभरुरिति चाद्भुतमितिहाससंशोधनम् । अन-धीतिनां शास्त्रेषु अप्रगल्भानामितिहासेषु अप्रबुद्धानां भाषासु भ्रमविलासेन भवन्तीदृशाः प्रक्षेपा इत्यतिरोहितम् ।

राजाऽस्य स्फुटमुपलभ्य विस्मितोऽस्मै
राज्यार्धं सपदि समर्पयाम्बभूव ॥ १८ ॥

(प.दी.) **गाम्भीर्यमिति** । **राजा अस्य** श्रीमध्वाचार्यस्य **गाम्भीर्यम्, धृतिं** धैर्यम्, **उरुवीर्यम्, आर्यभावं** पूज्यत्वं विद्वत्तां वा, **अग्र्यं तेजः, देशकाल-युक्तां गिरमपि स्फुटमुपलभ्य** प्राप्य, दृष्ट्वा श्रुत्वा चेत्यर्थः, **विस्मितः सपदि अस्मै राज्यार्धं समर्पयाम्बभूव** ॥ १८ ॥

(त.चं.) गाम्भीर्यम् । अगाधता भावस्य, प्रमितता च वचसाम्, अनवगाह्यता चित्तस्य, अचापलं च चरितस्य । 'गभीरगम्भीरौ' [८.७७] इति दशपादिकायां निपातितम् । धृतिर्धैर्यम् । असम्भ्रान्तिः सत्यपि त्रास-हेतौ । अचलता गिरेरिव । वीर्यमदम्यमुत्सहनम्, येनाभिभवति परान् स्वयं तु नाभिभूयते । आर्यभावः सदाचारप्रवणता ज्ञानगरिमा कुलीनता च । तेजो ब्रह्मवर्चसम्, निशिता च दृष्टिः यत्र परे शलभायन्ते । राज्यस्य अर्धः एकदेशः । राज्ये कश्चन प्रदेशं तस्मै समर्पयाम्बभूवेति । राज्यस्यार्धं समांशमित्यपि व्याचक्षते । प्रहर्षिणी नाम छन्दः । अतिजगती । 'प्रहर्षिणी मनौ ज्रौ गः' इति च ॥ १८ ॥

दण्डार्हबुद्धिविषयो नृपपूरुषाणां
राज्यार्हबुद्धिविषयोऽभवदित्थमेषः ।
नीतिं प्रकाशयितुमेव विपत्सु कार्यां
गन्तुं प्रभुः प्रसभतोऽपि तथा व्यधात् सः ॥ १९ ॥

(प.दी.) **दण्डार्हेति** । **एषः** श्रीमध्वाचार्यः **इत्थं नृपपूरुषाणां दण्डार्ह-बुद्धिविषयः** नृपस्य **राज्यार्हबुद्धिविषयः** अयं राज्यार्ह इति बुद्धेर्विषयः **अ-भवत्** । **सः प्रसभतः** बलात् **गन्तुं प्रभुरपि** प्रसभतो गन्तुमशक्तानां **विपत्सु** आपत्सु **कार्यां नीतिं** तत्तद्देशकालात्मशक्त्याद्यनुसारेण प्रवृत्तिप्रकारं

प्रकाशयितुमेव दर्शयितुमेव **तथा व्यधात्** । यथा राजा राजपुरुषाश्च परितुष्टा भवेयुस्तथा चक्र इति भावः ॥ १९ ॥

(त.चं.) नृपपूरुषाणां राजभटानां दण्डार्होऽयमिति बुद्धिविषयो नृपस्य राज्यार्होऽयमिति बुद्धिविषयोऽभवत् । मध्वस्यैकैकाऽपि चर्या लोकशिक्षार्था भवतीत्याह– नीतिं प्रकाशयितुमेव । वसन्ततिलका नाम शाक्वरं छन्दः । लक्षणं तु गतं द्वितीये ॥ १९ ॥

कदाचिच्चोराणां निकरमवलोक्याभिपतता-
मवस्थाप्य स्वीयान् करगपटपिण्डार्थमतिकृत् ।
चरन्नेतेष्वेतानथ मिथ इहाघातयदहो
विभुः सम्मोह्य प्राग् विजय इव संशप्तकगणान् ॥ २० ॥

(भा.प्र.) करतलगतपटपिण्डं कनकमिति विचिन्त्य मध्वं हन्तुकामाः परस्परं जघ्नुः ॥

(प.दी.) कदाचिदिति । **विभुः** श्रीमध्वाचार्यः **कदाचित् अभिपततां चोराणां निकरमवलोक्य स्वीयानवस्थाप्य** स्वकीयान् सर्वानेकत्र स्थापयित्वा, स्वयमेकं पटं पिण्डीकृत्य गृहीत्वा **करगपटपिण्डार्थमतिकृत्** स्वकरगतपटपिण्डे अर्थमतिकृत् धनमेतदिति बुद्धिमुत्पादयन् **एतेषु** चोरेषु **चरन्** चोरनिकरमध्ये इतस्ततः पर्यटन् **अथ इह एतान् सम्मोह्य** मोहयित्वा **मिथः** परस्परम् **अघातयत् अहो** । कः कानिव? **प्राक् विजयः** अर्जुनः **संशप्तकगणानिव** ॥ २० ॥

(त.चं.) इह बदरीगमनमार्गे । अर्जुनः संशप्तकगणानिव सम्मोहनास्त्रेण सम्मोह्य । इयं शिखरिणी । यमनसभा लगौ चेति अत्यष्टिः । 'यम्नाः सम्लाः शिखरिणी गो रसैः शङ्करैर्यतिः' ॥ २० ॥

अन्यत्र च चोरान् धन्यप्रवरोऽसौ
शूरान् शतसङ्ख्यान् प्राप्तान् स्वजिघांसून् ।

एकेन तु शिष्येणाऽकृष्टकुठारान्
निस्ताडितयूथ्यानद्रावयत द्राक् ॥ २१ ॥

(भा.प्र.)अन्यत्र–

दस्यूनवाप्तानवलोक्य सोऽब्रवीत् को मेऽस्ति शिष्यो विभयो जयीत्यलम्।
अभ्यासवांस्तूर्णमुपेन्द्रतीर्थस्तत्तेजसा क्रूरचमूं प्रभोऽभ्ययात्[१] ॥

(प.दी.) अन्यत्रेति । **असौ धन्यप्रवरः अन्यत्र च** ततोऽन्यत्रापि **शत-सङ्ख्यान् शूरान् स्वजिघांसून्** आत्मानं हन्तुकामान् **प्राप्तान्** आगतान् **चोरान् द्राक् अद्रावयत** द्रावयामास । कथम्भूतान्? **एकेन तु शिष्येण** उपेन्द्रतीर्थाख्येन **आकृष्टकुठारान्** तेनैव शिष्येण **निस्ताडितयूथ्यान्** नितरां ताडितो यूथ्यो येषां ते निस्ताडितयूथ्याः तान् । यूथे भवः यूथ्यः । चोरयूथे कश्चित् प्रबल इति भावः ॥ २१ ॥

(त.चं.) शतसङ्ख्यान् । शतमिति बहुत्ववचनम् । 'नूरारु' [ನೂರಾರು] इति भाषायाम् । एकेन शिष्येण उपेन्द्रतीर्थेनेति भावप्रकाशिकायां स्फुटम् । निस्ताडितयूथ्यान् । युवन्ति तस्मिन्निति यूथः । यु मिश्रणे । पथिकादि-सङ्घातः । गजादिसङ्घात इत्यन्ये । यद्यपि यूथे ये भवन्ति ते यूथ्याः भवन्ति । अत्र तु ये यूथे प्रभवन्ति ते यूथ्याः । यूथनाथाः । अद्रावयत अद्रावयत् । सर्वस्मादुभयं पदं मन्यमानेन 'बुध-युध-नश-जन-इङ्-प्रु-द्रु-स्रुभ्यो णेः'[१.३.८६] इति पाणिनिना विहितमपि परस्मैपदं नाऽश्रितम् । इयं मणिमाला जागतं छन्दः । 'मणिमाला तयतयाश्छिन्ना स्कन्दास्यदर्शनैः' इति च ॥ २१ ॥

क्वचिच्छिलाच्छटाभ्रमादमुं ससङ्गमत्यजन् ।
अवेक्ष्य दस्यवः पुनः कुतूहलात् तमानमन् ॥ २२ ॥

१.'क्रूरचमूं प्रभोऽभ्ययात्' इत्येव सर्वत्र पठ्यते । अर्थस्तु न स्फुटः । क इह नाम सम्बोध्येत 'प्रभो' इति । 'समभ्ययात्' इति मूलपाठः सम्भाव्यते ।

(भा.प्र.) अपरत्र च–

अचलास्तिष्ठतेत्युक्त्वा शिष्यान् दस्यूनवञ्चयत् ।
मध्वस्तेऽपि गताः पश्चात् तत्र नैक्षन्त कञ्चन ॥

(प.दी.) क्वचिदिति । **क्वचित्** अन्यत्र क्वचित् **दस्यवः** सशिष्यं मध्वं दृष्ट्वा **शिलाच्छटाभ्रमात्** 'एते शिलासमूहा एव न मनुष्याः' इति भ्रमात् **ससङ्घं** शिष्यसङ्घसहितं **अमुमत्यजन्** । **पुनः** पश्चात् **अवेक्ष्य** ससङ्घममुं गच्छन्तं दृष्ट्वा **कुतूहलात् तमानमन्** ॥ २२ ॥

(त.चं.) अपरत्र च क्वचिच्छिलाच्छटाभ्रमात् । क्वचित् कान्तिश्छटा । क्वचित् समुदायः परम्परा वा छटा । तद् यथा कटाक्षच्छटा । कटाक्षकान्तिः कटाक्षपरम्परा वा । सटाच्छटा सटासमुदायः । '–चन्दनरसच्छटा–' इति भवभूतिर्मालतीमाधवे । चन्दनरसधारेत्यर्थः । अत्र शिलाच्छटा पाषाणपुञ्जः । प्रमाणिका नामानुष्टुब्भेदः । 'प्रमाणिका जरलगा न यतिः पादमध्यगा' इति ॥ २२ ॥

सत्योच्छेदे सेच्छापातं व्याघ्राकारं दैत्यव्याघ्रम् ।
प्राळेयाद्रेः प्रान्ते प्राज्ञः पाणेर्लीलालेशेनाऽस्यत् ॥ २३ ॥

(भा.प्र.) अन्यत्र च–

मध्वं दुर्विषहं मत्वा देवं सङ्गृह्य चाग्रतः ।
[1]प्रयान्तं सत्यतीर्थार्यं जिघांसुर्व्याघ्र आपतत् ॥

(प.दी.) सत्येति । **प्राज्ञः** श्रीमध्वाचार्यः **प्राळेयाद्रेः** हिमाद्रेः **प्रान्ते** समीपे **सत्योच्छेदे**, देवं सङ्गृह्याग्रतो गच्छतः सत्यतीर्थार्यस्योच्छेदे, हिंसायामिति यावत्, **सेच्छापातम्**, इच्छया सहितः सेच्छः आपातो यस्य स तथोक्तः, तं **व्याघ्राकारं** शार्दूलरूपिणं **दैत्यव्याघ्रं पाणेर्लीलालेशेन** पाणिना किञ्चित्

१. 'आयान्तम्' इति क्वचित् पाठः ।

ताडनमात्रेण **आस्यत्** निराचक्रे । 'मध्वं दुर्विषहं मत्वा देवं सङ्गृह्य चाग्रतः । प्रयान्तं सत्यतीर्थार्यं जिघांसुर्व्याघ्र आपतत्' इति च ॥ २३ ॥

(त.चं.) सत्योच्छेदे सेच्छापातम् । आस्यत्, असु निरसने । अस्यदिति पदपाठे षो अन्तकर्मणि । विद्युन्माला नामानुष्टुब्भेदः । 'विद्युन्माला ममगगा यतिर्विधिमुखैर्युगैः' इति ॥ २३ ॥

प्राप स नारायणतः शुद्धशिलात्मप्रतिमाः ।
यासु स पद्मासहितो दोष्यहितः सन्निहितः ॥ २४ ॥

(भा.प्र.) तीर्थं स्वपार्श्वभूमिं च मोक्तुं नेच्छति सन्मतौ ।
त्वत्स्नानाम्बुनि गङ्गा स्याच्छिलास्वास्वहमित्यदात् ॥

(प.दी.) प्रापेति । **सः** श्रीमध्वाचार्यः बदरिकाश्रमं प्राप्य **नारायणतः शुद्धशिलात्मप्रतिमाः** शुद्धाः पवित्राः शिलास्वरूपाः प्रतिमाः **प्राप** । **यासु** प्रतिमासु **सः** नारायणः **पद्मासहितः** रमासहितः **सन्निहितः** । कथम्भूतः? **दोष्यहितः** भगवद्द्वेषादिदोषवतामहितः ॥ २४ ॥

(त.चं.) प्राप स नारायणतः । नरसखान्नारायणात् । माणवकं नामानुष्टब्भेदः । 'भतौ लगौ माणवकं यतिर्जलधिभिर्युगैः' इति च ॥ २४ ॥

पाराशर्यः परतत्वप्रसिद्ध्यै
तात्पर्यार्थं परमं भारतस्य ।
व्यक्तं वक्तुं नियुनक्ति स्म साक्षा-
देनं धन्यं भुवने मन्यमानः ॥ २५ ॥

(प.दी.) पाराशर्य इति । **पाराशर्यः** श्रीवेदव्यासः **परतत्वप्रसिद्ध्यै** परतत्वस्य भगवत्स्वरूपस्य प्रसिद्ध्यै सम्यग् ज्ञानार्थं **भारतस्य परमं तात्पर्यार्थं व्यक्तं वक्तुमेनं** श्रीमध्वाचार्यं **नियुनक्ति स्म** न्ययोजयत् । **भुवने एनं साक्षात्** मुख्यतः **धन्यं मन्यमानः** ॥ २५ ॥

(त.चं.) साक्षात् समक्षं स्वयमेव नियुनक्ति स्म । वातोर्मी नाम त्रैष्टुभं छन्दः । 'वातोर्मी मभता गौ च श्रुतिसप्तयतिर्भवेत्' ॥ २५ ॥

तीर्थेषु तीर्थेषु च सौख्यतीर्थः
क्षेत्रेषु च क्षेत्रविदां वरिष्ठः ।
गोविन्दमावन्द्य सहानुगोऽगाद्
गङ्गां पुनस्तुङ्गतरङ्गमालाम् ॥ २६ ॥

(प.दी.) तीर्थेष्विति । **सौख्यतीर्थः तीर्थेषु** पवित्रेषु **तीर्थेषु च क्षेत्रेषु च गोविन्दमावन्द्य सहानुगः** सशिष्यः **पुनः तुङ्गतरङ्गमालां** उन्नततरङ्गमालोपेतां **गङ्गामगात्** । कथम्भूतः? **क्षेत्रविदां** क्षेत्रपरिज्ञानवतां मध्ये **वरिष्ठः** ॥

(त.चं.) तीर्थेषुतीर्थेष्विति वीप्सा वा । तत्रतत्र तत्तद्देवतान्तर्यामिणं गोविन्दमावन्द्य । इन्द्रवज्रा नाम त्रैष्टुभं छन्दः । लक्षणं तूक्तं प्रथमे ॥

प्लवैरपेतामवलोक्य सिन्धुं
सरोजबन्धुं च तदाऽऽप्तसिन्धुम् ।
तटे निषण्णानधिकं विषण्णान्
निरीक्ष्य शिष्यानतरत् स एताम् ॥ २७ ॥

(प.दी.) प्लवैरिति । **सः** श्रीमध्वाचार्यः **तदा एतां** गङ्गाम् **अतरत्** । किं कृत्वा? **सिन्धुं** नदीं **प्लवैरपेतां** रहितां **अवलोक्य, सरोजबन्धुं च** सूर्यमपि **आप्तसिन्धुं** प्राप्तसमुद्रम्, अस्तङ्गतमिति यावत्, **अवलोक्य अधिकं विषण्णान्** भीतान् तटे तीरे **निषण्णान् शिष्यान् निरीक्ष्य** ॥ २७ ॥

(त.चं.) प्लवैरपेतामवलोक्य सिन्धुम् । 'नदीसमुद्रयोः सिन्धुः' इति च । इयमुपेन्द्रवज्रा । इन्द्रवज्रा गुरुणाऽक्षरेण तगणेन प्रारभ्यते । इयं लघुनाऽक्षरेण जगणेन । इतः परं इन्द्रवज्रोपेन्द्रवज्रयोः संसृष्टिश्चतुर्दशप्रकारा चतुर्दशभिः पद्यैर्भवति । 'कीर्तिर्वाणी माला शाला हंसी माया जाया बाला । आर्द्रा भद्रा प्रेमा रामा ऋद्धिर्बुद्धिर्नामान्यासाम्' इति तासां नामानि भवन्ति ॥

न वानरेन्द्रस्य विलङ्घिताब्धे-
र्न वा नरेन्द्रस्य विहर्तुरस्याम् ।
इमेऽस्मरंस्तद्वपुषोऽन्यथाऽस्य
शक्तस्य शङ्क्येत विपत् कथं तैः ॥ २८ ॥

(प.दी.) नेति । **इमे** श्रीमध्वाचार्यशिष्याः **विलङ्घिताब्धेः** तीर्णसमुद्रस्य **वानरेन्द्रस्य** विलङ्घिताब्धिं वानरेन्द्रं **नास्मरन्** । **अस्यां** गङ्गायां **विहर्तुः नरेन्द्रस्य वा** नरेन्द्रं श्रीभीमं वा **नास्मरन्** । **अन्यथा** तीर्णाब्धिं हनूमन्तं वा कौमारे गङ्गायां विहर्तारं भीमसेनं वा अस्मरंश्चेत्, हनुमदादितनुरेव श्रीमुख्य-प्राणो मध्वनामा प्रादुर्बभूवेति श्रुतमस्मरंश्चेदिति भावः । तर्हि **तद्वपुषः** पूर्वं हनुमदादिस्वरूपवतः **शक्तस्य** गङ्गातरणे समर्थस्य **अस्य** श्रीमध्वाचार्यस्य **विपत् तैः** शिष्यैः **कथं शङ्क्येत**? तत्स्मरणाभावादस्य विपदमाशशङ्किर इति भावः । वानरेन्द्रस्य, नरेन्द्रस्य इत्यत्र 'अधीगर्थदयेशां कर्मणि' इति कर्मणि षष्ठी ॥ २८ ॥

(त.चं.) तद्वपुषः । तौ वानरेन्द्रनरेन्द्रौ वपुषी अस्येति । तुरीयपादेन्द्रवज्रा संसृष्टिरियं प्रथमोपजातिर्माया नाम ॥ २८ ॥

जगत्प्रदीपायितगोगणाढ्ये
दिवाकरे मध्वदिवाकरे च ।
अव्यक्तरूपे श्रियमत्यजन् द्राक्
सहाम्बुजैस्तन्नयनाम्बुजानि ॥ २९ ॥

(प.दी.) जगदिति । **जगत्प्रदीपायितगोगणाढ्ये** लोकानां दीपभूत-रश्मिसमूहाढ्ये **दिवाकरे** सूर्ये **अव्यक्तरूपे** सति **मध्वदिवाकरे च** जगत्प्रदी-पायितरश्मिसमूहे **अव्यक्तरूपे** सति **तन्नयनाम्बुजानि** तेषां शिष्याणां नयनवारिजानि **अम्बुजैः** सरोजैः **सह द्राक् श्रियं** कान्तिम् **अत्यजन्** । अयं

भावः– रवावस्तं गते सति मध्वमदृष्ट्वा विजने तटे बिभ्यतां शिष्याणां नेत्रकान्तिरपागमदिति ॥ २९ ॥

(त.चं.) मध्वदिवाकरे जगत्प्रदीपायितगोगणाढ्ये । जगत्प्रदीपायित-वचोगणाढ्ये वा । अत्र तृतीयपादेन्द्रवज्रा द्वितीयोपजातिः प्रेमा नाम ॥

पदं पशोर्वा विनतातनूजस्तीर्त्वा नदीं तावददीनसत्त्वः ।
अनार्द्रवासाः स कुतूहलार्द्रैर्नृदेवभूदेवमुखैर्ववन्दे ॥ ३० ॥

(प.दी.) **पदमिति** । **अदीनसत्त्वः** सम्पूर्णसत्त्वः **सः तावत् नदीं विनता-तनूजः** गरुडः **पशोः पदं वा** पदमिव **तीर्त्वा अनार्द्रवासाः** नावा विना तां महानदीं तीर्त्वाऽप्यनार्द्रवसनः सन्, अत एव **कुतूहलार्द्रैः नृदेवभूदेवमुखैः ववन्दे** वन्दितोऽभूत् ॥ ३० ॥

(त.चं.) पदं पशोर्वा । गोष्पदमिव । नृदेवा राजानः । भूदेवा विप्राः । अत्र द्वितीयपादेन्द्रवज्रा उपजातिस्तृतीया ऋद्धिर्नाम ॥ ३० ॥

भीतैररातेरतिमात्रमत्र
नतारकैरप्यथ तारकैः सः ।
स्वतेजसा विस्मितभूपनुन्नैः
प्लवेन शिष्यान् निरतारयत् ताम् ॥ ३१ ॥

(प.दी.) **भीतैरिति** । **अथ सः** श्रीमध्वाचार्यः **अत्र अरातेः** शत्रोः **अतिमात्रं भीतैः** अत एव **नतारकैरपि तारकैः** दाशैः **प्लवेन शिष्यान् तां** नदीं **निर-तारयत्** तारयामास । कथम्भूतैः? **स्वतेजसा** प्लवादिरहितनदीतरणेऽप्य-नार्द्रवस्त्रत्वादिस्वसामर्थ्यदर्शनेन **विस्मितभूपनुन्नैः** । अत्र तारकैः इति कर्तरि तृतीया । प्लवेन इति करणे ॥ ३१ ॥

(त.चं.) नतारकैः । अरातिभीत्या त्यक्ततारणकर्मभिः । अत्र प्रथम-पादेन्द्रवज्रा उपजातिश्चतुर्थी बुद्धिर्नाम ॥ ३१ ॥

विशङ्कटं स्वस्तटिनीतटं ते
दीपप्रदीप्तं जनताभिपूर्णम् ।
सञ्चोदयत्पण्डितमण्डलाढ्यं
नाथावलोकोत्कहृदोऽभ्यपश्यन् ॥ ३२ ॥

(भा.प्र.) जनता जनसमूहः । 'ग्रामजनबन्धुभ्यस्तल् ' इति तल् ॥

(प.दी.) विशङ्कटमिति । **नाथावलोकोत्कहृदः** नाथस्य श्रीमध्वाचार्यस्य अवलोके दर्शने उत्कहृदः उत्कण्ठायुक्तमनसः **ते** शिष्याः **विशङ्कटं** विस्तीर्णं **दीपप्रदीप्तं** दीपेन प्रकाशमानं **जनताभिपूर्णं सञ्चोदयत्पण्डितमण्डलाढ्यम्,** सञ्चोदयतां विप्रतिपन्नप्रमेयं वेदाद्यर्थं वा पृच्छतां पण्डितानां विदुषां मण्डलेनाऽढ्यम्, **स्वस्तटिनीतटं** गङ्गातटं **अभ्यपश्यन्** ॥ ३२ ॥

(त.चं.) विशङ्कटं स्वस्तटिनीतटम् । 'विशङ्कटं विशालं स्यात्' इति च । जनताभिपूर्णम् । जनतया जनसमूहेनाभिपूर्णम् । 'ग्राम-जन-बन्धुभ्यस्तल्' [४.२.४३] । ग्रामाणां समूहो ग्रामता । जनानां समूहो जनता । बन्धूनां समूहो बन्धुता । 'ग्राम-जन-बन्धु-सहायेभ्यस्तल्' इति जयादित्यः पठति । सहायानां समूहः सहायता । 'गजाच्चेति वक्तव्यम्' इति कात्यायनः । गजानां समूहो गजता । दुःखाच्चेति वक्तव्यम् । तथाह्युपनिषत्– 'न पश्यो मृत्युं पश्यति न रोगं नोत दुःखताम्' इति । दुःखानां समूहो हि दुःखता नाम । प्रथमपादोपेन्द्रवज्रा उपजातिः पञ्चमी कीर्तिर्नाम ॥ ३२ ॥

आम्नायमाम्नायविदां विदग्धं
सभावभेदं प्रवदन्तमत्र ।
दैव्यां सभायामिव पद्मयोनिं
प्रैक्षन्त साक्षात् सुखतीर्थमेते ॥ ३३ ॥

(प.दी.) आम्नायमिति । एते श्रीमध्वशिष्याः अत्र स्वस्तटिनीतटे सुख-

तीर्थं साक्षात् प्रत्यक्षतः **प्रैक्षन्त** ददृशुः । कथम्भूतम्? **आम्नायविदां** वेद-विदां **विदग्धम्, सभावभेदं** अभिप्रायविशेषसहितं यथा भवति तथा **आम्नायं** वेदं **प्रवदन्तं** व्याचक्षाणम् । कमिव? **दैव्यां** देवसम्बन्धिन्यां **सभायां पद्मयोनिमिव** ॥ ३३ ॥

(त.चं.) आम्नायविदां विदग्धम् । वेदविदां सम्प्रदायविदां च । वेद आम्नायोऽनन्यथापाठात् । आम्नायते अभ्यस्यते सदैकरूपतयेति । आम-नत्युपदिशति धर्माधर्मावित्येके । आम्नानं सम्प्रदायः । म्ना अभ्यासे । 'अभ्यासः पारम्पर्येण वृत्तिः' इति क्षीरस्वामी । 'आम्नायः सम्प्रदायः स्यात् पारम्पर्यं गुरुक्रमः' इति चाभिधानम् । विदग्धः विचक्षणः । ज्ञानाग्निना दग्ध-किल्बिषः । द्वितीयचरणोपेन्द्रवज्रेयमुपजातिः षष्ठी वाणी नाम ॥ ३३ ॥

प्राप्तस्ततो हस्तिनराजधानीं मासानुवासेह स वासयोग्यान् ।
मठान्तरेऽनन्तगुणान्तरः सन्नेकान्तदेशे सरितोऽसमीपे ॥ ३४ ॥

(प.दी.) **प्राप्त** इति । **ततः हस्तिनराजधानीं** हस्तिननगरीं **प्राप्तः सः** श्रीमध्वाचार्यः **अनन्तगुणान्तरः सन्** अनन्तगुणे भगवति निहितमनाः सन् **इह** हस्तिनपुरे **सरितः** गङ्गायाः **असमीपे एकान्तदेशे मठान्तरे वास-योग्यान् मासानुवास** चातुर्मास्यमुवासेति भावः ॥ ३४ ॥

(त.चं.) हस्तिनराजधानीम् । हस्तिनो राजधानीं हस्तिनपुरम् । हास्तिन-पुरमित्यर्वाचीनमित्युक्तं पुरस्तात् । तृतीयचरणोपन्द्रवज्रेयमुपजातिः सप्तमी शाला नाम ॥ ३४ ॥

भित्त्वा भुवं देवनदी जगाम
शाखाविशेषेण निषेवितुं तम् ।
वाणी च यत्प्रेष्यतया कृतार्था
शिवादिवन्द्या न तदत्र चित्रम् ॥ ३५ ॥

(प.दी.) भित्त्वेति । **देवनदी** गङ्गा **तं** श्रीमध्वाचार्यं **निषेवितुं शाखा-विशेषेण भुवं भित्त्वा जगाम** । **अत्र** श्रीमध्वाचार्ये **तत् चित्रं न** । गङ्गा तं सिषेव इत्येतदाश्चर्यं न । कुतः? **शिवादिवन्द्या वाणी च** सरस्वती च **यत्प्रेष्यतया** यस्य श्रीमध्वाचार्यस्य प्रेष्यतया दासीत्वेन **कृतार्था** कृतकृत्या यत् तत इति सम्बन्धः ॥ ३८ ॥

(त.चं.) निषेवितुम् । 'परिनिविभ्यः सेव–'[८.३.७०] इत्यादिना नियोगे सेवतेः सकारस्य मूर्धन्य आदेशः । यत्प्रेष्यतया । कथमेतत्? ननु वृद्ध्या भाव्यं प्रैष्यतयेति । तथाहि वार्तिकम् 'प्रादूह-ऊढ-ऊढि-एष-एष्येषु वृद्धिर्वक्तव्या' [६.१.८९] इति । ननु भोः, जयादित्य ऊहस्य वृद्धिं न मन्यते । स तु 'प्रादूढोढ्येषैष्येषु' इतीयदेव पठति । एष्यमपि न पठनीयम् । 'प्रादूढोढ्येषेषु' इत्येव पर्याप्तम् । अत एव 'प्रेष्यः प्रोक्तः परिस्कन्दः' इति हलायुधः पठति । इयं तु वस्तुस्थितिः– पुरा त्वक्षोहिणीत्येव प्रयुञ्जते स्म । ततो न पाणिनिरक्षादूहिन्यां वृद्धिमाह । परस्तादक्षौहिणीति प्रचुरः प्रयोगः प्रवृत्तः । महतां प्रयोगप्राचुर्यमनुमन्यमानेन कात्यायनेन उपसमख्यायत– अक्षादूहिन्यामपि वा वृद्धिर्वक्तव्येति । एवं प्रतनाः प्रेष्य इत्येव प्रायुञ्जत । ततो न पाणिनिः प्रादेष्ये वृद्धिमाह । परस्तात् प्रैष्य इति प्रचुरः प्रयोगः प्रवृत्तः । महतां प्रयोगप्राचुर्यमनुमन्यमानेन कात्यायनेन तदप्युपसमख्यायत– प्रादेष्येऽपि वा वृद्धिर्वक्तव्येति । तथाच नेदं प्राचीनं निषेधति । किन्तु पाश्चात्त्यमपि रूपमनुमन्यते । अयोगव्यवच्छेद एवायम् । नान्ययोगव्यवच्छेद इति न काऽपि क्षतिः । अक्षोहिणीति प्रतनम् । अक्षौहिणीति नूतनम् । अत एव श्रीमध्वो बहुलमक्षोहिणीपदं प्रयुञ्जानो न क्वाप्यक्षौहिणीपदं प्रयुङ्क्ते । सारस्वतव्याकरणेऽप्यक्षोहिणीत्येव । न वृद्धिः । एवं प्रेष्य इति प्रतनम् । प्रैष्य इति नूतनम् । प्रतनमेव सम्प्रदायमनुससार नारायणपण्डितः– यत्प्रेष्यतया । चतुर्थचरणोपेन्द्रवज्रेयमुपजातिरष्टमी बाला नाम ॥ ३८ ॥

गुरुप्रबर्हस्य पदारविन्दं
विदूरतः सा प्रणनाम मूर्ता ।
औदार्यसौन्दर्यतनुं तनुं ता-
मालक्ष्य शिष्यैरतिविस्मितं तैः ॥ ३६ ॥

(प.दी.) गुर्विति । **मूर्ता** प्राकृतदृष्टिगोचररूपा **सा** गङ्गा **गुरुप्रबर्हस्य** गुरुश्रेष्ठस्य श्रीमध्वाचार्यस्य **पदारविन्दं विदूरतः प्रणनाम** । **तैः शिष्यैः तां तनुं** तत्स्वरूपं **आलक्ष्य** दृष्ट्वा **अतिविस्मितम्** अतिविस्मयः प्राप्तः । कथम्भूतां तनुम्? **औदार्यसौन्दर्यतनुम्**, औदार्यस्य सौन्दर्यस्य च तनुं मूर्तिभूताम् ॥

(त.चं.) औदार्यसौन्दर्यतनुम् । औदार्यं माहात्म्यम् । 'महात्मोदार उच्यते' इति च । औदार्यमान्तरम् । सौन्दर्यं बाह्यम् । पूर्वमष्टधोपजातिभेदाः प्रदर्शिताः । सम्प्रति द्वयोर्द्वयोः पादयोर्द्वे छन्दसी इतीयमुपजातिः । सा च षोढा भवति । तत्र तावदियं तृतीयचतुर्थेन्द्रवज्रः प्रथम उपजातिभेदो माला नाम ॥ ३६ ॥

तेनोपयातेन कदाचनाथ
वाराणसीं पापनिवारणेन ।
अवादि वाणी बलिनः स्वशिष्यान्
विलोक्य लीलावसरेऽवलिप्तान् ॥ ३७ ॥

(प.दी.) तेनेति । अथ चातुर्मास्यावसानानन्तरं **कदाचन वाराणसीं उपयातेन पापनिवारणेन तेन** श्रीमध्वाचार्येण वक्ष्यमाणप्रकारेण **वाणी अवादि** उक्ता । किं कृत्वा? **लीलावसरे** क्रीडासमये **अवलिप्तान्** दृप्तान् **बलिनः** बलोपेतान् **स्वशिष्यान् विलोक्य** ॥ ३७ ॥

(त.चं.) अवलिप्तान् । 'दर्पो मदोऽवलेपो मानो गर्वो भवेदहङ्कारः' इति च । प्रथमद्वितीयेन्द्रवज्रो द्वितीय उपजातिभेदो रामा नाम ॥ ३७ ॥

नियुद्धसिद्ध्यै युगपद्धि वीर-
म्मन्या भवन्तोऽभिपतन्तु मां द्राक् ।
समस्तशक्तिं न युनक्ति यः स्वा-
मत्रास्मदाज्ञां स निराकरोति ॥ ३८ ॥

(भा.प्र.) वीरम्मन्याः। 'आत्ममाने खश् च' इति खश्। 'अरुर्द्विषदजन्तस्य मुम्' इति मुम्॥

(प.दी.) **नियुद्धेति**। **वीरम्मन्याः** आत्मनो वीरान् मन्यमानाः। 'आत्ममाने खश् च' इति खश्प्रत्ययः। खित्त्वात् 'अरुर्द्विषदजन्तस्य मुम्' इति मुमागमः। **भवन्तः नियुद्धसिद्ध्यै युगपत् द्राक् मामभिपतन्तु हि**। **यः अत्र** मया सह नियुद्धे **स्वां** आत्मीयां **समस्तशक्तिं न युनक्ति** न नियोजयति **सः अस्मदाज्ञां निराकरोति** उल्लङ्घयति। नियुद्धे मयि यः समस्तां स्वां शक्तिं न नियोजयति तस्य मदाज्ञोल्लङ्घनदोषः स्यादिति भावः ॥ ३८ ॥

(त.चं.) नियुद्धसिद्ध्यै। परस्परं निगृह्य युद्धं नियुद्धम्। बाहुयुद्धम्। वीरम्मन्याः। 'आत्ममाने खश् च'[३.२.८३]। आत्ममाने वर्तमानात् मन्यतेः सुप्युपपदे खश्प्रत्ययो भवति। तस्य खित्त्वात् 'अरुर्द्विषदजन्तस्य मुम्'[६.३.६७] अरुस् द्विषत् इत्येतयोः, अजन्तानां च खिदन्त उत्तर-पदे मुमागमो भवत्यनव्ययस्येति मुमि कृते वीरम्मन्यः। एवमरुन्तुदः। द्विषन्तपः। यद्यपि भवन्त इति गौरवसूचकं पदम्। भातेर्हि डवतुमाचक्षते– भान्तीति भवन्त इति। अत्र तु भगवानाचार्यः सोपहासमाह– भाम इति भ्रमन्तो यूयमिति। 'द्राक् चपलं लघु मङ्क्षु' इति च। द्वितीयचतुर्थेन्द्रवज्रस्तृतीय उपजातिभेदो हंसी नाम ॥ ३८ ॥

इतीरयन् पञ्चदशैष यूनः
प्राप्तान् प्रयुद्धान् युगपन्निपात्य ।

उत्थीयतां यस्य समर्थता स्या-
दिति ब्रुवाणः शनकैर्जहास ॥ ३९ ॥

(प.दी.) इतीति। **एषः** श्रीमध्वाचार्यः **इति** 'नियुद्धसिद्धचै युगपत्–' इत्याद्युक्तप्रकारेण **ईरयन्** वदन् **युगपत् प्राप्तान् प्रयुद्धान्** प्रकृष्टं युद्धं कुर्वतः[१] । 'आदिकर्मणि क्तः कर्तरि च' इति कर्तरि क्तप्रत्ययः । ईषन्नियुद्धे गुर्वाज्ञालङ्घनदोषभयात् स्वसमस्तशक्त्या नियुद्धं कुर्वत इति भावः । **पञ्चदश यूनः निपात्य यस्य समर्थता** उत्थातुं समर्थत्वं स्यात् तेन **उत्थीयतां इति ब्रुवाणः शनकैर्जहास** ॥ ३९ ॥

(त.चं.) इतीरयन् । द्वितीयतृतीयेन्द्रवज्रश्चतुर्थ उपजातिभेद आर्द्रा नाम ॥

सौमेरवं गौरवमावहन्ति
तवाङ्गमङ्गाङ्गुलयश्च नोऽङ्गे ।
पुरा विनश्याम इतो दयालो
स्वामिन् विमुञ्चेत्यवदंस्तदा ते ॥ ४० ॥

(प.दी.) **सौमेरवमिति** । **तदा ते** शिष्याः **इत्यवदन्** । **अङ्ग नाथ, तव अङ्गं** हस्तादिकं **अङ्गुलयश्च** प्रत्येकं **नः अङ्गे** शरीरे **सौमेरवं** सुमेरुसम्बन्धि **गौरवं** गुरुत्वं **आवहन्ति** । **इतः** अस्मात् **विनश्यामः पुरा** नष्टाः स्म । 'यावत्पुरा निपातयोर्लट्'[२] इति लट् । **दयालो स्वामिन् विमुञ्च इत्यवदन्** इति सम्बन्धः ॥ ४० ॥

(त.चं.) पुरा विनश्याम इतः । इतस्तवाङ्गानां दुर्भरत्वाद् वयं विनश्यामः पुरा । विनष्टाः । 'पुरि लुङ् चास्मे'[३.२.१२२] इति भूतार्थे

१. कर्तुमारब्धवत इत्यर्थः ।

२. भविष्यदर्थे लड्विधायकमिदं सूत्रं सम्पातायातमित्युक्तम् । 'पुरि लुङ् चास्मे' इति पठनीयम् ।

लडित्युक्तम् । यद्वा पुरा विनश्यामः विनङ्क्ष्यामः । 'यावत्पुरानिपातयोर्लट्' [३.३.४] । प्रथमचतुर्थेन्द्रवज्रः पञ्चम उपजातिभेदो जाया नाम ॥

तेनाथ मुक्तैरतिविस्मयस्तै-
रवाप्यनालोच्य हि तत्स्वरूपम् ।
यद्भ्रूविजृम्भेण सशम्भुशक्रं
जगत् समस्तं नियतं निकामम् ॥ ४१ ॥

(प.दी.) तेनेति । अथ स्वामिन् मुञ्चेति प्रार्थनानन्तरं **तेन** श्रीमध्वाचार्येण **मुक्तैः तैः** शिष्यैः **तत्स्वरूपं** तस्य श्रीमध्वाचार्यस्य स्वरूपं **अनालोच्य हि** सम्यगविचार्यैव, 'हि हेताववधारणे' इत्यमरः, **अतिविस्मयः अवापि** प्राप्तः । सम्यक् तत्स्वरूपविचारे सति नैतावन्मात्रेण विस्मयो युज्यत इति भावः । तथाहि– **यद्भ्रूविजृम्भेण** यस्य श्रीमध्वाचार्यस्य भ्रूविलासेन **सशम्भुशक्रं** शम्भुशक्राभ्यां सहितं **समस्तं जगत् निकामं** यथेच्छं **नियतम्** । एवम्भूतस्य पञ्चदशयूनां निपातनं न चित्रमति भावः ॥ ४१ ॥

(त.चं.) तेनाथ । प्रथमतृतीयेन्द्रवज्रः षष्ठ उपजातिभेदो भद्रा नाम । इत्युपजातिसमाहारः ॥ ४१ ॥

सदाक्ष्यमाक्षिप्तसमस्तपक्षको
यतिः प्रभुं कोऽप्यमरावतीपदः ।
जिगीषया ज्ञानसहायकर्मणः
प्रसाध्यतां साधनतेत्युदाहरत् ॥ ४२ ॥

(प.दी.) सदाक्ष्यमिति । **सदाक्ष्यं** सचातुर्यं **आक्षिप्तसमस्तपक्षकः** निराकृतसर्ववादिसिद्धान्तः **अमरावतीपदः** अमरेन्द्रपुर्याख्यः **कोऽपि यतिः** कश्चन सन्न्यासी **जिगीषया** जेतुमिच्छया **प्रभुं** श्रीमध्वाचार्यं **इत्युदाहरत्** । कथम्?

ज्ञानसहायकर्मणः ज्ञानाख्यसहाययुक्तस्य कर्मणः **साधनता** पुरुषार्थसाधनत्वं **प्रसाध्यताम्**। ज्ञानिकृतमेव कर्म अक्षयपुरुषार्थसाधनमिति प्रसङ्गादभिहिते सति तदेव सम्यक् प्रसाध्यतामित्युदाहरदिति भावः ॥ ४२ ॥

(त.चं.) अमरावतीपदः । अमरेन्द्रपुरी । विचित्रमिदं यदस्मिन् सम्प्रदाये पुरीभारतीसरस्वतीत्यादिस्त्रीलिङ्गपदैः पुरुषसन्न्यासिनो व्यपदिश्यन्ते। ज्ञान-सहायकर्मणः । ज्ञानकर्मणोर्न सह स्थितिर्गोव्याघ्रयोरिवेति हि तन्मतम् । उपेन्द्रवज्रैवैकाक्षरेणाधिका वंशस्थं भवति। जगतीभेदः । लक्षणं तूक्तं जतौ जराविति ॥ ४२ ॥

संसाधितार्थे भगवत्ययुक्तिवित्
पप्रच्छ स ज्ञानपदार्थमुग्रधीः ।
ज्ञातः स ते ज्ञान्यसि चेन्न चेन्न स
प्रश्नो घटेतेति निराकृतैष तम् ॥ ४३ ॥

(भा.प्र.) ज्ञानपदार्थं पृच्छन्तं प्रति भगवानूचे– त्वं येनकेनचिज्ज्ञानेन सहितो न वा। 'ज्ञान्यस्मि' इति वदसि चेत्, ज्ञानाङ्गीकारिणा त्वया स ज्ञानपदार्थो ज्ञात एव। नेति वदसि चेत् सर्वज्ञानरहितस्य तव प्रश्नशब्दानां तद्विषयाणां चार्थानामज्ञानात् प्रश्न एव न घटेत ॥

(प.दी.) **समिति** । **भगवति** श्रीमध्वाचार्ये **संसाधितार्थे**, सम्यक्साधितः अर्थः ज्ञानसहायकर्मणः पुरुषार्थसाधनत्वाख्यं तत्पृष्टप्रमेयं येन सः तथोक्तः, तस्मिन् सति **अयुक्तिवित्** तत्साधितार्थनिराकरणयुक्तिमजानन् **उग्रधीः सः** मायी **ज्ञानपदार्थं** ज्ञानमित्येतत्पदस्यार्थं **पप्रच्छ** । **एषः** श्रीमध्वाचार्यः **तं निराकृत** निराचक्रे । कथम्? त्वं **ज्ञान्यसि चेत् सः** ज्ञानपदार्थः **ते ज्ञातः** । **न चेत्** ज्ञानी नासि चेत् **सः प्रश्नः** ज्ञानपदस्य कोऽर्थः इति प्रश्नः **न घटेतेति** । 'घट परिवर्तने' । अयं भावः– ज्ञानपदार्थं पृच्छन् त्वं येन-

केनचिद् ज्ञानेन युक्तोऽसि नवा? आद्ये ज्ञानवता त्वया ज्ञानपदार्थो ज्ञात एव । ततश्च सिद्धविषयोऽयं प्रश्नः स्यात् । एवञ्च तवोन्मत्तसाम्यमिति । द्वितीये ज्ञानमात्ररहितस्य प्रश्नशब्दानां तद्विषयाणामर्थानां च परिज्ञानाभावात् स प्रश्नो न घटते । ज्ञानमात्राभावाङ्गीकारस्य ज्ञानाविनाभूतप्रश्नस्य च परस्परविरुद्धत्वादिति ॥ ४३ ॥

(त.चं.) पप्रच्छ । प्रच्छ ज्ञीप्सायाम् । ज्ञातुमिच्छा ज्ञीप्सा । इन्द्रवज्रैवैकाक्षराधिका इन्द्रवंशा भवति ततौ जराविति ॥ ४३ ॥

वितततमतमोऽन्तं साधयन्त्या नितान्तं
सदसिसदसि रेजे व्याख्यया व्यासशिष्यः ।
सकलसमयिहस्ताम्भोजबन्धाभिनन्दी
शरदिशरदि चन्द्रश्चन्द्रिकासम्पदेव ॥ ४४ ॥

(प.दी.) विततेति । **व्यासशिष्यः** श्रीवेदव्यासस्य शिष्यः श्रीमध्वाचार्यः **सदसिसदसि** सर्वविद्वत्सभासु **व्याख्यया रेजे** । कथम्भूतया व्याख्यया? **वितततमतमोन्तम्,** वितततमस्य अतितरां व्याप्तस्य तमसः अज्ञानस्य अन्तं नाशं **नितान्तं साधयन्त्या** । क इव? **चन्द्रः शरदिशरदि चन्द्रिकासम्पदेव** कौमुदीसम्पदेव । चन्द्रिकाऽपि वितततमान्धकारनाशिनी । कथम्भूतः? **सकलसमयिहस्ताम्भोजबन्धाभिनन्दी** । सकलसमयिनां सकलशास्त्राभिज्ञानां विदुषां हस्ताम्भोजबन्धं करकमलाञ्जलिबन्धं अभिनन्दयतीति तथोक्तः । चन्द्रोऽपि स्वोदयेन अम्भोजमुकुळीभावाभिनन्दी ॥ ४४ ॥

(त.चं.) वितततमतमोऽन्तम् । मालिनी नाम च्छन्दः । अतिशक्करी । ननमयया मालिनीत्युक्तम् ॥ ४४ ॥

जननं समयेसमये जगतः
प्रथिते समये समयेदमिते ।

सनिरासमयेऽसमये स्थितियुक्
स्ववभासमयेऽसमयेष्टधिया ॥ ४५ ॥

(भा.प्र.) असमये अये इष्टधिया जगतो जननं वर्तते। अये दैवे ब्रह्मणि वर्तमानया स्वेच्छाविषयया बुद्ध्या जगतो जननं न तु मायया। समयेसमये कालेकाले। समये वेदान्तशास्त्रे प्रथिते, न त्ववाच्ये। इदं समया इते, अस्य चेतनजातस्य समीपे गते, न त्वनेनैक्यवति। 'अभितः परितः' इत्यादिना द्वितीया। न केवलं जननम्। सनिरासं ससंहारम्, स्थितियुक् च। स्ववभासमये स्वच्छज्ञानमये,न त्वशुद्धे ब्रह्मणि। असमया असदृशया॥

वर्तस्वाध्यधि सर्वं
दीव्येदं सोऽनिशं स्वतन्त्रो विष्णुः।
उज्जासय दुष्टानां
संस्कुरु साधून् गुणाभिपूर्णोऽप्यगुणः ॥ ४६ ॥

(भा.प्र.) वर्तस्वेत्यादौ 'समुच्चयेऽन्यतरस्याम्' इति हिस्वयोः समुच्चयार्थत्वम्। अध्यधीत्यत्र 'उपर्यध्यधसः सामीप्ये' इति द्विर्वचनम्। द्वितीया च–'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते' इति। अनेन जगता दीव्यति च। 'दिवः कर्म च' इति कर्मत्वं करणस्य। 'जासिनिप्रहण-नाटक्राथपिषां हिंसायाम्' इति कर्मणि षष्ठी च। दुष्टानुज्जासयति च॥

असमोत्तमो मतोऽसौ श्रियःपतिर्विश्वतो विभिन्नात्मा।
परमान् प्रकाममर्थान् प्रकाशयामास सेत्यादीन् ॥ ४७ ॥

(भा.प्र.) सा व्याख्या प्रकाशयामास॥

(प.दी.) जननमिति। जननं। समयेसमये। जगतः। प्रथिते। समये। समया। इदम्। इते। सनिरासम्। अये। असमये। स्थितियुक्। स्ववभासमये। असमया। इष्टधिया। सा व्याख्या इत्यादीन् परमान्

उत्तमान् **अर्थान् प्रकामं** सम्यक् **प्रकाशयामास** इति तृतीयश्लोकेन वक्ष्यमाणेनान्वयः। **समये** वेदान्तशास्त्रे **प्रथिते** मुख्यतया सर्वशब्दवाच्यतया प्रसिद्धे, नत्ववाच्यतयेति भावः, **इदं** चेतनजातं **समया** समीपे **इते** प्राप्ते, नतु तेनैक्यमापन्ने, **असमये,** समयः कालः, तद्रहिते, कालकृतविनाशरहित इति भावः, **अये** दैवे परब्रह्मणि, 'अयः शुभावहो विधिः' इत्यमरः, एवम्भूते परब्रह्मणि वर्तमानया **असमया** असमानया **इष्टधिया** स्वेच्छाविषयया बुद्ध्या, न तु माययेत्यर्थः, **समयेसमये** कालेकाले **जगतो जननं** सृष्टिः प्रवर्तत इति सम्बन्धः। कथम्? **सनिरासं** संहारसहितम्, **स्थितियुक्** पालन-युक्तम्। कथम्भूते अये? **स्ववभासमये** स्वच्छज्ञानस्वरूपे, न त्वशुद्धे श-बळब्रह्मणीत्यभिप्रायः। 'समयेदमिते' इत्यत्र 'अभितःपरितःसमयानिकषा' इत्यादिना द्वितीया ॥*॥ **वर्तस्वेति। स्वतन्त्रः सः विष्णुः इदं सर्वं** अस्य सर्वस्य जगतः **अध्यधि** अत्यन्तसमीपे हृदयगुहायां **वर्तस्व** वर्तते। अत्र 'समुच्चयेऽन्यतरस्याम्' इति लोट्। 'उपर्यध्यधसः सामीप्ये' इति सामीप्यार्थे अधिशब्दस्य द्विरुक्तिः। द्विरुक्ताधिशब्दसम्बन्धादेव च सर्वमिति द्वितीयान्तः प्रयोगः। 'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु। द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते' इति वचनात्। आम्रेडितान्तेषु द्विरुक्तेषु उपर्यादिषु त्रिषु उपरि अधि अधः इत्येतेषु त्रिषूपपदेषु द्वितीया भवतीत्यर्थः। **इदं** अनेन जगता **दीव्य** दीव्यति क्रीडतीत्यर्थः। अत्र 'दिवः कर्म च' इति सूत्रेण करणस्य कर्मत्वम्। **दुष्टानां** दुष्टान् असुरादीन् **उज्जासय** उज्जासयति संहरतीत्यर्थः। 'जसु हिंसायाम्' इति धातुः। तेषां हननं च तमसि प्रक्षेप एव। अत्रापि 'जासिनिप्रहणनाटक्राथपिषां हिंसायाम्' इति सूत्रेण दुष्टानामिति कर्मणि षष्ठी। **साधून्** मोक्षयोग्यान् **संस्कुरु** संस्कुरुते निर्दुष्टान् करोतीत्यर्थः। **गुणाभिपूर्णोऽपि** आनन्दादिगुणसम्पूर्णोऽपि **अगुणः** सत्वादिगुणरहितः ॥*॥ **असमेति। असौ श्रियःपतिः असमोत्तमः** समाधिकरहितः। **विश्वतः** सर्वस्मात् **विभिन्नात्मा** अत्यन्तविलक्षण-

स्वरूपः **मतो** ज्ञातः । सर्वदा सदागमज्ञैरिति भावः । **सा व्याख्या इत्यादीन् परमान् अर्थान् प्रकामं प्रकाशयामास** इति सम्बन्धः ।। ४५–४७ ।।

(त.चं.) समयेदमिते । इदं समया अस्य जगतः जीवजातस्य वा समीपे इते गते स्थित इति । 'नेदं यदिदमुपासते' इति हि श्रुतिः । 'अभितः परितःसमया–' [२.३.२] इत्याद्यभिहितम् । 'आः समिण्-निकषिभ्याम्' [१०.१८] इति दशपादिका । सम्पूर्वादिण्धातोर्निर्पूर्वात् कषधातोश्च आ-प्रत्ययो भवति । समेतीति समया । निकषतीति निकषा । सनिरासमये । अयमिष्टदैवम् । 'इष्टानिष्टफलं प्राज्ञैः स्मृतं दैवमयानयम्' इति । गमयत्य-भीष्टमित्ययम् । अयो वा भगवान् । अयन्ते पुरुषार्थमनेनेति । अयते गच्छति सर्वत्र जानाति च सर्वमित्ययः सर्वज्ञः सर्वगतो वा नारायणः । सैश्चतुर्भि-स्तोटकमित्युक्तम् ।।※ ।। इदं सर्वं अस्य सर्वस्य जीवजातस्य अध्यधि अधिकं प्रत्यासन्नः वर्तस्व वर्तते । इदं दीव्य अनेन जगता दीव्य दीव्यति क्रीडति चानिशं स्वतन्त्रो विष्णुः । तदुक्तम्–'अन्तःस्थित्वा रमणकृदन्तरः समुदाहृतः ।' कथं लोट्? 'समुच्चयेऽन्यतरस्याम्'[३.४.३] इति । अयमर्थः– 'समुच्चीयमानक्रियावचनाद् धातोरन्यतरस्यां लोट्प्रत्ययो भवति । तस्य लोटो हिस्वावादेशौ भवतः' इति । तद् यथा– ओदनं भुङ्क्ष्व, सक्तून् पिब, धानाः खादेत्यभ्यवहरति । ओदनं भुङ्क्ते, सक्तूंश्च पिबति, धानाश्च खादतीत्यर्थः । ननु तर्हि सामान्यवचनस्य धातोरनुप्रयोगः करणीयः । यथा पूर्ववाक्ये 'अभ्यवहरति' इति । तथाहि सूत्रम्–'समुच्चये सामान्यवचनस्य' [३.४.५.] इति । समुच्चयेऽर्थे लोड्विधाने सामान्यवचनस्य धातोरनुप्रयोगः कर्तव्य इति । तेनैव च कर्तृकारकस्य कालस्य च बोधो भवति । नात्र सामान्यवचनो धातुः श्रूयते । तत् कथमेतत्? अवधत्स्व । ऋतेऽपि धातोः सामान्यवचनमात्रेण कर्तुः कालस्य च बोधो भवति । तथाहि– सर्वमध्यधि वर्तस्व वर्तते, इदं दीव्य दीव्यति, दुष्टानामुज्जासय उज्जासयति, साधून्

संस्कुरु संस्कुरुते इति ज्ञानिनां मतः सम्मत इति । तेन 'असमोत्तमो मतोऽसौ' इत्यनेनैवानुप्रयोगश्चरितार्थः । अत एव पाणिनिरपि 'सामान्य-वचनस्य' इत्येवाऽह । न 'सामान्यवचनस्य धातोः' इति । तेन न कोऽपि क्षुद्रोपद्रवः । अथ कथमधिः समीपवचनः? अध्यधीत्याम्रेडनात् । तथा ह्यामनन्ति–'उपर्यध्यधसः सामीप्ये'[८.१.७] इति । 'उपरि अधि अधस् इत्येषां द्वे भवतः सामीप्ये विवक्षिते । सामीप्यं प्रत्यासत्तिः कालकृता देश-कृता च' इति । अत एव द्वितीया । तथाहि पठन्ति–'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते' इति । उभसर्वतसोः– उभयतो ग्रामम् । सर्वतो दिशम् । धिक्–'धिक् तां च तं च मदनं च इमां च मां च'। उपर्यादिषु त्रिषु आम्रेडितान्तेषु उपर्युपरि ग्रामम् । अध्यधि ग्रामम् । अधोऽधो ग्रामम् । कथमिदं दीव्यति? 'दिवः कर्म च'[१.४.४३] इति स्मरणात् । इदमुक्तं भवति– 'दिवः साधकतमं यत् कारकं तत् कर्मसञ्ज्ञं च भवति । चकारात् करणसञ्ज्ञं च । इदं जगद् दीव्यति । जगता वा दीव्यति । अक्षान् दीव्यति । अक्षैर्वा दीव्यति । उज्जा-सय दुष्टानां दुष्टान् विनाशयति च । जसु हिंसायाम् । जसु ताडने वा । कथं षष्ठी? 'जासि-नि-प्र-हण-नाट-क्राथ-पिषां हिंसायाम्'[२.३.५६] इति षष्ठी । शत्रूणामुज्जासयति । शत्रोर्निहन्ति प्रहन्ति निप्रहन्ति प्रणिहन्ति वा । शत्रोरुन्नाटयति । शत्रोः क्राथयत्युत्क्राथयति वा । शत्रोः पिनष्टि । साधून् संस्कुरु संस्कुरुते । इयं मधुगीतिर्नाम मात्राच्छन्दः । तथाह्युक्तम्– 'आर्यागीतिस्तु पथ्याया आद्यंशे गुरुणाऽधिके' । कटुगीतिस्त्वोजयोश्चेत् समयोर्मधुगीतिका' इति । तथाचायमत्र मात्राक्रमः पादेषु१२+२०+१२+२० इति ॥ ❋ ॥ असमोत्तमः । इयं चपलार्या । 'द्वितीयावोजयो-र्यत्र समयोरादिमौ तथा । जगणौ सम्प्रकाशेते चपलार्येति सा मता' । १२+१८+१२+१५ इति मात्राक्रमः ॥ ४५–४७ ॥

समानया याऽनमाऽऽस मायया ततयाऽयमा ।
नयासना नाऽस या न यातनाऽललना[ऽ]तया ॥ ४८ ॥

(भा.प्र.) या मायया अनमा आस। मायावाद्यभिमतया मायया जगन्मिथ्यात्व-साधिकया नमनरहिताऽभूत् । गुणगुण्यादीनां भेदे सम्बन्धापेक्षयाऽनवस्था । अभेदे गुणादिमात्रं गुण्यादिमात्रं वा । भेदाभेदे स्वव्याहतिरिति तेषां खण्डने परेषामनुयोग[1] एव। तस्मान्मायामय एवेति तत्पक्षे मायापालिते नमन्ति ह्यपरे। समानया 'इन्द्रो मायाभिः पुरुरूप ईयते' इति मानाभाससहितया। इयं व्याख्या गुणगुण्यादिभावं विशेषाङ्गीकारेणैवाभेदेन घटयित्वा मायाशब्दस्य च 'मायेति भगवत्प्रज्ञा' इत्यादिना विषयान्तरं प्रदर्श्य तन्मायां वन्ध्याकुमारीसमानां करोति। ततया व्याप्तया। अयमा अद्वन्द्वा। नयासना नाऽस न । 'विषयस्तद्विचारश्च हेतूदाहृतिसंशयाः। पक्षौ प्रयोजनं चैव नयोऽष्टाङ्गः प्रकीर्तितः' इति प्रसिद्धो नय आसनं यस्याः सा नयासना नाऽस न, न बभूवेति न। या व्याख्या अर्थान् प्रकाशयामास, अतया तद्विरुद्धया दुःशास्त्रव्याख्यया यातना भवति। अललना ललनं विलासः सुखं तद्रहिता । नियमेनान्धतमसक्लेश इत्यर्थः । अथवा तया माययाऽङ्गीक्रियमाणया यातना॥

(प.दी.) समानयेति। समानया। या। अनमा। आस। मायया। ततया। अयमा। नयासना। न। आस। या। न। यातना। अललना। अतया। या व्याख्या **समानया** 'इन्द्रो मायाभिः पुरुरूप ईयते', 'मायामात्रमिदं द्वैतमद्वैतं परमार्थतः' इत्यादिमानाभासैः सहितया। **ततया** व्याप्तया **मायया** जगन्मिथ्यात्वसाधिकया मायिशास्त्रात्मिकया मायया **अनमा** नमनरहिता निराकर्तुमशक्या **आस** इति भावः। इत्थं हि मायिमायागुणादीनां गुण्या-दिभिः भेदोऽभेदो भेदाभेदो वा । आद्ये भेदपरम्परयाऽनवस्था स्यात् ।

१.अत्रानुयोग इति न प्रश्नः। अनुयोग एव, अनुवचनमेव अभ्युपगम एवेति यावत्। अथवा केवलमनुयोग एव प्रश्न एव । न प्रत्युत्तरं कापि सम्भवीति । 'पर्यनुयोग एव' इति च पाठः स्यात् । पर्यनुयोग उपालम्भः ।

द्वितीये गुण्यादिमात्रं वा गुणादिमात्रं वाऽवशिष्यते। तृतीये पक्षद्वयोक्तदूषणं व्याहतिश्चाधिकेति। किञ्च 'मायामात्रमिदं द्वैतमद्वैतं परमार्थतः', 'इन्द्रो मायाभिः पुरुरूप ईयते' इति वचनैश्च सर्वस्यापि भेदादिप्रपञ्चस्य मायामयत्वमेव, न कस्यापि वास्तवत्वमिति। इत्यादि मानाभाससहितया मायया अनमा आसेत्यर्थः। तथाहि– न तावद् गुणगुण्यादीनां वास्तवत्वे[1] भेदादिविकल्पदोषावकाशः। गुणादीनां गुण्यादिभिरभेदाङ्गीकारेणानवस्थाऽभावात्। नचैवमन्यतरमात्रावशेषप्रसङ्गः। 'अयं गुणी अयमस्य गुणः, अयमवयवी अयमस्यावयवः' इत्यादिभेदव्यवहारस्य च विशेषबलेनाङ्गीकारात्। अयावद्द्रव्यभाविगुणानुसारेण भेदाभेदयोरप्यङ्गीकारादिति। मायामात्रमित्यादिषु मायाशब्दस्य भगवत्प्रज्ञावाचकत्वेन तदभिमतसदसद्विलक्षणार्थत्वाभावादिति। पुनः कथम्भूता? **अयमा** अद्वन्द्वा, असद्दशेत्यर्थः। **या** व्याख्या **नयासना** नयः आसनमाश्रयो यस्याः सा नयासना, **न नाऽस** आसैवेत्यर्थः। 'विषयस्तद्विचारश्च हेतूदाहृतिसंशयाः। पक्षौ प्रयोजनश्चेति नयोऽष्टाङ्गः प्रकीर्तितः' इत्यष्टाङ्गो नयः। इयं व्याख्या तु तदाश्रिता बभूवेत्यर्थः। **अतया** तद्विरुद्धया व्याख्यया **अललना** ललनरहिता। ललनं विलासः, 'लल विलास' इति धातोः, सुखमिति यावत्। नियमेन तद्रहिता **यातना** अन्धतमसक्लेशो भवतीति सम्बन्धः। 'यातना तीव्रवेदना' इत्यमरः। अथवा तयेति पदच्छेदः। **तया** माययाऽङ्गीकृतया **यातना** तीव्रवेदना भवति। अन्धेतमसि यत् तीव्रं दुःखं तद् भवतीत्यर्थः ॥ ४८ ॥

(त.चं.) समानया। नयासना अष्टाङ्गे नये निषण्णा। नय आसनं यस्याः। यदाहुः– 'विषयस्तद्विचारश्च हेतूदाहृतिसंशयाः। पक्षौ प्रयोजनं चेति नयोऽष्टाङ्गः प्रकीर्तितः' इति। तथाहि– कश्चन विषयमधिकृत्य व्याख्या प्रस्तूयते। तत्र बहुमुखो विचारविमर्शः। एवं वा स्यादेवं वा स्यादनेवं वा स्यादिति। उभयत्रापि सम्भाविता हेतव उपस्थाप्यन्ते। समाख्यानानि

---

१. 'वास्तवत्वेन' इति पाठान्तरम्।

चोदाह्रियन्ते । ततश्च सन्देहः–अयं वा पक्षः साधुरयं वेति । तत्रासाधुकोटिकः पूर्वः पक्षः । साधुकोटिक उत्तरः पक्षः । तेन स्वसमयस्य स्थिरीकरणं नाम प्रयोजनमिति । सर्वतोभद्रोऽयं बन्धः[१] । युग्मविपुला नामानुष्टुप् छन्दः । पथ्यावक्त्रं चेदं भवति । 'युग्मयोः सप्तमो लश्चेत् सा युग्मविपुला मता' इति च ॥ ४८ ॥

प्राज्ञो राज्ञां त्रिदिवपदवीं कौरवं क्षेत्रमाप्तः
सस्माराथ स्वविहृतिपतद्धस्तियुद्धोत्सवानाम् ।
सत्यात्माद्यैरिह परिवृतो भाविमारीचदृग्भि-
र्विस्मेरैः स्वैर्निजनृपतनूहेतिदृष्ट्याऽतितुष्टैः ॥ ४९ ॥

(भा.प्र.) तपस्विवत् स्थितं डाम्भं ज्ञात्वा मारीचमभ्यधात् ।
मध्वः परीक्षया चैनं ते विष्णुद्वेषिणं विदुः ॥
यौधोऽत्र राजाऽहमितीरितो गुरुं तवाऽयुधं केति[२] जगाद सत्यवाक् ।
खातेऽमुनोक्ते कुतळे महागदां दृष्ट्वाऽऽप्तवाचं श्रदधुर्गुरुं हि ते ॥

(प.दी.) प्राज्ञेति । **अथ राज्ञां त्रिदिवपदवीं** भारतयुद्धे हतानां राज्ञां स्वर्गमार्गभूतं **कौरवं क्षेत्रमाप्तः प्राज्ञः** श्रीमध्वाचार्यः **इह स्वविहृतिपतद्धस्तियुद्धोत्सवानाम्,** युद्धे स्वस्य विहारमात्रेण पतद्भिः हस्तिभिः सह ये युद्धोत्सवाः तान् **सस्मार** । अस्मिन् स्थलेऽहं गजैस्सह युद्धाख्यविनोदमन्वभूवमित्यस्मरदिति भावः । कथम्भूतः? **निजनृपतनूहेतिदृष्ट्या** निजे पूर्वं नृपतनुत्वे स्वकीयायुधदर्शनेन **अतितुष्टैः** अत एव **विस्मेरैः,** किञ्च **भाविमारीचदृग्भिः** भविष्यन्मारीचं दृष्टवद्भिः **सत्यात्माद्यैः** सत्यतीर्थाद्यैः **स्वैः** स्वशिष्यैः **परिवृतः** । युद्धोत्सवानां सस्मारेत्यत्र 'अधीगर्थदयेषां कर्मणि' इति कर्मणि

१. अस्य बन्धस्य विवरणं परिशिष्टे बन्धमीमांसायां भवति ।
२.एकस्मिन् प्रतनकोशे –'यौधोऽत्र राजा त्वमितीरिते गुरुं ममाऽयुधं केति–' इति पठ्यते । स एव साधुरिति भाति ।

षष्ठी । 'तपस्विवत् स्थितं डाम्भं ज्ञात्वा मारीचमभ्यधात् । मध्वः परीक्षया चैनं ते विष्णुद्वेषिणं विदुः' इति । 'यौधोऽत्र [1]राजाऽहमितीरितो गुरुं तवाऽयुधं केति जगाद सत्यवाक् । खातेऽमुनोक्ते कुतळे महागदां दृष्ट्वाऽऽप्तवाचं श्रदधुर्गुरुं हि ते' इति चोक्तमैतिह्यम् । सत्यवाक् सत्यतीर्थः । कुतळं भूतळम् ॥ ४९ ॥

(त.चं.) प्राज्ञो राज्ञाम् । वाराणसीतः कौरवं कुरुनाम्ना राज्ञा निर्मितं क्षेत्रं कुरुक्षेत्रमाप्तः । निजनृपतनूहेतिदृष्ट्या । अत्रैवं व्याचक्षते– निजा या नृपतनूः भीमरूपं तस्य या हेतिर्महागदा तस्या दृष्ट्याऽतितुष्टैः सत्यात्माद्यैरिति । पद्यं चेदं तन्मूलमुदाहरन्ति– 'यौधोऽत्र राजाऽहमितीरिते गुरुं तवाऽयुधं केति जगाद सत्यवाक् । खातेऽमुनोक्ते कुतळे महागदां दृष्ट्वाऽऽप्तवाचं श्रदधुर्गुरुं हि ते' इति । भावप्रकाशिकायामप्येवमेव पठ्यते । वेदाङ्गतीर्थीयेऽपि । परन्तु नायं प्राचीनटीकाकाराणामाशय इति भाति । तथाहि वेदाङ्गतीर्थीयम्– 'निजे पूर्वं नृपतनुत्वे स्वकीयायुधदर्शनेनातितुष्टैः सत्यतीर्थाद्यैः' इति । सत्यतीर्थादीनां पूर्वं नृपतनुत्वे यद्यदायुधमासीत् तस्य दर्शनेनातितुष्टैरिति हि टीकावाक्यस्य स्वरसोऽर्थः । 'शिष्याणामायुधानि प्रकटयति पुरा' इति प्रमेयनवमालिकाऽपि संवदते । तथाच सत्यतीर्थः भारतयुद्धे भीमानुचरः कश्चन राजाऽऽसीत् । तदा युद्धभूमौ पतितां स्वीयां महागदां दृष्ट्वा सत्यतीर्थस्तुतोष । अन्ये च शिष्याः स्वस्वायुधदर्शनेन सविस्मयं तुतुषुरिति । युक्तं चैतत् । अन्यथा यौधोऽत्र राजा भीम इति नातिस्वरसम् । भीमो हि क्षत्रियो बभूव, न राजा । अथच राजपदं क्षत्रियवचनमिति कथञ्चिद् सङ्गमनेऽपि भीमस्य महागदा तत्र कथं दृश्येत? नहि सा गदा युद्धरङ्गे पतिता, या युद्धानन्तरमपि भीमहस्त एव चिरं विरेजे । तर्हि तस्य पद्यस्य का गतिः, या प्रमाणत्वेन कविनाऽप्युदध्रियत? भगवान् प्रमाद

१.व्याख्यानानुगुण्याय '–राजा त्वमितीरिते गुरुं ममाऽयुधं केति–' इति पठनीयम् । स एव च प्रतनः पाठः ।

एवायं लिपिकृताम् । यदेकस्मिन् प्रतनतरे कोशे पुनरर्थतः पाठतश्च समीचीनाऽन्यैवाऽनुपूर्वी दृश्यते। तथाहि 'यौधोऽत्र राजा त्वमितीरिते गुरुं ममाऽयुधं केति जगाद सत्यवाक्। खातेऽमुनोक्ते कुतळे महागदां दृष्ट्वाऽऽप्तवाचं श्रद्धुर्गुरुं हि ते' इति । तथाच मध्वः सत्यतीर्थं प्रत्याह– 'पुरा भारतयुद्धे त्वमपि योद्धा राजाऽभूः' इति । तदा सत्यवाक् सत्यतीर्थः पप्रच्छ– 'तर्हि ममाऽयुधं क्व' इति। तदा भूगतां तदीयां गदां मध्वो दर्शयामास। अन्येषामपि कर्मन्दिशिष्याणां तत्तदायुधानि । अत एव पूर्वक्षत्रियस्योपेन्द्रतीर्थस्य तादृशं युद्धकौशलम् । अत एव मूले 'सत्यात्माद्यैः' इति आद्यपदमुपाददे । तथाच भावप्रकाशिकायां वेदाङ्गतीर्थीये चायमेव पद्यपाठः पठनीय इति निश्चीयते। महागदापदभ्रान्त्या चास्य पाठान्तरस्य प्रसक्तिरिति भाति। मभनतता गुरू च मन्दाक्रान्तेति गतं प्रथमान्ते ॥ ४९ ॥

विप्रात्मेशः क्षणार्थं कृतनतिरशितिश्रीर्हृषीकेशदेशे
स्पष्टं दृष्टोऽप्यदृष्टः सपदि विहितवान् विस्मयं देहभाजाम् ।
स्वप्ने स्वप्रेरितान्यस्थलगनिजनरोपाहृतैर्भक्ष्यभोज्यैः
प्राज्यैः प्राभोजयत् स्वं गुरुमखिलगुरुं वेदयन् वेदबन्धुम् ॥५०॥

(भा.प्र.) अन्यत्र–

तातो ममाऽयाति[1] तमर्चयेति स्थानाधिकारी जटिनं त्रिशूलिनम्।
स्वप्ने ब्रुवाणं त्रिरवेक्ष्य दूरतः प्रायादुदन्तं च जगाद विस्मितः॥

(प.दी.) विप्रेति । **हृषीकेशदेशे** हृषीकेशक्षेत्रे **विप्रात्मा क्षणार्थं** भिक्षाक्षणार्थं **कृतनतिः अशितिश्रीः**, शितिः कृष्णा अशितिः शुभ्रा श्रीर्यस्य सः तथोक्तः, शुभ्रकान्तिरित्यर्थः, 'शिती धवळमेचके'[2] इत्यभिधानम्, **ईशः**

१.'तातोऽयमायाति' इति पाठान्तरम् । 'ततोऽयमायाति' इति च कचित् ।
२.'धवलमेचकौ' इति प्रचलितः पाठः ।

रुद्रः **स्पष्टं** सम्यक् **दृष्टोऽपि सपदि** तत्क्षणात् **अदृष्टः देहभाजां विस्मयं विहितवान्**। **स्वप्ने स्वप्रेरितान्यस्थलगनिजनरोपाहृतैः** स्वप्ने आत्मना प्रेरितेन हृषीकेशादन्यत्र कुत्रचित् शैवस्थाने स्थितेन तच्छैवस्थानाधिकारिणा निज-नरेण स्वभक्तेन पुरुषेण उपाहृतैः हृषीकेशदेशं प्रत्युपाहृतैः **प्राज्यैः** बहुळैः **भक्ष्यभोज्यैः** तं श्रीमध्वाचार्यं **प्राभोजयत्**। **अखिलगुरुं वेदबन्धुं** तं श्रीमध्वा-चार्यं [स्वं] **गुरुं** स्व[कीयं] गुरुं[१] **वेदयन्**, आत्मात्मीयवाची हि स्व-शब्दः। 'तातो ममाऽयाति तमर्चयेति स्थानाधिकारी जटिनं त्रिशूलि-नम्। स्वप्ने ब्रुवाणं त्रिरवेक्ष्य दूरतः प्रायादुदन्तं च जगाद विस्मितः' इति चोक्तमैतिह्यम् ॥ ५० ॥

(त.चं.) अखिलगुरुं तं स्वगुरुं वेदयन्। 'तं गुरुमखिलगुरुम्' इत्यपि पाठान्तरम्। 'मरभनया यौ मुनिमुनिमुनिभिः स्यात् स्रग्धरा विभिन्नाङ्गी' एकविंशत्यक्षरः प्रकृतिभेदः ॥ ५० ॥

अवाप्तवान् पुनरिषुपातमस्मरद्
रमापतिं स परशुराममादरात्।
स राजकेळ्युरुकदळीसहस्रकं
तदाऽऽददत्त्यवसितिदत्तमुत्तमम् ॥ ५१ ॥

(प.दी.) **अवाप्तवान्**। **सः** श्रीमध्वाचार्यः **पुनः इषुपातं** इषुपाताभिधं क्षेत्रं **अवाप्तवान्**। तत्क्षेत्राधिपतिं **रमापतिं परशुरामं आदरादस्मरत्**। **सः** श्रीमध्वाचार्यः **तदा** तत्क्षेत्रस्थितिकाले **अत्त्यवसितिदत्तं** भिक्षावसाने दत्तं **उत्तमं राजकेळ्युरुकदळीसहस्रकं** राजकेळ्याख्योरुकदळीफलसहस्रकं **आ-दत्** जघास। राजकेळ्युरुकदळीसहस्रकमिति राज्ञा इषुपाताधिपतिना

१.'तं श्रीमध्वाचार्यम्' इति प्रतीकग्रहणात् 'तं गुरुमखिलगुरुम्' इति मूलपाठ इति भाति। अथापि 'आत्मात्मीयवाची हि स्वशब्दः' इति वचनात् 'स्वं गुरुम्' इत्येव वेदाङ्गतीर्थसम्मतः पाठ इति निश्चीयते। अन्यथा स्वशब्दव्याख्यानस्यानवसरात्।

केळ्या क्रीडया परीक्षार्थं दत्तमुरुकदळीसहस्रकमिति वाऽर्थः । तस्मिन् पक्षे दत्तमिति मध्यमपदलोपी समासोऽभिप्रेतः ॥ ५१ ॥

(त.चं.) अवाप्तवान् । राजकेळीति स्थूलस्य कदळीप्रभेदस्य नामधेयम् । राजकेळ्याख्या उरुकदळी । अतिजगती अतिरुचिरा नाम छन्दः । 'ज्भौ सजौ गोऽतिरुचिरा चतुर्भिर्नवभिर्यतिः' ॥ ५१ ॥

स शङ्करपदद्विजोपहृतमाप्य गोवाख्यगां
गरिष्ठकदळीलसद्दशशतीचतुष्कं चरन् ।
पयः कलशपञ्चकत्रिकयुगाभिपूर्णं पपा-
वदृष्टगतिरप्यभून्नृपनृमण्डलैरुद्यतैः ॥ ५२ ॥

(भा.प्र.) पञ्चकत्रिकं पञ्चदशकं तद्युगं त्रिंशत् ।

देवैः समं रहसि देवगृहे प्रवृत्तो राज्ञा कवाटविवृतौ प्रसभोदितोऽसौ ।
ऊचेऽधुनाऽऽव्रजसि चेदिह नश्यसीति राजाऽथ विस्मितमना व्यवृणोत् कवाटम् ॥

रक्तेक्षणं पुरुषसिंहमवेक्षमाणः सद्यो भयान्निजपुरोहितमाह्वयत् सः ।
क्षन्तव्यमित्यसकृदानमति द्विजेऽसौ षण्मासमायुरददान्नृपतेर्दयालुः ॥

राज्ञाऽर्थितोऽत्र वसतावखिलांश्च शिष्यान् प्रस्थाप्य वायुवदगादखिलैरदृष्टः ।
षष्ठेऽथ मासि परचक्रपराक्रमेण राजा सराज्यनगरो विवशो ननाश ॥

(प.दी.) स इति। **सः** श्रीमध्वाचार्यः **गोवाख्यगां** गोवासञ्ज्ञितां भूमिं **आप्य** । तत्र **शङ्करपदद्विजोपाहृतं** शङ्करनाम्ना द्विजेन दत्तं **गरिष्ठकदळीलसद्दशशतीचतुष्कं** अतिस्थूलानां कदळीफलानां लसद्दशशतीचतुष्कं चतुस्सहस्रं **चरन्** भक्षयन् सन् **कलशपञ्चकत्रिकयुगाभिपूर्णम्,** घटपञ्चकत्रिकं पञ्चदश तस्य युग्मम् । त्रिंशद्धटेषु अभिपूर्णं **पयः** क्षीरं **पपौ** । **उद्यतैः नृपनृमण्डलैः** नृपभटसमूहैः **अदृष्टगतिः** अदृश्यगमनः **अप्यभूत्** । एवमस्य सामर्थ्यं श्रुत्वा अनेनात्रैव स्थातव्यमिति मन्वानो राजा गमननिरोधार्थं

भटान् आदिशत् । तदा तैरदृष्टोऽयं जगामेति भावः । अत्रायमितिहासः– 'देवैः समं रहसि देवगृहे प्रवृत्तो राज्ञा कवाटविवृतौ प्रसभोदितोऽसौ । ऊचेऽधुनाऽऽव्रजसि चेदिह नश्यसीति राजाऽथ विस्मितमना व्यवृणोत् कवाटम् । रक्तेक्षणं पुरुषसिंहमवेक्षमाणः सद्यो भयान्निजपुरोहितमाह्वयत् सः । क्षन्तव्यमित्यसकृदानमति द्विजेऽसौ षण्मासमायुरददान्नृपतेर्दयालुः । राज्ञाऽर्थितोऽत्र वसतावखिलांश्च शिष्यान् प्रस्थाप्य वायुवदगादखिलैरदृष्टः । षष्ठेऽथ मासि परचक्रपराक्रमेण राजा सराज्यनगरो विवशो ननाश' ॥ ५२ ॥

(त.चं.) उद्यतैरिति । मध्वस्य स्वराज्यान्निर्गमननिरोधार्थमुद्यतैः । पृथ्वी छन्दः । लक्षणमुक्तं नवमान्ते ॥ ५२ ॥

अयमेव गोविषयतोऽपि सदसि जनतार्थितो जवात् ।
[1]पुष्पमुत फलमहो विदधे जनसुप्तिदानुपमगानसम्पदा ॥ ५३ ॥

(भा.प्र.) गोविषयस्य 'पशुपे' इत्यपभ्रष्टभाषा ।
दिव्यगेयविदग्धोऽसौ सर्वज्ञ इति याचितः ।
विद्वद्भिरत्र कृतवान् गानशास्त्रं सुदुर्लभम् ॥

(प.दी.) अयमिति । अयं श्रीमध्वाचार्यः **एव गोविषयतोऽपि** गोविषयेऽपि सार्वविभक्तिकत्वात्तसेरत्र सप्तम्यर्थे तसिः । गोविषयस्य 'पशुपे' इत्यपभ्रष्टभाषा । तत्र कुत्रचित् **सदसि जनतार्थितः** जनसमूहेनार्थितः सन् **जनसुप्तिदानुपमगानसम्पदा** श्रोतृजनसुखदया अनुपमगानसम्पदा **जवात्** आशु **पुष्पं [फलमुत]** फलमपि **विदधे** । अनुपमगानेन पूगादावाशु पुष्पफले विदध इति भावः । **अहो** विस्मये ॥ ५३ ॥

(त.चं.) अयमेव । केचित् पठन्ति– 'अयमेव गोविषयतोऽपि कुत्रचित् सदसि जनतार्थितो जवात्' इति । अनधीतच्छन्दःशास्त्राणां विभ्रमविलसित-

---

१.वेदाङ्गतीर्थरीत्या 'पुष्पमपि फलमहो' इत्यपि पाठः स्यात् ।

मेतत् । तथाह्यत्र उद्गता नाम विषमच्छन्दः । प्रथमपादे द्वितीये च दशाक्षराणि । तृतीय एकादश । चतुर्थे त्रयोदशेति । तथाहि लक्षणम्– 'प्रथमे सजसा लश्चेत् द्वितीये नसजा गुरुः । तृतीये भ्नज्लगास्तुर्ये सज्सज्गैः सहितोद्गता' इति । तेन चतुश्चत्वारिंशदक्षरा त्रिष्टुबेवेयम् । यत् केचिदन्यथा वदन्ति तत् सर्वमप्रमाणकमित्युपेक्ष्यम् ॥ ५३ ॥

धन्योऽमह्यत नाकिनामहितहृद्बाणस्समोऽजस्य यो
मध्वो ध्वस्तदुरागमोऽग्र्यहिमगुश्रीः काममायामिहृत् ।
विष्णुं विश्वजयप्रदं स हि नमन् सेव्यं सुसौख्यं मुदा
दाक्ष्याच्छ्रीधरमामयादिविरही योगी सुहृत् सर्वदा ॥ ५४ ॥

(प.दी.) **धन्य** इति । **धन्यः** निरपेक्षः सर्वगुणसम्पूर्णः ।'निरपेक्षो गुणैः पूर्णो धन्य इत्यभिधीयते' इत्यभिधानम् । **नाकिनां** देवानां **अहितहृद्बाणः**, [अहिता असुराः,] असुरजनहृदयस्य शल्यः, **अजस्य** ब्रह्मणः **समः**, 'न विशेषो ब्रह्मवाय्वोः' इति वचनात्, **ध्वस्तदुरागमः** निरस्तदुरागमः, **अग्र्यहिमगुश्रीः** पूर्णचन्द्रकान्तिः, **कामं** नितरां **आयामिहृत्** विस्तारवच्चित्तः, सर्वज्ञ इति यावत्, **यः मध्वः** इत्यादिगुणविशिष्टो यः श्रीमध्वाचार्यः **सः अमह्यत** अपूज्यत । 'मह पूजायाम्' इति धातुः । पुनः कथम्भूतः? **विश्वजयप्रदं** विश्वेषां जयप्रदम्, **सेव्यं सुसौख्यं श्रीधरं** लक्ष्मीकान्तमिति यावत्, एवम्भूतं **विष्णुं मुदा** प्रीत्या, भक्त्येति यावत्, **दाक्ष्यात्** दक्षभावेन, अष्टाङ्गविशिष्टत्वाख्यचातुर्येणेति भावः, **नमन्** **हि** सर्वतीर्थक्षेत्रेषु विष्णुमेव नतवानिति भावः, **आमयादिविरही** रोगादिनानाक्लेशरहितः, **योगी** भक्त्यादियोगयुक्तः **सर्वदा सुहृत्** ॥ ५४ ॥

(त.चं.) नाकिनां सुराणां येऽहिता असुरास्तेषां हृदि विद्धशल्यतुल्यः । सर्वदा सुहृत् सताम् । अनेन च चक्रबन्धं बबन्ध[१] । आद्यपादत्रयस्य

१. अस्य विवरणं परिशिष्टे बन्धमीमांसायाम् ।

तृतीयाक्षराणां सप्तदशाक्षराणां च योजनेन 'मध्वविजयाख्यम्'इति, षष्ठानां चतुर्दशानां चाक्षराणां योजनेन 'नारायणकाव्यम्' इति च भवति । शार्दूलविक्रीडितं छन्दः । लक्षणं तूक्तम् ॥ ५४ ॥

इति भुवनविभूषणस्य भूयां-
स्यविगणितानि कृतान्तराणि हन्त ।
श्रवणमननकीर्तनैरभीष्टं
प्रतिददतीत्यमराः प्रकीर्तयन्ति ॥ ५५ ॥

(प.दी.) एवं 'भुवनाद्भुतमध्वचेष्टितं' इत्यस्मिन् श्लोके 'अथ शुश्रूषुजनाय वर्ण्यते' इति श्रीमध्वाचार्यकथावर्णनं प्रतिज्ञाय, 'क्वचिदीश्वरदेवमेष भूपम्' इत्यादिश्लोकैरनुवर्ण्य, इदानीमुपसंहरति दशमतिशिष्यः– **इतीति** । **भुवनविभूषणस्य** भुवनालङ्कारभूतस्य श्रीमध्वाचार्यमहामुनेः **इति** एवंविधानि, इतिशब्दः प्रकारवाचकः, 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु'[१] इत्यमरः, **भूयांसि** भूरीणि **अविगणितानि** असङ्ख्यातानि **कृतान्तराणि** अस्माभिरिदानीमुक्तेभ्योऽप्यन्यानि कर्मान्तराणि **श्रवणमननकीर्तनैः अभीष्टं प्रतिददति** प्रयच्छन्ति **इत्यमराः प्रकीर्तयन्ति हन्त** ॥ ५५ ॥

(त.चं.) इति भुवनविभूषणस्य । पुष्पिताग्रा विषमच्छन्दः । लक्षणं तूक्तं षष्ठे ॥ ५५ ॥

इति विविधगोधारावारैर्विशारदवारिदो
हरिपदरतो विद्याविद्युत्प्रदीपितदिङ्मुखः ।

१.'–प्रकाशादिसमाप्तिषु' इति केचित् पठन्ति । हैमेऽपि तथा । 'इति हेतौ प्रकाशने' इति च मेदिनी । तदा तु 'इतिशब्दः स्मृतो हेतौ प्रकारादिसमाप्तिषु' इति हलायुधवचनं पठनीयम् ।

भवभयमहाघर्मोत्तप्तं सदङ्घ्रिपमण्डलं
सफलसुमनः सान्द्रानन्दं व्यधादविपल्लवम् ॥ ५६ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते दशमः सर्गः

—०—

(भा.प्र.) सफलसुमनः सफलसुचित्तम्, फलपुष्पसहितं च। अविपल्लवं विपदो लवेनापि रहितम्, अविगतपल्लवं च॥

इति नारायणपण्डिताचार्यविरचितायां
स्वकृतश्रीमध्वविजयस्य भावप्रकाशिकाख्यटीकायां दशमः सर्गः

—०—

(प.दी.) 'दशमतिशिष्यः कश्चित्' इत्यादिनोक्तमुपंहरति काव्यकारः– इतीति। **हरिपदरतः** श्रीहरिचरणारविन्दनिरतचित्तः **विद्याविद्युत्प्रदीपितदिङ्मुखः** विद्याख्याभिः तटिद्भिः प्रकाशितदिङ्मुखः **विशारदवारिदः** विद्वदाख्यमेघः **भवभयमहाघर्मोत्तप्तं** संसारभयाख्यमहोष्णाभितप्तं **सदङ्घ्रिपमण्डलं** सज्जनाख्यवृक्षमण्डलं **इति** एवमुक्तप्रकारेण **विविधगोधारावारैः** नानाविधवचनधारासमूहैः, [१]सन्तोषयित्वेति शेषः, **सफलसुमनः** सफलं ज्ञानविशेषादिफलयुक्तं सुमनश्च शोभनचित्तयुक्तं च, अत एव **सान्द्रानन्दं** सम्पूर्णसुखम्, **अविपल्लवं** विपदां लेशेनापि रहितं **व्यधात्**। कश्चिद् वारिदो विष्णुपदरतो विद्युत्प्रदीपितदिङ्मुखः सन् घर्मोत्तप्तं अङ्घ्रिपमण्डलं जलधारावारैरभिषिच्य पुष्पफलयुक्तं **अविपल्लवं** अविगतपल्लवं सपल्लवमित्यर्थः, यथा कुर्यात् तद्वदित्यर्थः ॥ ५६ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां दशमः सर्गः

—०—

१. लिपिकृत्प्रमादः सम्भाव्यते। 'सन्तोष्य' इति, 'तोषयित्वा' इति वा स्यात्।

(त.चं.) इति विविधगोधारावारैः । हरिणी नाम च्छन्दः । नसमरसा लगौ चेति सप्तदशाक्षरपादा अत्यष्टिः । 'हरिणी न्सम्रसलगाः षडब्धिभुवनैर्यतिः' ॥ ५६ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याचख्यौ दशमं सर्गं सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां तत्वचन्द्रिकायां दशमः सर्गः

—०—

[आदितः श्लोकाः– ४९६+५६=५५२]



अन्यत्र च चोरान् धन्यप्रवरोऽसौ शूरान् शतसङ्ख्यान् प्राप्तान् स्वजिघांसून् ।
एकेन तु शिष्येणाऽकृष्टकुठारान् निस्ताडितयूथ्यानद्रावयत द्राक् ॥

[१०.२१]

एकादशः सर्गः

[आचार्यमध्वप्रवचनश्रवणार्थं गगनगतस्य सनकादिसहितस्य शेषस्य भूमिष्ठैर्जनैरपीषद्दर्शनम्। शेषलोके मध्वशास्त्रपठनफलप्रपञ्चनार्थं मुनिभिः प्रार्थना। शेषेण मुक्तिरेव तत्फलमिति निरूपणम्। मुक्तलोकवर्णनम्। मुक्तानां स्त्रीपुरुषाणां विहारवर्णनम्। उद्यानवर्णनम्। ऋतुवर्णनम्। जलक्रीडावर्णनम्। दिव्यसुरतवर्णनम्। भगवत्स्वरूपवर्णनम्। अयममृतलोक आनन्दतीर्थभाष्यपठनफलमित्युपसंहारः।]

प्रचुरान्तरप्रवचनं फणिरा-
डुपशुश्रुवान् ससनकादिमुनिः ।
गगनेऽल्पदृष्टवपुरत्र जनै-
स्त्वरितं निलीनरुचिराप पदम् ॥ १ ॥

(भा.प्र.) विचन्द्रायां क्षपायां तु चन्द्रिकाभ्रमिणो जनाः ।
शेषस्य तेजस्यथ तं यान्तं मध्वो व्यदर्शयत् ॥

(प.दी.) प्रचुरेति । अत्र जनैः भूमिष्ठैर्जनैः **गगने अल्पदृष्टवपुः** किञ्चिद्दृष्टस्वरूपः **ससनकादिमुनिः फणिराट्** शेषः **प्रचुरान्तरप्रवचनं** पूर्णप्रज्ञाचार्यस्य व्याख्यानं **उपशुश्रुवान्** श्रुतवान् सन् **त्वरितं निलीनरुचिः** तत्क्षणाददृष्टकान्तिः **पदं** निजस्थानं **आप** । 'विचन्द्रायां क्षपायां तु चन्द्रिकाभ्रमिणो जनाः । शेषस्य तेजस्यथ तं यान्तं मध्वो व्यदर्शयत्' इति चोक्तम् ॥ १ ॥

(त.चं.) अल्पदृष्टवपुरत्र । अत्र पूर्वसर्गप्रस्तुते भृगुकुलतिलकस्थाने । तत्रापि रूप्यपीठे । सर्गेऽत्र प्रमिताक्षरा जगती आद्विसप्ततितमं पद्यम् ॥

अतिचित्रधाम्नि निजधाम्नि रतं
ससहस्रमस्तकमनन्तममुम् ।
मुनयोऽभिवाद्य विनयाभरणा
वरमन्वयुञ्जत तदाऽर्थमिमम् ॥ २ ॥

(प.दी.) अतीति। तदा **विनयाभरणा मुनयः अतिचित्रधाम्नि निजधाम्नि** स्वमन्दिरे **रतम्**, 'धामनी गृहतेजसी', **ससहस्रमस्तकममुमनन्तं** शेषं **अभिवाद्य इमं** वक्ष्यमाणं **वरं** उत्तमं **अर्थं अन्वयुञ्जत** अपृच्छन् ॥ २ ॥

(त.चं.) अतिचित्रधाम्नि निजधाम्नि । अत्यद्भुततेजसि निजमन्दिरे रतं स्थितम् । मुनयः सनकादयः । वरमुत्तममर्थं प्रमेयम् । अन्वयुञ्जत । युजिर् योगे । अनुयोगः पृच्छा । 'प्रश्नः स्यादनुयोगः पर्यनुयोगो भवेदुपालम्भः' ॥

भगवत्तमस्य विपुलप्रमतेः
समयं मनोहरतमं जगति ।
महितं भवद्भिरपि लोकपते
पठतां मुहुः फलमुदेष्यति किम् ॥ ३ ॥

(प.दी.) भगवदिति । हे **लोकपते** शेष, **जगति मनोहरतमं भवद्भिरपि महितं** पूजितं **भगवत्तमस्य** षड्गुणपूर्ण[त्व]वतामुत्तमस्य **विपुलप्रमतेः** श्रीपूर्णप्रज्ञाचार्यस्य **समयं** शास्त्रं **मुहुः पठतां किं फलमुदेष्यति** सेत्स्यति ॥

(त.चं.) भगवत्तमस्य पूज्यतमस्य । मुहुः क्रियासमभिहारेण । पठतां शब्दतोऽर्थतश्च । किं फलमुदेष्यति सेत्स्यति निष्पत्स्यते ॥ ३ ॥

अधिकारिणां फलमलं विदुषां
भवति प्रवृत्तिरतिवीर्यवती ।
इति तत्फलं सफलसङ्कथनो
भगवान् प्रपञ्चयतु भूरिदयः ॥ ४ ॥

(प.दी.) अधिकारिणामिति । **अधिकारिणां** शास्त्रश्रवणपाठादावधिकारवतामपि **फलं** श्रवणपाठादिजन्यं फलं **अलं** सम्यक् **विदुषां** जानतामेव **प्रवृत्तिः अतिवीर्यवती** महाफलवती **भवति** । ज्ञानपूर्वकं कृतस्य

कर्मणः फलाधिक्यसद्भावादिति भावः । **इति** तस्माद्धेतोः अस्माकं तत्फलज्ञानपूर्वकं प्रवृत्त्यर्थं **सफलसङ्कथनः** सत्यसङ्कथनः **भूरिदयः भगवान्** **तत्फलं** श्रीमध्वशास्त्रश्रवणपाठादिजन्यं फलं **प्रपञ्चयतु** विस्तारेण ब्रवीतु **इत्यन्वयुञ्जत** इति सम्बन्धः ॥ ४ ॥

(त.चं.) अधिकारिणाम् । अधिकारिणामपि फलज्ञाने सुदृढा प्रवृत्तिर्भवति । सफलसङ्कथनः । येन सह सम्भाषमाणाः तावन्तं समयं, तदपि वा जन्म सार्थकं मन्यन्ते । भगवान् पूज्यो भवान् प्रपञ्चयतु । श्रीमध्वस्य सिद्धान्ते मोक्षस्वरूपं कीदृशमिति प्रपञ्चयितुमयमुपक्षेपः । जीवस्वरूपस्य न लिङ्गभेदः । तस्मान्मोक्षेऽलिङ्गं चिन्मात्रमवशिष्यत इति परे । यदि जीवस्वरूपस्य न लिङ्गभेदः, कस्य तर्हि? किं जडस्य? अतोऽस्ति जीवस्य लिङ्गभेदः । अस्ति मोक्षेऽपि लिङ्गभेदः । अस्ति मोक्षेऽपि स्त्रीपुंसयोर्भोगः । 'स्त्रीभिर्वा यानैर्वा' इति श्रुतेः । तदिदं माध्वमपूर्वं प्रमेयं प्रत्याययितुमयं प्रक्रमः ॥ ४ ॥

इति तैरुदीरितमुदारमति-
र्वचनं निशम्य स जगाद गिरम् ।
शृणुताऽदरेण महनीयतमं
महनीयपादसमयस्य फलम् ॥ ५ ॥

(प.दी.) इतीति । **उदारमतिः सः** शेषः **तैः** मुनिभिः इत्युदीरितं **वचनं निशम्य गिरं जगाद** । किमिति? **महनीयतमं** अतिपूज्यं **महनीयपादसमयस्य** श्रीमध्वाचार्यशास्त्रस्य **फलं** श्रवणादिजन्यं **आदरेण शृणुत** ॥ ५ ॥

(त.चं.) उदारमतिः महामतिः । महनीयपादः पूज्यपादः । महनीयं स्वरूपमस्येति । उत्तमानां हि स्वरूपं पादशब्देन भण्यते ॥ ५ ॥

त्रिदिवादि लभ्यमपि नास्य फलं
कथितं कृषेरिव पलालकुलम् ।

स्वफलं तु मुक्तिपदमुक्तिपदं
शुकशारदादिपरमार्थविदाम् ॥ ६ ॥

(भा.प्र.) 'शब्दयोनिः'(?) ['तस्मै स्वलोकम्–'] इत्यारभ्य 'श्यामावादाताः शतपत्रलोचनाः'[१] इत्यादि शुकोक्तिः। 'धानापूपा मांसकामाः सदा पायसकर्दमाः' इत्यादि शारदोक्तिः॥

(प.दी.) त्रिदिवेति । त्रिदिवादि स्वर्गादिकं लभ्यमपि सुलभमपि अस्य श्रीमध्वाचार्यशास्त्रस्य फलं मुख्यफलं न कथितम् । किमिव? कृषेः कर्षक-व्यापारस्य पलालकुलमिव। स्वफलं तु मुक्तिपदं मोक्षाख्यपदम्, तत्प्राप्तिरिति भावः । कथम्भूतम्? शुकशारदादिपरमार्थविदां शुकसरस्वत्यादीनां परम-तत्वज्ञानिनां उक्तिपदं प्रशंसारूपवचनास्पदम् । तैः स्तुत्यमिति भावः । 'न वर्तते यत्र रजस्तमस्तयोः सत्वं च मिश्रं नच कालविभ्रमः । न यत्र माया किमुतापरे हरेरनुव्रता यत्र सुरासुरार्चिताः' इत्यादि शुकोक्तिः । 'धानापूपा मांसकामाः सदा पायसकर्दमाः' इत्यादिशारदोक्तिः ॥ ६ ॥

(त.चं.) त्रिदिवादि । आदिना धनधान्यादिकं भार्यापुत्रादिकं चैहिकं फलम् । क्षयिष्णुफलमित्येतत् । निष्फलं सस्यनाळं पलालमुच्यते । तृण-जातिर्वा । 'पालयति पाल्यते वा तदिति पलालम्, धान्यतृणजातिः' [८. ११५] इति दशपादिकावृत्तिः । शुकशारदादीति । शुकवचनं भागवतगम्– 'श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः । सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः' [२.९.११] इत्यादि। 'न वर्तते–' इत्यादि

१. 'न वर्तते–' इत्यादि भागवते द्वितीयस्कन्धे नवमाध्याये दशमं पद्यम्। 'श्यामावदाताः' इति त्वेकादशम्। 'तेन न वर्तते–'इत्यारभ्य इति पाठः स्यात्। 'शब्दयोनिः–' इत्यादि तु न भागवतवचनम् । 'तस्मै स्वलोकम्–'[२.९.९] इति तु सम्भावितः पाठः । लिपिकृत्प्रमादः सम्भाव्यते। 'धानापूपा–' इत्यादि शारदोक्तिरनुव्याख्याने समुद्धृता । तथाहि– '–आह वाग्देवी परं मोक्षं प्रजापतेः । शाखांशाखां महानद्यः संयान्ति परितःस्रवाः । धानापूपा मांसकामाः सदा पायसकर्दमाः' [२.३.३०-३१] इति ।

तु ततः पूर्वतनम् [२.९.१०]। शारदावचनं तु महाभारते आरण्यके पर्वणि पठ्यते। तथाहि– 'सरस्वत्युवाच। तं वै परं वेदविदः प्रपन्नाः परं परेभ्यः प्रथितं पुराणम्। स्वाध्यायदानव्रतपुण्ययोगैस्तपोधना वीतशोका विमुक्ताः। तस्याथ मध्ये वेतसः पुण्यगन्धः सहस्रशाखो विमलो विभाति। तस्य मूलात् सरितः प्रस्रवन्ति मधूदकप्रस्रवणा रमण्यः। शाखांशाखां महानद्यः संयान्ति परितःस्रवाः। धानापूपा मांसकामाः सदा पायसकर्दमाः। यस्मिन्नग्निमुखा देवाः सेन्द्राः सह मरुद्गणैः। ईजिरे क्रतुभिः श्रेष्ठैस्तत् पदं परमं मुने' [वन.१८९.२२-२५] इति। 'आचक्ष्व मे तं परमं विशोकं मोक्षं परं यं प्रविशन्ति धीराः' इति ताक्ष्यर्प्रश्नस्योत्तरत्वेनेदं सरस्वतीवचनं प्रवृत्तमिति स्फुटं मुक्तिपरम्। ताक्ष्यर् इति कश्चन मुनिः प्रजापतिष्वेकः। यः प्रचेतसश्चतस्रो दुहितॄरुवाह। यश्च विनतायां जनयामास वैनतेयम्। अत एवेदं प्रजापतिप्रश्नस्य शारदादत्तमुत्तरमित्यनुव्याख्यानम्– '–आह वाग्देवी परं मोक्षं प्रजापतेः' इति। 'परितःस्रवाः' इत्यत्र 'सिकताशयाः' इति, 'सिकतासमाः' इति चार्वाचीनाः। 'मांसकामाः' इत्यत्र 'मांसशाकाः' इति च। धानापूपवत्यो नद्यः। कमनीयमांसवत्यश्च। यासां पायसमेव कर्दमस्थानीयम् ॥ ६ ॥

परमागमार्थवरशास्त्रमिदं
भजताममानवकलारचितम्।
व्रजतामहो परमवैष्णवतां
रतये स्वलोकमजितो दिशति ॥ ७ ॥

(प.दी.) परमेति। **अमानवकलारचितं** अमानवस्य देवस्य श्रीमुख्यवायोः कलया अंशभूतेन श्रीमध्वमुनिना रचितं **इदं परमागमार्थवरशास्त्रं** उत्तमवेदादिसदागमार्थात्मकं वरशास्त्रं **भजतां** श्रवणमननादि कुर्वतां **परमवैष्णवतां** मुख्यवैष्णवतां **व्रजतां** सतां **रतये** क्रीडायै **अजितः** विष्णुः **स्वलोकं दिशति**। **अहो** विस्मये ॥ ७ ॥

(त.चं.) परमागमाः परविद्याः । तदर्थनिर्णायकं वरशास्त्रम् । अमानवी कला । भजतां, भजनेन च परमवैष्णवतां व्रजताम् । अफलाकाङ्क्षया परमत्वम् ॥ ७ ॥

ननु तत्र विश्वविभवैकपदं
परिभाति पूर्णपुरुषस्य पुरी ।
उपलभ्यते यदुपमानपदं
प्रतिबिम्बमेव मणिवप्रगतम् ॥ ८ ॥

(प.दी.) भगवल्लोके कोऽस्त्यतिशय इत्यपेक्षायामाह– **नन्वित्यादिना** । **तत्र** भगवल्लोके **विश्वविभवैकपदं** सर्वविभवानां मुख्यास्पदम्, 'पदं व्यवसितित्राणस्थानलक्ष्माङ्घ्रिवस्तुषु' इत्यमरः, **पूर्णपुरुषस्य** हरेः **पुरी परिभाति ननु** लसति हि । **मणिवप्रगतं** मणिमयप्राकारगतं **प्रतिबिम्बमेव यदुपमानपदं** यस्याः पुर्या उपमानस्थानं **उपलभ्यते** । मणिमयवप्रगतं तत्प्रतिबिम्बमेव तस्याः पुर्या उपमानभावं भजते, नान्यदिति भावः ॥ ८ ॥

(त.चं.) मणिवप्रगतम् । 'वप्रं सालः प्राकारमाहुः' । उपमानतया केवलं प्रतिबिम्बमेवोपलभ्यते । नान्यत् किमपि ॥ ८ ॥

सितसौधसन्ततिरुचा स्फुरिता
परितोऽरुणाश्मगृहपङ्क्तिरुचिः ।
इह मच्छरीरवलये लसिता-
मनुयाति मूर्तिमसुरासुहृतः ॥ ९ ॥

(प.दी.) सितेति । परितः **सितसौधसन्ततिरुचा** शुभ्रप्रासादसमूहकान्त्या **स्फुरिता** लसिता **अरुणाश्मगृहपङ्क्तिरुचिः** पद्मरागमणिमयमन्दिरकान्तिः **इह** अस्मिन् **मच्छरीरवलये** मम शरीरात्मकशय्यामण्डले **लसितां** शोभमानां **असुरासुहृतः** असुराणामसुहृतः, हन्तुरिति यावत्,

मूर्तिमनुयाति विडम्बते । शुभ्रे मच्छरीरवलये उद्यदादित्यवर्णस्य हरेर्मूर्तिर्यथा शोभते तद्वत् सितसौधसन्ततिमध्यगता अरुणाश्मगृहपङ्क्तिः शोभत इति भावः ॥ ९ ॥

(त.चं.) सुधाधवळितं हर्म्यं सौधमुच्यत इत्युक्तम् । स्फुरिता । स्फुर प्रकटीकरणे । अरुणाश्मा पद्मरागः । 'शोणाश्मा पद्मरागः स्यात्' इति च । अनुयाति अनुकरोति ॥ ९ ॥

शबळा वळीकघटितस्फटिक-
द्युतिभिर्हरिन्मणिमयी वळभी ।
प्रतिसद्म भाति यमुना मिळिता
सितसौरसैन्धवपयोभिरिव ॥ १० ॥

(भा.प्र.) 'आच्छादनं स्याद् वळभी गृहाणां गोपानसी दारु च वक्रसंस्थम् । [१]नीध्रं वळीकं पटलान्तमाहुः कपोतपाली च विटङ्कसञ्ज्ञाम्' । 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इति पूर्वपदवृद्धिः । सौरसैन्धवपयोभिः ॥

(प.दी.) शबळेति । वळीकघटितस्फटिकद्युतिभिः वळीके गृहाच्छादनाग्रे । [१]'नीध्रं वळीकं पटलान्तमाहुः' इति हलायुधः । 'वळीकनीध्रे[२] पटलप्रान्ते' इत्यमरः । पटलमिति गृहाच्छादनमुच्यते । 'पटलं छदिः' इत्यमरः, वळीके गृहाच्छादनभूतफलकादीनामग्रभागे घटितानां स्फटिकानां द्युतिभिः **शबळा** मिश्रिता **हरिन्मणिमयी** इन्द्रनीलरत्नमयी **वळभी प्रतिसद्म** प्रतिमन्दिरं **भाति** शोभते । वळभीति गृहाणामाच्छादनम् । 'आच्छादनं स्याद् वळभी गृहाणाम्' इति हलायुधः । 'वळभीच्छादने वक्रदारुणि'[३]

१.'नीव्रं वळीकम्–' इति सर्वत्र प्रचुरः पाठः । २.'वलीकनीध्रे–' इति चामरपाठः । ३.नेदं प्रकृतोपयुक्तम् । नात्र वलभीशब्दार्थः कथ्यते । किन्तु गोपानसीशब्दार्थः– 'गोपानसी तु वलभीच्छादने वक्रदारुणि' इति । 'गोपानसी दारु च वक्रसंस्थम्' इति च हलायुधः । 'ಅಡ್ಡಜಂತಿ' इति भाषायाम् ।

इत्यमरः । कथम्? **सितसौरसैन्धवपयोभिः**, सुरसिन्धुर्गङ्गा, तत्सम्बन्धिभिर्धवळैः पयोभिः **मिळिता यमुनेव** । 'सौरसैन्धवे'ति 'हृद्भगसिन्ध्वन्ते पूर्वपदस्य च' इत्युभयपदवृद्धिः । सौहार्दं सौभाग्यमितिवत् ॥ १० ॥

(त.चं.) हरिन्मणिमयी इन्द्रनीलमणिमयी । 'अश्मगर्भं मरतकं हरिन्मणिरिति स्मृतम्' इति च । वळभी सौधोर्ध्ववेश्म चन्द्रशालापरनामकम् । 'वलभीचन्द्रशाले सौधोर्ध्ववेश्मनि' इति च । 'उप्परिगे'[ಉಪ್ಪರಿಗೆ] इति भाषायाम् ।'मुच्चिगे'[ಮುಚ್ಚಿಗೆ] इति वा । वळीकं छदिषः प्रान्तभागः यत्र छदिः वळभीभित्तिं स्पृशति । छदिरिति 'माडु'[ಮಾಡು] अथवा 'सूरु' [ಸೂರು] इति भाषायाम् । पटलमिति च्छदिरेवोच्यते । तस्य प्रान्तः अग्रभागः यं वळीकमिति, नीप्रमिति, नीव्रमिति,नीध्रमिति बहुधा कोशकारा व्याहरन्ति,'माडिनअञ्चु' [ಮಾಡಿನ ಅಂಚು] इति भाषायाम् । स्फटिकमयं वळीकम् । अरुणाश्ममयेषु गृहेषु मरतकमयं नीलमाच्छादनम् । तयोर्योगे च धवळिमा अरुणिम्ना नीलिम्ना च संयुज्यत इत्यहो वर्णशाबल्यम् । 'स्फटिकः सूर्यकान्तः स्यादर्काश्मा दहनोपलः' इति । तत्र वळभी वळीकं चोपमीयेते यमुनया सुरसिन्धुपयसा च– यमुना मिळिता सितसौरसैन्धवपयोभिरिव । 'हृद्-भग-सिन्ध्वन्ते पूर्वपदस्य च' [७.३.१९] । हृद्-भग-सिन्धु इत्येवमन्तेऽङ्गे पूर्वपदस्य चोत्तरपदस्य चाचामादेरचो वृद्धिर्भवति । तद् यथा– सौहार्दम् । सौहार्द्यम् । सौभाग्यम् । दौर्भाग्यम् । तथा सुरसिन्धोरिमानि सौरसैन्धवानि पयांसि ॥ १० ॥

यदि नाभविष्यदिह विभ्रमता-
नियमो जनस्य निलयावलिषु ।
विकटा विटङ्ककृतपत्रिततिः
कृतकेत्यवैक्ष्यत कथञ्चन नो ॥ ११ ॥

(भा.प्र.) 'विकटं श्रेष्ठे च'[१] ॥

(प.दी.) यदीति । इह वैकुण्ठे **जनस्य यदि विभ्रमतानियमः** नियमेनाभ्रान्तित्वनियमः[२] **नाभविष्यत्** तर्हि **निलयावळिषु** मन्दिरावळिषु **विकटा** श्रेष्ठा दर्शनीया **विटङ्ककृतपत्रिततिः** विटङ्के कपोतपाळिकायां कृता रचिता पत्रिततिः विहङ्गमपङ्क्तिः । 'कपोतपाळिकायां तु विटङ्कं पुन्नपुंसकम्' इत्यमरः । **कृतकेति** कृत्रिमेति **कथञ्चन नो अवैक्ष्यत** । 'लिङ्निमित्ते लृङ् क्रियातिपत्तौ' इति लृङ्[३] । 'स्यतासी लृलुटोः' इति स्यप्रत्ययः । अयं भावः – इह वैकुण्ठे वर्तमानानां विभ्रमतानियमो भ्रान्तिराहित्यं यदि न स्यात् तर्हि विटङ्ककृतपत्रिततिं पश्यतां तेषां कृत्रिमत्वप्रतीतिर्न स्यात् । किन्त्वकृत्रिमा एते पक्षिण इति प्रतीतिर्भवेत् । अस्ति चात्र विभ्रमतानियमः । मुक्तानामज्ञानलेशस्याप्यसम्भवात् । तस्माद् विटङ्ककृतपत्रिततिं दृष्ट्वा कृतकत्वेनैव व्यज्ञासिषुरिति ॥ ११ ॥

(त.चं.) विटङ्कः कपोतानां कृते सौधेषु निविष्टः कृतको नीडविशेषः । तत्र कृता रचिता कृतका कपोतततिः ॥ ११ ॥

विविधस्तुलोपगतचित्रपटी-
सुवितानलम्बिमणिदामगणः ।
शरणान्तरेष्वधिकपूरणतः
प्रचकास्ति विभ्रम इवावगळन् ॥ १२ ॥

---

१. 'विकटा श्रेष्ठा च' इति मुद्रितः पाठः प्रामादिकः । 'विकटं श्रेष्ठे च निर्दिष्टम्' इति हलायुधवचनस्य भागशो हीदमुद्धरणम् ।

२. 'नियमेनाभ्रान्तत्वम्' इति, 'अभ्रान्तत्वनियमः' इति वा पर्याप्तम् ।

३. तथाहि जयादित्यः–'लिङ्निमत्ते भविष्यति काले लृङ् प्रत्ययो भवति क्रियातिपत्तौ सत्याम् । कुतश्चिद् वैगुण्यादनभिनिर्वृत्तिः क्रियायाः क्रियातिपत्तिः । दक्षिणेन चेदायास्यत्, न शकटं पर्याभविष्यत्' [३.३.१३९] इति ।

(प.दी.) **विविध** इति । **विविधः** नानावर्णः । **तुलोपगतचित्रपटीसुविता-नलम्बिमणिदामगणः** मन्दिरान्तस्तुलायां सम्बद्धात् चित्रपटीसुवितानात् चित्रवस्त्रात्मकशोभनवितानाधस्तात् लम्बमानो मणिमालासमूहः **प्रच-कास्ति** शोभते । **शरणान्तरेषु** मन्दिरान्तःप्रदेशेषु **अधिकपूरणतः** अति-पूर्णत्वात् **अवगळन्** स्रवन् **विभ्रम इव** कान्तिरिव ॥ १२ ॥

(त.चं) तुलोपगतः चित्रपटीमयः सुवितानः । गृहदारुबन्धपीठिका तुला । 'तोले'[ತೊಲೆ] इति भाषायाम् । 'तुला सादृश्यमानयोः । गृहाणां दारु-बन्धाय पीठिकायामपीष्यते' इति च । 'चन्द्रोदयो वितानं स्यादुल्लोचः' इति च । 'मेल्कट्टु' [ಮೇಲ್ಕಟ್ಟು] इति भाषायाम् । अवगळन् । गळ अदने स्रवणे च ॥ १२ ॥

विमलाकृतिः प्रकृतिरेव महा-[1]
मणिहेममय्यखिलवस्तुमयी ।
इह सम्भवेत् सकलकान्तिरसः
कथितोऽधिकोक्तिभिरतः कविभिः ॥ १३ ॥

(प.दी.) 'ननु तत्र विश्वविभवैकपदम्–' इत्यादिनोक्तं नासम्भावित-मित्याह– **विमलाकृतिरिति** । इह **विमलाकृतिः** निर्दोषस्वरूपा **प्रकृतिरेव** रमैव [महा]**मणिहेममयी** महामणिहेमात्मिका । किं बहुना? **अखिल-वस्तुमयी** समस्तवस्त्वात्मिका यतः **अतः कविभिः अधिकोक्तिभिः** आपाततः अत्युक्तितया प्रतीयमानैर्वचोभिः **कथितः सकलकान्तिरसः** सर्ववस्तुनिष्ठत्वेनोच्यमानः शोभातिशयः **सम्भवेत्** घटत एव । मणि-हेमाद्यखिलवस्तूनां निर्दोषकान्तिरूपरमात्मकत्वात् नासम्भावितं किमपीति भावः ॥ १३ ॥

(त.चं.) कान्तिरसः कान्तिझरी ॥ १३ ॥

---

१. प्राचीनटीकानुसारेण–'प्रकृतिरेव यतो मणिहेम–' इत्यपि पाठः सम्भाव्यते ।

तदनादिकालमितमुक्तिरतेरगणय्यशम्भुमुखसङ्घततेः ।
नगरैर्महापुरमसंहतिमल्लसति प्रभोरयमहो महिमा ॥ १४ ॥

(प.दी.) तदिति । **अनादिकालम्** । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । अनादिकालतः **इतमुक्तिरतेः** प्राप्तमोक्षसुखायाः **अगणय्यशम्भुमुखसङ्घततेः** आगणितरुद्रादिसमूहपङ्क्तेः **नगरैः असंहतिमत्** सम्बाधरहितं **तत् महापुरं** महानगरं **लसति** । **अयं** अनादितः प्रतिकल्पं मुक्तानामनन्तानां ब्रह्मरुद्रादीनां नगरसमूहैः पूरितेऽपि तस्मिन्नगरे संहत्यभावः **प्रभोः** श्रीमन्नारायणस्य **महिमा** । **अहो** एतदाश्चर्यम् ॥ १४ ॥

(त.चं.) शम्भुमुखा इति शेषमुखाः । यद्वा शम्भुमुखा इति चतुर्मुखमुखाः । 'शम्भुः स्वयम्भूर्द्रुहिणश्चतुर्वक्त्रः प्रजापतिः' इत्यभिधानम् । गणशो हि तत्तत्पदयोग्या देवा भवन्ति ॥ १४ ॥

भवनं विभाति भुवनैकपते-
र्भुवनत्रयाद्भुतगुणातिशयि ।
वरमन्दिरप्रकरमध्यगतं
द्विजमण्डलस्थशशिमण्डलवत् ॥ १५ ॥

(प.दी.) भवनमिति । **भुवनत्रयाद्भुतगुणातिशयि** भुवनत्रयगतसर्वैश्वर्य[1]-गुणातिशयिष्णु **वरमन्दिरप्रकरमध्यगतं भुवनैकपतेः** सर्वलोकनाथस्य हरेः **भवनं** मन्दिरं **विभाति** शोभते । किमिव? **द्विजमण्डलस्थशशिमण्डलवत्** नक्षत्रसमूहमध्यगतचन्द्रमण्डलमिव ॥ १५ ॥

(त.चं.) द्विजमण्डलस्थशशिमण्डलवत् । द्विजमण्डलं नक्षत्रनिवहः । नक्षत्राणि द्विधा जायन्त इति द्विजान्युच्यन्ते । कथं द्विधा? राकायां चन्द्रेण सह दर्शे च चन्द्रेण विनेति । कानिचिद् दोषा जायन्ते, कानिचिदुषसीति

---

१. '–सर्वाश्चर्यगुणातिशयिष्णु' इति पाठः स्वरसः ।

च । अत एव चन्द्रो द्विजराज उच्यते । अथच दन्तवचनोऽयं द्विजशब्दः । भगवद्दन्तजातत्वान्नक्षत्राण्यपि द्विजान्युच्यन्ते । तथाहि भागवते– 'उडुगणा द्विजानि' [२.१.३१] इति ॥ १५ ॥

स्वयमिन्दिरैव पतिमानकरी
गृहकर्म यत्र कुरुते सुतराम् ।
अपि किङ्करीदशशतीमहिता
श्रियमत्र वर्णयति वेश्मनि कः ॥ १६ ॥

(प.दी.) स्वयमिति । **यत्र स्वयमिन्दिरैव पतिमानकरी** स्वभर्तृसम्भावनां कुर्वती सती **इन्दिरा स्वयमेव सुतरां गृहकर्म** सम्मार्जनलेपनादिगृहकृत्यं **कुरुते** । कथम्भूता? **किङ्करीदशशतीमहिताऽपि** किङ्करीणां सहस्रैर्महिताऽपि सम्पूजिताऽपि । एवम्भूते **अत्र वेश्मनि श्रियं** शोभां **को वर्णयति?** वर्णयितुं समर्थो न कोऽपीत्यर्थः ॥ १६ ॥

(त.चं.) स्वयमिन्दिरैव । तथाहि भागवते–'श्रीर्यत्र रूपिण्युरुगायपादयोः करोति मानं बहुधा विभूतिभिः'[२.९.१३] इति । अत्र वेश्मनि गतां सर्वलोकाधिकां श्रियम् ॥ १६ ॥

कमलापतिः कमलयाऽमलया कमनीयया कमललोचनया ।
अमृताहिराजमृदुभोगगतः स्वरतोऽपि तत्र रमते परमः ॥ १७ ॥

(प.दी.) कमलेति । **परमः** सर्वोत्तमः **कमलापतिः स्वरतोऽपि तत्र** उक्तगुणविशिष्टे स्वमन्दिरे **अमृताहिराजमृदुभोगगतः** मुक्तशेषस्य मृदुशरीरात्मकशय्यागतः सन् **अमलया** निर्दोषया **कमनीयया कमललोचनया कमलया रमते** ॥ १७ ॥

(त.चं.) कमलापतिः कमलयाऽमलया । तथाहि भगवत्पादवचनम्– 'अमन्दगुणसारोऽपि मन्दहासेन वीक्षितः । नित्यमिन्दिरयाऽऽनन्दसान्द्रो यो नौमि तं हरिम्' इति ॥ १७ ॥

तरुणप्रभाकरसहस्ररुचं कनकाम्बरं मणिमयाभरणम् ।
हसिताननेन्दुमरविन्ददृशं तमरीन्द्रधारिणमनुस्मरत ॥ १८ ॥

(प.दी.) तरुणेति । तं **अरीन्द्रधारिणं** चक्रधरं **अनुस्मरत** चिन्तयत । कथम्भूतम्? **तरुणप्रभाकरसहस्ररुचम्,** उद्यदादित्यसहस्ररुक्सदृशरुचम्, **कनकाम्बरं** पीताम्बरमित्यर्थः, **मणिमयाभरणं हसिताननेन्दुं** मन्द-स्मितोपेताननचन्द्रम्, **अरविन्ददृशम्** ॥ १८ ॥

(त.चं.) तरुणः प्रभाकरः उद्यन्नादित्यः । सहस्रमित्यनन्तवचनम् । अरीन्द्रः सुदर्शनम् ॥ १८ ॥

गणयेद् रमाऽस्य न गुणानखिलान् चतुराननश्चतुरवागपि नो ।
न वयं सहस्रवदना अपि तानपरोदितानतिवदेम पुनः ॥ १९ ॥

(प.दी.) **गणयेदिति** । **रमा अस्य** भगवतः **गुणानखिलान्** सर्वानपि **न गणयेत्** । सर्वगुणान् गणयितुमशक्तेति भावः । **चतुरवाक्** चतुरवचनः **चतुराननोऽपि** ब्रह्माऽपि **नो गणयेत्** । **सहस्रवदना वयमपि अखिलान् न** गणयामः । **पुनरपि** अथापि **अपरोदितान्** अपरैः **शक्रादिभिरुदितान् तान्** गुणान् **अतिवदेम** इति ॥ १९ ॥

(त.चं.) न वयम् । आत्मनि बहुवचनम् । भागवते चोक्तम्–'नान्तं विदाम्यहममी मुनयः प्रजेशा मायाबलस्य पुरुषस्य कुतोऽपरे ये । गायन् गुणान् दशशतानन आदिदेवः शेषोऽधुनाऽपि समवस्यति नास्य पारम्'[२.७.४१] इत्यादि ॥ १९ ॥

विधयो विहङ्गपतयोऽगणिता
रमणीयुताश्च फणिपेन्द्रमुखाः ।
परयोगभूरिसुखभोगमिता
अवलोक्य तं दधति मोदरसम् ॥ २० ॥

(**प.दी.**) **विधय** इति । **अगणिताः** असङ्ख्याताः **विधयः** ब्रह्माणः, **अगणिताः** **विहङ्गपतयः** गरुडाः, **अगणिताः** **फणिपेन्द्रमुखाः** शेषाद्याः च **रमणीयुताः** सन्तः तं भगवन्तं **अवलोक्य मोदरसं** सन्तोषसारं भगवद्दर्शनाज्ज्ञातमुत्तममानन्दं **दधति** । कीदृशाः? **परयोगभूरिसुखभोगं** मोक्षे पूर्णानन्दानुभवं **इताः** ॥ २० ॥

(**त.चं.**) फणिपः शेषः । इन्द्रो देवराट् । रमणीयुता विधयश्च विहङ्गपतयश्च फणिपेन्द्रमुखाश्च । परेण योगः सायुज्यम् । परे मनोयोगरूपे ध्यानेऽन्तर्हृदि पश्यन्तः पुनश्च बहिरप्यवलोक्य मोदरसं दधतीति च ॥ २० ॥

सचतुर्भुजा वनजपत्रदृशो
वरवेषिणोऽत्र सपिशङ्गपटाः ।
अरुणप्रभाश्च तरुणाभ्ररुचो
विचरन्ति नाथरुचयः पुरुषाः ॥ २१ ॥

(**प.दी.**) **सचतुर्भुजा** इति । **अत्र** भगवल्लोके **नाथरुचयः** नाथस्य सर्वमुक्ताधिपस्य रुगिव रुग् येषां ते तथोक्ताः, भगवत्सारूप्यं प्राप्ता इति भावः, ते मुक्ताः **पुरुषाः विचरन्ति** यथासुखमितस्ततः पर्यटन्ति । कथं नाथरुचित्वं तेषामित्यत उच्यते– **सचतुर्भुजा** इत्यादिना । **सचतुर्भुजाः** चतुर्भिर्भुजैः सहिताः । **वनजपत्रदृशः** । वनजं जलजम् । 'जीवनं भुवनं वनम्' इति जलपर्यायाः । **वरवेषिणः** उत्तमालङ्कारयुक्ताः । **सपिशङ्गपटाः** पीताम्बरवस्त्रसहिताः । **अरुणप्रभाः** केचिदुद्यदादित्यवर्णाः । **तरुणाभ्ररुचश्च** केचिन्नीलमेघश्यामाश्च । एवम्भूतत्वात् तेषां नाथरुचित्वम्, नतु सर्वसाम्यमिति भावः ॥

(**त.चं.**) सचतुर्भुजाः । तथाहि भागवते– 'श्यामावदाताः शतपत्रलोचनाः पिशङ्गवस्त्राः सुरुचः सुपेशसः । सर्वे चतुर्बाहव उन्मिषन्मणिप्रवेकनिष्काभरणाः सुवर्चसः' [२.९.११] इति । 'पिङ्गः पिशङ्ग इत्युक्तः' इत्यभिधानम् ॥

भगवत्समीपमुपयातवतां
प्रमदो न केवलमलब्धतुलः ।
अपि तस्य लोकमतिलोकगुणं
भजतां सुदुर्लभमभूरिशुभैः ॥ २२ ॥

(प.दी.) भगवदिति । केवलं **भगवत्समीपं उपयातवतां** प्राप्तानां **प्रमदः** आनन्दः **अलब्धतुलः**, अलब्धा तुला साम्यं येन सोऽलब्धतुलः, असदृश इत्यर्थः, **न** । न केवलं भगवत्सामीप्यं प्राप्तानामेवाऽनन्दोऽसदृश इत्यर्थः । किन्तु **अतिलोकगुणं** ब्रह्मलोकाद्यन्यलोकगुणमतिक्रम्य वर्तमानं **तस्य** हरेः **लोकं भजतामपि** आनन्दः अलब्धतुलः । एवं 'सचतुर्भुजाः', 'भगवत्समीपम्' इति च श्लोकद्वयेनोक्तानां सारूप्य-सालोक्य-सामीप्य-लक्षणत्रिविधमोक्षिणामप्यानन्दः स्वस्वयोग्यतानुरासेण पूर्णः । 'करकः पूर्णः', 'घटः पूर्णः', पूर्णः शरावः' इतिवदिति भावः । सायुज्यभाजां तु पूर्णानन्दत्वं कैमुत्यन्यायसिद्धम् । कथम्भूतं भगवल्लोकं भजताम्? **अभूरिशुभैः** भूरिशुभवर्जितैः **सुदुर्लभम्** ॥ २२ ॥

(त.चं.) परयोगेति सायुज्यलक्षणा मुक्तिरुक्ता । सचतुर्भुजा इति तदनन्तरा सारूप्यलक्षणा । भगवत्समीपमिति सामीप्यलक्षणा । अपि तस्य लोकमिति सालोक्यलक्षणेति चतुर्विधाऽपि मुक्तिरुक्ता ॥ २२ ॥

न भवन्ति यत्र मृतिजन्मजरास्त्रिविधं भयं किमुत दुःखगणः ।
अपरं च किञ्चिदशुभं न भवेन्न गुणादि तत्प्रभवमूलमपि ॥ २३ ॥

(प.दी.) नेति । यत्र यस्मिन् लोके **मृतिजन्मजराः न भवन्ति, त्रिविधं** आध्यात्मिकमाधिभौतिकमाधिदैविकं चेति त्रिविधं **भयं न** भवति । **दुःखगणः** अन्यो दुःखगणः **न** भवतीति **किमुत** । न भवत्येवेति भावः । **अपरं किञ्चिदशुभं** अमङ्गलं **च न भवेत्** । **तत्प्रभवमूलम्**, तस्य मृतिजन्मादेः प्रभवस्य

उत्पत्तेः कारणभूतं **अपि गुणादि** सत्त्वादिगुणत्रयं वा, आदिशब्देन सङ्गृहीतः कश्चिददृष्टविशेषो वा **न**। मृत्यादेः कारणाभावात् कार्यं मृत्यादिकं च न भवतीति भावः। एवम्भूतं लोकं भजतामिति पूर्वेण सम्बन्धः। यत्र मृति-जन्मजरा न भवन्ति तत्रानन्तसखैः सुखमनुभूयत इत्युत्तरत्र वा ॥ २३ ॥

(त.चं.) दुःखमूलं गुणादि गुणत्रयं लिङ्गशरीरमविद्याकामकर्मादिकं वा ॥

अनुभूयते सुखमनन्तसखैः
सकलैरलम्मतिपदं सततम्।
अपि तारतम्यसहितैः स्वगुरु-
प्रवणैः परस्परमुरुप्रणयैः ॥ २४ ॥

(प.दी) अन्विति। **अनन्तसखैः** अनन्तस्य हरेः सखिभिः **सकलैः** सारूप्यादिचतुर्विधमोक्षिभिः **सततं अलम्मतिपदं** अलमिति बुद्धेर्विषयभूतं **सुखमनुभूयते**। कथम्भूतैः? **तारतम्यसहितैरपि** सुखादिविषये तारतम्ययुक्तैरपि **परस्परं उरुप्रणयैः** उरुस्नेहयुक्तैः, मत्सरवर्जितैरिति भावः। **स्वगुरुप्रवणैः** स्वोत्तमेषु विनयवद्भिः, भक्तिमद्भिरित्यर्थः। 'अन्येऽपि स्वात्मनो मुख्याः क्रमाद् गुरवः ईरिताः' इति वचनात् ॥ २४ ॥

(त.चं.) अनन्तस्य सखायः अनन्तसखाः। 'राजाहःसखिभ्यष्टच्' [५.४.९१] ॥ २४ ॥

अतिसुन्दराः सुरभयः पुरुषा
हरिचन्दनेन नवचन्द्ररुचा।
चलचारुचामरधरानुचरा
विहरन्ति नित्यतरुणा इह ते ॥ २५ ॥

(प.दी.) अतीति। **ते** उक्तलक्षणाः **पुरुषाः** मुक्तपुरुषाः **इह** उक्तलक्षणे भगवल्लोके **विहरन्ति**। कथम्भूताः? **अतिसुन्दराः** अतिसुरूपिणः, **नव-**

चन्द्ररुचा पूर्वपक्षोदितचन्द्रकान्तिवत् कान्तिमता **हरिचन्दनेन** अङ्गराग-भूतेन हरिचन्दनेन **सुरभयः** सुगन्धिनः, **चलचारुचामरधरानुचराः**, चलच्चारु-चामरधारिभिरनुचरैः सेव्यमाना इत्यर्थः, **नित्यतरुणाः** नित्यं युवानः, जरावर्जिता इत्यर्थः ॥ २५ ॥

(त.चं.) हरिचन्दनेन। हरिचन्दनः सुरतरुः। हरिचन्दनस्येदं हरिचन्दनमङ्ग-रागश्चन्दनप्रभेदः। हरेरिन्द्रस्य चन्दनम्, हरिद्वर्णं चन्दनमिति च निर्वदन्ति ॥

सविलासलास्यपरितुष्टदृशो
मृदुगीतवाद्यमुदितश्रवणाः ।
अनुरञ्जयन्ति नवकञ्जदृशो
रमणा अमी स्वरमणीस्तरुणीः ॥ २६ ॥

(प.दी.) **सविलासेति। सविलासलास्यपरितुष्टदृशः**, सविलासस्य विलास-सहितस्य लास्यस्य नृत्तस्य, 'ताण्डवं नटनं लास्यम्' इत्यभिधानात्, दर्शनेन परितुष्टलोचनाः, **मृदुगीतवाद्यमुदितश्रवणाः**, मृदुगीतस्य वाद्यस्य च श्रवणेन मुदितश्रोत्रेन्द्रियाः, **अमी रमणाः**, **नवकञ्जदृशः** नूतनकमललोचनाः **तरुणीः** तरुणवयसि स्थिताः **स्वरमणीः** स्वभार्याः **अनुरञ्जयन्ति**। तदिच्छानुसारि-प्रवृत्त्या स्वेष्वनुरागयुक्ताः कुर्वन्ति ॥ २६ ॥

(त.चं.) अथ नाट्यप्रकारमाह– सविलासलास्यपरितुष्टदृशो मृदुगीतवाद्य-मुदितश्रवणाः । तथाह्यभिधानम्– 'गीतं गानमिति प्रोक्तं वाद्यमातोद्य-मिष्यते । नृत्यं तु ताण्डवं लास्यं त्रितयं नाट्यमुच्यते' इति ॥ २६ ॥

परिणायकानुपवनाभिमुखा-
ननुनिस्सरन्ति हरिणीनयनाः ।
विमलाद् विमानवलयाच्छनकैः
शशिमण्डलादिव रुचो रुचिराः ॥ २७ ॥

(प.दी.) परिणायकानिति । **हरिणीनयनाः** हरिणीनयनवदायतलोचनाः नार्यः **उपवनाभिमुखान्** उपवनं गन्तुमुद्यतान् **परिणायकान्** स्वपतीन् **विमलात्** निर्मलात् **विमानवलयात्** विमानमण्डलात् **शनकैरनुनिस्सरन्ति** । शनकैरिति तासां गतिस्वभावकथनम् । का इव? **शशिमण्डलात् रुचिराः** शोभनाः **रुच इव** कान्तय इव । उद्यच्छशिमण्डलाद् यथा रुचो निर्गच्छन्त्येवं विमानमण्डलान्नार्यो निर्गच्छन्तीति भावः ॥ २७ ॥

(त.चं.) विमलाद् विमानवलयात् । तथाहि भागवते–'प्रवाळवैडूर्यमृणाळवर्चसां परिस्फुरत्कुण्डलमौलिमालिनाम् । भ्राजिष्णुभिर्यः परितो विराजते लसद्विमानावलिभिर्महात्मनाम् । विद्योतमानप्रमदोत्तमाभिः सविद्युदभ्रावलिभिर्यथा नभः'[२.९.१२] इति ॥ २७ ॥

अरुणाश्मवर्णतनवस्तनवः
शुभहारसन्निभरुचोऽप्यपराः ।
हरिनीलनीलरुचयोऽत्र पराः
प्रकटीभवन्ति विविधाभरणाः ॥ २८ ॥

(प.दी.) अरुणेति । **अत्र तनवः** नार्यः **प्रकटीभवन्ति** विमानान्निर्गमनानन्तरं प्रकाशन्ते । कथम्भूताः? काश्चन **अरुणाश्मवर्णतनवः** पद्मरागवर्णसमानवर्णदेहाः । **अपराः** अन्याः **अपि शुभहारसन्निभरुचः** निर्मलहारवत् शुभ्रकान्तयः । **पराः हरिनीलनीलरुचयः** इन्द्रनीलकान्तिवन्नीलकान्तयः । **विविधाभरणाः** सर्वाश्च नानाभरणाः ॥ २८ ॥

(त.चं.) शुभमुक्ताहारसन्निभधवळरुचः । तनवस्तन्वङ्ग्यः ॥ २८ ॥

सुचिरद्युतीर्दधति सूक्ष्मतरं
स्वयमम्बरं च खलु बिभ्रति याः ।
शुकनिःस्वना ध्रुवमिमा अपराः
सुपयोधरा जलधरावलयः ॥ २९ ॥

(भा.प्र.) अन्या असुचिरद्युतीर्विद्युतो दधति, अम्बरं च स्वयं न दधति, किन्त्वम्बरेण धार्यन्ते, दुन्दुभिस्वनाश्चेति । सुपयोधराः सुकुचाः सुजलधराश्च । 'द्व्यष्टवर्षा तु या योषिच्छ्यामा जलधरावलिः' इति । जलधरावलित्वं चात्र गुणतो न कालतः ॥

(प.दी.) सुचिरेति । **सुपयोधराः** सुकुचाः **इमाः जलधरावलयः**, द्व्यष्टवर्षा एता नार्यः **अपराः** जलधरावलिनामभाग्भ्यो मेघजालेभ्योऽन्याः । 'द्व्यष्टवर्षा तु या योषिच्छ्यामा जलधरावलिः' इत्यभिधानाद् द्व्यष्टवर्षा नार्यश्च जलधरावलय इत्युच्यन्ते । मेघावलयश्च जलधरावलय इत्युच्यन्ते । एवं नामसाम्येऽपि इमा नार्यो मेघजालेभ्यो विलक्षणाः । **ध्रुवम्**, नात्र संशयोऽस्ति । कुतः? **याः इमाः** नार्यः **सुचिरद्युतीः** सुचिरकालसम्बन्धिनीः द्युतीः **दधति** वहन्ति । मेघावलयस्त्वचिरद्युतीर्दधति । **याश्च सूक्ष्मतरं अम्बरं** वस्त्रं **स्वयं बिभ्रति खलु** । मेघावलयस्त्वम्बरेण धार्यन्ते । **शुकनिस्वनाः** इमाः शुकस्वनवत् कोमलस्वनाः । मेघावलयो गम्भीरस्वनाः । एवं विरुद्धधर्मत्वादिमा अपरा इति भावः ॥ २९ ॥

(त.चं.) प्रसिद्धजलधरावलिभ्योऽन्याः अथापि सुपयोधरा इति जलधरावलय उच्यन्ते । तदुक्तं भावप्रकाशिकायाम्– 'जलधरावलित्वं चात्र गुणतो न कालतः' इति । कालत इति द्व्यष्टवर्षत्वेन ॥ २९ ॥

समतीतविद्रुमभुवां सुदृशां
पदपल्लवाग्र्यनखरक्तरुचीः ।
परभागतः स्फटिककुट्टिमभूः
प्रकटीकरोति न पुरा प्रकटाः ॥ ३० ॥

(भा.प्र.) परभागो गुणान्तरसम्बन्धात् गुणोत्कर्षः । यथा श्वेतसिचये कौसुम्भतन्तुसन्तत्या ॥

(प.दी.) समतीतेति । **स्फटिककुट्टिमभूः** स्फटिकावनद्धभूमिः **समतीत-**

विद्रुमभुवां समतीतविद्रुममयप्रदेशानां **सुदृशां** शोभनदर्शनानां नारीणां **पदपल्लवाग्रयनखरक्तरुचीः** चरणकिसलयाग्रयाङ्गुलिनखानां रक्तरुचीः **परभागतः** वर्णान्तरसंयोगात् **प्रकटीकरोति** स्पष्टीकरोति । कथम्भूताः? **पुरा** विद्रुमावनद्धस्थलातिक्रमात् पूर्वं **न प्रकटाः** अस्पष्टाः । अयं भावः– विद्रुमस्थलसञ्चारावसरे नखानां विद्रुमस्य च समानकान्तित्वान्नखकान्तिर्विविच्य न ज्ञाता स्फटिकभुवि सञ्चारे पुनर्नखकान्तिरतिस्पष्टाऽभूदिति ॥ ३० ॥

(त.चं.) 'परभागो गुणोत्कर्षः' इत्यभिधानम् । 'यथा श्वेतसिचये कौसुम्भतन्तुसन्तत्या' इति भावप्रकाशिका । कुसुम्भकुसुमरागेण रञ्जितास्तन्तवः श्वेतपटे यथा प्रकटं प्रकाशन्ते । स प्राकट्यरूपो गुणोत्कर्षः परभागः इत्यर्थः । 'कुट्टिमं बद्धभूमिकम्' इति च । 'नेलगट्टु' [ನೆಲಗಟ್ಟು] इति भाषायाम् ॥

हरिणीदृशां निवसनानि बृहत्-
सुनितम्बबिम्बरुचिरोरुरुचा ।
शबळद्युतीनि मदनस्य जग-
ज्जयवैजयन्त्य इति निश्चिनुमः ॥ ३१ ॥

(प.दी.) हरिणीति । **हरिणीदृशां** हरिणीनयनानां **निवसनानि** वस्त्राणि **मदनस्य** कामस्य **जगज्जयवैजयन्त्य इति** त्रिजगज्जयस्य लक्षणभूताः पताका इति **निश्चिनुमः** निश्चयं कुर्मः । 'वैजयन्ती पतकायां जयन्त्यां केशवस्रजि' इत्यभिधानम् । कथम्भूतानि निवसनानि? **बृहत्सुनितम्बबिम्बरुचिरोरुरुचा**, बृहतः शोभनस्य नितम्बमण्डलस्य रुचिरोरुरुचा, रुचिरया भद्रया उरुरुचा उर्व्या कान्त्या **शबळद्युतीनि** मिश्रकान्तीनि । योषिन्नितम्बसम्बन्धान्नितरां शोभमानानीति भावः ॥ ३१ ॥

(त.चं.) बृहत् सुश्लिष्टं नितम्बबिम्बम् । तस्य रुचिरया चेतोहारिण्या उरुकान्त्या शबळद्युतीनि सम्पृक्तकान्तीनि ॥ ३१ ॥

करपल्लवैस्तरळितैर्ललितैरसकृत् क्वणत्कनककङ्कणकैः ।
नवरोमराजिवलिवल्गुमृदुप्रतनूदरैरतिमनाक् तरळैः ॥ ३२ ॥

कुचकुम्भपूर्णतरकान्तिसुधारसशेषबिन्दुविसरच्छविभिः ।
वरहारराजिभिरुतानुपदं परिलोठिताभिरशनैरुरसि ॥ ३३ ॥

अपि लीलया कुवलयोल्लसितैरपरैः करैः सहचरीनिहितैः ।
वदनैः शुचिस्मितकटाक्षरसैश्चलकुण्डलोल्लसितगण्डयुगैः ॥ ३४ ॥

प्रगतासु तासु रणितै रशना-
मणिनूपुरैरिव पुरा गदिताः ।
अनुवीक्षितुं तनुविलासमिमं
तरुणा भवन्त्यथ निवृत्तमुखाः ॥ ३५ ॥

(भा.प्र.) करपल्लवादिभिः प्रगतासु । इत्थम्भूतलक्षणे तृतीया ॥

(प.दी.) **करेति** । 'तरुणा भवन्त्यथ निवृत्तमुखाः' इत्यन्त्यकुळकमेतत् । तत्रेत्थमन्वयभङ्गी– **अथ तासु** विमानान्निर्गतासु नारीषु **प्रगतासु** गच्छन्तीषु सतीषु **तरुणाः** युवानः **निवृत्तमुखाः भवन्ति पुरा** । 'यावत्पुरानिपातयोर्लट्'इति लट् । पुरस्ताद् गच्छन्तो युवानः आवृत्य पश्चाद् ददृशुरिति भावः । कथम्भूताः? **रणितैः** क्वणद्भिः **रशनामणिनूपुरैः** रशनाभिः काञ्चीभिः, 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः, मणिनूपुरैश्च मणिखचितैर्मञ्जीरैश्च, 'मञ्जीरो नूपुरोऽस्त्रियाम्' इत्यमरः, रणद्भिः रशनामणिनूपुरैः **इमं** नृविमोहनं **तनुविलासं अनुवीक्षितुं** द्रष्टुं **गदिता इव** उक्ता इव ॥ * ॥ कथम्भूतासु प्रगतासु? **तरळितैः** चपलैः **ललितैः** कोमलैः **असकृत्** निरन्तरं **क्वणत्कनककङ्कणकैः** रणत्सुवर्णकरभूषणयुक्तैः, 'कङ्कणं करभूषणम्' इत्यमरः, एवम्भूतैः **करपल्लवैः** उपलक्षितासु । एवं सर्वत्रेत्थम्भाव-

लक्षणे तृतीया। **नवरोमराजिवलिवल्गुमृदुप्रतनूदरैः** नवरोमराज्या वलिभिश्च वल्गूनि च भद्राणि च मृदूनि च प्रतनूनि च तान्युदराणीति नवरोमराजिवलिवल्गुत्वं मृदुत्वं प्रतनुत्वं चोदरविशेषणानि । एवम्भूतैरुदरैरुपलक्षितासु । पुनः कथम्भूतैरुदरैः? **अतिमनाक्** अत्यल्पं **तरलैः** चञ्चलैः । पादचारेण गमनावसरे किञ्चिच्चञ्चलैरिति भावः । 'किञ्चिदीषन्मनागल्पे' इत्यमरः ॥ * ॥ **अनुपदं** प्रतिपदं **उरसि अशनैः परिलोठिताभिः** गतिवशाच्चालिताभिः **वरहारराजिभिः उत** उत्तमहारसमूहैश्चोपलक्षितासु । कथम्भूताभिर्हारराजिभिः? **कुचकुम्भपूर्णतरकान्तिसुधारसशेषबिन्दुविसरच्छविभिः,** कुचकुम्भेषु पूर्णतरस्य अतिपूर्णस्य, कान्तिसुधारसस्य कान्त्याख्यसुधाजलस्य यः शेषः, तस्य बिन्दूनां विसरः प्रसारः, तस्य च्छविरिव च्छविर्यासां तास्तथोक्ताः, ताभिः । कुचाख्य[कुम्भपूर्ण]कान्तिसुधाजलस्य बिन्दूनां प्रसरवत् प्रकाशमानाभिरिति भावः ॥ * ॥ **लीलया** विनोदेन **कुवलयोल्लसितैः** क्रीडार्थं गृहीतैः कुवलयैः शोभमानैः दक्षिणकरैः, **सहचरीनिहितैः अपरैः करैः** वामकरैः **अपि** उपलक्षितासु । **चलकुण्डलोल्लसितगण्डयुगैः,** गतिवशाच्चलद्भिः कुण्डलैरुल्लसितानि गण्डयुगानि कपोलयुग्मानि येषां तानि चलकुण्डलोल्लसितगण्डयुगानि, तैः, **शुचिस्मितकटाक्षरसैः वदनैः** उपलक्षितासु तासु प्रगतासु तरुणा निवृत्तमुखा भवन्तीत्यन्वयः ॥३२–३५॥

(त.चं.) करपल्लवैः । 'इत्थम्भूतलक्षणे'[२.३.२१] इति हि तृतीया । कश्चित् प्रकारं प्राप्त इत्थम्भूतः । तस्य लक्षणम् । तत्र तृतीया भवति । तद् यथा– सुकुचाभ्यां तरुणीमपश्यत् । वल्गु चारु ॥ * ॥ बिन्दुविसरः बिन्दुनिकायः । परिलोठिताभिः । लुठ विलोडने । केचित् लुड विलोडने इति पठन्ति। विलोटन इत्यपरे ॥ * ॥ सहचरीभुजाग्रनिहितैः ॥ * ॥ 'अयि पश्येममपूर्वं तनुविलासम्' इति रशनामणिनूपुरैः पुरैव गदिता इव । मणीति देहल्यां दीपः । मणिरशनाभिः । मणिनूपुरैश्च । रशना कटिसूत्रम् । नूपुरं चरणाभरणम् ॥ ३२–३५ ॥

अनुपालिताः स्वदयितैर्दयिताः
कथमप्युपेत्य कुचभारनताः ।
शनकैः पुनस्तदवलम्बबलात्
किल ता विशन्ति परमोपवनम् ॥ ३६ ॥

(भा.प्र.) किल अपरमार्थे ॥

(प.दी.) अन्विति । **स्वदयितैः** स्वभर्तृभिः **अनुपालिताः** प्रतीक्षिताः **कुचभारनताः ताः दयिताः** नार्यः **कथमपि** स्तनजघनभारात् चलितुमशक्ताः सत्यः कथञ्चित् **उपेत्य** स्वपतिसमीपं प्राप्य **पुनः** पश्चात् **तदवलम्बबलात् किल** तदाश्रयबलात् किल **शनकैः परमोपवनं विशन्ति** । **किल** अपरमार्थे । वस्तुतः श्रमादिदोषाभावेऽपि तत्र श्रमादिप्रदर्शनं विडम्बनमेवेति भावः ॥ ३६ ॥

(त.चं.) परमोपवनम् । 'नगरान्नातिदूरेण यः सद्भिरुपरोपितः । तरुषण्डः स आरामस्तथोपवनमुच्यते' इति च ॥ ३६ ॥

हसितप्रसूननिकरोरुभरप्रणमत्सुवर्णमणिसर्वतरून् ।
उपगूहयन्नमृतसिन्धुसखः पवनो न कस्य सुखमेधयति ॥ ३७ ॥

(प.दी.) हसितेति । **हसितप्रसूननिकरोरुभरप्रणमत्सुवर्णमणिसर्वतरून्** विकसितपुष्पसमूहानामुरुभारेण प्रणमतः नम्रभावं भजतः सुवर्णरत्नमयसमस्तवृक्षान् **उपगूहयन्** आश्लिष्यन् । अनेन पवनस्य सौरभ्यमुक्तम् । **अमृतसिन्धुसखः** श्रीविष्णुलोके विद्यमानयोरमृतसमुद्रयोः सखा । अनेन शैत्यमुक्तं भवति । एवंविधः **पवनः कस्य सुखं नैधयति** । सर्वेषामपि सुखमेधयत्येव । तत्र सुधासमुद्रौ स्त इति श्रुतिस्मृतिसिद्धम् । 'अरश्च वै ण्यश्च सुधासमुद्रौ द्वौ' इति च स्मृतिः । 'अरश्च वै ण्यश्चार्णवौ ब्रह्मलोके' इति श्रुतिः ॥ ३७ ॥

(त.चं.) हसितेति। 'उन्मीळितमुन्मिषितं स्मितमुन्निद्रं विजृम्भितं हसितम्। उद्बुद्धं व्याकोचं पुष्पेषु विकासवाचकाः शब्दाः' इति च। सुवर्णमया मणिमयाश्च सर्वेऽपि तरवः ॥ ३७ ॥

[१]वरपारिभद्रकसुकल्पतरुव्रजपारिजातहरिचन्दनवत्।
सहितं समादिपदताननगैः परिभूषयन्ति तदहो ऋतवः ॥ ३८ ॥

(प.दी.) वरेति। **ऋतवः तत्** वनं **परिभूषयन्ति अहो**। कथम्भूतं वनम्? **वरपारिभद्रकसुकल्पतरुव्रजपारिजातहरिचन्दनवत्**, उत्तमपारिभद्राख्यवृक्षैः, शोभनकल्पतरुव्रजैः, पारिजातैः, हरिचन्दनवृक्षैश्च युक्तम्। पुनश्च **समादिपदताननगैः** समिति पदमादिपदं प्रथमपदं येषां ते समादिपदाः, तैः समादिपदैः तानवृक्षैः सहितम्, सन्तानाख्यैर्वृक्षैरिति यावत् ॥ ३८ ॥

(त.चं.) सम्प्रति पञ्चभिर्देवतरुभिः सर्वर्तुसमृद्धिमाह– वरेत्यादि। पारिभद्रक इति मन्दार उच्यते। 'मन्दारः पारिभद्रकः' इत्यभिधानम्। 'मन्दारपारिजातकहरिचन्दनकल्पवृक्षसन्तानाः। पञ्चैते सुरतरवः' इति च। सर्वशुक्लसुमत्वाद् वराः पारिभद्रकाः। तत्क्षणादेवाभीष्टं कल्पयन्तीति शोभनाः कल्पतरवः। पारिभद्रकाणां कल्पवृक्षाणां पारिजातानां हरिचन्दनानां च व्रजैरुपेतम्। समादिपदतानः सन्तानः ॥ ३८ ॥

स्मितमाधवीकुसुमरम्यतरौ
नवचम्पकादिकुसुमोल्लसितौ।

---

१. प्रचलितपाठे 'हसितप्रसून–' [३७] इत्यतः पद्यात् परम्, 'वरपारिभद्रक–' [३८] इत्यतः पूर्वं पद्यमेकमधिकं पठ्यते। तद् यथा–

'उपचारनन्दनमिदं युवनं नियमेन नन्दयति यन्न जनम्।
'परमेव नन्दनमुपेन्द्रवनं सकलं सदा यदभिनन्दयति' ॥

प्राचीनटीकाकारैः कैरपि न परिगृहीतमिति स्फुटं प्रक्षिप्तम्। अर्थास्वारस्याच्च। नहि मोक्षगतमपि वनं सकलं जनमभिनन्दयति। किन्तु सात्त्विकमेव।

मधुमाधवौ मधुपगीर्मधुरौ
मधुजित्प्रियान् प्रमदमानयतः ॥ ३९ ॥

(प.दी.) **स्मितेति** । **स्मितमाधवीकुसुमरम्यतरौ** स्मितैः विकसितैः माधवीपुष्पैः मनोहरौ । **नवचम्पकादिकुसुमोल्लसितौ** नवचम्पकसुमादि-नानाकुसुमैरुल्लसितौ । अत एव **मधुपगीर्मधुरौ** भ्रमरस्वनमनोहरौ **मधु-माधवौ** चैत्रवैशाखौ मासौ **मधुजित्प्रियान्** मधुसूदनभक्तान् मुक्तान् **प्रमदं** सुखं **आनयतः** प्रापयतः । 'चैत्रे चैत्रिको मधुः । वैशाखे माधवो राधः' इत्यमरः ॥ ३९ ॥

(त.चं.) अथ वसन्तमृतुराजं वर्णयति– स्मितमाधवीकुसुमरम्यतरौ । 'अतिमुक्तकमिच्छन्ति वासन्तीं माधवीं लताम्' इति च । 'अदिर्मुत्ते' [ಅದಿಮುರ್ತ್ತೆ] इति भाषायाम् । 'चैत्रादिमासौ मधुमाधवौ द्वौ' इति च । प्रमदं हर्षम् । 'प्रमदसम्मदौ हर्षे'[३.३.६८] इति पाणिनिः । अन्यत्र तु प्रमादः, सम्मादः ॥ ३९ ॥

नवमल्लिकास्रजमभीष्टतमः
शुचिसम्भवां प्रणयिनीशिरसि ।
कलयन् स्वयं न कुशलेति किल
प्रतिघट्टयत्युरुकुचावुरसा ॥ ४० ॥

(प.दी.) **नवेति** । **अभीष्टतमः** पतिः **शुचिसम्भवां** ज्येष्ठमाससम्भवाम्, 'ज्येष्ठे[१] शुक्रः शुचिस्त्वयम्' इत्यमरः । **नवमल्लिकास्रजं** नूतनमल्लिकामालां **न कुशलेति** त्वं शिरसि सम्यङ् मालां बद्धुं न जानासीत्युक्त्वा **किल** **स्वयं** **प्रणयिनीशिरसि**, प्रणयोऽस्या अस्तीति प्रणयिनी, तस्याः शिरसि, **कलयन्**

---

१. शुक्रशुची ज्येष्ठाषाढौ । शुचिसम्भवामाषाढमाससम्भवामिति वक्तव्यम् । 'ज्येष्ठः शुक्रः शुचिस्त्वयम्' इत्यमरवचनेऽपि शुचिपदमुत्तरान्वयि । 'त्वन्ताथादि न पूर्वभाक्' इति तद्वचनादेव ।

बध्नन् **उरसा** निजवक्षसा, 'उरस्तु वक्षसि ज्येष्ठे' इत्यभिधानम्, **उरुकुचौ** तस्या उरुस्तनौ **प्रतिघट्टयति** दृढं ताडयति। अयं भावः– नवमल्लिकामालां कबर्यां बद्धुमुद्यतां रमणीं प्रेक्ष्य रमणः 'त्वं न जानासि' इत्युक्त्वा स्रजमादाय तस्या अभिमुखं स्थित्वा स्वयं तत्कबर्यां बाहुभ्यामबध्नात्। तद्व्याजेनोरसोरुकुचौ प्रतिघट्टयतीति ॥ ४० ॥

(त.चं.) अथ ग्रीष्मं वर्णयति– नवमल्लिकास्रजम्। अत्र शुचिरिति नाऽषाढ उच्यते। नापि ज्येष्ठः। किन्तु ग्रीष्म उच्यते। ऋतुवर्णनप्रस्तावात्। 'शुचिर्ग्रीष्माग्निशृङ्गारेषु' इति चाभिदधति ॥ ४० ॥

मधुरस्वरास्ततपतत्रतति-
प्रकटान्तपङ्क्तिधृतनेत्ररुचः।
शिखिनोऽनुयान्ति हि सहस्रदृशं
जलदर्तुलक्ष्मनिजनृत्तमहे ॥ ४१ ॥

(प.दी.) मधुरेति। **मधुरस्वराः** मधुरकेकायुक्ताः **ततपतत्रततिप्रकटान्तपङ्क्तिधृतनेत्ररुचः**, ततानां विस्तृतानां पतत्रततीनां बर्हसमूहानां प्रकटान्तपङ्क्तिषु धृतनेत्ररुचः धृतनयनकान्तयः **शिखिनः** मयूराः **जलदर्तुलक्ष्मनिजनृत्तमहे** वर्षर्तुलक्षणभूतनिजनृत्तोत्सवे **सहस्रदृशं** इन्द्रं **अनुयान्ति हि** अनुकुर्वन्ति हि। वर्षाकाले मेघध्वनिं श्रुत्वा नृत्यन्ति मयूरा इति प्रसिद्धम्। नृत्तसमये च बर्हाणां विस्तृतत्वात् तदग्रेषु नयनसदृशानि बहूनि वर्तुलानि प्रकटीभवन्ति। तैः सहस्रदृशमिन्द्रमनुयान्तीति भावः ॥ ४१ ॥

(त.चं.) अथ वर्षर्तुः– मधुरस्वराः। 'उत्सवः स्यान्महः क्षणः' इति च ॥

शरदोल्लसत्कुवलयेक्षणया
विकचारविन्दरुचिराननया।

प्रियया च शोभनशुकस्वनया[१]
रमते जनो मुखरहंसकया ॥ ४२ ॥

(भा.चं.) कुवलयवदीक्षणम्, अरविन्दवद् रुचिराननम्, शुकवच्छोभनस्वरः, हंसकं चरणाभरणं प्रियायाः। शरदस्तु कुवलयमेवेक्षणम्, अरविन्दमेव रुचिराननम्, शोभनशुकस्वर एव स्वरः, मुखराः श्वेतच्छदाः॥

(प.दी.) **शरदेति**। **जनः** मुक्तजनः **शरदा प्रियया च रमते**। कथम्भूतया शरदा प्रियया च? **उल्लसत्कुवलयेक्षणया,** उल्लसत् कुवलयमेवेक्षणं यस्याः शरदः सा तथोक्ता तया। प्रिया चोल्लसत्कुवलयनिभेक्षणा। **विकचारविन्द-रुचिराननया**। विकसितान्यरविन्दान्येव रुचिराननं[२] यस्याः सा तथोक्ता तया। विकसितारविन्दवद् रुचिरानना चान्या। **शोभनशुकस्वनया**। शोभनशुकस्वन एव स्वनः शरदः। प्रियायाश्च शोभनशुकस्वनवत् स्वनः। **मुखरहंसकया** कूजद्धंसयुक्तया। प्रिया च क्वणत्पादकटकयुक्ता। 'हंसकः पादकटकः' इत्यमरः॥ ४२ ॥

(त.चं.) अथ शरदृतुः– शरदा। विकचमरविन्दमेव रुचिराननं यस्याः सा शरत्। विकचारविन्दमिव रुचिरमाननं यस्याः सा प्रिया। मुखराः हंसा यत्र सा मुखरहंसका शरत्। मुखरं हंसकं यस्याः सा मुखरहंसका प्रिया। 'मञ्जीरं हंसकं स्त्रीणां चरणाभरणं स्मृतम्' इति च। मुखरतया हंस इवेदमिति हंसकम्। 'इवे प्रतिकृतौ' [५.३.९६]। प्रतिकृतिः प्रतिरूपकम्। तद् यथा– अश्व इवायमश्वप्रतिकृतिरश्वकः॥ ४२ ॥

अभिनन्दयन् हिमऋतुं सुसखा
स्फटिकाचलच्छलहिमाधिकृतम्।

१.भावप्रकाशिकानुसारेण 'शोभनशुकस्वरया' इत्येव पाठ इति भाति।
२.'रुचिरमुखम्' इति पाठान्तरम्।

फलिनीकुलं कुसुमयञ्छिशिरो
हसतीव फुल्लनवकुन्दरुचा ॥ ४३ ॥

(भा.चं.) हिमऋतुः, 'ऋत्यकः' इति प्रकृतिभावः। सुसखा, 'राजाहःसखिभ्यष्टच्' इति टचो 'न पूजनात्' इत्यपवादः॥

(प.दी.) अभीति । **फलिनीकुलम्,** फलिनीति कश्चन गुल्मविशेषः[१] । तत्समूहं **कुसुमयन्** पुष्पितं कुर्वन् **शिशिरः** शिशिरर्तुः **फुल्लनवकुन्दरुचा** विकसितनूतनकुन्दकुसुमकान्त्या **हसतीव** । कुन्दकुसुमानां धवळत्वात् हासोऽपि धवळ इति कविसमयत्वात् धवळकुन्दकुसुमविकासं दृष्ट्वा हास इत्युत्प्रेक्षेति भावः । कथम्भूतः? **स्फटिकाचलच्छलहिमाधिकृतम्** स्फटिकपर्वतवत् प्रतीयमानहिमेनाधिकृतं व्याप्तं **हिमऋतुं अभिनन्दयन् सुसखा** । तस्य हिमर्तोरिति शेषः । हिमऋतुम् इत्यत्र 'ऋत्यकः' इति प्रकृतिभावाद् गुणो न भवति। सुसखा इत्यत्रापि 'राजाहःसखिभ्यष्टच्' इति टच्प्रत्ययस्य 'न पूजनात्' इत्यपवादः ॥ ४३ ॥

(त.चं.) 'पञ्चर्तवः' इति श्रुतिसमयमनुसरन् हेमन्तशिशिरावेकीकृत्य वर्णयति हिमर्तुत्वाविशेषात्– अभिनन्दयन् हिमऋतुम् । शिशिरः सुसखा सन् हिमऋतुं हेमन्तमभिनन्दयन् । 'ऋत्यकः' [६.१.१२८] । हिमऋतुः । सप्तऋषयः । 'न पूजनात्'[५.४.३९] सुसखा । सुराजा । 'प्रियङ्गुः फलिनी श्यामा' इति च । कुन्दं माघमासभवम् ॥ ४३ ॥

हिमशीतवर्षपरितापपुर-
स्सरदोषमूलमिह नर्तुगणः ।
प्रियमेव साधयति नित्यमहो
स विमुक्तिमानिति विमुक्तिमताम् ॥ ४४ ॥

---

१. ''गज्जगे' इति प्रसिद्धः कश्चन गुल्मविशेषः'– इति विश्वपतितीर्थाः ।

(प.दी.) **हिमे**ति। इह भगवल्लोके **ऋतुगणः** ऋतुसमूहः **हिमशीतवर्ष-परितापपुरःसरदोषमूलम्,** हिमं तुषारः, 'तुषारस्तुहिनं हिमम्' इत्यमरः, हिमादिदोषकारणभूतं **न** भवति । किन्तु **विमुक्तिमतां नित्यं प्रियमेव साधयति इति** अस्माद्धेतोः **सः** ऋतुगणः **विमुक्तिमान्** मोक्षवान् । निर्दोषत्वादिति भावः । **अहो** एवमाश्चर्यवानयं मोक्ष इति भावः ॥ ४४ ॥

(त.चं.) ऋतुगण इत्यभिमानिविवक्षयेत्याह– स विमुक्तिमानिति वि-मुक्तिमताम् । विमुक्तिमान् ऋतुमानिगण इति उक्तरीत्या विमुक्तिमतां सुखमेव साधयति ॥ ४४ ॥

अमृतस्रगुत्तमफलप्रसवा-
नमृताय तत्र जनताऽर्पयति ।
उपभोक्तुमप्यविधिबन्धवशा
प्रकृतिं प्रयाति सकलोऽपि सदा ॥ ४५ ॥

(प.दी.) **अमृते**ति। तत्र वैकुण्ठे **जनता** जनसमूहः **अविधिबन्धवशाऽपि** एवं कार्यमिति श्रौतस्मार्तविधिनामकबन्धस्य वशेऽवर्तमानाऽपि **उपभोक्तुं** आत्मन उपभोगाय **अमृतस्रगुत्तमफलप्रसवान्,** अमृतं च स्रजो मालाश्च उत्तमफलानि च प्रसवान् पुष्पाणि च, **अमृताय** नित्यमुक्ताय **अर्पयति** समर्पयति । अमृतादिकं सर्वमपि हरये समर्प्योपभुङ्क्ते इत्यर्थः । तस्यास्त-दुपपन्नमेव । तथाहि– **सकलोऽपि** जनः **सदा प्रकृतिं** स्वभावं **प्रयाति** अनुवर्तते । भगवति सर्वसमर्पणस्य तत्स्वभावत्वादद्यापि तथा वर्तत इति भावः ॥ ४५ ॥

(त.चं.) अमृतान् मुक्तान् स्रगादीन् । अमृताय हरये ॥ ४५ ॥

प्रमदातिरेकमुपयातवता
प्रमदागणेन चरतोपवने ।

उपगीयते स्म मधुरं मधुजि-
च्चरितं सकान्ततितिना सततम् ॥ ४६ ॥

(प.दी.) **प्रमदेति** । **प्रमदातिरेकं** सुखाधिक्यं **उपयातवता** प्राप्तवता **उपवने चरता सकान्ततितिना** कान्ततितिसहितेन, स्वस्वभर्तृसहितेनेति यावत्, **प्रमदागणेन सततं** निरन्तरं **मधुजिच्चरितं मधुरं** श्रोत्रसुखं यथा भवति तथा **उपगीयते स्म** ॥ ४६ ॥

(त.चं.) प्रमदागणेन । 'प्रमदा रमणी नितम्बिनी वनिता' इति ॥

ललना ललन्त्यभिवरं प्रवरा
ललिता लुनन्ति कुसुमानि पराः ।
इतराः स्रजो विरचयन्ति पती-
ननुरञ्जयन्ति न हि काश्चन नो ॥ ४७ ॥

(प.दी.) **ललना** इति । **प्रवराः** उत्तमाः **ललनाः** नार्यः **अभिवरं** स्वस्वभर्त्राभिमुख्येन **ललन्ति** नृत्यन्ति । **ललिताः** अतिकोमलाः **पराः** अन्याः **कुसुमानि लुनन्ति** । 'लूञ् छेदने' इति धातुः । **इतराः स्रजो विरचयन्ति** । एवं **काश्चन पतीन् नो अनुरञ्जयन्ति** इति **न हि** । सर्वाश्च तत्तत्सेवया पतीन् सुखयन्त्येव ॥ ४७ ॥

(त.चं.) ललना ललन्ति । लल विलासे । वैयाकरणास्तु लड विलास इति पठित्वा लडयोरभेदाल्ललन्तीति रूपं निर्वाहयन्ति ॥ ४७ ॥

वनलीलया विविधया मुदिता-
स्तरुणा घनस्तननतास्तरुणीः ।
सुलतालयेषु परिरभ्य रतिं
वदनारविन्दमधुपा दधति ॥ ४८ ॥

(प.दी.) वनेति । **विविधया** नानाविधया **वनलीलया** वनक्रीडया **मुदिताः** सन्तुष्टाः **तरुणाः** युवानः **सुलतालयेषु** शोभनलतागृहेषु **घनस्तननताः** निबिड-कुचभारनताः **तरुणीः परिरभ्य** रतिं रतिक्रीडां **दधति** कुर्वन्ति । कथम्भूताः? **वदनारविन्दमधुपाः** वदनसरसिजमधुपाननिरताः ॥ ४८ ॥

(त.चं.) सुलतालयेष्वेव सुरतालयेषु । दधति विदधति ॥ ४८ ॥

रसिकाः सुधाप्सु सरसीषु ततो
रुतनूपरानुकृतसारसिकाः[१] ।
विहरन्ति साकमवगाह्य धवै-
र्जलमड्डुकोत्सवहसद्वदनाः ॥ ४९ ॥

(प.दी.) **रसिका** इति । **रसिकाः** विलासिन्यः **ततः** रतिक्रीडानन्तरं **रुतनूपुरानुकृतसारसिकाः** । क्वणद्भिश्चरणभूषणैरनुकृतसारसाख्यविहग-विशेषाः । 'सारसा जलकुक्कुटाः' इत्यभिधानम् । **धवैः** पतिभिः **साकं** **सुधाप्सु** सुधात्मकजलासु **सरसीषु** । 'कासारः सरसी सरः' इत्यमरः । **अवगाह्य** अवतीर्य **विहरन्ति** । कथम्भूताः? **जलमड्डुकोत्सवहसद्वदनाः** जल-मर्दळताडनोत्सवेन हसन्मुखाः ॥ ४९ ॥

(त.चं.) ननु कथं 'सुधाप्सु सरसीषु'? 'ऋक्पूरब्धूःपथामानक्षे' [५.४.७४] इत्यबन्तस्य समासस्य अकारे प्रत्यये सुधामय्य आपो यासु तासु सुधापासु इति भाव्यम् । ननु भोस्तर्हि शुच्यपानि तटाकानीति भाव्यम् । कथमथ 'शुच्यम्पि तटाकानि' इति प्रयोगः? अतः प्रयोगशरणा वैयाकरणाः समासान्तं विधिमनियतमभ्युपयन्ति । सारसस्य स्त्री सारसिका । ताळबद्धं परस्परं जलोत्क्षेपः जलमड्डुकोत्सवः । मड्डुकस्ताळवाद्यभेदः ॥ ४९ ॥

विविधा विधाय विहृतीः सलिले विकटेषु विद्रुमतटेषु गताः ।
सुरभिं सुवर्णमथ वर्णकमाददते सखीकरगतं महिळाः ॥ ५० ॥

---

१. '–सारसकाः' इति सर्वत्र प्रचुरः पाठः । व्याख्यास्वपि ।

(प.दी.) **विविधा** इति । **महिळाः** नार्यः **सलिले विविधाः विहृतीः** क्रीडाः **विधाय अथ** जलविहारानन्तरं **विकटेषु** श्रेष्ठेषु **विद्रुमतटेषु** विद्रुमरत्नावनद्धेषु तीरेषु **गताः** स्थिताः **सखीकरगतं सुरभिं** शोभनपरिमळाढ्यं **सुवर्णं** शोभनवर्णयुक्तं **वर्णकं** अङ्गरागं **आददते** प्रतिगृह्णन्ति ॥ ५० ॥

(त.चं.) विकटेषु विशालेषु, श्रेष्ठेषु वा । 'विशालं विकटं तथा' इति, 'विकटं श्रेष्ठेऽपि निर्दिष्टम्' इति च । वर्णकं चन्दनादिरङ्गरागः, विलेपनसाधनी वर्तिर्वा । 'वर्णकश्चारणेऽस्त्री तु चन्दने च विलेपने' इति च ॥ ५० ॥

जघनांशुकैरवयवाभरणैः
कुचकुङ्कुमैश्च कचमाल्यवरैः ।
नयनाञ्जनैरपि मिथोऽब्जदृशां
घटितैरलङ्कृतिरलं क्रियते ॥ ५१ ॥

(प.दी.) जघनेति । **मिथः** परस्परं **घटितैः** सम्बद्धैः **अब्जदृशां** पद्मलोचनानामबलानां **जघनांशुकैः** जघनैरंशुकैरम्बरैश्च, **अवयवाभरणैः** अवयवैस्तत्तदाभरणैश्च, **कुचकुङ्कुमैश्च** कुचैः कुङ्कुमैश्च, **कचमाल्यवरैः** केशबन्धैर्माल्यप्रवरैश्च, **नयनाञ्जनैः** नयनैरञ्जनैः **अपि अलं** सम्यक् **अलङ्कृतिः** अलङ्कारः **क्रियते** । जघनादिसम्बन्धादंशुकादीनामंशुकादिसम्बन्धाज्जघनादीनामेवं मिथोऽलङ्कारोऽभूदिति भावः ॥ ५१ ॥

(त.चं.) आभरणस्याप्याभरणं तदवयवा इति ॥ ५१ ॥

तनुमध्यमा निजगृहाणि गताः
सममात्मनामसुसमैरसमैः ।
अमृतं पिबन्त्यसुलभं भविभि-
श्चषकैर्महारजतरत्नमयैः ॥ ५२ ॥

(प.दी.) तन्विति । **निजगृहाणि गताः तनुमध्यमाः** कृशमध्यमा नार्यः

असमैः स्वापेक्षयोत्तमैः, भार्यापेक्षया भर्तुरुत्तमत्वादिति भावः, **आत्मनां असुसमैः** पतिभिः **समं महारजतरत्नमयैः चषकैः** पानपात्रैः **भविभिः** संसारिभिः **असुलभं अमृतं पिबन्ति** ॥ ५२ ॥

(त.चं.) महारजतरत्नमयैः । महारजतं कनकम् । कनकमयैर्मणिमयैश्च चषकैः । 'चषकोऽस्त्री सुरापात्रे' इति ॥ ५२ ॥

मृदुकम्रशय्यमनुरागवतां
मणिमञ्चमञ्चितदृशोऽवसरे ।
अपि चोदिता अधिरुहन्ति शनै-
र्विनयो हि भूषयति सर्वरसम् ॥ ५३ ॥

(प.दी.) मृद्विति । **अञ्चितदृशः** शोभनलोचना नार्यः **अनुरागवतां** भर्तॄणां **मृदुकम्रशय्यं** मृदुमनोहरशय्योपेतं **मणिमञ्चं** मणिमयं मञ्चं **अवसरेऽपि** रतिक्रीडार्थं मञ्चारोहणावसरे प्राप्ते सत्यपि **चोदिताः** मञ्चारोहणाय स्वरमणैः प्रेरिताः सत्यः **शनैरधिरुहन्ति** । **शनैः** इति विनयो दर्शितः । स च सर्वगुणाधिक इत्याह– **विनयः सर्वरसं भूषयति हि** । शृङ्गारादिसर्वरसानां विनय एव भूषणमिति भावः ॥ ५३ ॥

(त.चं.) क्रीडावसरे भर्तृभिश्चोदिता अपि ॥ ५३ ॥

अभिकान्तमुन्नमितकान्तकुचा
किल बध्नती सकुसुमां कबरीम् ।
सुमुखी सुलक्ष्यभुजमूलवलिः
परिरभ्यते प्रणयिनाऽतिरसात् ॥ ५४ ॥

(प.दी.) अभीति । **अभिकान्तं** कान्ताभिमुख्येन स्थिता **उन्नमितकान्तकुचा सकुसुमां** सपुष्पां **कबरीं** केशपाशं **बध्नती किल** । किलेत्यपरमार्थे । पुष्पैः कबरीबन्धनव्याजेन अभिकान्तं कुचोन्नमनं भुजमूलवलिप्रदर्शनं च

गूढाभिप्राय इति भावः । **सुलक्ष्यभुजमूलवलिः** भुजाभ्यां स्वकबरीबन्धनसमये स्फुटतया परिदृश्यमानकक्षमूलरेखावती । एवम्भूता **सुमुखी प्रणयिना** पत्या **अतिरसात्** अतिरागात् **परिरभ्यते** ॥ ५४ ॥

(त.चं.) अतिरसात् अनुरागभरात् ॥ ५४ ॥

पृथुवृत्ततुङ्गकठिनोरसिज-
द्वयवारितायतनिजान्तरयोः ।
भुजयोर्युगेन रमणो रमणीं
परिरभ्य कोऽत्र रमयेन्न सुखी ॥ ५५ ॥

(प.दी.) पृथ्विति । अत्र भगवल्लोके **सुखी रमणः कः रमणीं** भार्यां **न रमयेत्**? सर्वोऽपि रमयत्येव । किं कृत्वा? **पृथुवृत्ततुङ्गकठिनोरसिजद्वयवारितायतनिजान्तरयोः** । स्थूलवृत्तोन्नतकठिनस्तनद्वयेन वारितं पूरितमायतं निजान्तरं निजमध्यं ययोस्तयोः **भुजयोः युगेन परिरभ्य** । ययोर्भुजयोरायतमन्तरं तन्मध्यं वक्षः पृथुवृत्ततुङ्गकठिनस्तनद्वयेन पूरितं ताभ्यां भुजाभ्यां परिरभ्य रमयतीति भावः ॥ ५५ ॥

(त.चं.) पृथु बृहत् । 'बृहदुरु गुरु विस्तीर्णं पुरु पृथु पृथुलं महद् विशालं च' इति च ॥ ५५ ॥

स्मितफुल्लमुल्लसितझिल्लि लस-
न्मणिकुण्डलं मृदुकटाक्षपटु ।
निभृतो निरीक्ष्य सुचिरं सुतनोः
प्रतिचुम्बति प्रियतमो वदनम् ॥ ५६ ॥

(प.दी.) **स्मितेति** । **प्रियतमः** पतिः **स्मितफुल्लं** स्मितेन विकसितं **उल्लसितझिल्लि** उल्लसितगण्डस्थलयुक्तं **लसन्मणिकुण्डलं मृदुकटाक्षपटु** कोमला-

पाङ्गचतुरं **सुतनोः** प्रियायाः **वदनं निभृतः** एकाग्रचित्तः सन् **सुचिरं निरीक्ष्य प्रतिचुम्बति** ॥५६॥

(त.चं.) प्रियतमया चुम्बितः प्रतिचुम्बति । उल्लसितझिल्लि । छिल्ल झिल्ल अदने कम्पने वा । झिल्लति अत्ति कामिनः, कम्पयति वा तेषां मन इति झिल्ली कपोल उच्यते ॥ ५६ ॥

नतमुन्नमय्य मुखचन्द्रमसं परिरम्भसम्भृतमुदा सुदृशः ।
उपरम्यते न तरुणेन चिरं मधुराधरामृतरसं पिबता[1] ॥ ५७ ॥

(प.दी.) नतमिति । **सुदृशः** शुभलोचनायाः **परिरम्भसम्भृतमुदा** परिरम्भेण सम्पूर्णसन्तोषेण **तरुणेन नतं** ह्रियाऽवनतं **मुखचन्द्रमसं उन्नमय्य** उद्धृत्य **मधुराधरामृतरसं पिबता** सता **चिरं नोपरम्यते** ॥ ५७ ॥

(त.चं.) सम्भृतया मुदा वा । सम्भृतमुदा वा तरुणेन ॥ ५७ ॥

रभसाऽवपातितपृथूरसिजः
परिरभ्य तत्क्षणवियातततरः ।
मणितादिसौरतवितानपटू
रमयत्यमून् युवतिसङ्घ उत ॥ ५८ ॥

(प.दी.) रभसेति । **रभसा** सम्भ्रमेण **अवपातितपृथूरसिजः** अवनामितबृहत्कुचः **तत्क्षणवियातततरः** तस्मिन् क्षणेऽतिधृष्टः । 'वियातो धृष्टः' इत्यभिधानम् । रतिक्रीडाकालेऽतिधृष्ट इत्यर्थः । 'पराक्रमः परिभवे वैयात्यं

---

१. 'नतमुन्नमय्य–' [५७] इत्यतः परम्, 'रभसावपातित –' [५८] इत्यतः पूर्वं प्रचलितपाठे पद्यमेकमधिकं पठ्यते । तद् यथा–

'सुरतोत्सवोत्सुकतया त्वरयन् करपल्लवं निवसनग्रहणे ।
'कररुद्धमायतदृशः सहसा त्वरयत्यथ द्विगुणमिष्टतमः' ॥

न कैरपि प्राचीनटीकाकारैर्व्याख्यातमेतत् । नमस्कुर्मः प्रक्षेपकाणां चापलाय ।

सुरतेष्वपि' इत्युक्तत्वात् सुरतवैयात्यं गुण एव हि। **मणितादिसौरतवितान-पटुः**। मणितमिति रतिकाले कण्ठजन्यध्वनिविशेषः। 'मणितं रतिकूजितम्' इत्यमरः। मणितादेः सौरतस्य सुरतसम्बन्धिव्यापारस्य विताने विस्तारे पटुश्चतुरः। एवम्भूतः **युवतिसङ्घः उत** युवतिसङ्घोऽपि **अमून्** रमणान् **[परिरभ्य] रमयति**। अनेन रमणीकर्तृकमुपरिरतं वेदितव्यम् ॥ ५८ ॥

(त.चं.) अथ पुरुषायितमाह– **रभसे**ति। रभसा रभसेन वा। 'रभसो वेग-हर्षयोः' इति। अचिन्तितोदर्का कार्यत्वरा राभस्यम् ॥ ५८ ॥

अतिलौकिकान् रमयतो रमणान्
रमयन्त्यलौकिकगुणा ललनाः।
अनुरूपरूपमतिलोकसुखं
तदलौकिकं निधुवनं लसति ॥ ५९ ॥

(प.दी.) अतीति। **अलौकिकगुणाः** इतरलोकगुणेभ्यो विलक्षणगुणाः **ललनाः** नार्यः **अतिलौकिकान्** इतरलोकेषु वर्तमानान् पुरुषानतिक्रम्य वर्तमानान् **रमयतः** आत्मानं रमयतः **रमणान्** पतीन् **रमयन्ति**। **अनुरूप-रूपं** परस्परमनुकूलस्वरूपं **अतिलोकसुखं** अन्यलोकसुखमतिक्रम्य वर्त-मानसुखोपेतं **अलौकिकं** स्वयं च लोकविलक्षणं **तत् निधुवनं** रतिक्रीडा **लसति** शोभते ॥ ५९ ॥

(त.चं.) 'संवेशनं निधुवनं सम्प्रयोगो रहोरतिः। सुरतं मोहनं प्रोक्तं मणितं रतिकूजितम्' इति च ॥ ५९ ॥

न रतिः श्रमादिखचिता नियमाद्
विरहव्यथाऽपि न वधूवरयोः।
प्रतिकामिनीप्रणयतः कलहो
न समस्ति दोषरहिते हि पदे ॥ ६० ॥

(प.दी.) अलौकिकत्वमेव स्पष्टयति– **नेति** । **दोषरहिते** सर्वदोषरहिते **पदे** स्थाने भगवल्लोके **रतिः श्रमादिखचिता** श्रमेण आदिपदात् तज्जन्य-स्वेदेन देहाशुद्ध्यादिना **खचिता न** सम्बद्धा न । तच्च **नियमात्** एव । तत्र रतेः श्रमादिखचितत्वाभावो नियमादेवेति भावः । **वधूवरयोः** दम्पत्योः **विरहव्यथाऽपि** परस्परवियोगनिमित्तः क्लेशोऽपि **न** । **प्रतिकामिनीप्रणयतः** पत्युः सपत्नीपक्षपातात् **कलहः** 'पतिः सपत्नीप्रणयवान् वर्तते' इति कोपेन प्रेमकलहोऽपि **न समस्ति** न सम्भवति । एवमुक्तदोषराहित्यमेव कारणम् । **हि** इति तस्य दोषराहित्यं श्रुत्यादिप्रसिद्धमित्याह ॥ ६० ॥

(त.चं.) श्रमादिखचिता श्रमस्वेदादिसम्पृक्ता । सा प्रतिकामिनी भवति याऽऽत्मनः प्रतिकूलाऽप्यात्मानं प्रतिनिधत्ते ॥ ६० ॥

सुखसंविदात्मकतया वपुषां
सुरभित्वमेव बहिरन्तरपि ।
हरिधाम्नि दम्पतिगणस्य ततो
ननु मान्यतेऽपि मुनिभिः सुरतम् ॥ ६१ ॥

(प.दी.) सुखेति । **हरिधाम्नि दम्पतिगणस्य वपुषां बहिरन्तरपि सुरभित्वमेव** । कुतः? **सुखसंविदात्मकतया** देहानां सुखज्ञानात्मकत्वात् । अप्राकृतत्वादिति भावः । **ततो ननु** तस्माद्धि **सुरतं** मुक्तसुरतं **मुनिभिरपि मान्यते** श्लाघ्यते ॥ ६१ ॥

(त.चं.) नहि सुरतत्वेन सुरतं निन्द्यते । किन्तु देहस्य मनसश्च मालिन्यहेतुः भगवत्प्रवणताप्रतिकूलमेव सुरतं निन्द्यत इत्याह– सुखसंविदात्मकतया । श्रुतिरप्यनुमनुते हि– 'रममाणः स्त्रीभिर्वा यानैर्वा' इति ॥ ६१ ॥

शृणुताप्यलोकविषयं विषयं
सकलस्य मुक्तनिकरस्य दशाम् ।

वपुरिन्दिरापतिरमन्दरसं
ननु सुन्दरं प्रकटयत्यनिशम् ॥ ६२ ॥

मणिराजिराजितमहामकुटं
शितिकान्तकुन्तळसहस्रत्रयम् ।
अळिकार्धचन्द्रविलसत्तिलकं
श्रवणोल्लसन्मकरकुण्डलयुक् ॥ ६३ ॥

परिपूर्णचन्द्रपरिहासिमुखं
जलजायताक्षमरुणोष्ठपुटम् ।
हसितावलोकलळितैरतुलै-
रभिनन्दयत् प्रणतमात्मजनम् ॥ ६४ ॥

नवकम्बुकण्ठमहिमांशुमहोमहिमोपलेन्द्रवरहारधरम् ।
रमणीयरत्नगणविद्धलसद्वलयाङ्गुलीयकवराङ्गदवत् ॥ ६५ ॥

रविचक्ररुक्प्रकरचक्रकरं विधुबिम्बकम्बु मधुराम्बुरुहम् ।
ज्वलनज्वलद्गदमुदारधनुः पृथुवृत्तहस्तमतिताम्रतळम् ॥ ६६ ॥

वरपीवरांसमधिराजदुरोमणिमण्डपाग्र्यविलसत्कमलम् ।
सजगद्विसप्तकतनूदरकं शुभनाभिकञ्जगतकाळिनुतम् ॥ ६७ ॥

अतिकान्तकाञ्चिपदकाञ्चिमिळत्तपनीयभङ्गरुचिपिङ्गपटम् ।
वरहस्तिहस्तसदृशोरुयुगं क्रमवृत्तचारुतरजङ्घमुत ॥ ६८ ॥

वरनूपुरं परमरुक्प्रपदं नवविद्रुमद्युतिनखावलिमत् ।
अरिवारिजध्वजकळङ्कलसत्पदपांसुपावितजगत्त्रितयम् ॥ ६९ ॥

निखिलागमावगमितैरमितैः
सुखसंविदादिभिरनन्तगुणैः ।
प्रपदादिकान्तसकलावयवा-
कृतिभिः सदैक्यवददोषलवम् ॥ ७० ॥

अधिकारिणां गुणविशेषवशाद्
द्विपदाद्यनन्तचरणान्ततया ।
अतिभासितं घनगुणापघनै-
रितरैश्च तत्तदुचितै रुचितैः ॥ ७१ ॥

(प.दी.) शृणुतेति । **सकलस्य मुक्तनिकरस्य दृशां विषयमपि** आदरेण **शृणुत**। कथम्भूतम्? **अलोकविषयम्**। इतरलोकानामगोचरम्। भगवल्लोकेतर-लोकस्थजनानामगोचरं सकलमुक्तनिकरदृशां गोचरमप्यादरेण शृणुत । किं तन्मुक्तदृग्विषयमित्यपेक्षायामाह– **'नवभानुभाः–'** इत्यतः प्राक्तनैः श्लोकैः । **इन्दिरापतिः अमन्दरसं** परिपूर्णबलवीर्याद्यनन्तगुणं **सुन्दरं वपुः अनिशं प्रकटयति ननु**। 'शृङ्गारादौ बले वीर्ये[१] गुणे रागे द्रवे रसः' इत्यमरः ॥ ❊ ॥**मणिराजिराजितमहामकुटम्,** नानारत्नसमूहैर्विराजितमहा-किरीटयुक्तम् । **शितिकान्तकुन्तळसहस्रतयम्,** नीलमनोहरकुन्तळसहस्र-युक्तम् । 'सङ्ख्याया अवयवे तयप्' इति सहस्रशब्दात् तयप्प्रत्ययः । **अळिकार्धचन्द्रविलसत्तिलकम्** । अर्धचन्द्रोपमललाटे विलसत्तिलक-युक्तम् । **श्रवणोल्लसन्मकरकुण्डलयुक्** । श्रवणविराजितमकराकार-कुण्डलयुक्तम्॥ ❊ ॥ **परिपूर्णचन्द्रपरिहासिमुखं जलजायताक्षं अरुणोष्ठ-पुटम्** । विशदोऽर्थः । **अतुलैः** असदृशैः **हसितावलोकलळितैः** मन्द-स्मितयुक्तावलोकाख्यविलासैः **प्रणतं आत्मजनं** स्वभक्तजनं **अभिनन्दयत्**

१.सम्पातायातमेतत् । 'शृङ्गारादौ विषे वीर्ये–' इति किलामरपाठः । टीकाकृतैव पूर्वं 'शृङ्गारादौ विषे वीर्ये–' इत्येव प्रतीकग्रहणादष्टमे [१६]।

॥ ※ ॥ **नवकम्बुकण्ठम्,** नवकम्बुवत् लेखात्रययुतकण्ठम् । **अहिमांशुमहोमहिमोपलेन्द्रवरहारधरम्** । अहिमांशुमहोमहिमा चासावुपलेन्द्रश्चेति तथोक्तः, तं च वरहारं च धरतीति तथोक्तं तत् । **रमणीयरत्नगणविद्धलसद्वलयाङ्गुलीयकवराङ्गदवत्** । रमणीयनानाविधमणिगणखचितकटकाङ्गुलीयकवराङ्गदयुक्तम् ॥ ※ ॥ **रविचक्ररुक्प्रकरचक्रधरम्** । रविचक्रं रविसमूहः, तस्य रुक्प्रकरस्तेजःसमूहः, तथा तेजोवच्चक्रयुक्तकरम्, रविनिकरतेजोवत् तेजोयुक्तचक्रधरम् । **विधुबिम्बकम्बु** चन्द्रमण्डलवद् धवळपाञ्चजन्यधरम् । 'बिम्बोऽस्त्री मण्डलसमप्रतिमामुखलक्ष्मसु', 'कम्बुर्ना वलये शङ्खे' इत्यमरः । **मधुराम्बुरुहं** मनोहरवारिजयुक्तम् । **ज्वलनज्वलद्गदम्** । ज्वलनवत् ज्वलन्ती गदा यस्य तत् ज्वलनज्वलद्गदम् । **उदारधनुः** । उदारं धनुर्यस्य तदुदारधनुः । **पृथुवृत्तहस्तं अतिताम्रतळम्** ॥ ※ ॥ **वरपीवरांसम्** । स्पष्टोऽर्थः । **अधिराजदुरोमणिमण्डपाग्र्यविलसत्कमलम्** । अधिकं राजद् विराजमानमधिराजत् । अधिराजच्च तदुरश्चेत्यधिराजदुरः, अधिराजदुर एव मणिमण्डपाग्र्यः अधिराजदुरोमणिमण्डपाग्र्यः, तस्मिन् विलसन्ती कमला रमा यस्य तदधिराजदुरोमणिमण्डपाग्र्यविलसत्कमलम् । **सजगद्द्विसप्तकतनूदरकम्** । चतुर्दशजगत्सहिततनुजठरम् । **शुभनाभिकञ्जगतकाळिनुतम्** । शुभनाभिकमलगतब्रह्माख्यभ्रमरस्तुतम् ॥ ※ ॥ **अतिकान्तकाञ्चिपदकाञ्चिमिळत्तपनीयभङ्गरुचिपिङ्गपटम्** । अतिकान्ते अतिमनोहरे काञ्चिपदे काञ्चीस्थाने कटिप्रदेशे वर्तमानया काञ्च्या मिळन् सम्बध्यमानः तपनीयभङ्गरुचिवत् सुवर्णच्छेदकान्तिवत् पिङ्गः पीतः पटो यस्य तत् तथोक्तम् । **वरहस्तिहस्तसदृशोरुयुगम्** । करीन्द्रकरसदृशोरुयुग्मम् । **क्रमवृत्तचारुतरजङ्घम्** । क्रमेण वृत्ते वर्तुले ईषत्कृशे [चारुतरे] जङ्घे यस्य तत् तथोक्तम् । 'वृत्तं पद्ये चरित्रे त्रिष्वतीते दृढनिस्तळे' इत्यमरः ॥ ※ ॥ **वरनूपुरं** उत्तमपादभूषणोपेतम् । **परमरुक्प्रपदं** परमकान्तिमत्प्रपदयुक्तम् । 'पादाग्रं प्रपदम्' इत्यमरः । **नवविद्रुमद्युतिनखावलिमत्** नवविद्रुमद्युतिवद् द्युतिमन्नखावलि-

युतम्। **अरिवारिजध्वजकळङ्कलसत्पदपांसुपावितजगत्त्रितयम्**। चक्रपद्मध्वजानां कळङ्केन रेखारूपलाञ्छनेन । 'कळङ्कोऽङ्कापवादयोः' इत्यमरः, लसतोः शोभमानयोः पदयोः पांसुभिः पावितं पवित्रीकृतं जगत्त्रितयं त्रैलोक्यं येन तत् तथोक्तम्॥ * ॥ **निखिलागमावगमितैः** समस्तवेदोदितैः **अमितैः** प्रत्येकमपरिमितैः **सुखसंविदादिभिः** सुखज्ञानादिभिः **अनन्तगुणैः** च **प्रपदादिकान्तसकलावयवाकृतिभिः** च प्रपदमारभ्य शिरोऽवसानैः सकलावयवैः आकृतिभिः सकलजीवगतैः प्रादुर्भावगतैश्च स्वरूपैः **सदा ऐक्यवत्** ज्ञानानन्दाद्यनन्तगुणैः करचरणादिसकलावयवैः प्रादुर्भावादिगतस्वरूपैश्च सदा भेदरहितमिति भावः । 'देहदेहिविभागश्च न क्वचित् परमेश्वरे। गुणानां तद्विभागो वा नेह नानेति च श्रुतिः' इत्यादिवचनसिद्धमेतत्। पुनः कथम्भूतम्? **अदोषलवं** दोषलेशेन रहितम्॥ * ॥ **अधिकारिणां** मानुषादिब्रह्मान्तानां भगवदुपासनाधिकारिणां **गुणविशेषवशात्** ज्ञानभक्त्यादिगुणेषु तारतम्यवशात् **द्विपदाद्यनन्तचरणान्ततया** द्विपदं रूपमारभ्यानन्तचरणरूपावसानतया **अतिभासितम्**। अयं भावः– ये द्विपदरूपदर्शनाधिकारिणस्तान् प्रति द्विपदतयाऽतिभासितम्। एवमुत्तरोत्तरं येये यद्दर्शनाधिकारिणस्तांस्तान् प्रति तथातथाऽवभासितम्। ये त्वनन्तपददर्शनाधिकारिणस्तान् प्रति तथेति । न केवलं द्विपदादित्वमेव रूपाणाम् । किन्तु? **घनगुणापघनैः** प्रत्येकं परिपूर्णज्ञानानन्दाद्यनन्तगुणपरिपूर्णैः **तत्तदुचितैः** द्विपदादितत्तद्रूपाणामुचितैः **रुचितैः** रुचिरैः मनोहरैः **इतरैश्च अतिभासितम्** शिरोनयनहस्तादीतरावयवैश्च अतिभासितम्। अत्र तत्तदुचितैरिति तारतम्यस्थितानां तत्तदधिकारिणां द्रष्टुमुचितैर्योग्यैरितरैरेकद्व्यादिशिरआद्यवयवैश्चातिभासितमिति वा। एवम्भूतं **वपुरिन्दिरापतिरनिशं प्रकटयति** इति पूर्वेण सम्बन्धः ॥ ६२-७१ ॥

(त.चं.) अमन्दरसम् । अमन्दानन्दम् ॥ * ॥ यद्यप्युत्तमानां स्वरूपं पादादिकेशान्तं वर्ण्यत इति लोकनियमः। अत्र तु सर्वं लोकविलक्षणमित्या-

केशादापादं वर्णयति ॥ ✻ ॥ ललितानि स्त्रीणां विलासा इति कोशकाराः पठन्ति । अविवक्षितत्वाऽपि स्त्रीत्वं लालित्यं भवति । लळ विलास इति हि धातुः ॥ ✻ ॥ अहिमांशुः सूर्यः । तस्य महसस्तेजसो महिमेव महिमा यस्य स उपलश्रेष्ठः कौस्तुभमणिः यत्र तं वरं मुक्ताहारं धरतीति । उपलेन्द्रं वर-हारं चेति वा । वलयः कङ्कणम् । 'अङ्गुल्याभरणं प्रोक्तमङ्गुलीयकमूर्मिका' इति । 'केयूरमङ्गदं प्रोक्तं बाहुमूलविभूषणम्' इति च ॥ ✻ ॥ पृथुवृत्तहस्तं पीनवृत्तभुजम् । तथाहि भगवत्पादवचनम्–' शङ्खचक्रगदापद्मधराश्चिन्त्या हरेर्भुजाः । पीनवृत्ता जगद्रक्षाकेवलोद्योगिनोऽनिशम्' इति । उदारधनुरंसे ॥ ✻ ॥ उरआख्ये मणिमण्डपाग्र्ये विलसत्कमलम् । 'स्मरणीयमुरो विष्णोरिन्दिरावासमुत्तमैः' इति हि भगवत्पादः । 'वक्षसि लक्षणभूता लक्ष्मीः' इति पण्डिताचार्यवचनम् ॥ ✻ ॥ शुभनाभिकञ्जे गतः को ब्रह्मा स एवालिर्भ्रमरस्तेन नुतम् । 'कशब्दः सुखवाय्वम्बुब्रह्ममस्तकवाचकः' इति च ॥ ✻ ॥ 'काञ्चीपदं कळत्रं जघनं श्रोणी ककुद्मती ज्ञेया' इति च । काञ्ची मेखला कटिसूत्रम् । सञ्ज्ञात्वाद् ह्रस्वः । 'ङ्यापोः सञ्ज्ञाच्छन्दसोर्बहुलम्' [६.३.६३]। ङ्यन्तस्य सञ्ज्ञायाम्– देवकिनन्दन । नच भवति– जगती-च्छन्दः । आबन्तस्य सञ्ज्ञायाम्– वृन्दवनाञ्जन । धरतळवह । छन्दसि– कुमारिदा । अजक्षीरम् । 'जाम्बूनदं हिरण्यं कनकमहारजतकाञ्चनानि स्युः । कार्तस्वरचामीकरकर्बुरतपनीयनामानि' ॥ ✻ ॥ अरिवारिजेति । तथाहि भागवते– 'सञ्चिन्तयेद् भगवतश्चरणारविन्दं वज्राङ्कुशध्वजसरोरुह-लाञ्छनाढ्यम्' इति ॥ ✻ ॥ अनन्तगुणैरमितैः । तथाह्युक्तम्– 'मय्यनन्त-गुणेऽनन्ते गुणतोऽनन्तविग्रहे' इति ॥ ✻॥ इतरैश्च घनगुणैरपघनैः अव-यवैः । 'आहुः प्रतीकमवयवमपघनमङ्गं तथैकदेशं च' इति च ॥ ६२–७१ ॥

नवभानुभाः कनककान्ति परं
वरहारहारि हरिनीलहरित् ।

शबळप्रभादिविविधद्युतिमत्
सुखबोधसौरभसुरूपगुणम् ॥ ७२ ॥

(भा.प्र.) सुखबोधावेव सौरभसुरूपगुणाश्चास्य –'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः' इति श्रुतेः ॥

आश्चर्यरत्नेष्वधिकं जगत्त्रयेऽ-
प्याश्चर्यमाश्चर्यमहो मुहुर्मुहुः ।
सौन्दर्यसारैकरसं रमापते
रूपं तदानन्दयतीह मोक्षिणः ॥ ७३ ॥

(प.दी.) **नवेति । रमापतेः तद् रूपं** इह वैकुण्ठे **मोक्षिणः** मुक्तान् **आनन्दयति** इत्युत्तरश्लोकेन सम्बन्धः । कथम्भूतं तद् रूपम्? **नवभानुभाः** उद्यदादित्यतेजःसमानतेजोयुतम् । **परं** अन्यत्, 'परं दूरान्यमुख्येषु परोऽरिपरमात्मनोः' इत्यभिधानम्, **कनककान्ति** कनकवत् पिङ्गकान्ति । [अन्यत्] **वरहारहारि** उत्तमहारवत् मनोहरम् । अन्यत् **हरिनीलहरित्** इन्द्रनीलवन्नीलम् । अपरं **शबळप्रभादिविविधद्युतिमत्** । अत एवं नानाविधमपि सर्वं रूपं **सुखबोधसौरभसुरूपगुणम्** । सुखज्ञानात्मकसौरभेण परिमळेन सुरूपेण शोभनरूपेण गुणैश्च युक्तम् । 'सद्देहः सुखगन्धश्च ज्ञानभाः सत्पराक्रमः । ज्ञानज्ञानः सुखसुखः स विष्णुः परमाक्षरः' इत्यादिभ्यः । सुखज्ञानादिकमेव सौरभादिनानागुणात्मकमवतिष्ठत इति भावः ॥ ✻ ॥ **जगत्त्रये** त्रैलोक्ये **आश्चर्यरत्नेषु** अद्भुततमेषु **अपि अधिकमाश्चर्यम्** अत्यद्भुतम् । **मुहुर्मुहुः** पुनःपुनर्दर्शनेऽपि **अहो** महत् **आश्चर्यम्** । **सौन्दर्यसारैकरसम्,** सौन्दर्येण सारेषूत्तमेष्वप्येकरसं परमसुन्दरम् । एवंविधं **रूपं मोक्षिण आनन्दयति** इति ॥ ७२ ॥ ७३ ॥

(त.चं.) अनेकवर्णानां समाहारः शबळता ॥✻॥ एकरसम् । आनन्दमयम् । ततौ जराविन्द्रवंशेत्युक्तम् ॥ ७२ ॥ ७३ ॥

इज्यते यज्ञशीलैः स यज्ञः
प्राज्ञमध्ये परः प्रोच्यतेऽन्यैः ।
गीयते गेयकीर्तिः सुगीतै-
र्विध्यबद्धैः सदाऽऽनन्दसान्द्रैः ॥ ७४ ॥

(प.दी.) **इज्यत** इति । **यज्ञः** इज्यत्वाद् वा याति जानाति चेति वा यज्ञनामा **सः** भगवान् **यज्ञशीलैः** ये पूर्वं यज्ञकर्माधिकारिणस्तानि प्राचुर्येणानुष्ठितवन्तस्तैः पुरुषैः यज्ञैः **इज्यते** । **अन्यैः** पूर्वं प्रवचननिरतैः पुरुषैः **प्राज्ञमध्ये** विद्वन्मध्ये **परः** सर्वोत्तमः **प्रोच्यते** । व्याख्यां कुर्वद्भिः सर्वोत्तमत्वेन समर्थ्यत इति भावः । **गेयकीर्तिः** स भगवान् **सुगीतैः** शोभनं गीतं गानविद्या येषां ते सुगीतास्तैः **गीयते** । किमेते प्रत्यवायपरिहारार्थमेवं कुर्वन्ति? आनन्दातिशयार्थं वा? इत्याकाङ्क्षायां क्रमेणोभयमपि परिहरति– **विध्यबद्धैः सदाऽऽनन्दसान्द्रैः** इति । विधिबद्धत्वाभावान्न प्रत्यवायपरिहारार्थम् । सता निर्दोषेण वृद्धिह्रासरहितेनाऽनन्देन सान्द्रत्वात् पूर्णत्वान्नाऽनन्दातिशयार्थं चेति भावः ॥ ७४ ॥

(त.चं.) इज्यते । उक्तं हि भारते– 'कृष्णो यज्ञैरिज्यते वीतमोहैः' इत्यादि । रैश्चतुर्भिः स्रग्विणी भवति जागती । इयन्तु तुरीयरगणे द्व्यक्षरोना रैस्त्रिभिर्गुरुणा पङ्क्तिरुपस्रग्विणी भवति । त्रयीमेतां छन्दोविदो वदन्तीत्युक्तम्– 'रास्त्रयश्चेत् त्रयीनामकं गः' इति ॥ ७४ ॥

वैकुण्ठे ते श्रीविशेषा जनाना-
मत्याश्चर्यं चित्तवाचामभूमिः ।
वैकुण्ठेते श्रीविशेषाजनाना-
मुक्तश्लाघ्ये युक्तमेतादृशत्वम् ॥ ७५ ॥

(भा.प्र.) वैकुण्ठे वर्तमानानां जनानां श्रीविशेषाश्चित्तवाचामगोचराः। वैकुण्ठेन

प्राप्ते लक्ष्मीगरुडानन्तब्रह्मादिभिः शक्रादिनानाविधमुक्तजनैश्च[१] श्लाघ्ये तत्र युक्तमेवंविधत्वम् ॥

(प.दी.) **वैकुण्ठ** इति। **वैकुण्ठे जनानां ते** उक्ताः **श्रीविशेषाः** शोभाविशेषा ऐश्वर्यविशेषा वा । **अत्याश्चर्यं** अतिचित्रम् । **चित्तवाचां** इतरेषां चित्तानां वाचां च **अभूमिः** आस्पदं न भवन्ति । 'भूमिः क्षितौ स्थानमात्रे' इत्यभिधानम् । तथाहि– **वैकुण्ठेते** वैकुण्ठेन श्रीहरिणा इते प्राप्ते, तत्सहित इति यावत्, 'वैकुण्ठाविन्द्रकेशवौ' इत्यभिधानम् । **श्रीविशेषाजनानामुक्तश्लाघ्ये** रमागरुडानन्तब्रह्मादिनानाविधमुक्तैः श्लाघ्ये प्रशंसनीये तस्मिन् लोके **एतादृशत्वं** एवंविधत्वं **युक्तं** उपपन्नम् । असम्भावितं न भवतीत्यर्थः ॥ ७५ ॥

(त.चं.) वैकुण्ठेते । वैकुण्ठेन इते समिते सङ्गते । वैकुण्ठयुते वैकुण्ठे लोके । 'गोविन्दो धरणिधरः सुपर्णकेतुर्वैकुण्ठो जलशयनश्चतुर्भुजश्च । दैत्यारिर्मधुमथनो रथाङ्गपाणिर्दाशार्हः क्रतुपुरुषो वृषाकपिः स्यात्' । श्री-वि-शेष-अज-नानामुक्तश्लाघ्ये । श्रिया, विना पक्षिराजेन गरुडेन, शेषेण, अजेन ब्रह्मणा, अन्यैश्च इन्द्रादिभिर्नानामुक्तैः श्लाघ्ये । परिग्रहः परिकरौ पुत्रश्चेति क्रमः । मतता गौ च शालिनी च्छन्द इत्युक्तम् ॥

यँय्यं सुखी कामयतेऽर्थमत्र
सङ्कल्पमात्रात् सकलोऽपि स स्यात् ।
इत्येव वेदा अपि वेदयन्ति
मुक्तिं ततः को विभवातिरेकः ॥ ७६ ॥

(भा.प्र.) **'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति ।**

१.'नानाविशिष्टजनैश्च' इति मुद्रितः पाठो नातिस्वरसः ।

[1]'स यदि स्त्रीलोककामः' इत्याद्युक्त्वा 'यंयमन्तमभिकामो भवति, यंयं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति' इत्यादयो वेदाः ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य भावप्रकाशिकाख्यटीकायामेकादशः सर्गः

—०—

(प.दी.) यँय्यमिति । **सुखी** मुक्तः । स हि निर्दुःखपरमानन्दत्वात् सुखीत्युच्यते । अत्र वैकुण्ठे **यँय्यमर्थं** अर्थ्यमानत्वादर्थं विषयादिकं **कामयते** इच्छति **सः सकलोऽपि सङ्कल्पमात्रात्** केवलसङ्कल्पादेव **स्यात्** । **वेदा अपि**– 'स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति । स यदि मातृलोककामो भवति सङ्कल्पादेवास्य मातरः समुत्तिष्ठन्ति । स यदि स्त्रीलोककामो भवति सङ्कल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति' इत्याद्युक्त्वा 'यंय्यमन्तमभिकामो भवति यंय्यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति' इत्यादयो वेदाः **मुक्तिं** मोक्षं **इत्येव** सङ्कल्पमात्रसुलभसर्वकामवतीत्येव **वेदयन्ति** ज्ञापयन्ति प्रतिपादयन्ति । तस्मात् **ततः** सङ्कल्पमात्रसुलभार्थयुक्तमुक्तेरन्यः **विभवातिरेकः** विभवातिशयः **कः**? न कोऽपीत्यर्थः ॥ ७६ ॥

(त.चं.) यँय्यम् । तथाहि च्छन्दोगोपनिषत्–' स यदि पितृलोककामो भवति सङ्कल्पादेवास्य पितरः समुत्तिष्ठन्ति तेन पितृलोकेन सम्पन्नो महीयते । अथ यदि मातृलोककामो भवति सङ्कल्पादेवास्य मातरः समुत्तिष्ठन्ति तेन मातृलोकेन सम्पन्नो महीयते । अथ यदि भ्रातृलोककामो भवति सङ्कल्पादेवास्य भ्रातरः समुत्तिष्ठन्ति तेन भ्रातृलोकेन सम्पन्नो महीयते । अथ यदि स्वसृलोककामो भवति सङ्कल्पादेवास्य स्वसारः समुत्तिष्ठन्ति तेन स्वसृलोकेन सम्पन्नो महीयते । अथ यदि सखिलोककामो भवति

१.'अथ यदि–' इत्यादिश्छन्दोगपाठः । श्रुत्यन्तरं स्यात् । लिपिकृत्प्रमादो वा ।

सङ्कल्पादेवास्य सखायः समुत्तिष्ठन्ति तेन सखिलोकेन सम्पन्नो महीयते । अथ यदि गन्धमाल्यलोककामो भवति सङ्कल्पादेवास्य गन्धमाल्ये समुत्तिष्ठतस्तेन गन्धमाल्यलोकेन सम्पन्नो महीयते । अथ यद्यन्नपानलोककामो भवति सङ्कल्पादेवास्यान्नपाने समुत्तिष्ठतस्तेनान्नपानलोकेन सम्पन्नो महीयते । अथ यदि गीतवादित्रलोककामो भवति सङ्कल्पादेवास्य गीतवादित्रे समुत्तिष्ठतस्तेन गीतवादित्रलोकेन सम्पन्नो महीयते । अथ यदि स्त्रीलोककामो भवति सङ्कल्पादेवास्य स्त्रियः समुत्तिष्ठन्ति तेन स्त्रीलोकेन सम्पन्नो महीयते । यंयमन्तमभिकामो भवति यं यं कामं कामयते सोऽस्य सङ्कल्पादेव समुत्तिष्ठति तेन सम्पन्नो महीयते'[८.१.३-६] इति । इन्द्रवंशाया उपान्त्याक्षरलोपेन ततजा गौ चेन्द्रवज्रेति गतम् ॥ ७६ ॥

महानन्दतीर्थस्य ये भाष्यभावं
मनोवाग्भिरावर्तयन्ते स्वशक्त्या ।
सुराद्या नरान्ता मुकुन्दप्रसादा-
दिमं मोक्षमेते भजन्ते सदेति ॥ ७७ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्कित एकादशः सर्गः

—०—

(प.दी) **महानन्देति** । **सुराद्याः नरान्ताः ये** अधिकारिणः **महानन्दतीर्थस्य भाष्यभावं** श्रीमद्भाष्यार्थं **मनोवाग्भिः स्वशक्त्या** स्वस्वशक्त्यनुसारेण **आवर्तयन्ते** श्रवणमननव्याख्यानरूपामावृत्तिं कुर्वन्ति, **एते मुकुन्दप्रसादात्** भगवदनुग्रहात् **इमं** उक्तलक्षणं **मोक्षं सदा भजन्ते** प्राप्नुवन्ति । **सदा** इत्यपुनरावृत्तिरुच्यते । **इतिशब्देन** 'इति तैरुदीरितमुदारमतिर्वचनं निशम्य स

जगाद गिरम्' इत्यादिशेषवाक्यपरिसमाप्तिः । 'इति हेतुप्रकरणप्रकारादि-समाप्तिषु' इत्यमरः ॥ ७७ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायामेकादशः सर्गः

—०—

(त.चं.) मनोवाग्भिरावर्तयन्ते । तथाहि श्रुतिः– 'स्वाध्यायप्रवचने एवेति नाको मौद्गल्यः । तद्धि तपस्तद्धि तपः' इति । यैश्चतुर्भिर्भुजङ्गप्रयातमिति गतम् ॥ ७७ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याख्यदेकादशं सर्गं सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां
तत्वचन्द्रिकायामेकादशः सर्गः

—०—

[आदितः श्लोकाः– ५५२+७७=६२९]



प्रचुरान्तरप्रवचनं फणिराडुपशुश्रुवान् ससनकादिमुनिः ।
गगनेऽल्पदृष्टवपुरत्र जनैस्त्वरितं निलीनरुचिराप पदम् ॥ [११.१]

द्वादशः सर्गः

[मध्वव्याख्यानिस्वनेन मायिनां क्षोभः। तेषां पद्मतीर्थ-पुण्डरीकपुर्योः सविधे मन्त्रालोचनम्। मध्वेन मायावाद उत्सादमेतीति चिन्ता। मारणोच्चाटनादिभिस्तत्व-वादिनो निवारणीया इति कस्यचित् सूचना। पुस्तका-कर्षणादिना मानखण्डनयोजना। मध्वेन सह वादार्थं पुण्डरीकपुरीप्रेषणम्। मध्वेन दिव्यं वेदप्रवचनम्। पुण्ड-रीकपुर्याः प्रवचनकाले जिह्वास्खलनेनापहास्यता। पद्मतीर्थेन माध्वग्रन्थानां शङ्करार्यसकाशादपहारः। एकवाटं गत्वा मध्वेन पद्मतीर्थभर्त्सना। पुनर्वादे पुण्ड-रीकपुरीपराजयः। पद्मतीर्थपराजयः। मध्वजयसन्तुष्टैः सद्भिर्निगदितानां वादावसानपद्यानामभिसन्धि-प्रकटनम्। ततः 'कोडिप्पाडि'ग्रामे देवायतने मध्वस्य चातुर्मास्यवासः।]

[1]**अत्रानन्तस्वान्तवेदान्तिसिंहे**
मुख्यव्याख्यानिस्वने जृम्भमाणे ।
सद्यो माद्यद्वादिदन्तीन्द्रभीमे
भेजे क्षोभो मायिगोमायुयूथैः ॥ १ ॥

(प.दी.) **अत्रेति** । **मुख्यव्याख्यानिस्वने** उत्तमव्याख्यानरूपनिस्वनयुक्ते, **सद्यः** व्याख्यानमात्रश्रवणकाल एव, **माद्यद्वादिदन्तीन्द्रभीमे** विद्वत्ताभिमानेन माद्यतां मत्तभावं भजतां वादिदन्तीन्द्राणां भयङ्करे, **अनन्तस्वान्तवेदान्तिसिंहे**, अनन्तस्वान्तः श्रीपूर्णप्रज्ञाचार्यः, वेदान्तोऽस्यास्तीति वेदान्ती, वेदान्तशास्त्राभिज्ञ इति भावः, अनन्तस्वान्तश्चासौ वेदान्ती चेति अनन्तस्वान्तवेदान्ती, स एव सिंहः अनन्तस्वान्तवेदान्तिसिंहस्तस्मिन्, **अत्र** रजतपीठपुरे **जृम्भमाणे** शोभमाने सति, 'जृम्भणं जृम्भितोत्फुल्लविवृद्धेषु विचेष्टिते' इत्यभिधानम्, **मायिगोमायुयूथैः** मायावादिसृगालसमूहैः **क्षोभः** भयाच्चपलत्वं **भेजे** । सिंहगर्जितं श्रुत्वा यथा सृगालानां चपलत्वं भवेत् तद्वन्मध्वव्याख्यानिनादश्रवणमात्राद् भीता मायिनश्चपलत्वं भेजुरिति भावः ॥ १ ॥

(त.चं.) अनन्ते भगवति स्वान्तमस्येति अनन्तस्वान्तः । स एव वेदान्तिसिंहः । वेदान्तानां ब्रह्मसूत्राणां भाष्यकरणाद् वेदान्ती ।

१.'तत्र रजतपीठपुरे' इति विश्वपतितीर्थीयः प्रकटितः पाठः । 'अत्र रजतपीठपुरे' इति तु वेदाङ्गतीर्थीयम् । कस्तावदत्र लिपिकृत्प्रमाद इति महान्तः प्रमाणम् ।

वेदानामन्तोऽर्थनिर्णयो यैस्तादृशानि वचनान्यस्येति वा वेदान्ती । अन्येऽपि वेदान्तिनो भवन्ति मायावादिनो वेदानामवसानहेतव इति । माद्यन्तो वादिनः साङ्ख्यवैशेषिकादयः । क्षोभः । क्षुभ सञ्चलने । चित्तस्यानवस्थानं व्यग्रतया भयग्रस्ततया च क्षोभो नाम । रूपान्यथात्वं हि सञ्चलनमिति वैयाकरणाः । शालिनी त्रिष्टुप् छन्दः । लक्षणं तूक्तम् ॥ १ ॥

सम्भूयामी चोळजद्वीपिपुर्योः
पार्श्वे पापा मन्त्रयामासुरुग्राः ।
सासूया भूभूषणे वायुदेवे
मूढा यद्वद् धार्तराष्ट्रान्तिके प्राक् ॥ २ ॥

(भा.प्र.) चोळजः पद्मतीर्थो नाम ।
यो गुप्तपटलोक्तायां भैरवीचक्रसङ्गतौ ।
साङ्कर्यां परविद्यायां महावाग्ग्म्यसतां गुरुः ॥

द्वीपी[1] पुण्डरीकपुरी ॥

(प.दी.) सम्भूयेति । **पापाः उग्राः अमी** मायिनः **चोळजद्वीपिपुर्योः**, चोळजः पद्मतीर्थः, द्वीपिपुरी पुण्डरीकपुरी, तयोः **पार्श्वे सम्भूय** मिळित्वा **मन्त्रयामासुः** । कथम्भूताः? **भूभूषणे वायुदेवे** श्रीमध्वनाम्नि वायुदेवे **सासूयाः** असूयोपेताः । **प्राक्** पूर्वं **मूढाः** राजपुत्रादयः **धार्तराष्ट्रान्तिके यद्वत्**, तेऽपि **भूभूषणे वायुदेवे** श्रीभीमसेने **सासूयाः** ॥ २ ॥

(त.चं.) चोळदेशजः पद्मतीर्थः । योऽत्र तदा मायावादिनां नेताऽसीत् । शाक्ततन्त्रज्ञः । तदुक्तं भावप्रकाशिकायाम्– 'यो गुप्तपटलोक्तायां भैरवीचक्रसङ्गतौ । साङ्कर्यां परविद्यायां महावाग्ग्म्यसतां गुरुः' इति । कौलानां तन्त्रस्य गुप्तपटल उक्तायां भैरवीचक्रसङ्गतावसतां गुरुः । साङ्कर्यां च परविद्यायां महावाग्मी गुरुरिति । तथाहि कौलाचाराणां भैरवीचक्रम्–

१. 'द्वीपिपुरी पुण्डरीकपुरी' इति पाठः सम्भाव्यते ।

'भैरव्याः कल्पितं चक्रं संस्थाप्य पूर्ववत् प्रिये । सुराणां शोधनं कुर्याद् यथावत् परमेश्वरि । प्रवृत्ते भैरवीचक्रे सर्वे वर्णा द्विजोत्तमाः । निवृत्ते भैरवीचक्रे सर्वे वर्णाः पृथक्पृथक्' इत्यादि । त्रिपुरा, कामेश्वरी, भुवनेश्वरी, त्रिपुरबाला, अन्नपूर्णेश्वरी– इत्याद्या बहुविधा भैरव्यो भवन्ति तेषाम् । 'व्याघ्रो द्वीपी पुण्डरीकः' इत्यभिधानाद् द्वीपिपुरी पुण्डरीकपुरी । पाश्र्वे पापाः । मूढा इत्युपरितनमत्रापि सम्बध्यते । पापा इति तत्रापि । धार्तराष्ट्रयोरन्तिके दुर्योधनदुःशासनयोः ॥ २ ॥

सन्मात्सर्यं बद्धुमूचेऽशुभानां
वाचाऽलोलं कोपि गां धारकस्य ।
मध्ये तेषां नीचनीत्या समानो
वाचालोऽलं कोऽपि गान्धारकस्य ॥ ३ ॥

(भा.प्र.) अशुभानां धारकस्य चोळजस्य अलोलं स्थिरं कोपि कोपविशिष्टं सज्जनेषु मात्सर्यं बद्धुं गामूचे । कोऽप्यलं वाचालः शकुनेः समानः ॥

(प.दी.) सदिति । **सन्मात्सर्यम् । बद्धुम् । ऊचे । अशुभानाम् । वाचा । अलोलम् । कोपि । गाम् । धारकस्य । मध्ये । तेषाम् । नीचनीत्या । समानः । वाचालः । अलम् । कः । अपि । गान्धारकस्य । तेषां** मिळितानां मायिनां **मध्ये अलं** अतितरां **वाचालः** बहुभाषी । 'आलजाटचौ बहुभाषिणि' इति सूत्रम् । **कोऽपि** कश्चित् । **वाचा** स्ववचनेन **अशुभानां धारकस्य** आश्रयभूतस्य चोळजस्य **कोपि** कोपविशिष्टं **सन्मात्सर्यं** सत्सु मात्सर्यं **अलोलं** स्थिरं यथा भवति तथा **वाचा** स्ववचनेन **बद्धुं** उत्पादयितुं **गां** वाचं **ऊचे** । कथम्भूतः? **नीचनीत्या** कुत्सितनीत्या **गान्धारकस्य** शकुनेः **समानः** ॥ ३ ॥

(त.चं.) सन्मात्सर्यम् । कथमथ 'बद्धुम्'? 'बन्द्धुम्' इत्येव मूलपाठः स्यात् । अथवा नेदं क्र्यादेः 'बन्ध बन्धने' इत्यस्य रूपम् । किन्तु भ्वादेः

'बध बन्धने' इत्यस्य । नन्वयं नित्यसन्नन्तः । बीभत्सत इति च रूपं निष्पादयन्ति । पतञ्जलिरप्याह– 'नैतेभ्यः प्राक् सन आत्मनेपदम्, नापि परस्मैपदं पश्यामः' इति । सत्यम् । अथाप्यन्ये 'बधते' इत्यादि रूपमप्यङ्गीकुर्वन्ति । वार्तिकमप्यत्र संवदते– 'अत्रापि सन्नर्थविशेष इष्यते' [३.१.६] इति । जुगुप्सायामर्थविशेषे गम्यमान एव सन् प्रत्ययो भवतीत्युक्तं भवति । तेन बन्धनार्थे न सन् भवति । तेन बन्धनार्थे गम्यमाने 'बधते' इत्येव रूपम् । क्षीरस्वामी चाऽह– 'जुगुप्सायां सन् बीभत्सते । अन्यत्र बधते' इति । काशकृत्स्नधातुपाठेऽप्येवम् । तेन 'बद्धुम्' इति सुवचम् । अवश्यं चैतदभ्युपेयम् । महतां प्रयोगप्राचुर्यात् । 'इयेष किल तं बद्धुं दाम्नाऽतद्वीर्यकोविदा' [१०.१०.१२] इति च भागवते । 'बद्धुं दिदेश सुरवर्धकिनोऽवतारम्'[८.१४] इति च महाभारततात्पर्यनिर्णये । वाचालः । 'आलजाटचौ बहुभाषिणि'[५.२.१२५] । यः सम्यग् बहु भाषते स वाग्मी भवति । यः कुत्सितं बहु भाषते स वाचालो भवति । स वाचाटो भवति । वाचैव केवलमलत्यटति वा । अल गतौ । अट च । कथं तर्हि 'महावाग्ग्म्यसतां गुरुः'? परिहासगर्भमिदम् । तद्यथा महाब्राह्मण इति ब्रह्मबन्धुः परिहस्यते । असन्तश्च तं स्वगुरुं महावाग्मिनं प्रण्यगदन्निति ॥ ३ ॥

एकं तत्वं वष्टि मायामयीयं
वाक्यैः प्राच्यैरप्यवाच्यं विधत्ते ।
पूर्वाऽपूर्वा हन्त दौर्घट्यभूषा
चित्रश्चित्रं दर्शनाचार्यनीतिः ॥ ४ ॥

(प.दी.) एकमिति । **मायामयी** मायाविलासमूला **इयं दर्शनाचार्यनीतिः**, अस्मद्दर्शनाचार्यस्य नीतिः शास्त्रम्, **चित्रश्चित्रं** अत्याश्चर्यम् । तथाहि– **तत्वं** ब्रह्माख्यं वस्तु **एकं** अद्वितीयं निर्विशेषं च **वष्टि** ब्रूते । तथाऽपि **प्राच्यैः** पुरातनैः **वाक्यैः** वेदवचनैः 'यतो वाचो निवर्तन्ते' इत्यादिभिः **अवाच्यमपि**

विधत्ते। कथम्भूता? **पूर्वा** पुरातनी। **अपूर्वा** दुर्लभा। **दौर्घट्यभूषा**। दौर्घट्यं दुर्घटत्वं भूषा अलङ्कारो यस्याः सा तथोक्ता। **हन्त** हर्षे। तत्वं ब्रह्माख्यं वस्तु अद्वितीयं निर्विशेषम्, 'सत्यं ज्ञानम्–' इत्यादिरूपेण समर्थ्यापि तद् ब्रह्मावाच्यमिति ब्रूते। तस्माद् दौर्घट्यभूषेत्यर्थः ॥ ४ ॥

(त.चं.) वष्टि। वश कान्तौ। कान्तिरिच्छा। इच्छति मन्यत इत्येतत्। तत्वं तननवत्। तननं तत्। तदस्यास्तीति मत्वर्थे वः। केशवान् केशवो भवति। तद्वत् तत्वं भवति। 'वप्रकरणेऽन्येभ्योऽपि दृश्यत इति वक्तव्यम्' [५.२.१०९] इति हि वार्त्तिकम्। तत्वं प्रमेयं प्रमातृसापेक्षम्। अथाप्येकं मन्यते। अवाच्यमपि वाचा विधत्ते। अहो दौर्घट्यमेव भूषणमस्य दर्शनस्येति विस्मयते कविरपि ॥ ४ ॥

मर्त्यामर्त्यामर्त्यविद्विट्पुरोगं
विश्वं दृश्यं विप्रचण्डालपूर्वम्।
भेदापेतं भेदि मानैः समानैः
साधीयः कः साधयेत् तामलब्ध्वा ॥ ५ ॥

(भा.प्र.) साधीयः– 'द्विवचनविभज्योपपदे तरबीयसुनौ' इतीयसुन्। 'अन्तिक-बाढयोर्नेदसाधौ' इति बाढशब्दस्य साधादेशः ॥

(प.दी.) मर्त्येति। तां अस्मद्दर्शनाचार्यनीतिं **अलब्ध्वा, मर्त्यामर्त्यामर्त्य-विद्विट्पुरोगम्**, मर्त्या मनुजाः, अमर्त्या देवाः, अमर्त्यविद्विषो दैत्याः, एतत्पुरोगं **दृश्यं** प्रतीयमानं **विप्रचण्डालपूर्वं विश्वं** प्रपञ्चं **भेदापेतं** भेदरहितं **कः** को विद्वान् **साधीयः** दृढतरं **साधयेत्**। अत्र साधीय इति दृढार्थस्य बाढशब्दस्य 'अन्तिकबाढयोर्नेदसाधौ' इति साधादेश ईयसुन् प्रत्ययश्च। कथम्भूतं विश्वम्? **समानैः** 'जगत्प्रवाहः सत्योऽयं पञ्चभेदसमन्वितः', 'सत्यं भिदा सत्यं भिदा सत्यं भिदा', 'पञ्च भेदा इमे नित्याः सर्वावस्थासु सर्वशः' इत्यादिभेदप्रतिपादकवेदादिप्रमाणसहितैः **मानैः** प्रत्यक्षादिप्रमाणैः

भेदि भेदविशिष्टतया प्रसिद्धम् । **समानैः** प्रत्यक्षादिप्रमाणसहितैः **मानैः** भेदप्रतिपादकवेदादिप्रमाणैः **भेदि** इति वा योजना । प्रत्यक्षादिप्रमाणैर्भेदस्यैव प्रतीयमानत्वात् तद्विरुद्धसर्वाभेदसमर्थनमस्मद्दर्शनाचार्योक्तनीतिं विना न शक्यमिति भावः ॥ ५ ॥

(त.चं.) तामलब्ध्वा । अस्मद्दर्शनाचार्यनीतिमनवलम्ब्य । भेदि भेदोपेतं विश्वं भेदापेतमिति कः साधयेत्? तदपि समानैरेव मानैः । भेदसाधकैरेव मानैः । तथाहि– विश्वं हि तथ्यं भेदोपेतं दृश्यते । वयं त्वहो दृश्यत्वादेव भेदापेतमतथ्यं ब्रूम इति । साधीयः निश्चिततरम् । 'द्विवचनविभज्योपपदे तरबीयसुनौ'[५.३.५७]। 'अन्तिकबाढयोर्नेदसाधौ' [५.३.६३]। द्वयोरर्थयोर्विभक्ततया वचने तरप्ईयसुनौ प्रत्ययौ भवतः । अयमनयोरतिशयेन पटुः पटुतरः पटीयान् । अन्तिकबाढयोः तरबीयसुनोः परयोः सतोः नेदसाधादेशौ भवतः । इदमनयोरतिशयेनान्तिकं नेदीयः । भेदवादमायावादयोः मायावाद एवातिशयेन बाढं साधयेत् साधीयः साधयेत् । मायावादं विनाऽन्येन मार्गेण कः साधीयः साधयेत् ॥ ५ ॥

सत्यं सत्यं व्यावहार्यं विधत्ते
सर्वं मोहे सर्वनिर्वाहिणी सा ।
ज्ञाने जाते दग्धवस्त्रप्रतीतं
पक्के तस्मिंस्तप्तलोहात्तवार्वत् ॥ ६ ॥

(प.दी.) सत्यमिति । **सा** दर्शनाचार्यनीतिः **मोहे** अज्ञानदशायां **सत्यं** पारमार्थिकसत्यतया प्रतीयमानं **सर्वं व्यावहार्यं सत्यं** व्यावहारिकसत्यं **विधत्ते** ब्रूते । 'सन् घटः' इत्यादिप्रत्यक्षस्य, 'विमतं सत्यमर्थक्रियाकारित्वात्, यन्न सत्यं न तदर्थक्रियाकारि, यथा शुक्तिरजतम्, न तथाचेदम्, तस्मान्न तथा' इत्याद्यनुमानस्य, 'विश्वं सत्यं मघवाना–' इत्याद्यागमस्य च जगत्-सत्यत्वप्रतिपादकस्य व्यावहारिकसत्यताविषयत्वं विधत्त इति भावः । तस्मात्

सा अस्मद्दर्शनाचार्यनीतिः **सर्वनिर्वाहिणी** सर्वस्यापि प्रमाणजातस्य परस्पराविरोधेन विषयव्यवस्थाकल्पिकेत्यर्थः । तथाहि– 'सन् घटः' इत्यादि जगत्सत्यत्वविषयप्रमाणस्य व्यावहारिकसत्यत्वं विषयः । 'विमतं मिथ्या दृश्यत्वात्, शुक्तिरजतवत्' इत्याद्यनुमानानाम्, 'नेह नानाऽस्ति किञ्चन' इत्याद्यागमानां च ब्रह्मातिरिक्तप्रपञ्चमिथ्यात्वपराणां परमार्थतः सत्त्वनिषेधो विषय इति भिन्नविषयव्युत्पादनेन परस्परविरोधपरिहारात् सर्वनिर्वाहिणीत्युच्यते । वस्तुतो विचार्यमाणे सति विश्वं कथम्भूतमित्यपेक्षायामाह– **ज्ञान** इत्यादि । **ज्ञाने** 'नेह नानाऽस्ति किञ्चन' इत्याद्यागमजनितपरोक्षज्ञाने **जाते** सति **दग्धवस्त्रप्रतीतं** दग्धवस्त्रवत् प्रतीतम् । दग्धवस्त्रं पश्यतो यथा भस्मैवेदं न वस्त्रमिति दृढनिश्चये सत्यपि चूर्णीभावपर्यन्तमातानवितानात्मकताप्रतीतिरनिवार्या तद्वत्, 'विमतं मिथ्या दृश्यत्वाच्छुक्तिरजतवत्' इत्याद्यनुमानैः, 'नेह नानाऽस्ति किञ्चन' इत्याद्यागमैश्च परोक्षतो ब्रह्मातिरेकेण प्रपञ्चमिथ्यत्वनिश्चये सत्यपि सर्वात्मनाऽविद्यास्तमयपर्यन्तं 'सन् घटः' इत्यादिप्रतीतरनिवार्या । तस्माद् दग्धवस्त्रप्रतीतमिदम् । **तस्मिन्** 'विमतं मिथ्या दृश्यत्वात्' इत्याद्यनुमानैः, 'नेह नानाऽस्ति किञ्चन' इत्याद्यागमैश्चोत्पादिते ज्ञाने **पक्वे** सति परिपक्वे सति, अपरोक्षत्वं गते सतीति यावत्, **तप्तलोहात्तवार्वत्** भवतीति सम्बन्धः । तप्तलोहात्तं वारि यथा लोहान्न पृथक् प्रतीयते एवं जीवजडात्मकप्रपञ्चमिथ्यात्वलक्षणब्रह्मात्मैक्यज्ञाने परिपक्वे सति ब्रह्मातिरेकेण न किञ्चित् प्रतीयत इति भावः । अयमत्रान्वयप्रकारः– **मोहे सत्यं सर्वं व्यावहार्यं सत्यं विधत्ते** । तस्मात् **सा सर्वनिर्वाहिणी** । **ज्ञाने जाते दग्धवस्त्रप्रतीतं** सर्वं **तस्मिन्** ज्ञाने **पक्वे** सति **तप्तलोहात्तवार्वद्** भवतीति ॥ ६ ॥

(त.चं.) भेदमोहे सति यत् सत्यं दृश्यते दृश्यत्वादेव तद् व्यावहार्यं व्यावहारिकं सत्यमिति विधत्ते । सत्यमिति व्यवहारमात्रम् । न परमार्थतः

सत्यम् । यद् विडम्बयामास भट्टः –'सत्यत्वं नहि सामान्यं मृषार्थपरमार्थयोः । वञ्चनार्थमुपन्यासो लालावक्त्रासवादिवत्' इति । व्यवहारविषयस्य जगतोऽन्तःपाति सर्वं व्यावहार्यमुच्यते ॥ ६ ॥

ज्ञानिश्रेष्ठश्रेष्ठविज्ञानिवर्गे
नैर्गुण्यस्थे साम्प्रतं नाथभूताः ।
आक्रन्दं मे हन्त शृण्वन्तु सोऽयं
हाहा मायावाद उत्सादमेति ॥ ७ ॥

(प.दी.) ज्ञानीति । **ज्ञानिश्रेष्ठश्रेष्ठविज्ञानिवर्गे** । ज्ञानिश्रेष्ठो नाम कश्चिन्मायिप्रवरः । ज्ञानिश्रेष्ठ एव श्रेष्ठ उत्तमो यस्मिन् विज्ञानिवर्गे स ज्ञानिश्रेष्ठश्रेष्ठः । ज्ञानिश्रेष्ठश्रेष्ठश्चासौ विज्ञानिवर्गश्चेति ज्ञानिश्रेष्ठश्रेष्ठविज्ञानिवर्गः । तस्मिन् **नैर्गुण्यस्थे** सति । नैर्गुण्यं नाम निर्गुणब्रह्मभावः । तस्मिन् स्थिते सति । निर्गुणब्रह्मतादात्म्यलक्षणमुक्तिं गते सतीति यावत् । **साम्प्रतं** इदानीं **नाथभूताः** अस्माकं स्वामिभूता भवन्तः **मे आक्रन्दं** आक्रोशं **शृण्वन्तु** । **सोऽयं मायावादः उत्सादं** नाशं **एति** । **हाहा** कष्टङ्कष्टम् । **हन्त** खेदे ॥

(त.चं.) ज्ञानिश्रेष्ठ इति पद्मतीर्थपुण्डरीकपुरीभ्यामपि प्रतनः तौळवमण्डले मायावादस्य प्रवक्ता यतिरासीदिति ज्ञायते । य एतयोर्गुरुः प्रगुरुर्वेति सम्भाव्यते । ज्ञानिश्रेष्ठ इति तस्य प्रशस्तिर्वा ॥ ७ ॥

भ्रष्टा भाट्टा न प्रभाकृत्प्रभाऽभूत्
त्रस्ता माहायानिकाद्याश्च यत्र ।
दुर्गं मायावादसत्रं दिधक्षु-
र्नोपेक्ष्या नस्तत्ववादाग्निजिह्वा ॥ ८ ॥

(भा.प्र.) भाट्टा भट्टानुव्रता वनपरिचयरहिताः । अर्कप्रभा । अविरळतरुमत्त्वात् । माहायानिका बौद्धा महायानसम्बन्धिनश्च ॥

प्राच्यं शास्त्रं यत् सपादं तु लक्षं
वाक्येनैकेनाऽक्षिपद्धर्षतीर्थः ।
इत्थं पान्थैर्वर्णितं शृण्वतः प्राग्
युष्मान् प्रापद् दूयमानं मनो मे ॥ ११ ॥

(प.दी.) प्राच्यमिति । **हर्षतीर्थः प्राच्यं** पुरातनं **यत् तु सपादं लक्षं** सपादलक्षसङ्ख्याकं **शास्त्रं** तत् **एकेन वाक्येन आक्षिपत्** निराचक्रे **इत्थं प्राक् पान्थैः** पथिकैः **वर्णितं शृण्वतः मे** मम **मनो दूयमानं** सत् **युष्मान् प्रापत्** । सपादलक्षपरिमितमस्मच्छास्त्रमाक्षिपन्तमिममाक्षेप्तुं पद्मतीर्थादय एव समर्था इति दूरस्थान् युष्मान् मे मनो जगामेति भावः ॥ ११ ॥

(त.चं.) सपादलक्षात्मको मायावादमूलग्रन्थ इत्यपूर्वेयं पण्डिताचार्योपज्ञं प्रथा । द्वात्रिंशदक्षरात्मको ग्रन्थः । चत्वारिंशल्लक्षाक्षरमितं मायावादशास्त्रमित्युक्तं भवति । प्राक् प्रथमं युष्मान् प्रापत् । तन्निराकरणे यूयं समर्था इति मन्यमानस्य मे मनः युष्मान् पद्मतीर्थादीन् प्रापत् । तत्प्रत्यनीकत्वेन युष्मानेवाचिन्तयम् ॥ ११ ॥

वेदव्यासो न्वेष वेदो नु मूर्तो
दिव्या मूर्तिर्यस्य सा सुस्मितस्य ।
तद्द्रष्टॄणां चेति वाणीकृपाणी
नूनं मायापक्षमूलं छिनत्ति ॥ १२ ॥

(प.दी.) वेदव्यास इति । **सुस्मितस्य यस्य सा मूर्तिः** तनुः **दिव्या** स **एषः** श्रीमध्वाचार्यः **वेदव्यासो नु? मूर्तः** मूर्तिमान् **वेदो नु? इति च तद्द्रष्टॄणां** तं श्रीमध्वाचार्यं दृष्टवतां जनानां **वाणीकृपाणी** वचनखड्गलता **नूनं मायापक्षमूलं** मायावादसिद्धान्तमूलं **छिनत्ति** खण्डयति ॥ १२ ॥

(त.चं.) तद्द्रष्टॄणां चेति वाणीकृपाणी । चकार आदिवचनः । इत्याद्या

वाणीकृपाणी। तेनात्रानुक्तान्यन्यानि बहुधा प्रशंसावचनानि समुच्चाययति ॥ १२ ॥

अक्लिष्टं तत्सूत्रभाष्यं बलीयो-
मानोपेतं का क्षतिर्नस्तथा चेत् ।
आस्माकाः केऽप्येवमुक्त्वा विलज्जा
लज्जासिन्धौ दुस्सहेऽमज्जयन् नः ॥ १३ ॥

(प.दी.) अक्लिष्टमिति। **तत्सूत्रभाष्यं** तेन कृतं ब्रह्मसूत्रभाष्यं **अक्लिष्टं** ऋजुमार्गेण सूत्रार्थवर्णनपरम्, **बलीयोमानोपेतं** स्वोक्तार्थे बलवत्प्रमाणोपेतमिति केचिद् वदन्ति। **तथा चेत् नः का क्षतिः**? का हानिः? अस्तु नाम। तत्र **विलज्जाः** ह्रीरहिताः **आस्माकाः** अस्मद्यूथ्याः **केऽपि** केचित् **एवमुक्त्वा** तद्भाष्यप्रशंसारूपं वाक्यमुक्त्वा **नः** अस्मान् **दुःसहे लज्जासिन्धौ अमज्जयन्**। अस्मद्यूथ्यानां केषाञ्चित् तत्प्रशंसारूपं वाक्यं श्रुत्वा वयमतितरां लज्जिता वर्तामह इति भावः ॥ १३ ॥

(त.चं.) तेन कृतं तस्य वा सूत्रभाष्यम्। अस्मदाचार्यभाष्याद् बलीयः। यतः मानोपेतम्। बलीयोभिर्मानैरुपेतं वा। यद्यपि द्वे अपीमे भाष्ये बलवता मानेनोपेते। तत्सूत्रभाष्यं त्वनयोरतिशयेन बलवन्मानोपेतमिति बलीयोमानोपेतम्। बलीय इति बलिष्ठमित्यर्थे वा। 'यत्रोभयोः प्रयोगो न तत्रैकार्थौ तरप्तमौ' इति वचनात्। आस्माका अपि केचनैवमुक्त्वा नः लज्जयन्ति ॥ १३ ॥

तस्य व्याप्तैः शिष्यजालैस्तु गौणैः
संसत्सिन्धौ शङ्खचक्रादिभृद्भिः ।
मा गृह्येरन् विश्वसत्त्वान्तराणि
क्षेमाप्त्यै नस्तत्र नीतिं विधत्त ॥ १४ ॥

(भा.प्र.) जालं समूहः, जलचरबन्धकं च । **गौणा** माधुर्यवाग्मित्वादिगुण-सम्बन्धिनः, तन्तुकृताश्च[1] । शङ्खचक्रं शङ्खानां कम्बूनां मण्डलं च ॥

(प.दी.) **तस्येति** । **गौणैः** माधुर्यादिगुणसम्बन्धिभिः **व्याप्तैः** सर्वदेशेषु विततैः **शङ्खचक्रादिभृद्भिः** पाञ्चजन्यसुदर्शनादिभगवल्लाञ्छनधारिभिः **तस्य** श्रीमध्वाचार्यस्य **शिष्यजालैः** शिष्यसमूहैः **तु संसत्सिन्धौ** तत्रतत्र सभा-स्थानाख्यसमुद्रे **विश्वसत्त्वान्तराणि**, विश्वेषां सत्त्वानां प्राणिनाम्, नरा-णामिति यावत्, अन्तराणि मनांसि यथा **मा गृह्येरन्** यथा न वशीक्रियेरन् तथा **तत्र नीतिं** उपायं **विधत्त** कुरुत । किमर्थम्? **नः** अस्माकं **क्षेमाप्त्यै** अस्मच्छास्त्रादिरक्षासिद्ध्ये । प्राप्तपरिपालनं हि क्षेममित्युच्यते । **गौणैः** तन्तुमयैः **व्याप्तैः शङ्खचक्रादिभृद्भिः** कम्बुसमूहादिनानाजलचरधारिभिः जालैः जलचरबन्धनैः । 'जालं समूह आनायो[2] गवाक्षक्षारकावपि' इत्यमरः । सिन्धौ समुद्रे **विश्वसत्त्वान्तराणि** नानाप्राणिविशेषा इवेति श्लेषार्थः । 'अन्तरमवकाशावधिपरिधानान्तर्धिभेदतादर्थ्ये । छिद्रात्मीयविनाबहिर-वरसमध्येऽन्तरात्मनि च' इत्यमरः । 'द्रव्यासुव्यवसायेषु सत्वमस्त्री तु जन्तुषु' इति च ॥ १४ ॥

(त.चं.) शङ्खचक्रादिभृद्भिः । आदिना तुळसीनळिनाक्षमालोर्ध्वपुण्ड्र-भृद्भिः शिष्यैः । गदापद्मनारायणमुद्राभृद्भिर्वा । शङ्खानां चक्रं मण्डलं स-मूहः । आदिना मत्स्यादिभृद्भिर्जालैः । विश्वसत्त्वान्तराणि विश्वजनमान-सानि शिष्यैः । प्राणिविशेषा जालैः । 'अन्तरात्मनि विशेषेऽवसरेऽन्तरम्' इति ॥ १४ ॥

गौणैस्तर्कैर्गौणवाक्याभिगुप्तै-
र्गौणीं बुद्धिं वर्धयन्ते नृणां ते ।

---

१. 'गौणानि....सम्बन्धीनि, तन्तुकृतानि च' इति भाव्यम् । जालविशेषणं हि तत् ।
२. आनाय इति जलचरबन्धकं जालम् ।

हंसानां नो वाग्विघातप्रवीणाः
सिन्धुं भूयोवारिवर्षैरिवाब्दाः ॥ १५ ॥

(प.दी.) **गौणैरिति** । **ते** तस्य शिष्याः **गौणवाक्याभिगुप्तैः**, 'मय्यनन्त-गुणेऽनन्ते', 'अथ कस्मादुच्यते परं ब्रह्म । बृहन्तो ह्यस्मिन् गुणाः' इत्यादि-भिर्भगवतोऽनन्तगुणत्वसाधकैर्वाक्यैरभिगुप्तैः, **गौणैस्तर्कैः** ब्रह्मणः सगुणत्व-साधकैः 'ब्रह्म सगुणं भवितुमर्हति, वस्तुत्वाद् घटवत्' इत्याद्यैरनुमानैः **नृणां** पुरुषाणां **गौणीं बुद्धिं** ब्रह्मणः सगुणत्वबुद्धिं **वर्धयन्ते** । कथम्भूताः? **हंसानां** परमहंसाश्रमिणां **नः वाग्विघातप्रवीणाः** ब्रह्मणो निर्गुणत्वं वदतां नो वचन-निराकरणदक्षाः । किमिव? **अब्दाः** मेघाः **भूयोवारिवर्षैः** बहूदकवर्षैः । 'वर्षोऽस्त्री भारताद्यब्दवृष्टिषु प्रावृषि स्त्रियाम्' इत्यभिधानम् । **सिन्धुमिव** समुद्रमिव । ते च **हंसानां** हंसपक्षिणां **वाग्विघातप्रवीणा नो** नहि । सति वर्षारम्भे हंसरवः श्रूयते । नचात्र वस्तुत्वानुमानस्य कश्चित् क्षुद्रोपद्रवः । 'मय्यनन्तगुणेऽनन्ते गुणतोऽनन्तविग्रहे' इत्याद्यनन्तगुणत्वोपपादका-गमानुगृहीतत्वात् ॥ १५ ॥

(त.चं.) गौणैः । ब्रह्मणः सगुणत्वसाधकैस्तर्कैरथापि मायावाद्युदित-निर्गुणत्वसाधकतर्कापेक्षया गौणैरमुख्यैरित्यनास्था ध्वन्यते । एवं गौणै-र्वाक्यैर्गौणीं बुद्धिमित्यत्रापि । हंसानां नो वाग्विघातप्रवीणाः । यथा हंसानां रवः भूयसा वर्षस्वरेण विहन्यते । भूयोवारिवर्षैः सिन्धुं सरितमिव । स्यन्दत इति सिन्धुः । 'स्यन्दू प्रस्रवणे' । 'सिन्धुः स्रवन्ती तटिनी तरङ्गिणी' इति च ॥ १५ ॥

बाहुल्येन ह्येतदुक्त्वा खलु द्रा-
गेते विश्वं प्राप्नुवन्ति प्रकामम् ।
अस्मिन्नस्मद्दर्शनापायकाले
यद्वल्लोकापायकाले लयापः ॥ १६ ॥

(भा.प्र.) उक्त्वा खलु, न वक्तव्यम्। 'अलङ्खल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति॥

(प.दी.) बाहुल्येनेति। **एतत्** विपक्षोत्कर्षकथनपरं वाक्यं **बाहुल्येन** विस्तरेण **उक्त्वा खलु** न वक्तव्यं **हि**। 'अलङ्खल्वोः प्रतिषेधयोः प्राचां क्त्वा' इति प्रतिषेधवाचिनः खलुशब्दस्य प्रयोगे क्त्वाप्रत्ययः। एतद् बाहुल्येनोक्त्वा प्रयोजनाभावान्न वक्तव्यमिति भावः। अयं तावत् फलितार्थः –**अस्मिन्** वर्तमानतया सन्निहिते **अस्मद्दर्शनापायकाले** अस्मद्दर्शनपरिक्षयकाले **एते** तत्ववादिनः **द्राक् विश्वं प्रकामं प्राप्नुवन्ति**। कथमिव? **लोकापायकाले** लोकक्षयकाले प्रळयकाले **लयापः** प्रळयजलानि **यद्वत्** ॥ १६ ॥

(त.चं.) उक्त्वा खलु। 'अलङ्खल्वोः प्रतिषेधयोः प्राचां क्त्वा'[३.४.१८]। अलम् खलु इत्येतयोः प्रतिषेधवाचिनोरुपपदयोर्धातोः क्त्वाप्रत्ययो भवति प्राचामाचार्याणां मतेन। अलमुक्त्वा। खलूक्त्वा। प्राचाङ्ग्रहणं विकल्पार्थम्। अलं वचनेन। खलु वचनेन। 'व्याप्नुवन्ति प्रकामम्' इत्यपि पाठः सम्भाव्यते ॥ १६ ॥

आकर्ण्येत्थं तस्य वाणीमथान्यो
मानी तेषां मानिनां चित्तवेत्ता।
स्वानां चेतो नन्दयन् मन्दचेता
धृष्टामुच्चैर्वाचमाचष्ट कष्टः ॥ १७ ॥

(प.दी.) आकर्ण्येति। **अथ इत्थं तस्य वाणीमाकर्ण्य मानिनां तेषां** पद्मतीर्थादीनां **चित्तवेत्ता मानी** स्वयं च मानी सन् **अन्यः कष्टः** कश्चित्, **स्वानां** स्वयूथ्यानां **चेतः**, जातावेकवचनम्, चेतांसीति यावत्, **नन्दयन् मन्दचेताः** मन्दबुद्धिः सन् **धृष्टां** धैर्योपेतां **वाचं उच्चैः आचष्ट** उवाच। 'चक्षिङ् व्यक्तायां वाचि' इति धातुः ॥ १७ ॥

(त.चं.) मानी दृप्तः । मानो दर्पः । वाचमाचष्ट कष्टः लोकशोकदः । कष्टं दुःखम् । तत्कारणमपि कष्टमित्युच्यते । 'कृच्छ्रगहनयोः कषः'[७.२.२२] । कष हिंसायामिति धातोर्निष्ठायामिडागमो न भवति कृच्छ्रगहनयोरर्थयोः । कष्टोऽग्निः । कष्टा भार्या । कष्टं व्याकरणम् ॥ १७ ॥

तेजःशङ्कामात्रतो यद् विलीनं
धिग् भीरूणां मानसं मानहीनम् ।
एकान्तेन प्राप्ततेजोविलीनं
स्थेयो यस्माद् भाति हैयङ्गवीनम् ॥ १८ ॥

(प.दी.) तेज इति । **यत् तेजःशङ्कामात्रतः** तेजोऽस्तीति शङ्कामात्रत एव **विलीनं** द्रवीभूतं भवति । 'लीङ् द्रवीभावे'[१] इति धातुः । **भीरूणां** अधीराणां **मानहीनं** तत् **मानसं धिक्** । **यस्मात्** भीरूणां मानसात् **एकान्तेन** नियमेन **प्राप्ततेजोविलीनं** स्वसम्बद्धाग्न्यादितेजस्कं सदेव विलीनं द्रवीभूतं **हैयङ्गवीनं** नूतनघृतम्, 'तत्तु हैयङ्गवीनं यद् ह्योगोदोहोद्भवं घृतम्' इत्यभिधानात्, **स्थेयः** अतिस्थिरं **भाति** प्रतीयते । अयं भावः– हैयङ्गवीनमपि सम्यगग्न्यादितेजःसम्बन्धे सत्येव विलीयते । नतु तेजःशब्दमात्रेण । भीरूणां मनस्तु विपक्षशब्दश्रवणमात्रेण बिभेति । तस्मात् कारणाद् हैयङ्गवीनादपि भीरूणां मानसमतिचपलमिति । स्थेय इति 'प्रियस्थिर–' इत्यादिना सूत्रेण स्थिरशब्दस्य 'स्थ' इत्ययमादेशः । ईयसुन्प्रत्ययश्च । आद् गुणः ॥ १८ ॥

(त.चं.) विलीनम् । विलीयते स्म । लीङ् श्लेषणे । विलिनाति स्म वा । ली श्लेषणे । 'द्रवीभावे' इति च वक्तव्यम् । द्रुतं हि विलीनमुच्यते । मानहीनम् । अभिमानहीनम् ॥ १८ ॥

येषां विद्या शाङ्करी शङ्करी नो
देवादीनां बाध्यतां साधयन्ती ।

१. 'लीङ् श्लेषणे' इति तु प्रचरो धातुपाठः । 'ली द्रवीकरणे' इति च चुरादौ ।

शौक्रीवालं लज्जयेद् देवपूज्यं
तेषामेषां सन्निधौ को विषादः ॥ १९ ॥

(भा.प्र.) बाध्यतां बाधज्ञानगम्यतां बाध्यतां च[1] ॥

(प.दी.) **येषामिति** । **येषां** पद्मतीर्थादीनां **शाङ्करी** शङ्कराचार्यसम्बन्धिनी **विद्या तेषामेषां** पद्मतीर्थादीनां **सन्निधौ को विषादः** अस्माकं का भीः? कथम्भूता सा विद्या? **नः अस्माकं शङ्करी** सुखकरी । पुनः कथम्भूता? **देवादीनां** देवतिर्यङ्मनुष्यादीनां **बाध्यतां** बाधज्ञानगोचरतां **साधयन्ती** । ब्रह्मैकमेवाबाध्यम्, तदन्यत् सर्वं ब्रह्मापरोक्षज्ञानेन बाध्यत इति हि मायिना स्वशास्त्रे समर्थितम् । या शाङ्करी विद्या **देवपूज्यं** बृहस्पतिं **[अलं] लज्जयेत्** । देवगुरुविद्याऽपि न शङ्करविद्यासदृशीत्यर्थः । केव? **शौक्रीव** । देवदेवानुगादीनां **बाध्यतां** पीड्यतां **साधयन्ती** कृत्याप्रयोगादिरूपा शुक्रविद्या यथा देवगुरुं देवादीनां बाध्यताभावविधानाक्षमं लज्जयेत् तद्वदिति ॥

(त.चं.) बाध्यतां त्रैकालिकनिषेधप्रतियोगित्वं साधयन्ती शाङ्करी विद्या । कृत्यादिना देवादीनां पीडितत्वं साधयन्ती शौक्री विद्या । शुक्रस्येयं शौक्री । देवपूज्यं देवगुरुम् ॥ १९ ॥

यद्यद्वैतं कर्कशैर्गौणतर्कै
रुद्धं साध्यं नैव भात्यस्तु तावत् ।
षट्कर्मज्ञैर्दिव्यमन्त्रौषधाढ्यै-
रेतैर्गुप्तान् नो विजेता न कश्चित् ॥ २० ॥

(भा.प्र.) पालनवशीकरणस्तम्भनविद्वेषणोच्चाटनमारणानि षट्कर्माणि ॥

(प.दी) **यदीति** । **कर्कशैः** निराकर्तुमशक्यैः **गौणतर्कैः** सगुणसाधकैस्तर्कैः

---

१. 'बाधाविषयतां च' इति, 'पीड्यतां च' इति वा पाठः स्यात् ।

रुद्धं प्रतिरुद्धं **अद्वैतं यदि साध्यं** साधयितुं शक्यमिति **नैव भाति**, विपक्ष-तर्काणामतिप्रबलत्वाद् यद्यद्वैतसमर्थनमशक्यमिति प्रतीयतेऽस्मद्यूथ्यानाम्, **अस्तु तावत्** तत् तथाऽस्तु । तर्ह्यद्वैतसमर्थनाभावेऽस्माकं पराजयः स्यादिति चेत्, नैवमाशङ्क्यम् । **षट्कर्मज्ञैः** पालनवशीकरणस्तम्भनविद्वेषणोच्चा-टनमारणलक्षणषट्कर्मज्ञैः पुनः **दिव्यमन्त्रौषधाढ्यैः** पद्मतीर्थाद्यैः **एतैः गुप्तान् नः** अस्मान् **विजेता कश्चित् न** हि[१] ॥ २० ॥

(त.चं.) कर्कशैः नैर्गुण्यवादिनां श्रवणकर्कशैर्दृढैश्च । 'कर्कटः कर्कशो दृढः' इति च । तर्कैः आगमैर्वा साध्यं नैव । षट्कर्मज्ञैः । परकीयानां मन्त्रौषधेभ्यः स्वीयानां पालनम्, यथा ते परवशा न भवेयुः । ये च परेषां वशंवदास्तेषां चित्तसम्मोहनेन स्ववशीकरणम् । ये च स्वप्रतिरोधार्थं परिधावन्ति तेषां व्यापारस्तम्भनम् । यथा स्वप्रतिकूलान् विद्विष्यात् सर्वोऽपि लोकस्तथा विद्वेषवर्धनम् । परेषां स्वस्थानात् प्रच्यावनमुच्चाटनम् । अस्मा-ल्लोकादेव प्रच्यावनं मारणं कर्मेति वामाचरणानां षट् कर्माणि । तथाहि शारदातिलके– 'शान्तिवश्यस्तम्भनानि विद्वेषोच्चाटने ततः । मारणान्तानि शंसन्ति षट्कर्माणि मनीषिणः' इति । शान्तिरिति पालनमिति चैकोऽ-र्थः । 'रोगकृत्याग्रहादीनां निरासः शान्तिरीरिता । वश्यं जनानां सर्वेषां विधेयत्वमुदीरितम् । प्रवृत्तिरोधः सर्वेषां स्तम्भनं समुदाहृतम् । स्निग्धानां द्वेषजननं मिथो विद्वेषणं मतम् । उच्चाटनं स्वदेशादेर्भ्रंशनं परिकीर्तितम् । प्राणिनां प्राणहरणं मारणं समुदाहृतम्' इति च । यजनं याजनमध्य-यनमध्यापनं दानं प्रतिग्रहश्चेति षट् कर्माणीत्यापातध्वनिः ॥ २० ॥

यद्यप्येवं न ह्युपेक्ष्यो विपक्षः
किन्तु प्राप्तो नाधुनाऽऽक्रन्दकालः ।
अप्यद्वन्द्व[द्वः]स्वात्मबोध[धः]प्रतीतै-
राचार्यैर्यच्छङ्क्यते शङ्कराद्यैः ॥ २१ ॥

---

१. 'नो न जेता हि कश्चित्' इति पाठान्तरम् । तदा मूलपाठोऽपि तथैव ।

(प.दी.) **यदीति**। **यद्यपि एवं** षट्कर्मज्ञैरेतैर्गुप्तान् नः कश्चिद् विजेता न। तथाऽपि **विपक्षः उपेक्ष्यो न हि**। यथाशक्ति नानोपायैस्तन्निराकरणे प्रयत्नः कर्तव्य एव। तर्हि विपक्षो नोपेक्ष्यश्चेत्, 'आक्रन्दं मे हन्त शृण्वन्तु' इत्यादि वदन् 'तेजःशङ्कामात्रतो यद् विलीनम्' इत्यादिना किमित्याक्षिप्यत इत्याशङ्क्य परिहरति– **किन्त्वित्यादिना**। **किन्तु** तथाऽपि **अधुना** इदानीं **आक्रन्दकालो न प्राप्तः**। तस्मादधुनाऽऽक्रन्दं कुर्वन्नाक्षिप्यत इति भावः। विपक्षः कुतो नोपेक्ष्य इत्यपेक्षायामाह– **अपीत्यादि**। भेदसमर्थनदक्षो विपक्षः **अद्वन्द्वस्वात्मबोधप्रतीतैः**, अद्वन्द्वेन असदृशेन स्वात्मबोधेन शोभनेनाऽत्मज्ञानेन, जीवब्रह्मैक्यज्ञानेनेति यावत्, तेन प्रतीतैः ख्यातैः, 'प्रतीतः प्रसिते ख्याते' इत्यभिधानम्, **शङ्कराद्यैः आचार्यैरपि शङ्क्यते यत्**। अद्वैतज्ञानवत्त्वेन प्रसिद्धैः शङ्कराचार्यप्रभृतिभिरपि विपक्षो निराकर्तुं शक्यते नवेति शङ्क्यते यत् तस्मात् प्रबलत्वाद् विपक्षो नोपेक्ष्य इत्यर्थः। **अद्वन्द्वस्वात्मबोधप्रतीतैः**, अद्वन्द्वस्य द्वितीयरहितस्य विगळिताशेषभेदादिप्रपञ्चस्य स्वात्मनः शुद्धस्य निर्गुणस्याऽत्मनः बोधेन प्रतीतैरिति वा। तथाहि– मायिनो निर्गुणसगुणभेदेन ब्रह्मद्वैविध्यमङ्गीकुर्वन्ति। तत्र विगळिताशेषभेदादिप्रपञ्चं निर्विशेषं ब्रह्मैव शुद्धम्। तदपरोक्षज्ञानमेव मोक्षसाधनमिति चाऽहुः। तेन प्रतीतैरिति वा। अथवा– **अद्वन्द्वः** असदृशः, **स्वात्मबोधः** श्रीपूर्णप्रज्ञाचार्यः, **प्रतीतैः** प्रसिद्धैः यत्तैर्वा **शङ्कराद्यैराचार्यैरपि शङ्क्यते यत्** इति वा॥ २१॥

(त.चं.) 'अद्वन्द्वस्वात्मबोधप्रतीतैः' इत्यत्र प्राचामाचार्याणां मतेन द्वयी गतिः। अद्वन्द्वस्वात्मबोधप्रतीतैरित्येकं पदमित्येकः पक्षः। 'अद्वन्द्वः स्वात्मबोधः प्रतीतैः' इति त्रीणि पदानीत्यपरः। प्रथमपक्षेऽपि पुनर्द्वयी गतिः– अद्वन्द्वेन स्वात्मबोधेन प्रतीतैरिति। अद्वन्द्वस्य स्वात्मनो बोधेन प्रतीतैरिति च। द्वितीये पुनरद्वन्द्वः अप्रतिद्वन्द्वः, स्वतन्त्रात्मनो बोधोऽस्येति स्वात्मबोधो भगवदभिज्ञः पूर्णप्रज्ञः। अप्रांशुनूत्नोपपदाद्यैरपि प्रतीतैः ख्यातैः सङ्ख्यावद्भिः जय्यो नवेति शङ्क्यते यत् तत् नह्युपेक्ष्यो विपक्षः॥ २१॥

पारम्पर्येणाऽगतं तत्त्वशास्त्रं
हन्तोत्सन्नं नूतनेनेत्युदीर्य ।
तेषां दोषा वर्णनीया विदग्धैः
सन्तोऽसन्तो वाऽपि मध्यस्थलोके ॥ २२ ॥

(प.दी.) पारम्पर्येणेति । **विदग्धैः** चतुरैरस्मदीयैः पुरुषैः **मध्यस्थलोके** तेषु चास्मासु चोदासीनजने **तेषां** श्रीमध्वादीनां **सन्तो वा असन्तोऽपि वा** विद्यमाना अविद्यमाना वा **दोषाः वर्णनीयाः**। किं कृत्वा? **नूतनेन** इदानीन्तनेन तेन श्रीमध्वाचार्येण **पारम्पर्येण** अनादितः परम्परया **आगतं तत्वशास्त्रं** अद्वैततत्वलक्षणतत्वनिर्णयात्मकं शङ्कराचार्यशास्त्रं **उत्सन्नं** नाशितं **हन्त इति** इत्यादि **उदीर्य,** पूर्वमेवमुक्त्वा पश्चात् तद्दोषवर्णनं कार्यम् । तर्हि मध्यस्थानां तेष्वनादरो भवेदस्मासु चाऽदर इत्यभिप्रायः ॥ २२ ॥

(त.चं.) पारम्पर्येणाऽगतं मायावादरूपं तत्वशास्त्रं विहाय स्वप्रज्ञावादं तत्ववादं वदता नूतनेन । इत्युदीर्य तेषां मध्वस्य मध्वशिष्याणां च दोषा वर्णनीयाः ॥ २२ ॥

स्वाभिप्रायो ब्रह्मवत् स्यादवाच्यो
मायाशक्त्या सर्वनिर्वाहसिद्धिः ।
इत्थं नीत्या शास्त्रनीत्येव बाध्यः
सर्वो लोकः स्वात्मनो यः परः स्यात् ॥ २३ ॥

(भा.प्र.) परः शत्रुरन्यश्च ॥

(प.दी.) **स्वाभिप्राय** इति । तेषां दोषं वदद्भिरस्मदीयैः **स्वाभिप्रायः** 'अस्मानेव भजध्वम्, न तान्' इत्यादिरूप आत्माभिप्रायः **ब्रह्मवदवाच्यः स्यात्** । यथाऽस्मन्मते ब्रह्मावाच्यं तद्वदिति भावः । कुतः? **मायाशक्त्या** छद्मसामर्थ्येन **सर्वनिर्वाहसिद्धिः** परखलीकरणास्मदुत्कर्षाद्यखिलनिर्वाह-

सिद्धिः यस्मात् तस्मादभिप्रायो न वाच्य इत्यर्थः । **इत्थं** एवं **नीत्या** उपायेन **सर्वः** अपि **लोकः बाध्यः** । कोऽयं लोकः? **यः स्वात्मनः परः** प्रतिकूलः **स्यात्** । परः कथं बाध्यः? **शास्त्रनीत्येव** । शास्त्रयुक्त्या यथा स्वप्रतिकूलवादिजनो बाध्यो निराकर्तव्यस्तद्वदिति भावः ॥ २३ ॥

(त.चं.) मायाशक्त्या आभिचारप्रयोगादिरूपया । शास्त्रनीत्या यथा स्वात्मनः परोऽन्यः सर्वो लोकः बाध्यत्वेन निराकरणीयस्तथाऽयं परः मायावादिनां शत्रुस्तत्ववादिलोको मायाशक्त्या बाधनीयः ॥ २३ ॥

ग्रामेग्रामे वार्यतां माननैषां
पूर्वंपूर्वं सामपूर्वैरुपायैः ।
सम्प्राप्तानां मानभङ्गाय कार्यं
ग्रन्थाकर्षाद्युद्यतैरस्मदीयैः ॥ २४ ॥

(प.दी.) **ग्राम** इति । **ग्रामेग्रामे** । वीप्सायां द्विर्वचनम् । प्रतिग्राममित्यर्थः । **एषां** तत्ववादिनां **सामपूर्वैः** सामभेददानाद्यैः **उपायैः पूर्वम्पूर्वं** ग्रामप्रवेशात् पूर्वमेव **मानना** सम्भावना **वार्यताम्** । आगमननमस्कारभिक्षाप्रदानादिसम्भावनं न कर्तव्यमिति निवार्यतामित्यर्थः । **सम्प्राप्तानां** येनकेनाप्युपायेन ग्रामं प्राप्तानां तेषां **मानभङ्गाय** अभिमानखण्डनाय **उद्यतैः** सन्नद्धैः **अस्मदीयैः ग्रन्थाकर्षादि** ग्रन्थाकर्षणदण्डखण्डनताडनादिकं **कार्यम्** ॥ २४ ॥

(त.चं.) मानना पूजा । मानभङ्गाय गौरवभङ्गाय ॥ २४ ॥

इत्याद्येते कार्यमालोच्य काले
चक्रुर्वक्राश्चक्रिभक्तप्रतीपम् ।
योग्या मङ्क्तुं तेऽन्यथा स्युः कथं वा
दुःखोग्राम्भस्यन्धतामिस्रसिन्धौ ॥ २५ ॥

(प.दी.) इत्यादीति । **वक्राः** वक्रबुद्धयः **एते** मायिनः **काले** अस्मिन् काले **इत्यादि** 'पारम्पर्येणाऽगतम्–', 'स्वाभिप्रायो ब्रह्मवत् स्यात्– ', 'ग्रामेग्रामे वार्यताम्' इति श्लोकत्रयेण कर्तव्यतयोक्तं **कार्यं आलोच्य** पुनरपि विचार्य **चक्रिभक्तप्रतीपं** चक्रिभक्तस्य प्रतीपं विरोधं दोषवर्णनसम्भावनानिराकरणादिकं **चक्रुः** । **अन्यथा** तत्प्रतीपकरणाभावे **ते** मायिनः **दुःखोग्राम्भसि,** दुःखमेवोग्रमम्भो जलं यस्मिन् तत् तथोक्तम्, तस्मिन् **अन्धतामिस्रसिन्धौ** दुःखाख्योग्रजलोपेते अन्धतामिस्राख्यसमुद्रे **मङ्क्तुं** मज्जनाय **कथं वा योग्याः स्युः** । तमोयोग्यानां तेषां तमसि निमज्जनं तावदावश्यकम् । तच्च श्रीहरिमुख्यप्राणद्वेषैकसाध्यम् । 'द्वेषं ह्युते नहि हरौ तमसि प्रवेशः । प्राणे च' इत्याद्युक्तत्वात् । तस्मात् तत्प्रतीपकरणं तेषामेव युक्तमिति भावः ॥ २५ ॥

(त.चं.) चक्रिभक्तस्य विष्णुभक्तस्य मध्वस्य, चक्रिभक्तानां तच्छिष्याणां च प्रतीपं प्रतिकूलं चक्रुः । मङ्क्तुम् । टु मस्जो शुद्धौ । 'शुद्ध्या स्नानं ब्रुडनं च लक्ष्यते' इति क्षीरस्वामी ॥ २५ ॥

व्रत्याकारं वासुदेवद्विषं ते
प्राज्ञम्मन्यं पुण्डरीकाभिधानम् ।
वादव्याजाक्षेपकामाः कुमन्त्रा-
चक्रुर्यत्तं रूप्यपीठालयेऽमी ॥ २६ ॥

(प.दी.) व्रत्याकारमिति । **रूप्यपीठालये** मिळिता इति शेषः । **तेऽमी** मायिनः **कुमन्त्रात् वादव्याजाक्षेपकामाः** । वादं कुर्म इति व्याजेन निराकर्तुकामाः सन्तः **व्रत्याकारं** यतिवेषं **वासुदेवद्विषं प्राज्ञम्मन्यं** अहमेव प्राज्ञ इति मन्यमानं **पुण्डरीकाभिधानं** पुण्डरीकपुरीनामकं **यत्तं** वादाय **सन्नद्धं चक्रुः** ॥ २६ ॥

(त.चं.) वासुदेवद्विषं स्वभावतो विष्णुवैष्णवद्विषम् । रूप्यपीठस्याऽलये देवालये ॥ २६ ॥

यद्वत् सिंहं ग्रामसिंहोऽशुचीच्छः
हंसं काको यद्वदेवैकदृष्टिः ।
यद्वन्मायी भूरिमायस्तरक्षुं
तद्वद् विद्वद्वर्यमाह्वास्त मूढः ॥ २७ ॥

(प.दी.) यद्वदिति। **मूढः** पुण्डरीकपुरी **विद्वद्वर्यं** विद्वच्छ्रेष्ठं श्रीमध्वाचार्यं **आह्वास्त**। 'स्पर्धायामाङः' इत्याङ्पूर्वाद् ह्वयतेरात्मनेपदम्। कथमाह्वास्त? **अशुचीच्छः** अपवित्रकामः **ग्रामसिंहः** सारमेयः **सिंहं यद्वत्**। अयमपि **अशुचीच्छः**। वेदादिप्रमाणविरुद्धत्वादशुचावात्मनो ब्रह्मतादात्म्येऽनुसन्धानवत्त्वात् । **एकदृष्टिः** एकाक्षः **काकः हंसं यद्वदेव** । अयमपि **एकदृष्टिः** । ब्रह्मैकमेव सत्यम्, अन्यत् सर्वं मिथ्येति दर्शनात् । **मायी** छद्मवान् **भूरिमायः** सृगालः[1] । 'शिवा स्त्रियां भूरिमायो गोमायुर्मृगधूर्तकः' इत्यमरः । **तरक्षुं** शार्दूलं **यद्वत्** । 'शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः' इत्यमरः[2] । अयमपि **मायी** । सर्वप्रपञ्चारोपोपादनत्वेनेश्वराश्रिताप्रामाणिकमायाभ्युपगमात् ॥ २७ ॥

(त.चं.) 'भूरिमायस्तरक्षुम्' इति सार्वत्रिकः पाठः। भूरिमायुरिति प्राचीनकोशेषु । प्रमाद्यन्ति लिपिकृतः । तरक्षुरिति व्याघ्र उच्यते । मृगादनोऽप्युच्यते। 'शिवङ्गि'[ಶಿವಂಗಿ] इति भाषायां यमाहुः। अत्र तु व्याघ्रः। आह्वास्त स्पर्धयाऽऽह्वयामास । 'स्पर्धायामाङः'[१.३.३१] 'स्पर्धायां विषये आङ्पूर्वाद् ह्वयतेरात्मनेपदं भवति । स्पर्धा सङ्घर्षः, पराभिभवेच्छा, स

१.यद्यपि हस्तलिखिते कोशे–'भूरिमायुः सृगालः' इति पठ्यते । 'शिवा स्त्रियां भूरिमायुर्गोमायुर्मृगधूर्तकः' इति च। निश्चीयेत लिपिकृत्प्रमादोऽयमिति । यतष्टीकाकृता पुराऽपीदं कोशवाक्यमुद्धृतं तृतीये 'स्त्रियां शिवा भूरिमायो गोमायुर्मृगधूर्तकः' [३.२४] । अतः स एव तत्सम्मतः पाठ इति पुनरिहान्यथैव पठनं न सम्भवति ।
२.'तरक्षुस्तु मृगादनः' इति त्वन्तत्वान्न पूर्वान्वयीति नेदं कोशवाक्यमत्रोपयुक्तम् । 'व्याघ्रो द्वीपी पुण्डरीकस्तरक्षुः' इति तु हलायुधः प्रकृतोपयुक्तः ।

विषयो धात्वर्थस्य। धातुस्तु शब्दक्रिय एव। मल्लो मल्लमाह्वयते' इति जयादित्यः। अस्पर्धायां न भवति– ब्राह्मणमाह्वयति भोजनाय। 'आत्मनेपदेष्वन्यतरस्याम्'[३.१.५४] इति द्वेधा रूपम्– अलिपत, अलिप्त। असिचत, असिक्त। आह्वत आह्वास्त। 'ह्वेञ् स्पर्धायां शब्दे च' इति क्षीरस्वामी। 'ह्वेञ् स्पर्धायां वाचि' इति काशकृत्स्नः ॥ २७ ॥

अप्यल्पोऽसौ न ह्युपेक्षाम्बभूवे
लोलात्मेवादक्षपक्षः पतङ्गः।
मध्वेनाहो दुस्तरेण स्वभावात्
तेजोराजीराजितेनाग्निनेव ॥ २८ ॥

(प.दी.) **अपीति**। **पतङ्ग इव** शलभ इव **लोलात्मा** चपलचित्तः। **अदक्षपक्षः**। शलभो यथा अदक्षपक्षः असमर्थपतत्रवान्[१] तद्वत् स्वपक्षसमर्थने परपक्षनिराकरणे चासमर्थपक्षः। अत एव **अल्पोऽप्यसौ** पुण्डरीकपुरी **मध्वेन नोपेक्षाम्बभूवे** नोपेक्षितो हि। **अहो**। कथम्भूतेन मध्वेन? **स्वभावाद् दुस्तरेण**। मन्त्रौषधतपोवेदविद्याजनितसामर्थ्यमनपेक्ष्य केवलस्वरूपसामर्थ्यादेव दुस्तरेण। केनेव? **तेजोराजीराजितेन** तेजःसमूहोद्भासितेन **अग्निनेव**। अग्निमभिपतन्नल्पोऽपि पतङ्गः यथाऽग्निना नोपेक्ष्यते। किन्तु दह्यत एव। एवमसावपि नाल्प इत्युपेक्षित इति भावः ॥ २८ ॥

(त.चं.) लोलात्मा। पतङ्गश्चलकायः। पुण्डरीकपुरी तु चपलचित्तः। तेजोराजीराजितेन। 'आळी श्रेण्यावळी पङ्क्तिर्वीथी राजी च कथ्यते' इति च ॥ २८ ॥

मानैर्मान्यैर्भासमानोऽसमानै-
राक्षिप्यैनं स्वं मतं साधयित्वा।

---

१. कोशेषु 'शुभ्रपतत्रवान्' इति पठ्यते। स्फुटं स्खलनम्। 'आशुपतने असमर्थपतत्रवान्' इति वा पाठः स्यात्। विश्वपतितीर्थीयेऽपि तथा।

प्रीत्यै विष्णोरुत्तमप्रीतितीर्थो
वेदव्याख्यां वेदवेदी चकार ॥ २९ ॥

(प.दी.) **मानैरिति** । **असमानैः** प्रबलैरसदृशैर्वा **मान्यैः मानैः** वेदादिप्रमाणैः **भासमानः** विवक्षितार्थे वेदादिप्रबलप्रमाणोदाहरणेन शोभमानः **वेदवेदी** वेदज्ञः **उत्तमप्रीतितीर्थः** श्रीमत्परमानन्दतीर्थाचार्यः **एनं** स्वप्रत्यर्थिभूतं मायिनं **आक्षिप्य** निराकृत्य पुनः **स्वं मतं** स्वसिद्धान्तं **साधयित्वा विष्णोः प्रीत्यै वेदव्याख्यां चकार** ॥ २९ ॥

(त.चं.) प्रतिवादिभिरपि मान्यैर्मानैः । अत एवासमानैः ॥ २९ ॥

आम्नायं ये पेठुराम्नायपूर्वं
प्राप्ता विप्रास्तत्र कौतूहलेन ।
पर्यासीनास्तावदाचार्यवर्यं
प्रेक्ष्यं प्रेक्षाञ्चक्रिरेऽनेकसङ्ख्याः ॥ ३० ॥

(प.दी.) **आम्नायमिति** । **तावत्** तदा वेदव्याख्यानसमये **तत्र ये कौतूहलेन प्राप्ताः** ते **अनेकसङ्ख्याः विप्राः पर्यासीनाः** परित उपविष्टाः **प्रेक्ष्यं** दर्शनीयं **आचार्यवर्यं प्रेक्षाञ्चक्रिरे** ददृशुः । कीदृशास्ते विप्राः? **ये आम्नायपूर्वम्**, आम्नायोऽनन्यथापाठः, स्वरवर्णादीनामन्यथापाठरहितं यथा भवति तथा, सत्सम्प्रदायपूर्वकमिति यावत्, **आम्नायं** वेदं **पेठुः** पठितवन्तः ॥ ३० ॥

(त.चं.) आम्नायं ये पेठुराम्नायपूर्वम् । 'वेदः श्रुतिस्तथाऽऽम्नायः' इति, 'आम्नायः सम्प्रदायः स्यात् पारम्पर्यं गुरुक्रमः' इति च ॥ ३० ॥

उक्ताङ्गेभ्यः कादिकान् व्यञ्जयन्तं
तत्तन्मात्राव्यञ्जनादौ प्रवीणम् ।
तिस्रोऽवस्थास्तद्गुणैर्भावयन्तं
देवा दृष्ट्वा ह्यस्मरन् देवदेवम् ॥ ३१ ॥

(भा.प्र.) उक्ताङ्गेभ्यः कादिकान्। 'अकुहविसर्जनीयानां कण्ठः' इत्याद्युक्तस्थानेभ्यः ककारादीन्, 'ब्रह्मा शिरसि, ललाटे रुद्रः' इत्याद्युक्ताङ्गेभ्यो ब्रह्मादिकान् व्यञ्जयन्तम्। तत्तन्मात्राव्यञ्जनादौ कादीनामुचितमात्रानूकूल्येन व्यञ्जने। अपरुषव्यक्तत्वे चाऽदिशब्दात्।

'एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते।
'त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रकम्॥[१]
'यथा व्याघ्री हरेत् पोतं दंष्ट्राभ्यां नतु पीडयेत्।
'भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्'

इति च अपरुषव्यक्तत्वे[२]। शब्दतन्मात्रादिसृष्टौ भूतादिसृष्टौ च। किं बहुना? तिस्रोऽवस्थास्तद्गुणैः। पश्यन्ती मध्यमा वैखरीति शब्दस्फोरणसमये तिस्रोऽवस्थास्तत्तद्देवताध्यानात्मकैर्गुणैः–

'तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
'वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये' इति च।

सृष्टिस्थितिसंहारावस्थास्तद्गुणैस्सत्वादिभिश्च॥

(प.दी.) उक्तेति। उक्ताङ्गेभ्यः। 'अकुहविसर्जनीयानां कण्ठः। इचुयशानां तालु। उपूपध्मानीयानामोष्ठौ' इत्यादिना ककारादिवर्णोच्चारणस्थानत्वेनोक्तकण्ठताल्वाद्यङ्गेभ्यः **कादिकान्** ककारादिकान् वर्णान् **व्यञ्जयन्तं** उच्चारयन्तम्। **तत्तन्मात्राव्यञ्जनादौ** ककारादितत्तन्मात्रावर्णानामुचितैकद्व्यादिमात्राव्यञ्जने, आदिशब्दाद् व्यक्तत्वेन अपरुषत्वेन चोच्चारणे **प्रवीणं** चतुरम्। यथोक्तम्– 'एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते। त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं त्वर्धमात्रकम्' इति। व्यक्तत्वेना-

---

१. 'चाषस्तु वदते मात्रां द्विमात्रां वायसोऽब्रवीत्। शिखी त्रिमात्रो विज्ञेय एष मात्रापरिग्रहः' इति च शीक्षाभिज्ञाः।

२. तथाह्युत्तरश्लोके– 'एवं वर्णाः प्रयोक्तव्या नाव्यक्ता नच पीडिताः। सम्यग्वर्णप्रयोगेण ब्रह्मलोके महीयते' इति।

परुषत्वेन चोच्चारणप्रकारश्च सदृष्टान्त उच्यते–'यथा व्याघ्री हरेत् पोतं दंष्ट्राभ्यां नतु पीडयेत् । भीता पतनभेदाभ्यां तद्वद् वर्णान् प्रयोजयेत्' इति । एवं चायमभिप्रायः– अर्धमात्रत्वेन ककारादिहलामुच्चारणसमये तेषां स्थानत्वेनोक्तकण्ठताल्वाद्यङ्गेभ्य उच्चारणे, ककारादीनां यथासम्भवं ह्रस्वदीर्घप्लुतादिकाकारादिस्वरशिरस्कत्वेनोच्चारणे, तत्रापि व्यक्तत्वेनापरुषत्वेन चोच्चारणे चतुरमिति । **तिस्रोऽवस्थाः** पश्यन्तीमध्यमावैखरीनामिकास्तिस्रोऽवस्थाः वर्णरूपस्योच्चारणसमये भवन्ति– 'तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये' इत्युक्तत्वात् । तास्तिस्रोऽवस्थाः **तद्गुणैः** तासां पृथक्पृथगुक्तदेवताध्यानात्मकगुणैः **भावयन्तं** उत्पादयन्तम् । पश्यन्त्यादीनामुक्तदेवताध्यानाख्यगुणयुक्तत्वेन पश्यन्त्याद्यवस्थाश्चोत्पादयन्तमिति भावः । **देवाः** वेदव्याख्यानसमये एवम्भूतं श्रीमध्वाचार्यं **दृष्ट्वा देवदेवं** श्रीमन्नारायणं **अस्मरन् हि** । कथम्भूतम्? **उक्ताङ्गेभ्यः** 'ब्रह्मा शिरसि ललाटे रुद्रः', 'चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत । मुखादिन्द्रश्चाग्निश्च–' इत्यादिश्रुतिभिर्ब्रह्माद्युत्पत्तिस्थानत्वेनोक्तशिरआद्यङ्गेभ्यः **कादिकान्** ब्रह्मादीन् **व्यञ्जयन्तं** सृजन्तम् । **तत्तन्मात्राव्यञ्जनादौ** आकाशादिभूतानां तत्तन्मात्रागुणभूतशब्दादिसृष्टौ आकाशादिभूतसृष्टौ च **प्रवीणम्** । **तिस्रोऽवस्थाः** सृष्टिस्थितिसंहारलक्षणास्तिस्रोऽवस्थाः **तद्गुणैः** सृष्ट्यादावङ्गभूतैः सत्वादिगुणैः **भावयन्तं** उत्पादयन्तम् ॥ ३१ ॥

(त.चं.) उक्ताङ्गेभ्यः । 'अष्टौ स्थानानि वर्णानामुरः कण्ठः शिरस्तथा । जिह्वामूलं च दन्ताश्च नासिकोष्ठौ च तालु च' इति शीक्षायाम् । कादिकान् ककारादीन् वर्णान् मध्वः । कादिकान् ब्रह्मादीन् देवान् देवदेवो नारायणः । तिस्रोऽवस्थास्तद्गुणैर्भावयन्तम् । 'आत्मा बुद्ध्या समेत्यार्थान् मनो युङ्क्ते विवक्षया । मनः कायाग्निमाहन्ति स प्रेरयति मारुतम् । मारुतस्तूरसि चरन् मन्द्रं जनयति स्वरम् । प्रातःसवनयोगं तच्छन्दो गायत्रमीरितम् । कण्ठे

माध्यन्दिनयुजं मध्यमं त्रैष्टुभानुगम् । तारं तार्तीयसवनं शीर्षण्यं जागतानुगम् । सोदीर्णो मूर्ध्न्यभिहतो वक्त्रमापद्य मारुतः । वर्णान् जनयते' इति च । उरसि पश्यन्ती कण्ठे मध्यमा शिरसि वैखरीति तिस्रोऽवस्थाः । तत्तद्देवताध्यानात्मकगुणैः । ध्यानं तूक्तं भावप्रकाशिकायाम् । तस्यायं समग्रः पाठः–

यासा मित्रावरुणसदनादुच्चरन्ती त्रिषष्टिं
वर्णानन्तः प्रकटकरणैः प्राणसङ्गप्रसूतिः ।
तां पश्यन्तीं प्रथममुदितां मध्यमां बुद्धिसंस्थां
वाचं वक्त्रे करणविशदां वैखरीं च प्रपद्ये ।

सङ्कल्पध्यानदेवतयोर्मित्रावरुणयोः सदनात् हृदयात् ॥ ३१ ॥

आदौ ह्रस्वत्वेन वत्सानुसृत्यां
मात्रापादौ [मात्रा पादौ] वर्तयन् दृश्यमानः ।
कुर्वन्नन्याश्चाप्रयरूपा विवृत्ती-
र्गोविन्दश्रीरास गोविन्दभक्तः ॥ ३२ ॥

(भा.प्र.) आदौ बाल्ये ह्रस्वत्वेन ह्रस्वरूपत्वेन पादौ वर्तयन् गच्छन् मात्रा दृश्यमानः चरणक्षमो मम शिशुरिति प्रीत्या । गोवत्सानामनुसृत्याम् । अन्यगोपीश्च विगतवृत्त्यन्तराः कुर्वन् स्वलीलया हि गोविन्दः ।

'आदिह्रस्वा वत्सानुसृतिरन्त्या वत्सानुसारिणी ।
'पाकवत्युभयह्रस्वा दीर्घमध्या[१] पिपीलिका ।

---

१. सर्वत्रैवमेव पठ्यते । नात्र मध्याक्षरस्य दीर्घत्वं विवक्षितम् । किन्तु पूर्वपदान्त्यस्य उत्तरपदादेश्चेत्युभयोरपि स्वरयोर्दीर्घत्वम् । तेनोपलभ्यमानशीक्षाग्रन्थानामनुसारेण 'दीर्घवृद्धा' इति पाठः सम्भाव्यते । उभाभ्यां दीर्घस्वराभ्यां वृद्धेति चार्थः । अथवा व्यञ्जनयोर्मध्ये यौ द्वावचौ पदान्तपदादिभूतौ तौ दीर्घौ यस्या इति दीर्घमध्या ।

'अर्धमात्रा वत्सानुसृतिस्तथा वत्सानुसारिणी ।
'पाकवती पादोना पादमात्रा पिपीलिका' इति शीक्षायाम्[१] ।

सऽईं महीं धुनिमेतोररम्णात् सोऽअस्नातॄनपारयत् स्वस्ति । तऽउत्स्नाय'[२] [ऋ.२. १५.५] 'धृतव्रताऽआदित्याः'[३] [२.२९.१] इति एतासां निदर्शनम् । आदौ ह्रस्वत्वेन वत्सानुसृत्याख्यायां विवृत्तौ कालस्य मात्रापरिमाणस्य चतुरंशस्य द्वावंशौ वर्तयन् दृश्यमानोऽन्याः पाकवत्याद्याश्च विवृत्तीरग्र्यरूपाः कुर्वन् । न चात्रा-न्यथाऽन्वयात् श्लेषस्य न्यायभङ्ग आशङ्कनीयः[४] । 'अत्राहीनेन मूले विहितपरिकरः' इत्यादिवत् सम्भवात्[५] ॥

(प.दी.) आदाविति । शब्दस्वरूपविशेषो विवृत्तिरित्युच्यते । तत्र आदिह्रस्वा विवृत्तिर्वत्सानुसृतिरित्युच्यते । अन्त्यह्रस्वा विवृत्तिर्वत्सानु-सारिणीति । आद्यन्तह्रस्वा पाकवतीत्युच्यते । दीर्घमध्या विवृत्तिः पिपीलिके-त्युच्यते । तथाह्युक्तं शीक्षायाम्– आदिह्रस्वा वत्सानुसृतिरन्त्या वत्सानु-सारिणी । पाकवत्युभयह्रस्वा दीर्घमध्या पिपीलिका' इति । एवञ्च सति **आदौ ह्रस्वत्वेन** हेतुना **वत्सानुसृत्यां** वत्सानुसृत्याख्यायां विवृत्तौ **मात्रापादौ** मात्रायाः मात्राख्यपरिमाणवतः कालस्य पादौ चतुरंशवतः समुदायस्य द्वावंशौ **वर्तयन्** उच्चारणे वर्तयन् दृश्यमानः देवादिभिर्दृश्यमानः । **अग्र्यरूपाः अन्याः** पाकवत्याद्याः **विवृत्तीश्च कुर्वन्** उच्चारणेन प्रकटीकुर्वन् **गोविन्दभक्तः** श्रीमध्वाचार्यः **गोविन्दश्रीः आस** । गोविन्दस्य श्रीरिव श्रीर्यस्य स गोविन्द-

---

१. क्वत्यमिदं पद्यमिति मूलं मृग्यम् ।

२. 'सऽईम्' इति आदौ ह्रस्वत्वेन वत्सानुसृतिः । 'सोऽअस्नातॄन्' इति अन्त्यह्रस्वत्वेन वत्सानुसारिणी । 'तऽउत्स्नाय' इत्युभयह्रस्वत्वेन पाकवती ।

३. 'धृतव्रताऽआदित्याः' इत्युभयदीर्घत्वेन पिपीलिका नाम विवृत्तिरिति ।

४. अस्फुटार्थमिदं वाक्यम् । नह्यन्यथाऽन्वयेन क्वापि श्लेषस्य न्यायभङ्गो भवति । अन्यो पदभङ्गः, अन्यश्चान्वयः श्लेषस्य हि गुणः ।

५. उदाहरणमप्यस्फुटम्– क्वत्येनानेनोदहरणेन किं प्रत्याययति, किं च समाधत्त इति ।

श्रीरिति विग्रहः । गोविन्दश्च **आदौ** बाल्ये **ह्रस्वत्वेन** सूक्ष्मत्वेन हेतुना **वत्सानुसृत्यां** गोवत्सानामनुगमने, गोवत्सपालकत्वेन तेषामनुगमने, **पादौ** अङ्घ्री **वर्तयन्** चालयन् **मात्रा दृश्यमानः** । चरणक्षमोऽभून्मम शिशुरिति सन्तोषेण यशोदया दृश्यमानः । **अग्र्यरूपाः अन्याश्च** गोपाङ्गनाः **विवृत्तीः** स्वलीलादर्शनेन विस्मृत्या विगतवृत्त्यन्तराः **कुर्वन्** हि दृष्टः ॥ ३२ ॥

(त.चं.) आदौ ह्रस्वत्वेन वत्सानुसृत्याम् । इयमत्र प्रक्रिया– पूर्वपदान्ते उत्तरपदादौ च विद्यमानयोः स्वरयोर्यत्र न सन्धिर्दृश्यते सा विवृत्तिरित्युच्यते शीक्षाशास्त्रज्ञैः । विवेकेन पृथग्भावेन वर्तत इति विवृत्तिः । तथाहि स्मरन्ति– 'द्वयोस्तु स्वरयोर्मध्ये सन्धिर्यत्र न दृश्यते । विवृत्तिस्तत्र विज्ञेया यऽईशेति निदर्शनम्' इति । सा चतुर्विधा भवति । ह्रस्वादिर्ह्रस्वाग्रा उभयह्रस्वा उभयदीर्घा चेति । तथाहि नारदीयशीक्षायाम्–'ह्रस्वादिर्वत्सानुसृता वत्सानुसारिणी चाग्रे । पाकवत्युभयह्रस्वा दीर्घवृद्धा पिपीलिका' इति । ह्रस्वादिर्दीर्घाग्रेति वत्सानुसृता नाम । लघुना वत्सेनानुसृता वृद्धा गौरिवेति । अस्या एव वत्सानुसृतिरिति नामान्तरम् । वत्सानुसृजितेति च । तथाहि याज्ञवल्क्यशीक्षायाम्– 'एषा चतुर्धा भवति प्रथमा तु पिपीलिका । परा पाकवती चैव तथा वत्सानुसारिणी । वत्सानुसृजिता चैव चतस्रस्ता विवृत्तयः' इति । तद् यथा– 'पुरुषऽएवेदम्' । अत्र हि पूर्वपदान्ते ह्रस्वोऽकारः । अग्रे दीर्घ एकार इति विवृत्तिरियं वत्सानुसृतिर्नाम । यत्राग्रे ह्रस्व आदौ दीर्घः सा वत्सानुसारिणी । लघुं वत्समग्रगं पृष्ठतोऽनुसरन्ती गौरिवेति । तद् यथा– 'देवाऽअयजन्त' । अत्र देवा इति प्रथमपदान्ते दीर्घ आकारोऽग्रे अयजन्तेति ह्रस्वोऽकार इति वत्सानुसारिणी । उभयह्रस्वा पाकवती नाम । सगन्धसहयोगात् परिपक्वेवेति । तद् यथा– 'त्रिपादूर्ध्वऽउदैत्' । अत्र हि ऊर्ध्व इति पूर्वपदान्तेऽपि ह्रस्वोऽकारः, उदैदित्युत्तरपदादावपि ह्रस्व एवोकार इति भवतीयं पाकवती । उभयदीर्घा पिपीलिका चतुर्थी । उभयतो वृद्धा मध्यनिम्ना पिपीलिकेवेति । तद् यथा– 'नाभ्याऽआसीत्'। पूर्वपदान्ते

उत्तरपदादौ च आकार एवेति पिपीलिकेयम् । आथर्वणिकानां माण्डूकीय-शीक्षायामपि– 'पिपीलिका पाकवती तथा वत्सानुसारिणी । अनुसृत-वत्सा चैव चतस्रो हि विवृत्तयः । वत्सानुसृता ह्रस्वा जघने वत्सानुसारिणी चाग्रे । पाकवती चोभयतः पिपीलिकामध्याऽप्युभयदीर्घा । पूर्वं ह्रस्वं परं दीर्घमक्षरं यत्र दृश्यते । सा वत्सानुसृता ज्ञेया व्यत्यासे त्वनुसारिणी । उभाभ्यामेव ह्रस्वाभ्यां यवमध्यां विनिर्दिशेत् । ताभ्यामेव तु दीर्घाभ्यां विज्ञेया सा पिपीलिका' इति । पिपीलिकैव पिपीलकामध्या । पाकवत्येव यवमध्या ।

एवं गते विश्लिष्य स्थितयोरनयोरचोर्विश्लिष्योच्चारणे कियदन्तरा व्यवधीयेत? अत्र बहवः पक्षाः । तथाहि नारदीयशीक्षायाम्–'चतसृणां विवृत्तीनामन्तरं मात्रिकं भवेत् । अर्धमात्रिकमन्येषामन्येषामणुमात्रिकम्' इति । एका मात्रा व्यवधानकाल इत्येके । अर्धमात्रेत्यपरे । अणुमात्रेत्यन्ये । अणुरिति चतुर्थोऽशः । तथाहि वर्णरत्नप्रदीपिकायाम्– 'एकमात्रो भवेद् ह्रस्वो द्विमात्रो दीर्घ उच्यते । त्रिमात्रस्तु प्लुतो ज्ञेयो व्यञ्जनं चार्धमात्रिकम् । तदर्धमणु तस्यार्धं परमाण्वभिधीयते' इति । भावप्रकाशिकायां त्वन्यैव गणनोदिता– 'अर्धमात्रा वत्सानुसृतिस्तथा वत्सानुसारिणी । पाकवती पादोना पादमात्रा पिपीलिका' इति । वत्सानुसृत्यां वत्सानुसारिण्यां च मात्राया द्वौ पादौ व्यवधानकालः । पाकवत्यां त्रयः पादाः । पिपीलिकायां त्वेकः पादः । अणुकाल इत्येतत् । निमेषो मात्राकालः । 'अक्षिपक्ष्मपरिक्षेपो निमेषः परिकीर्तितः' इति च ।

तथाचायं पद्यार्थः–पूर्वोत्तरपदगतयोर्द्वयोरचोः आदौ स्थितस्याचः ह्रस्वत्वेन अग्रे गतस्य च दीर्घत्वेन वत्सानुसृत्याख्यायां विवृत्तौ 'नमो भरन्तऽएमसि' इत्यादिषु प्राप्तायां शीक्षानुसारेण मात्रापादौ अर्धमात्रिकमन्तरं कृत्वा मन्त्रमुच्चरन् विद्वद्भिर्विस्मयेन दृश्यमानः । तथा अन्याश्च तिस्रः विवृत्तीः वत्सानुसारिणीं पाकवतीं पिपीलिकां च तत्तत्समुचितव्यवधानयोगेन

अग्रयरूपा उच्चरन् गोविन्दश्रीरास गोविन्दभक्तः । ननु गोविन्दः कदा विवृत्तीः पपाठ? हयग्रीवव्यासादिरूपेणेति गृहाण । गाः वेदान् विन्दति वेदयतीति । वस्तुतस्तु ननु श्लेषोऽयम् । सोऽयं श्लेषस्य स्वभावः यदिह शब्दसाम्येनोपमीयते नार्थसाम्येन । शब्दत एव श्लिष्यति नार्थतोऽपीति । असमानोऽर्थः समानेन शब्देनोच्यत इति । अर्थभेदेऽपि शब्दैक्यं हि श्लेषो नाम । गोपबालस्य गोविन्दस्य च लीलारूपमर्थान्तरमेतान्येव पदानि मधुरमवगमयन्ति हि । तथाहि– आदौ तोकत्वे ह्रस्वत्वेन मातुरङ्कपूरणेन स्तोकत्वेन गोवत्सानामनुसरणसमये मुग्धम्मुग्धं प्रतनुपादौ विन्यस्यन् मात्रा यशोदया साभिमानं सविस्मयं च दृश्यमानः, अन्याश्च गोपीः विस्मृतगृहकृत्याः कुर्वन् गाश्चारयामासेति सर्वमतिसुन्दरम् ॥ ३२ ॥

मङ्गल्याङ्गव्यक्तभावा त्रिलोकीं
रङ्गारूढा विस्मयं प्रापयन्ती ।
कृष्णेवान्या मान्यविन्यासपादा
रेजे माध्वी सुस्वरा वेदवाणी ॥ ३३ ॥

(भा.प्र.) श्रेयस्करैः शीक्षाद्यङ्गैर्व्यक्ताभिप्राया, अवयवेषु स्पष्टविलासा च । अनुनासिकतया क्रियमाणा वर्धितमात्राः स्वरा रङ्गास्तैरारूढा, स्वयम्बरप्राङ्गण-मारूढा च । स्वरा उदात्तादयश्च ॥

(प.दी.) मङ्गल्येति । **माध्वी वेदवाणी रेजे** । केव? **अन्या कृष्णेव** द्रौपदीव । कथम्भूता वेदवाणी? **मङ्गल्याङ्गव्यक्तभावा** श्रेयस्करशीक्षाद्यङ्गैर्व्यक्ताभिप्राया । कृष्णा च मङ्गल्येष्वङ्गेषु स्पष्टविलासा । पुनः कथम्भूता? **त्रिलोकीं विस्मयं प्रापयन्ती** । पुनः कथम्भूता? **रङ्गारूढा,** अनुनासिकतया क्रियमाणाः वर्धितमात्राः स्वरा रङ्गाः, तैरारूढा, रङ्गाख्यस्वरविशेषैर्विशिष्टेत्यर्थः । कृष्णा च स्वयम्बरप्राङ्गणारूढा । पुनः कथम्भूता? **मान्यविन्यासपादा,** मान्यः सम्भाव्यः विन्यासः समापनं येषां ते मान्य-

विन्यासाः, मान्यविन्यासाः पादाः ऋचां पादा यस्याः सा मान्यविन्यासपादा । ऋगुच्चारणसमये यस्य पादस्य यत्स्वरवर्णान्ततया विन्यासो भवेत् तथा तत्पादविन्यासयुक्तेत्यर्थः । कृष्णा च शोभनचरणन्यासयुक्तपादा । पुनः कथम्भूता? **सुस्वरा** शोभनोदात्तानुदात्तादिस्वरसहिता । कृष्णा च शुकहंसस्वरवत् सुस्वरा ॥ ३३ ॥

(त.चं.) मङ्गल्याङ्गव्यक्तभावा । मङ्गले साधूनि प्रवीणानि योग्यानि वा मङ्गल्यानि । 'तत्र साधुः'[४.४.९८] इति यत् । 'साधुरिह प्रवीणो योग्यो वा गृह्यते नोपकारकः' इति जयादित्यः । मङ्गल्येष्वङ्गेषु व्यक्तस्वभावा व्यक्तलीला वा कृष्णा । 'बाह्यार्थालम्बनो यस्तु विकारो मानसो भवेत् । स भावः कथ्यते सद्भिस्तस्योत्कर्षो रसः स्मृतः' इति च । शीक्षा कल्पो व्याकरणं निरुक्तं ज्यौतिषं छन्द इति षड्भिरङ्गैर्व्यक्ताभिप्राया वेदवाणी । रङ्गारूढा । कार्यविशेषं प्रति विशिष्याऽयोजितो भूमिभागो रङ्गः । नाट्यरङ्गः । रणरङ्गः । प्रकृते तु विवाहरङ्गारूढा कृष्णा । रङ्गं स्वरविशेषमारूढा वेदवाणी । तथाहि नारदीयशीक्षायाम्– 'हृदयादुत्तिष्ठते रङ्गः काँस्येन समनिस्वनः । मृदुश्चैव द्विमात्रश्च दधन्वाँ इति दर्शनम्' इति । 'यथा सौराष्ट्रिका नारी अराँ इत्यभिभाषते । एवं रङ्गः प्रयोक्तव्यो ङकारेण विवर्जितः । द्विमात्रो मात्रिको वाऽपि नासामूलं समाश्रितः । अन्ते प्रयुज्यते रङ्गः' इत्यादि । तद् यथा– 'लोकाँ अकल्पयन्' । मान्यविन्यासपादा । मान्या विन्यासा विक्षेपा ययोस्तादृशौ पादावस्येति कृष्णा । परिशुद्धतया मान्यः अक्षरविन्यासो यत्र तादृशाः पादा अस्या इति वेदवाणी । सुस्वरा । 'अकारादिषु वर्णेषु षड्जादिषु च सप्तसु । उदात्तादिषु विज्ञेयः प्राणिनां च स्वने स्वरः' इति च ॥ ३३ ॥

गाम्भीर्यधैर्युक्तमौदार्यकार्यै-
र्नानानादश्लाघ्यमुच्चारणं तत् ।

शीक्षाशिक्षालक्षणानां हि लक्ष्यं
मान्यं मन्ये धन्यबुद्धेरतुल्यम् ॥ ३४ ॥

(भा.प्र.) शीक्षायां प्रतिपाद्यमानोच्चारणशिक्षया प्रकटितानां लक्षणानां लक्ष्यम् ॥

(प.दी.) गाम्भीर्येति । **औदार्यकार्यैः** औदार्यजन्यैः **गाम्भीर्याद्यैः** गाम्भीर्यादिगुणैः **युक्तम्, नानानादश्लाघ्यं** नानाप्रकारनादैः श्लाघ्यम्, **शीक्षाशिक्षालक्षणानां** शीक्षाख्यग्रन्थे प्रतिपाद्यमानयोच्चारणशिक्षया प्रकटितानां लक्षणानां **लक्ष्यं** उदाहरणभूतम्, अत एव **मान्यं** सुराद्यैरपि माननीयम्, **धन्यबुद्धेः** श्रीपूर्णप्रज्ञाचार्यस्य **तत् उच्चारणं** श्रुत्युच्चारणं **अतुल्यं** असदृशं **मन्ये हि** ॥ ३४ ॥

(त.चं.) औदार्यं गुणोदीर्णता । गाम्भीर्यं तत्, यस्य श्रवणमात्रेण विस्मयजलधौ निमग्ना न तळं पश्यन्तः प्लवन्ते । आदिना स्फुटताश्रवणसुभगतादयः । नानानादश्लाघ्यम् । क्वचिन्मन्द्रः । क्वचिन्मध्यः । क्वचित् तार इति । उदात्तादिनानानादश्लाघ्यमिति वा । वर्णोच्चारणशिक्षा शीक्षा ॥

काल्पीः क्लृप्तीर्व्यञ्जयंश्छान्दसीश्च
व्यक्तं शाब्दं शास्त्रमुद्भाव्य भूयः ।
स व्याचख्यावुक्तनैरुक्तमार्गो
ज्यायान् ज्योतिर्वेदिनां वेदमित्थम् ॥ ३५ ॥

(प.दी.) काल्पीरिति । **सः** श्रीमध्वाचार्यः **इत्थं** उक्तवक्ष्यमाणप्रकारेण **वेदं व्याचख्यौ** । किं कुर्वन्? **काल्पीः** कल्पाख्यवेदाङ्गप्रतिपादिताः **क्लृप्तीः** वेदार्थनियमान् **व्यञ्जयन्, छान्दसीश्च** छन्दोनामकवेदाङ्गे कथिताः क्लृप्तीश्च **व्यञ्जयन्** । पुनः किं कृत्वा? **शाब्दं शास्त्रं** व्याकरणं **भूयः** अञ्जसा, अव्ययानामनेकार्थत्वाद् भूयःशब्द आञ्जस्येऽपि वर्तते, **व्यक्तं** स्फुटं **उद्भाव्य**

तत्रतत्र प्रकृतशब्दस्य स्वोक्तार्थवाचकत्वेन प्रकटयित्वा[१]। पुनः कथम्भूतः? **उक्तनैरुक्तमार्गः** । उक्तः अभिहितः नैरुक्तः निरुक्ताख्यवेदाङ्गसम्बन्धी मार्गः वैदिकशब्दनिर्वचनप्रकारः येन स तथोक्तः । न केवलमेवम्भूत एव । **ज्योतिर्वेदिनां** ज्योतिःशास्त्रवेदिनां मध्ये **ज्यायान्** श्रेष्ठः । एवं शीक्षादि-षडङ्गानुसारेण वेदं व्याचख्याविति भावः ॥ ३५ ॥

(त.चं.) षडङ्गेषु शीक्षा तावदुक्ता । अवशिष्टान्याह– **काल्पीः** । कर्मणां क्रमविधायकः कल्पः । छन्दः, यत्र मिताक्षरं पद्यं लक्ष्यते । शाब्दं शास्त्रं व्याकरणम्, यत्र पदनिष्पत्तिः । यत्र पदनिर्वचनं तन्निरुक्तम् । सृष्टिमूलस्य गणितस्यान्वेषणं ज्योतिःशास्त्रम् । सूर्यचन्द्राख्यज्योतिर्मूलत्वात् । शाब्दं शास्त्रं भूयः बाहुल्येनोद्भाव्य संवादित्वेनोल्लिख्य । 'बहोर्लोपो भू च बहोः' [६.४.१५८] ॥ ३५ ॥

श्रौते व्याख्योच्चारणे चारुणी ते
मादृग् देही वर्णयेदस्य को नु ।
वागीशानैर्वाग्विहङ्गेन्द्रजीवै-
र्भूर्याश्चर्यैर्वर्णिते ये प्रणम्य ॥ ३६ ॥

(प.दी.) **श्रौत** इति । **मादृक्** मम सदृशः **देही** पुरुषः **कः नु अस्य** श्रीमध्वाचार्यस्य **चारुणी** मनोहरे **श्रौते** श्रुतिसम्बन्धिनी **ते** **व्याख्योच्चारणे** व्याख्यामुच्चारणं च **वर्णयेत्** । न कोऽपि वर्णयितुं स्तोतुं समर्थः । 'वर्ण स्तुतौ' इति धातुः । कुतः? **ये** अमुष्य व्याख्योच्चारणे **वागीशानैः** सर्ववाचामभिमानिभिः **भूर्याश्चर्यैः** अतिविस्मययुक्तैः **वाग्विहङ्गेन्द्रजीवैः** सरस्वती-गरुडबृहस्पतिभिः **प्रणम्य** श्रीमध्वाचार्यं नत्वा **वर्णिते** स्तुते । 'जीव आङ्गिरसो वाचस्पतिः' इत्यमरः ॥ ३६ ॥

(त.चं.) ये वागीशानैर्वर्णिते ते व्याख्योच्चारणे मादृशः को वर्णयेत्? मया

१. बहुलमेतादृशाः प्रयोगाष्टीकायाम् ।

सदृक् मादृक् । वाग्विहङ्गेन्द्रजीवैः । सर्वविद्यामानिनी वाग्देवी, सर्ववेदमानी विहङ्गेन्द्रो गरुडः, वाचस्पतिर्जीवो बृहस्पतिः ॥ ३६ ॥

छन्दस्सार्थं सार्थमत्रामुनेत्थं
प्रोक्तं श्रुत्वा ब्राह्मणा ब्रह्मणेव ।
सर्वे सौम्या जिष्णुजिज्ञासयाऽमी
प्राप्य प्रोचुश्चित्रकायाभिधानम् ॥ ३७ ॥

(प.दी.) छन्द इति । **सौम्याः** प्रसन्नमुखमानसाः **अमी सर्वे ब्राह्मणाः अत्र** मिळिताशेषविद्वत्सभायां **ब्रह्मणेव** चतुर्मुखेनेव **अमुना** श्रीमध्वाचार्येण **इत्थं** उक्तप्रकारेण **सार्थं** अर्थसहितं यथा भवति तथा **प्रोक्तं छन्दःसार्थं** वेदसमूहं **श्रुत्वा जिष्णुजिज्ञासया** श्रीमध्वपुण्डरीकयोर्मध्ये जेता क इति ज्ञातुमिच्छया **चित्रकायाभिधानम्,** चित्रकायः व्याघ्रः, व्याघ्रवाचकपुण्डरीकनामवन्तम्, पुण्डरीकपुरीनामकमिति यावत्, **प्राप्य** स्थलान्तरवर्तिनं प्राप्य **प्रोचुः** ॥ ३७ ॥

(त.चं.) जिष्णुजिज्ञासया । जेतुं शीलमस्येति जिष्णुः । 'ग्ला-जि-स्थश्च क्स्नुः' [३.२.१३९] । चकाराद् भुवश्च । 'ग्स्नुः' इत्येके । ग्लास्नुः । जिष्णुः । स्थास्नुः । भूष्णुः । चित्रकायाभिधानम् । 'शार्दूलः स्यात् चित्रकायो मृगारिः' इति च ॥ ३७ ॥

प्राज्यप्रज्ञः प्राज्यया प्रज्ञयाऽसौ
हन्तावोचन्मन्त्रवर्णाभिधेयम् ।
तत्प्रत्यर्थी प्रार्थ्यते वक्तुमेतत्
प्राज्ञास्माभिः श्रोतुकामैर्भवांश्च ॥ ३८ ॥

(प.दी.) प्राज्येति । **असौ प्राज्यप्रज्ञः** श्रीपूर्णप्रज्ञाचार्यः **प्राज्यया** सम्पूर्णया **प्रज्ञया मन्त्रवर्णाभिधेयं** वेदार्थं **अवोचत्** । **हन्त** हर्षे । **प्राज्ञ** विद्वन्,

तत्प्रत्यर्थी प्रतिवादितया तद्विरोधी **भवांश्च श्रोतुकामैः** त्वत्प्रवचनप्रकारं श्रोतुकामैः **अस्माभिः एतत्** मन्त्रवर्णाभिधेयं **वक्तुं प्रार्थ्यते** ॥ ३८ ॥

(त.चं.) प्राज्यप्रज्ञः । 'प्राज्यं भूरि प्रभूतम्' इति च । हे प्राज्ञ, अस्माभिः भवानपि एतत् मन्त्रवर्णाभिधेयं वक्तुं प्रार्थ्यते । प्रजानातीति प्रज्ञ एव प्राज्ञः । 'प्रज्ञादिभ्यश्च'[५.४.३८] इति स्वार्थेऽण् ॥ ३८ ॥

इत्युक्तस्तैरेष विस्तारिबुद्धेः
प्राप्तुं साम्यं सम्प्रवृत्तो दुरात्मा ।
हास्योऽत्राभूद् वासुदेवप्रभार्थी
यद्वत् पूर्वं पौण्ड्रको वासुदेवः ॥ ३९ ॥

(प.दी.) इतीति । **तैः** विप्रैः **इत्युक्तः विस्तारिबुद्धेः** श्रीपूर्णप्रज्ञाचार्यस्य **साम्यं** वेदप्रवचनेन साम्यं **प्राप्तुं सम्प्रवृत्तः दुरात्मा** दुर्बुद्धिः **एषः** पुण्डरीकनामा **अत्र** संसदि **हास्योऽभूत्** । क इव? **पूर्वं वासुदेवप्रभार्थी** गरुडवाहनत्वादिश्रीकृष्णप्रभार्थी **पौण्ड्रको वासुदेवः यद्वत्** ॥ ३९ ॥

(त.चं.) हास्यः अपहासविषयः ॥ ३९ ॥

आङादेशादुत्तरं रादिशब्दं
श्रुत्वा नारेत्युक्तवन्तं पदं तम् ।
व्याख्यालौल्यादैतरेयादिसूक्ते
पृथ्वीदेवा निन्दनीयं निनिन्दुः ॥ ४० ॥

(भा.प्र.) 'अग्निना रयिमश्नवत्' इत्यत्र 'ना' इत्ययमाङादेशः । 'आङो नाऽस्त्रियाम्' इति सूत्रात् । तां संहितां श्रुत्वा अग्नीति पदं विभज्य नारेति पदमुक्तवन्तम् ।

[1]अनधीतवानपि हि पुण्डरीकपूर्ननु शाब्दिकः कथमिदं वदेदिति।
अतिशङ्कि मा दशमतेर्हि किङ्करी सकलस्य चोदयति शारदा गिरः ॥

(प.दी.) आङिति । **पृथ्वीदेवाः** विप्राः **तं निनिन्दुः** निन्दितवन्तः । कथम्भूतम्? **ऐतरेयादिसूक्ते** ऐतरेयशाखायाः प्रथमसूक्ते, 'अग्निमीळे पुरोहितम्–' इत्यस्मिन् सूक्ते । तत्रापि 'अग्निना रयिमश्नवत् पोषमेव दिवेदिवे' इत्यस्मिन्नर्धर्चे श्रूयमाणं **आङादेशात्** । आङिति तृतीयैकवचनम् । आङस्तृतीयैकवचनस्याऽदेश आङादेशः । 'अग्निना' इत्यत्र 'ना' इत्येतत् । तथाहि– 'आङो नाऽस्त्रियाम्', घेरुत्तरस्याऽङो 'ना' इत्ययमादेशो भवत्यस्त्रियां विषय इत्याङो 'ना' इत्यादेशविधानात् । एवञ्च 'अग्निना' इत्यत्र आङादेशभूतात् 'ना' इत्येतस्मात् **उत्तरं रादिशब्दम्** । रः आदिर्यस्य स रादिः । रादिश्चासौ शब्दश्चेति रादिशब्दः । तम्, संहितायां 'रयिम्' इत्येतं रादिशब्दं **श्रुत्वा व्याख्यालौल्यात्** एतत्सूक्तप्रवचनौत्कण्ठ्यात् । 'अग्निमीळे' इत्यादेः पदविभागसमये 'अग्निना रयिम्–' इत्यत्र 'अग्नि–' इति पदं विभज्य पश्चात् **नारेति पदं उक्तवन्तं** अत एव **निन्दनीयं तं निनिन्दुः** इति । शाब्दिकोऽयं पुण्डरीकपुरी कथमेवं ब्रूयादिति न शङ्कनीयम् । दशमतिकिङ्कर्या शारदया भ्रंशितगिरस्तथा वचनसम्भवात् । तथाह्युक्तम्– 'अनधीतवानपि हि पुण्डरीकपूर्ननु शाब्दिकः कथमिदं वदेदिति । अतिशङ्कि मा दशमतेर्हि किङ्करी सकलस्य चोदयति शारदा गिरः' इति ॥ ४० ॥

(त.चं.) ऐतरेयवेदस्य आदिसूक्ते । 'अग्निमीळे– ' इत्यादिके । तत्रापि तृतीयमन्त्रे 'अग्निना रयिमश्नवत्–' इत्यादिके । आङादेशादुत्तरं 'अग्निना' इत्यतः परम्, रादिशब्दं 'रयिम्' इति शब्दम् । 'आङो नाऽस्त्रियाम्'

१.अनधीतवेदश्चेदपि स्वयं शाब्दिकः सन् कथं 'अग्नि+नार' इति वदेदित्यर्थः । 'अनधीतवानिव' इति पाठस्तु स्फुटार्थः ।

[७.३.१२०] । घेरुत्तरस्य आङः नाभावो भवत्यस्त्रियाम् । अग्निना । तथा च 'अग्निना । रयिम्' इति प्रतृण्णे वक्तव्ये 'अग्नि+नार–' इति वदन्तं जिह्वास्खलनेन । ननु कथं शाब्दिकस्तथा वदेदिति शङ्का पण्डिताचार्येणैव परिहृता– 'दशमतेर्हि किङ्करी' इति भावप्रकाशिकायाम् । सुरनिकरपरिचरितचरणपङ्कजाऽपि शारदा किङ्करी किल दशमतेराज्ञाकरी ॥

शार्दूलाख्यां प्राप्य सम्भावितः प्राग्
लोके धूर्तो मायिगोमायुरेषः ।
वादिद्वीपिध्वंसिनं मध्वसिंहं
प्राप्तो हीत्थं शब्दशेषो बभूव ॥ ४१ ॥

(प.दी.) शार्दूलेति । **धूर्तः** विप्रलम्भकः **एषः मायिगोमायुः** मायिसृगालः **शार्दूलाख्यां** शार्दूल इति सञ्ज्ञां **प्राप्य प्राक्** श्रीमध्वप्राप्तेः पूर्वं लोके **सम्भावितः** सन् तदानीं **वादिद्वीपिध्वंसिनं** दुर्वादिशार्दूलभञ्जनं **मध्वसिंहं प्राप्तः इत्थं शब्दशेषः** नाममात्रेणावशिष्टो **बभूव** । **ही** कष्टमेतत् । अयमभिप्रायः– यथा कश्चित् सृगालो व्याघ्रोऽहमित्युक्त्वा लोकं भीषयन् कदाचित् सिंहं प्राप्य तन्निनादमात्रेण पलायन् 'नायं व्याघ्रोऽपितु सृगाल एव' इति निश्चितोऽपि नाममात्रेण शार्दूल इत्युच्यते । नतु पूर्ववद् बहुमतिविषयः । एवमयं पुण्डरीकपुरीयन्तं कालं लोके महाप्राज्ञोऽयमिति पूजितोऽपि तदा सर्वविद्वच्छ्रेष्ठं सर्वदुर्वादिभञ्जनं श्रीमध्वाचार्यं प्राप्य भग्नदर्पो भूत्वा पुण्डरीकपुरीति नाममात्रेणावशिष्टो बभूवेति ॥ ४१ ॥

(त.चं.) मायिगोमायुः । यस्य सर्वं मायामयमिति गौः स किल गोमायुः । इत्थं शब्दशेषो बभूव हि ॥ ४१ ॥

कृष्णा[ऽ]भीष्टा शास्त्रविस्पष्टसञ्ज्ञा
या स्वीया श्रीः पालिता सद्द्विजेन ।

पद्माख्यासत्सैन्धवेनाऽऽहृतां तां
शुश्रावाग्र्यानन्दतीर्थाख्यपार्थः ॥ ४२ ॥

(भा.प्र.) कृष्णाभीष्टा। कृष्णस्य व्यासस्याभीष्टा, कृष्णैवाभीष्टा च[१]। शास्त्रमिति विस्पष्टसञ्ज्ञाऽस्याः, शास्त्रे भारतादौ विस्पष्टसञ्ज्ञा च। सद्द्विजेन लिकुचशेखरेण शङ्करार्येण, धौम्येन च॥

(प.दी.) कृष्णेति । **अग्र्यानन्दतीर्थाख्यपार्थः** परमानन्दतीर्थाख्यार्जुनः **तां पद्माख्यासत्सैन्धवेन** पद्मतीर्थनाम्ना दुष्टजयद्रथेन **आहृतां शुश्राव** । काम्? या **कृष्णाभीष्टा** । कृष्णस्य श्रीवेदव्यासस्याभीष्टा । **शास्त्रविस्पष्टसञ्ज्ञा** । शास्त्रमिति विस्पष्टा प्रसिद्धा सञ्ज्ञा नाम यस्याः सा तथोक्ता । **सद्द्विजेन,** सता निर्दोषेण द्विजेन लिकुचकुलशेखरेण शङ्करार्यनाम्ना विप्रेण, **पालिता** रक्षिता, **स्वीया** स्वसम्बन्धिनी **या श्रीः** लोके स्वकीर्तिप्रततिहेतुभूता स्वप्रणीतशास्त्रपुस्तकावलिः, **ता**मिति सम्बन्धः । स्वप्रणीतशास्त्रात्मकं पुस्तकजातं लिकुचवंशोद्भवशङ्करार्यकरात् पद्मतीर्थेन हृतं शुश्रावेति भावः । पार्थो यथा जयद्रथेनाऽऽहृतां द्रौपदीं शुश्राव तद्वदिति भावः । सा **कृष्णाभीष्टा** कृष्णस्याभीष्टा । अथवा कृष्णा च साऽभीष्टा चेति वा । **शास्त्रविस्पष्टसञ्ज्ञा** शास्त्रे भारते प्रसिद्धा सञ्ज्ञा यस्याः सा तथोक्ता । **सद्द्विजेन** सता द्विजेन **पालिता** । पार्थेषु मृगयां गतेषु धौम्येन पालिता हि सा । एवम्भूतां या **स्वीया श्रीः** स्वकीया भार्या तामति सम्बन्धः ॥ ४२ ॥

(त.चं.) कृष्णाभीष्टा कृष्णस्य व्यासस्याभीष्टा शास्त्रश्रीः । द्रौपदीपक्षे कृष्णा अभीष्टेति भिन्ने पदे। स्वाभीष्टां नाम्ना कृष्णा। 'कृष्णः सत्यवतीपुत्रे केशवेऽर्जुने' इति 'कृष्णा स्याद् द्रौपदी' इति च। शास्त्रे भारतादौ कृष्णेति श्रीरिति च विस्पष्टसञ्ज्ञा द्रौपदी । या स्वीया श्रीः । स्वसङ्गृहीता शास्त्रश्रीः । स्वप्रणीता वा । द्रौपदीपक्षे– 'शंरूपाने नित्यरतेरियं श्रीः' । प्रकृष्टा-

---

१.'कृष्णेवाभीष्टा च' इति पठन्ति । लिपिकृत्प्रमादः सम्भाव्यते ।

नन्दो हि प्राणः । 'णश्च निर्वृतिवाचकः' इति स्मरणात् । अत एव शतानन्द उच्यते । तथाच शे शतानन्दे रमत इति श्रीः । मुख्यतः भारतीस्वरूपेत्यर्थः । आनन्दतीर्थाख्यः पार्थः अर्जुनः । ननु भीमोऽपि पार्थः? अत एव नु बोध्यसे नायं पार्थो भीमः किन्त्वर्जुन इति । का गमनिका? लोकरूढिस्तावत् । उपरितनश्लोके 'सार्यः' सभीम इति इत्यर्जुनतां स्वयमेव गमयति । आर्य इत्यग्रजमाचष्टे । नानुजम् ॥ ४२ ॥

तूर्णं तीर्णादभ्रमार्गोऽथ सार्यः
सम्प्राप्तोऽसौ गोगणैर्भीषयित्वा ।
संयम्यान्तर्यन्तृकामेन हास्यं
सम्प्राप्तश्रीर्निर्जितं तं जहास ॥ ४३ ॥

(भा.प्र.) सार्यः सज्येष्ठः । गोगणैः वाग्गणैः, शरगणैश्च । संयम्य निरुद्ध्य, बद्ध्वा च । अन्तर्यन्तृकामेन अन्तर्यामिणो वाञ्छया, अन्तःप्रेरकेण मन्मथेन च । श्रीः जयश्रीः, पाञ्चाली च ॥

(प.दी.) तूर्णमिति । अथ पुस्तकाहरणश्रवणानन्तरं **तूर्णं** आशु **तीर्णादभ्रमार्गः** अतीतबहुयोजनमार्गः **सार्यः** ज्येष्ठयतिना सहितः तं **सम्प्राप्तः** सन् **असौ** श्रीमध्वः **गोगणैः** वचनसमूहैः **भीषयित्वा संयम्य** निरुद्ध्य निरुत्तरीकृत्य **सम्प्राप्तश्रीः** सम्प्राप्तजयश्रीः सन् **निर्जितं** पराजितं **अन्तर्यन्तृकामेन** अन्तर्यामिणो वाञ्छया, एतत् सर्वमन्तर्यामी वेदेति वचनेनेति भावः, **हास्यं** परिहासविषयं **तं** पद्मतीर्थं **जहास** । पार्थो यथा **तूर्णं तीर्णादभ्रमार्गः सार्यः** आर्येण ज्येष्ठेन श्रीभीमसेनेन सहितः तं जयद्रथं प्राप्तः सन् **गोगणैः** शरसमूहैः **भीषयित्वा संयम्य** पाशैर्बद्ध्वा **सम्प्राप्तश्रीः** तेन स्वरथमारोप्य नीयमानां पाञ्चालीं प्राप्तः सन् **अन्तर्यन्तृकामेन** अन्तःप्रेरकेण कामेन मन्मथेन **हास्यं** परदारापहरणाख्यकुकर्मणाऽपहासविषयं **तं** जयद्रथं **जहास** तद्वदिति भावः ॥ ४३ ॥

(त.चं.) रजतपीठात् 'एकवाटग्राम' पर्यन्तमतिक्रान्तदीर्घमार्गः । तथाहि भावप्रकाशिकायाम् । एकवाटस्य 'वोर्काडि' [ಬೊರ್ಕಾಡಿ] इति प्रादेशिकं नामेत्याहुः ॥ ४३ ॥

दुष्टात्माऽसौ भद्र[दुष्टात्मा सौभद्र]मेकाकिनं यः
क्षेप्तुं हेतुः सौख्यदाख्यं बभूव ।
हर्यंशोऽयं तं न चक्षाम भूय-
स्तोके सन्ने सूकरं केसरीव ॥ ४४ ॥

(भा.प्र.) योऽसौ पुरा भद्रं सज्जनं क्षेप्तुं हेतुः, सौभद्रं च। सौख्यदाख्यं शङ्करार्यनामानम्, श्रवणेन स्वसुखकरनामानं च॥

(प.दी.) **दुष्टेति** । **अयं हर्यंशः** वाय्वंशः श्रीमध्वाचार्यः **तं** पद्मतीर्थं **भूयः** पुनः **न चक्षाम** । तद्विषये क्षमावान् नाभूदिति भावः । कं न चक्षाम? **योऽसौ दुष्टात्मा** दुष्टबुद्धिः पद्मतीर्थः **भद्रं** मनोवाक्कायकर्मभिः शोभनं **एकाकिनं** असहायं सन्तं **सौख्यदाख्यं** शङ्करनामानं **द्विजं क्षेप्तुं** निराकर्तुं **हेतुर्बभूव** । **हर्यंशः** इन्द्रांशः पार्थः तं जयद्रथं यथा **भूयो** मरणावधि **न चक्षाम** तद्वदिति भावः। कथम्भूतम्? **दुष्टात्मा यः** जयद्रथः **एकाकिनं सौख्यदाख्यं** स्वकीयानां सुखप्रदनामानं **सौभद्रं** सुभद्रातनयं **क्षेप्तुं** हन्तुं **हेतुर्बभूव** । पद्मव्यूहद्वारि पाण्डवनिरोधात् तस्य तद्धेतुत्वम् । हरिशब्दोऽयमिन्द्रवाय्वोरपि वाचकः । 'यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु । शुकाहिकपिभेकेषु हरिर्ना कपिले त्रिषु' इत्यमरः । कमिव? **तोके** शिशौ **सन्ने** सति **केसरी** सिंहः **सूकरमिव** । सूकरेण सिंहं वञ्चयित्वा सिंहशिशौ नाशिते सति सिंहः सूकरं यथा न क्षाम्यति । किन्तु हन्त्येव । तद्वदयं मध्वोऽपि तं न चक्षामेति भावः ॥

(त.चं.) 'दुष्टात्मा । असौ । भद्रम्' इति 'दुष्टात्मा । सौभद्रम्' इति च च्छेदः । दुष्टात्मा असौ पद्मतीर्थः भद्रं सज्जनं सौख्यदाख्यं शङ्कराख्यं

लिकुचशेखरम् । दुष्टात्मा जयद्रथः सौख्यदाख्यं प्रियनामानं सौभद्रमभिमन्युम् । 'आत्मा कळेबरे यत्ने स्वभावे परमात्पनि । चित्ते धृतौ च बुद्धौ च' । तोके सन्ने । 'तुक् तोकं तनयः स्तनन्धय इति प्राज्ञैरपत्यं स्मृतम्' इति च ॥ ४४ ॥

तस्य त्रासात् पृष्ठतस्तिष्ठतोऽभूत्
क्षेमापेक्षी यो जनः प्राग् जितोऽपि ।
मध्येऽन्येषां गोततीस्तत्प्रयुक्ताः
सोऽद्यज्जिष्णुः पञ्चषैर्गोविशेषैः ॥ ४५ ॥

(भा.प्र.) यो जनः पुण्डरीकपुरी द्रौण्यादिश्च । गोततीः पञ्चषैः गोविशेषैरद्यत् । तेन कृतस्योपन्यासस्यापशब्दादिदोषप्रकटकैः पञ्चषैर्वाक्यैस्तमखण्डयत् ॥

(प.दी.) तस्येति । **जिष्णुः** जयशीलः **सः** श्रीमध्वाचार्यः **प्राक् जितोऽपि** पराजितोऽपि **यो जनः** पुण्डरीकपुर्याख्यः **त्रासात्** श्रीमन्मध्वभयात् **पृष्ठतः** पश्चाद्भागे **तिष्ठतः तस्य** पद्मतीर्थस्य **क्षेमापेक्षी अभूत्, अन्येषां मध्ये तत्प्रयुक्ताः** तेन पुण्डरीकाख्येन प्रयुक्ताः **गोततीः** उपन्यासरूपवाक्ततीः **पञ्चषैः गोविशेषैः** तत्कृतस्योपन्यासस्यापशब्दादिदोषप्रकाशकैर्वचनविशेषैः **अद्यत्** अखण्डयत् । 'दो अवखण्डने' इति धातुः । **स जिष्णुः** पार्थः यथा[1] **प्राक् जितोऽपि** पराजितोऽपि **यो जनः** द्रौण्यादिः **त्रासात्** अर्जुनभयात् **पृष्ठतस्तिष्ठतः** पार्थाभिमुख्यमप्राप्य द्रौण्यादीनां पृष्ठतो वर्तमानस्य **तस्य** जयद्रथस्य **क्षेमापेक्षी, तत्प्रयुक्ताः** तेन द्रौण्यादिना प्रयुक्ताः **गोततीः पञ्चषैर्गोविशेषैः** शरविशेषैर्यद्वदखण्डयत् तद्वदिति भावः ॥ ४५ ॥

(त.चं.) जिष्णुरितीन्द्रः । जिष्णुरित्यर्जुनः । जिष्णुरिति जयशाली । 'जिष्णुर्ना वासवेऽर्जुने । जित्वरे वाच्यवत्' इति च । त्रासान्मरणभयात् पृष्ठतो निलीय तिष्ठतो जयद्रथस्य यो जनोऽश्वत्थामादिः पूर्वं जितोऽपि

१.उत्तरत्र 'यद्वत्' इति पुनः श्रवणात्, अत्र यथेति नापेक्षितम् ।

पुनरर्जुनस्य पुरस्तस्थौ । स्थित्वा चान्येषां स्वपक्षगानां वीराणां मध्ये गोततीः शरततीः प्रयुयोज । नायकीभूय मध्यगतमेनमनुसृत्यान्येऽपि प्रयुयुजुरिति श्लेषार्थः ॥ ४५ ॥

विष्णोर्भूयः शोभयद्भिः पदान्तं
पारम्पर्येणेर्यमाणैरवार्यैः ।
गोत्रातैस्तं दारयित्वा न्यगृह्णात्
कञ्जाख्यानं सिन्धुपं मध्वपार्थः ॥ ४६ ॥

(भा.प्र.) पुनः स्वयमुपन्यासं कृत्वा तमुपन्यासमखण्डयन्तं ससहायं तमप्यनुक्तिनामकनिग्रहस्थानं प्राप्तं चकार।

अत्र चायं प्रणीत आचार्यप्रियतमैः श्लोकः–

'आनन्दतीर्थपार्थस्य भयादास्ते स पृष्ठतः ।
'पुरतः स्थापयित्वाऽन्यान् पद्मतीर्थजयद्रथः' इति।

विष्णुमङ्गलदेशान्ते हृतां कवळिकां निजाम्।
श्रुत्वा रजतपीठस्थ एकवाटं ययौ गुरुः॥

तत्रस्थं चोळजं दृष्ट्वा स्वशिष्यैस्तं रुरोध सः।
त्वच्छास्त्रं साधयसि चेत् प्राश्निकानाह्वयेत्यसौ।
मध्वस्तेनोदितः प्रोचेऽत्राऽह्वयेच्छसि चेदिति॥

कृतकृत्योऽस्मि मच्छास्त्रं व्याप्तमित्युदितेऽमुना।
प्रोचे मध्वो मम व्याप्तं त्रैलोक्ये शास्त्रमित्यमुम्॥

अन्तर्यामी हन्त वेद तवेदं शाठ्यभाषितम्।
इति ब्रुवाणं तं प्रोचे मध्वः स्मितमुखाम्बुजः॥

व्याप्तं त्वय्येव मच्छास्त्रं किमुतान्यत्र बालिश।
अन्तर्यामी नियम्यश्च त्वयैवाङ्गीकृताविति॥

मिळितेष्वथ सभ्येषु प्राश्निकेष्वभवत् कथा।
तत्र माध्व उपन्यासो ग्रन्थो वादाह्वयोऽभवत्॥

(प.दी.) **विष्णोरिति । मध्वपार्थः भूयः विष्णोः पदान्तम्,** पद्यत इति पदं स्वरूपम्, तस्यान्तो निर्णयो यस्मात् तत् पदान्तं विष्णुस्वरूपनिर्णायकं वेदवेदान्तादिकम्, तत् **शोभयद्भिः** वेदादेरपव्याख्यां निराकृत्य यथावद् व्याख्यानात्मकैरित्यर्थः । **पारम्पर्येण** नैरन्तर्येण **ईर्यमाणैः** उच्यमानैः **अवार्यैः** वाद्यन्तरेणानिराकार्यैः **गोव्रातैः** उपन्यासरूपवचनसमूहैः **तं कञ्चाख्यानं सिन्धुपं** पद्मतीर्थनामानं जयद्रथं **दारयित्वा** निराकृत्य पराभाव्य **न्यगृह्णात्** निग्रहस्थानं प्राप्तमकरोत् । स्वकृतमुपन्यासमखण्डयित्वा तूष्णीं स्थितं तमनुक्त्याख्यनिग्रहस्थानं प्राप्तं चकारेति भावः । पार्थो यथा विष्णुपदान्तमाकाशप्रदेशं शोभयद्भिः **पारम्पर्येणेर्यमाणैरवार्यैः** शरव्रातैः **तं सिन्धुपं दारयित्वा** विदार्य **न्यगृह्णात्** जघान तद्वदिति श्लेषाभिप्रायः ॥

'कृष्णाभीष्टा–' इत्यारभ्योक्तं प्रमेयं ग्रन्थकृता स्वयमेव सङ्गृह्याप्युक्तं भावप्रकाशिकायाम्, 'विष्णुमङ्गल–' इत्यादिना । तदस्माभिरुदाह्रियते– 'विष्णुमङ्गलदेशान्ते हृतां कवळिकां निजाम् । श्रुत्वा रजतपीठस्थ एकवाटं ययौ गुरुः । तत्रस्थं चोळजं दृष्ट्वा स्वशिष्यैस्तं[१] रुरोध सः । त्वच्छास्त्रं साधयसि चेत् प्राश्निकानाह्वयेत्यसौ । मध्वस्तेनोदितः प्रोचेऽत्राऽह्वयेच्छसि चेदिति । कृतकृत्योऽस्मि मच्छास्त्रं व्याप्तमित्युदितेऽमुना । प्रोचे मध्वो मम व्याप्तं त्रैलोक्ये शास्त्रमित्यमुम् । अन्तर्यामी हन्त वेद तवेदं शाठ्यभाषितम् । इति ब्रुवाणं तं प्रोचे मध्वः स्मितमुखाम्बुजः । व्याप्तं त्वय्येव मच्छास्त्रं किमुतान्यत्र बालिश । अन्तर्यामी नियम्यश्च त्वयैवाङ्गीकृताविति । मिळितेष्वथ सभ्येषु प्राश्निकेष्वभवत् कथा । तत्र माध्व उपन्यासो ग्रन्थो वादाह्वयोऽभवत्' इति ॥ ४६ ॥

(त.चं.) विष्णोःपदान्तमित्येकं वा पदम् । पदान्तरव्यवधानेऽप्यैकपद्यं सम्भवतीति वैदिकी प्रक्रिया । तद् यथा– 'नरा वा शंसम्' इति । 'नराशंसम् । वा' इति हि तत्र प्रतृण्णम् । गोव्रातैस्तं दारयित्वा । एता एव वचन-

---

१. 'स्वशिष्यैस्तु' इति पाठान्तरम् ।

ततीः वादाह्वयं ग्रन्थमामनन्ति । येन पद्मतीर्थो विदीर्णाशो नाशोन्मुखस्व-समयरक्षणे बभूव । वादस्यैव तत्वोद्योत इति पाश्चात्यं नाम । अत एव श्री-हृषीकेशतीर्थादयोऽपि वाद इत्येव ग्रन्थनाम निर्दिशन्ति । कञ्जं पद्मम् । सिन्धुपं सिन्धुदेशाधिपम् ।। ४६ ।।

आस्तामास्तामेष वो विश्वमोषो
रेरे मायावादिचोरा द्रवेत ।
द्रष्टाद्रष्टा निग्रहीता ध्रुवं वः
प्राप्तः कालो द्राग् गुहान्तं प्रवेष्टुम् ।। ४७ ।।

(भा.प्र.) पुनरपि सभ्यैरभिहितावसरात् पूर्वं तेषु त्रस्तेषु विद्रुतेषु वादावसान-पद्यानां मध्वमहाजयमहामहकुतूहलिभिः सद्भिः निगदितानामयमभिसन्धिः प्रपञ्च्यते–

'द्रवतद्रवताऽशु मायिनः प्रविशध्वमतन्द्रिता गुहाः ।
[1]कमळारमणाम्बराश्रयः समुदेत्यखिलज्ञभास्करः ।।'

इत्यास्तामित्यनेन। 'त्वदुक्तं सत्यं मिथ्या वा' इत्याद्युक्त्वा द्रष्टाद्रष्टा वो निग्र-हीता ।।

(प.दी.) पुनरपि वादस्य सभ्याभिहितावरसात् पूर्वं त्रस्तेषु चोळजादिषु विद्रुतेषु सत्सु वादावसाने सति श्रीमन्मध्वमहाविजयमहामहेन कुतूहलिभिः सद्भिर्निगदितानां वादाख्यप्रकरणान्तेऽभिनिवेशितानाम्–'आनन्दतीर्थ-पुंसिंहो मायावादिदितेःसुतान् । विदार्य युक्तिनखरैरप्रतीपो विभासते[2] । पलायध्वम्पलायध्वं त्वरया मायिदानवाः । सर्वज्ञहरिरायाति तर्कागमदरारि-धृत् । द्रवतद्रवताऽशु मायिनः प्रविशध्वमतन्द्रिता गुहाः । कमळारम-णाम्बराश्रयः समुदेत्यखिलज्ञभास्करः । नृहरिः [3]सकळज्ञनामकः समुपैति

---

१. 'कमलारमण–'इति पाठान्तरम् । 'कमळा–' इत्येव श्रीहृषीकेशतीर्थलिखितः पाठः ।
२. 'विभासते', 'अभिभासते' इति द्वेधा कोशेषु पाठः । 'अतिशोभते' इति च श्रीहृषीकेशतीर्थसम्मतः पाठः । ३. 'सकलज्ञ–' इति पाठान्तरम् ।

हि मायिदानवान्। प्रपलायनमत्र तत् क्षमं त्वरया वसतिर्गुहासु च। जयत्यानन्दतीर्थेष्टदेवता नरकेसरी। विपाटिताज्ञानतमःकवाटात्युरुहुङ्कृतः। जयत्यमितपौरुषः स्वजनतेष्टचिन्तामणिस्त्वजेशमुखवन्दितो गुणगणार्णवः श्रीपतिः। सर्वज्ञसन्मुनीन्द्रोच्चसन्मनःपङ्कजालयः। अजितो जयति श्रीशो रमाबाहुलताश्रयः'इति [१]सप्तपद्यानामभिसन्धिः प्रपञ्च्यते नारायणार्येण। तत्र 'द्रवतद्रवत–' इत्यस्याभिप्रायः– **आस्तामिति**। **रेरे,** हीनसम्बोधने रे इत्येतदव्ययम्। 'हीनसम्बोधने तु रे' इत्यमरः। सम्भ्रमे द्विरुक्तिः। रेरे **मायावादिचोराः** हे मायावादिनामकाश्चोराः **वः** युष्माकं **स एष विश्वमोषः** भेदाद्यखिलप्रपञ्चचौर्यं **आस्तामास्तां** तिष्ठतुतिष्ठतु। इतः परमलमिति भावः। सम्भ्रमे द्विरुक्तिस्तात्पर्येण वा। तर्हि किमस्माभिः कार्यमिति चेत्, आह– **द्रवेत** पलायध्वम्। कुतः? **द्रष्टाद्रष्टा ध्रुवं वः निग्रहीता** निग्रहस्थानं प्राप्तान् करिष्यतीत्यर्थः। तथाहि– युष्माभिः किञ्चिदुक्तं चेद् भवदुक्तं सत्यं मिथ्या वेति विकल्प्य सत्यं चेदपसिद्धान्तः। मिथ्या चेद् भवदुक्तेः प्रमितत्वात् तन्मिथ्यात्वं प्रमाणविरुद्धमित्याद्युक्त्वा द्रष्टाद्रष्टा वादी निरुत्तरान् कुर्यादित्यर्थः। तस्माद् **वः** युष्माकं **द्राक्** आशु **गुहान्तं** गुहाप्रदेशं **प्रवेष्टुं कालः प्राप्तः**। यथा कश्चित् चोरान् दृष्ट्वा 'व एतच्चौर्यमास्ताम्। द्रष्टाद्रष्टा वो हन्ता। तस्मात् पलायध्वम्। द्राग् गुहां च प्रविशत' इति ब्रूयात् तद्वदिति भावः। एतेषां श्लोकानां 'इति निगदति मायावादिविद्वेषवेषे' इति सर्गान्त्यश्लोकेन सम्बन्धः ॥ ४७ ॥

(त.चं) पद्मतीर्थे पराजयभयात् पलायिते तत्रत्यैः सद्भिर्मध्वजयघोषणा कैश्चन पद्यैः कृता। तत्रेदमेकं पद्यम्–'द्रवतद्रवताऽशु मायिनः प्रविशध्वमतन्द्रिता गुहाः। कमळारमणाम्बराश्रयः समुदेत्यखिलज्ञभास्करः' इति। कमळारमणेति च्छन्दोनामगर्भं पदम्। 'कमला स्यात् ससजगा विच्छिन्ना सायकैः शरैः' इति हि तल्लक्षणमामनन्ति। अस्य पद्यस्य भावं विवृणोति

१. वस्तुतस्तु प्रथमपठितानां चतुर्णामेव पद्यानामभिसन्धिः प्रपञ्च्यते।

चतुर्भिः– 'आस्तामास्ताम्' [४७] इत्याद्यैः, 'सर्वाधारम्–'[५०] इत्यन्तैः । विश्वमोषः विश्वापहारः । मुष स्तेये । अलं मुषित्वा । द्रष्टाद्रष्टा निग्रहीता । योयः पश्यति सस वो निग्रहीष्यति । कथम्? 'विश्वं मिथ्येति यद् भाषध्वे किं तदपि मिथ्या? उताहो सत्यम्? यदि मिथ्या, सिद्धं नः समीहितम् । मिथ्येति चेन्मृषोद्यं तर्हि तथ्यं जगदित्यभ्युपगतम् । अथ सत्यम्, व्याहतं भाषमाणाः कथं श्रद्धेयवचनाः स्यात?' इति निग्राहिष्यध्वे । अतः द्रवेत । द्रु गतौ । पलायने प्रवहणे चेति वक्तव्यम् । रथोऽपि द्रवति । भीतोऽपि द्रवति । जलमपि द्रवति ॥ ४७ ॥

तेजो विद्वच्चक्रचन्द्रस्य लीनं
विध्वस्ताऽलं वादिनक्षत्रलक्ष्मीः ।
विश्वव्याप्तं यत्तु तद्दीप्तिमूलं
युष्मत्प्रेष्ठं तन्निरस्तं तमश्च ॥ ४८ ॥

(प.दी.) इह गुहां प्रवेष्टुं काल इत्याह– **तेज** इति । **विद्वच्चक्रचन्द्रस्य** विद्वत्समूहाख्यचन्द्रस्य **तेजः लीनम्** । दुर्विदुषां विद्यामदो निरस्त इति भावः । **वादिनक्षत्रलक्ष्मीः** कुवादिनामनक्षत्राणां लक्ष्मीरपि **अलं विध्वस्ता** निरस्ता । कुवादिनां जयश्रीरपि नष्टेत्यर्थः । न केवलमेतावन्मात्रम् । किन्तु **विश्वव्याप्तं** लोके व्याप्तम्, **तद्दीप्तिमूलम्,** तयोर्दीप्तेर्मूलम्, विद्वच्चक्रचन्द्रस्य वादिनक्षत्रलक्ष्म्याश्च शोभायाः कारणम्, **युष्मत्प्रेष्ठम्,** प्रत्यक्षादिप्रमाणसिद्धभेदादिप्रपञ्चचोराणां युष्माकमतिप्रियम्, **यत्तु तमः** अज्ञानं **तच्च निरस्तम्** । यदज्ञानमवलम्ब्येयन्तं कालं विदुषां वादिनां च प्रसरो लोके तदज्ञानं नष्टम् । भवतामतिप्रियं च तदज्ञानम् । 'मायाशक्त्या सर्वनिर्वाहसिद्धिः' इति सर्वनिर्वाहहेतुत्वाङ्गीकारात् तस्य । चन्द्रदीप्तेर्नक्षत्रदीप्तेश्च कारणं ध्वान्तं चोराणामतिप्रियम् । तमसि हि चोराश्चोरयन्ति । तस्मिन् ध्वान्ते नष्टे सति यथा कश्चिच्चोरान् वदेत्– 'हे चोराः, तमो नष्टम् । आशु द्रवत' इति तद्वदिति भावः ॥ ४८ ॥

(त.चं.) 'समुदेत्यखिलज्ञभास्करः' इत्यनेन ध्वनितमर्थमाह– तेज इत्यादिना । तद्दीप्तिमूलम् । विद्वच्चक्रचन्द्रस्य वादिनक्षत्राणां च दीप्तिमूलम् । युष्मत्प्रेष्ठम् । चोराणां हि प्रियतमं तमः ॥ ४८ ॥

पूर्वाशामापूर्य विश्वप्रकाशी
गोसन्दोहैः सप्तविद्याख्यवाहः ।
युष्माभिः किं नैक्षि देदीप्यतेऽसौ
देवः साक्षात् सर्ववित्सर्वदीपः ॥ ४९ ॥

(भा.प्र.) पूर्वेषां ब्रह्मादीनामाशां च ॥

(प.दी.) विद्वच्चक्रचन्द्रादेस्तेजोभङ्गः कुतः? कुतश्च तमो नष्टमिति चेदाह– **पूर्वे**ति । **असौ सर्ववित्सर्वदीपः** पूर्णप्रज्ञाख्यसूर्यः **साक्षात्** सर्वसमक्षम्, 'साक्षात् प्रत्यक्षतुल्ययोः' इत्यमरः, **देदीप्यते** प्रकाशते । श्रीमध्वाचार्यः सूर्यवत् सर्वसमक्षं प्रकाशते । **असौ युष्माभिः नैक्षि किम्?** न दृष्टः किम्? श्रीमध्वाचार्यं दृष्ट्वाऽप्येवमवस्थानं भवतामत्यनुचितम् । शीघ्रं पलायध्वमिति भावः । किं कृत्वाऽसौ प्रकाशते? **गोसन्दोहैः** वचनसमूहैः **पूर्वाशाम्,** पूर्वेषां ब्रह्मादीनामाशां सज्जनाज्ञाननिरासविषयं मनोरथम्, **आपूर्य** पूरयित्वा, ब्रह्मादीनां मनोरथं सम्यक् साधयित्वेति भावः । कथम्भूतः? **सप्तविद्याख्यवाहः** । ऋगाद्याश्चत्वारो मूलरामायणं भारतं पञ्चरात्रं चेति सप्तविद्याख्यानि वाहनानि यस्येति विग्रहः । अत एव **विश्वप्रकाशी** विश्वस्मिन् सर्वस्मिन् लोके प्रकाशत इति तथोक्तः । अथवा विश्वस्य सर्वस्य प्रपञ्चस्वरूपस्य भगवत्स्वरूपस्य च प्रकाशनाद् विश्वप्रकाशी । **देवः** क्रीडादिगुणकः । सप्तवाहः सप्ताश्वः **विश्वप्रकाशी** सर्वप्रकाशकः सर्वदीपः सूर्यः **पूर्वाशां** प्राचीं दिशं **गोसन्दोहैः** किरणसन्दोहैः **आपूर्य देदीप्यते** । **असौ युष्माभिः नैक्षि किम्?** हे बालिशाः, शीघ्रं पलायध्वमिति यथा कश्चिच्चोरान् प्रति वदेत् तद्वदिति भावः ॥ ४९ ॥

(त.चं.) तदेव स्फुटमाह– पूर्वाशामापूर्य । देवः द्योतमानः । लीलया सर्वविजयी च । सर्वं विश्वं दीपयतीति सर्वदीपः सूर्यः । सोऽपि पूर्वामाशामापूर्य गोसन्दोहैर्विश्वं प्रकाशयति सप्ताश्वं रथमारूढः । के सप्ताश्वाः? सप्तच्छन्दांसि, सप्त वासराः, सप्त वर्णा वा । 'सप्त युञ्जन्ति रथमेकचक्रम्' इति 'एको अश्वो वहति सप्तनामा' इति च श्रुतिः ॥ ४९ ॥

सर्वाधारं ब्रह्मसञ्ज्ञं विहायो
रम्याकारं शारदेन्दीवराभम् ।
सन्निर्णीतं गुण्यलं शब्दभेदै-
र्मध्वादित्यं संश्रितं कोऽपिधत्ते ॥ ५० ॥

(भा.प्र.) शब्दभेदैर्गुणि सन्निर्णीतम् । वेदैर्ज्ञानादिगुणवन्निश्चितम्, ध्वनिभिर्गुणवच्च ॥

(प.दी.) एवम्भूतोऽसौ केनाप्यपिधातुं न शक्यत इत्याह– **सर्वाधारमिति** । **सर्वाधारं** सर्वेषामाश्रयम्, **शारदेन्दीवराभम्,** अत एव **रम्याकारम्, शब्दभेदैः** वेदैः **अलं** सम्यक् **गुणि** गुणवत् ज्ञानानन्दादिगुणवदिति **निर्णीतं** निश्चितम्, **सत्** निर्दोषम्, **ब्रह्मसञ्ज्ञं** ब्रह्मनामकं **विहायः** आकाशं **संश्रितं मध्वादित्यं** श्रीमन्मध्वसूर्यं **कः अपिधत्ते** आच्छादयेत्? सर्वाधारत्वादिगुणयुक्तं परम्ब्रह्म सम्यगाश्रितं श्रीमन्मध्वाचार्यं कः पुमानाच्छादयेत् निराकुर्यात्? न कोऽपीत्यर्थः । यथा **सर्वाधारं** सर्वप्राणिनामाश्रयम्, **शारदेन्दीवराभं रम्याकारम्, शब्दभेदैः** ध्वनिभिः **गुणि** ध्वन्याख्यगुणयुक्तत्वेन **निर्णीतम्, विहायः** आकाशमाश्रितमादित्यं न कश्चिदाच्छादयेत् तद्वदिति श्लेषाभिप्रायः ॥ ५० ॥

(त.चं.) 'कमळारमणाम्बराश्रयः' इत्येतद् विवृणोति– सर्वाधारम् । ब्रह्म सर्वाधारः । विहायोऽपि । विहायसि हि विश्वमवतिष्ठते । रम्याकारं ब्रह्म पीताम्बरं मुक्ताहारं नीलनीरदश्यामम् । विहायोऽपि स्फुरितसौदामिनीकं परिवीतचन्द्रिकं जैवातृकनायकमणिघटिततारामुक्ताहारं नीलनीरदैः श्यामं

च भवति । ब्रह्म शारदेन्दीवराभम् । इन्दीवरमित्युत्पलसामान्यम् । अत्र तु नीलोत्पलमौचित्यात् । 'कन्नैदिले'[ಕನ್ನೈದಿಲೆ] इति भाषायाम् । शारदं शरदि भवम् । तेन वैशद्यातिशयमाह । विशदं विहायोऽप्याराន्नीलमिव विभाति । ब्रह्म शब्दविशेषैर्वेदैः अलं गुणि परिपूर्णगुणमिति सम्यङ् निर्णीतम् । सद्भिर्विद्वद्भिर्निर्णीतमिति वा । गुणीति सत् निर्दोषमिति च निर्णीतमिति च व्याचक्षते । विहायोऽपि ध्वनिभिः शब्दगुणकमिति विद्वद्भिर्निर्णीतम् । एवंविधे ब्रह्मसञ्ज्ञे द्यवि द्योतमानं मध्वप्रद्योतनं कः पिधातुं प्रभवेदिति ॥ ५० ॥

विधावतविधावत त्वरितमत्रिवादासुरा
अदभ्रधिषणाभिधो नरहरिर्हि जाज्वल्यते ।
स युक्तिनखरैः खरैर्मुखरमूर्खदुःखाङ्कुरै-
र्विदारयति दारुणप्रवचनप्रणादोऽप्रियान् ॥ ५१ ॥

(भा.प्र.) 'आनन्दतीर्थपुंसिंहो मायावादिदितेःसुतान् ।
'विदार्य युक्तिनखरैरप्रतीपोऽभिभासते[१] ॥
'नृहरिः [२]सकळज्ञनामकः समुपैति हि मायिदानवान् ।
'प्रपलायनमत्र तत् क्षमं त्वरया वसतिर्गुहासु च ॥'

–इत्यनयोर्विधावतेति । मायावादिदितेःसुतानित्यत्र 'षष्ठ्या आक्रोशे' इत्यलुग् भवति, दास्याःपुत्र इत्यादिवत् । नन्विदं दैत्यत्वं तत्वतस्तेषाम्, आक्रोशाभिप्रायत्वादिति । सत्यमेव दितिपुत्रत्वं मा भूदेषां मानुषत्वेन जातानां मायिनाम्, यदसुरत्वमन्धन्तमसैकयोग्यत्वलक्षणं तदस्त्यतितरामिति । अत्रिवादाः जीवेश्वरजडानां त्रयाणां वादेन वचनेन नियमेन रहिताः । तत्वतस्तद्वचनानां चातत्वावेदकत्वाङ्गीकारेण ॥

---

१. अत्रापि द्वेधा पठ्यते– 'विभासते' इति; 'अभिभासते' इति च । ' अतिशोभते' इति तु ह.पाठ इत्युक्तम् । २. 'सकलज्ञनामकः' इति पाठान्तरम् ।

(प.दी.) 'आनन्दतीर्थपुंसिंहो मायावादिदितेःसुतान्' इत्यस्य पद्यस्य, 'नृहरिः सकळज्ञनामकः–' इत्यस्य च प्रपञ्चः– **विधावतेत्यादि**। **अत्रिवादासुराः**, हे अत्रिवादाख्यदैत्याः, **त्वरितं विधावतविधावत**। अत्रिवादा नाम मायावादिनः। त्रिवादरहितत्वात्। वादो वचनम्। त्रयाणां वादस्त्रिवादः। जीवेश्वरजगद्विषयं वचनमित्यर्थः। जीवेश्वरजगद्विषयो वादो वचनं वेदादिकम्। तद्रहितत्वादत्रिवादा इत्युच्यन्ते। तद्रहितत्वं च तेषां तस्य वचनस्य तत्वावेदकत्वानङ्गीकारादित्यर्थः। **अदभ्रधिषणाभिधः**, श्रीपूर्णप्रज्ञाभिधः **नरहरिः** नरसिंहः **जाज्वल्यते हि**। हिशब्दो हेतौ। अतितरां ज्वलति यस्मात् तस्मात् विधावतेति। **दारुणप्रवचनप्रणादः** दुष्टानां दुःसहव्याख्यारूपसिंहनादोपेतः **सः** श्रीमध्वाचार्यनृहरिः **मुखरमूर्खदुःखाङ्कुरैः**, मुखराणां मूर्खाणां दुःखाङ्कुरैर्दुःखहेतुभिः **खरैः** क्रूरैः **युक्तिनखरैः** युक्तिसञ्ज्ञकैर्नखैः **अप्रियान्** शत्रून् **विदारयति**। दारुणप्रणादो नरहरिः नखरैः यथा शत्रून् विदारयति एवमेवायमदभ्रधिषणः श्रीपूर्णप्रज्ञाचार्यो दारुणप्रवचनः सन् युक्तिभिः प्रतिवादिनो निराकरोतीत्यर्थः ॥ ५१ ॥

(त.चं.) अथ 'आनन्दतीर्थपुंसिंहः–' इति, 'नृहरिः सकळज्ञनामकः–' इति च पद्यद्वयमेकयोक्त्या व्याख्याति– विधावतविधावत। 'प्रपलायनमत्र तत् क्षमं त्वरया' इत्येतद्विवरणम्– विधावतविधावत त्वरितम्। पलायनमेव क्षिप्रगमनम्। न तावता पर्याप्तम्। प्रपलायनमतिक्षिप्रगमनं वः परायणम्। तदपि त्वरया। धावनमेव क्षिप्रगमनम्। न तावता पर्याप्तम्। विधावत द्रुतं धावत। तदपि त्वरितम्। न चेन्नृहरिनखरैर्न भविष्यथ। 'मायिदानवान्' इति 'मायावादिदितेःसुतान्' इति च व्याख्याति– अत्रिवादासुराः। दितेःसुता इति न दितिपुत्रा उच्यन्ते। नापि दानवा इति दनुपुत्राः। किन्त्वासुरस्वभावसाम्यात् तथाऽऽक्रुश्यन्ते। तदेतत्– 'दितेःसुतान्' इत्यलुका बोध्यते। 'षष्ठ्या आक्रोशे'[६.३.१] इति हि पाणिनिः स्मरति। आक्रोशे गम्यमाने षष्ठ्या अलुग् भवतीति। तद्यथा– चोरस्यकुलम्। दास्याःपुत्रः। नात्र

दैत्यत्वं दानवत्वं वा पदार्थः । दैत्यानुचरा मनुष्याधमा वा येकेऽपि भवन्तु। अहो एषामन्धतमसपरायणतादुराग्रह इति केवलं विस्मयादाक्रुश्यते । य ईश्वरमभ्युपगम्यापि न जगदस्तीति वदन्ति, ये च जगदभ्युपगम्यापि नेश्वरोऽस्तीति, ये वा न जगदस्ति नापि जगदीश्वर इति वदन्ति ते सर्वेऽप्यत्रिवादाः । 'आनन्दतीर्थपुंसिंहः' इति, 'नृहरिः सकलज्ञनामकः' इति च व्याख्याति– अदभ्रधिषणाभिधो नरहरिर्हि जाज्वल्यते । 'विदार्य युक्तिनखरैः' इत्यस्य विवरणम्– स युक्तिनखरैः दुःखद्रुमस्याङ्कुरप्रायैः । पृथ्वी नामात्यष्टिश्छन्दः । लक्षणं तूक्तम्– जसजसयला लगौ चेति ॥ ५१ ॥

धत्ते रूपाण्यनन्तान्यपि भुवनपतेर्यो हृदाऽप्येकपक्षो
दक्षः सद्भ्योऽखिलेभ्योऽप्यमृतमिह ददौ केवलं यो न मात्रे ।
पक्षिश्रेष्ठोऽपरः सन्नमितमतिपदोऽसम्पदे स्यादयं वो
मा दर्पं मायिसर्पा भजत भजत तास्ता गुहा द्राग् द्विजिह्वाः ॥
॥ ५२ ॥

(भा.प्र.) स एकरूपमप्यंसेनैव द्विपक्षोऽपि । अमृतं मोक्षमपि सर्वेभ्यः ॥

(प.दी.) धत्त इति । **द्विजिह्वाः** हे **मायिसर्पाः** मायावादिसर्पाः, **दर्पं मा भजत** । मायिनामनृतवादित्वाद् द्विजिह्वत्वम् । सर्पाणां च द्वे जिह्वे इति प्रसिद्धम् । एवं द्विजिह्वत्वेन सर्पसमा हे मायिनः, यूयं **दर्पं मा भजत** । गर्वं त्यक्त्वा विनीता भवतेत्यर्थः । कुतः? **अयं अमितमतिपदः** श्रीपूर्णप्रज्ञनामा **पक्षिश्रेष्ठः** गरुडः **वः** युष्माकं **असम्पदे** अभूतये **स्यात्** । अयं श्रीमध्वो गरुडसमः किम्? नेत्याह– **अपर** इति । अयमपि **पक्षिश्रेष्ठः सन् अपरः** । पक्षिश्रेष्ठाद् गरुडादन्यः, तद्विलक्षण इति यावत् । तथाहि– गरुडः पक्षिणां विहगानां श्रेष्ठत्वात् पक्षिश्रेष्ठ इत्युच्यते । अयं तु न तथा । किन्तु पक्षिणां सिद्धान्तवतां वादिनां श्रेष्ठत्वात् पक्षिश्रेष्ठः । तस्मादयं पक्षिश्रेष्ठः सन्नप्यपर

इत्यर्थः । इतश्चापरः– **यः अयं** श्रीमध्वः **हृदाऽपि** हृदयेनापि **भुवनपतेः** त्रैलोक्यनाथस्य हरेः **अनन्तान्यपि रूपाणि धत्ते** । सर्वदाऽप्यनन्त-भगवद्रूपाणि ध्यायतीत्यर्थः । गरुडस्तु अंसेनाप्येकमेव रूपं धत्ते । अयं **एकपक्षः** प्रधानपक्षः । सर्वोत्तमसिद्धान्तवानित्यभिप्रायः । गरुडस्तु द्विपक्षः । अयं श्रीमध्वो **दक्षः** सर्वविषये चतुरः । गरुडस्तु न दक्षः । किन्तु दक्षदौहित्र एव । यः श्रीमध्वः **अखिलेभ्यः सद्भ्योऽपि इह अमृतं ददौ । केवलं मात्रे** जनन्यै **न** । किन्तु स्वजनन्यै, **अखिलेभ्यः सद्भ्यः च अमृतं** मोक्षं **ददौ** इत्यर्थः । गरुडस्तु **केवलं मात्रे** स्वजनन्यै **अमृतं** सुधां **ददौ** । नाखिलेभ्यः सद्भ्यः । एवमयं पक्षिश्रेष्ठनामभागपि गरुडादपर इत्यर्थः । एवम्भूतः **अयं वः असम्पदे स्यात्** । तस्मात् **दर्पं मा भजत** इत्यर्थः । तर्हि वयं किं कुर्म इति चेदाह– **द्राक् आशु तास्ताः** युष्माकमिष्टाः **गुहाः भजत** प्रविशत । गरुडमापतन्तं दृष्ट्वा कश्चित् सर्पान् प्रत्येवं यथा ब्रूयात् तद्वच्चोळजादीन् प्रति सन्निकरोऽवददित्यर्थः ॥ ५२ ॥

(त.चं.) 'त्वरया वसतिर्गुहासु च' इत्येतद् भङ्ग्यन्तरेण विवृणोति– धत्ते रूपाणि । पक्षिराड् गरुडः द्विपक्षोऽपि भुवनपतेर्नारायणस्यैकं रूपं वहति । अयमपरो मध्वनामा पक्षिश्रेष्ठः एकपक्षोऽपि भुवनपतेरनन्तानि रूपाणि धत्ते । तदपि हृदा मनसा । गरुडस्तु केवलमंसेनैव बहिरेव । अयन्त्वन्तर्मनसि । पक्षिश्रेष्ठ इति वादिश्रेष्ठः । एकपक्ष इति तत्ववादाख्यमुख्यपरिग्रहः । गरुडः केवलं मात्रेऽमृतं ददौ । अयं तु सर्वेभ्यः सद्भ्यो ददौ । अमृतं मोक्षम् । मोक्षसाधनं शास्त्रं ददावित्येतत् । दर्पं मा भजत । किन्तु गुहा भजत । कथं सर्पाः? यतो मायावादाख्यकालकूटमुखाः । अपि च द्विजिह्वाः । सर्पा द्विजिह्वा इति विदितम् । कथं मायिनो द्विजिह्वाः? वेदाः प्रमाणमिति अथाप्यतत्वावेदका इति वदन्तः कथं न द्विजिह्वाः? निर्गुणमशब्दमवाच्यं ब्रह्मेति रटन्तः अथापि सत्यं ज्ञानमनन्तं ब्रह्मेति पठन्तः कथं

न द्विजिह्वाः? 'दोषग्राही पुरोभागी द्विजिह्वो मत्सरी मतः' इति चाभिधानम् । स्रग्धरा नाम च्छन्दः । एकविंशत्यक्षरा प्रकृतिः । लक्षणं तूक्तं दशमे ॥ ५२ ॥

वेदव्रातसुदर्शनः परिलसत्तर्काख्यशङ्खध्वनि-
र्विभ्राजिष्णुपुराणसंहतिगदः श्लोकौघशार्ङ्गान्वितः ।
सत्सूत्रेष्वितिहासनन्दकचणो मध्वाख्यनारायणः
प्राप्तो वो निजिघृक्षया द्रवत हे मायाविदेवद्विषः ॥ ५३ ॥

(भा.प्र.) **'पलायध्वम्पलायध्वं त्वरया मायिदानवाः ।**
'सर्वज्ञहरिरायाति तर्कागमदरारिधृत्'[1] **इत्यस्य वेदव्रातेत्यादिना ॥**

(प.दी.)'पलायध्वम्पलायध्वं त्वरया मायिदानवाः । सर्वज्ञहरिरायाति तर्कागमदरारिधृत्' इत्यस्य प्रपञ्चः– **वेदव्रातेति** । **हे मायाविदेवद्विषः**, हे मायावाद्यसुराः, **द्रवत** पलायध्वम् । कुतः? **मध्वाख्यनारायणः** श्रीमन्मध्वनामा नारायणः **वः निजिघृक्षया** निग्रहणेच्छया **प्राप्तः** । कथम्भूतः? **वेदव्रातसुदर्शनः** वेदसमूहाख्यसुदर्शनयुक्तः । **परिलसत्तर्काख्यशङ्खध्वनिः** । **विभ्राजिष्णुपुराणसंहतिगदः**, विशेषेण शोभाशीलपुराणसमूहाख्यगदोपेतः । **श्लोकौघशार्ङ्गान्वितः**, श्लोकौघः पञ्चरात्रम्, पञ्चरात्राख्यशार्ङ्गयुक्तः । 'अमिताक्षरं पञ्चरात्रं विद्येत्याहुर्मनीषिणः । मिताक्षरं श्लोकवाच्यमुभयं वेद ईर्यते' इति ब्रह्माण्डे । अमिताक्षरमिति गद्यरूपमित्यर्थः । मिताक्षरमिति श्लोकरूपम् । तथाच श्लोकरूपपञ्चरात्रं श्लोकशब्दवाच्यम् । **सत्सूत्रेष्वितिहासनन्दकचणः** । सद्भिः निर्दोषैः सूत्रेषुभिः श्रीमद्ब्रह्मसूत्राख्यैरिषुभिर्बाणैः, इतिहासाख्यनन्दकेन च श्रीमहाभारताख्यखड्गेन च चणः चतुरः[2] । भगवतः खड्गस्य नन्दकाख्या । 'खड्गो नन्दकः कौस्तुभो मणिः' इत्यमरः ॥

---

१. अत्रापि द्विविधः पाठः । '–धृत्' इति; '–धृक्' इति च । 'तर्कागमदरारिधृत्' इति तु मूलकोशानुसारी पाठः । २.'–खड्गेन च वित्तः प्रतीतश्चणः' इति भाव्यम् ।

(त.चं.) 'पलायध्वम्–' इत्यस्य विवरणम्– वेदव्रातसुदर्शनः । इतिहासाख्येन महाभारतमूलरामायणाख्येन नन्दकेन खड्गेन वित्तः प्रथित इति इतिहासनन्दकचणः । 'तेन वित्तश्चुञ्चुप्चणपौ'[५.२.६] इति हि पाणिनिः । 'चक्रं सुदर्शनं चापः शार्ङ्गं कौमोदकी गदा । खड्गोऽथ नन्दकः शङ्खः पाञ्चजन्यः प्रकीर्तितः' इति च । शार्दूलविक्रीडितं च्छन्दः । एकान्नविंशत्यक्षराऽतिधृतिरित्युक्तम् ॥ ५३ ॥

इति निगदति मायावादिविद्वेषवेषे
शुभजननिकरे स्वारामतोऽस्मात् प्रयातः ।
न्यवसदमरधिष्ण्ये प्राग्रवाटाभिधाने
गुरुमतिरभिनन्दन् देवमानन्दमूर्तिम् ॥ ५४ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुतनारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये आनन्दाङ्किते द्वादशः सर्गः

—०—

(भा.प्र.)स्वारामस्य 'कावु' इत्यपभ्रष्टभाषा । प्राग्रवाटस्य 'कोडिपाडि' इति ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य भावप्रकाशिकाख्यटीकायां द्वादशः सर्गः

—०—

(प.दी.) इतीति । **मायावादिविद्वेषवेषे,** मायावादिषु विद्वेषः मायावादिविद्वेषः, स एव वेषो यस्येति विग्रहः, मायावादिविषयसम्पूर्णद्वेषयुक्त इत्यर्थः, एवम्भूते **शुभजननिकरे** श्रीमन्मध्वमहाविजयमहोत्सवकुतूहलिसज्जनसमूहे **इति** 'आस्तामास्तामेष वो विश्वमोषः–' इत्यादि **निगदति** वदति सति **अस्मात्** यत्र पद्मतीर्थो दृष्टो[१] निरुद्धो वादे पराजितश्च तस्मात् **स्वारामतः** 'कावु'इत्यपभ्रष्टसञ्ज्ञकाद् देशात् **प्रयातः गुरुमतिः** श्रीपूर्णप्रज्ञा-

१.वस्तुतस्तु पद्मतीर्थ एकवाटग्रामे कण्वतीर्थसमीपे दृष्टो निरुद्धश्च । 'एकवाटं ययौ गुरुः । तत्रस्थं चोळजं दृष्ट्वा–' इति भावप्रकाशिकावचनात् । वादस्तु 'कावु' नामके ग्रामे प्रवृत्तः । 'स्वारामतोऽस्मात्' इति मध्वविजयवचनादिति भाति ।

चार्यः **प्राग्रवाटाभिधाने** 'कोडिपाडि'सञ्ज्ञके **अमरधिष्ण्ये** देवस्थाने **न्यवसत्** चातुर्मास्यमुवास । किं कुर्वन्? **आनन्दमूर्तिं देवमभिनन्दन्** । तत्राधिष्ठितमानन्दरूपं भगवन्तं दृष्ट्वा सन्तुष्यन् ॥ ५४ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां द्वादशः सर्गः

—०—

(त.चं.) मायावादिविद्वेषवेषे। 'आकल्पो मण्डनं वेषः' इति च। भगवद्गुणद्वेषिषु विद्वेषोऽपि हि सतां मण्डनम् । यथा दुर्योधनादिषु भीमसेनस्य । स्वारामस्य 'कावु'[ಕಾವು] इति भाषानामेति भावप्रकाशिकायाम् । यत्र पण्डिताचार्यस्योदवसितं 'कावुमठ'[ಕಾವುಮಠ] इति प्रथितमद्यापि दृश्यते। पुरा तौळवाः 'कावु' इत्यारामं व्याजह्रुरिति भाति। एकवाटे निरुद्धः पद्मतीर्थस्ततः स्वाराममपससर्प । तत्र सभ्यमेळनेन वादकथा समजनीति ज्ञायते। वादे जितस्ततोऽपि नक्तमेव पलायामास। ततो मध्वः प्राग्रवाटाभिधानं ग्रामं जगाम। प्राग्रवाटे, 'कोडिपाडि'[ಕೊಡಿಪಾಡಿ] इति, 'कोडिप्पाडि' [ಕೊಡಿಪ್ಪಾಡಿ] इति च व्यवह्रियमाणे सम्प्रति 'पुत्तूर्'[ಪುತ್ತೂರು] इति विदितप्रदेशगतग्रामविशेषे । अमरधिष्ण्ये जनार्दनाख्यविष्णुदेवायतने चातुर्मास्यमुवास । यत्राद्यापि सा शिला पूज्यते यस्यां निषण्णो मध्वः स्वभक्तानां सन्दर्शनं ददौ । प्राग्रं तौळवभाषायां 'कोडि'[ಕೊಡಿ] इत्युच्यते। वाटी 'पाडि'[ಪಾಡಿ] इति। 'प्राग्रं च शिखरं शिरः' इति। पञ्चदशाक्षराऽतिशक्वरी मालिनी नाम च्छन्दः । लक्षणं तूक्तम् ॥ ५४ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याचख्यौ द्वादशं सर्गं सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु मध्वविजयटीकायां
तत्वचन्द्रिकायां द्वादशः सर्गः

—०—

[आदितः श्लोकाः– ६२९+५४=६८३]

त्रयोदशः सर्गः

[सह्यगिरिपरिसरगतं मध्वं प्रति जयसिंहेन दूतद्वारा सन्देशप्रेषणम् । तौळवमण्डलं प्रति मध्वस्य पुनरागमनम् । 'मदवूरु'ग्रामे मदनेश्वरमन्दिरे क्षणदाक्षपणम् । प्रातः शिष्याणां प्रस्थानसम्भ्रमः । देवमन्दिरान्निर्याणम् । राज्ञा जयसिंहेन समागमः । पादानतेन तेन साकं विष्णुमङ्गलं प्रति प्रयाणम् । मध्वस्य लोकोत्तररूपातिशयवर्णनम् । विष्णुमङ्गलदेवायतनप्रवेशः । तत्र हृषीकेशतीर्थेन भागवतवाचनम्, मध्वेन च प्रवचनम् । सुब्रह्मण्यसूरिपत्न्यां त्रिविक्रमार्यजननम् । बाल्य एव विरचितमहाकाव्येन तेन मायावादशास्त्राभ्यासः । निर्गुणभावनया न सुखमिति तस्य तातेनोपदेशः । त्रिविक्रमपण्डितेन वेदपुराणादीनां निजार्थसमीक्षा । तेन मध्वकीर्तिश्रवणम् । तत्ववादनिरासार्थं मायावादिभिस्तत्सविधे प्रार्थना । एकान्ते मध्वग्रन्थपर्यालोचनया तस्य विस्मयः । मध्वसमीपे तस्य चर्चा । विष्णुमङ्गलगतं मध्वमभ्येत्य प्रणामः ।]

पृथुदर्शनमुत्थितं कृतार्थं
पृथिवीभृत्प्रणतिं गृहीतवन्तम् ।
निजशिष्यमुदेऽथ सह्यमाप्तं
पुरुषः कश्चिदुपाययौ कदाचित् ॥ १ ॥

(भा.प्र.) उत्थाय पौर्णमास्यां स्वाराममितो निशीथ एव गतम् ।
श्रुत्वा चोळं त्रासाद् ग्राम्यैः सह दत्तमग्रहीद् ग्रन्थम् ॥
पृथिवीभृत् जयसिंहः ॥

(प.दी.) पृथ्विति । **उत्थितं** कृतचातुर्मास्योत्थानं **कृतार्थं** कृतकृत्यम् । चोळजं पौर्णमास्यामुत्थाय निशीथ एव स्वारामतो गतं श्रुत्वा त्रस्तैर्ग्रामजनैर्दत्तं चोळजाहृतं पुस्तकजातं स्वयमगृहीत्वा कस्यचिन्मध्यस्थस्य करे स्थापितवन्तमिति भावः । **पृथिवीभृत्प्रणतिम्,** पृथिवीभृतः जयसिंहाख्यस्य प्रणतिं नमस्कारं **गृहीतवन्तम्** । **अथ निजशिष्यमुदे** निजशिष्यसन्तोषाय **सह्यं** सह्यगिरिम् **आप्तम्** । सह्योपरि विद्यमानानां निजशिष्याणां सन्तोषाय तत्र गन्तुं मार्गवशात् सह्यगिरिमाप्तमिति भावः । एवम्भूतं **पृथुदर्शनं** श्रीपूर्णप्रज्ञाचार्यं **कदाचित् कश्चित् पुरुषः उपाययौ** समाययौ । आह्वातुमित्यर्थः ॥ १ ॥

(त.चं.) उत्थितं चातुर्मास्यात् । उत्थाय च प्राग्रवाटात् स्वारामं गतम्, तत्र च पुस्तकलाभवार्त्तया कृतार्थम्, 'स्वराज्ये जातोऽयं पुस्तकापरहणरूपः क्षुद्रापराधः क्षम्यताम्' इत्यभ्यर्थ्य कृतां पृथिवीभृतो जयसिंहस्य प्रणतिं

गृहीतवन्तम् । तथाहि भावप्रकाशिकायाम्–'उत्थाय पौर्णमास्यां स्वाराममितो निशीथ एव गतम् । श्रुत्वा चोळं त्रासाद् ग्राम्यैः सह दत्तमग्रहीद् ग्रन्थम्' इति । अयमर्थः– चातुर्मास्यादुत्थाय पौर्णमास्यां स्वारामं इतो गतो मध्वः निशीथ एव मध्वत्रासात् ततो निर्गतं चोळं श्रुत्वा अपराधत्रासाच्च ग्राम्यैः सहकृतेन राज्ञा दत्तं ग्रन्थजातमग्रहीत् । गृहीत्वा च राज्ञैवैतन्निर्णयः क्रियतामित्याशयेन मध्यस्थहस्ते निदधौ । तदर्थमेव जयसिंहस्य राज्ञः पुरुषः कश्चिदुपाययौ । फलिताग्रं चन्द्रिकापरनामधेयं विषमच्छन्द आसप्तषष्टितमं पद्यम् । लक्षणं तूक्तं नवमे ॥ १ ॥

भगवानिह नः स्वकिङ्कराणा-
मचिरेणाऽव्रजतादनुग्रहाय ।
इति कार्यचिकीर्षयाऽर्थयत् त्वां
नृप इत्यभ्यधितैष तं प्रणम्य ॥ २ ॥

(प.दी.) **भगवानिति** । **एषः** पुरुषः **तं** श्रीमध्वं **प्रणम्य इत्यभ्यधित** जगाद । कथम्? **स्वकिङ्कराणां नः अनुग्रहाय भगवान् अचिरेण इह आव्रजताद्** आगच्छतु **इति नृपः** जयसिंहाख्यः **कार्यचिकीर्षया** चोळजकृतपुस्तकापहारस्य प्रतिक्रियापूर्वकं त्वां क्षमापयित्वा मध्यस्थकरे स्थापितपुस्तकदानाख्यकार्यचिकीर्षया **त्वां आर्थयत्** प्रार्थयामास । इत्यभ्यधितेति सम्बन्धः ॥ २ ॥

(त.चं.) उपेत्य प्रणम्य चेत्यभ्यधित । किमिति? भगवानिह । इह सह्ये स्थितो भगवान् । इह अस्मद्राज्याय वाऽऽव्रजतात् । अथवा इहेतीदमो द्वितीयार्थे हः । यद्यपि त्रलिव हश्च सप्तम्यर्थे श्रूयते । तथाऽपि 'इतराभ्योऽपि दृश्यन्ते' [५.३. १४] इति समाधेयम् । आर्थयत् । अर्थ उपयाच्ञायाम् । आत्मनेभाष इति वैयाकरणाः । उभयतोभाषं बहवः कवयो मन्यन्ते ।'समन्यमन्यमर्थयन्ति'[५.४४.११] इत्यृग्वेदे । 'समर्थयस्व बहु ते

वसव्यम्' [२.१३.१३;१४.१२] इति च । 'प्रार्थयन्ति शयनोत्थितं प्रियाः' इति च कविप्रयोगः । अभ्यधित । 'डु धाञ् धारणपोषणयोः' इति काशकृत्स्नः । 'दानधारणयोः' इति च क्षीरस्वामी । अभिपूर्वस्तु कथनेऽर्थे प्रवर्तते ॥ २ ॥

अथ माघवतीमपास्य काष्ठां
व्रजता प्रैधिततेजसा प्रतीचीम् ।
परिशोधयता स्वपादसङ्गात्
पृथिवीं प्राज्ञदिवाकरेण रेजे ॥ ३ ॥

(प.दी.) अथेति । **अथ** इत्थं तद्वचनानन्तरं **माघवतीं** मघवत्सम्बन्धिनीम्, ऐन्द्रीमिति यावत्, **काष्ठां** दिशं **अपास्य** त्यक्त्वा **प्रतीचीं** पश्चिमां **काष्ठां व्रजता स्वपादसङ्गात्** स्वचरणसङ्गात् **पृथिवीं परिशोधयता** पवित्रीकुर्वता **प्रैधिततेजसा** परिपूर्णतेजसा **प्राज्ञदिवाकरेण** श्रीपूर्णप्रज्ञाचार्याख्यसूर्येण **रेजे** । ऐन्द्रीमाशां हित्वा प्रतीचीं दिशं व्रजन् स्वकिरणसङ्गात् सर्वं पावयन् दिवाकरो यथा प्रकाशेत तद्वदुक्तलक्षणोऽयं श्रीमन्मध्वाचार्यो रराजेति भावः ॥ ३ ॥

(त.चं.) अथ माघवतीम् । 'ऐन्द्री पूर्वा प्राची' इति, 'स्याद् वारुणी प्रतीची' इति च । काष्ठां दिशम् । स्वपादसङ्गात् । चरणसङ्गान्मध्वः । किरणसङ्गाद् उद्यद्दिवाकरः ॥ ३ ॥

अशुभानपहाय मायिजुष्टा-
नधमाद्रीनिव गोत्रनिम्नगौघैः ।
सुजनैस्तरसाऽभिगम्यमानः
परमस्नेहतया क्रमप्रसन्नैः ॥ ४ ॥

(भा.प्र.) परमस्नेहतया परमप्रणयत्वात्, स्नेहवत्त्वाच्च ॥

सुमनःफलशोभिनोऽत्र पुंसो नमयन् गोभिरनोकहानिवोच्चान् ।
अपि भङ्गमुपानयन्ननम्रान् दृढभावादपरानवार्यवीर्यः ॥ ५ ॥

गमनोत्सवविस्मितैर्निषेव्यो विविधैर्जानपदैर्जनैरजस्रम् ।
परिसृत्वरकीर्तिरार्तिमुक्त्यै पुरुषैर्दूरभुवश्च गम्यमानः ॥ ६ ॥

अमरैरमरानुगैर्मुनीन्द्रैरपरेक्षाविषयैश्च सेव्यमानः ।
हरिपादसरोजसङ्गसारो भुवने पावनपावनो निकामम् ॥ ७ ॥

अयमप्रतिवारणः प्रयाणे परमानन्दसुतीर्थसूरिराजः ।
विबभावतिवेलमच्छरूपः सुरसिन्धोरिव सन्ततप्रवाहः ॥ ८ ॥

(प.दी.) अशुभानिति । अयं **परमानन्दसुतीर्थसूरिराजः प्रयाणे** यात्रायां **अतिवेलं विबभौ** । क इव? **सुरसिन्धोः** देवनद्या गङ्गायाः **सन्ततप्रवाह इव** । 'देशे नदविशेषेऽब्धौ सिन्धुर्ना सरिति स्त्रियाम्' इत्यमरः । अन्त्यकुळकमेतत् । कथम्भूतः? **मायिजुष्टान्** मायावादिभिर्जुष्टान् वशीकृतान् **अशुभान्** दुर्जनान् **अपहाय** हित्वा **सुजनैः** सज्जनैः **तरसा अभिगम्यमानः** । कथमिव? सुरसिन्धुप्रवाहः **मायिजुष्टान्** मायिभिस्तस्करादिभिर्जुष्टान् **अधमाद्रीन्** क्षुद्रपर्वतान् **अपहाय गोत्रनिम्नगौघैरिव** महापर्वतोत्पन्ननदीसमूहैरिव । कथम्भूतैः सुजनैः? **परमस्नेहतया** उत्तमप्रणयवत्तया **क्रमप्रसन्नैः** क्रमेण श्रीमध्वसन्दर्शनादिना प्रसन्नैः मनःप्रसादमाप्तवद्भिः । अन्यत्र **परमस्नेहतया** उत्तमद्रवद्रव्यत्वेन **क्रमप्रसन्नैः** क्रमेण कालुष्यं त्यजद्भिः । 'आपः सांसिद्धिकद्रवाः' इत्यपामेव स्वाभाविकद्रवत्वं विवक्षितम् । स्वाभाविकद्रवस्यैव कदाचित् कलुषस्य सतः क्रमेण प्रसन्नत्वं निर्मलत्वं भवति । तस्मात् **परमसस्नेहतया क्रमप्रसन्नैः** वर्षासु कलुषैः क्रमेण शरत्काले प्राप्ते प्रसन्नैः निर्मलैः **गोत्रनिम्नगौघैरिव** इति भावः ॥ * ॥ **अत्र उच्चान्** उत्तमान् । मोक्षयोग्यानिति भावः । **सुमनःफलशोभिनः** शोभनैर्मनसः फलैः शोभिनः । मनोनैर्मल्यजन्यत्वेन

मनसः फलभूतैर्ज्ञानभक्तिवैराग्यादिगुणैः शोभमानान् **पुंसः** पुरुषान् । सत्पुरुषानिति यावत् । **गोभिः** वचनैः **नमयन्** आत्मनि प्रवणीकुर्वन् । सुरसिन्धुप्रवाहः **गोभिः** जलैः **सुमनःफलशोभिनः** सुमनोभिः पुष्पैः फलैश्च शोभमानान् **उच्चान्** उन्नतान् **अनोकाहानिव** वृक्षानिव । 'अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः' इत्यमरः । **दृढभावात्** दृढत्वात् । कठिनमानसत्वादित्यर्थः । **अनम्रान्** अविनीतान् **अपरान् पुंसः** पुरुषान् **भङ्गमपि** तिरस्कारमपि **उपानयन्** प्रापयन् । प्रवाहमुखे तिर्यक्पतितान् दृढत्वादनम्रान् वृक्षान् सुरसिन्धुप्रवाह इव । 'शुष्ककाष्ठानि मूर्खाश्च भज्यन्ते न नमन्ति च' इति हि भाषितम् । पुनः कथम्भूतः? **अवार्यवीर्यः** । नहि केनचिन्निवार्यते मध्वोऽखिलदुर्वादिनिराकरणसंरम्भः सुरसिन्धुप्रवाहसंरम्भ इव ॥ * ॥ **गमनोत्सवविस्मितैः विविधैः जानपदैः जनैः अजस्रं निषेव्यः** इत्यादि । नानाविधशिष्यसंवृतमेनं यात्रासमये द्रष्टुं नानाजानपदा अभिगच्छन्तीत्यर्थः । **परिसृत्वरकीर्तिः** प्रसरिष्णुकीर्तिः **आर्तिमुक्त्यै** सांसारिकदुःखनिवृत्त्यर्थं **पुरुषैः दूरभुवश्च** दूरदेशाच्च **गम्यमानः** प्राप्यमाणः ॥ * ॥ **अपरेक्षाविषयैः** । **अपरेषां** मनुष्याणां **ईक्षाविषयैः** दृष्टयगोचरैः **अमरैः अमरानुगैः मुनीन्द्रैश्च सेव्यमानः** । सुरसिन्धुप्रवाहोऽप्येवमेव हि । **हरिपादसरोजसङ्गसारः** । श्रीहरिचरणसरसिजसङ्गेन सारः उत्तमः । अत एव **भुवने पावनपावनः निकामम्**, अत्यन्तशुद्धः । एवमेव सुरसिन्धुप्रवाहोऽपि ॥ * ॥ **अच्छरूपः** निर्दोषस्वरूपः । सुरसिन्धुप्रवाहो धवळस्वरूपः । **अप्रतिवारणः** अप्रतिद्वन्द्वः । एवम्भूतः **अयं परमानन्दसुतीर्थसूरिराजः विबभौ** इति सम्बन्धः ॥

(त.चं.) गोत्रनिम्नगौघैः । गोत्रमिति कुलम् । गोत्रं इति पर्वतः । अत्र गोत्रा इति हिमवदादयः कुलपर्वताः । अधमाद्रिप्रतिबन्दितया श्रवणात् । गां त्रायन्त इति निर्वचनस्वारस्याच्च । 'गोत्रं नाम्नि च गोत्रोऽद्रौ गोत्रा भुवि गवां गणे' इति च । परमस्नेहतया । ष्णिह प्रीतौ । प्रीतिरिति मनसो लगनं चेतनधर्मः । मनस इत्यविवक्षितम् । ष्णिह लगन इति पर्याप्तम् । अचेतनान्यपि

स्निह्यन्ति। 'तिल स्नेह स्नेहने' इत्यपि काशकृत्स्नः पठति चुरादौ। जलं धानाः स्नेहयति। लगयतीत्यर्थः ॥ * ॥ सुमनःफलशोभिनः। शोभनं वा मनः-फलम्। सुमनसो वा फलम्। सौमनस्यम्। पुष्पफलशोभिनो वृक्षाः ॥ * ॥ विविधैर्जानपदैः। विविधदेशगतैर्जनैः। क्वचिद् विशेषणं विशिष्टे प्रयुक्तमपि विशेषणे पर्यवस्यतीति भाषाविशेषविदो वदन्ति। तद् यथा पीतानुष्णी-षिणः प्रवेशय। पीतोष्णीषान् प्रवेशयेत्यर्थः। परिसृत्वरकीर्तिः। परिसृत्वरी परितः प्रसरणशीला कीर्तिरस्येति। 'इण्-नश्-जि-सर्तिभ्यः क्वरप्' [३.२.१६३]। एभ्यश्चतुर्भ्यः क्वरप् तच्छीलादिषु भवतीति। तद् यथा– इत्वरः। नश्वरः। जित्वरः। सृत्वरः ॥ * ॥ अपरेक्षाया विषयैरविषयैश्चाभि-गम्यमानः सेव्यमानश्च। हरिपादसरोजसङ्गसारः। हरिपादसरोजसङ्गः सारो बलमस्येति। 'सारो बले स्थिरांशे च मज्जि पुंसि जले धने। न्याय्ये क्लीबं त्रिषु वरे' इति। हरिपादसरोजसङ्ग एव यस्य सिद्धान्तसारः। 'प्रवणं कुरु मानसमीशपदे' इति हि स्वयमघोषीत् ॥ * ॥ अतिवेलं भृशं विबभौ 'परमानन्दसुतीर्थसुमुनिराजः' ॥ ४-८ ॥

समयेन गतोऽमहीयसाऽसौ
विषयं स्तम्भपदोपसर्जनाख्यम्।
मदनाधिपतेः सुधाम धाम
प्रविवेशाखिललोकवन्दनीयम् ॥ ९ ॥

(भा.प्र.) विषयस्य 'कबेनाड्' इत्यपभ्रष्टभाषा॥

(प.दी.) **समयेने**ति। **असौ** श्रीमध्वः **अमहीयसा** अल्पेन **समयेन** कालेन, **स्तम्भपदोपसर्जनाख्यम्**। स्तम्भपदमुपसर्जनं यस्याः सा स्तम्भपदोप-सर्जना। स्तम्भपदोपसर्जना आख्या अभिधा यस्य स स्तम्भपदोपसर्ज-नाख्य इति विग्रहः। तं स्तम्भपदोपसर्जनाख्यं **विषयं** जनपदं **गतः** सन् **सु-धाम** शोभनतेजोयुतं **मदनाधिपतेः** मदनाधिपतिनाम्नो देवस्य **धाम** आलयं

प्रविवेश । कथम्भूतम्? **अखिललोकवन्दनीयम्** । स्तम्भपदोपसर्जनाख्य-विषयस्य 'कबेनाड्' इत्यपभ्रष्टसञ्ज्ञा । मदनाधिपतिधाम्नो 'मदवूर्' इत्य-भ्रष्टसञ्ज्ञा ॥ ९ ॥

(त.चं.) स्तम्भविशेषः 'कबे'[ಕಬೆ] इत्युच्यते । विषयः 'नाड्'[ನಾಡ್] इति । तेन स्तम्भपदोपसर्जनो विषयः 'कबेनाड्'[ಕಬೆನಾಡ್] इति भाषा-याम् । मदनाधिपतेर्धाम । मदनेश्वरमन्दिरम् । तमेतं भूभागं 'मदवूरु' [ಮದವೂರು] इत्यभाषन्त पुरा । 'मदनेश्वरम्'[ಮದನೇಶ್ವರಂ] इति मूलनाम भ्रंशित्वाभ्रंशित्वा 'मदवूरु' [ಮದವೂರು] इत्यासीत् । सम्प्रति पुनरपि विभ्रश्य 'मधूरु' [ಮಧೂರು] इति किमप्यन्यदेव नाम जातम् । तद् यथा श्रीमदनन्तपुरं पुरा 'स्यानंदूरु' इति रूपमाप । ततः पुनः 'तिरुअनंतपुरम्' इति । अखिललोकवन्दनीयस्य मदनाधिपतेः । उपपत्तिस्तूक्ता ॥ ९ ॥

क्षणदामिह तावदूषिवांसं
विहिताहर्मुखयोग्ययोगमेनम् ।
गमनोद्यमलक्षणैरजानन्
गमनायोद्यतमाशु शिष्यसङ्घाः ॥ १० ॥

(भा.प्र.) क्षणदामूषिवांसम् । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया ॥

(प.दी.) **क्षणदामि**ति । इह मदनाधिपतिधाम्नि **क्षणदां तावदूषिवांसम्, विहिताहर्मुखयोग्ययोगम्** । विहितः कृतः अहर्मुखयोग्यः प्रातःकालेऽनुष्ठातुं योग्यः योगः कर्म येन सः विहिताहर्मुखयोग्ययोगः । तम्, कृतप्रातः-स्नानादिकर्माणमिति यावत्, **एनं** श्रीमध्वं **शिष्यसङ्घाः गमनोद्यमलक्षणैः** गमनोद्यमस्य चिह्नैः **आशु गमनायोद्यतमजानन्** ॥ १० ॥

(त.चं.) प्रातः प्रस्थानार्थमिह तावत् क्षणदामूषिवांसम् । सकलां क्षणदा-मिह क्षपयामासेति । 'कालाध्वनोरत्यन्तसंयोगे'[२.३.५] । अत्यन्तसंयोग

इति कालस्याध्वनो वा क्रियागुणद्रव्यैः साकल्येन सम्बन्धः । मासमधीते । क्रोशमधीते । अहर्मुखयोग्यो योगो स्नानादिर्ध्यानं वा ॥ १० ॥

पुरतो विसृताः समाधिशुद्ध्यै
यतयस्तत्र पटीः कषायवेषाः ।
सहसोदहरन् स्वयोग्यमुद्रा-
युतदण्डादिकधारणोद्यमेन ॥ ११ ॥

(प.दी.) पुरत इति । **यतयः** श्रीमध्वशिष्या यतयः **तत्र** अमरसदने **समाधि-शुद्ध्यै,** समाधेर्भगवद्ध्यानस्य चित्तविक्षेपाभावलक्षणसौष्ठवाय, **पुरतः** अग्रतः **विसृताः** विस्तृताः, यवनिकात्वेन कृता इति यावत्, **कषायवेषाः** कषाय-स्वरूपाः **पटीः** पटान् **सहसा** द्राक् **उदहरन्** उद्धृतवन्तः । कथम्? **स्वयोग्यमुद्रायुतदण्डादिकधारणोद्यमेन** । स्वेषां परमहंसानां योग्याभि-र्मुद्राभिः सुरभिपरशवादिमुद्राभिर्युतानां दण्डादीनां दण्डपुस्तककमण्डल्वा-दीनां धारणोद्यमेन सहेति भावः ॥ ११ ॥

(त.चं.) पटीः काण्डपटीः । कषायवेषाः कषायवर्णाः । स्वयोग्यमुद्रायुत-दण्डादीति । तदिदं परमहंसानां दण्डादिषु स्वयोग्यसुरभिपरशवादिमुद्राङ्कनं नामापूर्वं सम्प्रति विस्मृतप्रायम् । अस्य सम्प्रदायस्य मूलमन्वेष्टव्यम् । दण्डे परशुमुद्राबन्धनं तावद् वस्त्रखण्डेन क्रियमाणमद्यापि दृश्यते ॥ ११ ॥

अवधार्य विशेषकारिशङ्ख-
प्रकटाङ्कान् सुधिया गतार्द्रभावान् ।
लसिता तुळसीस्रगस्य कण्ठे
हरिनिर्माल्यतयोचिता न्यधायि ॥ १२ ॥

(प.दी.) अवेति । सुधिया शोभनधिया केनचित् **अस्य** श्रीमध्वाचार्यस्य

विशेषकारिशङ्खप्रकटाङ्कान्, विशेषकान् वक्षोभुजादिगतांस्तिलकान्, अरि-शङ्खप्रकटाङ्कान् चक्रशङ्खयोः प्रकटलाञ्छनानि च, **गतार्द्रभावान्,** शुष्कानिति यावत्, **अवधार्य** ज्ञात्वा **लसिता** शोभना **तुळसीस्रक्** तुळसीमाला **अस्य** श्रीमध्वाचार्यस्य **कण्ठे न्यधायि** निहिता । कथम्भूता? **हरिनिर्माल्यतया उचिता** धर्तुमुचिता ॥ १२ ॥

(त.चं.) विशेषकारिशङ्खप्रकटाङ्कान् । विशेषकमित्यूर्ध्वपुण्ड्रमुच्यते । 'तिलकं तमालपत्रं चित्रकमुक्तं विशेषकं पुण्ड्रम्' इत्यभिधानम् । नित्यनिर्मलस्येदं भगवत इति निर्गतमालिन्यं निर्माल्यमुच्यते । वदन्ति च– 'ये कण्ठलग्न-तुळसीनळिनाक्षमाला ये बाहुमूलपरिचिह्नितशङ्खचक्राः' इति ॥ १२ ॥

यतधीर्गुरुचक्रिमूर्तिपूर्णं
यतनिश्वासवचा विशोध्य पाणी ।
गुणकुण्डलमण्डितं विमानं
गुणबन्धं[१] कवचावृतं बभार ॥ १३ ॥

(प.दी.) यतेति । यतनिश्वासवचाः, यते नियमिते निश्वासो वचश्च येन स तथोक्तः, **यतधीः** यतिः **पाणी** हस्तौ **विशोध्य** प्रक्षाळ्य **गुरुचक्रिमूर्तिपूर्णम्,** गुरूणां श्रीमध्वाचार्याणां चक्रिमूर्तिपूर्णम्, चक्रिमूर्तिभिः साळग्राममूर्तिभिः पूर्णम्, **गुणकुण्डलमण्डितं** तन्तुकृतकुण्डलालङ्कृतम्, **गुणबन्धं** तन्तुबन्धम्, **कवचावृतं** आच्छादनवस्त्रेणाऽवृतमाच्छादितं **विमानं बभार** ॥ १३ ॥

(त.चं.) यतधीः यमोपेतधीः । 'अहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहा यमाः' इति पातञ्जलम् । यो धिया प्रज्ञाबलेन सर्वेन्द्रियाणि समयंसीत् स यति-

---

१. 'गुणबद्धम्' इति प्रचलितः पाठः । विश्वपतितीर्थीयेऽपि तथैव मुद्रितः पाठः । अर्थ-दृष्ट्या तदेव समीचीनमिति भाति । प्रा.टीकायां तु 'गुणबन्धम्' इत्येव पठ्यते । गुणेन बन्धनमस्येति मत्वर्थीयेनाचा वा व्यधिकरणेन वा बहुव्रीहिणा योजनीयम् । व्यधिकरणो हेतुरिव प्रामाणिकत्वाद् बहुव्रीहिरपि शास्त्रतत्त्वज्ञैरङ्गीक्रियत एवेति ।

र्यतधीः। यता धियो मनोवृत्तयोऽस्येति । धिया यमित्वेन्द्रियाणि निजग्राहेति। इतरनिन्दनात्– 'सन्नियम्येन्द्रियग्रामं य आस्ते मनसा चरन्' इति। यतनिश्वासवचाः। स यतनिश्वासः यो नियतं प्राणानायच्छते। स यतवचाः यो मितवचा हिततथ्यवचाश्च। विमानधारणकाले विशिष्य गौरवभरेण यतनिश्वासवचाः। यम उपरमे। उपरमो निवृत्तिः। चक्रयुक्ता भगवन्मूर्तिः साळग्रामशिला। विमानं देवपेटिका। यत्र विगतमानो भगवान् विमीयते। गुणकुण्डलमण्डितम्। गुणः पेटीबन्धनी वटी। 'गुणो ज्यासूत्रतन्तुषु रज्जौ' इति च। आदौ दर्भमय्या रज्ज्वा बन्धनम्। ततोऽजिनपट्टमयेन कवचेनाऽवरणम्। ततः कुण्डलाकारेण पुना रज्जुप्रावरणमिति। गुणे गुणेन वा बन्धोऽस्येति गुणबन्धम्। गुणबन्धं बध्वा इत्यध्याहारो वा। 'अधिकरणे बन्धः'[३.४.४१] इति हि बध्नातेर्णमुलमाह पाणिनिः। 'बन्धोऽधिकरणे च'[४५५] इति च कातन्त्रे॥ १३॥

सकमण्डलुमण्डलावलम्बं
स्वयमेवालघुपुस्तकादिभारम्।
युवशिष्यगणो दधे नयत्ना-
न्न हि दाक्ष्यस्य समो गुणोऽपरोऽस्ति ॥ १४ ॥

(प.दी.) **सकमण्डल्विति**। **युवशिष्यगणः** यूनां शिष्याणां गणः **सकमण्डलुमण्डलावलम्बम्,** कमण्डलुमण्डलस्य जलपात्रसमूहस्य अवलम्बेन सहितम्, **अलघुपुस्तकादिभारम्,** अलघुं गुरुं पुस्तकादिभारं **स्वयमेव** उद्धरणादावन्यापेक्षां विनैव **नयत्नात्** अप्रयत्नाद् **दधे** उवाह। तथाहि– **दाक्ष्यस्य** दक्षत्वस्य **समः अपरः गुणः नास्ति हि**। दक्षत्वमेव सर्वगुणेषु प्रधानं हीति भावः॥ १४॥

(त.चं.) कमण्डलुः कुण्डी। 'गिण्डि'[ഗിണ്ടി] इति भाषायाम्। विशेषं सामान्ये पर्यवसाययत्यर्थान्तरं न्यस्यन्– न हि दाक्ष्यस्य। अविलम्बेन व्यवसितपारगमनचातुरी दाक्ष्यम्। दक्ष वृद्धौ शीघ्रार्थे च॥ १४॥

अतिसम्भ्रमतः परिभ्रमन्तं
भरदामानवलोकिनं चिराय ।
अनुयोगपरं मुहुः प्रमत्तं
जहसुर्नूतनशिष्यमत्र केचित् ॥ १५ ॥

(प.दी.) अतीति । अत्र अस्मिन् काले **केचित् नूतनशिष्यं जहसुः** । कथम्भूतम्? **चिराय भरदामानवलोकिनम्,** स्वेन नेतव्यपुस्तकादिभारबन्धनपाशमपश्यन्तम्, अत एव **अतिसम्भ्रमतः परिभ्रमन्तम्,** गमनकालात्ययशङ्कयेति भावः, **मुहुः अनुयोगपरम्,** 'त्वया दृष्टम्? त्वया दृष्टं किम्?' इति पुनःपुनः प्रश्नपरम्, **प्रमत्तं** विस्मृतनिहितस्थलम् । एवम्भूतं नूतनशिष्यं जहसुः ॥ १५ ॥

(त.चं.) अतिसम्भ्रमतः उद्वेगातिशयात् । 'गडिबिडि' [ಗಡಿಬಿಡಿ] इति भाषायाम् । अनवधानं प्रमादः । यत् काले वस्तूनामुपकण्ठगतानामस्मरणं नाम कण्ठगताया मालाया इव ॥ १५ ॥

अथ तत्क्षणघट्टितोरुघण्टा-
घननादव्यपदेशतः परेण ।
अमितप्रमतिः प्रचोदितोऽसा-
विति निर्यत्सु निजेषु निर्जगाम ॥ १६ ॥

(प.दी.) अथेति । अथ असौ **अमितप्रमतिः** श्रीपूर्णप्रज्ञाचार्यः **निजेषु** स्वशिष्येषु **इति** एवं **निर्यत्सु** निर्गच्छत्सु **निर्जगाम** । कथम्भूतः? **तत्क्षणघट्टितोरुघण्टाघननादव्यपदेशतः,** तत्क्षणे तस्मिन् क्षणे निर्गमनसमये घट्टितायाः ताडितायाः उरुघण्टायाः घननादव्यपदेशतः गम्भीरनादव्याजेन **परेण** मदनाधिपतिना **प्रचोदितः** । निर्गच्छतो घण्टानाद एव शोभनं निमित्तमभूदिति भावः ॥ १६ ॥

(त.चं.) घन इति मेघः । घन इति सान्द्रः । घन इति दृढः । घनमिति कांस्यमयस्तालघण्टादिः । घण्टैव घनम् । घनश्च नादः । निरन्तरश्च दृढश्च । यो नादपरम्परां दिक्षु विदिक्षु जनयति । घननाद इव स्तनितमिव चायं घण्टानादः । अपूर्वेयं पदशैली पण्डिताचार्यस्य । प्रचोदितः प्रेरितः, अभ्यनुज्ञातो वा । चुद सञ्चोदने । सञ्चोदनमिति प्रेरणम् ॥ १६ ॥

धृतमातपवारणं वरेण्यं व्रतिराजं तमुपर्युपर्युदारम् ।
उदयन्मिहिरोपरिष्ठपूर्णद्विजराजश्रियमाययावभूताम् ॥ १७ ॥

(प.दी.) **धृतमिति** । **वरेण्यं** श्रेष्ठं **तं व्रतिराजं** यतिराजं **उपर्युपरि** उपरिभागे समीपे **धृतं उदारं** उत्तमं **आतपवारणं** श्वेतच्छत्रम्, **अभूतां** कुत्राप्यदृष्टाम्, **उदयन्मिहिरोपरिष्ठपूर्णद्विजराजश्रियम्,** उदयन्मिहिरस्य उद्यत्सूर्यस्य, उपरिष्ठपूर्णद्विजराजश्रियं उपरिवर्तमानपूर्णचन्द्रश्रियं **आययौ** प्राप । इयमभूतोपमेति भावः । व्रतिराजमित्यत्र 'उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु । द्वितीयाऽऽम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते' इति द्वितीया ॥

(त.चं.) आतपवारणमातपत्रम् । आतपात् त्रायत इति । ननु वृष्टेरपि त्रायते । प्राधान्यतो व्यपदेशा भवन्ति । यद् राज्ञां प्रयाणसमयेष्वातपवारणाय परिजना उपरि परिगृह्य परिचरन्ति । वर्षासु न प्रायः प्रयान्ति राजानः । मा भो राजानः प्रयासिषुः । प्रजाः प्रयान्ति । तर्हि आततं पत्रमिति विगृह्य सन्तुष्यताम् । प्रकृते तु न वृष्टिप्रसङ्ग इत्यातपवारणमेव । 'मिहिरो विरोचनोऽर्कः' इत्यभिधानम् । वरेण्यं यतिराजमुपर्युपरि वरेण्यमातपवारणम् । व्रियत इति वरणीयं संसेवनीयं वरेण्यम् । वृङ् सम्भक्तौ । सम्भक्तिरिति संसेवामाहुः । 'वृङ एण्यः'[८.३] इति दशपादिका ॥ १७ ॥

भुवनत्रयधारिणं मुकुन्दं
दधदन्तः स दधे गुरुः स्वयं च ।

अपि केनचिदित्यदो न चित्रं
ननु स प्राणपतिर्बभार तं च ॥ १८ ॥

(प.दी.) भुवनेति । **भुवनत्रयधारिणं** भुवनत्रयं बिभ्रतं **मुकुन्दं अन्तः** स्वहृदये **दधत् सः गुरुः** श्रीमध्वाचार्यः **स्वयं च केनचिदपि** केनापि पुरुषेण **दधे** अंसाभ्यां धृतः **इत्यदः** इत्येतत् **चित्रं न** आश्चर्यं न भवति । कुतः? **सः प्राणपतिः तं च** आत्मानं वहन्तमपि स्वयमेवान्तर्यामी भूत्वा **बभार ननु** दध्रे हि ॥ १८ ॥

(त.चं.) प्राणपतिर्मुख्यप्राणो नारायणश्च ॥ १८ ॥

यतयो गृहिणोऽथ वर्णिमुख्याः
श्रुतिगास्त्यक्तनिषिद्धकाम्यभावाः ।
इह मूर्तिधरा इव स्वधर्माः
शतसङ्ख्याः शतसङ्ख्यमन्वगच्छन् ॥ १९ ॥

(भा.प्र.) निषिद्धकाम्यभावो निषिद्धकाम्यकर्मणोरभिप्रायः, निषिद्धत्वं काम्यत्वं च ॥

(प.दी.) यतय इति । इह गमनसमये **शतसङ्ख्याः यतयः शतसङ्ख्याः गृहिणः अथ वर्णिमुख्याः** ब्रह्मचारिश्रेष्ठाः **शतसङ्ख्यं** श्रीपूर्णप्रज्ञाचार्यं **अन्वगच्छन्** । क इव? **मूर्तिधराः** मूर्तिमन्तः **स्वधर्मा इव** स्वस्ववर्णाश्रमधर्मा इव । कथम्भूताः? **श्रुतिगाः** वेदगताः । वेदगतत्वं नाम वेदपाठादिनिरतत्वं वेदोक्ताचारनिष्ठत्वं च । स्वधर्माश्च **श्रुतिगाः** वेदसिद्धाः । पुनः कथम्भूताः? **त्यक्तनिषिद्धकाम्यभावाः** । काम्ये काम्यकर्मणि भावः काम्यभावः । काम्यकर्मविषयं मन इति यावत् । निषिद्धश्चासौ काम्यभावश्चेति निषिद्ध-काम्यभावः । त्यक्तो निषिद्धकाम्यभावो यैस्ते त्यक्तनिषिद्धकाम्यभावाः । 'तस्मान्नेष्टियाजुकः स्यात्' इत्यादिना काम्यकर्मणो निषिद्धत्वात् त्यक्त-

निषिद्धकाम्यकर्माणि इत्यर्थः । धर्माश्च त्यक्तनिषिद्धकाम्यभावाः उज्झित-निषिद्धकाम्यविषयाः । त्यक्तप्रवृत्तिविषयाः केवलनिवृत्तविषया इत्यर्थः ॥

(त.चं.) 'ब्रह्मचारी भवेद् वर्णी गृहस्थः स्नातकस्तथा' इति। श्रुतिं गच्छन्त्य-वगच्छन्तीति वेदेष्वधीतिनः श्रुतिगाः वर्णिमुख्या यतयो गृहिणश्च। श्रुतिगताः श्रुतिप्रतिपाद्या इति श्रुतिगाः स्वधर्माः । त्यक्तः निषिद्धे काम्ये च कर्मणि भावश्चिकीर्षारूपो यैस्ते वर्णिमुख्यास्त्यक्तनिषिद्धकाम्यभावाः । निषिद्धस्य काम्यस्य च भावो निषिद्धत्वं काम्यत्वं च । स त्यक्तो यत्र तेऽनिषिद्धा अकाम्याश्च स्वधर्मास्त्यक्तनिषिद्धकाम्यभावाः । शतसङ्ख्याः । शतशब्दो बहुवचनः ।'नूरारु'[ನೂರಾರು] इति भाषायाम् ॥ १९ ॥

परिवारजना न मार्गदुःखं
प्रययुः पूरुषरत्नमीक्षमाणाः ।
इति नाद्भुतमस्य हि प्रयान्ति
स्मृतिमात्राद् भविनो भवापवर्गम् ॥ २० ॥

(प.दी.) परिवारेति । **पूरुषरत्नं** पुरुषश्रेष्ठं श्रीमध्वाचार्यं **ईक्षमाणाः** पश्यन्तः **परिवारजनाः मार्गदुःखं न प्रययुः इति अद्भुतं** आश्चर्यं **न** । कुतः? **भविनः** संसारिणः **अस्य स्मृतिमात्रात्** स्मरणमात्रात् **भवापवर्गं** संसार-मोक्षं **प्रयान्ति हि** ॥ २० ॥

(त.चं.) न केवलं मार्गदुःखात् । किन्तु भवाख्यदुःखादेवापवर्गम् । अपवर्जनमपवर्गः । वृजी वर्जने । 'अपवर्गस्त्यागमोक्षयोः' ॥ २० ॥

मदनेश्वरवल्लभप्रदेशे
प्रभुमायान्तमथाभ्यपद्यत द्राक् ।
जयसिंह इमं नृसिंहवर्यः
शुभधीः स्तम्भविशिष्टसिंहनामा ॥ २१ ॥

(प.दी.) मदनेति । **अथ शुभधीः** शोभनचित्तः **स्तम्भविशिष्टसिंहनामा** स्तम्भपदोपसर्जनसिंहनामा, अपभ्रष्टभाषायां कबेसिंहनामेत्यर्थः, **जयसिंहः** जयसिंहाख्यः, एवं नामद्वयविशिष्टः **नृसिंहवर्यः** राजश्रेष्ठः **मदनेश्वरवल्लभप्रदेशे आयान्तं इमं प्रभुं द्राक् अभ्यपद्यत** अभिययौ ॥ २१ ॥

(त.चं.) नृसिंहवर्यः । यथा मृगाणां सिंहस्तथाऽयं नृणामिति नृसिंह इति राजोच्यते । तेष्वयं वर्य इति । अथवा वर्य इत्यपि श्रेष्ठवचनः । सिंह इत्यपि श्रेष्ठवचनः । उत्तमोत्तम इत्युक्तं भवति । स्तम्भविशिष्टसिंहनामा । 'कबेसिंह' [ಕಬೆಸಿಂಹ] इति जनैः प्रीत्याऽभिधीयमानः ।'कबेनाडु' [ಕಬೆನಾಡು] इति किल तद्राज्यस्य नाम । तमेनं 'कबेनाडुजयसिंह' [ಕಬೆನಾಡುಜಯಸಿಂಹ] नामानं प्रीत्या 'कबेसिंह' [ಕಬೆಸಿಂಹ] इति व्याजह्रुरिति । गौरवप्रदर्शनायाभिमुखं पदनमभिपदनम् । 'नृसिंहवर्यम्' इति च पाठः सम्भाव्यते । सिंहः सिंहवर्यमभ्यपद्यतेति ॥ २१ ॥

अवतीर्य पुरैव वाहनात् स्वादपि मार्गादपसार्य सैनिकान् सः ।
सह कैश्चन भूसुरैरवाप्तस्त्रिजगत्पूज्यपदान्तिके ननाम ॥ २२ ॥

(प.दी.) अवतीर्येति । **पुरैव** श्रीमध्वागमनात् पूर्वमेव **स्वात् वाहनात् अवतीर्य सैनिकानपि मार्गादपसार्य कैश्चन भूसुरैः सह अवाप्तः सः** राजा **त्रिजगत्पूज्यपदान्तिके** त्रिजगत्पूज्यचरणसन्निधौ **ननाम** ॥ २२ ॥

(त.चं.) ननाम शिरसा पदे प्रणम्य प्रह्वीभवन् पदान्तिके तस्थौ ॥

पृथिवीपतिनाऽनुगम्यमानो
विनयाद् भक्तिरसार्द्रमानसेन ।
अचिरेण स विष्णुमङ्गलस्य
प्रययावायतनोत्तमस्य पार्श्वम् ॥ २३ ॥

(प.दी.) पृथिवीति। **भक्तिरसार्द्रमानसेन पृथिवीपतिना** जयसिंहेन **विनयादनुगम्यमानः सः अचिरेण विष्णुमङ्गलस्याऽयतनोत्तमस्य** विष्णुमङ्गलनाम्नो देवालयश्रेष्ठस्य **पार्श्वं** अन्तिकं **प्रययौ** अवाप ॥ २३ ॥

(त.चं.) गौरवादवनताङ्गता विनयः ॥ २३ ॥

नरदेवदिदृक्षया समेता उभयग्रामजना जनाः परे च।
उपयान्तमनन्तमानसं तं मुहुरैक्षन्त कुतूहलाब्धिमग्नाः ॥ २४ ॥

(भा.प्र.) 'वाटः, समवायः'[1] **इति ग्रामद्वयम्॥**

(प.दी.) **नरदेवेति। नरदेवदिदृक्षया** जयसिंहाख्यनृपदिदृक्षया **समेताः** मिळिताः **उभयग्रामजनाः** 'पाडि-कुडेल्' इत्यपभ्रष्टसञ्ज्ञकग्रामद्वयजनाः **परे** अन्ये **जनाश्च उपयान्तं** गच्छन्तं **तं अनन्तमानसं** श्रीपूर्णप्रज्ञाचार्यं **मुहुः** पुनःपुनः **ऐक्षन्त**। कथम्भूताः? **कुतूहलाब्धिमग्नाः** ॥ २४ ॥

(त.चं.) नरदेवदिदृक्षया। नरलोकेऽवतीर्णस्य प्राणदेवस्य मध्वस्य दिदृक्षया वा। स्फुटं प्राणावतारत्वं तस्याजानन्तोऽपि 'कोऽप्ययं देवतुल्यः श्रूयते। नूनमयं महात्मा द्रष्टव्यः' इति कुतूहलाब्धिमग्नाः। दर्शन्दर्शमतृप्यन्तो मुहुर्मुहुरैक्षन्त। 'वाटः समवाय इति ग्रामद्वयम्' इति भावप्रकाशिका। वाट एव वाटी। भाषायाम्–'पाडि'[ಪಾಡಿ], इति समवाय एव भाषायाम्–'कूडेल्'[ಕೂಡೆಲ್] इति, 'कुडेल्' [ಕುಡೆಲ್] इति, 'कूड्लु'[ಕೂಡ್ಲು] इति च व्यवह्रियते ॥ २४ ॥

पुरतो मधुरस्वनैर्वदद्भिः स्वकृताः कर्णसुखा मुकुन्दगाथाः।
धृतपङ्कजबीजचक्रचिह्नैः कृतनृत्तैश्चतुरैर्निषेव्यमाणम् ॥ २५ ॥

(प.दी.) पुनः कथम्भूतमैक्षन्तेत्यपेक्षायामाह– **पुरत** इत्यादि। आदिकुळकमेतत्। **पुरतः** अग्रतः **स्वकृताः** स्वेन रचिताः **कर्णसुखाः** कर्णयोः सुखं

---

१. 'समुवाय' इति क्वचित् पाठो लिपिकृत्प्रमादः।

याभ्यस्ताः **मुकुन्दगाथाः** मुकुन्दविषया गाथाः **वदद्भिः मधुरस्वनैः कृतनृत्तैः धृतपङ्कजबीजचक्रचिह्नैः** धृतानि पङ्कजबीजानि चक्रचिह्नानि च यैस्ते तथोक्तास्तैः **चतुरैः** विदग्धैः पुरुषैः **निषेव्यमाणम्** ॥ २५ ॥

(त.चं.) मुकुन्दगाथाः हरिगाथाद्याः । तथाहि हरिगाथा–'अव नः श्रीपतिरप्रतिरधिकेशादिभवादे । करुणापूर्ण वरप्रद चरितं ज्ञापय मे ते' इत्याद्या । 'परमानन्दसुतीर्थसुमुनिराजो हरिगाथाम् । कृतवान् नित्यसुपूर्णकपरमानन्दपदैषिन्' इत्यन्ता । अन्या च श्रूयते– 'आनन्दतीर्थकृता हरिगाथा । पापहरा शुभनित्यसुखार्था' इति । गाथालक्षणं तूक्तं पिङ्गलनागेन– 'अत्रानुक्तं गाथा'[८-१] इति । 'अत्र शास्त्रे नामोद्देशेन यन्नोक्तं छन्दः, प्रयोगे च दृश्यते, तद् गाथेति मन्तव्यम्' इति च हलायुधः । हलायुधमतेन त्वत्र प्रयुक्ते 'आस्यतामित्युदीर्योपविष्टे'[७.५७] इति, 'इज्यते यज्ञशीलैः स यज्ञः'[११-७४] इति च द्वे अपि पद्ये गाथाच्छन्दोबद्धे । ग्रन्थान्तरे त्रयीति नामोद्देशः कृतः । अत्रोक्तमपि पादवैषम्येण गाथा भवतीत्यन्ये– 'गाथोक्ता चरणैः षड्भिस्तथैव चरणैस्त्रिभिः' इति । तद् यथा षड्पदी अनुष्टुप् । 'यद् विषमाक्षरपादं विषमच्छन्दस्त्वत्र न पठितं सा गाथा' इत्यन्ये । सर्वमेतद्धरिगाथायाम् । पङ्कजबीजं नळिनाक्षमाला । कृतनृत्तैः । नृती गात्रविक्षेपे । नृत्तं नर्तनम् । 'नपुंसके भावे क्तः'[३.३.११४]। चतुरैः । चतेरुरच् । चती याचने । चत्यन्ते जनैरिति चतुराः ॥ २५ ॥

कलिताञ्जलिना स्फुटानुयातं जनसम्बाधसहेन भूमिभर्त्रा ।
करुणाविषयं चिकीर्षुणा स्वं व्रजता किङ्करतामकैतवेन ॥ २६ ॥

(प.दी.) पुनः कथम्भूतम्? **कलिताञ्जलिना** बद्धाञ्जलिपुटेन **जनसम्बाधसहेन** [१]जनसम्बन्धसहिष्णुना **स्वं** आत्मानं **करुणाविषयं** सेवया श्रीमन्मध्व-

---
१.'जनसम्मर्द–' इति स्वरसम् ।

कृपाविषयं **चिकीर्षुणा, अकैतवेन** कैतवाभावेन, निर्व्याजमिति यावत्, **किङ्करतां** श्रीमन्मध्वकिङ्करतां **व्रजता भूमिभर्त्रा** जयसिंहेन **स्फुटानुयातं** स्पष्टमनुगम्यमानम् ॥ २६ ॥

(त.चं.) जनानां सम्बाधः सम्मर्दः । 'सम्बाधः सङ्कटे भगेऽप्युक्तः' इति च । सम्यग् बाध्यन्तेऽत्रेति सम्बाधः सम्मर्दः । सम्यग् बाधते यून इति भगं सम्बाधः । 'बाधृ लोडने' इत्येके । 'रोटने' इत्यन्ये । 'रोटनं प्रतिघातः' इति क्षीरस्वामी । पीडायामित्येतत् ॥ २६ ॥

इदमित्थमितीक्षणैर्नराणा-
मपरिच्छेद्यमहिष्ठधामरूपम् ।
अधिकं धरणीमलञ्चिकीर्षुं
स्फुटमुद्यन्तमिव द्युनाथमन्यम् ॥ २७ ॥

(प.दी.) पुनः कथम्भूतम्? **नराणां ईक्षणैः** नयनैः **इदं** दृश्यमानं स्वरूपं **इत्थं** एवम्भूतं **इति अपरिच्छेद्यमहिष्ठधामरूपं** अनिर्धार्यातिबहळतेजोरूपम् । **धरणीं** भुवं **अधिकमलञ्चिकीर्षुम्,** एवम्भूतत्वात् **स्फुटं** सम्यक् **उद्यन्तं अन्यं** द्वितीयं **द्युनाथमिव** सूर्यमिव ॥ २७ ॥

(त.चं.) परिच्छेदो निष्कृष्य निरूपणम् । स्फुटं मेघाद्यनावृतं स्फुटदर्शनं द्युनाथं सूर्यमिवेति वा ॥ २७ ॥

अशनैः शनकैरिवाऽव्रजन्तं
युवसिंहप्रवरप्रगल्भयानम् ।
अतिपाटलपादपल्लवाभ्या-
मवनीं पावनतामलं नयन्तम् ॥ २८ ॥

(प.दी.) पुनः कथम्भूतम्? **अशनैः** शीघ्रं आव्रजन्तमपि **शनकैराव्रजन्तमिव युवसिंहप्रवरप्रगल्भयानम्,** युवसिंहश्रेष्ठगमनवत् प्रगल्भयानम्, **अति-**

पाटलपादपल्लवाभ्यां अतिरक्तकोमलपादकिसलयाभ्यां **अवनीं अलं पावनतां नयन्तम्** ॥ २८ ॥

(त.चं.) प्रगल्भं प्रौढं निर्भयं यानमस्येति । तद् यथा– 'धीरोद्धता नमयतीव गतिर्धरित्रीम्' इति । पाटलस्ताम्रः । श्वेतलोहित इत्येतत् । अवनीम् । अवति भूतानीत्यवनिरवनी वा । इदन्ता ईदन्ता अपि भवन्ति । 'कृदिकाराद-क्तिनः' इति हि गणसूत्रम् । तेन भूमिर्भूमी भवति । धरणिर्धरणी भवति । अवनिरप्यवनी भवति । अवनीति करणे ल्युड् वा । टित्त्वात् ङीप् ॥

नखनिर्जितपद्मरागरागं वरकूर्मप्रपदं निगूढगुल्फम् ।
सुरवर्यकराग्रसेव्यजङ्घं द्विरदोदारकरोपमोरुयुग्मम् ॥ २९ ॥

(प.दी.) पुनः कीदृशम्? **नखनिर्जितपद्मरागरागम्**, स्वचरणनखैर्निर्जितः पद्मरागस्य रागो लौहित्यं येन स तथोक्तस्तम् । **वरकूर्मप्रपदं** वरकूर्मसदृश-पादाग्रोपेतम् । **निगूढगुल्फं** निगूढपादग्रन्थियुतम् । 'पादाग्रं प्रपदं पादः पदङ्घ्रिश्चरणोऽस्त्रियाम् । तद्ग्रन्थी घुटिके गुल्फौ पुमान् पार्ष्णिस्तयोरधः' इत्यमरः । **सुरवर्यकराग्रसेव्यजङ्घं** देववरकरतळनिषेव्यजङ्घम् । **द्विरदोदार-करोपमोरुयुग्मम्** । स्पष्टोऽर्थः ॥ २९ ॥

(त.चं.) पद्मरागो माणिक्यम् । कूर्मवदुन्नतपृष्ठं क्रमान्नतं प्रपदं पादाग्रम् । पादपार्श्वयोर्ग्रन्थी गुल्फौ । ऊरुजङ्घयोः सन्धिग्रन्थिर्जानुः । उपरितन ऊरुः । अधस्तनी जङ्घा ॥ २९ ॥

शुभशुद्धनितम्बबिम्बराजन्नवकौशेयविशेषबाह्यवस्त्रम् ।
तनुकुक्षिगळाळिकेषु रेखात्रितयेन प्रकटेन शोभमानम् ॥ ३० ॥

(प.दी.) **शुभशुद्धनितम्बबिम्बराजन्नवकौशेयविशेषबाह्यवस्त्रं** शोभन-निर्मलनितम्बमण्डलविराजमाननूतनकौशेयविशेषरूपबहिर्वाससम् । **तनु-कुक्षिगळाळिकेषु** तनूदरकण्ठललाटेषु **प्रकटेन** स्पष्टेन **रेखात्रितयेन शोभमानम्** ॥ ३० ॥

(त.चं.) कौशेयं क्रिमिकोशसम्भवम् । 'पट्टे'[ಪಟ್ಟೆ] इति भाषायाम् । 'कोशाड्ढञ्' [४.३.४२] इति पाणिनिः । जयादित्यश्चाऽह– 'कोशे सम्भूतं कौशेयं वस्त्रम् । रूढिरेषा । तेन क्रिमौ न भवति । खड्गकोशाच्च' इति । तनुकुक्षौ गळे चाळिके च ॥ ३० ॥

मृदुसूक्ष्मघनारुणाविकाच्छप्रकटप्रावरणेन भासमानम् ।
अतिनूतनतिग्मभानुभासां निकरेणेव सुवर्णसानुमन्तम् ॥ ३१ ॥

(प.दी.) मृदुसूक्ष्मघनारुणाविकाच्छप्रकटप्रावरणेन, मृदुना सूक्ष्मेण घनेन निबिडेन अरुणेन आविकेन तनुरुहरूपेण अच्छेन निर्मलेन प्रकटेन शोभमानेन प्रावरणेन **भासमानम्** । केन कमिव? **अतिनूतनतिग्मभानुभासाम्,** अतिनूतनस्य सद्य एवोद्यतः तिग्मभानोः सूर्यस्य भासां **निकरेण भासमानं सुवर्णसानुमन्तमिव** सुवर्णपर्वतमिव । उद्यद्दिनकरस्यातिलोहितरश्मिनिकरेण भासमानं मेरुमिवेति भावः ॥ ३१ ॥

(त.चं.) अविरूर्णायुः । आविकः कम्बलोऽप्यूर्णायुः । यमूर्णया रचयन्ति । 'उण्णे'[ಉಣ್ಣೆ] इति भाषायाम् । 'ऊर्णाया युस्'[५.२.१२३] । मत्वर्थे युस्प्रत्ययो भवति । ऊर्णाऽस्य विद्यत इत्युरभ्रोऽप्यूर्णायुः । औरभ्रः कम्बलोऽप्यूर्णायुः । अवयवत्वेनेति वक्तव्यम् । अन्यथा कम्बलवन्तमप्यूर्णायुषं व्याहरेयुः ॥ ३१ ॥

पृथुवक्षसमुन्नतांसभित्तिं
गुरुवृत्तायतहृद्यबाहुदण्डम् ।
परमारुणपाणिपल्लवान्तः
स्फुरितोर्ध्वध्वजलाञ्छनादिमन्तम् ॥ ३२ ॥

(प.दी.) पृथुवक्षसं विशालवक्षःस्थलम् । **उन्नतांसभित्तिम्** । स्पष्टोऽर्थः । **गुरुवृत्तायतहृद्यबाहुदण्डं** स्थूलवर्तुलदीर्घमनोहरबाहुदण्डम् । **परमारुण-**

पाणिपल्लवान्तः अतिकोमलहस्ततळाख्यकिसलयान्तः, **स्फुरितोर्ध्वध्वजलाञ्छनादिमन्तम्** । परमारुणत्वादिविशिष्टहस्ततळे विलसदूर्ध्वरेखारूपध्वजलाञ्छनादिमन्तम् । ध्वजचिह्नेन, आदिशब्दात् चक्रादिचिह्नेन च युक्तम् ॥ ३२ ॥

(त.चं.) गुरुः पीनः ॥ ३२ ॥

परिपूर्णशशाङ्कबिम्बशङ्का-
विषयं प्राक् सहसाऽवलोकनेन ।
अकळङ्कतया परं विविक्तं
वदनं बिभ्रतमच्छविभ्रमाब्धिम् ॥ ३३ ॥

(प.दी.) **प्राक्** प्रथमं **सहसा** **अवलोकनेन** दर्शनेन **परिपूर्णशशाङ्कबिम्बशङ्काविषयं** सम्पूर्णचन्द्रमण्डलमिदमिति शङ्काया विषयम् । **परं** पश्चात् **अकळङ्कतया** कळङ्करहिततया **विविक्तं** चन्द्रमण्डलात् पृथक्कृतम् । **अच्छविभ्रमाब्धिं** निर्मलकान्तिसमुद्रं **वदनं बिभ्रतम्** । अयं भावः– सहसा श्रीमध्वमुखं पश्यतां पुंसां कान्त्याधिक्योपलम्भादिदं चन्द्रमण्डलमिति प्रतीतिर्जायते । पश्चाद् विवेकपूर्वकं दर्शने सति तत्र कळङ्कमपश्यतामिति बुद्धिर्जायते– नेदं चन्द्रमण्डलम् । सत्यपि कान्त्याधिक्ये कळङ्काभावात् । तस्मादकळङ्कमेतद् वदनं सकळङ्काच्चन्द्रमण्डलात् पृथगेवेति । एवमविवेकदशायां चन्द्रमण्डलत्वशङ्काविषयम् । विवेकदशायां चन्द्रमण्डलादन्यत्वबुद्धिविषयं वदनं बिभ्रतमिति ॥ ३३ ॥

(त.चं.) सहसाऽवलोकनेन । आकस्मिकदर्शनेन । तत्क्षणदर्शनेन वा । 'आकस्मिकार्थे सहसा तत्काले च निगद्यते' इति च । विच्छित्तिविशेषो विभ्रमः । 'विभ्रमः शोभायां संशये हावे' इति च ॥ ३३ ॥

अतिभासुरमन्दहासराज-
न्नवकुन्दाभरदं शुभारुणोष्ठम् ।

कमळायतलोचनावलोकै-
रपि लोकान् सकलान् प्रहर्षयन्तम् ॥ ३४ ॥

(प.दी.) अतिभासुरमन्दहासराजन्नवकुन्दाभरदम् । अतिसुन्दरेण मन्द-हासेन विराजमाननवकुन्दमुकुळसदृशरदनयुक्तम् । **शुभारुणोष्ठम्** । स्पष्टोऽर्थः । **कमळायतलोचनावलोकैः** कमलवदायतलोचनाभ्यामवलोकैर्दर्शनैः **सकलान् लोकानपि प्रहर्षयन्तं** सन्तोषयन्तम् ॥ ३४ ॥

(त.चं.) नवकुन्दं कुन्दकोरकम् । 'माघ्यः कुन्दः कुरुण्टकः' इति पुंसि पठति रत्नकोशः ।'कोलुमल्लिगे'[ಕೊಲುಮಲ್ಲಿಗೆ] इति भाषायाम् । वस्तुतः कुरुण्टकोऽन्य एव ।'गोरण्टे'[ಗೊರಂಟೆ] इति भाषायाम् । कोशकारा अपि प्रमाद्यन्ति ॥ ३४ ॥

अतिभासुरकर्णभासितश्रीतुळसीगुच्छमतुच्छकान्तिगण्डम् ।
भुवनत्रयभूत्यभूतिदाने चतुरभ्रूवरविभ्रमं सुमौलिम् ॥ ३५ ॥

(प.दी.) अतिभासुरकर्णभासितश्रीतुळसीगुच्छम् । अतिसुन्दरयोः कर्णयोः विराजिश्रीतुळसीस्तबकयुतम् । **अतुच्छकान्तिगण्डं** सम्पूर्णकान्तिमद्गण्ड-युतम् । **भुवनत्रयभूत्यभूतिदाने** भुवनत्रयस्य भूतिदाने सृष्टिस्थित्यादिदाने अभूतिदाने च प्रळयादिदाने च **चतुरभ्रूवरविभ्रमम्** । चतुरेण भ्रुवोर्वरेण विभ्रमेण विलासेन सहितम् । **सुमौलिं** शोभनमस्तकम् । एवम्भूतं तं मुहुरै-क्षन्तेत्यादिकुळकमेतत् ॥ ३५ ॥

(त.चं.) तुळसीगुच्छः तुळसीस्तबकः । 'गोञ्चलु'[ಗೊಂಚಲು] इति भाषायाम् । 'स्तबको गुच्छको गुच्छो गुलुच्छः परिकीर्तितः' इति च । सतां भूतिदाने । असतामभूतिदाने च चतुरो भ्रूविभ्रमोऽस्य । भ्रूवरयोर्वा विभ्रमः । भ्रुवोर्वा वरविभ्रमः । भूत्यभूती सुखदुःखे वा ॥ ३५ ॥

सकलावयवान् स्फुटं मिमानाः
प्रतिमालक्षणलक्षणाय लक्ष्यम् ।

चतुरा विदधुर्यदीयगात्रं
स सुलक्ष्मेत्यधुना निगद्यते नो ॥ ३६ ॥

(प.दी.) **सकलेति** । **चतुराः** पुरुषलक्षणविचारविदग्धाः पुरुषाः **सकलावयवान्** श्रीमन्मध्वस्य हस्तपादतदङ्गुल्यादिसर्वावयवान् **स्फुटं** सम्यक् **मिमानाः** मानीकुर्वन्तः सन्तः **यदीयगात्रं** यस्य श्रीमन्मध्वस्य विद्यमानं देहं **प्रतिमालक्षणलक्षणाय** शिलादिप्रतिमानां लक्षणज्ञानाय **लक्ष्यं** निदर्शनं **विदधुः** । पुरुषलक्षणविचारविदग्धाः पुरुषाः श्रीमन्मध्वंसकलावयवान् मिमानाः सन्तः तदवयवेषु लक्षणशास्त्रसंवादं दृष्ट्वा एतदङ्गोपाङ्गवदेव सर्वप्रतिमाङ्गोपाङ्गानि भवेयुरिति निश्चितवन्त इति भावः । **सः** एवम्भूतः श्रीमन्मध्वः **सुलक्ष्मेति** शोभनलक्षणयुक्त इति अस्माभिः **अधुना** इदानीं **नो निगद्यते** । किन्त्वयं सुलक्ष्मेति सर्वदा सर्वसम्मत इति भावः ॥ ३६ ॥

(त.चं.) मिमानाः प्रतिमालक्षणशास्त्रानुसारेण मापयन्तः । माङ् माने शब्दे च । जुहोत्यादिः । मिमीते । अनुमिमानाश्च तर्कयन्तः । 'इदमित्थं लक्षणीयम्, अस्य तथात्वात्' इति । प्रतिमालक्षणस्य लक्षणाय दर्शनाय । लक्ष दर्शनाङ्कनयोः । शम लक्ष आलोचने वा । 'निभाळनं निशामनं निध्यानमवलोकनम् । लक्षणं दर्शनं दृष्टिः' इति । 'लाञ्छनं लक्ष्म लक्षणम्' इति च ॥ ३६ ॥

अतिलोलदृशां समीक्षितुं स्वं जनसम्बाधभयेन दूरभाजाम् ।
समदर्शयदूर्ध्वमोरसोऽसौ दययैवोरुजनौघमध्यगोऽपि ॥ ३७ ॥

(प.दी.) अतीति । **असौ** श्रीमध्वः **उरुजनौघमध्यगोऽपि स्वं** आत्मानं **समीक्षितुं अतिलोलदृशां** तथाऽपि **जनसम्बाधभयेन** जनसम्मर्दभयेन **दूरभाजां** जनानां **दययैव** कृपयैव **आ उरसः** उरःस्थलमारभ्य **ऊर्ध्वं समदर्शयत्** । स्वयमुरुजनौघमध्यगोऽपि पूर्वोन्मानादुच्चो भूत्वाऽऽत्मानमुरःस्थलादारभ्य सर्वेभ्यो दर्शयामासेत्यर्थः ॥ ३७ ॥

(त.चं.) अतिलोलदृशाम् । लोलं सतृष्णम् । 'लोलुभं लोलुपं लोलं लालसं लम्पटं विदुः' इति च । 'लोलश्चले सतृष्णे च' इति च । 'लुड विलोडने' । केचित् लुडस्य स्थाने लुटं पठन्ति लुट विलोटन इति । तेषां टङ्कारवादिनां लोडृधातुरेव शरणम् । लोडृ उन्माद इति ॥ ३७ ॥

सविकासदृशां कृताञ्जलीनां जनतानां परमादरान्नतानाम् ।
वलयेन वृतः प्रियं मुरारेः प्रविवेशाऽयतनं प्रबर्हबोधः ॥ ३८ ॥

(प.दी.) **सविकासेति** । **सविकासदृशां** स्वमुखारविन्ददर्शनेन सविकास-नयनानां **कृताञ्जलीनां परमादरान्नतानां जनतानां वलयेन** मण्डलेन **वृतः प्रबर्हबोधः** श्रीपूर्णप्रज्ञाचार्यः **मुरारेः** श्रीविष्णुमङ्गलाधिवासिनो हरेः **प्रियं आयतनं** श्रीविष्णुमङ्गलाख्यं देवगृहं **प्रविवेश** ॥ ३८ ॥

(त.चं.) अनक्ति, अज्यते वेत्यञ्जलिः करसम्पुटः । 'अञ्जू व्यक्तिम्रक्षणगतिषु' इति क्षीरस्वामी । म्रक्षणं घृतादिसेकः । 'अञ्जु' इति काशकृत्स्नः । 'व्यक्ति-म्रक्षणकान्तिगतिषु' इति च । स्वस्य प्रियं मुरारेरायतनम् । मुरारेः प्रियमा-यतनं वा ॥ ३८ ॥

विविधप्रभुमध्यसन्निषण्णो नरदेवेन समं स गूढदेवः ।
विबभावुडुराडिवोडुमध्ये सह मह्यास्तनयेन पूर्णबिम्बः ॥ ३९ ॥

(प.दी.) **विविधेति** । **नरदेवेन** जयसिंहभूपेन **समं विविधप्रभुमध्यसन्निषण्णः सः गूढदेवः** मानुषवेषेण गूढः श्रीमुख्यवायुदेवः **विबभौ** । क इव? **पूर्णबिम्बः उडुराट्**, उडूनां नक्षत्राणां राजा चन्द्रः, 'नक्षत्रमृक्षं भं तारा तारकाऽप्युडु वा स्त्रियाम्' इत्यमरः । **मह्याः** भुवः **तनयेन** अङ्गारकेण **सह** । 'अङ्गारकः कुजो भौमो लोहिताङ्गो महीसुतः' इति च । **उडुमध्ये इव** ॥ ३९ ॥

(त.चं.) प्रभवो ग्रामण्यः । उपरि आकाशे डवन्त इत्युडूनि नक्षत्राणि । उडवो वा । डुञ् गतौ । मह्यास्तनयेन । स हि विशिष्य भासते ॥ ३९ ॥

अवदत् स कथां रथाङ्गपाणेर्भगवान् भागवते भवापहन्त्रीम् ।
अनुकूलगुणस्वरादिभाजा निजशिष्यप्रवरेण वाच्यमाने ॥ ४० ॥

(भा.प्र.) निजशिष्यप्रवरेण हृषीकेशतीर्थेन ॥

(प.दी.) अवददिति । **भगवान्** षड्गुणैश्वर्यवान् **सः** श्रीमध्वः **अनुकूलगुणस्वरादिभाजा** गाम्भीर्यश्राव्यत्वादिगुणवदात्मस्वराद्यनुकूलगाम्भीर्यगुणवत्स्वराकृत्यादिभाजा **निजशिष्यप्रवरेण** हृषीकेशतीर्थभट्टारकेण **भागवते वाच्यमाने** सति **भवापहन्त्रीं** संसारनाशिनीं **रथाङ्गपाणेः** चक्रपाणेः **कथामवदत्** ॥ ४० ॥

(त.चं.) निजशिष्यप्रवरेण । हृषीकेशतीर्थो हि सन्यासिषु प्रथमशिष्य इति शिष्योत्कृष्टः प्रथितः ॥ ४० ॥

कथनं तदुदारधैर्यसारं
मधुरं पुष्कलभाववत् प्रसन्नम् ।
विदुषोऽविदुषोऽपि शृण्वतोऽलं
व्यधिताऽनन्दरसाम्बुधौ निमग्नान् ॥ ४१ ॥

(प.दी.) कथनमिति । **उदारधैर्यसारं मधुरं** श्रोतृजनमनोहरं **पुष्कलभाववत्** सम्पूर्णाभिप्रायोपेतं **प्रसन्नं** शब्दतोऽर्थतश्चाकठोरम् । एवम्भूतं **तत् कथनं शृण्वतः** श्रवणं कुर्वतः **विदुषः** पण्डितान् **अविदुषः** अपण्डितान् **अपि अलं आनन्दरसाम्बुधौ** आनन्दाख्यरसोपेतसमुद्रे **निमग्नान् व्यधित** अकरोत् ॥ ४१ ॥

(त.चं.) उदारेण महता धैर्येण सारं श्रेष्ठम् । धैर्यं नाम शब्दे चार्थे चासन्दिग्धता । पाठशुद्धिरर्थशुद्धिश्च । 'अयं प्रतनः पाठः, अयमेव चार्थः' इति । 'विपुलं पुष्कलं पुष्टम्' इति च । आनन्दरसाम्बुधौ । तथाहि तत्वदीपिकायाम्– 'यस्यास्खलितानवरतवेदशास्त्रव्याख्यानश्रवणसमुत्खात-

दुःखसङ्घातो निखिलपण्डितवर्गः परमामृतसमुद्रावगाहीव बहळमाह्लादमाप्नोति' इति ॥ ४१ ॥

गमनासनसङ्कथादिलीलाः
स्मृतिमात्रेण भवापवर्गदात्रीः ।
कथमप्यमराः प्रपञ्चयेयु-
र्ननु मध्वस्य न मादृशोऽल्पबोधाः ॥ ४२ ॥

(प.दी.) **गमने**ति । **स्मृतिमात्रेण** केवलं स्मरणादेव **भवापवर्गदात्रीः** संसारान्मोक्षदात्रीः **मध्वस्य गमनासनसङ्कथादिलीलाः अमराः कथमपि** भारतीरुद्राद्यनुग्रहबलादेव **प्रपञ्चयेयुः** विस्तारयेयुः[१], **मादृशाः** मद्विधाः **अल्पबोधाः** अल्पज्ञानिनः **न प्रपञ्चयेयुर्ननु** ॥ ४२ ॥

(त.चं.) भवापवर्गदात्रीः । भवादपवर्गं ददातीति । भवं भूतिमुन्नतिमपवर्गं च ददातीति वा । 'तं भूतिरिति देवा उपासाञ्चक्रिरे । ते बभूवुः' इति श्रुतेः । प्रपञ्चयेयुर्ननु । 'ननु प्रश्नेऽवधारणे' ॥ ४२ ॥

सुतपःकवितादिसद्गुणानां
लिकुचानां कुलजोऽङ्गिरोन्वयानाम् ।
अभवद् गुहनामको विपश्चित्
कविवर्योऽखिलवादिवन्दनीयः ॥ ४३ ॥

(भा.प्र.) गुहनामको विपश्चित् सुब्रह्मण्यपण्डितः ॥

(प.दी.) **सुतप** इति । **सुतपःकवितादिसद्गुणानां** शोभनेन तपसा गद्यपद्यात्मककविताभिश्च, आदिशब्दात् सदाचारभक्तिज्ञानादिभिः सद्गुणैर्युक्तानाम् । **अङ्गिरोऽन्वयानां** अङ्गिरोगोत्रजातानाम् । **लिकुचानां** लिकुचसञ्ज्ञक-

१.कोशे 'विस्तरेयुः' इति पठ्यते । स्फुटं लिपिकृतां प्रमादः ।

कुलजन्मनां द्विजानां **कुलजः गुहनामकः** सुब्रह्मण्यनामा **विपश्चित्** पण्डितः **अभवत्** । कथम्भूतः? **कविवर्यः** कविश्रेष्ठः । **अखिलवादिवन्दनीयः** ॥

(त.चं.) अथ त्रिविक्रमपण्डिताचार्यस्य कथामुपक्रमते । लिकुचानां कुलजः । लिकुचवृक्षं तौळवाः 'पेज'[ಪೆಜ] इति व्याहरन्ति । 'हेब्बलसु' [ಹೆಬ್ಬಲಸು] इति कर्णाटाः । यस्य गृहवाटी लिकुचोपलक्षिता स लिकुचान्वय उच्यते । 'पेजत्ताय'[ಪೆಜತ್ತಾಯ] इति भाषायाम् । लिकुचवानित्यर्थः ॥

दयिताऽस्य सती गुणानुरूपा
विधिवीर्येण मुहुर्मृतप्रजाऽपि ।
अभजद् भुवनप्रभू हरीशौ
सुतकामा वसुदेवसूनुभक्ता ॥ ४४ ॥

(प.दी.) दयितेति । **सती** पतिव्रता **गुणानुरूपा** पत्युर्गुणानामनुकूला **अस्य** सुब्रह्मण्यपण्डितस्य **दयिता विधिवीर्येण** दैवसामर्थ्येन **मुहुः मृतप्रजा** मृतापत्या **अपि सुतकामा** पुत्रकामा सती **भुवनप्रभू** सर्वलोकेश्वरौ **हरीशौ** हरिहरौ **अभजत्** । कथम्भूता? **वसुदेवसूनुभक्ता** विशेषतः श्रीकृष्णभक्ता ॥ ४४ ॥

(त.चं.) स्वभावतो वसुदेवसूनुभक्ता । कुलाम्नायेन हरीशौ हरिहरावभजत् । तथाहि स्मार्तभागवतसम्प्रदायः । बहूनि चात्र हरिहरायतनानि । सुब्रह्मण्यपण्डितश्च तामेव परम्परामनुगतः ॥ ४४ ॥

परमेश्वरयोः प्रसादयोगात् सुतरत्नं तदसूत सूरिपत्नी ।
परिषत्पदपट्टनेषु[१] नार्घो विविदे यस्य समः परीक्षकाग्र्यैः ॥ ४५ ॥

(प.दी.) परमेति । **सूरिपत्नी** सुब्रह्मण्यपण्डितपत्नी **परमेश्वरयोः** हरिहरयोः

---

१. 'पत्तनेषु' इति प्रचलितः पाठः । प्राचीनप्रयोगः द्विधा दृश्यते– 'पट्टणेषु' इति 'पट्टनेषु' इति च । भागवततात्पर्याद्यनुसारेण 'पट्टनेषु' इति प्रयोगोऽत्र समादृतः ।

प्रसादयोगात् सेवाजन्यानुग्रहसम्बन्धात् **तत् सुतरत्नं** तादृशं सुताख्यरत्नं **असूत** सुषुवे। कीदृशम्? **यस्य** सुतरत्नस्य **परिषत्पदपट्टनेषु** विद्वत्सभाख्य-पट्टनेषु **परीक्षकाग्र्यैः** सुतरत्नगुणपरीक्षकाग्र्यैः **समः** उचितः **अर्घः** मूल्यं **न विविदे** न ज्ञातः। अनर्घस्य कस्यचिद् रत्नस्य मूल्यपरिज्ञानाय पट्टनं नीतस्य सतः पट्टनेषु परीक्षकाग्र्यैः तन्मूल्यपरीक्षाविदग्धैः पुरुषैर्यथाऽर्घो न ज्ञायते। अनर्घत्वादनर्घमेतदित्येवोच्यते। तथा तत्सुतस्य विद्वत्सभारूढस्य तस्य सर्वविद्यावैदग्ध्यादिगुणजातं पश्यद्भिर्विद्वज्जनैस्तस्य गुणानामियत्ता नावधारितेति भावः ॥ ४५ ॥

(त.चं.) परिषत्पदपट्टनेषु। अत्र त्रीणि रूपाणि भवन्ति। पत्तनमिति पट्टनमिति पट्टणमिति च। पतन्त्यत्र जना इति पत्तनम्। पत्लृ गतौ। पततेस्तनन्। अथ च पट गतौ। पटन्त्यत्रेति पट्टनम्। 'पट्टनं पुटभेदनम्' इति प्राचीनकोशकाराः। पट्टनमित्येव प्रतनम्। पत्तनमित्यर्वाक्तनम्। केचित्तु णत्वमपीच्छन्ति पट्टणमिति। तद्यथा– अङ्गणमिति, अङ्कणमिति। पृषोदरादिरिति च परिहरन्ति। ननु पृषोदरादिगणे च नैते पठ्यन्ते? मा पाठिषत। सम्प्रति पठिष्यते। यदाह भाष्यकारः– 'कानि पृषोदरादीनि? पृषोदरप्रकाराणि। कानि पृषोदरप्रकाराणि? येषु लोपागमवर्णविकाराः श्रूयन्ते, नचोच्यन्ते' इति। केचिदर्थभेदेन व्याचक्षते– 'पत्तनं शकटैर्गम्यं घोटकैर्नौभिरेव च। नौभिरेव तु यद् गम्यं पट्टणं तत् प्रचक्षते' इति। किं पट्टनम्? 'मानक्रयविक्रयस्थानम्' इति दशपादिकावृत्तिकारः। परिषत्पदानि सभास्थानान्येव पट्टनानि 'सभा स्यात् परिषत् सदः' इति, 'अर्चना-मूल्ययोरर्घः' इति च ॥ ४५ ॥

वदनेन्दुमवेक्ष्य नन्दनस्य
स्वकुलोत्तारणदक्षलक्षणस्य।
कृतकृत्यतया क्रियाः प्रकुर्वन्
कविराख्यादुचितां त्रिविक्रमाख्याम् ॥ ४६ ॥

(भा.प्र.) वेदे कवितायां वेदान्त इति त्रिषु विक्रमोऽस्येत्युचितां त्रिविक्रमाख्याम् ॥

(प.दी.) वदनेति। **स्वकुलोत्तारणदक्षलक्षणस्य,** लिकुचसञ्ज्ञकस्य स्वकुलस्योत्तारणे समस्तव्रजिनसमुद्रसन्तारणे चतुरलक्षणस्य, **नन्दनस्य वदनेन्दुमवेक्ष्य कृतकृत्यतया क्रियाः** जातकर्मादिक्रियाः **प्रकुर्वन् कविः** सुब्रह्मण्यपण्डितः **उचितां त्रिविक्रमाख्यां** त्रिविक्रमसञ्ज्ञां **आख्यात्** अवदत्। 'ख्या प्रकथने' इति धातुः । त्रिषु वेदे कवितायां वेदान्ते चेति त्रिषु विक्रमोऽवगतिरस्येति त्रिविक्रम इत्यन्वर्थकत्वादुचितां त्रिविक्रमसञ्ज्ञां चकार पितेति भावः ॥

(त.चं.) त्रिषु विक्रमः अप्रतिहतं सामर्थ्यमस्येत्युचितामन्वर्थाम्। 'विक्रमः शक्तिसम्पत्तिः' इति च ॥ ४६ ॥

कळभाषण एव सूरिपोतः
कविरासीदनवद्यपद्यवादी ।
अवभाति ननु प्रभाप्रभावी
भगवान् बालतरोऽपि तिग्मभानुः ॥ ४७ ॥

(प.दी.) कळेति। **सूरिपोतः** पण्डितशिशुः **कळभाषण एव** बाल्ये अव्यक्तभाषणदशामापन्न एव **अनवद्यपद्यवादी** निर्दोषपद्यकथनशीलः सन् **कविरासीत्** । तथाहि– **तिग्मभानुः** उष्णकिरणः **भगवान् बालतरोऽपि प्रभाप्रभावी** प्रभासामर्थ्यवान् **अवभाति ननु** शोभते खलु ॥ ४७ ॥

(त.चं.) 'कळश्च मधुरोऽव्यक्तः' इति च। 'तिग्मांशुस्तरणिस्तथा दिनमणिः' इति च ॥ ४७ ॥

सकलाङ्गयुतावभातशाखः
समये प्राप्त उदारपक्षिसेव्यः ।
स ससर्ज सदध्वगोपकृत्यै
लिकुचः काव्यफलं रसाभिरामम् ॥ ४८ ॥

(भा.प्र.) काव्यफलमुषाहरणाख्यम् ॥

(प.दी.) **सकलेति । सकलाङ्गयुतावभातशाखः**, शीक्षाकल्पनिरुक्तादिसर्ववेदाङ्गयुक्ततया अवभाता ज्ञाताः शाखा ऋगादिशाखा येन स तथोक्तः, **समये** शास्त्रे **प्राप्ते** ज्ञाते सति **उदारपक्षिसेव्यः**, उदारैः पूर्वापरविवेकादिगुणोदारैः पक्षिभिः नानाविधशास्त्रसिद्धान्तवद्भिः, तदभिज्ञैरित्यर्थः, सेव्यः तत्तत्समयजिज्ञासया निषेव्यः, **स लिकुचः सदध्वगोपकृत्यै** सज्जनाख्यपान्थानामुपकाराय **रसाभिरामं** शृङ्गारादिरसैरभिरामं **काव्यफलं** उषाहरणाख्यकाव्यात्मकं फलं **ससर्ज** उत्पादयामास । [1]पल्लवान्तरशाखादिसकलवृक्षाङ्गयुक्ततया विराजमानबृहच्छाखोपेतः, अत एव **उदारपक्षिसेव्यः** स्वस्वजातौ यथायोग्यतया प्रौढनानाविहङ्गमसेव्यः सन् लिकुचाख्यवृक्षविशेषः **समये प्राप्ते** सति फलनिष्पत्तिकाले प्राप्ते सति पान्थानामुपकाराय यथा फलति तद्वदिति श्लेषाभिप्रायः ॥ ४८ ॥

(त.चं.) पल्लवाङ्कुरपलाशकुलायादिसकलाङ्गयुता अत एवावभाता दीप्ताः स्कन्धशाखा लिकुचवृक्षस्य । सन्तानरक्षायै नीडनिर्माणसमये प्राप्ते महद्भिरपि पक्षिभिः सेव्यः । वादसमये प्राप्ते, समये शास्त्रे वा विवादनिर्णयाय प्राप्ते महद्भिरपि वादिभिः सेव्यो लिकुचान्वयः । रसाभिरामं विशिष्य भक्तिरसाभिरामम् । आह हि स्वयमेव– 'भक्तिरसः सखा मे । सङ्गन्तुकामस्य पदारविन्दे पापापहे पूर्णसुखस्य विष्णोः' इति ॥ ४८ ॥

प्रतिपादितमात्मना यथार्थं
पृथुमायासमयस्य दुर्घटत्वम् ।
स्वगुरौ परिहर्तुमक्षमेऽपि
श्रुतवांस्तं स वयस्यबोधितोऽलम् ॥ ४९ ॥

---

१. कोशेषु 'पल्लवान्तर–' इत्येव पठ्यते । 'पल्लवावान्तर–' इति तु स्वरसः पाठः । पल्लवाश्च अवान्तरशाखाश्चेति ।

(प.दी.) प्रतीति । आत्मना स्वेन **प्रतिपादितं** उद्भावितं **यथार्थं** विचार्यमाणे सति परमार्थतो विद्यमानमेव **पृथुमायासमयस्य** महतो मायावादशास्त्रस्य **दुर्घटत्वं** पूर्वापरविरुद्धत्वेनानुपपन्नत्वं **स्वगुरौ परिहर्तुमक्षमेऽपि सः** त्रिविक्रमार्यः तच्छास्त्रश्रवणेच्छारहितोऽपि **अलं वयस्यबोधितः** सन् तं मायासमयं **श्रुतवान्** । स्वकृतानुपपत्तिशङ्काऽपरिहारात् तच्छास्त्रश्रवणादररहितोऽपि केवलं वयस्यबोधितः शुश्रावेति भावः ॥ ४९ ॥

(त.चं.) वयस्यबोधितः अलं श्रुतवान् । वयसा तुल्यः वयस्यः । वयस्येन वयस्यैर्वा बोधितः । 'वयमधीमहे त्वं किमिति नाधीषे । आगच्छाङ्ग, सवयसः सहैव पठामः' इति सानुनयं प्रचोदितः ॥ ४९ ॥

भगवत्युदिते सगोविलासे
वटुभावं त्यजति त्रिविक्रमाख्ये ।
अपि भानुपुरस्सराः समस्ताः
प्रययुः कीटमणिप्रभत्वमाशु ॥ ५० ॥

(भा.प्र.) भानुर्नाम कश्चित् प्राभाकरप्रचुरः ॥

(प.दी.) भगवतीति । सगोविलासे त्रिविक्रमाख्ये त्रिविक्रमार्यनाम्नि **भगवति** हरौ **उदिते** सति वेदशास्त्रवैदग्ध्याख्यमुदयं प्राप्ते सति, **वटुभावं** बाल्यं **त्यजति** सति, **भानुपुरस्सराः**, भानुर्नाम कश्चित् प्रभाकरशास्त्रप्रचुरः, तत्पुरःसराः **समस्ताः** वादिनः **अपि कीटमणिप्रभत्वं** खद्योतप्रभासदृशप्रभत्वं **आशु प्रययुः** । अतिप्रभाणामपि भानुपुरःसराणां वैदुष्यं त्रिविक्रमार्यवैदुष्यापेक्षयाऽत्यल्पमभूदिति भावः । यथाऽऽदौ वामनरूपे **त्रिविक्रमाख्ये भगवति** क्रमेण वटुभावं त्यक्त्वा व्याप्तरूपे भवति सति तत्तेजसा प्रतिमुष्टतेजसः सूर्यादयः खद्योतसदृशा अभवंस्तद्वदिति श्लेषार्थः ॥ ५० ॥

(त.चं.) सगोविलासे सवचनविलासे लिकुचे । सरश्मिविलासे भगवति ।

भानुनामा कश्चिन्मीमांसकस्तदाऽऽसीदिति भावप्रकाशिकातः स्फुटम् । कीटो मणिरिव भासमान इति कीटमणिः खद्योतः । प्रययुः प्रकटं ययुः ॥

अतिदक्षमतिं सपादलक्षे
समये मायिजनस्य युक्तिशूरम् ।
महितं हि महीतळे महिम्ना
जनको नन्दनमब्रवीदुपांशु ॥ ५१ ॥

(प.दी.) अतीति । **जनकः** पिता **सपादलक्षे** सपादलक्षग्रन्थात्मके **मायिजनस्य समये** शास्त्रे **अतिदक्षमतिं** अतिचतुरमतिं **युक्तिशूरं** स्वपक्षसाधने परपक्षनिराकरणे च युक्तिविदग्धम्, अत एव **महिम्ना महीतळे महितं नन्दनं** त्रिविक्रमार्यं **उपांशु** रहस्ये **अब्रवीत् हि** ॥ ५१ ॥

(त.चं.) सपादलक्षे समयेऽप्यजातविस्रम्भः पिता नन्दनमाह ॥ ५१ ॥

शृणु वाचमिमां विचारितार्थां
न कलौ निर्गुणभावना सुखाय ।
इति गौणविमुक्तये गुणाढ्यं
भज देवं वसुदेवसूनुमेव[1] ॥ ५२ ॥

(प.दी.) शृण्विति । **विचारितार्थां** विचार्य निर्धारितार्थां **इमां** वक्ष्यमाणां **वाचं शृणु** । **कलौ** कलियुगे **निर्गुणभावना** परब्रह्मणो निर्गुणत्वध्यानं **सुखाय** मोक्षसुखाय **न** । इति अस्माद्धेतोः **गौणविमुक्तये** ज्ञानानन्दादिगुणयुक्तमोक्षार्थं **देवं** क्रीडादिगुणविशिष्टं **वसुदेवसूनुं** वासुदेवं **भज गुणाढ्यमेव** । यदि ज्ञानानन्दादिसर्वगुणरहितं परं ब्रह्मोपास्येत तर्हि तत्फलं मोक्षोऽपि ज्ञानाद्यभावविशिष्ट एव स्यात् । नच ज्ञानाद्यभावः

---

१. 'भज देवं सुत वासुदेवमेव' इति क्वचित् पाठान्तरम् ।

सुखाय भवति । 'मग्नस्य हि परेऽज्ञाने किं न दुःखतरं भवेत्' इति मोक्षधर्मवचनात् । तस्मान्निर्गुणोपासनं न सुखाय । यदि ज्ञानानन्दादिगुणविशिष्टं तद् ब्रह्मोपासितं स्यात् तदुपासनफलं मोक्षोऽपि ज्ञानानन्दादिगुणविशिष्ट एव स्यात् । एवंविधश्च मोक्षः पुरुषार्थो भवति । निर्दोषज्ञानानन्दात्मकत्वात् । तस्मादेवंविधगौणमोक्षाय भगवन्तं वासुदेवं निर्दोषज्ञानानन्दाद्यनन्तगुणविशिष्टमेव भजेत्यर्थः ॥ ५२ ॥

(त.चं.) तदानीं प्रचलितो हि स्मार्तभागवतसम्प्रदायः । तदनुयायिनां श्रद्धानुसारेणाऽह– न कलौ । 'कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा' इत्यादिस्मरणात् । वस्तुतस्तु न कदाऽपि निर्गुणभावना सुखाय । न केवलं कलौ । देवम् । जगत्सृष्ट्यादि यस्य लीलामात्रम् । दिवु क्रीडायाम् । अत एव गुणाढ्यम् । 'कर्तृत्वात् सगुणं ब्रह्म' इति स्मरणात् । ज्ञानानन्दादिगुणमयी गौणी विमुक्तिः ॥ ५२ ॥

इति तातवचो निशम्य किञ्चित्
तरळात्माऽपि विचार्य शास्त्रसारम् ।
परमेव स पारमारुरुक्षु-
र्विगुणोपास्तिमुपाशृणोत् परेभ्यः ॥ ५३ ॥

(प.दी.) इतीति । इति एवमुक्तं **तातवचः** पितृवचः **निशम्यापि किञ्चित् तरळात्मा** निर्गुणोपासनं वा मोक्षसाधनमुत सगुणोपासनमिति चञ्चलमानसः **सः** षडर्धविक्रमार्यः **शास्त्रसारं विचार्य परमेव पारं** संसारसागरस्य परमन्यं पारं **आरुरुक्षुः**, मुमुक्षुरित्यर्थः, **परेभ्यः** पितुरन्येभ्यः **विगुणोपास्तिं** निर्गुणोपासनप्रकारं **उपाशृणोत्** । निर्गुणोपासनं मोक्षसाधनं न भवति । सगुणोपासनमेव मोक्षसाधनमिति तातवचो निशम्यापि किञ्चिच्चञ्चलमानसः स येनकेनापि प्रकारेण मुमुक्षोर्निर्गुणोपासनं वा वेदादिप्रमाणसम्मतम्, अथ सगुणोपासनं वेति सयुक्तिकं सर्वशास्त्राभिप्रायं सम्यग् विचार्य शास्त्रे

यदुपासनं वेदादिसर्वप्रमाणसम्मतं पुरुषार्थसाधनं च तदेवोपासनं करिष्याम इति निश्चित्याऽदौ तावत् तत्प्रकारादिजिज्ञासया परेभ्यो विगुणोपास्तिं शुश्रावेति भावः ॥ ५३ ॥

(त.चं.) इति तातवचः ।'वप्ता च तातो जनकः पिता च' इति च । तरळात्मा । तरळमधीरं मनोऽस्येति । इदमदो वा शास्त्रहृदयमिति संशयग्रस्तम् । परेभ्यः मायावादतत्परेभ्यः उपाशृणोत् । उपसद्याशृणोत् । उपह्वरेऽशृणोत् ॥ ५३ ॥

निजधर्मरतो गृहिप्रबर्हः
कलिकालाकुलितान्तरोऽपि हन्त ।
नितरां निशितात्मना निसर्गात्
स्फुटमालोचयदित्यसौ कदाचित् ॥ ५४ ॥

(प.दी.) निजेति । **निजधर्मरतः** स्ववर्णाश्रमोचितधर्मनिष्ठः **गृहिप्रबर्हः** गृहस्थश्रेष्ठः **असौ** त्रिविक्रमार्यः **कलिकालाकुलितान्तरोऽपि,** कलिकालवशात् संसर्गदोषाच्च आकुलितान्तरोऽपि विलोळितमानसोऽपि, **निसर्गात्** स्वभावतः **नितरां निशितात्मना** युक्तायुक्तविचारचतुरेण मनसा **कदाचित् स्फुटं** सम्यक् **इति** वक्ष्यमाणप्रकारेण **आलोचयत्** विचारयामास । परेभ्यो विगुणोपास्तिं श्रुत्वाऽपि तत्रापरितुष्टमनाः सन् स्वयमेवेत्थं विचारयामासेत्यर्थः । [हन्त हर्षे] ॥ ५४ ॥

(त.चं.) 'शोचने सम्प्रहर्षे च हन्तशब्दः प्रयुज्यते' । हन्त कलिकालाकुलितान्तरः । अथापि हन्ताऽलोचयत् । लोचृ भाषार्थः ॥ ५४ ॥

रचितं ननु सूत्रमत्र मानं
विदुषा सत्यवतीसुतेन साक्षात् ।
अपरस्परसङ्गतानि भाष्या-
ण्यपि सर्वाणि न मानतां व्रजेयुः ॥ ५५ ॥

(प.दी.) **रचितमिति** । अत्र तत्वनिर्णयविषये **विदुषा** सर्वज्ञेन **सत्यवती-सुतेन रचितं सूत्रं** ब्रह्मसूत्रं **साक्षात्** मुख्यतः **मानं** प्रमाणं **ननु** । **अपर-स्परसङ्गतानि** परस्परसम्बन्धरहितानि, परस्परविरुद्धानीति यावत्, **सर्वाणि भाष्याणि** भारतीविजय-संविदानन्द-ब्रह्मघोषादिभिर्विरचितान्येक-विंशतिसङ्ख्याकानि सर्वाणि **अपि** ब्रह्मसूत्रभाष्याणि **मानतां** प्रमाणत्वं **न व्रजेयुः** । अयमत्राभिप्रायः– ब्रह्मस्वरूपनिर्णये तावद् ब्रह्मसूत्रमेव मुख्यं प्रमाणम् । सर्वश्रुत्यादिविरोधपरिहारमुखेन सर्वज्ञेन भगवता रचितत्वात् । एवञ्च सति प्रमाणतमब्रह्मसूत्रस्य तन्मूलभाष्याणां च परस्परविरोधे सति सूत्रविरुद्धभाष्याणामेवाप्रामाण्यं न्याय्यम् । भाष्याणि च सर्वाण्यपि विचार्य-माणे सूत्रविरुद्धानि । अतो न पुरुषार्थसाधनानीति । अथवा **अपरस्पर-सङ्गतानी**ति, ब्रह्मसूत्रस्य यानि **भाष्याणि** तानितानि **सर्वाण्यपि अपरस्पर-सङ्गतानि** परस्परविरुद्धानि । तथा च सर्वाण्यपि भाष्याणि परस्परं समबल-भाष्यान्तरविरुद्धानीति नैकमपि भाष्यं प्रमाणम् । आप्ततमप्रणीतं ब्रह्म-सूत्रमेव प्रमाणमिति वा ॥ ५५ ॥

(त.चं.) साक्षान्मानम् । न परम्परया प्रमाणान्तराद्यनुग्रहेण । किन्तु स्वतो मानम् ॥ ५५ ॥

यदि तेषु निराग्रहान्तराः स्मः
सुघटं नोपलभामहे हि किञ्चित् ।
न तथाऽपि परम्परोपयातं
न पठामः प्रणयेन शाङ्करीयम् ॥ ५६ ॥

(प.दी.) तर्हि सर्वाण्यपि भाष्याणि सूत्रविरुद्धानीति कृत्वा न तेष्वादरोऽपि कर्तुं शक्यत इत्याह– **यदी**त्यादिना । **यदि तेषु** भाष्येषु **निराग्रहान्तराः** आग्रहरहितमानसाः **स्मः** भवामः तर्हि **सुघटं** सूत्रार्थाविरुद्धं **किञ्चित्** सूत्रार्थविवरणरूपं किमपि निबन्धनं **नोपलभामहे हि** न पश्यामो हि । तर्हि

का चिकीर्षेत्यपेक्षायामाह– **नेत्यादि** । **तथाऽपि** सूत्रविरुद्धतया प्रतीयमानत्वेऽपि **शाङ्करीयं** अङ्कितळशङ्करप्रणीतं भाष्यं **प्रणयेन** आदरेण **न पठामः** इति **न** । किन्तु पठाम एव । सर्वेषामपि भाष्याणां सूत्रविरुद्धत्वसाम्येऽपि किमिति शाङ्करीये पक्षपात इत्याशङ्क्याऽह– **परम्परोपयातमिति** । सूत्रविरुद्धत्वसाम्येऽप्यस्मत्पूर्वैरादृतत्ववैशेष्यादिदमेवाऽद्रियतेऽस्माभिरिति भावः ॥ ५६ ॥

(त.चं.) सुघटं सामञ्जस्येनाविरुद्धतया घटनीयं योजनीयं किमपि नोपलभामहे । अथापि परम्परोपयातमिति प्रीत्या शाङ्करीयं सूत्रभाष्यं पठामः केवलम् ॥ ५६ ॥

घटनोपनिषत्सु नाल्पबुद्धेः
सुघटेत्यभ्युपगम्य चिन्तयामः ।
न विमुक्तिमुपैति कोऽपि मुक्त्वा
समयोक्तामिह यामिमामुपास्तिम् ॥ ५७ ॥

(प.दी.) **घटनेति** । **अल्पबुद्धेः**, अल्पा च सा बुद्धिश्चेत्यल्पबुद्धिः, तस्याः **उपनिषत्सु घटना** सम्बन्धः, तद्विचारसामर्थ्यमिति यावत्, **सुघटा न** । किन्तु दुर्घटेत्यर्थः । अल्पा बुद्धिरुपनिषद्विचारे न प्रसरतीति भावः । अथवा अल्पा बुद्धिर्यस्येति बहुव्रीहिर्वा । तथात्वे **अल्पबुद्धेः** पुरुषस्य उपनिषद्विचारो दुर्घट इत्यर्थः । **इत्यभ्युपगम्य** अल्पबुद्धेरुपनिषद्विचारो दुर्घट एवेत्यभ्युपगम्य ज्ञात्वा **इह** उपनिषत्सु **यामुपास्तिं मुक्त्वा** विना **कोऽपि** कश्चिदपि **विमुक्तिं नोपैति समयोक्तां** तां **इमां** उपास्तिं **चिन्तयामः** विचारयामः । इत्थमत्र भावः– अल्पबुद्धेरुपनिषद्विचारो दुर्घट एवेत्यभ्युपगम्य वयमल्पबुद्धयः सन्तः साक्षादुपनिषद्विचारं परित्यज्य भारतपञ्चरात्रब्रह्मसूत्रादिसकलसच्छास्त्रेषु या भगवदुपासना मोक्षसाधनत्वेनोच्यते, यया विना न मोक्षः, समयोक्तां सकलसच्छास्त्रोक्तां तामुपास्तिमेव सम्यग् विचारयाम इति ॥ ५७ ॥

(त.चं.) अविरोधेन घटना समन्वयः । औचित्यचर्चा च घटना । समयोक्ताम् । भारताद्या मन्वाद्याश्च समयाः । इह संसारे ॥ ५७ ॥

विततः सुखसच्चिदद्वयात्मा
समुपास्यो विहितो हि तत्वविद्भिः ।
स च नावयवी निरूप्यते चेद्
द्युतिमात्रं च न हीत्यदो रहस्यम् ॥ ५८ ॥

(प.दी.) विचारप्रकार एव निरन्तरश्लोकत्रयेणोच्यते– **वितत** इत्यादिना । **तत्वविद्भिः** भगवत्तत्वनिर्णयविद्भिः महद्भिः भगवान् **विततः** व्याप्तः **सुखसच्चित्** सुखस्वरूपः, सन् निर्दोषः, चित् ज्ञानस्वरूपः, **अद्वयात्मा** समाधिकरहितः, एवम्भूतः **समुपास्यो विहितो हि** । **स च** एवमुपास्यत्वेन विहितोऽपि स भगवान् **अवयवी** ज्ञानानन्दाद्यात्मककरचरणादिसुन्दरसकलावयवविशिष्टः **न निरूप्यते चेत्**, सर्वात्मना सर्वावयवरहितश्च निरूप्यते चेदिति योज्यम्, एवं तर्हि **द्युतिमात्रं च** तेजोमात्रं च **न हि** न सम्भवति हि **इत्यदः** इत्येतत् प्रमेयं **रहस्यं** शास्त्रस्य फलितार्थ इत्यर्थः । तत्वविद्भिर्व्याप्तत्वेन निर्दोषज्ञानानन्दाद्यात्मकत्वेन चोपास्यो विहितो भगवानवयवी न निरूप्यते चेत्, शाङ्करीयोक्तप्रकारेण निरवयवो निर्विशेषश्चेति निरूप्यते चेत्, विचार्यते चेत्, तत् तर्हि निरवयवत्वादेव ब्रह्म तेजोरूपमित्येतदपि न स्यादिति शाङ्करभाष्यफलितार्थः स्यादिति भावः ॥

(त.चं.) विततः कालतो देशतो गुणतः शक्तितश्च ॥ ५८ ॥

यदि चेदृगुपास्यतेऽस्य रूपं
तिमिरत्वेन विभाति पारिशेष्यात् ।
फलमप्यथ मुक्तिरीदृशी स्या-
दिति नो नैव धिनोत्युपास्तिरेषा ॥ ५९ ॥

(प.दी.) अस्तु तर्ह्येवम्भूतमुपास्यं परं ब्रह्म, को बाध इत्यत आह– **यदीति** । **अस्य** परब्रह्मणः **रूपं यदि च ईदृक्** द्युतिमात्रविशिष्टं न भवतीति **उपास्यते** ध्यायते तर्हि **पारिशेष्यात्** परिशेषतः **तिमिरत्वेन विभाति** । प्रसक्तप्रतिषेधः परिशेषः । तस्य भावः पारिशेष्यम् । यदि ज्ञानानन्दाद्यात्मकत्व-तेजोमात्रत्वादिप्रसक्तप्रकारं ब्रह्म न भवतीति शास्त्रार्थः स्यात् तर्हि सम्भाविततया प्रसक्तज्ञानानन्दाद्यात्मकत्वाभावे तद्विरुद्धाज्ञानाद्यात्म-कत्वं प्रसज्येतेति भावः । तथाभावेन ब्रह्मोपासने को दोष इति चेदाह– **फलमित्यादि** । **अथ** एवमुपासनानन्तरं उपासकस्य तत्साध्यं **फलं मुक्तिः अपि ईदृशी स्यात्** केवलतिमिराद्यात्मकता स्यात् । नचोपासकस्यैवम्भावः पुरुषार्थ इत्यभिप्रायः । **इति** तस्माद्धेतोः **एषा उपास्तिः नः** अस्मान् **नैव धिनोति** न पुष्णाति । 'धिनु पुष्टौ' इति धातुः । एवंविधोपासना नास्माकं मनःप्रसादमासादयतीति भावः ॥ ५९ ॥

(त.चं.) नैव धिनोत्युपास्तिरेषा । न प्रीणयति । धिवि प्रीणने । धिन्वतीति भाव्ये 'धिन्विकृण्व्योर च'[३.१.८०] इत्युविकरणेन अकारान्तादेशेन च धिनोतीति रूपं निष्पादयन्ति पाणिनीयाः । तद् यथा कृवेः कृणोतीति । प्राचीनास्तु 'धिनु पुष्टौ' इत्युविकरणमेव धात्वन्तरं पठन्ति ॥

अथ वेदपुराणभारतानि
स्वयमालोच्य यथावबोधमत्र ।
गुणवन्तमुपास्महे मुकुन्दं
स्मृतिधर्मान् स्फुटमाचरन्त एव ॥ ६० ॥

(प.दी.) एवं तर्हि शाङ्करभाष्योक्तमुपासनं न धिनोति चेत् कथं भगवदुपा-सनं क्रियत इति चेदाह– **अथेत्यादि** । **अथ** इति पक्षान्तरे । तत्तत्सर्वभाष्योक्त-पक्षं परित्यज्य पक्षान्तरमङ्गीकुर्म इत्यर्थः । तदेवाऽऽह– **वेदेत्यादि** । **स्वयं**

वयं स्वयमेव **वेदपुराणभारतानि आलोच्य** विचार्य **अत्र** वेदादौ **यथावबोधं** अस्मदवबोधानुसारेण **मुकुन्दं गुणवन्तमुपास्महे**। तत्तद्दर्शनपक्षपातं विहाय वयमेव वेदपुराणादिकं विचार्य तत्र वेदादौ यथा मुकुन्दस्वरूपं प्रतिपाद्यते तत्र प्रतिपादितं च तत्स्वरूपमस्माकं यथा ज्ञातुं शक्यते तथा ज्ञानानन्दादिगुणविशिष्टमेव मुकुन्दमुपास्मह इत्यर्थः । किं कुर्वन्तः? **स्मृतिधर्मान्** स्मृत्युक्तवर्णाश्रमोचितधर्मान् **स्फुटं** सम्यक् **आचरन्त एव** । स्वविहितधर्मानुष्ठानस्य चित्तशुद्धिद्वारा भगवदुपासनाङ्गत्वादिति भावः ॥

(त.चं.) वेदपुराणभारतानि । 'इतिहासपुराणः पञ्चमो वेदानां वेदः' इति हि श्रुतिः । अत्र अस्मिन् विप्रजन्मनि ॥ ६० ॥

अवधार्य यदेति कार्यमार्यः
स विवेकादुपचक्रमे विधातुम् ।
परिपूर्णमतेर्जगत्सु कीर्तिं
परिपूर्णामशृणोत् तदा विशुद्धाम् ॥ ६१ ॥

(प.दी.) अवधार्येति । **सः आर्यः** त्रिविक्रमपण्डितः **कार्यं** स्वकर्तव्यं **विवेकात् इत्यवधार्य** एवं विचार्य निश्चित्य **विधातुं** वेदादिविचारं कर्तुं **यदा उपचक्रमे** उपक्रममकरोत् **तदा जगत्सु परिपूर्णां** व्याप्तां **विशुद्धां** निर्दोषां **परिपूर्णमतेः** श्रीपूर्णप्रज्ञाचार्यस्य **कीर्तिमशृणोत्** ॥ ६१ ॥

(त.चं.) 'साधुः सज्जन आर्यः स्यात्' इति च । विधातुमनुष्ठातुम् ॥

विहिनस्ति हि नो जनोऽतिवाग्ग्मी
समयं कोऽपि परम्परोपयातम् ।
क्षिप तं त्वमुदारयुक्तिशूरो
न परे तत्र समर्थतां व्रजेयुः ॥ ६२ ॥

तव वेदनदीर्विगाह्य भूयः समयाम्भोधिषु कुर्वतो विहारम् ।
नवकाव्यरसप्रियस्य वादिद्विरदेन्द्र प्रतिवारणो न जज्ञे ॥ ६३ ॥

उपयाहि यशः शशाङ्कगौरं
निजयूथस्य भयं निराकुरु त्वम् ।
अधुना विधिनोपपादितं तं
प्रतिवादिप्रतिवारणं निवार्य ॥ ६४ ॥

इति मायिजनेन तत्रतत्र
स्वजनत्वेन स तावदर्थ्यमानः ।
अनुकूलवचा महिष्ठमानो
मनसा संशयमाप संशयच्छित् ॥ ६५ ॥

(प.दी.) विहनस्तीति । अन्त्यकुळकमेतत् । **मायिजनेन** मायिमतमाश्रितेन जनेन **तत्रतत्र** दृष्टदृष्टस्थले **स्वजनत्वेन** स्वयूथ्यजनत्वेन हेतुना **इति** 'क्षिप तं त्वमुदारयुक्तिशूरः–' इत्यादिना श्रीमध्वं क्षेप्तुं निराकर्तुं **अर्थ्यमानः अनुकूलवचाः** अर्थयतो मायिजनस्यानुकूलवचनः । मायिनां परितोषाय 'अहमेकेनैवोत्तरेण श्रीमध्वाचार्यं निराकरिष्यामि' इति वदन्निति भावः । **महिष्ठमानः** महाभिमानः । बहुप्रमाणोपेत इति वा । **संशयच्छित्** स्वयं सर्वेषां संशयस्य च्छेत्ता । **सः तावत्** एवम्भूतोऽपि **मनसा संशयमाप** । श्रीमध्वं क्षेप्तुं शक्नोमि नवेति संशयमापन्नोऽभूदित्यर्थः । इति वक्ष्य-माणकुळकान्त्यश्लोकेन सम्बन्धः ॥ * ॥ कथमर्थ्यमानः? **अतिवाग्ग्मी कोऽपि जनः** कश्चिज्जनः श्रीमध्वतदन्तेवास्यादिजनः **परम्परोपयातं** परम्परया प्राप्तम्, पुरातनमिति यावत्, **नः समयं** अस्मच्छास्त्रं **विहिनस्ति** निराकरोति हि यस्मात् तस्मात् **उदारयुक्तिशूरः त्वं तं** अस्मत्समयं निराकुर्वन्तं जनं **क्षिप** निराकुरु । **परे** अन्ये **तत्र** निराकरणे **समर्थतां** शक्ततां **न व्रजेयुः** ॥ * ॥

वादिद्विरदेन्द्र सर्ववादिगजराज, **तव प्रतिवारणः** प्रतिवादिनामा प्रतिगजः **न जज्ञे**। तव प्रतिवादी कोऽपि नास्ति। यथा मत्तगजेन्द्रस्य जेता कश्चिदपि गजो न भवति तद्वदिति भावः। कथम्भूतस्य? **वेदनदीः विगाह्य भूयः समयाम्भोधिषु** शास्त्राख्यसमुद्रेषु **विहारं कुर्वतः**। पुनः कथम्भूतस्य? **नवकाव्यरसप्रियस्य**। वेदेषु शास्त्रेषु शृङ्गारादिरसोपेतकाव्येषु च कृतपरिश्रमस्येत्यर्थः ॥*॥ **अधुना विधिना** दैवेन **उपपादितं** निष्पादितं **तं प्रतिवादिप्रतिवारणं** प्रतिवादिनामकं प्रतिगजं **निवार्य** निराकृत्य **त्वं शशाङ्कगौरं** चन्द्रवद् धवळं **यशः उपयाहि** आप्नुहि। **निजयूथस्य** निजजनसमूहस्य **भयं निराकुरु**। **इत्यर्थ्यमानः** इति सम्बन्धः ॥ ६२–६५ ॥

(त.चं.) उदारासु परनिराकरणदक्षासु युक्तिषु शूरः अप्रतिभटः ॥*॥ एतावन्तमनेहसं प्रतिवारणो न जज्ञे ॥ * ॥ सम्प्रति तु कोऽपि जातः श्रूयते। तं नूतनं प्रतिवादिप्रतिवारणं निवार्य उपयाहि यशः शशाङ्कगौरम् ॥*॥ अन्येषां संशयच्छिदपि स्वयं संशयमाप ॥ ६२–६५ ॥

शितमध्ववचःसृणिप्रयोक्तॄन् पुरुषानेष विषादयन् कवीभः।
विविधोत्तरधूळिपातनेन प्रतिघेनाधिकमन्धयाञ्चकार ॥ ६६ ॥

(प.दी.) शितेति। **शितमध्ववचःसृणिप्रयोक्तॄन्** तीक्ष्णश्रीमध्ववचनाख्याङ्कुशप्रयोक्तॄन्, श्रीमध्वाचार्योक्तयुक्त्यात्मकवचनानि प्रयुञ्जानान् **पुरुषान्** श्रीमध्वशिष्यभूतान् पुरुषान् **विषादयन्नेष कवीभः** कविसिंहः[1] **विविधोत्तरधूळिपातनेन प्रतिघेन** नानाविधोत्तरात्मकधूळिप्रक्षेपात्मकप्रतिबन्धा **अधिकं अन्धयाञ्चकार** निरुत्तरांश्चकार। प्रतिघो नाम प्रतिघातः। निवारणमिति यावत्। 'प्रतिघः प्रतिघातेऽपि' इत्यमरः[2]। प्रतिघेन

१.कविरूपो गज इति वक्तव्यम्। सम्पातायातमेतत्।

२. सम्प्रत्यमरकोशे नायं पाठ उपलभ्यते। 'परिघः परिघातेऽस्त्रेऽपि' इत्यमरपाठः। 'प्रतिघः प्रतिघाते स्यात्' इति तु मेदिनी।

कोपेनेति वा । [1]समवेतप्रत्युत्तराप्रतिपत्तौ सत्यां कोपाद् यादृशतादृशनानाविधोत्तरात्मकधूळिप्रक्षेपं कृत्वा निरुत्तरानकरोदित्यर्थः ॥ ६६ ॥

(त.चं.) निशितानि मध्ववचांस्येव प्रतिवादिवारणानां निशिताः सृणय इव । 'अङ्कुशः सृणिरुच्यते' । सर्तेर्निः निग् वा प्रत्ययः । इयमत्र वैयाकरणानां प्रक्रिया– 'सृ गतौ' इति भौवादिको धातुः पठ्यते । तस्य च द्वे रूपे । सरतीति धावतीति । तथाहि पाणिनिः–'पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृशि-अर्ति-सर्ति-शद-सदां पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्य-ऋच्छ-धौ-शीय-सीदाः'[७.३.७८] इति । पा पाने– पिबति । घ्रा गन्धोपादाने– जिघ्रति । ध्मा शब्दाग्निसंयोगयोः– धमति । ष्ठा गतिनिवृत्तौ–तिष्ठति । म्ना अभ्यासे–मनति । दाण् दाने–यच्छति । दृशिर् प्रेक्षणे–पश्यति । ऋ गतिप्रापणयोः– ऋच्छति । सृ गतौ–धावति । शद्लृ शातने–शीयते । षद्लृ विशरणगत्यवसादनेषु– सीदति । एवमेतेषामेकादशानां धातूनामेकादशाऽऽदेशा अभिहिताः । अत्रास्ति कश्चिद् विशेषः । अन्येषां दशानामयं नियत आदेशः । सर्तेः पुनर्विभाषा भवति । शीघ्रायां गतौ धावतीति । अन्यत्र सरतीत्येव । तथा हि वामनः– 'सर्तेर्वेगितायां गतौ धावादेशमिच्छन्ति । अन्यत्र सरति अनुसरतीत्येव भवति' इति । तथाच सरतीति सृणिः । धावतीति वा सृणिः । तथाहि सृवृषिभ्यां निर्विहितः सृणिरिति वृष्णिरिति । पुनर्निक्प्रत्ययेन च सृधातोः सृणिं व्युत्पादयन्ति । सृधातुरपि द्विः पठ्यते । भौवादिक एकः । तस्यैव च धावादेशः । अपरो जुहोत्यादिषु पठितः । सृ गतौ । ससर्ति । सिसर्तीत्यन्ये । ततोऽपि सृणिर्भवति ससर्तीति सृणिरिति । आधोरणेन प्रहितो धावति वारणं नियन्तुमिति । ननु 'सृणिः स्त्रियाम्' इत्यमरसिंहः पठति । न पठनीयमेतत् । 'सृ-वृषिभ्यां कित्'[१.१९] इति दशपादिकायां वृष्णिना

१.'समयोचित–' इति तु स्वरसः पाठः ।

सहपाठात् । 'सृणिं शिताग्रम्' इति माघः । 'सृणिः अङ्कुशः, आदित्यः, अनिलश्च' इति दशपादिकावृत्तिकारः स्फुटं चास्य पुंस्त्वमनुमन्यते । कवीभः कविकुञ्जरः । प्रतिघेन कोपेन । 'कोपः प्रतिघ इष्यते' इति च । सृणिप्रयोगजनितेन कोपेन द्विरद इवायमपि कवीभः मध्ववचःसृणि-प्रयोगजनितेन कोपेनेति । धूळिपातनेन प्रतिघेन प्रतिघातेन इत्यपि व्याच-क्षते । 'प्रतिघः प्रतिघाते स्यात् क्रोधेऽपि परिकीर्तितः' इति च ॥ ६६ ॥

क्षणदासु विचक्षणः स वीक्ष्य
प्रचुरप्रज्ञमनोज्ञशास्त्रसारम् ।
अपराविदितः प्रसादगर्भं
विदधौ विस्मयमान्तरं महान्तम् ॥ ६७ ॥

(प.दी.) क्षणदास्विति । **विचक्षणः** विवेकी **सः** त्रिविक्रमपण्डितः **क्षणदासु** निशासु **अपराविदितः** अन्यैरविज्ञातः सन् **प्रसादगर्भं** प्रसन्नाभिप्रायं **प्रचुरप्रज्ञमनोज्ञशास्त्रसारं** श्रीपूर्णप्रज्ञाचार्यस्य मनोहरं शास्त्रसारं शास्त्र-फलितार्थं **वीक्ष्य आन्तरं** मानसं **महान्तं विस्मयं विदधौ** चक्रे । श्रीमध्वा-चार्यशिष्येण त्रिविक्रमार्यसहजेन शङ्करार्येण स्वमन्दिरे निहितं श्रीमध्वा-चार्यपुस्तकजातं क्षणदास्वन्यैरविदितो वाचयन् मनोहरं तच्छास्त्राभिप्रायं ज्ञात्वा मनसा महान्तं विस्मयमापेत्यर्थः ॥ ६७ ॥

(त.चं.) प्रसादगर्भं प्रणयगर्भं विस्मयम् । 'प्रसादः प्रणयो मतः' इति च । नानाविधशङ्कापङ्किलं मनः तत्ववादसमीक्षया कतकेनेव प्रसन्नं बभूव, वि-स्मयं चानुबभूवेति वा । विदधौ विस्मयमान्तरम् । अन्तरेव विस्मयं निगूह्य दध्रे । न बहिः प्रकाशयामासेति भावः ॥ ६७ ॥

विदितवान् व्यवहृत्य सुदर्शनं
बहळबोधमवेक्ष्य स निश्चयात् ।

अपि न तस्य मतं सहसाऽऽददे
ननु विमृश्य कृती कुरुतेऽखिलम् ॥ ६८ ॥

(प.दी.) **विदितवानिति** । सः त्रिविक्रमार्यः **बहळबोधं अवेक्ष्य व्यवहृत्य** विप्रतिपन्ननानाविधप्रमेयविषयव्यवहारं कृत्वा **निश्चयात् सुदर्शनं विदितवानपि** प्रबलयुक्त्यागमादिप्रमाणयुक्तत्वादेतद् दर्शनमेव निश्चयान्निर्दोषदर्शनमिति ज्ञातवानपि **तस्य** श्रीमध्वस्य **मतं सहसा नाऽददे** नाङ्गीचकार । तथाहि– **कृती** निपुणः **अखिलं विमृश्य** आलोच्य **कुरुते ननु** ॥

(त.चं.) सामान्येन विशेषं समर्थयते– **ननु विमृश्य** । सहसेत्यविमृश्य । द्रुतविलम्बितं जागतं च्छन्दः । लक्षणं तूक्तम् ॥ ६८ ॥

तं विष्णुमङ्गलगतं बहळप्रबोधं
प्राप्याभ्यवन्दत तदाऽयुगविक्रमार्यः ।
आनन्ददं स चतुराननहासलक्ष्म्या
तत्वं प्रवेत्तुममरेन्द्र इवाब्जयोनिम् ॥ ६९ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते त्रयोदशः सर्गः

—०—

(भा.प्र.) चतुराननं चत्वार्याननानि ॥

इति नारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां त्रयोदशः सर्गः

—०—

(प.दी.) **तमिति** । सः **अयुगविक्रमार्यः** त्रिविक्रमार्यः **तदा विष्णुमङ्गलगतं तं बहळप्रबोधं प्राप्य अभ्यवन्दत** । कथम्भूतम्? **चतुराननहासलक्ष्म्या,** चतुरस्य भद्रस्य आननस्य हासलक्ष्म्या मन्दहासश्रिया **आनन्ददं** सता-

मित्यर्थः । कः कमिव? **अमरेन्द्रः तत्वं** श्रीहरिस्वरूपं **प्रवेत्तुं** सम्यग्ज्ञातुं **अब्जयोनिमिव** । कथम्भूतम्? **चतुराननहासलक्ष्म्या** चतुर्णामाननानां हासश्रिया सतां **आनन्ददम्** । त्रिविक्रमार्योऽपि तत्वविविदिषया प्राप्याभ्यवन्दतेत्यभिप्रायः ॥ ६९ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां त्रयोदशः सर्गः

—०—

(त.चं.) विमर्शविमर्शमन्ते च निरस्तसमस्तशङ्कस्तं प्राप्याभ्यवन्दत । तत्वं प्रवेत्तुममरेन्द्र इवाब्जयोनिम् । तथाहि च्छन्दोगानां श्रुतिः–'इन्द्रो ह वै देवानामभिप्रवव्राज विरोचनोऽसुराणाम्' इति, 'एकशतं ह वै वर्षाणि मघवान् प्रजापतौ ब्रह्मचर्यमुवास' इत्यादि च । एतेनास्य मूलरूपं सूचितमिति केचन सम्प्रदायविदो वदन्ति । अन्ये च तं रुद्रांशमाहुः । वसन्ततिलकं चतुर्दशाक्षरपादमिति शाकरं छन्दः । लक्षणं तु गतम् ॥ ६९ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याख्यत् त्रयोदशं सर्गं सुधियां धीविशुद्धये ॥

इत्याचार्यगोविन्दस्य कृतिषु मध्वविजयटीकायां
तत्वचन्द्रिकायां त्रयोदशः सर्गः

—०—

[आदितः श्लोकाः– ६८३+६९=७५२]

चतुर्दशः सर्गः

[अपहृतानां पुस्तकानां प्रत्यर्पणम् । शङ्करार्येण तेषां स्वीकारः । अनुजविजयसन्तुष्टेन त्रिविक्रमार्येण राज्ञोऽभिनन्दनम् । मध्वेन कतिचिद् दिनानि तत्र वासः । मध्वदिनचर्यावर्णनम् ।]

परिवृढघनसङ्घे राजसिंहोर्जशक्त्या
त्यजति मलिनभावं नीरसत्वान्निकामम् ।
स्फुटमुदयति तेजस्व्युज्वले मध्वभानौ
सुजनजलजकान्त्यै विश्वमासीन्मनोज्ञम् ॥ १ ॥

(भा.प्र.) ऊर्जः शरद उत्तरभागः । **मलिनभावं मानसभावम्, नीलत्वं च । विश्वं कार्यम्,अशेषं जगच्च ॥**

(प.दी.) परिवृढेति । **परिवृढघनसङ्घे** स्तम्भविषयोद्धवग्रामण्याख्यघनसमूहे **राजसिंहोर्जशक्त्या** जयसिंहाख्यराजश्रेष्ठाख्योर्जस्य शक्त्या सामर्थ्येन **नीरसत्वात्** दुर्बलत्वात् **मलिनभावं** मलिनत्वम्, पद्मतीर्थादिषु पक्षपातं श्रीमध्वद्वेषं चेत्यर्थः, **निकामं** नितरां **त्यजति** सति, **तेजस्व्युज्वले,** तेजस्वी चासावुज्वलश्चेति तेजस्व्युज्वलः, तेजस्विनां मध्ये उज्वलः अधिकं शोभमान इति वा, तस्मिन् **मध्वभानौ** श्रीमध्वाख्यसूर्ये **सुजनजलजकान्त्यै** **स्फुटमुदयति** सति नृपादिसर्वजनपूज्यत्वादिसम्पदं गच्छति सति **विश्वं** सकलं कार्यजातं **मनोज्ञं** मनोहरं **आसीत्** । राजानं श्रीमध्ववशवर्तिनं दृष्ट्वा तद्भयेन परिवृढजने श्रीमध्वप्रातिकूल्यं परित्यज्याऽनुकूल्यं भजति सति, प्राक् शङ्करार्यात् पद्मतीर्थकृतपुस्तकापहारस्य शङ्करार्यसम्माननात्मकप्रतिक्रियापूर्वकं राज्ञि श्रीमध्वक्षमापणोन्मुखे सति सर्वं कार्यं मनोहरमासीदित्यर्थः । घनसङ्घे ऊर्जशक्त्या शरत्कालोत्तरभागस्य वृश्चिकस्य सामर्थ्येन नीरसत्वात् निर्जलत्वात् मलिनभावं नीलत्वं त्यजति सति, शुभ्रत्वं च भजति सति, सूर्ये च शरदि मेघावरणरहितत्वेन स्फुटमुदयति सति विश्वं जगत् सर्वतोदिशं यद्वन्मनोहरं भवेत् तद्वदिति भावः ॥ १ ॥

(त.चं.) परिवृढाः ग्रामाधिपतयः। पुरा तौळवमण्डले ग्रामाधिकारे नियुक्ता ब्राह्मणा ब्रह्मक्षत्रिया इति व्यवाह्रियन्त । मध्यमोत्तमाः इति च । प्रथम-मर्यादाभाजः श्रौतस्मार्ताग्निहोत्रिणः । ततस्तन्त्रिणो भट्टाः पण्डिताश्च द्वितीयोत्तमाः । श्रीमध्वपिता च भट्टप्रमुख आसीदिति पूर्वमेव निवेदितं ग्रन्थकृता । ततो ब्रह्मक्षत्रिया ग्रामेष्वधिकृताः सप्तधा मध्यमोत्तमाः– 'पक्षनाथ'[ಪಕ್ಷನಾಥ], 'सभापति'[ಸಭಾಪತಿ], 'बल्लाळ' [ಬಲ್ಲಾಳ], 'अंण-ग्रामणि'[ಅಂಣಗ್ರಾಮಣಿ], 'ग्रामणि'[ಗ್ರಾಮಣಿ], 'जन्नि'[ಜನ್ನಿ], 'अधि-वासि' [ಅಧಿವಾಸಿ] इति तेषां व्यवहारनामानि। ततो लौकिका विप्रा इत्ययं सामाजिको विभागस्तदात्वे तौळवमण्डले प्रचलित आसीदिति ग्रामपद्धत्या-दितोऽवगम्यते । त एते ब्रह्मक्षत्रियाः परिवृढा उच्यन्ते । परिवृढसङ्घ एव घनसङ्घ इव । 'अर्यः परिवृढः स्वामी प्रभुर्नेता च नायकः । अधिभूरधिपः प्रोक्तो ह्यधीशोऽधिपतिस्तथा' इत्यभिधानम् । राजसिंहो जयसिंह एव ऊर्जः शारदः कार्तिक इव। 'चैत्रादिमासौ मधुमाधवौ द्वौ ततः परं शुक्र-शुची क्रमेण । नभोनभस्यौ कथिताविषोर्जौ सहःसहस्यौ च तपस्तपस्यौ' इति च। रस इति बलम्। रस इति जलम् । शरत्प्रभावेण मेघा निर्जलत्वान्मा-लिन्यं नैल्यं त्यजन्ति। राजसिंहप्रभावेण ग्रामण्योऽपि पूर्वाग्रहस्य निर्बलत्वात् मध्वविषयं मनोमालिन्यं तत्यजुः । उदियाय च उज्ज्वलतेजस्वी मध्वभानुः सुजनजलजानि विकासयितुमिति सर्वं मनोज्ञमिति सुश्लिष्टम् । 'रसो गन्धरसे जले । शृङ्गारादौ विषे वीर्ये' इति च । पञ्चदशाक्षराऽतिशक्करी मालिनी आद्विपञ्चाशं पद्यम् ॥ १ ॥

कृतमपकृतमार्यैः क्षम्यतां क्षान्तिभूषै-
रिति मृदु वदतां च प्रार्थनाभिः प्रभूणाम् ।
अपहृतमपरेषां मन्त्रतो ग्रन्थजातं
दशहृदयनियोगादग्रहीच्छङ्करार्यः ॥ २ ॥

(प.दी.) **कृतमिति** । **शङ्करार्यः** पूर्वं चोळजेन यस्य शङ्करार्यस्य करात् पुस्तकमपहृतं स शङ्करार्यः **अपरेषां** मायिनां **मन्त्रतः** कुमन्त्रात् **अपहृतं ग्रन्थजातं** पुस्तकसमूहं **अग्रहीत्** । कथम्? **क्षान्तिभूषैः**, क्षान्तिः क्षमा भूषा भूषणं येषां ते क्षान्तिभूषाः, तैः **आर्यैः** पूज्यैः, सर्वलोकसम्भावितैरित्यर्थः, एवम्भूतैर्भवद्भिः, **कृतं** अविवेकिभिर्बालिशैः कृतं **अपकृतं** ग्रन्थापहाराख्यापराधः **क्षम्यताम्** । **इति** एवं **मृदु** सामपूर्वकं **वदतां प्रभूणां** उभयग्रामपरिवृढानां स्तम्भविषयाधीशस्य जयसिंहस्य **च प्रार्थनाभिः** । अपिंच **दशहृदयनियोगात्** श्रीपूर्णप्रज्ञाचार्यस्याऽज्ञया । अयमभिप्रायः– चोळजं पौर्णमास्यामुत्थाय निशीथ एव विद्रुतं श्रुत्वा तद्ग्रामजनैस्तेनापहृतं ग्रन्थजातं श्रीमध्वाय समर्पितम् । स तु तन्मध्यस्थस्य करे स्थापयित्वा निजशिष्यमुदे सह्यमाप्तः । तच्छ्रुत्वा राज्ञा दूतमुखेन प्रार्थिते तस्मिन् श्रीमध्वे श्रीविष्णुमङ्गलं गते सति, तत्सन्निधौ राज्ञा उभयग्रामपरिवृढैश्च क्षमापितः शङ्करार्यः क्षितिपतिना तत्राऽनायितं ग्रन्थजातं श्रीमध्वाज्ञयाऽग्रहीदिति ॥ २ ॥

(त.चं.) प्रभूणामिति । प्रभोश्च प्रभूणां च । जयसिंहस्य च, 'पाडि-कूडेल्' [ಪಾಡಿ-ಕೂಡೆಲ್] इत्युभयग्रामण्यां च । शङ्करार्यः नारायणार्यस्य पितृव्यः ॥

परिवृतमवनम्रैर्ग्रामणीग्राम्यपूर्वै-
रवनतमुरुचेतःपादपार्श्वे नृसिंहम् ।
सहजविजयतोऽयुग्विक्रमार्यः प्रसन्नः
कविकुलतिलकोऽसावाशिषाऽतोषयत्तम् ॥ ३ ॥

(भा.प्र.) 'स्वःसुन्दरीभुजलतापरिरम्भणी धूः
पौरन्दरी भवति यं भजतां भुजिष्या ।
आनन्दतीर्थभगवत्पदपद्मरेणुः
स्वानन्ददो भवतु ते जयसिंहभूप' इत्याशिषा ॥

(प.दी.) परीति । **कविकुलतिलकः** कविकुलललामभूतः **सहजविजयतः**

सहजस्य शङ्करार्यस्य विजयतः सम्मानपूर्वकमपहृतपुस्तकलाभाख्यविजय-लाभात् **प्रसन्नः** सन्तुष्टः, **असौ अयुग्विक्रमार्यः, अवनम्रैः** विनीतैः, **ग्रामणी-ग्राम्यपूर्वैः**, ग्रामण्यो ग्रामाधिपतयः, ग्राम्या ग्रामोद्भवाः विप्राः, एवमेतत्पुरः-सरैर्नानाजनैः **परिवृतम्** । **उरुचेतःपादपार्श्वे** श्रीपूर्णप्रज्ञाचार्यचरणसन्निधौ **अवनतं** नम्रं **तं नृसिंहं** राजानं जयसिंहाख्यं **आशिषा अतोषयत्**, पद्य-रूपेणाऽशीर्वचनेनातोषयदित्यर्थः । तच्च पद्यमिदम्– 'स्वःसुन्दरीभुज-लतापरिरम्भणी धूः पौरन्दरी भवति यं भजतां भुजिष्या । आनन्दतीर्थ-भगवत्पदपद्मरेणुः स्वानन्ददो भवतु ते जयसिंहभूप'। तस्यार्थानुवादरूपः 'उपचरति नितान्तमि'ति श्लोकः ॥ ३ ॥

(त.चं.) सहजविजयतः । सहजस्यानुजस्य शङ्कराख्यस्य विजयतः प्रसन्न-स्त्रिविक्रमार्यः । तदिदं मध्वविजये शङ्करविजयो नाम । आशीः शुभाशंस-नम् । 'आशीर्दन्ते मरुद्भुजाम् । हितस्याऽशंसने स्त्री स्यात्' इति च ॥

उपचरति नितान्तं हन्त पौरन्दरी धू-
र्द्युसदसि भजतो यं दुर्लभा दभ्रभाग्यैः ।
दिशतु स परमाग्र्यानन्दतीर्थाङ्घ्रिरेणु-
र्धरणिधर सुखं ते सन्ततं स्वान्तरेति ॥ ४ ॥

(प.दी.) उपचरतीति । **स्वान्तर** सद्बुद्धे, **धरणिधर** राजन्, **सः** तथाविधः **परमाग्र्यानन्दतीर्थाङ्घ्रिरेणुः** परमस्य अग्र्यानन्दतीर्थाचार्यस्य अङ्घ्रिरेणुः **ते सन्ततं सुखं दिशतु** ददातु । कथम्भूतोऽङ्घ्रिरेणुः? **यं** अङ्घ्रिरेणुं **भजतः** सेवमानान् सत्पुरुषान्, **दभ्रभाग्यैः** अल्पभाग्यैः **दुर्लभा**, पुरन्दरपदप्राप्ति-योग्यत्वलक्षणभाग्यरहितैर्दुर्लभेत्यर्थः, नहि पुरन्दरपदप्राप्तियोग्यत्वरहितैः पुरन्दरव्यापारो लभ्यः, तस्मात् दभ्रभाग्यैर्दुर्लभा **पौरन्दरी** पुरन्दरसम्बन्धिनी **धूः** व्यापारः **द्युसदसि** स्वर्गसभायां **नितान्तमुपचरति** संवाहयति श्रीमध्व-चरणरजःसेवकसम्भावनारूपव्यापारमिन्द्रः स्वसदसि दर्शयतीत्यर्थः । [**हन्त**]

एवम्भूतः **सः** अङ्घ्रिरेणुः **ते सुखं दिशतु इति अतोषयत्** इति सम्बन्धः ॥

(त.चं.) आशिषमर्थतोऽनुवदति– उपचरति । यं रेणुं भजतः पुरुषान् पौरन्दरी धूः स्वयमुपचरति दासीव सेवते । धूरिति भारः । 'होणेगारिके' [ಹೊಣೆಗಾರಿಕೆ] इति भाषायाम् । 'अस्मिन् युद्धे महावीर त्वयि भारः समाहितः । धूरर्जुनेन वोढव्या' इति भारते ॥ ४ ॥

अनतिपरिचितस्याप्यस्य सोऽयं कवीन्द्रो
गुणरसमतिगूढं ज्ञातवानित्यचित्रम् ।
मधु मधुकरराजो निष्पतन् पौष्पमाप्तुं
ननु परिचयहीनः काननेऽपि प्रभुः स्यात् ॥ ५ ॥

(प.दी.) **अनतीति । सोऽयं कवीन्द्रः** त्रिविक्रमार्यः **अनतिपरिचितस्यापि** आत्मनोऽत्यन्तमपरिचितस्यापि **अस्य** श्रीमध्वस्य **अतिगूढं गुणरसं** गुणसारं **ज्ञातवानिति** एतत् **अचित्रं** आश्चर्यं न भवति । तथाहि– **कानने** वने **निष्पतन् मधुकरराजः** भ्रमरश्रेष्ठः **परिचयहीनोऽपि पौष्पं** पुष्पसम्बन्धि **मधु आप्तुं प्रभुः** शक्तः **स्यान्ननु** । यथा पुष्पमध्वन्वेषणतत्परो भ्रमरः कानने निष्पतन् प्रागदृष्टस्यापि पुष्पस्य मधु प्राप्नोत्येव । पुष्पसन्दर्शनमात्रेण तन्मधुवैशेष्यं ज्ञात्वा स्वीकरोति तद्वदयमपीत्यर्थः ॥ ५ ॥

(त.चं.) श्रुतकीर्तेरपि नातिपरिचितस्य ॥ ५ ॥

अखिलखलकुलानां वर्धयन् द्वेषदोषं
विदधदपि नराणां कौतुकं मध्यमानाम् ।
स्वगतिसमुचितानां भूतिदायी शुभानां
बहळहृदिह निन्ये शर्वरीः काश्चिदेवम् ॥ ६ ॥

(प.दी.) **अखिलेति । बहळहृत्** श्रीपूर्णप्रज्ञाचार्यः **इह** श्रीविष्णुमङ्गले **एवं**

वक्ष्यमाणप्रकारेण **काश्चित् शर्वरीः निन्ये** गमयामास । किं कुर्वन्? **अखिलखलकुलानां** सर्वदुर्जनसमूहानां **द्वेषदोषं** आत्मविषयद्वेषाख्यदोषं **वर्धयन् मध्यमानां नराणां अपि कौतुकं** आश्चर्यं **विदधत्** कुर्वन्, अमानुषैः स्वचरित्रैरिति भावः, **स्वगतिसमुचितानां** [स्वस्य स्वतन्त्रस्य हरेः] मुक्तौ प्राप्तियोग्यानां **शुभानां** सज्जनानां **भूतिदायी** ज्ञानभक्त्युद्रेकादिभूति-दानशीलः ॥ ६ ॥

(त.चं.) स्वगतिसमुचितानाम् । स्वस्मिन् प्राणे गतिः स्वगतिः । स ह्येनान् ब्रह्म गमयति । स्व इति स्वतन्त्रो वा भगवान् ॥ ६ ॥

उदयति विनताया नन्दने श्लाघ्यकाले
स कृतसकलकृत्यः कृत्यवेदिप्रवेकः ।
अरुणयवनिकान्तर्ब्रह्म नारायणाख्यं
गुरुगुणमभिदध्यौ योग्ययोगासनस्थः ॥ ७ ॥

(प.दी.) उदयतीति । **कृत्यवेदिप्रवेकः** कर्तव्यपरिज्ञानवतामुत्तमः **सः** श्रीमध्वाचार्यः **विनतायाः नन्दने** अरुणे **उदयति** सति **श्लाघ्यकाले** प्रातः-सन्ध्याकर्मणः प्रशस्तकाले **कृतसकलकृत्यः** कृतस्नानाद्यखिलव्यापारः **अरुण-यवनिकान्तः** रक्तयवनिकायाः अन्तर्भागे **योग्ययोगासनस्थः**, 'नात्यु-च्छ्रितं नातिनीचं चेलाजिनकुशोत्तरम्' इत्युक्तलक्षणवत्तया ध्यानयोग्या-सन उपविष्टः सन् **गुरुगुणं** परिपूर्णगुणं **नारायणाख्यं ब्रह्म अभिदध्यौ** ध्यायति स्म ॥ ७ ॥

(त.चं.) सम्प्रत्याचार्यदिनचर्यां स्वतः सकौतुकं साक्षाद् दृष्टां सोत्साहं निरूपयति इत आऽष्टचत्वारिंशं पद्यम्– उदयति विनताया नन्दने । 'वैन-तेयस्तु गरुडे स्यात् प्रभाकरसारथौ' इति च । 'विनताऽसूत गरुडं साक्षाद् यज्ञेशवाहनम् । सूर्यसूतमनूरुं च' इति भागवते । ब्राह्मे मुहूर्त इत्येतत् । कृत्यवेदिप्रवेकः । प्रकृष्टत्वेन विच्यते पृथग् गृह्यत इति प्रवेकः श्रेष्ठः उच्यते ।

विचिर् पृथग्भावे इति रुधादौ पठ्यते । केचिज्जुहोत्यादावपि विचिं पठन्ति । अन्ये तु विजिर् पृथग्भाव इति । योगासनं पद्मस्वस्तिकादि ॥

अतिधवळितदन्ता दन्तकाष्ठैः प्रशस्तै-
रपि युगपदनेके सस्नुरत्र व्रतीन्द्राः ।
गुरुभिरभिहितेष्वाचारभेदेषु निष्ठां
स्फुटमवगमयन्तः सौष्ठवात् कर्मणां च ॥ ८ ॥

(प.दी.) अतीति । अत्र इह तटाके **अनेके** बहवः **अपि व्रतीन्द्राः** यतिश्रेष्ठाः **युगपत् सस्नुः** स्नानं चक्रुः । कथम्भूताः? **प्रशस्तैः**, 'कनिष्ठिकासमं स्थौल्ये द्वादशाङ्गुलमायतम् । सत्वचं दन्तकाष्ठं स्यात् तस्याग्रेण तु धावयेत्' इत्युक्तलक्षणवत्तया प्रशस्तैः, **दन्तकाष्ठैः अतिधवळितदन्ताः** । **कर्मणां** स्वविहितशौचाचमनप्राणायामादिकर्मणां **सौष्ठवाच्च**, न केवलं यथाकथञ्चिदाचरणमात्रेण, किन्तु न्यूनाधिक्यराहित्यलक्षणसौष्ठवाच्च **गुरुभिरभिहितेषु आचारभेदेषु निष्ठां स्फुटं** सम्यक् **अवगमयन्तः** ज्ञापयन्तः ॥ ८ ॥

(त.चं.) अत्र विष्णुमङ्गलायतनगते सरोवरे यद्यापि मध्वतीर्थमिति कथयन्ति । गुरुभिरभिहितेष्वाचारभेदेषु । तथाहि गुरूणामभिधानम्–'स्मृत्वा हरिं समुत्थाय कृतशौचो यथाविधि । धौतदन्तः समाचम्य स्नानं कुर्याद् विधानतः' इत्यादि । न केवलं गुर्वाज्ञागौरवात् । किन्तु सश्रद्धं सविधानमनुष्ठानसौष्ठवाच्च निष्ठामवगमयन्तः । सौष्ठवादेवेत्यवधारणे वा । निष्ठा तात्पर्यं दीक्षा वा ॥ ८ ॥

चरमसमयसुप्ताः पूर्वमुत्थाय शिष्या
गुरुजनपरिचर्यां चक्रिरे दुष्करां च ।
सबहुमति तदाद्यप्याऽर्धरात्रात् प्रसन्नाः
सुगतिरपरथैषां स्यात् कथङ्कारमिष्टा ॥ ९ ॥

(प.दी.) चरमेति । चरमसमयसुप्ताः गुरुजनसुप्त्यनन्तरसमये सुप्ताः **शिष्याः पूर्वं** गुरुजनोत्थानात् पूर्वं **उत्थाय** शयनादुत्थाय **तदादि** तदानीमारभ्य **अर्धरात्रादा** एष्यदर्धरात्रपर्यन्तं **अपि प्रसन्नाः** सन्तः, अरतिविरहिता इत्यर्थः, **दुष्करां** अल्पभाग्यैः कर्तुमशक्यां **च गुरुजनपरिचर्यां सबहुमति** बहुमानपूर्वकं यथा भवति तथा, सादरमित्यर्थः, **चक्रिरे । अपरथा** एवं गुरुजनपरिचर्याया अकरणे **एषां** शिष्याणां **इष्टा सुगतिः** सद्गतिः **कथङ्कारं स्यात्** केन प्रकारेण स्यात्? ॥ ९ ॥

(त.चं.) तदादि अरुणोदयादि । अपरथा यदि गुरुचर्या नेष्टा स्यात् सुगतिः कथङ्कारमिष्टा स्यात्? इष्टा वा सुगतिः कथङ्कारं स्यात्? ॥ ९ ॥

श्रवणमननहेतोः प्राक् चिरायास्तनिद्रः
सपदि विवशयन्त्या निद्रया ग्रस्तचेताः ।
स्वयमपि नयति द्रागङ्गवस्त्रादि पूज्ये
झटिति विगतनिद्रः कोऽपि शिष्योऽन्वशेत ॥ १० ॥

(प.दी.) श्रवणेति । श्रवणमननहेतोः श्रुतग्रन्थस्य मनननिमित्तं **प्राक्** पूर्वरात्रे **चिराय** बहुकालं **अस्तनिद्रः** निरस्तनिद्रः, अत एव **सपदि** तदानीमरुणोदयकाल इत्यर्थः, **विवशयन्त्या निद्रया ग्रस्तचेताः** आवृतबुद्धिः सन्, **झटिति** सहसा **विगतनिद्रः कोऽपि शिष्यः** कश्चन शिष्यः **पूज्ये** स्वगुरौ **अङ्गवस्त्रादि** गुरोः पूर्वमुत्थायाऽत्मना नेतव्यं स्वगुरुस्नानाङ्गमङ्गवस्त्रादिकं गुरौ **स्वयमपि द्राक्** शीघ्रं **नयति** सति **अन्वशेत** पश्चात्तप्तोऽभूत् ॥ १० ॥

(त.चं.) श्रवणमननहेतोः । श्रवणार्थं मननार्थं च । चिराय । विभक्तिप्रतिरूपकमव्ययं सर्वास्वपि विभक्तिषु । चिरं चिरेण चिराय चिरात् चिरस्य चिरे चेति । अङ्गधावनं वस्त्रमङ्गवस्त्रम् । 'द्राक् चपलं लघु मङ्क्षु मनाक् तूर्णं त्वरितमाशु शीघ्रमरम् । अह्नाय सत्वरे च क्षिप्रं द्रुतमञ्जसा झटिति' इति, 'विप्रतिसारोऽनुशयः पश्चात्तापोऽनुसारः स्यात्' इति च ॥

विहितमविहितं प्रागेव कस्माद् विनिद्रै-
रिति गुरुपरिवादाशङ्कया नम्रगात्राः ।
चिरमनवतरन्तः श्रावका मुक्तमार्गा
गुरुषु जलसकाशस्थेषु तूष्णीमतिष्ठन् ॥ ११ ॥

(प.दी.) **विहितमिति** । **प्रागेव** अस्मत्प्रबोधात् पूर्वमेव **विनिद्रैः** प्रबुद्धैः भवद्भिः **विहितं** अस्माभिर्नियुक्तम्, श्रुतिस्मृतिविहितं वा कर्म **कस्मात् अविहितं** न कृतं इति **गुरुपरिवादाशङ्कया,** गुरुजनानां परिवादो भत्सनं तच्छङ्कया, गुरवो भत्सयिष्यन्तीति[१] शङ्कयेत्यर्थः, **नम्रगात्राः** सन्तः **गुरुषु जलसकाशस्थेषु चिरं अनवतरन्तः** तटाकेऽनवतरन्तः **मुक्तमार्गाः** स्नानानन्तरं गुरूणामागमनमार्गं मुक्त्वा स्थिताः **श्रावकाः** शिष्याः **तूष्णीं** निर्वचनं **अतिष्ठन्** ॥ ११ ॥

(त.चं.) परिवाद आक्षेपः । नम्रगात्रा न्युब्जकायाः । नतपृष्ठा नतशिरसः । श्रावकाः ये शुश्रूषन्ते । श्रवाय्याः । लोके तावच्छ्रावका इति बौद्धभिक्षव उच्यन्ते । श्रावका इति श्रोतार उच्यन्ते । श्रावका इत्यन्तेवासिन उच्यन्ते । अत्र तु श्रोतार उच्यन्ते, अन्तेवानसिश्च, श्रावयन्त्यात्मानमिति ॥ ११ ॥

विपुलहृदयपार्श्वे दीपदीप्तिप्रदीप्रे
दरवरपरिपूर्णैर्वार्भिरर्घ्यादि दत्त्वा ।
यतिरतियतचेताश्चक्रिणोऽर्चानिकायात्
कुसुमसमितिमग्र्यामादरादुज्जहार ॥ १२ ॥

(प.दी.) विपुलेति । **अतियतचेताः** अतिनियतचित्तः **यतिः** कश्चिद् यतिः **दीपदीप्तिप्रदीप्रे** दीपप्रकाशेन शोभमाने **विपुलहृदयपार्श्वे** श्रीपूर्णप्रज्ञा-

---

१.प्राचीनकोशेषु प्रायः 'भत्स–' इत्येव पठ्यते । हृषीकेशतीर्थीयेऽपि तथा । तेन साधु तर्कयामः भत्सधातुरयं प्रतनोऽर्वाक्तनैर्वैयाकरणैर्विस्मृत इति ।

चार्यसन्निधौ **दरवरपरिपूर्णैः** पाञ्चजन्यश्रेष्ठपूर्णैः **वार्भिः** उदकैः **अर्घ्यादि** अर्घ्यपाद्यादिकं **दत्वा चक्रिणः** चक्रायुधस्य **अर्चानिकायात्** साळग्रामादिप्रतिमासमूहात् **अग्रयां कुसुमसमितिं** पुष्पसमूहं **आदरात् उज्जहार** उद्धृतवान् । निर्माल्यपुष्पविसर्जनमकरोदित्यर्थः ॥ १२ ॥

(त.चं.) प्रदीप्रे । 'नमि-कम्पि–'[३.२.१६७] इति रप्रत्यय इत्युक्तम् । चक्रिण इति पञ्चमी वा । चक्राङ्कितादर्चानिकायात् । साळग्रामेभ्य इति यावत् । भगवदर्पितत्वेन मध्वकरस्पर्शेन अम्लानतया चाग्रयाम् ॥ १२ ॥

अमृतमपि निरीक्ष्याऽस्रावि निर्माल्यसूने
घृतमिदमिति सद्यो भ्रान्तिमन्तोऽपि शिष्याः ।
श्रदधुरधिकवाक्यैर्विभ्रमास्तच्च पश्चा-
दनुदिनममृतान्नैस्तस्य सेव्यस्य शक्त्या ॥ १३ ॥

(प.दी.) **अमृतमिति** । **अनुदिनं** नित्यशः **अमृतान्नैः** देवैः **सेव्यस्य तस्य** श्रीमध्वाचार्यस्य **शक्त्या निर्माल्यसूने** आस्रावि स्रुतं **अमृतं निरीक्ष्यापि सद्यः** तदानीं इदं **घृतमिति भ्रान्तिमन्तोऽपि शिष्याः पश्चात्** उत्तरकाले **अधिकवाक्यैः**, अधिकानामुत्तमानां श्रीमध्वमाहात्म्यविदामिति यावत्, वाक्यैः **तच्च श्रदधुः**, 'नैतद् घृतम्, किन्त्वमृतमेव' इत्युक्तमुत्तमानां वाक्यं श्रुत्वा **विभ्रमाः** विगतभ्रमाः सन्तः, निर्माल्यसूने घृतवत् स्निग्धतयाऽस्माभिर्दृष्टं तदमृतमेवेति **श्रदधुः** विश्वासमगमन्नित्यर्थः ॥ १३ ॥

(त.चं.) श्रदास्तिक्यम् । इदमस्तीति बुद्धिं दधुः । विविधभ्रमा अपि विभ्रमा भवन्ति । विगतभ्रमा अपि विभ्रमा भवन्ति ॥ १३ ॥

अगमदुचितमन्त्रैस्तूदयानां त्रयाणां
कृतिभिरनुमतात्मा तत्र पञ्चाङ्गविद्भिः ।
उदयमहिमरोचिश्चक्रवर्ती त्रिशक्ति-
र्दधदतिबृहदन्तः षड्गुणं स्वात्मतेजः ॥ १४ ॥

(भा.प्र.) अरुणोषस्सवितॄणामुदयास्त्रयः, मित्रभूकोशानामुदयाश्च । मन्त्रा गायत्र्याद्याः, गोप्या व्यवहरणविशेषाश्च । हृदयशिरःशिखाकवचास्त्राणि पञ्चाङ्गानि, कर्मणामारम्भोपायः पुरुषद्रव्यसम्पत् विनिपातप्रतीकारो देश-कालावेक्षणं कार्यसिद्धिरिति च। प्रकाशनतपनाह्लादनशक्तयस्तिस्रः,[1] आह्लादनं वृष्ट्या। उत्साहमन्त्रप्रभुत्वशक्तयश्च। स्वात्मतेजः स्वस्वामिनो विष्णोर्ज्योतिः, सुष्ठु आत्मनः पराक्रमश्च । 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । [2]ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' इति षड्गुणाः। 'सन्धिं च विग्रहं चैव यानमासनमेव च। द्वैधीभावं संश्रयं च षड्गुणान् कवयो विदुः' इति च ॥

(प.दी.) अगमदिति । तत्र तस्मिन् काले **अहिमरोचिश्चक्रवर्ती** सूर्याख्य-महाराजः **उदयमगमत्**। महाराजो यथा उदयं सम्पदं गच्छेत् तथा सूर्योऽप्युद-यमगमदित्यर्थः। कैः कथम्भूतः? **उचितमन्त्रैः**, उचितो मन्त्रो येषां त उचित-मन्त्राः, तैः पुरुषार्थहेतुतया जपोचितगायत्र्यादिमन्त्रयुक्तैः । **पञ्चाङ्गविद्भिः** हृदयशिरःशिखाकवचास्त्राख्यपञ्चाङ्गाभिज्ञैः **कृतिभिः** निपुणैः, ज्ञानिभि-रित्यर्थः, **त्रयाणामुदयानां** अरुणोषःसवितृनाम्नामुदयानां **अनुमतात्मा** सम्मतस्वरूपः । उदयत्रयस्य सूर्यसञ्चारकालावधिनियतत्वादुदयत्रयस्य सूर्योऽनुमतात्मेत्यर्थः । चक्रवर्ती च **उचितमन्त्रैः** मित्राद्युदयोचितगोप्य-व्यवहारयुक्तैः, **पञ्चाङ्गविद्भिः**, 'कर्मारम्भोचितोपायः पुरुषद्रव्यसम्पदः । विनिपातप्रतीकारो देशकालावलोकनम् । कार्यसिद्धिरिति प्रोक्तमङ्गानां पञ्चकं बुधैः' इत्युक्तपञ्चाङ्गविद्भिः, **कृतिभिः** विवेकिभिर्मन्त्रिभिः **त्रयाणा-मुदयानां** मित्रभूकोशोदयाख्यानामुदयानां **अनुमतात्मा** । पुनः कथम्भूतः? **त्रिशक्तिः** प्रकाशनतपनाह्लादनाख्यशक्तित्रयोपेतः । सूर्यस्याह्लादनं नाम वर्षणम् । 'अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्यमुपतिष्ठते । आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजाः' इति स्मृतिसिद्धं चैतत् । चक्रवर्ती च उत्साह-

---

१. '–ह्लादनानि शक्तयस्तिस्रः' इति पाठः सम्भाव्यते ।

२. 'ज्ञानविज्ञानयोश्चैव–' इत्यपि पठन्ति ।

प्रभुमन्त्राख्यशक्तित्रययुक् । पुनः कथम्भूतः? **अन्तः** स्वमण्डलान्तः **अतिबृहत्** अतिपरिपूर्णम्, **षड्गुणम्,** 'ऐश्वर्यस्य समग्रस्य–' इत्यादिनोक्तसमग्रैश्वर्यादिषड्गुणयुक्तम्, **स्वात्मतेजः** स्वात्मनः स्वस्वामिनो विष्णोस्तेजः **दधत्** दधानः । अन्योऽपि **अतिबृहत्,** अतिमहत् **षड्गुणं** सन्धिविग्रहयानासनद्वैधीभावसंश्रयलक्षणषड्गुणयुक्तम्, **स्वात्मतेजः** स्वरूपसामर्थ्यं **अन्तर्दधत्** ॥ १४ ॥

(त.चं.) तत्र विष्णुमङ्गलप्रदेशे अहिमरोचिश्चक्रवर्ती उदयमगमत् । तत्रत्यैरुदितो ददृश इत्यर्थः । तत्र तस्मिन् काल इति प्राचीनटीका । वैयाकरणास्तु कालवचने तदो दाप्रत्ययं मन्यन्ते । त्रयाणामुदयानामनुगणं मतः ध्यातः आत्मा स्वरूपमस्येति । आदौ ग्रहदेवतात्वेन स्मरणम्, ततोऽर्घ्यदानम्, ततः 'आसूर्यदर्शनात् तिष्ठेत् ततस्तूपविशेत वा । पूर्वां सन्ध्यां सनक्षत्रामुत्तरां सदिवाकराम्' इत्यादि । उदयास्त्रयोऽर्थशास्त्रे च प्रसिद्धाः । तथाहि कौटलीयम्– 'नित्यवश्यादिषट्प्रकारमित्रलाभेन, स्वर्णरजतादिकोशलाभेन, मित्रामित्रादिभूमिलाभेन' इत्यादि । पञ्चाङ्गानि च– 'कर्मणामारम्भोपायः, पुरुषद्रव्यसम्पत्, देशकालविभागः, विनिपातप्रतीकारः, कार्यसिद्धिश्चेति पञ्चाङ्गो मन्त्रः' इति सोमदेवनीतिसूत्रेषु । शक्तित्रयं च– 'बलं शक्तिः । सुखं सिद्धिः । उभे अपि मन्त्रप्रभूत्साहभेदेन प्रत्येकं त्रिविधे' इति कौटल्यः । 'उत्साहशक्त्यपेक्षया प्रभावशक्तिः, तदपेक्षया मन्त्रशक्तिश्च गरीयसी' इति च । 'बुद्धिशक्तिरात्मशक्तेरपि गरीयसी । ततः कोशदण्डबलं प्रभुशक्तिः । तत उत्साहशक्तिः' इति सोमदेवः । बुद्धिशक्तिरिति मन्त्रशक्तिः । 'मन्त्रपूर्वो हि सर्वोऽप्यारम्भः क्षितिपतीनाम् । अनुपलब्धस्य ज्ञानम्, उपलब्धस्य निश्चयः, निश्चितस्य बलाधानम्, अर्थद्वैधस्य संशयच्छेदनम्, एकदेशदृष्टस्याशेषोपलब्धिरिति मन्त्रसाध्यमेतत्' इति च । षाड्गुण्यं च– 'सन्धिविग्रहासनयानसंश्रयद्वैधीभावाः षाड्गुण्यम्' इति; 'पणबन्धः सन्धिः । अपकारो विग्रहः । उपेक्षणमासनम् । अभ्युच्चयो यानम् । परार्पणं

संश्रयः । सन्धिविग्रहोपादानं द्वैधीभावः । परस्माद् हीयमानः सन्दधीत । अभ्युच्चीयमानो विगृह्णीयात् । 'न मां परो नाहं परमुपहन्तुं शक्तः' इत्यासीत । गुणातिशययुक्तो यायात् । शक्तिहीनः संश्रयेत । सहायसाध्ये कार्ये द्वैधीभावं गच्छेत्' इति च । भगवतः षड्गुणत्वं तु प्रसिद्धं शास्त्रेषु– 'ऐश्वर्यस्य समग्रस्य वीर्यस्य यशसः श्रियः । ज्ञानवैराग्ययोश्चैव षण्णां भग इतीरणा' इति । तदिमे षड्गुणाः– सर्वोत्तमत्वं सर्वनियामकत्वं नाम सर्वेश्वरत्वम्, लीलामात्रेण सृष्ट्यादिनिर्वर्तिनी निरतिशया शक्तिः, निर्दोष इति गुणपूर्ण इति सकलश्रुतिकीर्तनीयत्वम्, सकलभूतिभाजनत्वम्, सर्वज्ञत्वमसङ्गत्वं चेति । अनन्तगुणानामत्रैव यथायथमन्तर्भावः । उदयानां त्रयाणां तु । त्रिष्वपि कालेषु अनुगुणं मतो ध्यात इति तुना प्रशशंस । 'तुः पादपूरणे भेदे प्रशंसायां विनिग्रहे' इति च । त्रिष्वप्युदयेषु आदित्यप्रतीक एव ध्यानमिति विशेषार्थे वा ॥ १४ ॥

तिमिरनिकरकुम्भिव्रातमत्यन्ततीव्रं
स्थिरतरमखिलानां प्राणिनां रुद्धमार्गम् ।
भुवनभवनपूर्णं भानुमानञ्जनाभं
हरिरिव नखरैः प्राग् रश्मिजालैर्निरास ॥ १५ ॥

(प.दी.) तिमिरेति । **भानुमान्** सूर्यः **अत्यन्ततीव्रं** अतिदुःसहम्, **स्थिरतरम्**, भानुतेजो विनाऽन्येनानपोद्यमिति यावत्, **अखिलानां प्राणिनां रुद्धमार्गम्**, सर्वप्राणिनां मार्गमावृत्य वर्तमानमिति यावत्, **भुवनभवनपूर्णं** भुवनाख्यभवनव्याप्तम् । **अञ्जनाभं** नीलवर्णमिति यावत् । एवम्भूतं **तिमिरनिकरकुम्भिव्रातं** [१]अन्धकारसमूहाख्यकरिनिकरम्, **प्राक्** स्वमण्डलाविर्भावात् पूर्वमेव **रश्मिजालैः निरास** निराकरोत् । **हरिः** सिंहः **नखरैः** करजैः उक्तलक्षणं **कुम्भिव्रातमिव** करिनिकरमिव ॥ १५ ॥

---

१. '–व्रातवारसङ्घातसञ्चया इत्यमरः' इति पश्चान्निवेशितमधस्तात् । न मूलभाग इति भाति ।

(त.चं.) 'कुम्भी कुञ्जरवारणेभरदिनः' इति च। तिमिरनिकरस्य विशेषणानि कुम्भिव्रातस्यापि समानानि ॥ १५ ॥

मधुरपतगरावाः शान्तनैशाम्बुबाष्पाः
सपदि विपुलरागाः स्वाभिसारात् प्रसन्नाः ।
अरुणतरणिरत्यच्छाम्बरा दिक्पुरन्ध्रीः
स्मितसरसिजवक्त्राः स्वैः करैरालिलिङ्गे ॥ १६ ॥

(प.दी.) मधुरेति । **अरुणतरणिः** उद्यदादित्यः **स्वैः** स्वकीयैः, 'स्वो ज्ञातावात्मनि स्वं त्रिष्वात्मीये स्वोऽस्त्रियां धने' इत्यमरः, आत्मात्मीयज्ञातिधनवाची स्वशब्दः, **करैः** रश्मिभिः **दिक्पुरन्ध्रीः** दिग्वधूः **आलिलिङ्गे** । कश्चित् तरुणः कराभ्यां स्ववधूमिवेति श्लेषाभिप्रायः । कथम्भूता दिक्पुरन्ध्रीः? **मधुरपतगरावाः**, मधुराः श्रोत्रप्रियाः पतगरावाः विहङ्गकूजितानि यासां दिशां तास्तथोक्ताः । वध्वोऽपि मधुरपतगराववद् रावयुक्ताः । रावः शब्दः । मधुरालापशब्दा इति यावत् । **शान्तनैशाम्बुबाष्पाः** शान्ततुषाराख्यबाष्पोपेताः । स्त्रियोऽपि प्रियदर्शनानन्तरं शान्तप्रियविरहखेदोत्पन्नबाष्पाः । **सपदि** उद्यद्रविकरसम्पर्कसमय एव **विपुलरागाः** बहळसान्ध्यरागोपेताः । अन्याश्च प्रियतमाभिसरणादेवाभिव्यक्तविपुलस्नेहाः । **स्वाभिसारात् प्रसन्नाः** सूर्यकिरणव्याप्त्या शान्ततुषारतया प्रसन्ना इत्यर्थः । स्त्रियश्च स्वकीयप्रियतमाभिगमनात् शान्तकोपाः । **अत्यच्छाम्बराः** अतिनिर्मलाकाशाः । अन्याश्चातिनिर्मलवसनाः । **स्मितसरसिजवक्त्राः** विकसितकमलाख्यवदनाः । प्रियाश्च स्मितसरसिजाभवदनाः ॥ १६ ॥

(त.चं.) आलिलिङ्गे । निरङ्कुशाः कवयः परस्मैभाषमात्मनेभाषं भाषन्ते । आत्मनेभाषं च परस्मैभाषम् । तद् यथा— चुचुम्बे । शक्यमालिलिङ्गेत्येव प्रयोगः कर्तुमविलोप्यैव च्छन्दः । अभ्युपयन्ति च केचिद् वैयाकरणाः सर्वस्मादुभयं पदम् ॥ १६ ॥

प्रणतिरभसधूळीबद्धशोभाविशेषा
दधुरुपकृतिमत्तां साधुजालान्तराप्ताः ।
समयमुपनतं संवेदयन्तो वयस्या
इव दशशतकेतोः केतवः श्रावकाणाम् ॥ १७ ॥

(भा.प्र.) भद्रजालरन्ध्रगताः सज्जनसमूहमध्यादागताश्च ॥

(प.दी.) प्रणतीति । **दशशतकेतोः** सहस्ररश्मेः सूर्यस्य **केतवः** रश्मयः **श्रावकाणां** श्रोतॄणां **उपकृतिमत्तां दधुः** । स्वयं श्रोतॄणामुपकारं कृत्वा आत्मनामुपकाराख्यधर्मवत्तां दधुरित्यर्थः । क इव? **वयस्या इव** । कथम्भूताः केतवः? **प्रणतिरभसधूळीबद्धशोभाविशेषाः** नमस्कारसम्भ्रमेणोत्पन्नधूळीभिरुत्पादितशोभाविशेषयुक्ताः । वयस्याश्च नमस्कारसम्भ्रमेणाङ्गलग्नधूळीजनितकान्तिविशेषाः । पुनः कथम्भूताः? **साधुजालान्तराप्ताः** भद्रगवाक्षमध्येन आप्ताः, अन्तरागताः । वयस्याश्च **साधुजालान्तराप्ताः** सज्जनसमूहमध्यादागताः । किं कुर्वन्तः? **समयं** शास्त्रश्रवणसमयं **उपनतं** सम्प्राप्तं **संवेदयन्तः** ज्ञापयन्तः । गवाक्षमध्यादागतं सूर्यकिरणं दृष्ट्वा श्रावकाः श्रवणोद्यता आसन्नित्यर्थः । वयस्याश्चान्योन्यश्रवणकालं ज्ञापयन्ति ॥ १७ ॥

(त.चं.) साधुजालान्तराप्ताः । जालमिति वातायनम् । जालमिति वृन्दम् । 'जालं गवाक्ष आनाये क्षारके दन्तवृन्दयोः' इति च । दशशतकेतोः सहस्रमयूखस्य केतवः । 'उस्रधामवसुकेतुमरीचिप्रग्रहोपधृतिधृष्टिमयूखाः' इति च ॥ १७ ॥

निहितमुचितमुच्चं योगपीठं प्रवक्तुः
परिषदि परितोऽमी सत्वराः सत्त्वभाजः ।
द्रुतमवसितकृत्यैर्धन्यसन्न्यासिवर्गैः
श्रवणपरमकृत्यायोपतस्थुः समेताः ॥ १८ ॥

(प.दी.) **निहितमिति** । **सत्वराः** सवेगाः **सत्त्वभाजः** सत्त्वगुणभाजः । सात्त्विका इत्यर्थः । बलिन इति वा । स्वविहितकर्मक्षमबलवन्त इत्यर्थः । **अमी** श्रोतारः **द्रुतं** **अवसितकृत्यैः** समापितजपादिकृत्यैः **धन्यसन्यासिवर्गैः** **समेताः** सन्तः **परिषदि** व्याख्यानमण्डपे **निहितम्**, **उचितं** श्रीमध्वाचार्यस्योचितम्, **उच्चं** उन्नतम्, उत्तममिति वा, **प्रवक्तुः** व्याख्यातुः श्रीमध्वाचार्यस्य, **योगपीठं** **परितः** योगासनस्य समन्तात्, **श्रवणपरमकृत्याय** शास्त्रश्रवणाख्योत्तमव्यापाराय **उपतस्थुः** उपासिरे । व्याख्यासिंहासनस्य समन्तादास्थिता इत्यर्थः । 'योगपीठं परितः' इत्यत्र 'अभितःपरितःसमयानिकषाहाप्रतियोगेषु च दृश्यते' इति द्वितीया ॥ १८ ॥

(त.चं.) प्रवचनयोगाय पीठम् । उन्नतफलकास्तृतमजिनादि । उपतस्थुः समेताः । ननु 'उपतस्थिरे' इति भाव्यम् । तथाहि कात्यायनः पठति–'उपाद् देवपूजासङ्गतिकरणमित्रकरणपथिष्विति वाच्यम्'[१.३.२५] इति । अत्र हि सङ्गतिकरणं पदार्थः । समेता इति स्फुटं श्रवणात् । न भोः । 'वा लिप्सायाम्' इति विभाषा भवति । अत्र हि परमार्थलिप्सया सङ्गताः । श्रवणपरमकृत्यायेति शुश्रूषा हि श्रूयते । अथापि 'अकर्मकाच्च' [१.३.२६] इत्यात्मनेपदं भवति । तर्हि प्रवक्तारमुपतस्थुरिति कर्माध्याहरेण सन्तुष्यताम् । न खलु पाणिनिः पठति यत् सकर्मकं तत् कर्मणा सहैव पठितव्यमिति । काव्यं हि नामाऽर्थमन्तःस्फुरणम् । यथास्फुरणं हि कवयः पठन्ति । नतु यथास्मृतम् । क्वचित् पठित्वा स्मरन्ति । अथापि न पाठं व्यत्यस्यन्ति । क्वचित् स्मरन्तोऽपि व्यत्यस्यैव पठन्ति । सोऽयमार्षः सम्प्रदायः ॥

बभुरमलगुणानां शोभनाच्छादनानां
मुररिपुनिलयानां हन्त वैदान्तिकीनाम् ।[१]
सपदि सुविवृतानामन्तरर्था धियां वा
विविधकवलिकानां सञ्चयाः पत्रिकाणाम् ॥ १९ ॥

१. अत्र 'वैदान्तकीनाम्' इति 'वैदान्तकानाम्' इति च पाठविभ्रमः कोशेषु ।

(प.दी.) **बभुरिति । विविधकवळिकानां अन्तः पत्रिकाणां सञ्चयाः बभुः हन्त** । कथम्भूतानां पत्रिकाणाम्? **अमलगुणानां** निर्मलसूत्राणाम्, **शोभनाच्छादनानां** शोभनवसनानाम्, **मुररिपुनिलयानां** श्रीहरिसन्निधानायतनानाम्, **वैदान्तिकीनां**[1] वेदान्तशास्त्रसम्बन्धिनीनाम्, **सपदि** तदानीमेव **सुविवृतानां** वस्त्रकवळिकाद्यावरणशून्यानाम् । क इव? **अन्तः** अन्तःकरणे **धियां** बुद्धीनां **अर्था वा** विषया इव । सतामन्तःकरणे तेषां बुद्धिविषया भगवत्स्वरूपादयो यथा तथा बभुरिति भावः । कथम्भूतानां धियाम्? **अमलगुणानां** निर्दोषज्ञानभक्त्यादिगुणयुक्तानां, **शोभनाच्छादनानां** अयोग्येषु भगवत्स्वरूपनिगूहनयुक्तानाम्, **मुररिपुनिलयानां** मुररिपोरावासभूतहृत्सरोजानाम्, [1]**वैदान्तिकीनां** वेदान्तशास्त्रसम्बन्धयुक्तानाम्, सद्विचारनिरतत्वेनेत्यर्थः, **सपदि** सद्गुरूपदेशमात्रेणैव **सुविवृतानां** निरस्ताज्ञानाख्यावरणानाम् ॥ १९ ॥

(त.चं) 'कवळिका', [ಕಟ್ಟು] इति भाषायाम् । शोभनाच्छादनानाम् । आच्छादनं दारुफलकवस्त्रादि ॥ १९ ॥

अनतिविरळभावा अप्यनन्योन्यसङ्गा
ऋजुतरततनानापङ्क्तिसाम्याप्तशोभाः ।
द्विरदतुरगदेश्या दूरतो वर्जितान्ताः
कुशललिखितरूपा रेजिरे तेषु वर्णाः ॥ २० ॥

(भा.प्र.) तुरगदेश्याः तुरङ्गकल्पाः । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति ॥

(प.दी.) अनतीति । **तेषु** पत्रिकाणां सञ्चयेषु **वर्णाः** अक्षराणि **रेजिरे** । कथम्भूताः? **अनतिविरळभावा अपि** अतिविरळत्वरहिता अपि **अनन्योन्यसङ्गाः** परस्परमसंस्पृष्टाः, **ऋजुतरततनानापङ्क्तिसाम्याप्तशोभाः**, ऋजुत-

१. अत्रापि 'वैदान्तकीनाम्' इति पठन्ति ।

राणामवक्राणां ततानां नानापङ्क्तीनां साम्येन आद्यन्तयोर्न्यूनाधिक्यराहित्येन सम्प्राप्तशोभाः, **द्विरदतुरगदेश्याः** गजराजाश्वाकारसदृशाः । अश्वगजलिपिनामका इति भावः । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' इति सादृश्यार्थे देश्यप्रत्ययः, **दूरतो वर्जितान्ताः** पत्राद्यन्तयोः पार्श्वयोर्नाभिद्वयस्य चतुर्दिक्षु च दूरतो वर्जितप्रान्ताः, एवम्भूतत्वादेव **कुशललिखतरूपाः** लेखनकर्मणि चतुरैर्लिखितस्वरूपाः ॥ २० ॥

(त.चं.) मन्दम्मन्दं लिखिता स्थूला च लिपिर्गजलिपिरित्युच्यते । सत्वरं लिखिता सूक्ष्मा चाश्वलिपिरिति । तदाह– द्विरदतुरगदेश्याः । ईषदसमाप्ता द्विरदा द्विरददेश्याः । ईषदसमाप्तास्तुरगास्तुरगदेश्याः । ईषदसमाप्तिरिति किञ्चिदूनता । समाः अथापि किञ्चिदूनाः । तद्यथा– पटुदेश्यः । पटुरेवायं बालः । अथापि पटुतमानामन्येषां पुरः किञ्चिदूनः इति । तथाहि पाणिनिः स्मरति–'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः'[५.३.६७] इति । मृदुकल्पः । पचतिकल्पम् । ईषत्साम्यमेव दर्शयति– अनतिविरळभावाः । यथा सेनायां पथसञ्चलनाय स्थापिता मातङ्गास्तुरङ्गा वा अनतिविरळभावाः, अथाप्यन्योन्यसङ्गाः । ऋजुतरासु ततासु नानापङ्क्तिषु एकरूपतया व्यवस्थया स्थापिता अत एवाऽप्तशोभाः । दूरे क्वास्याः पङ्क्तेरवसानमिति न ज्ञायत इति दूरतो वर्जितान्ताः । निभृतनिश्चलतया लिखितरूपा इव । वर्णपरतया तु प्राचीनटीकासु स्फुटोऽर्थः । कुशलेन कुशलं वा लिखितरूपाः ॥

सपदि ददृशुरेके वाचनीयादिभागं
परिचयपटुताभ्यां तावदेके चिरेण ।
हरिगुरुनमनं द्राग् यत्नतोऽमी विधाय
प्रययुरपरसाम्यं सिद्धये स्याद्धि यत्नः ॥ २१ ॥

(प.दी.) **सपदीति** । एके केचन श्रोतारः **वाचनीयादिभागं** तदानीं

श्रोतव्यत्वेन वाचनीयस्य ग्रन्थस्याऽदिभागं आदिमं वाक्यम्, **परिचयपटुताभ्यां** ग्रन्थविषयपरिचयेन चातुर्येण च, **सपदि** झटिति **ददृशुः । तावत्** तदा **एके चिरेण** शनैः **ददृशुः** । तावत्परिचयपटुताऽभावादिति भावः । तथाऽपि **अमी** चिरेण वाचनीयादिभागं ये ददृशुस्ते **यत्नतः** प्रयत्नविशेषात् **हरिगुरुनमनं द्राग् विधाय अपरसाम्यं** झटिति दृष्टवतां तेषां साम्यं नमनविषये साम्यं **प्रययुः** । तथा हि– **यत्नः** देशकालोचितः प्रयत्नः **सिद्धये** अभीष्टसिद्धये **स्याद्धि** ॥ २१ ॥

(त.चं.) एके तावत् सपदि । तावदिति परिच्छेदे वर्तते । एके सपदि, एके चिरेणेति । तावदिति सम्भ्रमे वर्तते । एके तावत् ससम्भ्रमं हरिगुरुनमनं द्राग् विधाय । ताविदित्यवधारणे वर्तते । एके तावत् केचिदेव सपदि ददृशुरिति । तावदित्यधिकारेऽपि स्यात् । अध्ययनेऽधिकृता एके सपद्येके चिरेणेति । 'तावन्मानेऽवधारणे । सम्भ्रमे च परिच्छेदे तथा कार्त्स्न्याधिकारयोः' इति च । सामान्येन विशेषं समर्थयते– सिद्धये स्याद्धि यत्नः ॥

यतवचसि जनेऽस्मिन्नानते सन्निरस्यन्
सिचययवनिकां तां सान्ध्यजीमूतरक्ताम् ।
रविरिव रविपूज्याङ्घ्रिः समाजान्तरिक्षे
व्यलसदतिशयालुः सन् सहस्रप्रकाशः ॥ २२ ॥

(प.दी.) **यतेति** । **आनते** कृतनमस्कारे **अस्मिन् जने** श्रोतृजने **यतवचसि** मौनवति वर्तमाने सति । **सान्ध्यजीमूतरक्तां** सान्ध्यमेघवद् रक्तवर्णां **तां सिचययवनिकां** वस्त्रात्मिकां यवनिकां **सन्निरस्यन्** अपास्यन् **रविपूज्याङ्घ्रिः** अत एव **अतिशयालुः** स्वगुणैः सूर्यमतिशयिष्णुः **सन्, सहस्रप्रकाशः** श्रीपूर्णप्रज्ञाचार्यः **समाजान्तरिक्षे** व्याख्यानसभाख्याकाशे **रविरिव व्यलसत्** शुशुभे । **अस्मिन् जने** सन्ध्यानुष्ठानं कुर्वति जने **यतवचसि आनते** स्थिते

सति **सहस्रप्रकाशः** सूर्यः रक्तसान्ध्यजीमूताख्ययवनिकां अपास्यन् नभसि यथा शोभां भजेत् तद्वदित्यभिप्रायः ॥ २२ ॥

(त.चं.) सिचययवनिकाम् । रक्तशाटीमयीमपटीम् । 'अम्बरमंशुकमुक्तं वस्त्रं सिचयः पटः प्रोक्तः' इति । 'अपटी काण्डपटः स्यात् प्रतिसीरा यवनिका तिरस्करिणी' इति च । अतिशयालुः । 'आलुचि शीङो ग्रहणं कर्तव्यम्' [३.२.१५८] इति हि वार्तिकम् ॥ २२ ॥

त्रिभुवनवरतेजोव्यक्तवेदार्थशुक्र-
त्रितयरसतया ये वर्णिता वर्णवर्याः ।
पृथुमतिरथ तेषामैक्यमापाद्य सम्यक्
प्रवचनपरिशुद्ध्यै स्म प्रणौति प्रवीणः ॥ २३ ॥

(भा.प्र.) 'स इमान् लोकानसृजत पृथिवीमन्तरिक्षं दिवं तान् लोकानभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रीणि ज्योतींष्यजायन्ताग्निरेव पृथिव्या अजायत वायुरन्तरिक्षादादित्यो दिवस्तानि ज्योतींष्यभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्तग्वेद एवाग्नेरजायत यजुर्वेदो वायोः सामवेद आदित्यात् तान् वेदानभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्राण्यजायन्त भूरित्येवग्वेदादजायत भुव इति यजुर्वेदात् स्वरिति सामवेदात् तानि शुक्राण्यभ्यतपत् तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति तानेकधा समभरत् तदेतदोमिति' इत्यादिश्रुत्या वर्णिताः । [ऐतरेयब्राह्मणपञ्चमकण्डिकाप्रतिपादितप्रणवप्रकारो द्रष्टव्यः[१] ॥]

(प.दी.) त्रिभुवनेति । अथ **प्रवीणः पृथुमतिः** श्रीपूर्णप्रज्ञाचार्यः **प्रवचनपरिशुद्ध्यै**, प्रवचनस्य व्याख्यानस्य परिशुद्ध्यै निर्दोषत्वाय, **प्रणौति स्म** प्रणवोच्चारणमकरोत् । किं कृत्वा? **तेषां** वर्णवर्याणां **सम्यगैक्यं** आनुपूर्व्येण नैरन्तर्यलक्षणं संश्लेषं **आपाद्य** सम्पाद्य । केषां वर्णानाम्? **ये वर्णवर्याः** अकारोकारमकाराः **त्रिभुवनवरतेजोव्यक्तवेदार्थशुक्रत्रितयरसतया वर्णिताः** । त्रिभुवने त्रैलोक्ये वरेभ्य उत्तमेभ्यस्तेजोभ्यः अग्निवायुसूर्येभ्यः

१. इदं वाक्यं पश्चात् केनचिदुपक्षिप्तमिति भाति ।

व्यक्तानां वेदानामृग्यजुःसाम्नामर्थभूतस्य शुक्लत्रितयस्य भूर्भुवःस्वरिति व्याहृतित्रितयस्य रसतया सारतया वर्णिताः श्रुतावुक्ताः। **तेषां** वर्णानां **सम्यगैक्यमापाद्य प्रणौति स्म** इति सम्बन्धः। श्रुतिश्च– 'स इमान् लोकानसृजत पृथिवीमन्तरिक्षं दिवम्। तान् लोकानभ्यतपत्। तेभ्योऽभितप्तेभ्यस्त्रीणि ज्योतींष्यजायन्त। अग्निरेव पृथिव्या अजायत। वायुरन्तरिक्षात्। आदित्यो दिवः। तानि ज्योतींष्यभ्यतपत्। तेभ्योऽभितप्तेभ्यस्त्रयो वेदा अजायन्त। ऋग्वेद एवाग्नेरजायत। यजुर्वेदो वायोः। सामवेद आदित्यात्। तान् वेदानभ्यतपत्। तेभ्योऽभितप्तेभ्यस्त्रीणि शुक्लान्यजायन्त। भूरित्येवर्ग्वेदादजायत। भुव इति यजुर्वेदात्। स्वरिति सामवेदात्। तानि शुक्लान्यभ्यतपत्। तेभ्योऽभितप्तेभ्यस्त्रयो वर्णा अजायन्ताकार उकारो मकार इति। तानेकधा समभरत् तदेतदोमिति' इति ॥ २३ ॥

(त.चं.) शुक्लं परिशुद्धं भगवद्व्याहरणमिति व्याहृतित्रयं शुक्लत्रितयमुच्यते। भूरिति भुव इति सुवरिति। यथा वाच्यं परशुक्लत्रयं श्रीर्ब्रह्माणीब्रह्माणौ तथा वाचकेषु मन्त्रेष्वेतत् शुक्लत्रयमिति। प्रवचनपरिशुद्ध्यै। 'स्रवत्यनोङ्कृतं ब्रह्म' इत्यादेः। 'तस्मादोमित्युदाहृत्य यज्ञदानतपःक्रियाः। प्रवर्तन्ते विधानोक्ताः सततं ब्रह्मवादिनाम्' इति च गीतासु भगवद्वचनम्। 'स इमान् लोकानसृजत' [२५.७] इत्यादि चैतरेयब्राह्मणम्। अभ्यतपत् अभिदध्यौ क एषां सार इति। अजायन्त प्रादुरभवन् मनसि ॥ २३ ॥

स्वरमचरमकाले मन्द्रमेवात्यजद्भिः
स्फुटमुपनिषदन्ते वाचकैर्वाच्यमाने।
प्रवचनमतिचित्रं प्राणभाजां श्रुतीना-
ममृतममृतभावस्यैष हेतुं चकार ॥ २४ ॥

(प.दी.) **स्वरमिति**। **अचरमकाले** उपक्रमकाले **मन्द्रं स्वरं अत्यजद्भिरेव**। उपक्रमकाले उच्चध्वनेर्निषिद्धत्वादङ्गीकृतमन्द्रस्वरैरित्यर्थः। **वाचकैः**

उपनिषदन्ते उपनिषन्निर्णयात्मके ग्रन्थे, उपनिषद्भाष्ये वा, वेदान्तशास्त्रविषय-ग्रन्थान्तरे वा **स्फुटं वाच्यमाने** सति । मन्द्रं वाचयद्भिरपि स्पष्टं वाच्यमाने सतीत्यर्थः । **एषः** श्रीमध्वः **प्राणभाजां** जीवानां **श्रुतीनां अमृतं** अमृतायमानम्, **अमृतभावस्य** मुक्तत्वस्य **हेतुं अतिचित्रं प्रवचनं चकार** ॥ २४ ॥

(त.चं.) उपनिषदन्ते उपनिषद्भागे वा । 'अन्तः स्वरूपे निकटे प्रान्ते निश्चयनाशयोः । अवयवेऽपि' इति च । श्रावकाणां श्रुतीनाममृतमिव श्रवणाञ्जलिपुटपेयम् । श्रुतीनां वेदशास्त्राणां वा प्रवचनम् ॥ २४ ॥

धनमिव सधनायेभ्योऽर्कसूनुः प्रसन्नः
शरशतमिव पार्थः संयुगार्थिभ्य उग्रः ।
अरतिविरहितः सोऽनारतं नादिशन्नो
प्रतिवचनमदीनं चोदकेभ्योऽखिलेभ्यः ॥ २५ ॥

(प.दी.) धनमिति । **अरतिविरहितः** तन्द्रीरहितः **सः** श्रीमध्वः **अखिलेभ्यः चोदकेभ्यः** पृच्छद्भ्यः **अदीनं** अतिप्रौढं **प्रतिवचनं** प्रत्युत्तरं **अनारतं नादिशत्** न प्रददाविति **नो** । अदिशदेव । ये मत्सरवर्जिताः सन्तस्तत्त्व-बुभुत्सया चोदयन्ति तान् प्रति तत्सन्तोषकरं प्रत्युत्तरं **प्रसन्नः** भूत्वा दिदेशेति भावः । कः कस्मै[1] किमिव? **सधनायेभ्यः** धनायासहितेभ्यः, धनाया धन-तृष्णा, तत्सहितेभ्यः **अर्कसूनुः** कर्णः **धनमिव** । अथ ये समत्सरा जिगीषया चोदयन्ति तेभ्यस्तन्निराकरणशूराणि प्रत्युत्तराणि दिदेश । तत् कथमिव? **उग्रः पार्थः संयुगार्थिभ्यः** शत्रुभ्यः **शरशतमिव** ॥ २५ ॥

(त.चं.) सद्भ्यः प्रसन्नः प्रसन्नमेव प्रतिवचनं ददौ । असद्भ्य उग्रः स-न्नुग्रम् । धनाया धनगर्धः । तद्वन्तः सधनायाः । 'अशनायोदन्यधनाया बुभुक्षापिपासागर्धेषु' [७.४.३४] इति । अशनाय-उदन्य-धनाय इत्येतानि

१. 'कः केभ्यः–' इति स्वरसम् ।

निपात्यन्ते बुभुक्षा पिपासा गर्धः इत्येतेष्वर्थेष्विति । अशनायति बुभुक्षा चेत् । अन्यत्र त्वशनीयति । उदन्यति पिपासा चेत् । अन्यत्र तूदकीयति । धनायति गर्धश्चेत् । अन्यत्र तु धनीयति । अदीनमभीतमर्थभरितं च । अक्षुद्रं च । 'दीना स्त्री मूषिकस्त्रियाम् । वाच्यवद् दुर्गते भीते' इति ॥ २५ ॥

अथ दशशतशोचिष्याप्रयाति प्रतीच्यां
प्रवचनमवसाय स्नातुमायात् तटाकम् ।
पृथुमतिरिह तावच्छ्रेष्ठसंसर्गलोलैः
समगमि सपदि स्वर्निम्नगाद्यैश्च तीर्थैः ॥ २६ ॥

(प.दी.) अथेति । **अथ दशशतशोचिषि** सहस्ररश्मौ **प्रतीच्यां** पश्चिमतः **आ** ईषत् **प्रयाति** सति । मध्याह्नानन्तरमेवेति यावत् । **पृथुमतिः प्रवचनं** व्याख्यानं **अवसाय** समाप्य **स्नातुं** यावत् **तटाकमायात् तावत्** तदा **श्रेष्ठसंसर्गलोलैः**, श्रेष्ठस्य उत्तमस्य श्रीमध्वस्य संसर्गलोलैः **स्वर्निम्नगाद्यैः** गङ्गाद्यैः **तीर्थैश्च इह** तटाके **सपदि** झटिति **समगमि** समागतम् । गङ्गादितीर्थानि तटाके मिळितान्यभूवन्नित्यर्थः ॥ २६ ॥

(त.चं.) प्रतीच्यां पश्चिमायां दिशि । आ ईषद् गच्छति सति । नतु प्रतीचीं गत एव । अह्नोऽपरभागं प्रविशति सति । तटाकम् । चत्वार्यत्र रूपाणि प्रयोगे परिदृश्यन्ते । तटाक इति तटाग इति तडाक इति तडाग इति च । तटतीति तटाकम् । तट उच्छ्रये । उच्छ्रयते जलोद्गमेनेति । 'पिनाकादयश्च'[३.३४] इति दशपादिकाकृत् पिनाकादीन् आकप्रत्यये निरूढानाह । वृत्तिकारस्तु तड धातोराकमाह । तड आघाते । तड्यते तद् गवादिभिरिति तडाकम् । भोजस्तु तडेरागच्प्रत्ययमाह । तेन तडागम् । तटधातुनिष्पन्नत्वे तटागमिति । सर्वाण्यपि रूपाणि व्याकरणप्रक्रियानिष्पन्नानि । यदाह कश्चित्– तड आघात इत्यस्मात् तडाक इति वृत्तिकृत् । तडागं मन्यते भोजस्तडेरागजितीरयन् । टीकासर्वस्वकारस्तु तटाक-

मपि रक्षितुम् । आके कृते तडेरेव बाहुल्याट्टत्वमिच्छति' इति । अत्र तु मूले टीकायां च तटाकमित्येव पठ्यते । इह तटाके गङ्गादिभिस्तीर्थैस्तटाकजलेन समं समगमि समगम्यत ॥ २६ ॥

घनरसनिकरोऽसावन्तरत्यन्तशुद्धो
मुनिगण इव भूयःस्नेहवान् प्राग् दधानः ।
प्रतिकृतिमखिलज्ञस्याऽपरोक्ष्येण तावत्
स्फुटमलभत रूपं मज्जने सज्जनेष्टम् ॥ २७ ॥

(प.दी.) घनेति । **अन्तः अत्यन्तशुद्धः** अन्तर्भागे कर्दमादिदोषरहितः । **भूयःस्नेहवान्**, स्नेहो नामाम्भसो गुणः, तद्वान् । **असौ घनरसनिकरः** जलसमूहः । 'अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् । मेघपुष्पं घनरसः' इत्यमरः । **प्राक्** मज्जनात् पूर्वं **अखिलज्ञस्य प्रतिकृतिम्** । तटाकसमीपवर्तिनः श्रीमध्वस्य प्रतिबिम्बं **दधानः** सन् । **तावत्** तदा **मज्जने** मज्जनसमये **सज्जनेष्टं** सज्जनप्रियं **रूपं** श्रीमध्वाचार्यस्य रूपं **स्फुटं** सम्यक् **आपरोक्ष्येण अलभत** । तटाकतीरवर्तिनः श्रीमध्वाचार्यस्य प्रतिकृतिं सन्दधानो जलसमूहः पश्चान्मज्जनसमये स्वरूपमेव स्फुटमापरोक्ष्येण प्रापेति भावः । क इव? **भूयःस्नेहवान्** बहुस्नेहवान् **मुनिगण इव** । सोऽपि **अन्तः** अन्तःकरणे **अत्यन्तशुद्धः** अज्ञानादिदोषरहितः सन् **प्राक्** ध्यानयोगपरिपाकपूर्वं प्रतिकृतिं ध्यानकाले मनसि प्रतीयमानं भगवत्प्रतिबिम्बमन्तःकरणे दधानः पश्चाद् ध्यानयोगपरिपाकानन्तरं तत्स्वरूपमेव यथा सम्यगापरोक्ष्येण पश्येत् तद्वदिति भावः ॥ २७ ॥

(त.चं.) स्नेहो लगनम् । अवयवानां लगनं घनरसधर्मः । मनसो लगनं मुनिगणस्य ॥ २७ ॥

अपरिमितमनीषस्योल्लसच्छङ्खबाहो
रथचरणशिलानां तन्वतोऽत्राभिषेकम् ।

प्रतितनव उदारास्तास्वलं सन्निधातु-
स्तनव इव विरेजुः पाञ्चजन्यप्रियस्य ॥ २८ ॥

(प.दी.) अपरिमितेति । अत्र तटाके **रथचरणशिलानां** चक्रिशिलानाम्, साळग्रामशिलानामिति यावत्, **अभिषेकं तन्वतः**, **उल्लसच्छङ्खबाहोः अपरिमितमनीषस्य उदाराः** समीचीनाः **प्रतितनवः** प्रतिबिम्बाः **तासु** चक्रिशिलासु **विरेजुः** । का इव? **तासु** चक्रिशिलासु **अलं सन्निधातुः** सम्यक् सन्निधानं कुर्वतः **पाञ्चजन्यप्रियस्य** हरेः **तनव इव** स्वरूपाणीव ॥ २८ ॥

(त.चं.) उदारा उत्कृष्टाः ॥ २८ ॥

अभिदधति मुनीन्द्रा द्वादशाब्दोपवास-
प्रतिमफलमलं यत्सेवनं भक्तियुक्तम् ।
अधिकममरनद्याद्याप्लवाद्धन्यमान्या-
दपिबदलवबोधो विष्णुपादोदकं तत् ॥ २९ ॥

(भा.प्र.) 'त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः ।
'समुद्रगास्तु पक्षस्य मासस्य सरितां पतिः ॥

'षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी ।
'द्वादशाब्दोपवासस्य विष्णुपादोदसेवनम् ॥

'यानि कानि च तीर्थानि ब्रह्माण्डान्तर्गतानि च ।
'विष्णुपादोदकस्यैते कलां नार्हन्ति षोडशीम्' इत्यभिदधति ॥

(प.दी.) अभीति । **मुनीन्द्राः भक्तियुक्तं** भक्तिसहितं यथा भवति तथा **यत्सेवनं** यस्य श्रीविष्णुपादोदकस्य सेवनं **अलं** सम्यक् **द्वादशाब्दोपवासप्रतिमफलं** द्वादशाब्दोपवासे यत् फलं भवति तत्फलसमानं फलं यस्य तद् द्वादशाब्दोपवासप्रतिमफलम्, तावत्फलयुक्तं **अभिदधति** वदन्ति । पुनः कथम्भूतम्? **धन्यमान्यात्** धन्यैर्महद्भिर्मान्यात् **अमरनद्याद्याप्लवात्**

गङ्गानद्यादिषु स्नानात् **अधिकं** अधिकफलं **अभिदधति** । **अलवबोधः तद् विष्णुपादोदकं** एवं महाफलं श्रीविष्णुपादोदकं साळग्रामाभिषेकतीर्थमित्यर्थः, **अपिबत्** । श्रीविष्णुपादोदकस्योक्तफलवत्त्वं च–'त्रिरात्रफलदा नद्यो याः काश्चिदसमुद्रगाः । समुद्रगास्तु पक्षस्य मासस्य सरिताम्पतिः । षण्मासफलदा गोदा वत्सरस्य तु जाह्नवी । द्वादशाब्दोपवासस्य विष्णुपादोदसेवनम्' इति प्रमाणसिद्धम् । विष्णुपादोदसेवनं द्वादशाब्दोपवासस्य फलदमिति योजना । एवं 'त्रिरात्रफलदा' इत्यादावपि त्रिरात्रोपवासफलदेत्यादि द्रष्टव्यम् ॥ २९ ॥

(त.चं.) द्वादशाब्दोपवासस्य फलदं विष्णुपादोदसेवनं न केवलम् । किन्तु भक्तियुक्तं सेवनमेव ॥ २९ ॥

तरणिभिरिव गौरैरूर्ध्वपुण्ड्रैर्द्विषड्भिः
सदरपरमचक्रोदीर्णतेजा हरीष्टः ।
मुररिपुविमुखानां दुस्सहो देहभाजां
लयसमय इवान्यो मान्यधीराबभासे ॥ ३० ॥

(भा.प्र.) सन्तोऽरा अस्येति सदरम् ॥

(प.दी.) तरणिभिरिति । **सदरपरमचक्रोदीर्णतेजाः** । सदरेण, दरः पाञ्चजन्यः, तत्सहितेन परमेण चक्रेण उदीर्णतेजाः । शङ्खचक्रलाञ्छनेन प्रवृद्धतेजा इत्यर्थः । **हरीष्टः** हरेरिष्टः । **मुररिपुविमुखानां देहभाजां दुःसहः** । भगवद्विमुखानां देहिनामत्यप्रिय इत्यर्थः । **मान्यधीः** श्रीपूर्णबोधाचार्यः **तरणिभिरिव** सूर्यैरिव **गौरैः** शुभ्रैः **द्विषड्भिः ऊर्ध्वपुण्ड्रैः आबभासे** । क इव? **अन्यः लयसमय इव** प्रळयकाल इव । सोऽपि द्विषड्भिस्तरणिभिः सूर्यैः सहितः । प्रळयकाले द्वादशादित्या युगपदुद्यन्ति हि[१] । पुनः कथम्भूतः? **सदरपरमचक्रो-**

१. विचिन्त्यमेतत् । आदित्या इत्यदितिपुत्रा इन्द्रादय उच्यन्ते । वामनोऽप्यादित्यः । न ते सर्वेऽप्युदयन्ते प्रळये ।

दीर्णतेजाः । सन्तः अराः यस्य तत् सदरम् । सदरं च तत् परमस्य चक्रं चेति सदरपरमचक्रम् । तेन उदीर्णतेजाः । शोभनारयुक्तहरिचक्रेण प्रवृद्ध-तेजा इत्यर्थः । लयसमयोऽपि **हरीष्टः** । संहाराङ्गत्वात् । **मुररिपुविमुखानां देहभाजां दुःसहश्च** । तेषां तमःप्राप्तिनिमित्तत्वात् । हरिद्वेषपरिपाकवन्तो हि प्रळये तमः प्रविशन्ति ॥ ३० ॥

(त.चं.) 'विवस्वानर्यमा पूषा त्वष्टाऽथ सविता भगः । धाता विधाता वरुणो मित्रः शक्र उरुक्रमः' इति द्वादश काश्यपाददित्यां जाता इत्यादित्याः । तेष्वेको विवस्वानेव लयसमयेऽप्युदेति । नहि द्वादशानामप्यादित्यानामुदयो नाम क्वापि भवति । नापि द्वादश सूर्याः क्वापि सन्ति । अथापि प्रखरतया नैकः, किन्तु द्वादश सूर्याः उदिता इवेति लयसमय उत्प्रेक्ष्यते ॥ ३० ॥

समधिकधिषणस्य प्रेक्षमाणो जनौघः
प्रकृतिमधुरमास्यव्याजपूर्णेन्दुबिम्बम् ।
अमुचदपसरेति श्रावकोक्तेः पुराऽस्मिन्
प्रचलति पदवीं तां प्राञ्जलिस्तूर्णमारात् ॥ ३१ ॥

(प.दी.) समधिकेति । **समधिकधिषणस्य** श्रीपूर्णप्रज्ञाचार्यस्य **प्रकृति-मधुरं** स्वभावरमणीयं **आस्यव्याजपूर्णेन्दुबिम्बं** श्रीमुखव्याजेन शोभमानं पूर्णेन्दुमण्डलम्, पूर्णेन्दुमण्डलसमं मुखमिति यावत्, तत् **प्रेक्षमाणो जनौघः अपसरेति** मार्गादपसरेति **श्रावकोक्तेः** श्रोतुः शिष्यस्योक्तेः **पुरा अस्मिन्** श्रीमध्वे **प्रचलति** आसनाच्चलति सति **प्राञ्जलिः** सन् **तूर्णं आरात्** दूरतः **तां पदवीं** मार्गं **अमुचत्** ॥ ३१ ॥

(त.चं.) समधिकधिषणस्य । धृष्णात्यनयेति धिषणा प्रज्ञा । ञिधृषा प्रागल्भ्ये । 'धृषेर्धिष च सञ्ज्ञायाम्'[५.२७] इति हि दशपादिका । अमुचत् अमुक्त । मुच्लृ मोक्षणे । तुदादिः । 'विप्रकृष्टं परं दूरमाराद्

व्यवहितं मतम्' इति च । 'अयनं पदवी मार्गः पद्या च निगद्यते निगमः' इति च ॥ ३१ ॥

गुरुचरणसरोजद्वन्द्वनिर्णेजनाम्भो
दधति जननिकाये सर्वमुर्वीगतं च ।
अवनिरनभिनन्दिन्यप्यदश्चक्षमेऽसौ
कथमपि कथमेव स्यात् क्षमाख्याऽन्यथाऽस्याः ॥ ३२ ॥

(प.दी.) **गुरुचरणे**ति । **जननिकाये** जनसमूहे **गुरुचरणसरोजद्वन्द्वनिर्णेजनाम्भः**, गुरोः श्रीमध्वाचार्यस्य चरणकमलयुगलस्य निर्णेजनाम्भः प्रक्षाळनजलम्, **उर्वीगतं च** भुवि पतितं च **सर्वं दधति** सति **असौ अवनिः** भूमिः **अनभिनन्दिन्यपि** अप्रीयमाणाऽपि **अदः** चरणप्रक्षाळनजलधारणं **कथमपि** कथञ्चिदेव **चक्षमे** सेहे । **अन्यथा** तन्न क्षमते चेत् **अस्याः** भुवः **क्षमाख्या** क्षमेति नाम **कथमेव** कथं नु **स्यात्**? सर्वत्रातिक्षमायुक्तत्वाद्धि क्षमेत्युच्यते । कुत्रचित् क्षमाभावे क्षमाख्या न स्यादित्यर्थः ॥ ३२ ॥

(त.चं.) सर्वं क्षमते सहत इति क्षमा सर्वसहा । क्षमूष् सहने । अदः जननिकायेन उर्वीगतस्य सर्वस्य गुरुचरणसरोजद्वन्द्वनिर्णेजनाम्भसो धारणम् ॥

अविदितरसभेदं शीतळं लघ्वगन्धं
विमलममलपाणिः पाणिजैरप्रविष्टम् ।
वदनपवनभीत्या पार्श्वतो बिभ्रदग्रं
कमथ करकपूर्णं संयमीहाऽनिनाय ॥ ३३ ॥

(भा.प्र.) 'अगन्धमव्यक्तरसं शीतळं च तृषापहम् ।
'अच्छं लघु च पथ्यं च तोयं गुणवदुच्यते' इति च ॥

(प.दी.) अविदितेति । **अथ अमलपाणिः** निर्मलपाणिः **संयमी** कश्चिद्

यतिः **इह अग्र्यं कं** अग्र्योदकं **आनिनाय**। किं कुर्वन्? **वदनपवनभीत्या,** वदनपवनो मुखवायुः, श्वासवायुरिति यावत्, तद्भयात् **पार्श्वतः** मुखाभिमुख्यं परित्यज्य एकस्मिन् पार्श्वे **बिभ्रत्**। कथम्भूतम्? **अविदितरसभेदं** अज्ञातरसविशेषम्। **शीतळम्, लघु** गुरुत्वदोषरहितम्, **अगन्धम्, विमलं** स्वच्छम्, **पाणिजैः** नखैः **अप्रविष्टम्**। **करकपूर्णं** कमण्डलुपूर्णम्। 'कमण्डलौ च करकः' इत्यमरः। 'अगन्धमव्यक्तरसं शीतळं च तृषापहम्। अच्छं लघु च पथ्यं च तोयं गुणवदुच्यते' इत्युक्ततोयगुणयुक्तमित्यर्थः ॥ ३३ ॥

(त.चं.) 'कं पानीयं सलिलमुदकम्' इति च। क्रियतेऽस्मिन् जलमिति करकः कमण्डलुः ॥ ३३ ॥

विहसितबिसभङ्गश्रीप्रकर्षं सितिम्ना
जलजममृतपूरैः पूरयामास रम्यम्।
समयगुणविशेषालोचकैर्लाळनीयः
[1]स[सु]सुरभिसुमनोभिः स स्फुटं गौरपक्षः ॥ ३४ ॥

(भा.प्र.) सुसुरभिसुमनोभिः सुष्ठुसुगन्धिपुष्पैः।
'पूरयन्ति दिशः सोमं देवा गावः सरस्वती' इति च ॥

(प.दी.) **विहसितेति**। **गौरपक्षः** निर्मलपक्षः, प्रामाणिकत्वेन शोभन-सिद्धान्तः। अत एव **समयगुणविशेषालोचकैः** स्वप्रणीतशास्त्रस्य श्रुति-स्मृत्यनुगुणत्वादिगुणविशेषालोचकैः **सुमनोभिः** देवैः **स्फुटं लाळनीयः** आदरणीयः **सः** श्रीमध्वः **सितिम्ना** शुभ्रतया **विहसितबिसभङ्गश्रीप्रकर्षम्,** विहसितो निराकृतो बिसभङ्गस्य श्रीप्रकर्षो येन स तथोक्तस्तम्, **रम्यं**

१. 'सुसुरभि–' इत्येव पाठ इति भावप्रकाशिकायां स्फुटम्। परन्तु टीकासु सर्वत्रापि 'ससुरभि–' इत्येव पाठः। यत्राहो सन्निकृष्टा अपि बभ्रमुः का कथा विप्रकृष्टानाम्। न ज्ञायते यत् प्राचीनटीकाकाराणामप्यनुपलब्धा समग्रा भावप्रकाशिका, आहोस्वित् सम्प्रत्यधिगतो भावप्रकाशिकापाठ एवासमीचीन इति। उभयथाऽपि सम्भाव्यते।

जलजं पाञ्चजन्यं **ससुरभिसुमनोभिः** शोभनपरिमळसहितप्रसूनैः[१] सह **अमृतपूरैः** जलसमूहैः **पूरयामास**। 'पयः कीलालममृतम्' इत्यमरः। पाञ्चजन्यमग्र्योदकेनापूरयदित्यर्थः । **गौरपक्षः** शुक्लपक्षः । **समयगुणविशेषालोचकैः** शुक्लपक्षकृष्णपक्षादिकालगुणविशेषविचारपरैः ज्योतिःशास्त्राभिज्ञैरित्यर्थः, **लाळनीयः** शुभकर्मसु प्रशस्तत्वेनाऽदरणीयः **गौरपक्षः** शुक्लपक्षः शुक्लपक्षाख्यः कालविशेषः **सितिम्ना विहसितबिसभङ्गश्रीप्रकर्षम्,** अत एव **रम्यं जलजं** चन्द्रं **ससुरभिसुमनोभिः** सुरभिदेव्या सहितैर्देवैः कर्तृभिः **अमृतपूरैः** अमृतात्मककलासमूहैः करणैर्यथा पूरयेत् तद्वदिति ध्वनितार्थः । तथाहि- सुरभ्यादयो देवाः कृष्णपक्षप्रतिपदमारभ्य चन्द्रस्य प्रत्यहमेकैकां कलां दर्शावधि स्वीकृत्य पुनः शुक्लपक्षप्रतिपदमारभ्य यथाक्रमं प्रत्यर्पणेन चन्द्रममृतकलाभिः पूर्णिमावधि पूरयन्ति। तथाचोक्तम्– 'पूरयन्ति दिशः सोमं देवा गावः सरस्वती' इति ॥ ३४ ॥

(त.चं.) तत्ववादाख्यशुद्धपक्षो मध्वः जलजं शङ्खमभिषेकार्थममृतपूरैः जलपूरैः पूरयामास। 'जलजं कमले शङ्खे' इति, 'अमृतं यज्ञशेषे स्यात् पीयूषे सलिले घृते' इति च । बिसभङ्गो मृणाळच्छेदः । नळिनादुद्धृतं बिसम् । समुद्रमथन उत्पन्न इति चन्द्रोऽपि जलजः । तममृतमयैः किरणैः सुमनसो देवाः पूरयन्ति । सुसुरभिसुमनोभिः । सु शोभना कामितार्थदा सुरभिः सुरधेनुः । तया च सुमनोभिः देवैश्च पूरयामास चन्द्रम् । तथाहि गारुडे- 'पूरयन्ति दिशः सोमं देवा गावः सरस्वती' इति । भागवततात्पर्ये चोद्धृतमिदम् । सुमनोभिः लालनीयो मध्वः सुसुरभिभिः सुष्ठुसुगन्धोपेतैः सुमनोभिः पुष्पैः सहामृतपूरैः पूरयामास शङ्खमिति। 'ससुरभिसुमनोभिः' इति पाठे तु स्वरसोऽर्थः । सुरभ्या कामधेन्वा सहितैर्देवैश्चन्द्रं पूरयामास शुक्लपक्षः । सुगन्धिकुसुमसहितैरमृतपूरैर्मध्वः शङ्खम् ॥ ३४ ॥

१.इदं विवरणम् 'सुसुरभिसुमनोभिः' इति पाठमेव कटाक्षयतीव।

विमलमलयजाम्भोबिन्दुभिश्चर्चितार्चो
नवलळिततुळस्या पुष्पराज्याऽऽर्चिचत् सः ।
स्थलजजलजवल्लीवृक्षवीरुत्समस्त-
प्रसवविजयलक्ष्म्या मूर्तयेवेन्दिरेशम् ॥ ३५ ॥

(प.दी.) विमलेति । विमलमलयजाम्भोबिन्दुभिः निर्मलचन्दनजलाम्बुभिः **चर्चितार्चः** भूषितभगवत्प्रतिमः सः श्रीमध्वः **नवलळिततुळस्या**[1] नूतनकोमळतुळस्या पुष्पराज्या पुष्पसमूहेन **इन्दिरेशं आर्चिचत्** अर्चयामास । **मूर्तया** मूर्तिमत्या **स्थलजजलजवल्लीवृक्षवीरुत्समस्तप्रसवविजयलक्ष्म्येव** । तुळस्यभिमानिदेव्या रमया, या स्थलजजलजादिनानापुष्पविजयश्रीः, मूर्तिमत्या तयेव ॥ ३५ ॥

(त.चं.) मलयजं चन्दनम् । 'तुलया मलयाद्र्युत्थचन्दनेनेन्धनं खलः । समं समन्तात् कुरुते ग्रन्थौ गन्धं करोति कः' इति हि युक्तिमल्लिकायाम् । नवलळिततुळस्या सह पुष्पराज्याऽऽर्चिचत् । स्थलजाः कुन्दमन्दारनन्द्यावर्तादयः । जलजाः कुवलयकुशेशयाद्याः । स्थलजेषु पुनर्विशेषमाह– वल्लीवृक्षवीरुत्समस्तप्रसवविजयलक्ष्म्या । वल्लीवृक्षवीरुधां च ये समस्तप्रसवाः कुसुमानि तेषां मूर्तिमती विजयलक्ष्मीरिवेयं भगवत्पादेन भगवत्पदयोरर्पिता तुळसी च पुष्पराजी च । वल्लीजा मल्लिकादयः । वृक्षजाः पारिजातादयः । वीरुज्जा मालत्यादयः । वीरुत् 'पोदरु'[ಪೊದರು] इति भाषायाम् । 'पुष्पं प्रसवः कुसुमं प्रसूनकं सुमनसः समाख्याताः' इति च ॥ ३५ ॥

स ददधिकबोधः षोडशात्रोपचारान्
व्यरहयदगुणान् द्वात्रिंशदागःपुरोगान् ।

१.यद्यपि कोशेषु 'नवलसिततुळस्या' इति पठ्यते । अथापि '–कोमळतुळस्या' इति व्याख्यानुसारेण '–ललिततुळस्या' इत्येव साधुः पाठः । एवं प्रथमं '–तुळस्याः' इति विलिख्य पश्चात् 'तुळस्या' इति कृतम् ।

अगणितगुणमुच्चैस्तोषयन् शार्ङ्गपाणिं
षडपि परमभक्त्याऽनूपचारान् दिदेश ॥ ३६ ॥

(भा.प्र.)अर्घ्य-पाद्य-आचमनीय-मधुपर्क-पुनराचमनीय-स्नान-वस्त्र-भूषण-यज्ञोपवीत-आसन-गन्ध-पुष्प-धूप-दीप-नैवेद्य-नमस्काराः षोडशोपचाराः। अगुणा अन्यचित्तत्वादयः।

'भुक्त्वा पीत्वाऽर्चनं दन्तकाष्ठाभक्ष्युपसर्पणम्।
'मैथुनानन्तरं चार्चा शवं दृष्ट्वोपसर्पणम्॥

'अर्चान्तरे मूत्रविष्ठाविसर्गौ सास्रभाषणम्।
'नीलवस्त्रावृतस्यासी राजान्नात्तिरुपागतिः॥

'उपस्पृश्याविधानैस्तु शुश्रूषोरपि रुष्टता।
'अकर्मण्यप्रसूनार्चा रक्तकौपीनवस्त्रता॥

'नीलवस्त्रैर्हरेः कर्मविधिः स्पृष्टिस्तमस्यपि।
'कामानुसारिता कृष्णवस्त्रस्य परिधूननम्॥

'श्वस्पृष्टिः कोलमांसात्तिर्जालपादाशनं तथा।
'उपसर्पः पङ्किले च चितिं स्पृष्ट्वोपसर्पणम्॥

'पिण्याकात्तिश्चोपसर्तुः पोत्रिमांसोपपादनम्।
'उपयातुर्मद्यपानं कुसुम्भदलभक्षणम्॥

'परप्रावरणग्राहस्त्वञ्जनादेरकल्पनम्।
'पुष्पादाने धूपदानं हरिबोढुरुपानहौ॥

'अभेरीहन्तुरभ्याप्तिरजीर्णान्नस्य पूजनम्।
'द्वात्रिंशदपराधास्तु कथिता गुरुदोषदाः।
'वसुन्धरायै कोलेन विष्णुना प्रभविष्णुना' इति च।

'मुखवासश्च ताम्बूलं दर्पणं छत्रचामरे।
'पादुके चेति विज्ञेया उपचाराः परे बुधैः' इति षडनूपचाराः॥

(प.दी.) स इति । अत्र **षोडश उपचारान् ददत्** प्रयच्छन् **अगणितगुणं शार्ङ्गपाणिं उच्चैः तोषयन् सः अधिकबोधः द्वात्रिंशदागःपुरोगान्** द्वात्रिंशदपराधपूर्वकान् **अगुणान्** दोषान् **व्यरहयत्** वर्जयामास । **परमभक्त्या षट् अनूपचारानपि दिदेश** । तत्र षोडशोपचारा नाम– अर्घ्यं पाद्यमाचमनीयं मधुपर्कं पुनराचमनीयं स्नानं वासो विभूषणमुपवीतमासनं गन्धपुष्पे धूपदीपौ नैवेद्यं नमस्कारश्चेति । 'मुखवासश्च ताम्बूलं दर्पणं छत्रचामरे । पादुका चेति विज्ञेया उपचाराः परे बुधैः' एते षडनूपचाराः । द्वात्रिंशदपराधाश्च-' भुक्त्वा पीत्वाऽर्चनं दन्तकाष्ठाभक्ष्युपसर्पणम् । मैथुनानन्तरं चार्चा शवं दृष्ट्वोपसर्पणम् । अर्चान्तरे मूत्रविष्ठाविसर्गौ सास्रभाषणम् । नीलवस्त्रावृतस्यास्ती राजान्नात्तिरुपागतिः । उपस्पृश्याविधानैस्तु शुश्रूषोरपि रुष्टता । अकर्मण्यप्रसूनार्चा रक्तकौपीनवस्त्रता । नीलवस्त्रैर्हरेः कर्मविधिः स्पृष्टिस्तमस्यपि । कामानुसारिता कृष्णवस्त्रस्य परिधूननम् । श्वस्पृष्टिः कोलमांसात्तिर्जालपादाशनं तथा । उपसर्पः पङ्क्लिे च चितिं स्पृष्ट्वोपसर्पणम् । पिण्याकात्तिश्चोपसर्तुः पोत्रिमांसोपपादनम् । उपयातुर्मद्यपानं कुसुम्भदलभक्षणम् । परप्रावरणग्राहस्त्वञ्जनादेरकल्पनम् । पुष्पादाने धूपदानं हरिवोढुरुपानहौ । अभेरीहन्तुरभ्याप्तिरजीर्णान्नस्य पूजनम् । द्वात्रिंशदपराधास्तु कथिता गुरुदोषदाः । वसुन्धरायै कोलेन विष्णुना प्रभविष्णुना' इति ह्युक्ताः ॥ ३६ ॥

(त.चं.) अत्र पूजायाम् । व्यरहयत् । रह त्यागे । चुरादिः । द्वात्रिंशदागःपुरोगान् । 'आगोऽपराधे पापे च' इति च । द्वात्रिंशदागांसि च वराहपुराणोक्तानि भावप्रकाशिकायामुदाहृतानि । योगदीपिकायां च । प्राचीनटीकायां च । सर्वत्रापि पाठशुद्धिर्दुर्भरा । यथासम्भवं शुद्धः पाठोऽत्र समादृतः । तथाचेमे द्वात्रिंशदपराधाः–१.भुक्त्वा पीत्वाऽर्चनम् । २.दन्तकाष्ठाभक्षिणः अभक्षितदन्तकाष्ठस्य अकृतदन्तधावनस्य देवगृहं प्रत्युपसर्पणम् । ३.मैथुनानन्तरमकृत्वैव स्नानादि भगवदर्चा । ४.तथैव दृष्ट्वा शवमकृतशौचेन देवगृहं प्रत्युपसर्पणम् । 'शवं स्पृष्ट्वा' इति क्वचित् पाठः ।

५.अर्चनान्तराळे मूत्रविसर्गः । ६.तथा विष्ठाविसर्गः । ७.अर्चान्तरे सास्रं भाषणम् । 'साश्रुभाषणम्' इति क्वचित् । ८.नीलवस्त्रमिति कृष्णवस्त्रम् । कृष्णवस्त्रं प्रावृत्य पूजार्थमाप्तिः । ९. सदा राजगृहे तदन्नादनम् । १०.अविधा-नैरुपस्पर्शनमिति रजस्वलादिस्पर्शः । रजस्वलादीनुपस्पृश्य उपागतिः देव-मन्दिरोपगमनम् । अविहितेन विधानेनोपस्पृश्य आचम्य स्नात्वा मन्दिरोपगमनं वा । ११.भगवतः शुश्रूषायां निरतस्यैव मध्ये रुष्टता । १२. निषिद्धैः पुष्पैर्भगवदर्चनम् । १३.रक्तं कौपीनं वस्त्रं वा धृत्वाऽर्चनम् । १४.नीलमिति कृष्णमित्युक्तम् । क्वचित् 'कृष्णवस्त्रैः' इत्येव पाठः । हरेः पूजाकर्मणि जलशोधनविग्रहधावनादिषु कृष्णवस्त्राणामुपयोगः । १५. तमस्येव विना दीपज्वालनं हरेः प्रतीकादिस्पर्शः । १६.विधिमतिक्रम्य पूजाविधौ स्वाच्छन्द्यं नाम कामानुसारिता । धर्ममपहाय कामानुसारिता वा । १७.भगवतोऽग्रे सेवात्वेन व्यजनवत् चामरवच्च कृष्णवस्त्रस्य परि-धूननम् । १८.श्वानं स्पृष्ट्वा मन्दिरप्रवेशः । १९.सकृदपि प्रमादतोऽपि वराहमांसभक्षणम् । २०. जालपादस्य कुक्कुटादेर्भक्षणम् । 'जालपादासनम्' इति बहुशः पठ्यते । तदा तद्वदुपवेशनम् । २१.पङ्क्ति‍ले स्थल उपसर्पणम् । उपसृप्य चाधावित्वैव पादौ देवगृहोपसर्पणम् । २२. चितिं चितां स्पृष्ट्वा देवगृहोपसर्पणम् । २३.पिण्याकात्तिरिति तीव्रगन्धानां हिङ्ग्वादीनां भक्षणेनोपसरणम् । २४. वराहमांसान्नस्य भगवते समर्पणम् । २७.मद्यं पीत्वोपसदनम् । २६. कुसुम्भस्य, येन वस्त्ररागः, 'कुसुबे'[ಕುಸುಬೆ] इति भाषायाम्, दलानां भक्षणम् । २७. परप्रावरणं वसित्वा भगवदर्चनम् । २८. अञ्जनादेरकल्पनम् । 'अञ्जनं दर्पणं तथा । चामरे पादुके च्छत्रं दद्यात्' इत्युक्तानामञ्जनादीमनुपादानमनूपाचारे । २९. षोडशोपचारेषु द्वादशं पुष्पार्चनमकृत्वा, विनाऽलङ्कारमिति यावत्, धूपदीपादिदर्शनम् । ३०. उपानहौ धृत्वोत्सवादिषु हरेः प्रतीकस्य वहनम् । ३१. भेरीघण्टादीनहत्वा

मन्दिरमाप्यापि तूष्णीम्भावः । ३२.अजीर्णान्नस्य पूजनं चेति । षडपि अनूपचारान् मुख्यान् । अन्येऽपि भवन्ति अञ्जनव्यजननृत्तगीतादीनि ॥

तमरुणमणिवर्णं दिव्यदेहाख्यगेहे
स्नपितमतिपृथुश्रद्धानदीचित्तवार्भिः ।
ननु स यजति नित्यं हृत्सरोजासनस्थं
न तु सकृदिति पुष्पैरष्टभिर्भावपुष्पैः[1] ॥ ३७ ॥

(भा.प्र.) 'आराधयामि मणिसन्निभमात्मबिम्बं
'मायापुरे हृदयपङ्कजसन्निविष्टम् ।
'श्रद्धानदीविमलचित्तजलाभिषेकं
भावाष्टपुष्पविधिना हरिमर्चयामि'

इति भीमवचनमनूदितं तमित्यादिना । अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ शौचं तुष्टिः सर्वसमर्पणमित्यष्टभावपुष्पाणि ।

'अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ।
'सर्वभूतदयापुष्पं क्षमापुष्पं विशिष्यते ।
'ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं तु[2] सप्तमम् ।
'सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यति केशवः' इति च ॥

(प.दी.) तमिति । सः श्रीमध्वः **अरुणमणिवर्णं** पद्मरागसमप्रभम्, **दिव्यदेहाख्यगेहे** उत्तमशरीराख्यमन्दिरे **अतिपृथुश्रद्धानदीचित्तवार्भिः** अतिविस्तृतश्रद्धाख्यनदीगतचित्ताख्यजलैः **स्नपितं** अभिषिक्तम्, **हृत्सरोजासनस्थं** हृदयकमळाख्यविष्टरोपविष्टम्, **तं** भगवन्तं **अष्टभिर्भावपुष्पैः नित्यं** सर्वदा **यजति ननु** । इति 'विमलमलयजाम्भोबिन्दुभिः–' इत्याद्युक्तप्रकारेण **पुष्पैः** नवलळिततुळस्यादिबाह्यपुष्पैः **सकृत्** एकदा **नतु** । अयं भावः– अष्टभिर्भावपुष्पैर्भगवन्तं सर्वदा यजत्येव । नतु बाह्यपुष्पैः प्रत्यहं सकृदेव

१.'पुष्टैरष्टभिर्भावपुष्पैः' इति पाठान्तरम् । २.'ध्यानपुष्पं च' इति योगदीपिकायाम् ।

यजतीति। 'तमरुणमणिवर्णम्–' इति च –'आराधयामि मणिसन्निभमात्मबिम्बं मायापुरे हृदयपङ्कजसन्निविष्टम्[१] । श्रद्धानदीविमलचित्तजलाभिषेकं भावाष्टपुष्पविधिना हरिमर्चयामि' इति भीमवचनमनूदितमिति ज्ञातव्यम् । अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ शौचं तुष्टिः सर्वसमर्पणमित्यष्टौ भावपुष्पाणि । 'अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः । सर्वभूतदया पुष्पं क्षमापुष्पं विशिष्यते । ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं तु सप्तमम् । सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यति केशवः' इत्येतानि वाऽष्टौ भावपुष्पाणि ॥

(त.चं.) आराधयामीति श्रीभीमसेनवचनम् । तस्यैव विवरणम्– तमरुणमणिवर्णम् । यजति । पूजयति । यज देवपूजायाम् । तदपि नतु सकृत् किन्तु सदा । नतु केवलं 'स्थलजजलज–' इत्यादिनोक्तपुष्पैः । किन्तु भावपुष्पैरष्टभिः । तथाहि योगदीपिकायां स्वयमेवाऽह–'आराधयामि मणिसन्निभमात्मबिम्बं मायापुरे हृदयपङ्कजसन्निविष्टम् । श्रद्धानदीविमलचित्तजलाभिषेकं भावाष्टपुष्पविधिना हरिमर्चयामि । इति वाक्योदितं पुष्पं विविच्योक्तं वचोऽन्तरे । अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः । सर्वभूतदयापुष्पं क्षमापुष्पं विशिष्यते । ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं च सप्तमम् । सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यति केशवः' इति । मायापुरे भगवन्महिम्ना निर्मिते शरीरे । 'पुरमेकादशद्वारमजस्यावक्रचेतसः' इति हि श्रुतिः । तदेवोक्तम्– दिव्यदेहाख्यगेहे ॥ ३७ ॥

कृतपरमसपर्यः सान्द्रसच्चन्दनाम्भः-
परिमलितभुजोरोमण्डलांसो मनीषी ।
स्मितरुचिरमुखेन्दुः स्निग्धकौशेयवासाः
स मुनिसुरनराणां चक्षुषामुत्सवोऽभूत् ॥ ३८ ॥

---

१. 'सरिजासनसन्निविष्टम्' इति क्वचित् पठ्यते ।

(प.दी.) कृतेति । **कृतपरमसपर्यः**, कृता परमस्य सपर्या पूजा येन स तथोक्तः । **सान्द्रसच्चन्दनाम्भःपरिमळितभुजोरोमण्डलांसः** । सान्द्रेण अविरळेन सता समीचीनेन चन्दनाम्भसा परिमळिताः परिमळयुक्ततया कृताः भुजौ च उरोमण्डलं च अंसौ च यस्य स तथोक्तः । **स्मितरुचिरमुखेन्दुः स्निग्धकौशेयवासाः मनीषी सः** श्रीमध्वाचार्यः **मुनिसुरनराणां चक्षुषामुत्सवोऽभूत्** ॥ ३८ ॥

(त.चं.) भुजाग्रमंसमंसो वा ॥ ३८ ॥

परमथ परमान्नं प्राप्तमेवाप्रयासं
प्रभुरिह बुभुजेऽसौ वेदवादप्रवीणः ।
अजितपरमभक्तः सन्ततं मन्यमानः
सकलजगदधीशः प्रीयतां शौरिरित्थम् ॥ ३९ ॥

(भा.प्र.) 'प्रायः सोऽयमनायासं पूज्यते परमेश्वरः ।
'प्रीयतामिति तद्भक्त्या सततं वेदशालिभिः ॥'
इति भगवता स्वयमेवाभिहितमनूदितं परमित्यादिना ॥

(प.दी.) परमिति । अथ श्रीहरिसपर्यानन्तरं **प्रभुः वेदवादप्रवीणः** वेदवादचतुरः **अजितपरमभक्तः** अजितस्य हरेर्मुख्यभक्तः **सकलजगदधीशः शौरिः** हरिः **प्रीयतामित्थं** प्रीयतामिति **सन्ततं मन्यमानः** स्मरन् **असौ** श्रीमध्वः **अप्रयासं** अनायासेन **एव प्राप्तं परं** उत्तमं **परमान्नं** पायसं **इह बुभुजे** ॥ ३९ ॥

(त.चं.) 'इत्थं अनेन पूजाप्रकारेण शौरिः प्रीयताम्' इति मन्यमानः । 'प्रीयतां शौरिः' इतीत्थं मन्यमानो वा । परमान्नम् । परमं परमाणां वाऽन्नम् । पयसि संस्कृतत्वात् । क्षीरान्नमित्येतत् । भगवदर्पणेन परम् ॥ ३९ ॥

सहचरपरिक्लृप्ते सूक्ष्मवस्त्रास्तृतेऽसा-
ववितनुरुहरूपौशीरवर्ये निषण्णः ।

अरमयदिह नानाहृद्यविद्याविलासैः
कविजनपरिवारं मण्डयन् मण्डपाग्र्यम् ॥ ४० ॥

(प.दी) **सहचरेति** । **सहचरपरिक्लृप्ते** सहचरेण रचिते **सूक्ष्मवस्त्रास्तृते** सूक्ष्मेण वस्त्रेणाऽस्तृते **अवितनुरुहरूपौशीरवर्ये** अवितनुरुहरूपे कम्बळात्मके औशीरवर्ये आसनश्रेष्ठे **निषण्णः** । 'औशीरं शयनासने' इत्यमरः । [१]**मण्डपाग्र्यं मण्डयन्** स्वोपवेशेनालङ्कुर्वन् **असौ** श्रीमध्वः इह मण्डपे **कविजनपरिवारं** विद्वज्जनाख्यं परिवारं **नानाहृद्यविद्याविलासैः** नानाविधमनोहरविद्यानां विलासैः **अरमयत्** ॥ ४० ॥

(त.चं.) अवितनुरुहरूपमाविकं कम्बलम् । उशीरस्येदमौशीरम् । उशीरं लामज्जकम् । 'बाळ'[ಬಾಳ] इति, 'लामश्च'[ಲಾಮಂಚ] इति च भाषायाम् । औशीरमिति शयनासनयोः समुदितयोः सञ्ज्ञेति क्षीरस्वामी । पृथगेवार्थद्वयमित्यन्ये । मण्डपाग्र्यम् । मडि भूषायाम् । मण्डनं मण्डः । मन्यते जनैरिति वा मण्डः । 'ञमन्ताड् डः'[५.७] इति हि दशपादिका । मण्डं पाति । मण्टमित्यर्वाचीनाः । मटि दाहे ईर्ष्यायां च ॥ ४० ॥

अवसरमधिगम्य भ्रूविजृम्भादभीष्टो
मुखसततगलक्षीभूतपाणिप्रवाळः ।
स्मितनयनविकासैस्तस्य विज्ञातभावः
श्रवसि किमपि कार्यं मन्त्रयामास मङ्क्षु ॥ ४१ ॥

(प.दी.) **अवसरमिति** । **अभीष्टः** श्रीमध्वस्य प्रियः कश्चित् **भ्रूविजृम्भात्** श्रीमध्वाचार्यभ्रूविलासात् **अवसरं अधिगम्य** ज्ञात्वा । उपांशु किञ्चिद् विवक्षुरवसरं प्रतीक्षमाणः सन् कश्चित् श्रीमध्वभ्रूविलाससञ्ज्ञया ज्ञातावसर

---

१. यद्यपि हस्तलिखितपुस्तकेषु 'मण्टपाग्र्यम्' , 'इह मण्टपे' इत्यादि पठ्यते । मण्डपमित्येव प्रतनं रूपम् । निर्वचनसङ्गतं च । ततस्तदेवात्राऽदृतम् ।

इत्यर्थः । **स्मितनयनविकासैः** स्मितेन नयनविकासैश्च **विज्ञातभावः** विज्ञाताभिप्रायः **तस्य** श्रीमध्वाचार्यस्य **श्रवसि** श्रोत्रे **किमिपि कार्यं मङ्क्षु** द्राक् **मन्त्रयामास** । कथम्भूतः? **मुखसततगलक्षीभूतपाणिप्रवाळः** । मुखसततगस्य मुखपवनस्य लक्षीभूतपाणिप्रवाळः अपिधानभूतपाणिकिसलयः ॥

(त.चं.) मुखसततगलक्षीभूतपाणिप्रवाळः । स्वमुखवायुर्महान्तमाचार्यं न स्पृशेदिति ओष्ठापिधानेन पाणिना गुरुमुपतिष्ठते,॥ ४१ ॥

प्रणतिपरमकृत्याः सन्मतेर्ये जनौघा
विबभुरनतिदूरे संहतास्तानतीत्य ।
अहमहमिकयाऽऽशु प्राप्य पार्श्वं प्रणेमु-
र्बहव इह गृहस्थाः पूर्वसेवां विधातुम् ॥ ४२ ॥

(प.दी.) **प्रणतीति** । इह अस्यां सदसि **बहवो गृहस्थाः पूर्वसेवां** पूर्वक्षणं **विधातुं अहमहमिकया** अहमादौ पूर्वसेवां कुर्यामहमादौ पूर्वसेवां कुर्यामिति बुद्ध्या **आशु पार्श्वं प्राप्य प्रणेमुः** । किं कृत्वा? **प्रणतिपरमकृत्याः** श्रीमध्वनमस्काराख्योत्तमव्यापाराः **ये जनौघाः सन्मतेः** श्रीपूर्णप्रज्ञाचार्यस्य **अनतिदूरे** समीपे **संहताः** सन्तः **विबभुः तानतीत्य** तेभ्योऽप्यतिसमीपं गत्वेति भावः ॥ ४२ ॥

(त.चं.) संहताः सङ्गताः ॥ ४२ ॥

विविधजनपदस्थाः प्राक् श्रुतेभ्यो गुणेभ्यः
शतगुणगुणमेनं विस्मिता वीक्षमाणाः ।
मुकुळितकरपद्मा आस्यतामित्यवाप्ताः
प्रचुरतरहृदा सम्भावयाञ्चक्रिरेऽन्ये ॥ ४३ ॥

(प.दी.) **विविधेति** । **अवाप्ताः** दिदृक्षयाऽऽगताः **विविधजनपदस्थाः अन्ये**

जनाः **प्राक्** दर्शनात् पूर्वं **श्रुतेभ्यो गुणेभ्यः शतगुणगुणं** शतगुणाधिकगुणं **एनं** श्रीमध्वं **वीक्षमाणाः** । अत एव **विस्मिताः मुकुलितकरपद्माः** सन्तः **प्रचुरतरहृदा** श्रीपूर्णप्रज्ञाचार्येण **आस्यतामिति सम्भावयाञ्चक्रिरे** ॥ ४३ ॥

(त.चं.) विस्मिताः सन्तो वीक्षमाणाः । वीक्षमाणाः पुनर्विस्मिताः ॥

अलमलमनुवादेनानुवाच्येत पश्चात्
ननु गुरव इदानीमुद्यता हि प्रवक्तुम् ।
न मननमधुना द्रागाव्रजेत्याह्वयत् तान्
श्रुतपरिचयसक्तान् श्रावकान् श्रावकाग्र्यः ॥ ४४ ॥

(प.दी.) अलमिति । **अनुवादेन** श्रुतग्रन्थप्रमेयानुवादेन **अलमलम्** । सम्भ्रमे द्विरुक्तिः । **पश्चादनुवाच्येत** अनुवचनमपि पश्चात् क्रियताम् । **मननं** चिन्तनमपि **अधुना** इदानीं **न** । कुतः? **गुरवः इदानीं प्रवक्तुं** व्याख्यातुं **ननु उद्यताः हि** यस्मात् तस्मात् **द्राक्** आशु **आव्रज इति** एवं वदन् **श्रावकाग्र्यः** कश्चित् श्रोतृप्रधानः **श्रुतपरिचयसक्तान्** श्रुतानुवादादिरूपेण श्रुतग्रन्था-वर्तननिरतान् **तान् श्रावकान्** श्रोतॄन् **आह्वयत्** । 'आव्रज' इत्येतत् पदं प्रत्येकमुद्दिश्य । नतु सर्वान् प्रति । तथात्वे 'आव्रजत' इति स्यात् ॥

(त.चं.) आव्रजेति प्रत्येकं वाचंवाचं तानाह्वयत् ॥ ४४ ॥

अधिकधिषणमेनं व्याख्यया शोभमानं
हरिमिव कविवर्यं सत्यवत्यास्तनूजम् ।
सततमनिमिषं सन्दृश्य सानन्दचित्ताः
समयमपि गतं संविद्रते न स्म लोकाः ॥ ४५ ॥

(भा.प्र.) संविद्रते । 'वेत्तेर्विभाषा' इति रुट् ॥

(प.दी.) अधिकेति । **लोकाः** जनाः **व्याख्यया शोभमानं कविवर्यं** कवि-श्रेष्ठं **सत्यवत्यास्तनूजं हरिमिव एनं अधिकधिषणं** पूर्णप्रज्ञाचार्यं **सततं**

अनिमिषं निमेषरहितं यथा भवति तथा **सन्दृश्य** दृष्ट्वा **सानन्दचित्ताः** सन्तः **गतं** अतीतं **समयं** कालं **अपि न संविद्रते स्म** न व्यजानन् । स्मातीते । संविद्रत इति 'समो गम्यृच्छिपृच्छिस्वरत्यर्तिश्रुविदिभ्यः' इत्यात्मनेपदम् । 'वेत्तेर्विभाषा' इति दस्य[१] रुडागमः ॥ ४५ ॥

(त.चं.) संविद्रते संविदते विदन्ति जानन्तीत्यर्थः । 'समो गमि-ऋच्छि-प्रच्छि-स्वरति-अर्ति-श्रु-विदिभ्यः'[१.३.२९]। सम्पूर्वेभ्य एभ्यो धातुभ्यो आत्मनेपदं भवति। सङ्गच्छते। समृच्छते। सम्पृच्छते। संस्वरते। समृच्छते । संश्रुणुते । संवित्ते । एवं स्थिते– 'वेत्तेर्विभाषा'[७.१.७] वेत्तेरङ्गादुत्तरस्य झादेशस्यातो विभाषा रुडागमो भवति। संविदते संविद्रते। संविदतां संविद्रताम्। समविदत समविद्रत। केचित्तु भाष्यानुसारेण 'समो गम्यृच्छिभ्याम्' इतीयन्तमेव सूत्रपाठं मन्यन्ते। ततश्च 'विदिप्रच्छिस्वरतीनामुपसङ्ख्यानम्' इति वार्तिकेन सङ्गमयन्ति । नन्वत्राऽत्मनेपदं अकर्मकस्यैव विधीयते । 'अकर्मकाच्च'[१.३.२६] इति पूर्वसूत्रात्। अत एव 'हितान्न यः संशृणुते स किम्प्रभुः' इति भारविः । नैष दोषः । सकर्मकादपि कवयः प्रयुञ्जते । ननु भारविरेव प्रयुङ्क्ते– 'आजघ्ने विषमविलोचनस्य वक्षः' इति। समयमपि गतं सन्दृश्य न स्म संविद्रते इति वाऽन्वीयतां वैयाकरणम्मन्यानां मनः-सन्तोषाय ॥ ४५ ॥

उदयमित इवास्तं यंश्च भानुर्बभासे
स्फुटमकलुषरूपो दर्शनीयोऽनुरागी ।
शुचि हरिपदमापत्सम्पदोराश्रितानां
न हि भवति विशेषः स्वप्रकाशोन्नतानाम् ॥ ४६ ॥

(प.दी.) उदयमिति। भानुः सूर्यः **अस्तं यन्** गच्छन् च **उदयं इत इव स्फुटं बभासे** शुशुभे। कथम्भूतः? **अकलुषरूपः** प्रसन्नस्वरूपः, **दर्शनीयः** सुखेन

१. 'डस्य' इति क्वचित्। स्फुटं प्रमादः ।

द्रष्टुं शक्यः, **अनुरागी** सन्ध्याकालानुकूलरागयुक्तः। यथा कश्चित् प्रसन्नरूपो दर्शनीयः सुन्दरः **अनुरागी** स्वकीयेषु स्नेहयुक्तः सन् पुरुषः **अस्तं** विपदं **यंश्च** सन् **उदयं** सम्पदं **इत इव** शोभते। न तत्र सङ्कोचविकासौ दर्शयति तथेत्यभिप्रायः। तत् तथाहि– **शुचि** निर्मलं **हरिपदमाश्रितानां स्वप्रकाशोन्नतानां** स्वरूपप्रकाशेनोत्कृष्टानां **आपत्सम्पदोः** आपत्काले सम्पत्काले च **विशेषः** सङ्कोचविकासलक्षणो विकारः **न भवति हि**। श्रीहरिचरणमाश्रितानां यथाऽऽपत्सम्पदोर्विशेषाभावस्तद्वद् विष्णुपदमाकाशमाश्रितस्य भानोरपीति भावः॥ ४६॥

(त.चं.) उदयमितः। उदितः। सम्पदं गतश्च॥ ४६॥

मरतकमणिवर्णे भूतधात्रीपुरन्ध्र्या
लसति जलधिवासस्यर्धलीनः क्षणार्धम्।
अरुणतरणिबिम्बच्छद्मना पद्मरागः
कपिशकरकलापोल्लास्यभूत् प्रेक्षणीयः॥ ४७॥

(प.दी.) **मरतके**ति। **भूतधात्रीपुरन्ध्र्याः** पृथिव्याख्ययोषितः **मरतकमणिवर्णे लसति** शोभमाने **जलधिवाससि** समुद्राख्यवसने **क्षणार्धं** क्षणार्धपर्यन्तं **अर्धलीनः** अर्धमग्नः **अरुणतरणिबिम्बच्छद्मना** लोहितसूर्यमण्डलव्याजेन **कपिशकरकलापोल्लासी** कपिशकरकलापैः रक्तरश्मिसमूहैः उल्लासी भ्राजिष्णुः **पद्मरागः प्रेक्षणीयः** दर्शनीयः **अभूत्**। कस्याश्चिद् योषितो नितम्बबिम्बलग्ननीलवस्त्रेऽर्धनिमग्नः पद्मरागो यथा दर्शनीयो भवति एवं पृथिव्याख्ययोषितः समुद्राख्यनीलवस्त्रेऽर्धनिमग्नः लोहितसूर्यमण्डलाख्यपद्मरागः प्रेक्षणीयोऽभूदिति भावः॥ ४७॥

(त.चं.) मरतकमणिवर्णे। 'अश्मगर्भं मरतकं हरिन्मणिरिति स्मृतम्। शोणाश्मा पद्मरागः स्यात्' इति च। मरतकमित्येव साधु पदमित्युक्तम्।

कपिशकरकलापोल्लासी । 'श्यावं तु कपिशं स्मृतम्' इति ।'नसुगेम्पु' [ನಸುಗೆಂಪು] इति भाषायम् ॥ ४७ ॥

अवनिवनवनध्रुग्वायुखाहम्ममहत्सु
प्रकृतिगुणसमेताव्याकृताकाश एकम् ।
ततमतनुमनाः सोऽचिन्तयत् सत्समाधा-
वसुरसुरनरेभ्यः सद्गुणं नाथमन्यम् ॥ ४८ ॥

(प.दी.) अवनीति । **अतनुमनाः सः** श्रीपूर्णप्रज्ञाचार्यः **सत्समाधौ** शोभनसमाधौ, समाधिसमय इत्यर्थः, **अवनिवनवनध्रुग्वायुखाहम्ममहत्सु,** अवनिः भूमिः, वनं जलम्, 'जीवनं भुवनं वनम्' इत्यमरः, वनध्रुग् वह्निः, वायुश्च, खमाकाशः, अहमहङ्कारतत्वम्, महत् महत्तत्वम्, इत्येतेषु च, **प्रकृतिगुणसमेताव्याकृताकाशे** च, प्रकृतिगुणाः सत्वरजस्तमांसि, तैः समेतेऽव्याकृताकाशे च, **ततं** व्याप्तं **एकं** प्रधानम्, स्थानभेदाद् भेदरहितं वा, **असुरसुरनरेभ्यः** असुरादिनानाजीवराशिभ्यः **अन्यं** भिन्नम्, **सद्गुणं** निर्दोषज्ञानानन्दाद्यनन्तगुणम्, **नाथं** सर्वस्वामिनम्, एवम्भूतं भगवन्तं **अचिन्तयत्** दध्यौ ॥ ४८ ॥

(त.चं.) वनध्रुक्, वनमरण्यं वनेभ्यो वा द्रुह्यतीति । असुरसुरनरेभ्योऽन्यम् । असुरसुरनराणां नाथम् । विशेषतः स्वस्य ॥ ४८ ॥

व्यदधत परिदृष्टज्योतिषः साधु सान्ध्यं
नियममवनिदेवा ज्योतिषोऽप्याऽवलोकात् ।
विहितमनुसरन्तो धर्मशास्त्रप्रवीणाः
सवितरि सवितारं चिन्तयन्तस्त्रिलोक्याः ॥ ४९ ॥

(भा.प्र.) आ ज्योतिषो दर्शनात् ।

'पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमाऽर्कदर्शनात्।
'उत्तरां तु समासीत सम्यगृक्षविभावनात्' इति विहितम्॥

(प.दी.) [1]व्यदधतेति । **परिदृष्टज्योतिषः** दृष्टसूर्यकिरणाः **अवनिदेवाः** ब्राह्मणाः । **ज्योतिषः** जातावेकवचनम् । ज्योतिषामिति यावत् । **अवलोकात्** दर्शनात् **आ** । नक्षत्रदर्शनपर्यन्तं **[अपि] सान्ध्यं** सन्ध्याकाले कर्तव्यं **नियमं साधु व्यदधत** चक्रुः । सूर्यास्तमयात् पूर्वमारभ्य नक्षत्रदर्शनपर्यन्तं सान्ध्यं कर्माकुर्वन्नित्यर्थः । **विहितं** स्मृत्यादिविहितं सदाचारं **अनुसरन्तः** अनुवर्तमानाः । 'पूर्वां सन्ध्यां जपंस्तिष्ठेत् सावित्रीमाऽर्कदर्शनात् । उत्तरां तु समासीत[2] सम्यगृक्षविभावनात्' इति हि स्मृतिः । पुनः कथम्भूताः? **धर्मशास्त्रप्रवीणाः** स्मृतिविचारचतुराः । **सवितरि** सूर्ये **त्रिलोक्याः सवितारं** स्रष्टारं हरिं **चिन्तयन्तः** ध्यायन्तः ॥ ४९ ॥

(त.चं.) ज्योतिषोऽपि आ अवलोकात् । 'पूर्वां सन्ध्यां सनक्षत्रामुत्तरां सदिवाकराम् । उत्तरामुपविश्यैव' इति च सदाचारस्मृतिः । पूर्वां सन्ध्यां सनक्षत्रां सदिवाकराम् । उत्तरां सन्ध्यां सदिवाकरां सनक्षत्राम् । परिदृष्टनक्षत्रज्योतिषः ज्योतिषोऽप्याऽवलोकात् आसूर्यदर्शनात् पूर्वम् । विहितमनुसरन्तस्तिष्ठन्तः । अथोत्तरां सायन्तनसूर्यज्योतिषः आ अवलोकात् यावत् परिदृष्टनक्षत्रज्योतिषः विहितमनुसरन्तः । उपविश्येत्येतत् । साधु सान्ध्यं व्यदधत । सवितरि त्रिलोक्याः सवितारं चिन्तयन्तः । 'अर्कमण्डलगं विष्णुं ध्यात्वैव त्रिपदीं जपेत्' इति च ॥ ४९ ॥

विविदुरतितरां ये देवताः षोडशोक्ता
हरहरिहयपूर्वान्त्याः कलाभेदतोऽस्य ।

---

१. ताळपत्रे 'व्यदधेति' इति पठ्यते । अक्षरलोपः सम्भाव्यते । विश्वपतितीर्थीयेऽपि तथा ।
२. 'समासीनः' इति पाठान्तरम् ।

सुहुतमतिसृजन्तोऽग्याहितास्तेऽग्निहोत्रं
व्यधुरुचितमपूर्वं येन गायत्रलोकः ॥ ५० ॥

(भा.प्र.) 'रौद्रं गविसद् वायव्यमुपावसृष्टमाश्विनं दुह्यमानं सौम्यं दुग्धं वारुणमधिश्रितं पौष्णं समुदयन्तं मारुतं विष्यन्दमानं वैश्वदेवं बिन्दुमन्मैत्रं शरो गृहीतं द्यावापृथिवीयमुद्वासितं सावित्रं प्रक्रान्तं वैष्णवं ह्रियमाणं बार्हस्पत्यमुपावसन्नमग्नेः पूर्वाऽऽहुतिः प्रजापतेरुत्तरैन्द्रं हुतम्' इति श्रुत्युक्ताः षोडशदेवताः। अतिसृजन्तः 'अग्नय इदम्' इत्यादिरूपेण। 'वाऽऽहिताग्न्यादिषु' इति परनिपातः। [1]'गायत्रं लोकमाप्नोति' इति श्रुतौ गायत्रीशब्दोदितस्य विष्णोर्लोको ज्ञानद्वारा भवतीति ॥

(प.दी.) विविदुरिति। ये **अग्न्याहिताः** आहिताग्नयः **अस्य** अग्निहोत्राख्यकर्मणः **कलाभेदतः** अवान्तरविभागाभिमानित्वेन **उक्ताः** 'रौद्रं गवि–' इत्यादि श्रुत्युक्ताः **हरहरिहयपूर्वान्त्याः** रुद्रपूर्वा हरिहयान्त्याः **षोडश देवताः अतितरां सम्यक् विविदुः ते अग्न्याहिताः** उचितं स्वेषामुचितं **अपूर्वं** सर्वेषामसाधारणं **अग्निहोत्रं व्यधुः**। किं कुर्वन्तः? **सुहुतमतिसृजन्तः**। अतिसर्जनं नाम 'अग्नय इदं न मम' इत्याद्युक्तिः, तत् कुर्वन्तः। अग्निहोत्रस्य फलमाह– **येनेति**। **येन** अग्निहोत्रेण **गायत्रलोकः**, 'गायत्रं लोकमाप्नोति' इति श्रुतौ गानत्राणकर्तृत्वेन [2]गायत्रशब्दवाच्यस्य हरेर्लोको भवति, तदग्निहोत्रं व्यधुरित्यन्वयः। अग्निहोत्रस्य भगवदर्पणबुद्ध्या कृतस्य ज्ञानद्वारा मोक्षहेतुत्वादिति भावः। अत्र 'आहिताग्नयः' इति वक्तव्ये 'अग्न्याहिताः' इति तु 'वाऽहिताग्न्यादिषु' इति सूत्राद् विपरीतसमासः। षोडश देवताश्च– 'रौद्रं गवि सद्, वायव्यमुपावसृष्टम्, आश्विनं दुह्यमानम्, सौम्यं दुग्धम्, वारुणमधिश्रितम्, पौष्णं समुदयन्तम्, मारुतं विष्यन्दमानम्, वैश्वदेवं बिन्दुमत्, मैत्रं शरो गृहीतम्, द्यावापृथिवीयमुद्वासितम्, सावित्रं प्रक्रान्तम्, वैष्णवं ह्रियमाणम्, बार्हस्पत्यमुपावसन्नम्, अग्नेः पूर्वाऽऽहुतिः, प्रजापतेरुत्तरा,

---

१. 'गायत्रीलोकमाप्नोति' इति च पाठः। २. 'गायत्रीशब्दवाच्यस्य' इति तु स्वरसम्।

ऐन्द्रं हुतम्' इति श्रुतावुक्ताः । अस्याम्नायमर्थः– गविसत् अग्निहोत्रे होम्यं क्षीरं दोहात् पूर्वं गवि सत् गवि वर्तमानं रौद्रम् । रुद्रो देवताऽस्येति रौद्रम् । तदेव पुनरुपावसृष्टं स्तनस्थं सद् वायव्यं वायुदैवत्यम् । दुह्यमानं सदाश्विनमश्विदैवत्यम् । दुग्धं निवृत्तदोहं तत् सौम्यं सोमदैवत्यम् । अधिश्रितमुष्णीकरणायाधिश्रयण्यां निहितं वारुणं वरुणदेवताकम् । समुदयन्तं पाकानन्तरं सम्यग् [१]गच्छमानं पौष्णम् । पूषाऽस्य देवतेति पौष्णम् । विष्यन्दमानं अतिकथनेन पात्रादपगळत् मारुतं मरुद्दैवत्यम् । बिन्दुमत् विष्यन्दसमये यदा बिन्दुयुक्तं भवति तदा वैश्वदेवम् । विश्वे देवा अस्य देवतेत्यर्थः । गृहीतं सम्बद्धं शरः क्षीरस्योपरिवर्तमानो मण्डः । तन्मैत्रं मित्रदैवत्यम् । उद्वासितं अधिश्रयण्या उद्वासितं द्यावापृथिवीयम् । द्यावापृथिवी तस्य देवतेत्यर्थः । प्रकान्तं होतुं प्रक्रान्तं सावित्रं सवितृदेवताकम् । ह्रियमाणं होतुमग्निसमीपं नीयमानं वैष्णवं विष्णुदैवत्यम् । उपावसन्नमग्नेः समीपं प्राप्तं बार्हस्पत्यं बृहस्पतिदैवत्यम् । पूर्वा आहुतिरग्नेः । प्रथमाहुतेरग्निर्देवतेत्यर्थः । प्रजापतेरुत्तरा । पूर्ववदर्थः । हुतमैन्द्रम् । हवनक्रियाया इन्द्रो देवतेत्यर्थः ॥ ५० ॥

(त.चं.) षोडश कलादेवताः । हरहरिहयपूर्वान्त्याः । हरपूर्वाः । इन्द्रान्त्याः । तथाह्यैतरेयब्राह्मणे– 'रौद्रं गविसत्' इत्यादि 'ऐन्द्रं हुतम्' इत्यन्तम् [२५.१]। 'उपावसृष्टं संसृष्टवत्सकं प्रस्नुतस्तनकम्' इति षड्गुरुशिष्यः । 'दुग्धं स्थालीगतम् । अधिश्रितमग्नावारोपितम् । समुदयन्तम् । पुस्त्वं छान्दसम् । समुद्गच्छत् । विष्यन्दमानम् । ऊर्ध्वीभवत्क्षीरकं तु मङ्गलं मारुतं हितम् । बिन्दुमत् । विश्वदेवगणप्राप्त्यै भवेदुद्गतबुद्बुदम् । शरसा शरेण गृहीतं मित्रदैवतम् । उद्वासितम् । उद्वासोऽवरोधः । प्रक्रान्तमुन्नीतम् । ह्रियमाणं प्राङ् नीयमानम् । उपसन्नमाहवनीयस्थानमासादितम्' इति च । शरो गृहीतमिति भिन्ने पदे इति वेदाङ्गतीर्थीयम् । एकं पदमिति षड्गुरुशिष्यः ।

१.कोशे तथैव पाठः । 'सम्यगुद्गच्छत्' इति स्वरसम् ।

'बार्हस्पत्यमुपसन्नम्' इति च तदभिमतः पाठः । 'अग्नये स्वाहा' इत्यादिना सुहुतम्, 'अग्नय इदं न मम' इति समन्त्रकमतिसृजन्तः । अग्न्याहिताः । आहिताग्नयः । 'वाऽऽहिताग्न्यादिषु' [२.२.३७] । आहिताग्न्यादिषु निष्ठान्तं पूर्वं वा प्रयोक्तव्यम् । अग्न्याहितः । आहिताग्निः । जातपुत्रः । पुत्रजातः । पीततैलः । तैलपीतः ॥ ५० ॥

विधुरयमकळङ्कः स्याद् यदि स्यादवश्यं
ननु निजसहजायाः सुन्दरास्येन्दुकल्पः ।
इति सुरललनाभिर्लाळितः खेचरीभिः
समधिकमधुरिम्णा पूर्णचन्द्रस्तदोदैत् ॥ ५१ ॥

(प.दी.) **विधुरिति** । **तदा पूर्णचन्द्र उदैत्** उदयमगात् । कथम्भूतः? **खेचरीभिः सुरललनाभिः** देवस्त्रीभिः **इति लाळितः** । कथम्? **अयं विधुः** चन्द्रः **यदि अकळङ्कः स्यात्** कळङ्करहितो यदि भवेत् तर्हि **समधिकमधुरिम्णा** अत्युद्रिक्तमाधुर्येण **निजसहजायाः** निजस्वसू रमायाः **सुन्दरास्येन्दुकल्पः** सुन्दरवदनसदृशः **अवश्यं स्यान्ननु** सर्वथा भवेद्धि इति लाळितः इत्यन्वयः । अयं भावः– यद्यप्ययं चन्द्रो निजसहजाया रमायाः सुन्दरवदनमाधुर्यसमानमाधुर्यवान् भवति । तथाऽपि न रमावदनसमानः । कुतः? समधिकमाधुर्यत्वेऽपि सकळङ्कत्वात् । तस्मादयं यद्यकळङ्कः स्यात् तर्हि निष्कळङ्करमावदनसमानो भवेत् । नचायं निष्कळङ्कः । एवं च सति सकळङ्कत्वान्न रमावदनसमानः । एतादृशमाधुर्यस्यान्यत्राभावान्नान्यसमानस्तस्मादसमान एवेति ॥ ५१ ॥

(त.चं.) निजसहजायाः । समुद्रमथने सहजातायाः रमायाः ॥ ५१ ॥

इनविरहमसह्यं प्राप्य पद्मैः सचक्रै-
श्चिरमिह परितप्तं पूर्वतप्तैः सुतुष्टम् ।

मृदुकुमुदचकोरैः पादसङ्गेन राज्ञः
कमपि सकलहृद्यं कल्पयेन्नैव दैवम् ॥ ५२ ॥

(प.दी.) इनेति । इह रात्रौ **सचक्रैः** चक्रवाकसहितैः **पद्मैः असह्यं इन-विरहं** सूर्यवियोगं **प्राप्य चिरं** रात्रिपर्यवसानपर्यन्तं **परितप्तम्** । **राज्ञः** चन्द्रस्य **पादसङ्गेन** किरणसम्बन्धेन **पूर्वतप्तैः** पूर्वं सूर्यकिरणतप्तैः **मृदुकुमुदचकोरैः** मृदुभिः कुमुदैश्चकोरपक्षिभिश्च **सुतुष्टं** सुष्ठु सन्तोषः प्राप्तः । तथाहि– **दैवं** विधाता **कमपि** पदार्थं **सकलहृद्यं** सकलमनोहरं **नैव कल्पयेत्** । नि-र्दोषोऽपि कश्चित् कस्यचिदप्रियो भवतीति चैकोऽपि सकलहृद्यो नास्ति हीति भावः[1] ॥ ५२ ॥

(त.चं.) इनः पतिः । इनः सूर्यः । इनो राजा । राज्ञः चन्द्रस्य पादसङ्गेन । राजा पतिः । राजा चन्द्रः । राजा भूपतिः । 'इनः पत्यौ नृपार्कयोः' इति, 'राजा प्रभौ च नृपतौ क्षत्रिये रजनीपतौ' इति च ॥ ५२ ॥

दलितेन्द्रनीलमणिनीलविभ्रमं
नवकुन्दकुड्मल[2]सितद्विजावलि ।
स्मितया नगोत्तमशिरस्सुजातया
वनमालया सुरभिताशयाऽन्वितम् ॥ ५३ ॥

(भा.प्र.) द्विजा दन्ताः[3] नक्षत्राणि च । नगा गिरयः, वृक्षाश्च ॥

१.मूलकोशे 'भवतीति चैककनाहीति भावः' इति पठ्यते । अक्षरस्खलनं स्फुटम् । विश्वपतितीर्थीये त्वेतावान् भागः परित्यक्त एव ।

२.'कुड्मळ–' इति लिखितकोशेषु पठ्यते ।

३.'द्विजाः स्त्रीदन्ताः' इति पाठः प्रचलितः । नहि द्विजा इति स्त्रीणां दन्ता एवोच्यन्ते । किन्तु पुरुषाणामपि । नाप्यत्रार्थतः सौष्ठवमपि । कथञ्चित् 'सितदन्ताः' इति स्यात् ।

मृदुगामिविमानसम्पदो रमयत् सुस्मितगोपसुन्दरीः ।
परितापविहीनमुज्ज्वलं सुततं सूक्ष्मतराम्बरं वरम् ॥ ५४ ॥

(**भा.प्र.**) मृदुगामिन्यो विमानसम्पद आसाम्, मृदुगामिन्यश्चैता विगतमानसम्पदश्चेति च। गोपाः स्वर्गपाः पशुपाश्च। ततं व्याप्तम्, वीणादिवाद्यं च॥

गोभिस्तमांस्यपनयन् गतिदं प्रजाना-
मर्थान्तरं स भगवान् प्रकटीचकार ।
आनन्दचिद्घणगणं परिपूर्णसंवित्
चन्द्रस्तु शब्दगुणमित्ययमेव भेदः ॥ ५५ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते चतुर्दशः सर्गः

—०—

(**भा.प्र.**) गतिदं मोक्षदम्, मार्गदं च। निशायां भागवतं व्याचक्षाणः श्रीमन्मध्वः कृष्णादिरूपं प्रकाशितवानिति भावः॥

इति श्रीनारायणपण्डिताचार्यविरचितायां स्वकृतश्रीमध्वविजयस्य
भावप्रकाशिकाख्यटीकायां चतुर्दशः सर्गः

—०—

(**प.दी.**) दलितेति । कुळकमेतच्छ्लोकत्रयम् । **भगवान्** षड्गुणसम्पन्नः **गोभिः** वचनैः **तमांसि** अज्ञानानि **अपनयन्** नाशयन् **सः परिपूर्णसंवित्** श्रीपूर्णप्रज्ञाचार्यः **अर्थान्तरं** श्रीकृष्णाख्यं वस्तु **प्रकटीचकार** । तच्छास्त्रव्याख्यया तत्स्वरूपं स्पष्टीचकार । चन्द्रोऽपि स्वोदयेन **अर्थान्तरं** आकाशाख्यं वस्तु **प्रकटीचकार** । तत्राप्ययं विशेषः–**परिपूर्णसंवित्** श्रीपूर्णप्रज्ञाचार्यः **आनन्दचिद्घणगणं** आनन्दचिदाद्यनन्तगुणं **अर्थान्तरं प्रकटीचकार**। **चन्द्रस्तु शब्दगुणं** शब्दैकगुणं **प्रकटीचकार इत्ययमेव भेदः**,

एतावानेव विशेष इत्यर्थः ।। ※ ।। कथम्भूतमर्थान्तरम्? **दलितेन्द्रनीलमणि-नीलविभ्रमं** विपाटितेन्द्रनीलविभ्रमवन्नीलविभ्रमम्। एवंविधं हि श्रीकृष्णाख्यं वस्तु श्रीमध्वाचार्येण प्रकटितम् । चन्द्रेणाप्येवं नीलविभ्रममाकाशाख्य-मर्थान्तरं प्रकटितम् । एवं सर्वाण्यपि विशेषणान्युभयसाधारणतया यो-ज्यानि । पुनः कथम्भूतम्? **नवकुन्दकुड्मल[१]सितद्विजावलि,** नूतनकुन्द-कुड्मल[१]वद् धवळदन्तावलियुक्तम् । नवकुन्दकुड्मल[१]धवळनक्षत्रयुक्त-मन्यत् । **स्मितया** विकसितया **नगोत्तमशिरःसुजातया** वृक्षोत्तमानामग्रात् सम्यग् जातया, **सुरभिताशया,** सुरभिता आशा दिशो यया सा तथोक्ता तया, **वनमालया** वैजयन्त्याख्यया वनमालया **अन्वितम्** । अन्यत्र तु **स्मितया** विकसितकुसुमयुक्तया **नगोत्तमशिरःसुजातया** पर्वतोत्तमाग्रे सुजातया **सुरभिताशया** स्वगतपुष्पगन्धेन परिमळितदिगन्तया **वनमालया** वनसमूहेन **अन्वितम्** इति ।। ※ ।। **मृदुगामिविमानसम्पदः ।** विगता नष्टा मानसम्पद् यासां ताः विमानसम्पदः । मृदुगामिन्यश्च ता विमानसम्पदश्च, ताः **सुस्मितगोपसुन्दरीः,** शोभनं स्मितं यासां ताः सुस्मिताः, गोपानां सुन्दर्यो गोपसुन्दर्यः, ताः **रमयत्** । नष्टलज्जा सुस्मितगोपाङ्गना रमयत् । आकाशमपि **मृदुगामिविमानसम्पदः,** आकाशे मृदुगामिनां विमानानां सम्पद् यासां ताः मृदुगामिविमानसम्पदः । **सुस्मितगोपसुन्दरीः** शोभनस्मित-युक्ता गोपसुन्दरीः स्वर्गपानां देवानामङ्गना रमयति हि । मृदुगामिवि-मानारूढाः सुस्मिता गोपाङ्गना आकाशे रमन्ते हि । **परितापविहीनं** स्वतन्त्रत्वात् क्लेशविहीनम् । आकाशं तु जडत्वात् **परितापविहीनम्** । **उज्ज्वलं** स्वच्छम्, निर्दोषमिति यावत् । अन्यदपि निर्मेघत्वात् **उज्ज्वलम्** । **सुततं** शोभनवीणादिवाद्ययुक्तम्, शोभनं ततं यस्येति विग्रहः । गोपाङ्गनाभिः सह वीणादिनानावाद्यैर्विहरदिति भावः । आकाशमपि **सुततं** सम्यग् व्याप्तम् । **सूक्ष्मतराम्बरम्,** सूक्ष्मतरमम्बरं वस्त्रं यस्य तत् सूक्ष्मतराम्बरम् ।

---

१. 'कुद्मळ–' इति लिखितकोशेषु पठ्यते ।

अन्यत्र सूक्ष्मतरं च तदम्बरं चेति विग्रहः । अम्बरमाकाशम् । तच्च बाह्येन्द्रियागोचरत्वात् सूक्ष्ममित्युच्यते । **वरं** उत्तमम् । **प्रजानां गतिदम्,** मोक्षादियोग्यानां मोक्षादिगतिप्रदम् । अन्यत्र **गतिदं** मार्गदमिति । **परिपूर्णसंवित्** एवंविधं श्रीकृष्णाख्यं वस्तु सच्छास्त्रव्याख्यानेन **प्रकटीचकार** । चन्द्रोऽपि स्वोदयेनैवाम्बराख्यं **अर्थान्तरं प्रकटीचकार** ॥ ५३-५५ ॥

वेदाङ्गतीर्थरचिते व्याख्याने गुणशालिनि ।
पदार्थदीपिकाह्वाने सर्गः पूर्णश्चतुर्दशः ॥ * ॥

[इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां चतुर्दशः सर्गः]

—०—

(त.चं.) दलित इन्द्रनीलमणिः । दलितः पाटितः । दल विशरणे ।'केत्तु, कुन्दणिसु' [ಕೆತ್ತು, ಕುಂದಣಿಸು] इति भाषायाम् । इन्द्रनीलमणिवत् नीलमिति विभ्रमं जनयत्यम्बररूपमर्थान्तरम् । कुन्दस्य 'मोल्ले मल्लिगे'[ಮೊಲ್ಲೆ ಮಲ್ಲಿಗೆ] इति भाषायाम् । कुड्मलः मुकुलः । 'मुगुळु'[ಮುಗುಳು] इति भाषायाम् । अत्र द्वे रूपे । कुट्मल इति केचित् । ते तु 'कुटि-कुषिभ्यां क्मलन्' इति सूत्रं पठन्ति । कुट कौटिल्ये । कुट्यते इति कुट्मलम् । अन्ये तु 'कुडि-कुषिभ्याम्' इति सूत्रं पठित्वा कुड्मलमिति शब्दरूपमिच्छन्ति । कुड बाल्ये । मेदिन्यां तु कुद्मल इति पठ्यते– 'कुद्मलो मुकुले पुंसि' इति । हस्तलिखितकोशेषु 'कुद्मळ' इति । निर्वचनं तु मृग्यम् । पृषोदरादिषु वा पठनीयम् । द्विजावलिः नक्षत्रपङ्क्तिः यत्र तदम्बररूपमर्थान्तरम् । द्विजावलिः दन्तपङ्क्तिः यत्र तत् कृष्णरूपमर्थान्तरम् । विवृमेतत् पुरा यन्नक्षत्राण्यपि द्विजपदगदितानीति । द्विजानां नक्षत्राणां राजा पतिरिति हि चन्द्रो द्विजराज इत्युच्यते । नगोत्तमशिरःसुजातया पर्वतोत्तमस्य शिरसि जातया वनमालया काननपङ्क्त्याऽन्वितमम्बराख्यमर्थान्तरम् । वृक्षोत्तमशिरःसुजातया वनमालाख्यया कण्ठमालयाऽन्वितं कृष्णाख्यमर्थान्तरम् । वनमालीति हि तं

स्तुवन्ति । 'आपादपद्मं या माला वनमालेति सा मता' इति 'वनमाली तु गोविन्दे' इति च । अतिजगती मञ्जुभाषिणी च्छन्द इत्युक्तम् ।। * ।। मृदुगामिविमानसम्पदः । मृदु अतीक्ष्णं यथा देहायासो न स्यात् तथा गच्छन्त्यो विमानाख्यसम्पद आसामिति तादृशीः गोपसुन्दरीः सुरसुन्दरीः रमयदम्बरम् । गौरिति स्वर्गः । तत्पाला गोपाः । श्लक्ष्णगतीर्विगतमानसम्पदः गलितगर्वा गोपललना रमयद् कृष्णाख्यमर्थान्तरम् । सूर्यातपजनितपरि-तापविहीनमम्बरम् । चन्द्रिकयोज्ज्वलं च । सुततं सर्वगतम् । सुततं शोभन-वीणादिवाद्येन गोपसुन्दरीः रमयत् कृष्णाख्यम् । सूक्ष्मतरमम्बरम् । सूक्ष्मतरपीताम्बरं च । सुन्दरीत्यपराभिधा वियोगिनी विषमच्छन्द इत्युक्तं सप्तमे । वृत्तनामगर्भं चेदं पद्यं '--गोपसुन्दरीः' इति ।। * ।। गोभिस्तत्ववाद-वचनैस्तमांस्यपनयन् मध्वचन्द्रः । किरणैस्तमांस्यपनयन् चन्द्रः । गतिदं सञ्चरणायावकाशप्रदमम्बरम् । तत्वज्ञानेन प्रकृष्टानां प्रजानां मोक्षगतिदं कृष्णाख्यं किमप्यपूर्वमर्थान्तरम् । वसन्ततिलका नाम चतुर्दशाक्षरा शकरी च्छन्द इत्युक्तम् ।। ५३-५५ ।।

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याख्यत् चतुर्दशं सर्गं सुधियां धीविशुद्धये ।।

इत्याचार्यगोविन्दस्य कृतिषु श्रीमध्वविजयटीकायां
तत्वचन्द्रिकायां चतुर्दशः सर्गः

[आदितः श्लोकाः-- ७५२+५५=८०७]

सविकासदृशां कृताञ्जलीनां जनतानां परमादरान्नतानाम् ।
वलयेन वृतः प्रियं मुरारेः प्रविवेशाऽयतनं प्रबर्हबोधः।। [१३. ३८]

पञ्चदशः सर्गः

[‘कुडिल्’ देवालये भगवत्पादेन स्वभाष्यप्रवचनम् । व्याख्यानवैखरी । व्याख्यानप्रमेयसङ्ग्रहः । त्रिविक्रमार्येण प्रतिवादः । पराजितस्य तस्य भगवत्पादेन शिष्यतया स्वीकारः । आचार्यकृतग्रन्थानां महिमातिशयः । अनुव्याख्यानप्रणयनार्थं त्रिविक्रमार्यकृता प्रार्थना । आचार्येणाऽनुव्याख्यां विरचय्य चतुर्भिः शिष्यैर्युगपल्लेखनम् । न्यायविवरणरचनम् । मध्वानुजस्य श्रीविष्णुतीर्थस्य पूर्वाश्रमकथा । अस्य सन्न्यासप्रदानम् । प्रणवोपदेशः । श्रीविष्णुतीर्थ इति नामकरणम् । तस्य तपोमहिमा । हरिश्चन्द्रगिरौ तपश्चरणम् । तच्छिष्यावनिरुद्धबादरायणतीर्थौ । कुमारगिरौ तपश्चर्या । पद्मनाभतीर्थमहिमा । हृषीकेशतीर्थादीनां महिमा । एतेषां शिष्यप्रशिष्यपरम्परा । गृहस्था भगवत्पादशिष्याः । कण्वतीर्थमठे भगवत्पादस्य चातुर्मास्यवासः ।]

भूयोबोधस्ततो भूयो व्याचख्यौ भाष्यमद्भुतम् ।
ग्रामे ग्रामीणसामान्ये वसंस्तत्रामरालये ॥ १ ॥

(भा.प्र.) अमरालयस्य 'कुडिल्' इत्यपभ्रष्टभाषा । ग्रामस्यापि ॥

(प.दी.) **भूयोबोध** इति । **ततः भूयोबोधः** श्रीपूर्णप्रज्ञाचार्यः **भूयः** पुनरपि **अद्भुतं भाष्यं** आत्मप्रणीतं श्रीमद्भाष्यं **व्याचख्यौ** । किं कुर्वन्? **तत्र ग्रामे** 'कुडेल्' इत्यपभ्रष्टनामके ग्रामे, **ग्रामीणसामान्ये** तद्ग्रामजनानां साधारणे **अमरालये** 'कुडेल्'नामके वसन् ॥ १ ॥

(त.चं.) भगवत्पादावतरणात् पूर्वमत्र प्रचलितानां सर्वसमयानामसारतां तत्ववादस्य वैदिकतां च प्रदर्शयन् सर्वदर्शनसङ्ग्रहोऽयं सर्गराजः समयपाद-सङ्क्षेपः । ग्रामे 'कुडिल्'[ಕುಡಿಲ್] नामके । उभयेषामपि 'पाडि-कुडिल्' [ಪಾಡಿ-ಕುಡಿಲ್] इति ग्रामद्वयगतानामपि जनानां सामान्ये 'कुडिल्' [ಕುಡಿಲ್] नामके देवालये । 'कूडु' [ಕೂಡು] इति कूटं समवाय उच्यते । 'इल्'[ಇಲ್] इत्यालयः । यत्राऽलये उभयग्रामजनाः समवयन्ति सोऽमरालयः 'कूडिल्'[ಕೂಡಿಲ್] इत्युच्यते । वर्णव्यत्ययेन 'कुडिल्'[ಕುಡಿಲ್] इति ह्रस्वः । परस्तात् 'कुडेल्'[ಕುಡೇಲ್]इति 'कूडेल्'[ಕೂಡೇಲ್] इति च रूपान्तरमाप्य सम्प्रत्ययममरालयः 'कूड्लुदेवस्थान'[ಕೂಡ್ಲುದೇವಸ್ಥಾನ] इति व्यवह्रियते । यत्रामरालयः सोऽपि ग्रामः 'कुडिल्'[ಕುಡಿಲ್], 'कुडेल्' [ಕುಡೇಲ್], 'कूडेल्'[ಕೂಡೇಲ್] इति व्यवह्रियते स्म । कर्णाटकभाषायाम् 'कूडुमने'[ಕೂಡುಮನೆ] इति यथा । सर्गेऽस्मिन् आ १३९तमं पद्यं पथ्यावक्त्रं युग्मविपुला नामानुष्टुब्भेदः । लक्षणं तूक्तम् ॥ १ ॥

परपक्षरथारूढं खरतर्कमहायुधम् ।
त्रिविक्रमार्यं सोऽपश्यत् प्रतिवीरमिवाग्रतः ॥ २ ॥

(प.दी.) परपक्षेति । सः श्रीमध्वाचार्यः **परपक्षरथारूढम्**, स्वसिद्धान्तस्य प्रतिपक्षभूतसिद्धान्ताख्यरथमवलम्ब्य वर्तमानम्, **खरतर्कमहायुधं** तीक्ष्ण-तर्काख्यमहायुधम्, **त्रिविक्रमार्यं अग्रतोऽपश्यत्** । कमिव? **प्रतिवीरमिव** । स्वसिद्धान्तं समर्थ्य परपक्षं निराकृत्य व्याकुर्वन् स स्वपक्षप्रतिपक्षभूतं पक्ष-मवलम्ब्य वर्तमानमतितर्ककर्कशं त्रिविक्रमार्यमपश्यत् । यथा कश्चिद् योधो रथारूढं निशितनानायुधधरं प्रतिवीरमग्रतः पश्येत् तद्वदिति भावः ॥ २ ॥

(त.चं.) व्याख्यातुमारभमाणः सः ॥ २ ॥

तदा तदाननाम्भोजाद् वृत्तोपन्यासभारती ।
सेना सेनाग्रहा दिव्या शिबिरादिव निर्ययौ ॥ ३ ॥

(प.दी.) **तदे**ति । तदा त्रिविक्रमार्ये शृण्वति सति **वृत्ता** प्रवर्तमाना । 'आदि-कर्मणि क्तः कर्तरि च' इति कर्तरि क्तः । **दिव्या उपन्यासभारती** उपन्या-सात्मिका वाक् **तदाननाम्भोजात्** तन्मुखारविन्दात् **निर्ययौ** । **दिव्या सेना शिबिरादिव** । कथम्भूता? **सेनाग्रहा** इने स्वामिनि हरावाग्रहसहिता । सर्वजगत्सृष्ट्यादिकारणस्य हरेस्तत्स्वामित्वसमर्थनपरेत्यर्थः । सेनाऽपि **सेना-ग्रहा** इनाग्रहसहिता । इनस्य स्वनायकस्य जयादावाग्रहसहितेत्यर्थः ॥

(त.चं.) तदा वृत्ता प्रवृत्ता प्रकटा । सेनानिवेशः शिबिरम् । शिम्बन्ति विश्राम्यन्त्यत्रेति अनुस्वारलोपेन । 'शबन्त्यत्रेति शिबिरम् । शव गतौ' इति केचित् । 'शवतिर्गतिकर्मा कम्बोजेषु भाष्यते । विकार एनमार्या आहुः' इति यास्कपतञ्जली । दिव्या सङ्क्रीडमानैव जिगीषतीति ॥ ३ ॥

नात्यत्वरा नातिरया नस्खलन्ती निरन्तरा ।
अनानावयवेत्येव दवीयोभिः प्रतर्किता ॥ ४ ॥

(प.दी.) पुनः कथम्भूता? **नात्यत्वरा** अत्यर्थमत्वरा त्वरारहिता न भवति। **नातिरया**, रयो वेगः, अतिवेगवती च न भवति। अतिशनैर्वाऽतिद्रुतं वोच्यमाना न भवतीत्यर्थः। **नस्खलन्ती** शब्दतोऽर्थतश्च स्खलनरहिता। **निरन्तरा** विच्छेदरहिता। **दवीयोभिः** दूरवर्तिभिः **अनानावयवा इत्येव** स्वरवर्णपदादिरूपनानावयवरहितेत्येव **प्रतर्किता**। दवीयोभिरिति 'स्थूलदूरयुवह्रस्वक्षिप्रक्षुद्राणां[१] यणादि परं पूर्वस्य च गुणः' इति दूरशब्दादीयसुन् प्रत्ययः। तस्मिन् परतो दूरशब्दस्य रेफादेर्लोपः। ऊकारस्य गुणवादेशौ। शिबिरान्निर्गता सेना च **नात्यत्वरा नातिरया नस्खलन्ती निरन्तरा** च गच्छति। **दवीयोभिः** दूरस्थपुरुषैः दृश्यमानाऽपि **अनानावयवेत्येव** रथतुरगादिनानास्वपरिकरवत्यपि तद्रहितेत्येव **प्रतर्किता** च। दूरस्थपुरुषैः सेनाप्रवाहमात्रं हि दृश्यते नतु तद्विशेषोऽपीति भावः॥ ४ ॥

(त.चं.) नात्यत्वरा। 'उपांशु दष्टं त्वरितं निरस्तं विलम्बितं गद्गदितं प्रगीतम्। निपीडितं ग्रस्तपदाक्षरं च वदेन्न दीनं नतु सानुनास्यम्' इति शीक्षाशास्त्रम्। दवीयोभिः। ''स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्राणां यणादि परम्–' [६.४.१५६] इति हि पाणिनिः। परं यणादि लुप्यते। स्थूलः–स्थवीयान्, स्थविष्ठः। दूरः–दवीयान्, दविष्ठः। युवा–यवीयान्, यविष्ठः। ह्रस्वः–ह्रसीयान्, ह्रसिष्ठः। क्षिप्रः–क्षेपीयान्, क्षेपिष्ठः। क्षुद्रः–क्षोदीयान्, क्षोदिष्ठः। 'इष्ठ-इम-ईयस्सु'[१५४] इति पूर्वसूत्रे श्रवणात्– ह्रसिमा, क्षेपिमा, क्षोदिमा च॥ ४ ॥

सूत्रस्यन्दनवृन्दाढ्या दुर्वारश्रुतिवारणा।
सूपपत्तिमहापत्तिर्विचित्रस्मृतिसप्तिका ॥ ५ ॥

(प.दी.) पुनः कथम्भूतोपन्यासभारती? **सूत्रस्यन्दनवृन्दाढ्या** ब्रह्मसूत्रा-

१. 'दूरस्थूलयुवक्षिप्रक्षुद्राणाम्–' इति कोशे पठ्यते। स्फुटं लिपिकृतप्रमादः।

ख्यरथवती । **दुर्वारश्रुतिवारणा** निरवकाशत्वेन प्रबलत्वाद् दुर्वारश्रुत्याख्यगजयुक्ता । **सूपपत्तिमहापत्तिः** सुष्ठूपपत्त्याख्यपदातियुक्ता । **विचित्रस्मृतिसप्तिका** विवक्षितनानार्थसमर्थनपरस्मृत्याख्यतुरङ्गयुक्ता ॥ ५ ॥

(त.चं.) सूत्राण्येव स्यन्दनानि । तैरेव शास्त्रपद्यायां सञ्चार इति । श्रुतयो वेदा एव वारणाः । तैरेव ह्यादौ प्रतिपक्षः प्रतिवार्यते । विचित्रा नानावर्णा अद्भुतसामर्थ्याः सप्तयोऽश्वाः । वेदानामपूर्वानर्थविशेषान् प्रकाशयन्त्यः विचित्राः स्मृतयः ॥ ५ ॥

वर्धितोर्मिहरिप्रेष्ठा सुपयोधरसुस्वरा[१] ।
सवितानप्रकाशार्था सागरी श्रीरिवापरा ॥ ६ ॥

(भा.प्र.) स्वभक्तविषये खण्डितषडूर्मिकस्य हरेः प्रेष्ठा उपन्यासभारती, सागरजा लक्ष्मीश्च । सादिभिर्वर्धितोर्म्याख्यगतिविशेषवदश्वप्रेष्ठा सेना, सगरापत्यश्रीश्च । स्वोदयेन वर्धितकल्लोलचन्द्रप्रेष्ठा सागरसम्बन्धिनी कान्तिश्च । सुकुचा सुस्वरा रमा । सुजलधरवद् गम्भीरसुस्वरा अन्या । सविस्तरं प्रकाशाभिप्राया गीः । सविस्तारस्वरूपतेजोद्रव्यात्मिका रमा । सविस्तारप्रादुर्भावेन प्रयोजनं शत्रुभीषणं सेनायाः । सयज्ञप्रकाशनप्रयोजना सगरापत्यश्रीः । सविस्तारतेजोयुक्तरत्नाख्यार्थवती अन्या ॥

(प.दी.) पुनः कथम्भूतोपन्यासभारती? **वर्धितोर्मिहरिप्रेष्ठा** वर्धितषडूर्मिकस्य स्वभक्तानां खण्डितषडूर्मिकस्य हरेरतिप्रिया । **सुपयोधरसुस्वना** शोभनमेघस्वनवत् गम्भीरतया शोभमानस्वनयुक्ता । **सवितानप्रकाशार्था** सवितानं सविस्तरं यथा भवति तथा प्रकाशाभिप्राया । केव? **अपरा** अन्या **सागरी** सागरजा **श्रीरिव** रमेव । साऽपि **वर्धितोर्मिहरिप्रेष्ठा** । उक्त एवार्थः । **सुपयोधरसुस्वना** सुकुचा सुस्वना च । **सवितानप्रकाशार्था** विस्तारयुक्त-

---

१. भावप्रकाशिकानुसारेण 'सुपयोधरसुस्वरा' इत्येव पाठ इति प्रतीयते। '–सुस्वना' इति तु टीकासु ।

तेजोमयद्रव्यात्मिका । अत्रार्थशब्देन स्वरूपाख्यं द्रव्यम् । पुनः कथम्भूता? **अपरा** अन्या **सागरी** सगराख्यस्य राज्ञः सम्बन्धिनी **श्रीरिव** सेनाख्य-श्रीरिव । सगरस्य दण्डयात्रायां तत्सेनाख्यश्रीर्यथा शिबिरान्निर्गच्छेत् तथा निर्ययाविति सम्बन्धः । सा च **वर्धितोर्मिहरिप्रेष्ठा** सादिभिर्वर्धितोर्म्याख्य-गतिविशेषवदश्वस्य प्रेष्ठा । **सुपयोधरसुस्वना** सुजलधरवत् सुस्वरा । **सवितान-प्रकाशार्था** सवितानं सविस्तरं यथा भवति तथा प्रकाशेनार्थः प्रयोजनं शत्रुभीषणाख्यं यस्याः सा तथोक्ता । **अपरा सागरी** सगरापत्यसम्बन्धिनी **श्रीरिव** । सा च **वर्धितोर्मिहरिप्रेष्ठा** वर्धितोर्म्याख्यगतिविशेषवन्मेध्या-श्वस्य प्रेष्ठा । **सुपयोधरसुस्वना** । उक्तोऽर्थः । **सवितानप्रकाशार्था** । वितानं यज्ञः । तत्प्रकाशनाख्यप्रयोजनयुक्ता । **अपरा सागरी श्रीरिव** समुद्रसम्ब-न्धिनी कान्तिरिव । साऽपि **वर्धितोर्मिहरिप्रेष्ठा** स्वोदयेन वर्धिततरङ्गस्य हरेश्चन्द्रस्य प्रेष्ठा । **सुपयोधरसुस्वना** । उक्तोऽर्थः । **सवितानप्रकाशार्था** सविस्तारतेजोयुक्तरत्नाख्यपदार्थवती ॥ ६ ॥

(त.चं.) उपन्यासभारत्याः, सेनायाः, सागरजाया लक्ष्म्याः, समुद्र-शोभायाः, सगरपुत्राणां विजयश्रियश्चेति पञ्चानामपि समानि विशेष-णानि । 'शोकमोहौ जराव्याधी क्षुत्पिपासे षडूर्मयः' । 'जरामृत्यू' इत्येके । आद्यौ मानसौ । द्वितीयौ शारीरौ । अन्त्यावुभयात्मकौ । संसारशरधेः जन्म-मृत्युपारावारस्यैते षडूर्मयः वर्धिता नाशिता येन स वर्धितोर्मिः संसारहारी हरिर्नारायणः । वर्ध च्छेदने । स प्रेष्ठ उपन्यासभारत्याः । तस्य च प्रियतमा मध्वोपन्यासभारती । अथच सादिभिः वर्धिता वृद्धिं प्रापिता ऊर्मिः गतिविशेषः येषां ते हरयोऽश्वाः । तैः प्रेष्ठा सेना । 'पङ्क्तीकृतानामश्वानां नमनोन्नमना-कृतिः । अतिवेगसमायुक्ता गतिरूर्मिरुदाहृता' इति । सागरजाता लक्ष्मीरपि वर्धितषडूर्मिकस्य नारायणस्य प्रेष्ठा । नारायणश्च प्रेष्ठस्तस्याः । वर्धिततरङ्गेण हरिणा चन्द्रेण लोकानां प्रेष्ठा सागरी शोभा । चन्द्रस्य वा प्रेष्ठा । उत्पत्ति-स्थानत्वात् सागरस्य । वर्धितोर्मिः यो हरिर्मेध्याश्वः स प्रेष्ठः सगरसुतानां विजयश्रियश्चेति । 'यमानिलेन्द्रचन्द्रार्ककपिमण्डूकवाजिषु । शुककेशव-

सिंहांशुवर्णादिषु हरिं स्मरेत्' इत्युक्तम् । मेघगम्भीरस्वना मध्वभारती, सेना, सागरश्रीः, सगरपुत्रश्रीश्च । सुपयोधरा सुस्वना च रमा । सविस्तारं प्रकाशार्था प्रकटाशया मध्वभारती । सविस्तारं प्रकाशेन प्रादुर्भावेन अर्थः शत्रुभीषणाख्यो यस्याः सा सेना । विस्तृतप्रकाशोऽर्थस्तेजआख्योऽधिष्ठानमस्या इति सागरजा रमा । तथाहि सामसंहितायाम्–'सर्वोत्तमत्वात् सन्नामा हरिर्नारायणः प्रभुः । सोऽसृजत् प्रथमं देवीं तेजआख्यां श्रियं सतीम् । तेजःसंस्था च सा देवी प्राणोऽप्सु स्थित एव च' इत्यादि । विस्तृतप्रकाशोऽर्थो रत्नाख्यो यत्र सा सागरशोभा । वितानः यज्ञरूपः प्रकटोऽर्थः । तेन सहिता सगरपुत्रश्रीः । 'वितानो यज्ञ उल्लोचे विस्तारे पुंनपुंसकम्' इति च ॥ ६ ॥

पद्मेशपदपद्मश्रित् कृत्याङ्गं पद्मजन्मनः ।
लाळिता शिरसेशेन गङ्गेवाशेषपावनी ॥ ७ ॥

(प.दी.) पुनः कथम्भूता? **गङ्गेव अशेषपावनी** । तथाहि– इयमुपन्यासभारती **पद्मेशपदपद्मश्रित्** रमेशस्य पदपद्माश्रिता । गङ्गा च विष्णुपदमाश्रिता । **पद्मजन्मनः विरिञ्चस्य कृत्याङ्गं** व्यापाराङ्गभूता । ब्रह्मपदप्राप्त्यनन्तरं ब्रह्मव्यापारं कर्तुमङ्गभूतेत्यर्थः । एतेनैतच्छास्त्रव्याख्यानं ब्रह्मपदप्राप्तेरपि हेतुर्भवति तद्योग्यस्येत्युक्तं भवति । गङ्गा च ब्रह्मणः श्रीहरिचरणक्षाळनात्मकव्यापाराङ्गभूता । **ईशेन** रुद्रेण **शिरसा लाळिता,** भक्तिवशात् बद्धाञ्जलिना श्रुतेति भावः । गङ्गा च साक्षात् शिरसा धृता ॥ ७ ॥

(त.चं.) गङ्गेव पद्मेशपदपद्मश्रित् । हरिपादनखनिर्गता विरिञ्चकरकरकगता हरशिरःसङ्गता गङ्गेव विश्वं पावयति ॥ ७ ॥

नारायणोऽनन्तगुणो ब्रह्माख्यो वेदवेदितः ।
विश्वकर्तेति विश्वज्ञः श्रुत्या युक्त्याऽप्यसीषधत् ॥ ८ ॥

(प.दी.) किं तदुपन्यासप्रतिपाद्यमित्यपेक्षायामाह– **नारायण** इत्यादि । **विश्वज्ञः** श्रीपूर्णप्रज्ञाचार्यः, **नारायणोऽनन्तगुणः ब्रह्माख्यः** परिपूर्णत्वान्मुख्यतो ब्रह्मनामा **वेदवेदितः** सर्ववेदैर्मुख्यतः प्रतिपादितः, वेदैरेव वेदितः, नत्वनुमानादिनेति वा, **विश्वकर्ता इति श्रुत्या युक्त्याऽपि असीषधत्** साधयामास । तत्रानन्तगुणत्वं च– 'परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति', 'विष्णोर्नु कं वीर्याणि प्रवोचं यः पार्थिवानि विममे रजांसि', 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिभिरसीषधत् । ब्रह्माख्यत्वं च – 'सर्वेषु भूतेष्वेतमेव ब्रह्मेत्याचक्षते', 'एष पन्था एतत् कर्मैतद् ब्रह्म','एष उ एव ब्रह्मैष उ एव' इत्यादिभिः । वेदवेदितत्वं च– 'ता वा एताः सर्वा ऋचः सर्वे वेदाः सर्वे घोषा एकैव व्याहृतिः प्राण एव प्राण ऋच इत्येव विद्यात्', 'स एव सर्ववेदेड्यः' इत्यादिभिः । विश्वकर्तृत्वं च– 'यो नः पिता जनिता यो विधाता धामानि वेद भुवनानि विश्वा', 'न तं विदाथ य इमा जजान','आत्मा वा इदमेक एवाग्र आसीन्नान्यत् किञ्चिन मिषत् । स ईक्षत लोकान्नु सृजा इति । स इमान् लोकानसृजत' इत्यादिभिरसीषधत् ॥

(त.चं.) विश्वं नारायणं विश्वं सकलं च जानातीति विश्वज्ञः ॥ ८ ॥

प्रधानमपराधीनं कारणं परिणामि यत् ।
पयोवदिति चेत् साध्यवैकल्यं स्यान्निदर्शने ॥ ९ ॥

(भा.प्र.) 'नारायणः–' इत्यादिपद्योक्तस्यार्थस्य साधकः 'प्रधानम्–' इत्यादिप्रबन्धः, युक्त्येति पदस्य कृत्यरूपेण। 'प्रधानम्–' इत्यादिना साङ्ख्यानां मतमनूद्य दूष्यते। साध्यवैकल्यं पयसोऽपि विष्णवधीनत्वात्। 'न ऋते त्वत्–' इत्यादेः ॥

(प.दी.) अथ 'प्रधानमपराधीनम्–' इत्यारभ्य 'विष्णुर्मोक्षस्य दातेति विश्वं भवति शोभनम्'(६३) इत्येतदन्तः प्रबन्धो 'नारायणोऽनन्तगुणः ब्रह्माख्यः वेदवेदितः विश्वकर्ता' इत्येतस्यार्थस्य प्रतिपादकः। यदुक्तं नारायणस्यानन्तगुणत्वादिकं श्रुत्या युक्त्याऽप्यसीषधदिति तत्र नारायणस्या-

खिलकर्तृत्वयुक्त्यादेः प्रत्यर्थिभूतं निरीश्वरसाङ्ख्यमतमनूद्य दूषयति– **प्रधानमि**त्यादिना । **प्रधानं** प्रधानाख्यं तत्वं **अपराधीनं कारणं** स्वतन्त्रकारणम् । **यत्** यस्मात् **परिणामि** विकारि । तस्माद् विकारित्वात् प्रधानं स्वतन्त्रकारणम् । किमिव? **पयोवत्** क्षीरवत् । अत्रायमनुमानप्रयोगप्रकारः– प्रधानं स्वतन्त्रकारणं परिणामित्वात् । यत् परिणामि तत् स्वतन्त्रकारणम्, यथा क्षीरम् । परिणामि चेदं प्रधानम् । तस्मात् स्वतन्त्रकारणमिति । अत्र प्रधानं पक्षः । स्वतन्त्रकारणत्वं साध्यम् । परिणामित्वं हेतुः । कारणत्वमात्रसाधने कुलालादौ सिद्धसाधनं साधनं स्यात् । तन्निवृत्त्यर्थं स्वतन्त्रत्वविशेषणम् । यथा क्षीरमनन्याधीनमेव विकृत्य दधिभावं भजते एवं स्वतन्त्रमेव प्रधानं जगदाकारेण परिणमत इत्यभिप्रायः । **इति चेत्** यद्येवं ब्रूयात्, तर्हीत्थं वक्तव्यमिति शेषः । **निदर्शने** दृष्टान्ते **साध्यवैकल्यं स्यात्** । अत्र स्वतन्त्रकारणत्वं हि साध्यम् । तत्तु दृष्टान्तीकृते क्षीरे न विद्यते । कुतः? 'एतेन ह वाव पयो मण्डं भवति', 'न ऋते त्वत् क्रियते किं चनारे','द्रव्यं कर्म च कालश्च–' इत्यादिना क्षीरदधिभावस्य विष्णवधीनत्वाङ्गीकारात् ॥ ९ ॥

(त.चं.) नारायणो विश्वकर्तेत्युक्तम् । तत्राचेतनस्य कर्तृत्वं प्रथमं निराकरणीयम् । तथाहि बादरायणसूत्रम्–'रचनानुपपत्तेश्च नाऽनुमानम्'[२.२.१] इति, 'प्रवृत्तेश्च'[२.२.२] इति, 'पयोऽम्बुवच्चेत् तत्रापि'[२.२.३] इति च । अचेतनं स्वतन्त्रं प्रधानं जगदाकारेण परिणमतीति साङ्ख्या मन्यन्ते । एतन्मतं प्रथमतो निराकरणीयम् । 'प्रधानविरोधित्वादस्य । स्वतन्त्रचेतनवादिनः स्वतन्त्राचेतनवादिनि विरोधस्याऽत्यन्तिकत्वात्' इति तत्वदीपिका । साध्यवैकल्यं स्यान्निदर्शने । पयसोऽपि स्वतन्त्रकारणत्वानभ्युपगमात् । तथाहि श्रुतिः– 'नि षु सीद गणपते गणेषु त्वामाहुर्विप्रतमं कवीनाम् । न ऋते त्वत् क्रियते किं चनाऽरे महामर्कं मघवन् चित्रमर्च' [ऋ.१०.११२.९] इति । अयमर्थः– चेतनाचेतगणपते इन्द्रियादिगणेषु त्वं

सुनिषीद । ज्ञानिनां विशेषेण प्रकृष्टतमं त्वामाहुः । त्वदृते स्पन्दनमपि न क्रियते । आरे दूरे च । त्वन्नियत्यैव सर्वं सर्वत्र । महान्तमधिकानन्दं त्वां त्वमेवार्चय मघवन् सामर्थ्ययुक्तेति ॥ ९ ॥

विवादाध्यासिता सृष्टिश्चेतनेच्छानुसारिणी ।
सृष्टित्वात् पटसृष्टिर्वेत्यनुमा पक्षसाधिका ॥ १० ॥

(प.दी.) एवं परिणामित्वानुमानस्य दृष्टान्ते साध्यवैकल्योक्त्या प्रतिपक्षे दूषितेऽपि स्वपक्षे साधकप्रमाणोपन्यासेन विना स्वसिद्धान्तप्रतिष्ठाया दुर्लभत्वात् तदुपन्यासः कर्तव्यः । तत्र सत्यप्यागमेऽनुमानेन प्रत्यवतिष्ठमानं परं प्रति तदुपन्यास एव न्याय्य इत्यनुमानोपन्यासमेव करोति– **विवादे**त्यादिना । **विवादाध्यासिता** स्वतन्त्रजडाधीनेति च चेतनाधीनेति च वादिप्रतिवादिविप्रतिपत्तिविषयत्वमारोपिता **सृष्टिः चेतनेच्छानुसारिणी** चेतनेच्छाधीना **सृष्टित्वात्, पटसृष्टिर्वा** पटसृष्टिवत् । **इत्यनुमा** एवं व्याप्त्यादिमदनुमानं **पक्षसाधिका,** अस्माकमिति शेषः ॥ १० ॥

(त.चं.) पटसृष्टिर्वा । नहि कुविन्दं विना तन्तुसन्तानमात्रेण पटसृष्टिर्लोके दृष्टा प्रधानमपराधीनं कारणमिति वदताऽपि ॥ १० ॥

यच्चेतनाचेतनयोरङ्गाङ्गित्वादि मन्वते ।
सृष्टावीशानपेक्षायां तन्न शोभनतां व्रजेत् ॥ ११ ॥

(भा.प्र.) आदिशब्देन ईश्वराङ्गीकारेऽपि तत्तदीश्यत्वेनानङ्गीकारः, चार्वाकस्य देहव्यतिरिक्तचेतनानङ्गीकारश्च वेदितव्यः । ईशानपेक्षायामित्यादिनाऽर्थतोऽनीश्वरवादिनो भाट्टादयश्च निरस्यन्ते ॥

(प.दी.) निरीश्वराः सेश्वराश्चेति द्विविधाः साङ्ख्याः । तत्र निरीश्वराश्च केचित् केवलादेव जडात् सृष्टिमाचक्षते । केचिच्चेतनाचेतनयोरङ्गाङ्गिभावेन स्रष्टृत्वमाचक्षते । तत्र केवलाचेतनस्य स्रष्टृत्वं निराकृत्य चेतनाचेतनयोर-

ङ्गाङ्गिभावेन स्रष्टृत्वं निराकरोति– **यदित्यादिना । चेतनाचेननयोरङ्गाङ्गित्वं** नाम चेतनस्याङ्गत्वमुपसर्जनत्वम्, अचेतनस्याङ्गित्वं प्रधानत्वम् । यथाऽऽम्ल-संयोगात् परिणाम्य दध्याख्यं कार्यमुत्पादयदपि क्षीरमाम्लसंयोगे पुरुष-व्यापारमपेक्षते, एवं सर्वकार्यमुत्पादयदपि जडं चेतनानुग्रहमपेक्षत इत्येवं **सृष्टौ चेतनाचेतनयोः यदङ्गाङ्गित्वादि मन्वते** अङ्गीकुर्वन्ति **तत्** एवं तैरङ्गी-कृतं प्रमेयं **ईशानपेक्षायां** सत्यां **शोभनतां** विवेकिभिरङ्गीकारार्हतां **न व्र-जेत्** । तथाहि– चेतनाचेतनयोरन्योन्यं संसृष्टयोरेव ह्यङ्गाङ्गिभावेन कर्तृत्वं वक्तव्यम् । तत्रान्योन्यसंसर्गाख्यमादिकार्यं चेतनानपेक्षं जडमेव नोत्पा-दयेत् । केवलाचेतनस्य कार्यानुत्पादकत्वाङ्गीकारात् । अन्यथा कार्यान्तरेऽपि तत्प्रसङ्गात् । एवं चेतनेऽप्यचेतनान्तरानुग्रहापेक्षायामन्योन्याश्रयप्रस-ङ्गात् । तस्माच्चेतनाचेतननियामकस्वतन्त्रेश्वरानङ्गीकारे तयोरन्योन्यप्रत्या-सत्तेरेवासम्भवात् तयोरङ्गाङ्गिभावाङ्गीकारेऽपि न कदाचिदपि कार्योत्पत्ति-रिति निरीश्वरसाङ्ख्यमतमशोभनम् । 'अङ्गाङ्गित्वादि' इत्यत्राऽदि-शब्देनाचेतनव्यतिरिक्तचेतनमनङ्गीकुर्वतो भूतचतुष्टयारब्धं सर्वं कार्यमभ्युप-गच्छतश्चार्वाकस्य मतमप्यशोभनमित्युक्तं भवति । तेनैवाऽदिशब्देनेश्वर-मभ्युपगच्छतामपि सेश्वरसाङ्ख्यादीनां मतमप्यशोभनमिति वेदितव्यम् । तत्तदङ्गीकृतेश्वरे सर्वकर्तृत्वसर्वज्ञत्वस्वतन्त्रत्वाद्यभावादिति भावः । तच्च 'न विश्वकृत् पशुपतिः–' इत्यादिना वक्ष्यति । 'ईशानपेक्षायाम्' इत्यनेन निरीश्वरभाट्टप्राभाकरमतमप्यशोभनमित्युक्तं वेदितव्यम् ॥ ११ ॥

(त.चं.) चेतनस्याङ्गत्वमचेतनस्याङ्गित्वम् । ईश्वराङ्गीकारेऽपि न तदीश्वर-स्येश्वरत्वम् । अनुग्रहमात्रशक्तिमत्त्वेनास्वातन्त्र्यात् । भाट्टादयः सेश्वरा अप्यर्थतोऽनीश्वराः । तदीयेश्वरस्य सर्वसामर्थ्यानभ्युपगमात् ॥ ११ ॥

सर्वविन्निर्मितं सर्वं कादाचित्कत्वहेतुतः ।
न यदेवं नो तदेवं यथाऽऽत्मेतीश्वरानुमा ॥ १२ ॥

(प.दी.) नन्वीश्वरसिद्धौ प्रमाणाभावात् कथमीश्वराङ्गीकारो युक्तः?

वेदः प्रमाणमीश्वरसद्भाव इति चेन्न। वेदाप्रामाण्यवादिनं प्रति तेनेश्वरसाधनायोगात्। नापि प्रत्यक्षमत्र प्रमाणम्। ईश्वरस्यातीन्द्रियत्वाङ्गीकारात्। नचानुमानम्। सर्वज्ञेश्वरान्तराभावेन निदर्शनान्तराभावात्। अत एवाप्रसिद्धविशेषणत्वाच्च। तस्मादीश्वरस्याप्रामाणिकत्वात् कथमनीश्वरमतमशोभनं स्यादित्याशङ्क्य, नायं दोषः, केवलव्यतिरेक्यनुमानेनेश्वरसिद्धेरित्याह– **सर्वविदि**त्यादिना। **सर्वं** समस्तकार्यजातं **सर्वविन्निर्मितं** सर्वज्ञेश्वरेण निर्मितम्। **कादाचित्कत्वहेतुतः** कादाचित्कत्वात्। अभूत्वाभावित्वादित्यर्थः। **यद्** वस्तु **एवं न** सर्वविन्निर्मितं न भवति **तदेवं नो**[१] कादाचित्कमपि न भवति। **यथा आत्मा इति** एवं **ईश्वरानुमा** अस्मत्पक्षे ईश्वरसाधकमनुमानम्। अस्तीति शेषः ॥ १२ ॥

(त.चं.) सर्वं विश्वं केनचिन्निर्मितम्। कुतो हेतुतः? कादाचित्कत्वहेतुतः। यत् पुरस्तात् नाभूत्, न भविष्यति परस्तात्, भवति चान्तराळे, तत् कादाचित्कमुच्यते। यद् अभूत्वा भवति। भूत्वा न भवति। कदाचिद् भवति कदाचिन्न भवतीति। स च कश्चित् कर्ता सर्वविद् भवितुमर्हति। सर्वकर्तृत्वात्। ज्ञानेच्छापूर्वा हि कृतिः कर्तृत्वं नाम। अथच 'न ऋते त्वत् क्रियते किञ्चन–' इति श्रुतेः सर्वमपि आमहीधरादापिपीलिकं सर्वविन्निर्मितम्। कादाचित्कत्वादेव हेतुतः। ननु सपक्षाभावात् किं निदर्शनम्? विपक्षभावाद् विपरीतं निदर्शनं भवति यन्नेदृशं तन्नेदृशं यथाऽऽत्मेति ॥

बलाय सर्वानुमानां वेदाः स्युर्यैरपालिताः।
कामादेताः प्रवर्तन्ते कामिन्य इव भर्तृभिः ॥ १३ ॥

(प.दी.) यदुक्तं वेदप्रामाण्याभावान्न तेनेश्वरसिद्धिरिति तदभ्युपगम्येश्वरसिद्धौ केवलव्यतिरेक्यनुमानं प्रमाणमित्यभिधायेदानीं वेदप्रामाण्यमनङ्गीकृत्य केवलानुमानमात्रेणाभिलषितप्रमेयसिद्ध्यङ्गीकारेऽतिप्रसङ्गः स्या-

१ 'तदेवं न' इत्येव कोशेषु पठ्यते।

दित्याह– **बलायेत्यादिना** । **वेदाः सर्वानुमानां बलाय** प्राबल्याय **स्युः** । वेदानुकूल्ये सत्येवानुमानेनातीन्द्रियधर्मादितत्तदभिलषितप्रमेयसिद्धिर्भवति नान्यथेत्यर्थः । कुतः? **यैः** वेदैः **अपालिताः** अननुगृहीताः **एताः** अनुमाः **कामात्** तत्तद्वादिनामिच्छानुसारेण **प्रवर्तन्ते** । का इव? **कामिन्यः** स्वैरिण्यः **भर्तृभिः** स्वाभिलषितभर्तृभिः **इव** । अयं भावः– स्वस्वभर्तृभिरनियताः स्वैरिण्यो यथा स्वाभीष्टकामिभिः सह वर्तन्ते एवं वेदैरनियता अनुमा अपि तत्तद्वादिजनानामिच्छानुसारेण प्रवर्तन्ते । तस्माद् वेदसाहाय्यरहितानां तासां न प्रामाण्यमिति । तथाचोक्तम्– 'श्रुतिसाहाय्यरहितमनुमानं न कुत्रचित् । निश्चयात् साधयेदर्थं प्रमाणान्तरमेव च' इति । तस्माद् वेदप्रामाण्यमवश्यमङ्गीकार्यमेवेति वेद एवेश्वसिद्धौ प्रमाणमित्यर्थः ॥ १३ ॥

(त.चं.) वेदैरपालिताः अनुमाः कामादेताः प्रवर्तन्ते । भर्तृभिरपालिताः कामिन्य इव । व्याख्यानान्तरं नातिस्वरसम् ॥ १३ ॥

कारणं परिणामि स्याद् ब्रह्म नो चेतनत्वतः ।
न यदित्थं नो तदित्थं यथा क्षीरपुरस्सरम् ॥ १४ ॥

(भा.प्र.) कारणमित्यादिना भास्करादयः ॥

(प.दी.) भास्करादयः केचिद् वादिनो ब्रह्मैव जगदाकारेण परिणमत इति वर्णयन्ति । तन्मतमपाकरोति– **कारणमित्यादिना** । **ब्रह्म परिणामि कारणं नो स्यात्** । परिणामित्वेन कारणं न भवितुमर्हति । कुतः? **चेतनत्वतः** चेतनत्वात् । **यद्** वस्तु **इत्थं** परिणामि कारणं नेति **न तद्** वस्तु **इत्थं नो** चेतन इति न । **क्षीरपुरःसरं यथा** । इत्थमत्र प्रयोगप्रकारः– ब्रह्म परिणामि कारणं न भवति, चेतनत्वात् । यत् परिणामिकारणं तदचेतनम् । यथा क्षीरादिकम् । न तथाचेदमचेतनम् । तस्मान्न परिणामिकारणमिति । अत्र ब्रह्म कारणं न भवतीत्युक्ते ब्रह्मणः सर्वकारणत्वाभ्युपगमविरोधः । तस्मात् परिणामिकारणं न भवतीति साध्यनिर्देशः ॥ १४ ॥

(त.चं.) निरस्तोऽचेतनस्यैव कारणत्वमभ्युपगच्छतां समयः । इदानीं चेतनमेव ब्रह्माख्यं जगदाकारेण विपरिणमतीति वदतां भास्करादीनां समयो निरस्यते । अचेतनमेवोपादानम् । निमित्तमेव चेतनमितीयं व्यवस्था ॥

न विश्वकृत् पशुपतिः श्रूयमाणागुणत्वतः ।
चैत्रवत् किं पुनर्विघ्नब्रध्नाद्या बालशङ्किताः ॥ १९ ॥

(प.दी.) यदुक्तं ब्रह्माख्यो नारायणो विश्वकर्तेति तदयुक्तम् । पशुपति-गणपतिस्कन्दसूर्यादीनामेव विश्वकर्तृत्वप्रतिपादकतत्तदागमविरुद्धत्वादित्याशङ्क्य परिहरति– **न विश्वकृदित्यादिना** । **पशुपतिः** रुद्रः **विश्वकृत्** सर्वस्य कार्यजातस्य कर्ता **न** । कुतः? **श्रूयमाणागुणत्वतः** । 'सोऽरोदीद् यदरोदीत् तद् रुद्रस्य रुद्रत्वम्', 'यं कामये तन्तमुग्रं कृणोमि' इत्यादिवेदवाक्येषु श्रूयमाणदुःखित्वपारतन्त्र्यादिदोषवत्त्वात् । **चैत्रवत्** । यदैवं पशुपतेरपि पारतन्त्र्यादिदोषवत्त्वेन विश्वकर्तृत्वं दुर्घटं तदा किमु वक्तव्यं विघ्नेशादीनामिति भावेनाऽह– **किं पुनरिति** । **बालशङ्किताः** बालैरविवेकिभिर्विवेकं विना [1]बाल्येनाऽपाततः प्रतीत्यनुसारेण श्रुत्याद्यर्थनिश्चयं [2]कुर्वद्भिरित्यर्थः । तैरपि शङ्किताः । तत्तद्भादिभिः सर्वकर्तृत्वादिगुणवत्त्वेन समर्थिता अपि तथात्वेनानिश्चिता इत्यर्थः । एवम्भूताः **विघ्नब्रध्नाद्याः** विना-यकसूर्याद्याः **किं पुनः**? विश्वकर्तृत्वादिगुणवन्तो न भवन्तीति किमु वक्तव्यम्? अनेन यदुक्तं नारायणस्य सर्वकर्तृत्वं पाशुपताद्यागमविरुद्धमिति, तदयुक्तम् । श्रुतिप्रसिद्धपारतन्त्र्यादिदोषयुक्तपशुपत्यादीनामेव स्वातन्त्र्येण विश्वकर्तृत्व-प्रतिपादकपाशुपताद्यागमानां दोषशङ्काकळङ्करहितश्रुतिविरोधेनाप्रामाण्यादित्युक्तं भवति ॥ १९ ॥

(त.चं.) भवतु चेतनस्य कर्तृत्वम् । स चेतनः कोऽप्यन्यः स्यात् । न

१. कोशेषु 'बाहुल्येन' इति पठ्यते । विश्वपतितीर्थीयेऽपि तथा ।
२. कोशेषु पश्चात् 'अकुर्वद्भिः' इति कृतम् ।

नारायण इति तान्त्रिकाः प्रत्यवतिष्ठन्ते । तान् प्रत्याह सम्प्रति । अश्रौता ये स्मार्तास्ते पाशुपताः शाक्ताः गाणपत्याः स्कान्दाः सौराश्च । प्राधान्यात् प्रथममुपादत्त पाशुपतं मतम् । बहुविधाश्च ते– निरपेक्षं पारमैश्वर्यं शिवस्य वर्णयन्तो नाकुलीशाः माहेश्वराः, कर्मसापेक्षमीश्वरमङ्गीकुर्वाणाः पति-पशुपाशभेदेन पदार्थत्रयं प्रतिपादयन्तः पाशुपताः, स एवेश्वरोऽहमिति प्रत्यभिज्ञामात्रेण सर्वार्थलाभ इति प्रत्यभिज्ञावादिनः शैवाः अभिनवगुप्त-सन्दर्शिताध्वानः, 'अभ्रकः गौरीबीजम्' 'पारदो रसः शिवबीजम्' इत्यन्ये रसवादिनो रसिकाः शैवा इत्यादि । 'संसारस्य परं पारं दत्तेऽसौ पारदः स्मृतः' इति हि सङ्गिरन्ते । गोविन्दभिक्षुर्यः शङ्कराचार्यस्य गुरुरस्य रस-सिद्धान्तस्य प्रवर्तकेष्वन्यतम आसीदिति गदन्ति । न पशुपत्यादयः विश्व-कृतः । अगुणत्वात् । कथमगुणाः? अगुणत्वेन श्रुतिषु बहुधा श्रूयमा-णत्वात् । अगुणा इति दोषा उच्यन्ते । अगुणा इति सर्वैश्वर्यादिगुणाभावा अप्युच्यन्ते । तेनागुणत्वत इति हीनगुणत्वादिति सदोषत्वादिति चार्थः । बाला अनधीतपरविद्याः । अधीत्याप्यनधिगतपरमार्थाः । विघ्नो विनायकः । विघ्नान् हन्तीति । ब्रध्नः सूर्यः । वरं धनं नारायणाख्यमत्रेति । बध्नातीति ब्रध्नः इति वैयाकरणाः । 'बन्धेर्ब्रधि बुधि च'[५.३८] इति दशपादिका । बन्धधातोर्नक् प्रत्ययो भवति, ब्रधि बुधि इत्येतावादेशौ च भवतः । बन्ध बन्धने । बध्नाति रश्मिभिर्विश्वमिति ब्रध्नः । बध्नात्यपो मेघरूपेणेति बुध्नमन्तरिक्षम् । बुध्नं मूलम् । बुध्नः सङ्कल्पो वा मनो वेत्यन्ये ॥ १५ ॥

ननु सौख्यादिमान् नेशो दुःखादिरहितत्वतः ।
यो नैवं स्यात् स नैवं स्याद् यथा संसृतिमानिति ॥ १६ ॥

(भा.प्र.) नन्वित्यादिना वैशेषिकादयः । 'सौख्यादिमान्' इत्यादिशब्देन क्रिया ग्राह्या । 'दुःखादि–' इत्यनेनारतिः ॥

(प.दी.) यदुक्तं 'नारायणोऽनन्तगुणः' इति नारायणस्य सुखाद्यनन्तगुणत्वं

तदसहमाना वैशेषिकादयः प्रत्यवतिष्ठन्त इति भावेन तावत् तन्मतमनुवदति– **नन्वि**त्यादिना। **ननु** इत्याक्षेपे। **ईशः** भवद्भिः सौख्याद्यनन्तगुणत्वेनाङ्गीकृतो नारायणाख्य ईशः **सौख्यादिमान् न** सुखादिविशिष्टो न भवति। **दुःखादिरहितत्वतः** दुःखादिरहितत्वात्। **य एवं न स्यात्** सौख्यादिरहितो न स्यात् **स एवं न स्यात्** दुःखादिरहितो न स्यात्। **संसृतिमान्** संसारी **यथा** तथेत्यर्थः। विमत ईश्वरः सुखादिरहितः दुःखादिरहितत्वात्। यः सुखादिरहितो न भवति स दुःखादिरहितोऽपि न भवति। यथाऽयं संसारी। नचायं सुखादिरहितः। तस्मान्न दुःखादिरहित इति प्रयोगप्रकारः। अथवा यदीश्वरः सुखादिमान् स्यात् तर्हि दुःखादिमानपि स्यात्। यथा संसारी। नचायं दुःखादिमान्। तस्मान्न सुखादिमानित्यापादनं वा। 'सौख्यादि–' इत्यत्राऽदिशब्देन क्रियादयो गृह्यन्ते। 'दुःखादि–' इत्यत्र चाऽदिशब्देनाज्ञानादयः। **इति** अनुमानविरुद्धत्वान्नारायणस्य सौख्याद्यनन्तगुणत्वं न युज्यत इति भावः॥ १६॥

(त.चं.) नन्वगुणत्वं जगत्कर्तरि भूषणम्। नतु दूषणम्। यदि सुखादिना गुणवान् स्यात् तर्हि दुःखादिना दोषवानपि स्यात्। सुखदुःखादीनां द्वन्द्वतयाऽविनाभावनियमात्। एवंवादिनोऽपि वादिनो भवन्ति वैशेषिकादयः। तदभिमतमनुवदति– **ननु सौख्यादिमान्**। सौख्यादिमानीश एव न भवति। तस्मादीशः सौख्यादिमान् न भवति। यस्माद् दुःखादिरहित एव दुःखिनामीष्टे। एवमीशः क्रियावान् न भवति। अरतिरहितत्वात्। क्रियया ह्यायस्यति। आयस्तो ह्यरतिमनुभवति। तेन यदि क्रियावान् स्यात्, तर्ह्यरतिमानपि स्यात्। तस्मादक्रियमनानन्दं ब्रह्मेति॥ १६॥

एवं चेद् विमतो ज्ञानी न भ्रान्तिरहितत्वतः।
यो नैवं स्यात् स नैवं स्याद् भवीवेत्यनुमीयते ॥ १७॥

(प.दी.) इति परोक्तानुमानं प्रत्यनुमानेन दूषयति– **एवं चेदि**त्यादिना। **एवं चेत्** दुःखादिरहितत्वानुमानस्य पक्षधर्मतादिबलादनेनानुमानेनेश्वरस्य

श्रुत्यादिसिद्धमपि सुखादिमत्त्वं निवार्यते चेत्, वयमपि पक्षधर्मादिमता केवलानुमानेन तत्तद्बादिभिः सर्वज्ञतयाऽङ्गीकृतस्येश्वरस्य ज्ञानित्वमात्रमपि दुर्घटमिति साधयाम इति भावः । तथाहि– **विमतः** वादिप्रतिवादिनोः सर्वज्ञत्वाज्ञत्वाभ्यां विप्रतिपत्तिविषय ईश्वरः **ज्ञानी न । भ्रान्तिरहितत्वतः** भ्रान्तिज्ञानशून्यत्वात् । [1]**यः एवं न स्यात्**, ज्ञानरहितो न स्यात् **सः एवं न स्यात्**, भ्रान्तिज्ञानशून्योऽपि न स्यात् **भवीव** संसारी यथा तथेत्यर्थः । इत्य**नुमीयते** अस्माभिरिति शेषः । श्रुत्या सिद्धमपीश्वरस्य सुखादिमत्त्वं केवलानुमानेन निवार्यते चेत् तादृशेनैवानुमानेनेश्वरस्य ज्ञानमात्रशून्यत्वमपि साधयितुं शक्यत इत्यभिप्रायः ॥ १७ ॥

(त.चं.) तर्हि ज्ञानवानपि न भवेदीशः । ज्ञानस्य चाज्ञानसंशयविपर्ययसहयोगनैयत्यात् ॥ १७ ॥

सर्वज्ञस्याज्ञतां वेदः श्रद्धेयो विरुणद्धि चेत् ।
तस्यैवामन्दमानन्दं वदन्नाश्राव्यसौ कथम् ॥ १८ ॥

(भा.प्र.) 'यः सर्वज्ञः सर्ववित्', 'आनन्दं ब्रह्मणः' इत्यादिर्वेदः ॥

(प.दी.) नन्वेवं केवलानुमानेनेश्वरस्याज्ञत्वसाधनमयुक्तम् । 'यः सर्वज्ञः सर्ववित्' इत्यादीश्वरसार्वज्ञ्यप्रतिपादकवेदविरुद्धत्वात् । वेदस्य प्रमाणतमत्वं च भवद्भिरप्यङ्गीकृतमेव । भ्रान्तिरहितत्वहेतुः कालात्ययापदिष्ट इत्याशङ्क्य, एवं चेद् दुःखादिरहितत्वहेतुरपि कालात्ययापदिष्टः स्यादिति भावेन परानुमानमपि प्रतिबन्द्या क्षिपति– **सर्वज्ञस्ये**त्यादिना । **श्रद्धेयः** प्रमाणतमत्वेनाऽदरणीयः **वेदः** ईश्वरस्य सार्वज्ञ्यप्रतिपादकः 'यः सर्वज्ञः सर्वविद् यस्य ज्ञानमयं तपः' इत्यादिरूपो वेदः **सर्वज्ञस्य** वेदेन सर्वज्ञत्वेनावधारितस्येश्वरस्य

---

१. एतद्व्याख्यानानुसारेण पूर्वपद्यवदत्रापि 'यो नैवं स्यात् स नैवं स्याद् भवीव–' इत्येव मूलपाठ इति ज्ञायते । विश्वपतितीर्थीयेऽपि तथा । 'य एवं नो स एवं नो–' इति तु सर्वत्र प्रचुरः पाठः ।

अज्ञतां विरुणद्धि चेत् निवारयति चेत्, तर्हि **तस्यैव** 'यः सर्वज्ञः' इत्यादिश्रुतिविषयस्यैवेश्वरस्य **अमन्दं** परिपूर्णं **आनन्दं वदन् असौ** 'आनन्दं ब्रह्मणो विद्वान् न बिभेति कुतश्चन', 'आनन्दो ब्रह्मेति व्यजानात्', 'को ह्येवान्यात् कः प्राण्याद् यदेष आकाश आनन्दो न स्यात्' इत्यादिर्वेदः **कथं नाश्रावि?** त्वया कथं न श्रुतः? यदि 'यः सर्वज्ञः–' इत्यादिश्रुतिबलेन त्वयेश्वरस्याज्ञत्वं निवार्यते तर्हि 'आनन्दं ब्रह्मणो विद्वान्' इत्यादेरपि श्रुतित्वाविशेषात् तयैव श्रुत्या प्रमितमीश्वरस्य सुखित्वमपि न निराकर्तुमुचितमिति भावः ॥ १८ ॥

(त.चं.) अल्पज्ञ एवाज्ञो भवेत् । न सर्वज्ञः । एवमल्पानन्द एव दुःखी । न पूर्णानन्दः । 'यो वै भूमा तत् सुखम्' इति हि श्रुतिः ॥ १८ ॥

दुःखं परिजिहीर्षन् यः सुखं नोरीचिकीर्षति ।
स हन्ताऽपतितं दुःखमीशस्य व्यस्मरज्जळः ॥ १९ ॥

(प.दी.) ननु कथमीश्वरस्य सुखमङ्गीकारार्हम्? सुखित्वे दुःखित्वापातात् । तथाहि– विमतश्चैत्रः दुःखी सुखित्वात्, यः सुखी स दुःखी यथा मैत्र इति व्याप्तेः प्रमितत्वात् । 'आनन्दं ब्रह्मणः –' इत्यादिश्रुतेश्च दुःखाभाव एवार्थः । एवं च ब्रह्मणो दुःखाभावातिरिक्तभावरूपसुखसद्भावे प्रमाणाभावात् कथं दुःखादिरहितत्वानुमानस्य कालात्ययापदिष्टतेत्याशङ्क्य परिहरति– **दुःखमित्यादिना** । **दुःखं परिजिहीर्षन्** दुःखं परिहर्तुमिच्छन् **यः** वादी **सुखं** दुःखाभावातिरिक्तं सुखं **नोरीचिकीर्षति** नाङ्गीकर्तुमिच्छति । **जळः** अविवेकी **सः आपतितं** अङ्गीकर्तुमनिच्छताऽप्यङ्गीकार्यतया प्राप्तं **ईशस्य दुःखं व्यस्मरत्** विस्मृतवान् । **हन्त** आश्चर्यमस्य मौढ्यमिति यावत् । अयमत्राभिप्रायः– ईश्वरस्य चेतनत्वे तावन्न काचिद् विप्रतिपत्तिः । चेतनस्य च सुखदुःखयोरन्यतराविनाभावनियमो दृष्टो देवदत्तादौ । विमतो देवदत्तः सुखदुःखयोरन्यतराविनाभूतः चेतनत्वात् । यः सुखदुःखयोरन्य-

तराविनाभूतो न भवति नासौ चेतनोऽपि भवति, यथा घट इत्यनुमानात् । 'सुखस्यानन्तरं दुःखं दुःखस्यानन्तरं सुखम्' इत्यागमात् । सर्वेषामनुभवाच्च । तस्मादीश्वरस्य चेतनत्वात् सुखदुःखयोरन्यतराविनाभूतत्वमवश्यमभ्युपगन्तव्यम् । तत्र च सुखित्वानभ्युपगमे दुःखित्वं बलादापततीति तदभ्युपगमाद् वरमीश्वस्य निर्दुःखानन्दाभ्युपगम इति । तथाच यदुक्तम्— सुखित्वे दुःखित्वापातान्नेश्वरः सुखी; तस्य परमानन्दत्वश्रुतिस्तु दुःखाभावविषयेति दुःखादिरहितत्वानुमानस्य कथं कालात्ययापदिष्टतेति तदसत् ॥

(त.चं.) दुःखं परिजिहीर्षन् सुखं नोरीचकार । अहो सुखस्यानूरीकरणादेव दुःखमापतितम् । चेतने सुखदुःखयोरन्यतरनैयत्यात् ॥ १९ ॥

यो दुःखसमवायोऽयं चैत्रे तेन ह्यभेदवान् ।
समवायः कश्चिदीशे तदनेकत्वमन्यथा ॥ २० ॥

(भा.प्र.) तदनेकत्वं समवायस्यानेकत्वम् ॥

(प.दी.) एवं दुःखादिरहितत्वानुमानस्य कालात्ययापदिष्टतां व्युत्पाद्यासिद्धिमपि व्युत्पादयति—**यो दुःखसमवाय** इत्यादिना । **चैत्रे** चैत्रे वर्तमानः **योऽयं दुःखसमवायः तेन** चैत्रवर्तिना दुःखसमवायेन **अभेदवान्** ऐक्यवान् **कश्चित् समवायः ईशे** ईश्वरेऽपि वर्तते **हि** यस्मात् तस्मादीश्वरोऽपि दुःखसमवायवान् । ततश्च दुःखी स्यात् । नहि दुःखसमवायवत्त्वातिरिक्तं दुःखित्वं चैत्रेऽपि विद्यते । अयं भावः— चैत्र इति संसार्युपलक्षणम् । संसारिणि तावदविप्रतिपन्नो दुःखसमवायो वर्तते । ईश्वरेऽपि ज्ञानेच्छादिसमवायः । तयोश्च समवाययोरभेद इति वैशेषिकादिसिद्धान्तः । तथचोक्तम्— 'समवायस्तु सम्बन्धो नित्यः स्यादेक एव सः' इति । ततश्च दुःखसमवायवान् संसारी यथा न दुःखरहितः तथा दुःखसमवायाभिन्नसमवायवत्त्वादीशोऽपि न दुःखादिरहितः । तस्माद् दुःखादिरहितत्वानुमानस्यासिद्धत्वान्न तेनेश्वरस्य सौख्यादिराहित्यं साधयितुं शक्यत इति । ननु भवेदेतदेवम् । यदि संसारिणि

वर्तमानस्य दुःखसमवायस्येश्वरे वर्तमानस्य ज्ञानेच्छादिसमवायस्य चाभेदः स्यात्। स एव नाङ्गीक्रियत इत्यत आह– **तदित्यादि**। **अन्यथा** तयोः समवाययोर्भेदाङ्गीकारे **तदनेकत्वं** तस्य समवायस्यानेकत्वम्, स्यादिति शेषः। ततश्च सर्वगतस्य नानाप्रतियोगिकस्यापि समवायस्यैकत्वमभ्युपगच्छतां तेषां तदनेकत्वाङ्गीकारेऽपसिद्धान्तः स्यादिति भावः ॥ २० ॥

(त.चं.) ईश्वरे यो गुणसमवायः, यश्च जीवे दुःखसमवायः एक एवायम्। अन्यथा समवायस्त्वेक एवेति स्वसमयविरोधात्। तथाच स्वनिष्ठगुणसमवायाभिन्नदुःखसमवायी तेषामीश्वर इत्यायातम् ॥ २० ॥

औपाधिकोऽस्य भेदश्चेत् सत्योऽसत्यः स्विदुच्यताम्।
तद् द्वयं चोक्तदोषं हि मायिवन्मा वदेत् परम् ॥ २१ ॥

(भा.प्र.) सत्यश्चेत् तदनेकत्वमसत्यश्चेत् समवायैक्यादीशे दुःखमित्युक्तदोषद्वयम्। परं सदसद्विलक्षणं स्वव्याहतम्॥

(प.दी.) नन्वेकवृत्तिसमवायस्यैकत्वेऽपि चैत्रमैत्रादिनानोपाधिसम्बन्धादौपाधिको भेदोऽङ्गीक्रियत इति। तस्माद् यद्यपि चैत्रे दुःखसमवायस्तथाऽपि नासावीश्वरेऽस्ति। यथा खलु सर्वगताकाशस्यैकत्वेऽपि तस्य घटमठाद्यनेकोपाध्यवच्छेदेन घटाकाशो न मठाकाश इति व्यवहारः। एवं समवायस्यैकत्वेऽपि चैत्राद्युपाधीनां भिन्नत्वाच्चैत्रगतो दुःखसमवायव्यवहारो नेश्वरेऽस्ति। ईश्वरगतो नित्यज्ञानादिसमवायव्यवहारो न चैत्र इति समवायस्यौपाधिकभेदाङ्गीकारात् कथमीश्वरस्य दुःखसमवायः स्यात्? कथं च दुःखरहितत्वानुमानस्यासिद्धिरित्याशङ्क्य परिहरति– **औपाधिक** इत्यादिना। **अस्य** समवायस्य **औपाधिको भेदश्चेत्** औपाधिको भेदोऽङ्गीक्रियते यदि, तर्हीदं पृच्छाम इति शेषः। किमिति? स औपाधिको भेदः **सत्यः स्वित्**? पारमार्थिकः किम्? **असत्यः स्वित्**? अपारमार्थको वा? मिथ्या वेत्यर्थः। **उच्यताम्**। एवमस्माभिः पृष्टेन त्वया त्वदभिलषितार्थोऽभिधी-

यताम् । कस्मिन् सति किं स्यादित्यत आह– **तदित्यादि** । **तद् द्वयं** तत् पक्षद्वयं च **उक्तदोषं हि** । उक्तौ दोषौ यस्य पक्षद्वयस्य तदुक्तदोषम् । तथाहि– औपाधिकस्यापि समवायभेदस्य पारमार्थिकत्वे समवायानेकत्वं वास्तवं स्यात् । तथाचापसिद्धान्तः स्यादिति भावः । असत्यश्चेन्नास्ति भेद इत्युक्तं भवति । तथाच यश्चैत्रगतो दुःखसमवायः स एवेश्वरेऽपीति कथमसौ दुःखादिरहितः स्यात् । दुःखसमवायवतोऽपि दुःखराहित्ये चैत्रस्यापि चैतत् किं न स्यादविशेषादित्युक्तदोषं तत् पक्षद्वयमिति भावः । ननु सत्यासत्यपक्षद्वयातिरिक्ततृतीयपक्षाङ्गीकारात् कथं पक्षद्वयोक्तदोषसञ्चारस्तत्रेत्याशङ्क्य तन्न सम्भवतीत्याह– **मायिवदिति** । **मायिवत् परं** सदसद्विलक्षणं नाम पक्षान्तरं **मा वदेत्** । सदसद्विलक्षणमिति स्वव्याहतभाषणं मायिनामेव भूषणम् । नतु तार्किकम्मन्यस्य वैशेषिकस्येत्यभिप्रायः । एवं च तृतीयपक्षासम्भवात् पक्षद्वये चोक्तदोषानिस्तारात् समवायभेदासम्भवेनेश्वरस्यापि दुःखसमवायित्वान्न दुःखादिरहितत्वमिति न तेनेश्वरस्य सौख्यादिराहित्यसाधनं सङ्गच्छत इति सर्वेश्वरस्य भगवतः सौख्याद्यनन्तगुणाकरत्वं युक्तमिति स्थितमेतत् ॥ २१ ॥

(त.चं.) औपाधिको भेदः सत्यश्चेत्, 'तदनेकत्वमन्यथा' इत्युक्तो दोषः । अथासत्यः, ईश्वरोऽपि तर्हि दुःखसमवायीत्युक्तो दोषः । अथ च भेदं सत्यासत्याभ्यां परं सदसद्विलक्षणं मा किल वादीत् स्वव्याहतिं दोषं मन्यमानोऽनुन्मत्तः । ननु कथं मा वदेदिति? 'माङि लुङ्' [३.३.१७७] इति हि वैयाकरणा वदन्ति । सर्वलकाराणामयमपवाद इति च तन्मतम् । सत्यम् । अथापि स्यात् 'मा वदेत्' इति । समादधते हि वैयाकरणा एव– 'अङिदपरो माशब्दो विद्यते । तस्यायं प्रयोगः' इति ॥ २१ ॥

ब्रूयुरौपाधिकं भेदं ज्ञानादीनां यदात्मनः ।
नीत्याऽनया तन्निरासात् स्यात् तस्यानन्तधर्मता ॥ २२ ॥

(प.दी.) एवं समवायस्यौपाधिकभेदनिरासेनान्यच्च तन्मनीषितं प्रमेयं निरस्तमित्याह– **ब्रूयुरित्यादिना** । **आत्मनः** परमात्मनः **ज्ञानादीनां** ज्ञानेच्छा-प्रयत्नादिगुणानां **औपाधिकं** उपाधिनिमित्तकं **भेदं ब्रूयुः** इति **यत् अनया नीत्या** समवायस्यौपाधिकभेदनिरासयुक्त्या **तन्निरासात्** तस्यौपाधिकभेदस्य निरासात् अन्ततः परिशेषात् भेदस्यैव वास्तवत्वे सति **तस्य** आत्मनः **अनन्तधर्मता** अनन्तगुणता **स्यात्** । अयं भावः– अस्ति तावदात्मगुणानां भेद इत्यङ्गीकारस्तस्येति सिद्धम् । तस्य च भेदस्योक्तप्रकारेणौपाधिक-त्वासम्भवात् स्वाभाविकत्वमनिच्छताऽप्यङ्गीकार्यं प्राप्तम् । तस्मादात्म-नोऽनन्तगुणता स्यादिति ॥ २२ ॥

(त.चं.) घटज्ञानं पटज्ञानमिति, घटसृष्टीच्छा पटसृष्टीच्छेति स्वाभाविक-भेदभिन्ना अनन्ता ज्ञानादय इत्यायातम् । तेन चानन्तधर्मता परमात्मन इत्येवाङ्गीकृतं स्यात् ॥ २२ ॥

गुणादिभेदे सम्बन्धमपेक्ष्याप्यनवस्थितेः ।
विशेषमात्रेणाऽनन्त्यं गुणानां शोभते विभोः ॥ २३ ॥

(प.दी) यच्चान्यदुच्यते वैशेषिकेण– अवयवावयविनोर्गुणगणिनोः क्रिया-क्रियावतोर्जातिव्यक्त्योर्विशेषनित्यद्रव्ययोश्च सम्बन्धः समवाय इति, तच्च न घटत इत्याह– **गुणादीत्यादिना** । **गुणादिभेदे** गुणादीनां गुण्यादिभ्यो भेदे, अङ्गीक्रियमाणे सतीति शेषः, **सम्बन्धमपेक्ष्यापि अनवस्थितेः** गुण-गुणिनोर्भेदो न युज्यत इति भावः । तथाहि– गुणगुणिनौ भिन्नावित्यत्र विशेष्यभूतयोर्गुणगुणिनोर्विशेषणभूतस्य भेदस्य च मिथो भेदोऽङ्गीकार्यः । अन्यथा विशेषणविशेष्यभावासम्भवात् । अस्य भेदस्य गुणादीनां भेदिनां च मिथो भेद इति भेदपरम्परयाऽनवस्थितिरेवेति । ननु भवतां पक्षेऽपि गुणगणिनोर्गुणानां च मिथो भेदोऽस्त्येव । अन्यथेश्वरस्य गुणित्वासम्भ-वात् । गुणानामेव मिथो भेदाभावे तेषामानन्त्यासम्भवाच्च । तस्माद् गुणादि-

भेदाङ्गीकारेऽनवस्थाप्रसङ्गो भवतामपि सम इत्याशङ्क्य परिहरति– **विशेषमात्रेणे**ति । भवेदेवमनवस्थाप्रसङ्गोऽस्मत्पक्षेऽपि यदि वयमीश्वरस्य तद्गुणानां च भेदमङ्गीकुर्मः । नचैवम् । किं तर्हि? ईश्वरस्य तद्गुणानां चाभेदवादिनोऽपि वयं विशेषमङ्गीकुर्मः । विशेषो नाम भेदहीने वस्तुनि भेदनिमित्तानेकव्यवहारहेतुभूतः । तच्चोक्तम्– 'भेदहीने त्वपर्यायशब्दान्तरनियामकः । विशेषो नाम कथितः सोऽस्ति वस्तुष्वशेषतः' इति । तस्माद् भेदानङ्गीकारेऽपि विशेषमात्राङ्गीकारात् तेन **विशेषमात्रेण विभोः** व्याप्तस्य नारायणस्य **गुणानामानन्त्यं शोभते** । मात्रशब्दो भेदानङ्गीकारद्योतकः । विशेषबलादेवाऽनन्दादीनां गुणत्वमीश्वरस्य च गुणित्वम्, आनन्दादिगुणानां भोग्यत्वं भगवतश्च भोक्तृत्वम् । तेषामानन्दादिगुणानां मिथो भेदाभावेऽपि विशेषबलादेवाऽनन्त्यमपि घटत इति भावः ॥ २३ ॥

(त.चं.) गुणाद् गुणी भिन्न इति गुणेन सप्रतियोगी गुणिना सानुयोगी भेदस्तावत् प्रतीयते । स च भेदोऽवश्यं पुनरनुयोगिप्रतियोगिभ्यां भिन्नः । सोऽयं गुणगुणिप्रतियोगिकभेदानुयोगी भेदो द्वितीयः । सोऽपि पूर्वभेदाद् भिन्न इति भेदप्रतियोगिकभेदानुयोगी तृतीयो भेदः । सोऽपि द्वितीयभेदाद् भिन्नः । सोऽपि तृतीयभेदादित्यनवस्थितेः । ननु भेदवादिनां तत्ववादिनामप्ययं वः समो दोषः । यत्रोभयोः समो दोषस्तत्र कथमेकोऽनुयुज्यते? न भोः । भेदवादिनोऽपि वयं गुणगुणिनोरभेदवादिनः । अभेदश्च भेदप्रतिनिधिना विशेषेण विशिष्ट इति न कोऽपि दोष इत्याह– विशेषमात्रेण ॥ २३ ॥

मन्यन्ते शून्यमेवान्ये तत्वमागमवैरिणः ।
मता माध्यमिकास्तेऽपि व्यक्ताश्छन्ना इति द्वये ॥ २४ ॥

(प.दी.) इदानीं प्रकृतभगवद्गुणानामानन्त्यमसहमानानां शून्यवादिनां मायावादिनां च परावरप्रमेययोर्विशेषाभावेन मायिनामेव शून्यवादित्वमुपपादयितुं तावच्छून्यवादिविभागमाह– **मन्यन्त** इत्यादिना । **अन्ये** वैशेषिका-

दिभ्योऽन्ये **आगमवैरिणः** वेदादिसदागमद्वेषिणः **माध्यमिकाः** बौद्धाः **शून्यमेव तत्वं मन्यन्ते । तेऽपि** शून्यमेव परतत्वमिति मन्यमाना बौद्धैकदेशिनश्च **व्यक्ताः** स्पष्टाः **छन्नाः** प्रच्छन्नाः **इति द्वये** द्विविधाः **मताः** । विज्ञानवादिनः शून्यवादिनः क्षणिकवादिनश्चेति त्रिविधा बौद्धाः । तत्र शून्यवादिनोऽपि द्विविधा मताः– स्पष्टशून्यवादिनः प्रच्छन्नशून्यवादिनश्चेति । तत्र प्रच्छन्नशून्यवादिनो मायावादिन इति भावः ॥ २४ ॥

(त.चं.) सत्सु गुणेषु भेदचिन्ताऽभेदचिन्ता वा । वयं निर्गुणं शून्यं तत्वमुपास्महे इति बौद्धेषु माध्यमिकाः । वयं निर्गुणं ब्रह्मोपास्महे इति मायावादिनः । उभयानपि समानयोगक्षेमानेकयोक्त्या निराकरोति– मन्यन्ते शून्यमेवान्ये । शून्यमेव ब्रह्मेति वैदिकपदेन व्याहरन्तस्तेन लोकानाकुलयन्तो मायावादिनो वेदवादच्छन्नमुखा माध्यमिका एवेति तेऽपि प्रच्छन्ना माध्यमिका एव । तथाहि चतुर्विधा बौद्धाः श्रूयन्ते– माध्यमिकाः, योगाचाराः, सौत्रान्तिकाः, वैभाषिकाश्चेति । सर्वं शून्यमिति माध्यमिकाः । बाह्यार्थजातं शून्यमिति योगाचाराः । बाह्यं सर्वमनुमेयमिति सौत्रान्तिकाः । बाह्यं प्रत्यक्षगम्यमिति वैभाषिकाः । बुद्धदेशनाविदां मध्ये मूर्धन्यम्मन्या माध्यमिकाः । तत्वं न सत्, नासत्, न सदसत्, नापि सदसद्विलक्षणम्, किन्तु चतुष्कोटिविनिर्मुक्तं शून्यमिति हि ते मन्यन्ते । व्यवहारश्च स्वप्नवत् कल्पनामात्रम् । 'परिव्राट्कामुकशुनामेकस्यां प्रमदातनौ । कुणपः कामिनी भक्ष्य इति तिस्रो विकल्पनाः' इति । शून्यभाव एव परनिर्वाणमिति च । गुरूक्तस्याङ्गीकरणमाचारः । अज्ञातस्यानुयोगो योगः । तदुभयं शिष्यलक्षणमित्यभ्युपयन्तो योगाचारा एतान् शून्यवादिनो माध्यमिकान् मन्यन्ते । गुरूक्तस्याङ्गीकरणादुत्तमा अपि अननुयोगादधमा इति । बुद्धिरेव बोद्धव्यात्मना विपरिणमतीति योगाचाराः । अत एव च ते वैज्ञानिका इत्यपि भाष्यन्ते । ज्ञेयमनुमेयमिति सौत्रान्तिकाः । अयमेव बुद्धदेशनासूत्राणामन्तो निर्णय इति वदन्त एते सौत्रान्तिका उच्यन्ते । सर्वं शून्यमिति माध्यमिकाः ।

विज्ञानमेकं सदिति योगाचारा वैज्ञानिकाः । विज्ञानं विज्ञेयमियुभयमपि सत्यम् । किन्तु विज्ञेयमनुमेयमिति सौत्रान्तिकाः । प्रात्यक्षिकस्याभावे भूयोदर्शनासम्भवेनानुमानस्याप्यसम्भवाद् विरुद्धेयं सौत्रान्तिकानां भाषेति भाषमाणा वैभाषिका बाह्यं प्रत्यक्षगम्यमूर्यकुर्वन्निति ॥ २४ ॥

शून्यं ब्रह्माह्वयेनाऽहुः स्वांश्च वेदान्तिनोऽभ्यधुः ।
अतत्वावेदकं वेदं वदन्तश्चरमे खलाः ॥ २५ ॥

(प.दी.) ननु ब्रह्मवादिनां मायावादिनां कथं शून्यवादित्वम्? वेदान्तिनां तेषामागमवैरित्वं च कथमित्यत आह– **शून्यमित्यादि** । मन्त्रब्राह्मणोपनिषद्भेदेन त्रिविधो हि वेदः । तत्र च मन्त्रब्राह्मणात्मको वेदोऽतत्वावेदकप्रमाणमिति मायिनो वदन्ति । उपनिषद्भागं च तत्वावेदकप्रमाणं वदन्ति । एवं च **वेदं** मन्त्रब्राह्मणात्मकं वेदभागं **अतत्वावेदकं वदन्तः** मन्त्रब्राह्मणात्मको वेदः प्रमाणमपि तत्वं ब्रह्मस्वरूपं नाऽवेदयतीत्यतत्वावेदकप्रमाणमिति वदन्त इति भावः । अत एव **खलाः** मुख्यतः सकलवेदवेद्यस्य ब्रह्मणो वेदैकदेशेनावेद्यत्वाङ्गीकारादेव खला इत्यर्थः । **चरमे** 'व्यक्ताश्छन्ना इति द्वये' इत्यत्र पश्चादुद्दिष्टाः प्रच्छन्नशून्यवादिनो मायावादिनः **शून्यं ब्रह्माह्वयेन** ब्रह्मनाम्ना **आहुः** वदन्ति । शून्यवादिनो निराकारं निर्विशेषं यच्छून्यं परतत्वमित्याहुस्तस्माच्छून्याद् विशेषरहितं परतत्वं ब्रह्मेत्याहुरित्यर्थः । अनेन नाममात्रेणैव भेदो न वस्तुभेद इत्युक्तं भवति । **स्वान्** आत्मनः **च वेदान्तिनः** वेदान्तिनामकान् **अभ्यधुः** ॥ २५ ॥

(त.चं.) कथं मायावादिनश्छन्ना माध्यमिकाः? वेदाः प्रमाणमिति मायावादिनः । अप्रमाणमिति माध्यमिकाः । सत्यं वेदाः प्रमाणमिति मायावादिनः । अप्रमाणमिति माध्यमिकाः । वरं माध्यमिकाः स्फुटमप्रमाणमिति वदन्तः । नेमे च्छन्नाः प्रमाणमथाप्यतत्वावेदकमिति वदन्तः । कथमथ तत् प्रमाणं यन्न तत्वमावेदयति? ॥ २५ ॥

परतत्वविवर्तत्वादपरस्याखिलस्य च ।
अविशेषत्वतश्चास्य नान्तरन्तरमेतयोः ॥ २६ ॥

(प.दी.) शून्यवादिनां मायावादिनां च परतत्वविषये विवादाभावमुपपाद्यापरतत्वेऽपि विवादाभावमाह– **परतत्वेति** । **अखिलस्य** समस्तस्य **अपरस्य** भूभूधरादिनानारूपप्रपञ्चाख्यस्यापरतत्वस्य **च परतत्वविवर्तत्वात्** । परतत्वविवर्तत्वं नाम परतत्वोपादानकत्वम् । तस्माच्छून्यवादिनो यथा शून्योपादानकं जगदिति ब्रूयुः, तथा मायावादिभिरपि ब्रह्मोपादानकं जगदित्यङ्गीकृतम् । तस्मादपरतत्वेऽपि न विवाद इति भावः । ननु शून्यवादिनः शून्योपादानकं जगदित्याहुः । मायावादिनस्तु ब्रह्मोपादानकमिति । एवं कथमपरतत्वे विवादाभाव इत्याशङ्क्य, भवेदयं विशेषो यदि ब्रह्मणः शून्यात् कश्चन विशेषः स्यात् । नचासावस्ति । तथात्वे ब्रह्मणोऽविशेषत्वभङ्गादित्याह– **अविशेषत्वतश्चेति** । **अस्य** ब्रह्मणः **अविशेषत्वतः** शून्याद् विशेषरहितत्वात् **च एतयोः** मतयोः **अन्तः** अन्ततः विचार्यमाणे सति **अन्तरं** भेदो **न** । एतयोः ब्रह्मशून्ययोरिति वा ॥ २६ ॥

(त.चं.) शून्यमेव जगदाकारं प्रतिभासत इति माध्यमिकाः । ब्रह्मैवेति मायावादी । शून्यमिति ब्रह्मेति शब्दमात्रेण भेदः । यथा लालेति वक्त्रासव इति । तस्मादेतयोरन्तः मध्ये न किमप्यन्तरं नाम । 'अन्तः स्वीकारमध्ययोः' इति च ॥ २६ ॥

अखण्डखण्डनन्यायानखण्डमपि खण्डयन् ।
अखण्डयदखण्डज्ञो द्वयांश्चाखण्डलद्विषः ॥ २७ ॥

(प.दी.) एवं मतद्वयस्य साम्यान्निराकरणमपि सममेवाकार्षीदित्याह– **अखण्डेत्यादिना** । **अखण्डखण्डनन्यायान्** अखण्डान् समस्तान् खण्डनन्यायान् सत्सिद्धान्तनिराकरणाङ्गकुतर्करूपन्यायाभासानिति यावत् । अखण्डाश्च ते खण्डनन्यायाश्चेति विग्रहः । मायिशून्यवादिनोः **अखण्ड-**

खण्डनन्यायान् **खण्डयन्** दूषयन् **अखण्डमपि** निर्विशेषमपि **खण्डयन्** निर्विशेषत्वेनाङ्गीकृतं परतत्वमपि प्रमाणाभावान्निराकुर्वन्नित्यर्थः, **अखण्डज्ञः** सर्वज्ञः श्रीमन्मध्वः **द्वयान्** द्विविधान् **च** **आखण्डलद्विषः** इन्द्रारीन् **अखण्डयत्** निराचक्रे ॥ २७ ॥

(त.चं.) अखण्डानपि परेषां खण्डनन्यायान् खण्डनखण्डखाद्याद्यभिख्येन ग्रन्थाभासेनाऽविष्कृतान् खण्डयन् तदभिमतमखण्डं शून्यमपि खण्डयन्। स्वयमखण्डं निर्विशेषं ब्रह्मापि खण्डयन्। तेनैव न्यायेन माध्यमिकानामखण्डं शून्यमेव मायिनां ब्रह्म जानन्। परेषामखण्डानखिलानपि खण्डनन्यायान् जानन्। तत्खण्डनभङ्गीमखण्डं जानन्। आखण्डयति द्विषोऽसुरानित्याखण्डल इन्द्रः। 'वृषादिभ्यश्चित्'[८.१०९] इति दशपादिका। वृषादिभ्यो धातुभ्यः कलप्रत्ययो भवति। स च प्रत्ययश्चिद् भवति। कलच्प्रत्यय इत्येतत्। वृषादिराकृतिगणः। वृषलः। देवलः। केवलः। पटलम्। कुशलः। आखण्डलः ॥ २७ ॥

विमतं कारणं न स्यादसत्वान्न यदीदृशम्।
नेदृशं तद् यथा कुम्भकर्तेत्यत्रानुमीयते ॥ २८ ॥

अङ्गो तापस नो शून्यं कारणं कुम्भकर्तृवत्।
यत्संवृत्युत्थितं विश्वं तत् कारणमितीर्यते ॥ २९ ॥

(प.दी.) यदुच्यते शून्यवादिना शून्यं जगत्कारणमिति, तन्निराकरोति– **विमतमित्यादिना**। **अङ्गो** हे **तापस** बौद्ध, **विमतं** शून्यं **कारणं** जगत्कारणं **न स्यात्**। कुतः? **असत्त्वात्**। अत्र व्यतिरेकव्याप्तिं दर्शयति– **न यदित्यादिना**। **यत् ईदृशं न** कारणं नेति न, कारणमिति यावत्। **तत् ईदृशं न**, असन्न, सदिति यावत्। **यथा कुम्भकर्ता** यथा कुलालः। **इति अत्रानुमीयते**। अस्माभिरिति शेषः। विमतं शून्यं कारणं न भवति, असत्त्वात्। यत् कारणं तत् सत्, यथा कुलाल इति प्रयोगप्रकारः। अत्र 'अङ्गो तापस' इति पूर्वत्र सम्बद्ध्यते। 'नो शून्यम्' इत्याद्युत्तरत्र ॥ ❋ ॥ आह शून्यवादी–

नो शून्यमित्यादि । **शून्यं कुम्भकर्तृवत्** कुलालवत् **कारणं नो** । शून्यं जगत्कारणमिति वदन्तोऽपि वयं कुलालादिवद् बाह्योपादानादिसापेक्षं तत् कारणमिति नाङ्गीकुर्म इत्यर्थः । किं तर्हीत्यत आह– **यदित्यादि** । **विश्वं** जगत् **यत्संवृत्युत्थितं** यस्य शून्यस्य संवृत्या अज्ञानेन उत्थितं दृश्यत इत्यर्थः । **तत् कारणमिति ईर्यते** उच्यते । अयमभिप्रायः– शुक्तिकायाः शुक्तिकात्वमापरोक्ष्येणापश्यतो भ्रान्तस्य यथा तत्र रजतज्ञानं जायते 'रजतमिदं पुरोवर्ति' इति एवमेव शून्यतत्वं सम्यगापरोक्ष्येणापश्यतामज्ञानिनां भूभूधरादिनानारूपप्रपञ्चप्रतीतिर्जायते । एवं च सति शुक्तिकायाथात्म्याज्ञानात् प्रतीयमानस्य रजतस्य शुक्तिका यथा कारणमित्युच्यते, एवं शून्यतत्वापरिज्ञानात् प्रतीयमानस्य प्रपञ्चस्य शून्यं कारणमित्युच्यते । नतु शून्यं कुलालादिवज्जगत्कारणमिति ॥ २८ ॥ २९ ॥

(त.चं.) विमतं शून्यं न जगत्कारणम्, सत्त्वानाक्रान्तत्वात् । चतुष्कोटिविनिर्मुक्तं शून्यमिति हि तन्मतम् । यत् कारणं तत् सद् दृष्टम् । यथा कुम्भकार इति । 'अङ्ग' इति सम्बोधने वर्तते । बौद्धानां परिभाषेयम् । अत एव तत्वदीपिकायां पण्डिताचार्यवचनं शून्यवादप्रस्तावे– 'अङ्ग देवप्रिय' इति । तापस इति शोचनीयः । तद् यथा तपस्वी । अङ्ग तापस, अयि तपस्विन्, अनधिगतबुद्धदेशनतया शोचनीयधिषण । योग्यस्त्वं वने तपसे, न वादाय, इति तत्ववादिनो वचोभङ्गीमङ्गीकुर्वन्निवानुकरोति परिहसन् । पूर्वान्वयस्तु न स्वरसः ॥ २८ ॥ २९ ॥

एवं चेत् कारणं मा स्म ब्रवीः शून्यं कथञ्चन ।
आयुष्मंस्तदधिष्ठानं व्युत्पित्सस्व गुरोर्गृहे ॥ ३० ॥

(प.दी.) तदेतत् सामान्यतोऽनूद्य निषेधति– **एवं चेदित्यादिना** । **एवं चेत्** सम्यक् शून्यतत्वापरिज्ञानेन निमित्तेन प्रतीयमानस्य प्रपञ्चस्य शून्यं कारणमित्युच्यत इत्यभ्युपगमश्चेत् । तर्हि **शून्यं कथञ्चन कारणं मा स्म ब्रवीः** । स्वाज्ञानेन प्रतीयमानस्य प्रपञ्चस्य शून्यं कारणमिति मा वद ।

तर्हि किं ब्रूयामित्यपेक्षायामाह– **आयुष्मन्नि**त्यादि । शून्यं जगत्कारणमिति वदता त्वया कारणत्वं नामेत्थमिति त्वदभिप्रायः सम्यगुक्त इति हर्षात् 'आयुष्मन्' इत्युक्तम् । हे **आयुष्मन्, तत्** एवं त्वयाऽङ्गीकृतं शून्यं **गुरोर्गृहे अधिष्ठानं व्युत्पित्सस्व** व्युत्पत्तुमिच्छ[१] । त्वदभ्युगमप्रकारेण विचार्यमाणे सति, अधिष्ठानं सत् शून्यं कारणमिति वदन्, अत एव कारणाधिष्ठानयोः स्वरूपं सम्यगजानंस्त्वमथापि कञ्चित् कालं गुरोर्गृहे तिष्ठन् कारणाधिष्ठानयोः स्वरूपं विविच्य ज्ञात्वा, पश्चात् कारणलक्षणयुक्तं कारणमिति व्यवहर; अधिष्ठानलक्षणयुक्तमधिष्ठानमिति व्यवहर । एवमधिष्ठानव्युत्पत्त्यनन्तरमेवास्मासु व्यवहरेत्यभिप्रायः ॥ ३० ॥

(त.चं.) तापसेति सम्बोधनस्य प्रतिबन्दीमाह– आयुष्मन् । बालस्त्वमव्युत्पन्नः अनधिगतशब्दार्थः कथं समयज्ञः स्याः । पद गतौ । पित्सते ॥

विवादस्य पदं न स्यादधिष्ठानमसत्त्वतः ।
वैधर्म्येणैष दृष्टान्तः शुक्त्यादिवदितीर्यते ॥ ३१ ॥

(प.दी.) ननु मा भूत् तर्हि शून्यं कारणमिति । अधिष्ठानमेवास्तु । तथाऽपि यथा भ्रान्तिदशायां प्रतीयमानं शुक्तिकाव्यतिरिक्तं रजतं न तात्विकम्, एवमेव शून्यव्यतिरिक्तं जगन्न तात्विकमिति वदतो मम न किञ्चिदनिष्टमित्याशङ्क्य, शून्यस्याधिष्ठानत्वमपि न घटते, अनुमानविरोधादिति भावेनाऽह– **विवादस्ये**त्यादिना । **विवादस्य** विप्रतिपत्तेः **पदं** विषयभूतं शून्यं **अधिष्ठानं न स्यात्** । **असत्त्वतः** असत्त्वात् । अत्र सपक्षाभावात् कथं व्याप्तिरिति चेदाह– **वैधर्म्येणे**ति । **वैधर्म्येण** साध्याभावेन साधनाभावेन च सम्प्रतिपन्नः **एषः दृष्टान्तः ईर्यते** । कथम्? **शुक्त्यादिवदिति** । अत्रेत्थमनुमानप्रयोगप्रकारः– विमतं शून्यं जगदारोपाधिष्ठानं न

१.व्युत्पत्तिं सम्पादयेत्यर्थः । तेनेच्छाया नियोगानर्हत्वात् कथमेतदिति शङ्कानवकाशः ।

भवति, असत्त्वात् । यदारोपाधिष्ठानं तत् सत्, यथा रजताद्यारोपाधिष्ठानं शुक्त्यादीति ॥ ३१ ॥

(त.चं.) असत्त्वादिति । सत्त्वानाक्रान्तत्वादित्युक्तम् ॥ ३१ ॥

अतत्वावेदकं मानमिति स्वव्याहतं यतः ।
तद्वादी तेन वेदस्य सोऽभिप्रैत्यप्रमाणताम् ॥ ३२ ॥

(प.दी.) ननु 'परतत्वविवर्तत्वादपरस्याखिलस्य च । अविशेषत्वतश्चास्य नान्तरन्तरमेतयोः' इति मायावादिशून्यवादिमतयोर्विशेषो नास्तीति यदुक्तं तदसत् । शून्यवादिनां वेदाप्रामाण्यवादित्वात् । मायावादिनां वेदप्रामाण्याभ्युपगमसद्भावात् । इत्थं हि मायावादिनो वदन्ति– मन्त्रब्राह्मणात्मक एको वेदभागः । उपनिषदात्मकोऽपरः । तत्राऽद्यो मिथ्याभूतभेदादिप्रपञ्चविषयत्वादतत्वावेदकप्रमाणम् । द्वितीयस्तु परमार्थभूतब्रह्मविषयत्वात् तत्वावेदकप्रमाणमिति । एवमुभयथा वेदप्रामाण्यवादिनां तेषां मतस्य कथमवैदिकशून्यवादिमताद् विशेषाभाव इत्याशङ्क्य, भवेदयं विशेषो मायिमतस्य यद्युक्तप्रकारेण वेदप्रामाण्यं सम्भवेत्, नचैतदस्ति, अतत्वावेदकं च तत् प्रमाणं चेत्युक्तेर्व्याहतत्वादित्याह– **अतत्वावेदक**मित्यादिना । **अतत्वावेदकं मानमिति** च वचः **स्वव्याहतं यतः** यस्मात् तस्मात् **तद्वादी** वेदस्यातत्वावेदकत्ववादी **सः** मायावादी **तेन** वेदस्यातत्वावेदकत्ववचनेन **वेदस्याप्रमाणतामभिप्रैति** । तथाहि– वेदस्यातत्वावेदकत्वं नाम अतत्वस्य अयथार्थाकारस्य आवेदकत्वं ज्ञापकत्वमभिप्रेतम् । एतदेव ह्यप्रामाण्यं नाम । तस्मादतत्वावेदकमित्युक्त्वा पुनस्तस्य प्रमाणत्ववचनं स्वव्याहतम् । तस्मादेवं स्वव्याहतभाषिणस्तस्य वेदप्रामाण्यवचनं वैदिकजनप्रतारणमेव । एवं च मायिशून्यवादिनोर्वेदाप्रामाण्याभ्युपगमस्तु समान एव । मायिनः स्वव्याहतभाषित्वमधिकम् । तस्माच्छून्यवादिमतान्न वैशेष्यमित्यभिप्रायः ॥ ३२ ॥

(त.चं.) नहि तत्वावेदकं प्रमाणमतत्वावेदकं प्रमाणमिति प्रमाणद्वैविध्यम् । किमनेन भस्मच्छन्नाग्निकल्पेन वृथाजल्पेन । समुपजोषं घुष्यतां वेदा अप्रमाणमिति ननु महता कण्ठेन ॥ ३२ ॥

यं तत्वावेदकं वेद वेदांशं वेददूषकः ।
तत्वस्यावर्णनीयत्वात् स तत्वावेदकः कथम् ॥ ३३ ॥

(भा.प्र.) अवर्णनीयं वागविषयत्वेन। न हि प्रमेयसम्बन्धरहितं प्रमाणं भवति॥

(प.दी.) यदप्युक्तमुपनिषदात्मको वेदभागस्तत्वावेदकप्रमाणमिति तदप्यशोभनमित्याह— **यमित्यादिना** । **वेददूषकः** उक्तप्रकारेण वेदाप्रामाण्याभ्युपगमाद् वेदस्य निन्दको मायावादी **यं वेदांशं तत्वावेदकं वेद** अभ्युपगच्छति **सः** वेदांशः **कथं तत्वावेदकः?** न कथमपि । कुतः? **तत्वस्य** परमार्थभूतस्य ब्रह्मणः **अवर्णनीयत्वात्** अवाच्यत्वात् । तथाच ब्रह्मावाच्यमित्यभ्युपगमाद् ब्रह्मविषयतयाऽभ्युपगतवेदभागस्य ब्रह्मवाचकतया न ब्रह्मसम्बन्धः सम्भवति । प्रमेयसम्बन्धरहितस्य प्रामाण्यं दुर्घटमिति भावः । एवं चातत्वावेदकस्य मिथ्याविषयत्वादप्रामाण्यमङ्गीकृतं स्यात् । तत्वावेदकस्य पुनर्निर्विषयत्वेनाप्रामण्यमभ्युपगतमिति उभयथाऽपि वेदाप्रामाण्यवादित्वाद् वेदस्य दूषको मायीत्यभिप्रायः ॥ ३३ ॥

(त.चं.) ननु 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादिकं वेदवाक्यं तत्वावेदकमेव प्रमाणम् । कर्मकाण्डस्य हि केवलमतत्वावेदकता? तेन माध्यमिकाद् विलक्षण एव मायावादीति । नेत्याह— **यमिति** । यद् वेदा वेदयन्ति कर्मादि तन्न तत्वम् । यत् तत्वं ब्रह्म तदशब्दगोचमित्यवेदनीयमित्युभयतःपाशा रज्जुः ॥

लक्षणाभिः प्रवर्तन्ते वाक्यानि तिसृभिर्यदि ।
विषयत्वं लक्षणानां तस्यैवानिष्टमागतम् ॥ ३४ ॥

(भा.प्र.) 'यतो वा इमानि भूतानि जायन्ते' इत्यादीनि जहल्लक्षणया। 'सत्यं

ज्ञानमनन्तं ब्रह्म' इत्यादीनि अजहल्लक्षणया। 'तत्त्वमसि' इत्यादीनि जहदजहल्लक्षणया॥

(प.दी.) ननु यदुक्तम्– तत्वावेदकप्रमाणस्य ब्रह्मणि वचनवृत्त्या प्रवृत्त्यभावान्निर्विषयत्वेनाप्रामाण्यमिति, तदसत्। यद्यपि 'यतो वाचो निवर्तन्ते–' इत्यादिवाक्यैर्ब्रह्मणो वाच्यत्वाभावाद् वचनवृत्त्या ब्रह्मणि न प्रवर्तते वेदः। तथाऽपि लक्षणावृत्त्या प्रवर्तते। लक्षणा च त्रिविधा। जहल्लक्षणा, अजहल्लक्षणा, जहदजहल्लक्षणा चेति। तत्र 'यतो वा इमानि भूतानि जायन्ते' इत्यादीनि जहल्लक्षणया प्रवर्तन्ते। मिथ्याभूतानि जगज्जनकत्वादीनि ब्रह्मविशेषणान्यपहाय 'यतः' इति यच्छब्दनिर्दिष्टब्रह्मस्वरूपमात्रस्य लक्षकत्वात्। 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादीन्यजहल्लक्षणया ब्रह्मणि वर्तन्ते। सत्यत्वादीनां धर्माणामतद्व्यावृत्त्या लक्ष्याहेयब्रह्मस्वरूपत्वेन प्रतिपादकत्वात्। 'तत् त्वमसि' इत्यादिवाक्यानीह जहदजहल्लक्षणया ब्रह्मपराणि। तदिति त्वमिति च ब्रह्मजीवावनूद्य ब्रह्मत्वजीवत्वयोः परस्परविरुद्धत्वेनैक्यासम्भवाद् ब्रह्मत्वजीवत्वविशेषौ हित्वा असीत्यनेन चैतन्यमात्रस्यैक्यविधानात्। तदेवं लक्षणया ब्रह्मविषयत्वात् कथं निर्विषयत्वं तत्वावेदकप्रमाणस्येत्याशङ्क्यानिष्टापादनमुखेन परिहरति– **लक्षणाभिरि**त्यादिना। **वाक्यानि** तत्वावेदकप्रमाणत्वेनाङ्गीकृतानि वेदवाक्यानि **यदि तिसृभिर्लक्षणाभिः** ब्रह्मणि **प्रवर्तन्ते** तर्हि **तस्यैव** वाच्यत्वप्रमेयत्वादिसकलविशेषनिर्मुक्ततयाऽङ्गीकृतस्य ब्रह्मणः **लक्षणानां विषयत्वं** नाम विशेषणं **आगतं** अनिच्छताऽप्यङ्गीकार्यतया प्राप्तम्। कथम्भूतम्? **अनिष्टम्**। अपसिद्धान्तप्रसङ्गादङ्गीकर्तुमनुचितम्। तस्माद् ब्रह्मणो लक्षणाविषयत्वस्याप्यसम्भवात् तत्वावेदकप्रमाणस्य निर्विषयत्वेनाप्रामाण्यं तदवस्थमेवेति॥ ३४॥

(त.चं.) मा भूच्छब्दवाच्यम्। लक्षणया तु भवेदेव शब्दगोचरम्। तदपि न सम्भवीत्याह– लक्षणाभिः। तर्हि लक्षणाविषयत्वं नाम विशेषो निर्विशेषे ब्रह्मण्यस्तीत्यापतितम्॥ ३४॥

किञ्चाखण्डेऽत्र वाक्यानि किञ्चिद् विदधते न हि ।
तान्यभ्यधुरभावं चेज्जाड्यादेस्तन्न शोभते ॥ ३५ ॥

अभावभावस्याभावाद् भावरूपस्य तस्य तु ।
भावाभावविशेषाणामभावादविशेषिणः ॥ ३६ ॥

(प.दी.) नैतावदेव दूषणं ब्रह्मणो निर्विशेषत्वाङ्गीकारे । किन्त्वधिकं चास्तीति प्रतिजानीते– **किञ्चेति** । तदेव विवृणोति– **अखण्ड** इत्यादिना । **अखण्डे** निर्विशेषे **अत्र** ब्रह्मणि **वाक्यानि** 'सत्यं ज्ञानमनन्तं ब्रह्म' इत्यादीनि वाक्यानि **किञ्चित्** सत्यत्वादिरूपं किमपि विशेषणं **न विदधते हि** यस्मात् तस्मात् तेषां वाक्यानां लक्षणात्वाङ्गीकारेऽपि लक्षितस्य ब्रह्मणो विशेषाभावाद् व्यर्थश्च तेषां वाक्यानां लक्षकत्वाभ्युपगम इति भावः । ननु सत्यज्ञानादिवाक्यानि यद्यपि सत्यत्वादिभावरूपधर्मान् न प्रतिपादयन्ति । तथाऽप्यतद्व्यावृत्त्या असत्यत्वाद्यभावं ब्रह्मणः प्रतिपादयन्ति । सत्यज्ञानादिपदानां चासत्यत्वादिव्यावृत्तिरेवार्थः । तस्मान्निर्विशेषस्य ब्रह्मणः सत्यत्वादिभावरूपविशेषाभावेऽपि, असत्यव्यावृत्तत्वात् सत्यं ब्रह्म, अज्ञानव्यावृत्तत्वाज्ज्ञानम्, अन्तव्यावृत्तत्वादनन्तं ब्रह्मेति सत्यादिपदानामतद्व्यावृत्त्या ब्रह्मविषयत्वाङ्गीकारात् कथं निर्विषयतेत्यत आह– **तानीति** । **तानि** सत्यज्ञानादिवाक्यानि **जाड्यादेरभावमभ्यधुश्चेत्** असत्याज्जडाद् व्यावृत्तत्वात् सत्यमित्यादिना जाड्याद्यभावमभ्यधुरित्यङ्गीकृतं चेदपि **तन्न शोभते** । कुतः? विकल्पासहत्वात् । तथाहि– सत्यज्ञानादिपदाभिधेयानामसत्यत्वाद्यभावानां किं ब्रह्मात्मकत्वमङ्गीक्रियते? आहोस्विद् ब्रह्मविशेषणत्वम्? आद्ये, असत्यत्वाद्यभावानां ब्रह्मात्मकत्वाङ्गीकारे ब्रह्मणोऽप्यभावात्मकत्वं स्यात् । तच्च नाङ्गीकारार्हम् । कुत इति हेत्वपेक्षायामाह– **अभावेति** । **भावरूपस्य** भावात्मकत्वेनाभ्युपगतस्य **तस्य तु** ब्रह्मणः **अभावभावस्य** अभावत्वस्य **अभावात्** असम्भवादित्यर्थः । द्वितीयोऽपि

पक्षो न घटते। कुत इत्यत आह– **भावाभावेति**। **अविशेषिणः** सर्वविशेषरहितत्वेनाङ्गीकृतस्य ब्रह्मणः **भावाभावविशेषाणां** भावाभावात्मकस्वविशेषाणां **अभावात्** असम्भवात्। निर्विशेषत्वेनाङ्गीकृतस्य ब्रह्मणो भावरूपस्य वा अभावरूपस्य वा कस्यचिद् विशेषस्याङ्गीकृतावपसिद्धान्तप्रसङ्गादिति भावः। तस्मादसत्यत्वाद्यभावानां ब्रह्मात्मकतया ब्रह्मविशेषतया वा ब्रह्मसम्बन्धाभावात् तत्प्रतिपादनपराणां सत्यज्ञानादिवाक्यानां ब्रह्मविषयत्वाभावान्न तत्वावेदकत्वं सम्भवतीत्यर्थः ॥ ३५ ॥ ३६ ॥

(त.चं.) जाड्यादेरभावम्। उक्तं हि परैः–'अनृतजडविरोधिरूपमन्तत्रयमलदुःखताविरुद्धम्' इत्यादि। नैतेऽभावरूपा धर्मा ब्रह्मात्मकाः। अभावभावस्याभावात् तस्य। भावरूपत्वेन भवदभिमतस्य ब्रह्मणोऽभावरूपत्वस्यासम्भवात्। नापि धर्मधर्मिभावः। निर्विशेषे भावरूपमभावरूपं वा विशेषणं कथं सम्भवेत्? निर्विशेषं हि तत्। नतु निर्भावविशेषम्॥

यो वेदवेदितार्थानां नित्यसन्त्यागसंश्रवी।
वेदबाह्यो विपश्चिद्भिरेष निश्चीयतां ततः ॥ ३७ ॥

(प.दी.) 'मन्यन्ते शून्यमेवान्ये तत्वमागमवैरिणः' इत्यत्र प्रच्छन्नबौद्धत्वं मायिन उक्तम्। तच्च 'परतत्वविवर्तत्वादपरस्याखिलस्य च' इत्यादिनोपपादितम्। इदानीं युक्त्यन्तरेणापि बौद्धत्वमुपसंहरति– **य** इति। **यः** मायी **वेदवेदितार्थानां** प्रपञ्चसत्यत्वादीनां हरेरनन्तगुणपूर्णत्वनिर्दोषत्वादीनामर्थानां **नित्यसन्त्यागसंश्रवी** सर्वदा परित्यागरूपप्रतिज्ञावान्। अत्र वेदार्थसन्त्यागो नाम तेषां मिथ्यात्वाङ्गीकारः। **ततः** वेदोक्तार्थमिथ्यात्वाङ्गीकारात् **एषः** मायी **विपश्चिद्भिः वेदबाह्यो निश्चीयताम्**। बौद्ध इति निश्चीयताम्। नहि वेदोक्तार्थमिथ्यात्वाङ्गीकारातिरिक्तं वेदबाह्यत्वं बौद्धादीनामपीति भावः ॥ ३७ ॥

(त.चं.) संश्रवः प्रतिज्ञा। 'प्रतिश्रवः संश्रवः प्रतिज्ञा च' इति च॥

ज्यायसो दूषणेनैव धूर्तम्मन्योऽपि दूषितः ।
पक्षयोरविशेषत्वादनयोः सद्विपक्षयोः ॥ ३८ ॥

(प.दी.) तस्मान्मायिशून्यवादिनोर्वेदबाह्यत्वसाम्यात् परापरतत्वे च विशेषाभावात् शून्यवादिमते यद् दूषणं सम्भवेत् तेनैव दूषणेन मायिमतमपि दूषितं वेदितव्यमित्याह– **ज्यायस** इति । 'मता माध्यमिकास्तेऽपि व्यक्ताश्छन्ना इति द्वये' इति शून्यवादिनः प्रथममुद्दिष्टत्वात् शून्यवादी मायिनो ज्यायान् । **ज्यायसः** ज्येष्ठस्य शून्यवादिनः **दूषणेनैव धूर्तम्मन्यः** आत्मानं धूर्तं मन्यमानः मायावादी **अपि दूषितः** वेदितव्य इत्यर्थः । 'धूर्तम्मन्यः' इत्यत्र 'आत्ममाने खश्' इति खश्प्रत्ययः । 'खित्यनव्ययस्य' इति मुमागमः । ननु शून्यवादिनिराकरणयुक्तिभिर्मायिनिराकरणं कथं स्यात्? तयोर्मतयोः परस्परविरुद्धत्वादित्यत आह– **पक्षयोरि**ति । **सद्विपक्षयोः** सतां विपक्षभूतयोः **अनयोः पक्षयोः** सिद्धान्तयोः **अविशेषत्वात्** मिथो विशेष-रहितत्वात् ॥ ३८ ॥

(त.चं.) ज्यायसः शून्यवादिनः । धूर्तं मायिनमात्मानं मन्यत इति धूर्तम्मन्यो मायावादी । वेदवादव्याजेन मायावादेन सर्वान् वैदिकान् प्रतारयेयमिति निश्चितमतिः ॥ ३८ ॥

असत्त्वादित्यसौ हेतुरसिद्धो ब्रह्मवादिनः ।
मेति भाण्यविशेषत्वादेतयोर्ब्रह्मशून्ययोः ॥ ३९ ॥

(प.दी.) ननु 'विमतं कारणं न स्यादसत्त्वान्न यदीदृशम्' इत्यत्र 'विवादस्य पदं न स्यादधिष्ठानमसत्त्वतः' इत्यत्र च शून्यस्य कारणत्वमधिष्ठानत्वं च निराकर्तुं योऽयमसत्त्वहेतुः प्रयुक्तः, असौ ब्रह्मवादिनो मायावादिनो ममा-सिद्धः । मन्मते 'सत्यं ज्ञानमनन्तं ब्रह्म'इत्यादिना जगज्जन्मादिकारणस्य ब्रह्मणः सत्यत्वाङ्गीकारादित्यत आह– **असत्त्वादि**ति । **ब्रह्मवादिनः** मम

असत्त्वादित्यसौ हेतुरसिद्धः इति मा भाणि मायिना नोच्येत। कुतः? **एतयोर्ब्रह्मशून्ययोः** मायिशून्यवादिभ्यां परतत्वमित्यङ्गीकृतयोर्ब्रह्मशून्ययोः **अविशेषत्वात्** सर्वविशेषरहितत्वात्। तस्मादसदात्मकात् शून्याद् ब्रह्मणो विशेषाभावादसत्त्वं ब्रह्मणो दुर्वारमिति नासत्त्वहेतुरसिद्धो मायिन इति भावः ॥ ३९ ॥

(त.चं.) असत्त्वं स्यादपि शून्ये। सत्त्वानङ्गीकारात्। ब्रह्म तु सदिति मायावादी। सन् घटः सन् पटः इति सर्वत्रानुगतं सदेव। तदेव किल ब्रह्म तस्य। मेति भाणि। एवं तर्हि शून्यादस्ति कश्चिद्विशेषो ब्रह्मणीत्युक्तं भवति। का गतिर्निर्विशेषब्रह्मणः। सत्यत्वं नामासत्याद् व्यावृत्तिरेवेति वदता त्वयाऽपि सत्त्वानाक्रान्तत्वमङ्गीकृतमेव मुखतः ॥ ३९ ॥

सोऽङ्गीकरोति चेत् सत्त्वं ब्रह्मणः स्याद् विशेषिता।
न चेत् प्राप्तं पारिशेष्यादसत्त्वं न निरस्यतु ॥ ४० ॥

(प.दी.) ननु भवेदयं दोषो यद्यस्माभिरसत्त्वं ब्रह्मणोऽङ्गीक्रियेत। नचैवम्। ब्रह्मणः सत्त्वाङ्गीरादित्यत आह– **स** इति। **सः** मायी **ब्रह्मणः सत्त्वमङ्गीकरोति चेत् ब्रह्मणः विशेषिता** सविशेषत्वं **स्यात्**। **न चेत्** ब्रह्मणः सत्त्वं नाङ्गीकरोति चेत् **पारिशेष्यात्** परिशेषतः **प्राप्तमसत्त्वं न निरस्यतु** न निराकरोतु। परस्परविरुद्धयोरन्यतरनिषेधस्यान्यतरविधिनान्तरीयकत्वनियमात्। सत्त्वासत्त्वयोश्च परस्परविरुद्धत्वात्। अयमभिप्रायः– ब्रह्मणः शून्याद् वैलक्षण्यसिद्ध्यर्थं सत्त्वाख्यविशेषाङ्गीकारे निर्विशेषत्वभङ्गः स्यात्। तद्भयात् सत्त्वानभ्युपगमे परिशेषतः प्राप्तमसत्त्वं न निराकर्तुमुचितम्। असत्त्वाङ्गीकारे च नासत्त्वहेतुरसिद्ध इत्युभयतःपाशा रज्जुरिति ॥

(त.चं.) तदेव स्फुटमाह– सोऽङ्गीकरोति चेत् ॥ ४० ॥

विगीतं न विचार्यं स्यान्न भाव्यं न फलप्रदम्।
शून्यं ब्रह्माद्यमद्वैतं विधिधीगोचरो न यत् ॥ ४१ ॥

(भा.प्र.) आद्यशब्देन विज्ञानस्फोटकालाद्वैतानि ॥

खपुष्पवदखण्डत्वाद् व्यतिरिक्तं निदर्शनम् ।
प्रमाणादिवदित्येवमूहनीयं यथेप्सितम् ॥ ४२ ॥

(भा.प्र.) विमतानि भगवद्वाचकानि न भवन्ति, [१]अविषयत्वात्, शशविषाणवदित्याद्यूहनीयम् ॥

(प.दी.) अस्तु तर्हि शून्याद् वैलक्षण्याभावादसत्त्वं ब्रह्मणः । किमनिष्टमित्यतः फलितार्थमाह– **विगीतमित्यादिना** । **विगीतं** विप्रतिपन्नं **अद्वैतं** द्वैतरहितम्, विगळिताखिलभेदादिप्रपञ्चत्वेनाङ्गीकृतमिति यावत्, **शून्यं** शून्यनामकं सत् **ब्रह्माद्यं** मायावादिप्रभृतिभिर्वादिभिः परतत्वमित्यङ्गीक्रियमाणं **विचार्यं न स्यात्** मुमुक्षूणां श्रवणमननादिरूपविचारास्पदं न स्यात् । **भाव्यं** ध्येयं च **न स्यात्** । **फलप्रदं** मोक्षान्ततत्तदभीष्टफलप्रदं च **न स्यात्** । 'ब्रह्माद्यम्' इत्यत्राद्यशब्देन शून्यवादिनां शून्यम्, विज्ञानवादिनां विज्ञानम्, स्फोटवादिनां वैयाकरणानां स्फोटः, कालश्च गृह्यते । विचार्यादिकं कुतो न स्यादित्यत आह– **विधिधीति** । यदेतत् परतत्वमित्यङ्गीकृतं ब्रह्माद्यं **विधिधीगोचरः** प्रथमप्रतिपत्तौ विधिप्रत्ययविषयः **न** भवति **यत्** यस्मात् तस्मादित्यर्थः ॥ * ॥ किमिव? **खपुष्पवत्** । खपुष्पशब्दात् खपुष्पप्रतीतावपि तद् यथा विधिप्रत्ययविषयो न भवति तथा हि तत्पक्षे ब्रह्माद्यमपीति भावः । तत् कुत इत्यत आह –**अखण्डत्वात्** । निर्विशेषत्वात् । सत्त्वादिधर्मरहितत्वेन विधिप्रत्ययगोचरत्वासम्भवादित्यर्थः । अयमत्र प्रयोगप्रकारः– विमतं ब्रह्माद्यं विवेकिना श्रुतितन्मीमांसादिभिर्विचार्यं न भवति श्रुत्याद्यविषयत्वात् खपुष्पवत् । विमतं ब्रह्माद्यं ध्येयं न भवति निराकारत्वात् खपुष्पवत् । विमता ब्रह्मादिविषया भावना मोचिका न भवति

१. भवदभिमतस्य भगवतोऽविषयत्वादित्यर्थः । 'असद्विषयत्वात्' इति क्वचित् । अस्फुटार्थमिदं वाक्यम् । पाठान्तरं सम्भाव्यते ।

श्रुत्याद्यविषयत्वात् शशविषाणादिभावनावत् । विमतं ब्रह्माद्यं पुरुषार्थप्रदं न भवति, असत्त्वात्, अश्वशृङ्गवत् । यद्यद् विचार्यं भाव्यं फलप्रदं वा तत्तत् सदेव दृष्टम् । **प्रमाणादिवत्** । सदेव हि प्रमाणं प्रमेयं वा साधुत्वा-साधुत्वादिविचारविषयो भवति । **इति** इति दूषणोक्तिसमाप्तौ । 'इति हेतुप्रकरणप्रकारादिसमाप्तिषु' इत्यमरः । **एवं व्यतिरिक्तं निदर्शनं यथेप्सितमूहनीयम्** । व्यतिरेकदृष्टान्तोऽप्यूहनीय इत्यर्थः ॥ ४१ ॥ ४२ ॥

(त.चं.) अथापरः सुगतशिष्यः प्रत्यवतिष्ठते योगाचारो वैज्ञानिकः । मा भून्माध्यमिकानां शून्यं तत्वम् । विज्ञानं तु वयं तत्वं ब्रूमः । विज्ञानमेवानेक-विश्वाकारमवभासते । वासनाविच्छेदे च विशुद्धविज्ञानोदय इति विज्ञानमेवाद्वितीयं तत्वम् । यथाह्याचक्षते– नान्योऽनुभाव्यो बुद्ध्याऽस्ति तस्या नानुभवोऽपरः । ग्राह्यग्राहकवैधुर्यात् स्वयं सैव प्रकाशते' इति । 'अविभागोऽपि बुद्ध्यात्मा विपर्यासितदर्शनैः । ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते' इति च । सोऽयं विज्ञानाद्वैतवादोऽप्यनेनैव पथा निरस्त इत्याह– ब्रह्माद्यमद्वैतम् । आद्यशब्देन विज्ञानाद्वैतम् । अथ पाणिनिसदनाः भर्तृ-हरिवदनाः प्रणिगदन्ति । स्फोटाख्यमद्वैतं नस्तत्वमिति । यदाहुः– स्फोटाख्यो निरवयवो नित्यः शब्दो ब्रह्मेति । यदाह भर्तृहरिः– 'अनादिनिधनं ब्रह्म शब्दतत्वं यदक्षरम् । विवर्ततेऽर्थभावेन प्रक्रिया जगतो यतः' इति । स्फुट्यते व्यज्यते वर्णैरिति स्फोटः । स्फुटो भवत्यस्मादर्थ इति स्फोटः । अयमपि स्फोटवादोऽनेनैव नयेन शक्यनिरास इत्याह– ब्रह्माद्यमद्वैतम् । आद्यशब्देन स्फोटाद्वैतम् । अथापरे 'कालात् प्रसूतिं भूतानां मन्यन्ते कालचिन्तकाः'। कालाद् भवन्ति भूतानि काले तिष्ठन्ति काल एव लयमृच्छन्ति । तेनेदं सर्वं कालात्मकमिति । तेषामपीदमेवोत्तरम्– ब्रह्माद्यमद्वैतम् । आद्यशब्देन कालाद्वैतम् । शून्यं ब्रह्म विज्ञानं स्फोटः काल इति नाम्न्येवायमाटोपः । न वस्तुतत्वे । निर्विशेषं निराकारं तत्वमित्यैककण्ठ्यं हि सर्वेषाम् । नहि 'खपुष्पमिति नोच्यतेऽस्माभिः किन्तु गगनकुसमुमित्युच्यते, विष्णुपद-

पङ्कजमित्युच्यते, नभोनळिनमित्युच्यते, गन्धर्वनगरमित्युच्यते' इति नामान्तरकरणमात्रेण दोषनिस्तारः । विमतं न मीमांस्यम्, न ध्येयम्, न फलप्रदं च, विधिबुद्धेरविषयत्वात् । खपुष्पवत् । विमतं विधिबुद्धेरविषयः निर्विशेषत्वात् । योयो बुद्धिविषयः सस सविशेषः । यथा ज्ञानम्, यथा वा ज्ञाता, यथा वा ज्ञेयम् । विमतं विज्ञानस्फोटादिकम्, शास्त्रवाच्यं न भवति, अविषयत्वात् । यथा शशविषाणमित्यादि यथेष्टमूहनीयम् ॥ ४१-४२ ॥

आम्नायानाममानत्वे धर्मादेरप्रमाणता ।
धर्माद्यभावे नो मानं प्रत्यक्षैकप्रमाणिनः ॥ ४३ ॥

(प.दी.) 'नारायणोऽनन्तगुणो ब्रह्माख्यो वेदविदितः' इत्यत्र 'वेदवेदितः' इत्यनेन नारायणस्यानन्तगुणादित्वे वेद एव प्रमाणमित्युक्तम् । तत्र वेदप्रामाण्यविषये ये विप्रतिपद्यन्ते तान् प्रत्याह– **आम्नायानामि**ति । शाखाभेदाद् बहुवचनम् । **आम्नायनां** वेदानां **अमानत्वे** अङ्गीकृते सतीति शेषः । **धर्मादेः** धर्माधर्माद्यतीन्द्रियप्रपञ्चस्य **अप्रमाणता** प्रमाणशून्यता स्यात् । न विद्यते प्रमाणं यस्मिन् तदप्रमाणम् । अप्रमाणस्य भावोऽप्रमाणतेति विग्रहः । अयं भावः– सर्वसमयिभिरपि स्वस्वसमयप्रयोजनतया धर्मादिकं तावदवश्यमभ्युपगन्तव्यम् । तच्च प्रमाणेन विना न सिद्ध्यति । नच प्रत्यक्षं तत्र प्रमाणम् । धर्मादेरतीन्द्रियत्वात् । नापि केवलानुमानं धर्मादौ मानम् । तदभावेऽपि मानयितुं शक्यत्वात् । तस्मादन्ततः आगम एवैष्टव्यः । तत्रापि न पौरुषेयागमः प्रमाणम् । धर्मादिविषयागमस्य प्रणेतॄणां पुरुषाणामाप्तत्वे विप्रतिपत्तेः । तस्मादपौरुषेयागम एव तत्र प्रमाणम् । तस्य च प्रामाण्यानङ्गीकारे प्रमाणाभावाद् धर्माद्यसिद्धिः स्यात् । प्रमेयसिद्धेः प्रमाणाधीनत्वादिति । ननु भवेदिदं धर्मादिकमभ्युपगच्छतां पक्षे वेदप्रामाण्याभावे धर्माद्यसिद्धिः स्यादिति तेषामनिष्टापादनम् । यन्मते धर्मद्यभावः, प्रमाणं च प्रत्यक्षमेकमेव, तस्य चार्वाकस्य धर्माद्यसिद्धिर्नानिष्टेत्यत आह– **धर्मादी**ति । **प्रत्यक्षैकप्रमाणिनः**

प्रत्यक्षमेकमेव प्रमाणमित्यङ्गीकृतवतो वादिनः **धर्माद्यभावे मानं** प्रमाणं **नो** । धर्माद्यभावस्य रूपाद्यभाववत् प्रत्यक्षेण गोचरयितुमशक्यत्वादिति भावः ॥ ४३ ॥

(त.चं.) ननु वेदबाह्यत्वं भूषणं नतु दूषणम् । आम्नायानाममानत्वात् । 'अग्निहोत्रं त्रयो वेदास्त्रिदण्डं भस्मगुण्ठनम् । बुद्धिपौरुषहीनानां जीविकेति बृहस्पतिः' इति ह्याभणन्ति । आह– आम्नायानाम् । धर्माधर्मयोरस्तित्वे किं मानमिति पृच्छन्तं प्रत्यक्षैकप्रमाणं वयमपि पृच्छामः । मा भूद् धर्मे प्रमाणम् । वद तावद् धर्माभावे प्रमाणम् । अनुत्तरमेवोत्तरं तत्रभवतो बृहस्पतिगोत्रभूषणस्य ॥ ४३ ॥

न पौरुषेयं वचनं प्रामाण्येन विनिश्चितम् ।
पौरुषेयत्वतो यद्वद् वाक्यमुन्मत्तभाषितम् ॥ ४४ ॥

(प.दी.) ननु यदुक्तम्– वेदप्रामाण्याभावे धर्माद्यसिद्धिः स्यादिति, तदसत् । वेदेन विनाऽपि सर्वज्ञपुरुषप्रणीतागमेनैव तत्सिद्धेः । तदागमप्रामाण्यं चाप्तोक्तत्वगुणयोगादेव सिद्ध्यति । तथाच वेदप्रामाण्यानभ्युपगमेऽपि न धर्माद्यसिद्धिरित्यत आह– **न पौरुषेयमिति** । **पौरुषेयं** पुरुषप्रणीतं **वचनं प्रामाण्येन न विनिश्चितम्** । धर्मादेः प्रमाणत्वेन विनिश्चितं न भवति । कुतः? **पौरुषेयत्वतः** पुरुषप्रणीतत्वात् । किमिव? **उन्मत्तभाषितं वाक्यं यद्वत्** । विमतं बुद्धादिप्रणीतं वाक्यं धर्मादौ मानं न भवति पौरुषेयत्वात् । यद्यत् पौरुषेयं वाक्यं तत्तन्न धर्मादौ मानम् । यथोन्मत्तवचनमिति प्रयोगप्रकारः ॥ ४४ ॥

(त.चं.) कथमपौरुषेयप्रमाणानभ्युपगमे धर्माद्यसिद्धिः? आह– न पौरुषेयं वचनम् ॥ ४४ ॥

विमतः पुरुषोऽज्ञः स्यात् स्याच्चासौ विप्रलम्भकः ।
पुंस्त्वाच्चैत्रवदित्यस्ता सर्वज्ञे केवलानुमा ॥ ४५ ॥

(प.दी.) ननु बुद्धादीनां सर्वज्ञत्वात् कथं तद्वचनं मानं न स्यादित्यत आह– **विमत** इति । **विमतः** सर्वज्ञत्वाज्ञत्वाभ्यां वादिप्रतिवादिविमतिविषयः वेदाप्रामाण्यवादिभिर्बौद्धादिभिः सर्वज्ञत्वेनाङ्गीकृतः **पुरुषः** बुद्धादिः **अज्ञः स्यात्** विवक्षितार्थतत्वज्ञानरहितो भवितुमर्हति, **पुंस्त्वात्** पुरुषत्वात्, **चैत्रवत्** उन्मत्तचैत्रवत्[1]। **असौ विमतः पुरुषः विप्रलम्भकश्च स्यात्**, पुरुषत्वादेव। विप्रलम्भकत्वेन सम्मतपुरुषान्तरवत्। **इति** एवं **सर्वज्ञे** सर्वज्ञसाधकत्वेन परैः प्रयुज्यमाना **केवलानुमा** श्रुत्यादिसाहाय्यरहितानुमा, धर्माधर्मौ कस्यचित् प्रत्यक्षौ वस्तुत्वाद् घटवत्, परमाणवः कस्यचित् प्रत्यक्षाः वस्तुत्वाद् घटवदित्यादिरूपा **अस्ता** निरस्ता वेदितव्या ॥ ४५ ॥

(त.चं.) मा भूदुन्मत्तभाषितं प्रमाणम् । नन्वनुन्मत्ताः शास्त्रं प्रणिनिन्युः? आह– विमतः पुरषोऽज्ञः स्यात् ॥ ४५ ॥

दुःखाकरोति यद् दैवं दुःशास्त्रेषूग्र आग्रहः ।
दुःखाकरोऽतिघोरः स्याल्लोकोऽतस्तद्वतां ध्रुवः ॥ ४६ ॥

(भा.प्र.) दुःखाकरोति विपरीतीकरोति। 'दुःखात् प्रातिलोम्ये' इति डाच्॥

(प.दी.) एवमवैदिकशास्त्राणां दुःशास्त्रत्वमर्थादुक्त्वा तेषु दुःशास्त्रेष्वाग्रहवतां फलमाह– **दुःखाकरोती**त्यादिना । **दुःशास्त्रेषु उग्रः आग्रहः** अनिवर्त्य आग्रहः दुःशास्त्रेषु प्रामाण्यविस्रम्भरूप आग्रहः **दैवं** वेदादिसदागमप्रतिपाद्यं परदैवं भगवन्तं **दुःखाकरोति यत्** विपरीतं करोति यत्, वेदादिसदागमोक्तप्रकारादन्यथा भावयति यत्, **अतः** वैपरीत्यकरणात्, विपरीतोपासनादित्यर्थः, **तद्वतां** दैवविपरीतोपासनकारणदुःशास्त्राग्रहवतां पुरुषाणां **दुःखाकरः** दुःखानामाकरः, अत एव **अतिघोरः दुःसहः लोकः स्यात्** । पुनःकथम्भूतः? **ध्रुवः** अविनाशी च । दुःशास्त्रेष्वाग्रहेण दैवमन्यथोपास्य नित्यनिरतिशयदुःखमतिदुःसहं लोकमाप्नुवन्तीति भावः । 'दुःखाकरोति' इत्यत्र 'दुःखात्

१. 'उन्मत्त–' इत्यविवक्षितम् । चैत्रवदित्येव पर्याप्तम् । अनुन्मत्तोऽप्यज्ञो भवति ।

प्रातिलोम्ये' इति डाच् प्रत्ययः। 'दुःखशब्दात् डाच् प्रत्ययो भवति प्रातिलोम्ये वैपरीत्येऽर्थे गम्यमाने' इति डाच्प्रत्ययान्तो दुःखशब्दो वैपरीत्यवाचकः ॥

(त.चं.) दुःखाकरोति यद् दैवम् । दुःशास्त्रेषु उग्रः स्वभावत्वेन कदाऽप्य-निवर्तनीय आग्रहः दैवं नारायणाख्यं दुःखाकरोति प्रतिकूलीकरोति । न प्रसादयति भगवन्तमित्येतत् । तदेतदुक्तं भावप्रकाशिकायाम्– विपरी-तीकरोतीति । यः प्रसन्नो मोक्षदाता तमेवाप्रसन्नं तमोदातारं करोतीति । 'दुःखात् प्रातिलोम्ये' [५.४.६४]। दुःखशब्दात् प्रातिलोम्ये गम्यमाने डाच् प्रत्ययो भवति कृञो योगे। किं प्रातिलोम्यम्? यत् प्रतिकूलमानुलो-म्यस्य । किमानुलोम्यम्? स्वाम्यादेश्चित्तानुवर्तनम् । सुखाकरोति दैवम् । भगवतश्चित्तं प्रसादयतीत्यर्थः । स्वाम्यादेश्चित्तपीडनं प्रातिलोम्यम् । दैवं दुःखाकरोति भगवदाज्ञे श्रुतिस्मृती अपहाय तदाज्ञाविरुद्धमाचरतीत्यर्थः ॥

आस्माकेऽपेक्षिते पक्षे मोक्षं दद्यादधोक्षजः ।
यत्र स्वानन्दिनः सन्तः सेवन्ते विषयान् बहून् ॥ ४७ ॥

(प.दी.) एवं दुःशास्त्रेष्वाग्रहवतां फलमभिधायेदानीं सच्छास्त्रनिरतानां फलमाह– **आस्माक** इति। **आस्माके** अस्माभिरङ्गीकृतत्वेनास्मत्सम्बन्धिनि **पक्षे** सिद्धान्ते **अपेक्षिते** सति प्रमाणत्वेनाङ्गीकृते सति । तदुक्तप्रकारेण भगवदुपासने च कृते सतीति शेषः । **अधोक्षजः**, अधःकृतमक्षजं प्रत्यक्षं येन स तथोक्तः प्रत्यक्षागोचरः केवलागमसमधिगम्यः श्रीमन्नारायणः **मोक्षं दद्यात्**। कथम्भूतं मोक्षम्? **यत्र** यस्मिन् **सन्तः** मुक्तिगताः सज्जनाः **बहून् विषयान्** शब्दादीन् **सेवन्ते** अनुभवन्ति। कथम्भूताः? **स्वानन्दिनः** स्वस्व-रूपानन्दाविर्भाववन्तः ॥ ४७ ॥

(त.चं.) आस्माके तत्ववादे । 'अक्षण्वन्तः कर्णवन्तः सखायः' इति, 'जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वाऽज्ञातिभिर्वा' इति च श्रुतिः ॥ ४७ ॥

स्वव्याहत्यादिनोपेक्ष्या मुक्तिर्या निर्विशेषिता ।
कदेत्याद्यनुयोगेऽस्या विशेषः स्यान्ननूत्तरे ॥ ४८ ॥

(भा.प्र.) स्वव्याहत्यादिना प्रमाणाविषयत्वेन च। निर्विशेषब्रह्मता कदा कथमित्यनुयोगे ज्ञानोत्तरं ब्रह्मभावेनेत्याद्युत्तरे ज्ञानोत्तरकालसम्बन्धो ब्रह्मभाव इत्यादयो विशेषा मुक्तेः। तूष्णीम्भावे निग्रहस्थानम् ॥

(प.दी.) ननु निर्विशेषब्रह्मभाव एव हि मोक्षो नाम? तस्मात् तत्र कथमानन्दानुभवः सम्भवति? तथात्वे निर्विशेषत्वभङ्गादित्यत आह– **स्वव्याहत्यादिनेति**। **निर्विशेषिता** निर्विशेषब्रह्मतादात्म्यमाप्तस्य मुक्तस्य सर्वविशेषरहितता नाम **या मुक्तिः** सा **स्वव्याहत्यादिना** दोषेण, दूषितत्वादिति शेषः, **उपेक्ष्या**, विवेकिभिस्तादृङ्मुक्त्यर्थं साधनानुष्ठानं न कर्तव्यमित्यर्थः । अत्राऽदिशब्देनानुक्तिर्गृह्यते । निर्विशेषब्रह्मभावो मुक्तिरिति पक्षे कथं स्वव्याहत्यादि कथं चोपेक्ष्यतेत्यत आह– **कदेत्यादीति** । **मुक्तिः कदा** कथं वा **इत्याद्यनुयोगे** प्रश्ने, अस्माभिः कृते सतीति शेषः, **उत्तरे** प्रत्युत्तरे दत्ते सति, **अस्याः** मुक्तेः विशेषः **स्यान्ननु** । अयं भावः– कदा मुक्तिरित्यादिप्रश्नस्य ऐक्यज्ञानपरिपाकसमनन्तरं निर्विशेषब्रह्मभावो मुक्तिरित्यादि प्रत्युत्तरं मायिना दत्तं चेत्, ऐक्यज्ञानोत्तरकालसम्बन्धादिविशेषवत्त्वं स्यान्मुक्तेः । ततश्च निर्विशेषिता मुक्तिरित्युक्ते स्वव्याहतिः स्यात् । कदेत्यादिप्रश्नस्य प्रत्युत्तरं न दत्तं चेत् तूष्णीम्भावे अनुक्त्याख्यनिग्रहस्थानं स्यादिति ॥ ४८ ॥

(त.चं.) अनुयोगः पृच्छा ॥ ४८ ॥

अपि बुद्ध्यादिरहितः पुरुषार्थी न सर्वथा ।
निखिलानुभवाभावात् पुत्तळीकापुरोगवत् ॥ ४९ ॥

(भा.प्र.) अपीत्यादिना निर्विशेषमोक्षः, वैशेषिकादिविवक्षितो बुद्ध्यादिविरही च ॥

(प.दी.) निर्विशेषिता मोक्ष इति पक्षे दोषान्तरं वदन्नेव वैशेषिकादिभिरङ्गीकृतं मुक्तस्य बुद्ध्यादिराहित्यं च निराकरोति– **अपीत्यादिना** । निर्विशेषब्रह्मभावो मोक्ष इति पक्षे दोषान्तरसमुच्चयार्थः **अपिशब्दः** । **बुद्ध्यादिरहितः** बुद्ध्याद्यन्तःकरणरहितः चक्षुरादिबाह्यकरणरहितः, अत एव तत्तद्विशेषभोगरहितश्च मुक्तः **सर्वथा पुरुषार्थी** पुरुषार्थवान् **न** भवति । कुतः? **निखिलानुभवाभावात्** बाह्यान्तरसर्वज्ञानमात्रशून्यत्वात् । किमिव? **पुत्तळीकापुरोगवत्,** दार्वादिकृतप्रतिमा[दि]वत् । एवमेव वैशेषिकपक्षेऽपि मुक्तस्य बुद्ध्यादिराहित्यात् स मुक्तोऽपि **पुरुषार्थी न** ॥ ४९ ॥

(त.चं.) पुत्तली काष्ठप्रतिमा ॥ ४९ ॥

ज्ञानप्रयत्नवाञ्छावानीशो न ह्यशुभं भजेत् ।
स्वसामर्थ्येन तेनैव तं च कुर्यात् स तादृशम् ॥ ५० ॥

(भा.प्र.) ज्ञानेत्यादिना चरममेव[१] **। तं च तादृशमेव कुर्यात्, जीवं ज्ञानप्रयत्नवाञ्छावन्तमेवाशुभभोगमभुञ्जानं कुर्यादीश्वरः ॥**

(प.दी.) मुक्तस्य बुद्ध्यादिराहित्याङ्गीकारे मुक्तेरपुरुषार्थता दोष उक्तः । इदानीमीश्वरसारूप्यमाप्तस्य मुक्तस्य बुद्ध्यादिराहित्यं युक्तिविरुद्धं चेति वक्तुं तदुपयुक्तमीश्वरस्वरूपं तावन्निरूपयति– **ज्ञानेत्यादिना** । ईशो हि ज्ञानप्रयत्नेच्छादिगुणयुक्तोऽङ्गीक्रियते । सः **ज्ञानप्रयत्नवाञ्छावान् ईशः अशुभं न भजेद् हि** । हिशब्दः प्रसिद्धिद्योतकः । ईशस्तावद् दुःखं न भुङ्क्त इति प्रसिद्धम् । अन्यथेशत्वव्याघातादित्यर्थः । ईश्वरस्य दुःखाद्यभावः किं समर्थोपासनाद्युपायेन? नेत्याह– **स्वसामर्थ्येनेति** । ईश्वरस्य दुःखाभोक्तृत्वं **स्वसामर्थ्येन** एव । नतूपायान्तरेणेत्यर्थः । अस्तु नामेश्वर ईदृशः । मुक्तस्य बुद्ध्यादिराहित्यं नास्तीत्यस्मिन् प्रकृते किमायातमित्यत आह– **तेनैवेति** । **तेनैव** स्वसामर्थ्येनैव **सः** ईश्वरः **तं च** स्वोपासकं च **तादृशं**

१.पूर्वश्लोकप्रसक्तयोश्चरमं वैशेषिकाणामेव पक्षं कटाक्षयतीत्यर्थः ।

ज्ञानप्रयत्नादिमन्तमशुभभोगवर्जितं च **कुर्यात्**, अन्यथा मुक्तस्येश्वरसारूप्यायुक्तेरित्यर्थः। तस्मान्मुक्तस्य बुद्ध्यादिराहित्यं युक्तिविरुद्धमिति भावः ॥ ५० ॥

(त.चं.) ननु बुद्धिमानीश्वरः कथं स्वभक्तं बुद्धिहीनं कुर्यात्। नूनं पुरैव स बुद्धिहीनः, य एतादृशं भजति पुरा ॥ ५० ॥

दुःखव्याप्तं सुखं बद्धे दृष्ट्वा मुक्ते निरस्यता।
स्वरूपं च निरस्येत शून्यवादी तदा भवेत् ॥ ५१ ॥

(भा.प्र.) **स्वरूपं च बद्धे दुःखव्याप्तं दृष्टम्। तथा चायं प्रयोगः– विमतो मुक्तः स्वरूपशून्यो दुःखरहितत्वात्, यः स्वरूपशून्यो न भवति स दुःखरहितो न भवति यथा संसारीत्यतिप्रसङ्गः ॥**

(प.दी.) ननु 'यत्र स्वानन्दिनः सन्तः' इत्यत्र मुक्तस्य यः सुखभोग उक्तः स न घटते। मुक्तस्य सुखित्वे दुःखित्वापातात्। सुखदुःखयोरविनाभूतत्वात्। तथाचात्र प्रयोगः– विमतो मुक्तः सुखी न भवति दुःखरहितत्वात्। यः सुखी स दुःखरहितो न भवति यथा संसारी। नचासौ मुक्तो दुःखरहितो न भवति तस्मान्न सुखीति। अत आह– **दुःखव्याप्तमिति**। **बद्धे** संसारिणि वर्तमानं **सुखं दुःखव्याप्तं** दुःखाविनाभूतं **दृष्ट्वा मुक्ते** संसारान्मुक्ते **निरस्यता** सुखित्वे दुःखित्वापातभयात् सुखं निराकुर्वता वादिना **स्वरूपं च निरस्येत**। मुक्ताविति शेषः। संसारिणि सुखदुःखयोः साहचर्यदर्शनमात्रेण मुक्तावपि तयोरविनाभावं पश्यता स्वरूपस्यापि ताभ्यां साहचर्यदर्शनान्मुक्तौ सुखदुःखानङ्गीकारवत् स्वरूपं च नाङ्गीक्रियेतेति भावः। बाढमिति चेत् तत्राऽह– **शून्येति**। **तदा** मुक्तस्वरूपस्य निरासाङ्गीकारे **शून्यवादी भवेत्**। अयमत्र प्रयोगः– विमतः स्वरूपशून्यः, चेतनत्वे सति दुःखरहितत्वात्, यः स्वरूपशून्यो न भवति स चेतनत्वे सति दुःखरहितोऽपि न भवति, यथा संसारीति। तस्मान्मुक्तस्य बुद्ध्यादिराहित्य-

साधिकाया युक्तेराभासत्वान्मुक्तस्य बुद्ध्यादिमत्त्वं स्वानन्दित्वं च स्थितमेतत् ॥ ५१ ॥

(त.चं.) मुक्ते सुखं निरस्यता ॥ ५१ ॥

ननु विप्रतिपन्नः स्यादूर्मिमान् देहवत्त्वतः ।
चैत्रो यथेत्युपाधिः स्यात् तत्र चाशुद्धदेहिता ॥ ५२ ॥

(भा.प्र.) एवं ज्ञानानन्दादि साधयित्वा देहादि साध्यते मुक्तौ – नन्वित्यादिना॥

(प.दी.) एवं मुक्तस्य बुद्ध्यादिमत्त्वे सिद्धेऽर्थात् सिद्धं देहवत्त्वम् । तत्र शङ्कते– **नन्वित्यादिना। विप्रतिपन्नः** मुक्तजीवः **ऊर्मिमान् स्यात्** षडूर्मिमान् भवितुमर्हति । **देहवत्त्वतः** देहवत्त्वात् । **चैत्रो यथा** चैत्रवत् । **इतिशब्दः** शङ्काग्रन्थपरिसमाप्तौ । अयमभिप्रायः– मुक्तस्य यदि बुद्ध्यादिकं स्यात् तर्हि तदाश्रयो देहोऽपि स्यात् । देहवत्त्वे चोर्मिमत्त्वमपरिहार्यम् । देहिनः संसारिणः ऊर्मिमत्त्वदर्शनात् । ऊर्मिमत्त्वे च मुक्तत्वव्याघात इति मुक्तस्योर्मिमत्त्वपरिहाराय देहाभावोऽङ्गीकर्तव्यः । देहाभावे च बुद्ध्यादिमत्त्वं दुर्घटमिति वैशेषिकादयो मन्यन्त इति । एवं परोपन्यस्तस्य देहवत्त्वानुमान-स्योपाधिमाह– **उपाधिरिति । तत्र च** ऊर्मिमत्त्वे **अशुद्धदेहिता** प्राकृतदेहित्वं **उपाधिः स्यात्** । ऊर्मिमत्त्वस्याशुद्धदेहित्वमुपाधिः प्रयोजक इत्यर्थः । प्रयोजको ह्युपाधिरित्युच्यते । उपाधेश्च पक्षाद् व्यावृत्तिः स्वव्यावृत्त्या पक्षात् साध्य-व्यावर्तनशक्तिश्चापेक्षिता । अत्राशुद्धदेहित्वस्योपाधेः पक्षीकृतान्मुक्ताद् व्यावृत्तिः,[१] स्वव्यावृत्त्या साध्यस्योर्मिमत्त्वस्य व्यावर्तकत्वादस्त्येवोपाधि-त्वम् । यत्राशुद्धदेहित्वाभावस्तत्रोर्मिमत्त्वाभावः, यथेश्वर इति व्याप्तिसम्भ-वात् । एवं चोपाध्यभावः साध्याभावसाधने हेतुर्भवति । तथाच प्रयोगः– विमतो मुक्तः ऊर्मिमान् न भवति, अशुद्धदेहरहितत्वात्, ईश्वरवदिति । एवं च देहवत्त्वानुमानस्य सोपाधिकत्वान्न तेन साध्यसिद्धिरिति ॥ ५२ ॥

---

१. 'व्यावृत्तेः' इति स्वरसम् ।

(**त.चं.**) शोकमोहौ जराव्याधी क्षुत्पिपासे च षडूर्मय इत्युक्तम् ॥

अनैकान्तिकता हेतोर्देहवत्त्वादधीशितुः ।
सोऽदेहश्चेदनिच्छादिर्भवेच्छशविषाणवत् ॥ ५३ ॥

(**प.दी.**) एवं च देहवत्त्वानुमानस्योपाधिग्रस्तत्वमुक्त्वेदानीमनैकान्तिकतामाह– **अनैकान्तिकता हेतोरि**ति । **हेतोः** ऊर्मिमत्त्वे प्रयुक्तस्य देहवत्त्वस्य हेतोः **अनैकान्तिकता** स्यात् । कुतः? **अधीशितुः** ईश्वरस्य **देहवत्त्वात्** । अयमभिप्रायः– पक्षत्रयवृत्तिर्हेतुरनैकान्तिक इत्युच्यते । ऊर्मिमत्त्वे प्रयुक्तो देहवत्त्वहेतुश्च पक्षीकृते मुक्ते वर्तते । मुक्तस्य ज्ञानानन्दात्मकदेहाङ्गीकारात् । ऊर्मिमत्त्वेन सम्प्रतिपन्ने सपक्षे संसारिणि च वर्तते । साध्यस्योर्मिमत्त्वस्याभावाधिकरणत्वेन विपक्ष ईश्वरे च वर्तते । तस्मादनैकान्तिक इति । ननु भवेद् देहवत्त्वहेतोरनैकान्तिकता यदीश्वरस्य देहवत्त्वं स्यात् । तदेव नाभ्युपगच्छामः । तस्माद् विपक्षवृत्तित्वाभावात् कथमनैकान्तिकतेत्यत आह– **स** इति । **सः** ईश्वरः **अदेहश्चेत्** देहवर्जितश्चेत् **अनिच्छादिः** इच्छाज्ञानप्रयत्नादिगुणरहितोऽपि **भवेत्** । किमिव? **शशविषाणवत्** । विमतः ईश्वरः, इच्छादिरहितः, देहवर्जितत्वात्, **शशविषाणवत्** इत्यनुमानं वा, यद्यदेहः स्यात् तर्हीच्छादिरहितोऽपि स्यात् शशविषाणवदित्यापादनं वाऽत्राभिप्रेतम् ॥ ५३ ॥

(**त.चं.**) न केवलमुपाधिपराहतिः । अनैकान्तिकता च हेतोः ॥ ५३ ॥

ज्ञात्रादिरूपमस्य स्याद् वैलक्षण्याय चेत् ततः ।
तदेव देहशब्दोक्तं न ह्यसौ प्राकृताकृतिः ॥ ५४ ॥

(**भा.प्र.**) **ज्ञात्रादिरूपमेव देहश्चेत् स्यान्नाम ॥**

(**प.दी.**) नन्वीश्वरस्य ज्ञात्रादिरूपसद्भावात् कथं शशविषाणादिसाम्यमित्यत आह– **ज्ञात्रादी**ति । **अस्य** ईश्वरस्य **ततः** शशविषाणादेः **वैलक्षण्याय**

विलक्षणत्वसिद्धये **ज्ञात्रादिरूपं स्यात् चेत्** अङ्गीक्रियते चेत्, तर्हि ईश्वरस्य देहवत्त्वं त्वयाऽप्यङ्गीकृतमेव । कुत इति चेदाह– **तदेवे**ति । **तदेव** ज्ञात्रादिरूपमेव **देहशब्दोक्तम्** । अस्माभिरिति शेषः । ईश्वरस्य ज्ञात्रादिरूपमस्तीति त्वया यद्युच्यते तदेवास्माभिर्देहशब्देनोच्यत इत्यर्थः । तदेवोपपादयति– **नही**ति । **असौ** ईश्वरः **प्राकृताकृतिः** प्राकृतदेहवान् **नहि** । ईश्वरस्य देहवत्त्वमङ्गीकुर्वद्भिरस्माभिः प्राकृतदेहवत्त्वं नाङ्गीक्रियते हीत्यर्थः । तथाच वस्तुनि विवादाभावान्नाममात्रे विवादस्याप्रयोजकत्वात् सिद्धमीश्वरस्य देहवत्त्वमिति देहवत्त्वहेतोरनैकान्तिकतातादवस्थ्यमिति ॥ ५४ ॥

(त.चं.) तदेव देहशब्दोक्तम् । रूपवानेव हि देहवानित्युच्यते ॥

एवं स्वरूपदेहत्वं मुक्तस्याप्युररीकृतम् ।
नानिष्टभोगस्तेन स्यात् प्राकृतक्षेत्रसम्भवः ॥ ५५ ॥

(प.दी.) अस्तु तर्हीश्वरस्याप्राकृतज्ञानानन्दाद्यात्मकस्वरूपभूतदेहवत्त्वम् । तथाऽपि प्रकृते मुक्तस्य देहवत्त्वे किमायातमित्यतः प्रकृते योजयति– **एवमि**ति । **मुक्तस्यापि एवं** ईश्वरवत् **स्वरूपदेहत्वं** स्वरूपभूताप्राकृतज्ञानानन्दाद्यात्मकत्वं **उररीकृतं** अङ्गीकृतम्, अस्माभिरिति शेषः । तच्चेश्वरसरूपत्वादेव सिद्ध्यति । अत एवेश्वरवदूर्मिमत्त्वाभावो बुद्ध्यादिमत्त्वं स्वानन्दभोगश्चास्तीति सिद्धम् । मुक्तस्य सुखभोग एवास्ति न दुःखभोग इत्येतदुपपादयति– **नानिष्टे**ति । अत्रापि 'एवम्' इति सम्बध्यते । **तेन एवं** ईश्वरवत् मुक्तस्यापि **अनिष्टभोगः न स्यात्** । कथम्भूतः? **प्राकृतक्षेत्रसम्भवः** । प्राकृतशरीरबन्धजन्य इत्यर्थः । अनेनैतदुक्तं भवति– यदुक्तं परेण मुक्तस्य सुखित्वे दुःखित्वापात इति, तदसत् । दुःखभोगस्य प्राकृतशरीरनिमित्तकत्वात् । मुक्तस्य च प्राकृतशरीराभावान्न दुःखभोगः । किन्तु केवलपरमानन्दभोग एवेति ॥ ५५ ॥

(त.चं.) दुःखव्याप्तं सुखं प्राकृतदेह एव । न स्वरूपदेहे । तेन नानिष्टभोगः संसारान्मुक्तस्य ॥ ५५ ॥

विमतो नावयववान् विनाशित्वप्रसङ्गतः ।
पटवच्चेदवयवा निरस्यन्तेऽत्र कीदृशाः ॥ ५६ ॥

(भा.प्र.) तत्रापि नावयवितेत्याशङ्क्य निरस्यते– विमत इत्यादिना ॥

(प.दी.) ननु 'एवं स्वरूपदेहत्वम्' इत्यत्र यदुक्तं मुक्तस्य देहात्मकत्वं तदयुक्तम् । देहस्य सावयवत्वात् तदात्मकस्य मुक्तस्य च सावयवत्वापातात् । सावयवत्वे च विनाशित्वं स्यादिति शङ्कते– **विमत** इत्यादिना । **विमतः** सावयवत्वनिरवयवत्वाभ्यां विमतिविषयः मुक्तः **अवयववान् न** भवति । कुतः? **पटवत् विनाशित्वप्रसङ्गतः** । सावयवत्वे विनाशित्वापातान्न सावयव इत्यर्थः । अयमत्र प्रयोगप्रकारः– विमतो मुक्तो निरवयवः, अविनाशित्वात्, योऽविनाशी स निरवयवः, यथा परमाणुरिति । यद्यवयवी स्यात् तर्हि विनाशी स्यात्, यथा पट इति विपक्षे बाधकतर्कश्च । तस्मान्निरवयवत्वान्न मुक्तस्य सावयवदेहात्मकत्वमिति । तदेतत् सामान्यतोऽनूद्य निराकरोति– **चे**दित्यादिना । एवमनुमानेन बाधकतर्केण च मुक्तस्यावयवा निरस्यन्ते **चेत् अत्र** मुक्ते **कीदृशा अवयवा निरस्यन्ते**? अत्र 'कीदृशाः' इत्यनेनावयवानामनेकविधत्वं सूचितम् । तेनैव विकल्पोऽपि सूचितः– भिन्नावयवनिरासो वा क्रियते? अभिन्नावयवनिरासो वा? इति ॥ ५६ ॥

(त.चं.) एवमेव प्राकृतावयवानामेव विनाशित्वव्याप्तिर्न स्वरूपावयवानामिति स्वरसम् । अथापि शङ्कमानमाह– विमत इत्यादिना ॥ ५६ ॥

सिद्धसाधनता हेतोस्ते भिन्नाश्चेदचिन्मयाः ।
आत्मनो भेदरहिता एष्टव्या एव वादिभिः ॥ ५७ ॥

(प.दी.) तत्राऽद्यं दूषयति– **सिद्धसाधनते**ति । **ते** अवयावाः **भिन्नाः अचिन्मयाः** निरस्यन्ते **चेत्** तर्हि हेतोः निरवयवत्वसाधकाविनाशित्वहेतोः **सिद्धसाधनता** स्यात् । मुक्तस्य भिन्नावयवराहित्यस्यास्माकं सिद्धत्वादिति

भावः । द्वितीयं निराकरोति– **आत्मन** इति । **आत्मनः** जीवस्य **भेदरहिताः** अवयवाः **वादिभिः एष्टव्याः** अङ्गीकर्तव्याः **एव** । वादित्वसाम्यात् त्वयाऽप्य-भिन्नावयवानामङ्गीकार्यत्वान्न तन्निराकरणं युक्तमिति भावः ॥ ५७ ॥

(त.चं.) नावयववानिति किं साध्यते? न सन्ति भिन्ना जडावयवा इति? उत न सन्ति स्वरूपावयवा अपीति । आद्ये सिद्धसाधनता । द्वितीयं तु न साध्यसाधनम् । यतोऽनिच्छताऽपि भवता स्वरूपावयवा अङ्गीकर्तव्या एव ॥ ५७ ॥

परमाण्वादिदेशेषु व्याप्त्यै व्यामादिकेष्वपि ।
यथाऽऽत्मनः प्रदेशाः स्युस्तेषां नोऽवयवास्तथा ॥ ५८ ॥

(प.दी.) ननु वैशेषिकैः कुत आत्माभिन्ना अवयवा अङ्गीकर्तव्या इत्यत आह– **परमाण्विति । तेषां** वैशेषिकाणां पक्षे **आत्मनः** परमात्मनः, जीवात्मनो वा, **व्याप्त्यै** व्याप्तिसिद्ध्यर्थं **परमाण्वादिदेशेषु** पराणुद्व्यणुकत्र्यणुकाद्य-वस्थानयोग्येषु स्थलेषु, **व्यामादिकेष्वपि**, व्यायतं हस्तद्वयं व्याम इत्युच्यते, व्यामादिस्थलेषु च **आत्मनः प्रदेशाः** अवयवाः **यथा स्युः नः** अस्मत्पक्षे **अवयवाः** अभिन्नाः **तथा स्युः** । आत्मनो व्याप्तिमङ्गीकुर्वतां वैशेषिकाणां पक्षे परमाण्वाद्यल्पस्थले व्यामादिबहळस्थलेषु चाऽत्मनः प्रदेशा अङ्गी-कर्तव्याः । अन्यथा व्याप्त्यसम्भवात् । ते चाऽत्मप्रदेशा आत्माभिन्ना एवा-ङ्गीकर्तव्याः । अन्यथा एकस्याऽत्मनः सर्वव्याप्त्यसम्भवात् । एवं च सति तेषां पक्षे यथाऽऽत्माभिन्ना आत्मप्रदेशास्तथाऽस्मत्पक्षेऽप्यात्मनः मुक्त-जीवस्यावयवास्तदभिन्नाः सुखज्ञानादिगुणा एव करचरणाद्यात्मकाः सम्भवेयुरिति ॥ ५८ ॥

(त.चं.) कुतोऽङ्गीकर्तव्याः? परमाण्वादिदेशेषु । व्यामः, 'मारु' [ಮಾರು] इति भाषायाम् ॥ ५८ ॥

मुक्तो रूपादिवित् सत्त्वाज्जडान्यत्वे सतीशवत् ।
दृष्टान्तोऽसाध्यविकलस्तस्य सर्वज्ञताग्रहात् ॥ ५९ ॥

(भा.प्र.) मुक्त इत्यादिना इन्द्रियवत्त्वं प्रसाध्यते ॥

(प.दी.) मुक्तस्यावयववत्त्वं प्रसाध्येदानीमिन्द्रियवत्त्वं साध्यते– **मुक्त** इत्यादिना । **मुक्तः रूपादिवित्** रूपादिविषयज्ञानवान् । **जडान्यत्वे सति सत्त्वात् ईशवत्** । नन्वीश्वरस्य रूपादिज्ञानाभावाद् दृष्टान्तः साध्यविकल इत्यत आह– **दृष्टान्त** इति । ईशवदित्ययं **दृष्टान्तः असाध्यविकलः** साध्यविकलो न भवति । कुत इत्यत आह– **तस्येति** । **तस्य** ईश्वरवादिभिरङ्गीकृतस्येश्वरस्य तैस्तैर्वादिभिः **सर्वज्ञताग्रहात्** सर्वज्ञताङ्गीकारात् । रूपादेरपि सर्वान्तःपातित्वात् तद्विज्ञानाभावे सर्वज्ञताऽसम्भवादिति भावः ॥ ५९ ॥

(त.चं.) दृष्टान्तः न रूपादिवित्त्वेन साध्येन विकलः । यदि रूपादिविन्न स्यात् कथमथ सर्वज्ञः स्यात् ॥ ५९ ॥

ईश्वरो न सुखी तेन रूपाद्यनुभवन्नपि ।
दुःखप्रसङ्गादिति मा वादि तद्व्याप्तिदूषणात् ॥ ६० ॥

(प.दी.) ननु सर्वज्ञत्वाद् रूपादिज्ञानवानपीशो न रूपाद्यनुभवजन्यसुखवान् । सुखित्वे दुःखित्वापातात् । 'मुक्तो रूपादिवित् सत्त्वात्–' इत्यत्र च मुक्तस्य रूपादिज्ञानजन्यसुखानुभवो भवद्भिर्विवक्षितः । तस्मात् कथं दृष्टान्तः साध्यविकलो न भवतीत्याशङ्क्य परिहरति– **ईश्वर** इत्यादिना । **ईश्वरः रूपादि अनुभवन्नपि** जानन्नपि **तेन** रूपादिज्ञानेन **सुखी न** । कुतः? **दुःखप्रसङ्गात्** सुखित्वे दुःखित्वापातात् । **इति मा वादि** न ब्रूयात् । कुतः? **तद्व्याप्तिदूषणात्** । यः सुखी स दुःखी यथा चैत्र इति तदुक्ताया व्याप्तेर्दूषणात् । 'ननु सौख्यादिमान् नेशो दुःखादिरहितत्वतः' इत्याशङ्क्य, 'एवं चेद् विमतो ज्ञानी न भ्रान्तिरहितत्वतः' इति सत्प्रतिपक्षत्वेन च, 'तस्यैवा-

मन्दमानन्दं वदन् नाश्नात्यसौ कथम्' इति कालात्ययापदिष्टत्वेन च दुःखादि-रहितत्वानुमानस्य प्रागेवास्माभिर्दूषितत्वादिति भावः । तस्मादीश्वरस्य रूपाद्यनुभवजन्यसुखसद्भावाद् दृष्टान्तो न साध्यविकल इति फलितार्थः ॥

(त.चं.) यथा ज्ञाने सत्यपि नाज्ञानम्, सर्वज्ञत्वात् । एवं सुखे सत्यपि न दुःखम् । पूर्णसुखत्वात् ॥ ६० ॥

दृष्टान्तो यस्य नेष्टोऽयं तस्य स्याद् व्यतिरेकवान् ।
शिलावदित्यतः शुद्धचिद्देहेन्द्रियभोग्यसौ ॥ ६१ ॥

(भा.प्र.) भाट्टादेरनीश्वरत्वादयं दृष्टान्तो नेष्टश्चेत् ॥

(प.दी.) ननु भवेदिदम्–'मुक्तो रूपादिवित् सत्त्वाज्जडान्यत्वे सतीशवत्' इति सर्वज्ञेश्वरदृष्टान्तेन मुक्तस्य रूपादिज्ञानसमर्थनं सर्वज्ञमीश्वर-मभ्युपगच्छतः प्रति । ये तु निरीश्वराः भाट्टाद्यास्तेषामयं दृष्टान्तो न सम्मत इति न तान् प्रति समर्थनं युक्तमित्यत आह– **दृष्टान्त** इति । **यस्य** वादिनः **अयं दृष्टान्तो नेष्टः** सर्वज्ञेश्वरदृष्टान्तो न सम्मतः **तस्य शिलावदिति व्यति-रेकवान् स्यात्** । साध्यसाधनाभावविशिष्टोऽन्यः कश्चन दृष्टान्तो भवति । यथा– मुक्तो रूपादिज्ञानवान् जडान्यत्वे सति सत्त्वात् । यो रूपादिज्ञानवान्न भवति स जडान्यत्वे सति सन्नपि न भवति यथा शिलेति व्यतिरेकदृष्टान्तो भवतीत्यर्थः । निरीश्वरोऽपि यो भाट्टादिर्वेदप्रामाण्यमभ्युगच्छति तं प्रति – 'यत्राऽनन्दाश्च मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राऽऽप्ताः कामास्तत्र माममृतं कृधि', 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः स्त्रीभिर्वा यानैर्वा ज्ञातिभिर्वा' इत्यादिवेदवाक्यं मुक्तस्य ज्ञानरूपादिसद्भावे प्रमाणत्वेनोद-हर्तव्यम् । एवं मुक्तस्य देहवत्त्वमिन्द्रियवत्त्वमानन्दभोगवत्त्वं च प्रसाध्येदा-नीमुपसंहरति– **अत** इति । **अतः** मुक्तस्य देहेन्द्रियादिमत्त्वे साधकप्रमाण-सद्भावाद् बाधकाभावाच्च **असौ** मुक्तः **शुद्धचिद्देहेन्द्रियभोगी** निर्दोष-ज्ञानात्मकदेहेन्द्रियभोगवान् ॥ ६१ ॥

(त.चं.) यस्तु सर्वज्ञमीश्वरं नाभ्युपैति तस्य व्यतिरेकवान् दृष्टान्तः स्यात् शिलावदिति ॥ ६१ ॥

स्वानन्दविषये मोक्षे वेदोक्ते युक्तिसाधिते ।
द्वेषोऽयं वादिनां कस्मात् तद्विरुद्धेऽथवाऽऽग्रहः॥ ६२ ॥

(भा.प्र.) 'यत्राऽनन्दाश्च मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राऽप्ताः कामास्तत्र मामृतं कृधि' इति वेदोक्तिः ॥

(प.दी.) एवमस्मदुक्तप्रकारेण मुक्तस्याप्राकृतदेहेन्द्रियभोगवत्त्वे प्रमाणसिद्धेऽपि वादिनामेवंविधमोक्षानभ्युपगमो न प्रमाणमूलः, अपि तु द्वेषमूल एव, तथा तद्विरुद्धमोक्षाभ्युपगमश्च दुराग्रहमूल एवेत्याह– **स्वानन्देति** । **स्वानन्दविषये** । स्वानन्दः स्वरूपानन्दः । स एव विषयो भोग्यो यस्मिन् स स्वानन्दविषयः तस्मिन् । पुनः कथम्भूते? **वेदोक्ते** । 'यत्राऽनन्दाश्च मोदाश्च मुदः प्रमुद आसते । कामस्य यत्राऽप्ताः कामास्तत्र माममृतं कृधीन्द्रायान्दो परिस्रव', 'अक्षण्वन्तः कर्णवन्तः सखायो मनोजवेष्वसमा बभूवुः', 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः','सोऽश्नुते सर्वान् कामान्त्सह ब्रह्मणा विपश्चिता' इत्यादिवेदवाक्यैरुक्ते निर्दुःखपरमानन्दानुभवरूपतया प्रतिपादिते । न केवलमेतावत्– **युक्तिसाधिते** । 'ज्ञानप्रयत्नवाञ्छावानीशो न ह्यशुभं भजेत् । स्वसामर्थ्येन तेनैव तं च कुर्यात् स तादृशम्', 'सोऽदेहश्चेदनिच्छादिर्भवेच्छशविषाणवत्', 'मुक्तो रूपादिवित् सत्त्वाज्जडान्यत्वे सतीशवत्' इत्यादियुक्तिभिश्च साधिते **मोक्षे वादिनामयं द्वेषः कस्मात्?** किंमूलकः? **अथ तद्विरुद्धे** अस्मदुक्तमोक्षविरुद्धे निर्विशेषब्रह्मत्वादिरूपे **मोक्षे आग्रहो वा कस्मात्?** सोऽपि किम्मूल इति । तत्र च स्वस्वसमयपक्षपातमन्तरेण न किञ्चिदपि मूलं पश्याम इत्यर्थः ॥ ६२ ॥

(त.चं.) कस्माद्धेतोः? ऋते स्वाभाविकात् तामसत्वात् ॥ ६२ ॥

ततः स्वतः प्रमाणेन देवो वेदेन वेदितः ।
विष्णुर्मोक्षस्य दातेति विश्वं भवति शोभनम् ॥ ६३ ॥

(प.दी.) 'आस्माकेऽपेक्षिते पक्षे मोक्षं दद्यादधोक्षजः' इत्युक्तमुपसंहरति –**तत** इति । **ततः** अस्मन्मतविरुद्धानामप्रामाणिकत्वात् प्रमाणविरुद्धत्वाच्च तानि मतान्यनादृत्य **विष्णुः** व्याप्तो नारायणः **मोक्षस्य दाता इति** एवमङ्गीकारे सति **विश्वं शोभनं** तत्तदपेक्षितं मोक्षान्तमखिलं मङ्गलं **भवति** । कथम्भूतो विष्णुः? **स्वतः प्रमाणेन** स्वप्रामाण्यग्रहणार्थं स्वव्यतिरिक्तप्रमाणान्तर-निरपेक्षेण **वेदेन वेदितः** स्वातन्त्र्याद्यशेषगुणपरिपूर्णतया निर्दोषतया प्रतिपादितः **देवः** क्रीडादिगुणविशिष्टः ॥ ६३ ॥

(त.चं.) वेदैर्देवत्वेन वेदितो विष्णुर्मोक्षस्य दातेति सर्वं शोभनम् । 'दिवु क्रीडाविजिगीषाव्यवहारद्युतिस्तुतिकान्तिगतिषु' इति प्राचीनम् ॥ ६३ ॥

इत्यादीन् दर्शयन्त्यर्थान् व्याख्योपन्याससंयुता ।
त्रिविक्रमार्येण तदा विश्वाभिज्ञस्य शुश्रुवे ॥ ६४ ॥

(प.दी.) 'तदा तदाननाम्भोजाद् वृत्तोपन्यासभारती' इत्याद्युक्तमुप-संहरन्नेव 'त्रिविक्रमार्यं सोऽपश्यत् प्रतिवीरमिवाग्रतः' इति प्रकृतमनुसरति– **इत्यादीन् दर्शयन्त्यर्थानि**त्यादिना । **इत्यादीन्** 'प्रधानमपराधीनं कारणं परिणामि यत्' इत्यादीन् **अर्थान्** स्वपक्षसाधनपरपक्षनिराकरणरूपान् प्रमेयविशेषान् **दर्शयन्ती विश्वाभिज्ञस्य** श्रीपूर्णप्रज्ञाचार्यस्य **व्याख्या त्रिविक्रमार्येण तदा शुश्रुवे** श्रुता । कथम्भूता? **उपन्याससंयुता** ॥ ६४ ॥

(त.चं.) उपन्याससंयुता । उपपन्नतया वाचो न्यसनमुपन्यासः ॥ ६४ ॥

अथ प्रायुङ्क्त विविधान् बोधचापगुणेरितान् ।
विपक्षयुक्तान् वीर्येण तीक्ष्णांस्तर्कशरानसौ ॥ ६५ ॥

(प.दी.) अथेति । **अथ** श्रीमध्वोपन्याससमाप्त्यनन्तरं **असौ** त्रिविक्रमार्यः **विविधान् तर्कशरान् वीर्येण प्रायुङ्क्त** प्रयुयोज । कथम्भूतान्? **बोधचापगुणेरितान्** बोधात्मकचापस्य गुणेनेरितान् प्रेरितान् । **विपक्षयुक्तान्** श्रीमध्वमतविरुद्धसिद्धान्तयुक्तान् । **तीक्ष्णान्** प्रतिपक्षप्रतिक्षेपकान् । कश्चिद् योद्धा यथा प्रतिवीरनिरासाय चापगुणेरितान् पक्षिपक्षयुक्तान् तीक्ष्णान् निशितान् विविधान् सायकान् वीर्येण बलादाकृष्य विसृजेत् तद्वदिति श्लेषार्थः ॥ ६५ ॥

(त.चं.) बोध एव चापः । तस्य गुणो निशितत्वादिः । स एव गुणो ज्या । शरा अपि पत्रिपत्रयुक्ता इति विपक्षयुक्ताः ॥ ६५ ॥

चिच्छेदातुच्छधिषणस्तांस्तदा तर्कसायकैः ।
प्रयुक्तमात्रान् प्रहसँल्लीलयाऽतिशयालुभिः ॥ ६६ ॥

(प.दी.) चिच्छेदेति । **तान् तदा प्रहसन् अतुच्छधिषणः** श्रीपूर्णप्रज्ञाचार्यः **अतिशयालुभिः** त्रिविक्रमार्यप्रयुक्ततर्कातिशयालुभिः **तर्कसायकैः** स्वप्रयुक्ततर्काख्यसायकैः **प्रयुक्तमात्रान्** प्रयोगसमनन्तरमेव **लीलया चिच्छेद** निराकरोत् । स्पष्टः श्लेषार्थः ॥ ६६ ॥

(त.चं.) तर्कशरान् तर्कशरैरेव चिच्छेद ॥ ६६ ॥

अधार्याणीतरजनैरनिवर्त्यानि पूरुषैः ।
विजिगीषुर्द्विजश्रेष्ठो वेदास्त्राणि प्रयुक्तवान् ॥ ६७ ॥

(प.दी.) अधार्याणीति । **विजिगीषुः** जेतुमिच्छन् **द्विजश्रेष्ठः वेदास्त्राणि** वेदाख्यास्त्राणि **प्रयुक्तवान्** । तर्केण पराजितः सन् वेदवाक्यानि प्रयुक्तवानित्यर्थः । विजिगीषुर्योद्धा शस्त्रयुद्धे पराजितोऽस्त्रप्रयोगं यथा कुर्यात् तद्वदिति श्लेषार्थः । कथम्भूतानि? **इतरजनैः** त्रिवर्णेतरजनैः **अधार्याणि** । त्रिवर्णेतरेषां वेदानधिकारित्वात् । वैदिकान्यस्त्राणि च इतरजनैरधार्याणि

हि । **पूरुषैः अनिवर्त्यानि** अपौरुषेयत्वेन निर्दोषत्वान्निराकर्तुमशक्यानि । अस्त्राण्यपि प्रत्यस्त्रानभिज्ञैरनिवर्त्यानि हि ॥ ६७ ॥

(त.चं.) शस्त्रैर्जेतुमप्रभवन् अथापि विजिगीषुर्वेदास्त्राणि प्रयुक्तवान् ॥

वाक्यैरतिबलीयोभिः प्रत्यस्त्रैरिव वैदिकैः ।
अर्थान्तरं प्रकटयन् तान्यसौ सन्न्यवर्तयत् ॥ ६८ ॥

(भा.प्र.) अर्थान्तरमग्नेश्च विपरीतं जलादिकं च ॥

(प.दी.) वाक्यैरिति । **असौ** श्रीमध्वः **तानि** परप्रयुक्तानि वेदवाक्यानि **सन्न्यवर्तयत्** निवर्तितवान् । निवर्तनं नाम पराभिमतार्थप्रच्यावनमेव । किं कुर्वन्? **अतिबलीयोभिः** निरवकाशत्वेनोपजीव्यत्वेन चातिबलिष्ठैः **वैदिकैः वाक्यैः** स्वप्रयुक्तैरित्यर्थः । **अर्थान्तरं प्रकटयन्** प्रतिवादिप्रयुक्तवाक्यस्य तदभिप्रेतादर्थादर्थान्तरं प्रकाशयन् । कैरिव? **प्रत्यस्त्रैरिव** । कश्चिद् योद्धा यथा परप्रयुक्तमस्त्रं प्रत्यस्त्रैर्विनिवर्तयेत् तद्वदिति भावः ॥ ६८ ॥

(त.चं.) यथाऽऽग्नेयास्त्रस्य प्रत्यस्त्रेण वारुणेन जलादिकमर्थान्तरं प्रकटयन् तथा तदुक्तानां वेदवाक्यानां ततोऽप्यतिबलीयोभिर्वेदवाक्यैरेवार्थान्तरं प्रकटयन् ॥ ६८ ॥

सप्ताष्टानि दिनान्येवं वादं कृत्वा सहामुना ।
निरुत्तरं तं निश्चोद्यं चक्रे चक्रायुधप्रियः ॥ ६९ ॥

(प.दी) सप्तेति । **चक्रायुधप्रियः** श्रीमन्मध्वः **अमुना** त्रिविक्रमार्येण **सह एवं** उक्तप्रकारेण **सप्ताष्टानि दिनानि** वादमुपक्रम्य पञ्चदशदिनसम्पूर्तिपर्यन्तम् । 'कालाध्वनोरत्यन्तसंयोगे' इति द्वितीया । **वादं कृत्वा तं** त्रिविक्रमार्यं **निरुत्तरं** प्रत्युत्तररहितं **निश्चोद्यं** प्रश्नरहितं **चक्रे** ॥ ६९ ॥

(त.चं.) 'सप्ताष्टानि दिनानि वादमुपक्रम्य पञ्चदशदिनसम्पूर्तिपर्यन्तम्' इति प्राचीनम् । वस्तुतस्तु सप्त वाऽष्ट वा दिनानीत्येव व्याख्येयम् । सप्त

चाष्ट च दिनानीति व्याख्याने सप्ताष्ट दिनानीत्येव स्यान्नतु सप्ताष्टानि दिनानीति। तथाहि पाणिनिः–'सङ्ख्ययाऽव्ययासन्नादूराधिकसङ्ख्याः सङ्ख्येये'[२.२.२५]। 'सङ्ख्येये या सङ्ख्या वर्तते तया सह अव्यय-आसन्न-अदूर-अधिक-सङ्ख्याः समस्यन्ते, बहुव्रीहिश्च समासो भवति' इति किल जयादित्यः। तद् यथा– उपदशाः। आसन्नदशाः। अदूरदशाः। अधिकदशाः। द्वित्राः। कथमजन्तता? आह–'बहुव्रीहौ सङ्ख्येये डजबहुगणात्' [५.४.७३]। एवञ्च डचि द्वित्राः, त्रिचतुराः, चतुःपञ्चाः, पञ्चषाः, सप्ताष्टाः, अष्टदशा इत्यादि भवति। बहुगणपदे विहाय। उपबहवः। उपगणाः। यद्यपि डजभावेऽपि उपगणा इत्यत्र न रूपभेदः। किन्तु स्वरभेदो भवति। तथाहि– गणानां समीपे ये ते उपगणा इति बहुव्रीहौ पूर्वपदप्रकृतिस्वरत्वेनाऽद्युदात्तत्वे 'उपगणाः' इति स्वरस्थितिः। यदि बहुव्रीहौ डजिति नियमो गणशब्दस्याप्यन्वीयते तर्हि 'चितः'[६.१.१६३] इति तस्यान्तोदात्तत्वविधानात् 'उपगणाः' इति स्वरस्थितिः स्यात्। तन्मा भूदिति 'अबहुगणात्' इति पदमुपादत्त पाणिनिरिति। तथाच सप्त वाऽष्ट वा दिनानि वादं कृत्वेत्येव समीचीनम्। आचार्यकृतचोद्यानां निरुत्तरम्। स्वयं निश्चोद्यम्॥ ६९॥

प्रणम्याऽचष्ट शिष्टोऽसौ क्षम्यतां नाथ चापलम्।
पदपद्मरजोदास्यं ध्रुवं मे दीयतामिति ॥ ७० ॥

(प.दी.) प्रणम्येति। **शिष्टः** उत्तमः **असौ** त्रिविक्रमार्यः **प्रणम्य** इति **आचष्ट**। **नाथ, चापलं** मम चपलत्वं **क्षम्यताम्**। **ध्रुवं** शाश्वतं **पदपद्मरजोदास्यं मे दीयताम्**॥ ७०॥

(त.चं.) दीयतामिति आचष्ट। यतः स्वभावतः शिष्टः॥ ७०॥

व्याख्यां भाष्यस्य भूयोधीः श्रवणं सूरिनन्दनः।
सन्तः प्रीतिमसन्तोऽन्यां सममारेभिरे ततः ॥ ७१ ॥

(प.दी.) व्याख्यामिति । ततः एते एतानि **समं** युगपत् **आरेभिरे** उपचक्रमिरे । के कानि? **भूयोधीः** श्रीपूर्णप्रज्ञाचार्यः **भाष्यस्य व्याख्यां** आरेभे । **सूरिनन्दनः** सुब्रह्मण्यार्यनन्दनः **भाष्यस्य श्रवणं** आरेभे । **सन्तः** सज्जनाः **प्रीतिमारेभिरे । असन्तः अन्यां** अप्रीतिमिति ॥ ७१ ॥

(त.चं.) सुब्रह्मण्यसूरिनन्दनः त्रिविक्रमार्यः ॥ ७१ ॥

गुर्वाज्ञागौरवाट्टीकां कुर्वन् भाष्यस्य दुष्कराम् ।
षडर्द्धविक्रमार्योऽसौ महाचार्यमभाषत ॥ ७२ ॥

(प.दी.) गुर्वाज्ञेति । गुर्वाज्ञागौरवात् श्रीमध्वाचार्याज्ञागौरवेण **दुष्करां** तदाज्ञामृते कर्तुमशक्यां **भाष्यस्य** श्रीमद्भाष्यस्य **टीकां कुर्वन् असौ षडर्धविक्रमार्यः महाचार्यं** श्रीमध्वाचार्यं **अभाषत** ॥ ७२ ॥

(त.चं.) गुर्वाज्ञागौरवात् । आह हि स्वयमेव तत्वदीपिकायाम्– 'आज्ञाबलादकृषि लेशत एष तेषाम्' इति । शारीरकभाष्यस्य । षडर्द्धविक्रमार्यस्त्रिविक्रमार्यः । षट्स्वपि दर्शनेषु आ सम्यगृद्धोऽस्य विक्रम इति च ॥

कवीन्द्रैर्न समाप्यन्ते सङ्गृह्यापि यतोऽनिशम् ।
न्यायरत्नानि भाष्याब्धेरस्य गाम्भीर्यमद्भुतम् ॥ ७३ ॥

(प.दी.) कवीन्द्रैरिति । कवीन्द्रैः यतः यस्मात् **भाष्याब्धेः** श्रीमद्भाष्यसमुद्रात् **न्यायरत्नानि अनिशं सङ्गृह्यापि** उद्धृत्यापि **न समाप्यन्ते** । समुद्राद् रत्नान्यनिशं सङ्गृह्यापि यथा न समाप्यन्ते, एवमेव भाष्यादपि न्याया उद्धृत्य न समाप्यन्त इति भावः । अत्र न्याया इति श्रुत्यर्थविचाराङ्गभूता उपक्रमोपसंहाराभ्यासापूर्वताफलार्थवादाः, श्रुतिलिङ्गसमाख्यावाक्यप्रकरणस्थानानि च, तथा प्रमाणानां प्राबल्यदौर्बल्यविचाराङ्गभूतानि निरवकाशत्वसावकाशत्वोपजीव्यत्वोपजीवकत्वबहुत्वाल्पत्वानि चोच्यन्ते । एते च न्याया अस्मिन् भाष्ये बाहुल्येन व्युत्पादिता इत्यर्थः । तस्मात् **अस्य** भाष्यस्य **गाम्भीर्यं** गम्भीरत्वं **अद्भुतम्** ॥ ७३ ॥

(त.चं.) गाम्भीर्यं दुरवगाहत्वम् ॥ ७३ ॥

दशोपनिषदो देवीर्देवा इव समीप्सिताः ।
युक्ताः प्रसादयन्त्यर्था एषु भाष्यालयेष्वलम् ॥ ७४ ॥

(प.दी.) दशेति । एषु **भाष्यालयेषु** उपनिषद्भाष्याख्यमन्दिरेषु **युक्ताः** उपपन्नाः **अर्थाः देवीः** द्योतमानाः **दशोपनिषदः** दशवेदान्तान् **अलं** सम्यक् **प्रसादयन्ति** विवृण्वन्ति । उपनिषद्भाष्येषु त्वयोक्ता अर्था उपनिषदर्थास्ता उपनिषदः सुखेन विज्ञातार्थाः कुर्वन्ति । **समीप्सिताः** अभीष्टाः **देवाः** आलयेषु स्वस्वमन्दिरेषु **युक्ताः** सङ्गताः **देवीरिव** । देवा यथा स्वभार्याः प्रसादयन्ति तद्वदिति भावः ॥ ७४ ॥

(त.चं.) श्रुतिमानिनीनां समीप्सिता युक्ताश्चार्थाः एषु उपनिषद्भाष्यालयेषु ताः प्रसादयन्ति ॥ ७४ ॥

गीतातात्पर्यभाष्याभ्यामाभ्यां विश्वं प्रकाश्यते ।
गोगणैरप्रतीकारैरर्केन्दुभ्यामिवाधिकम् ॥ ७५ ॥

(प.दी) **गीतेति** । **आभ्यां गीतातात्पर्यभाष्याभ्यां अप्रतीकारैः** प्रतीकाररहितैः, परैर्निराकर्तुमशक्यैरिति यावत्, **गोगणैः** वचनसमूहैः **विश्वं** विवक्षितं सर्वं प्रमेयजातं **अधिकं प्रकाश्यते । अर्केन्दुभ्यां गोगणैः** रश्मिसमूहैः **विश्वं** जगत् **इव** ॥ ७५ ॥

(त.चं.) गीतायास्तात्पर्यं च भाष्यं च । सन्तमसलीने जगति प्रथमं भाष्यचन्द्रोदयः । ततस्तात्पर्यसूर्योदय इति ॥ ७५ ॥

इतिहासपुराणाब्धेर्भवच्चित्ताद्रिलोळितात् ।
जातां भारततात्पर्यसुधां कः सन्न सेवते ॥ ७६ ॥

(प.दी.) इतिहासेति । **भवच्चित्ताद्रिलोळितात्** भवतश्चित्ताख्यमन्दरमथितात् **इतिहासपुराणाब्धेः** इतिहासपुराणसमुद्रात् **जातां भारततात्पर्य-**

सुधां श्रीमहाभारततात्पर्याख्यामृतं **सन्** सत्पुरुषः **को न सेवते?** स्पष्टः श्लेषार्थः ॥ ७६ ॥

(त.चं.) महाभारततात्पर्यनिर्णयाख्यां सुधां कः सन् विद्वान् न सेवते ॥

पुराणस्थानपान्थानामभाषात्रयवेदिनाम् ।
भवता सुसखा चक्रे श्रीभागवतनिर्णयः ॥ ७७ ॥

(भा.प्र.) सुसखा।'राजाहःसखिभ्यष्टच्' इत्यस्य 'न पूजनात्' इत्यपवादः ॥

(प.दी.) पुराणेति । **भवता श्रीभागवतनिर्णयः चक्रे** कृतः । कथम्भूतः? **अभाषात्रयवेदिनां** गुह्यदर्शनसमाधिलक्षणभाषात्रयमजानतां **पुराणस्थान-पान्थानाम्** । एकार्थावच्छिन्नं वाक्यजातं प्रकरणम् । प्रकरणजातं स्थानम् । पुराणस्थानेषु पुराणगतप्रकरणजातेषु पान्थानाम् । पुराणकथाप्रकरण-जातेषु वर्तमानानामित्यर्थः । तेषां **सुसखा** । तत्तद्देशभाषामजानतां पथिकानां तत्तद्भाषां जानन् कश्चिद् यथा सुसखा स्यात् तद्वदेव भाषात्रयमजानतां पुराणकथासङ्कथने प्रवर्तमानानां पुरुषाणां सुसखेत्यर्थः ॥ ७७ ॥

(त.चं.) पुराणाख्ये स्थाने प्रदेशे नवानां पान्थानाम् । स्वभाषा तत्तत्प्रदेश-भाषा संस्कृतं चेति देशपान्थानां भाषात्रयम् । समाधिभाषा दर्शनभाषा गुह्यभाषेति पुराणपान्थानाम् । यथाऽऽसीत् तथा निरूपणं समाधिभाषा । यथाऽदृश्यत तथा निरूपणं दर्शनभाषा । निगूढया शैल्या निरूपणं गुह्य-भाषा । सुसखा पूजनीयः सखा । 'न पूजनात्'[५.४.६९] । यान् शब्दा-नुपादाय समासान्ता विधीयन्ते 'राजाहःसखिभ्यष्टच्'[५.४.९१] इत्येव-मादीन्, यदा ते पूजनवचनाभ्यां स्वतिभ्यां परे भवन्ति तदा समासान्तो न भवति । सुराजा । अतिराजा । सुसखा । अतिसखा । सुगौः । अतिगौः । श्रीभागवततात्पर्यनिर्णयः ॥ ७७ ॥

कस्तन्त्रसारं सम्प्राप्य न स्यात् पर्याप्तवाञ्छितः ।
अमरैराश्रितच्छायं कल्पद्रुममिवोत्तमम् ॥ ७८ ॥

(प.दी.) **क** इति । **उत्तमं** ग्रन्थोत्तमं **अमरैराश्रितच्छायं तन्त्रसारं सम्प्राप्य कः** पुमान् **पर्याप्तवाञ्छितः** सम्पूर्णकामः **न स्यात्** । कमिव? **कल्पद्रुममिव** । कल्पद्रुमस्य च्छाया यथाऽमरैराश्रिता एवं तन्त्रसारस्य च्छाया सिद्धान्तः अमरैराश्रितेति भावः । एवम्भूतं तन्त्रसारं प्राप्य कः पर्याप्तवाञ्छितो न स्यादित्यर्थः ॥ ७८ ॥

(त.चं.) अमरैराश्रिताः छायाः प्रतिमाः यस्मिन् लक्षितास्तं तन्त्रसारसङ्ग्रहम् । 'छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः' इति च । अमरैरप्याश्रिता छाया अध्यात्मविद्या यस्मिन्निति वा । 'ब्रह्मविद्या हरेश्छाया तदंशा हि सुरेष्वपि' इति भागवततात्पर्यगतं [३.६.१७] ब्राह्मवचनम् ॥

लोकानामवलोकाय मार्गस्यास्य व्यधाद् भवान् ।
करुणाकर नेत्राभे वादसन्मानलक्षणे ॥ ७९ ॥

(प.दी.) **लोकानामिति** । **करुणाकर, भवान् वादसन्मानलक्षणे** वादलक्षणं प्रमाणलक्षणं च **व्यधात्** । कथालक्षणप्रमाणलक्षणाख्यप्रकरणे व्यधादित्यर्थः । कथम्भूते? **लोकानां** जनानां **अस्य मार्गस्य** वादजल्पवितण्डाख्यकथात्रयमार्गस्य तथा प्रत्यक्षानुमानागमाख्यप्रमाणत्रयमार्गस्य च **अवलोकाय** दर्शनार्थं **नेत्राभे** लोचनाभे । मार्गावलोकने नेत्रं यथा करणं तद्वदेव वादजल्पवितण्डाख्यकथात्रयमार्गावलोकाय कथालक्षणाख्यं प्रकरणं नेत्राभम् । प्रत्यक्षानुमानागमाख्यप्रमाणत्रयस्योद्देशविभागलक्षणाद्यवलोकाय प्रमाणलक्षणाख्यं प्रकरणं नेत्राभमित्यर्थः ॥ ७९ ॥

(त.चं.) वादलक्षणं कथालक्षणमिति प्रसिद्धम् । ननु कथालक्षणमित्येव वक्तव्यम् । त्रिविधा अपि कथा वादो जल्पो वितण्डेति लक्ष्यन्ते । न केवलं वादः । सत्यम् । वादशुद्ध्यर्थमितरयोर्वचनम् । वादो हि संवादः । विवादावितरौ । तेन वाद इति त्रिष्वेकोऽपि भवति । त्रयमपि भवति । एवं निर्वचनसूचनाय वादलक्षणमित्येव नाम ददौ भगवत्पादः । मानलक्षणं चाधुना

प्रमाणलक्षणमिति प्रसिद्धम् । यथाकथाच नानाविधानि स्वोपज्ञं मानलक्षणानि श्रूयन्ते– अनधिगतार्थगन्तृ प्रमाणमित्यादीनि । अतः सदित्याह । सत् निर्दुष्टं ब्रह्मतर्कादिषु प्रमितं मानलक्षणम् ॥ ७९ ॥

एकाकी किल यश्चक्रे पदं मौलिषु विद्विषाम् ।
तत्वनिर्णयपार्थोऽयं केन नाम न पूज्यते ॥ ८० ॥

(प.दी.) एकाकीति । **अयं तत्वनिर्णयपार्थः** विष्णुतत्वनिर्णयाख्यार्जुनः **केन नाम न पूज्यते**? सर्वैरपि पूज्यत इति भावः । कथम्भूतः? **यः एकाकी** असहायः सन् **विद्विषां** द्वेषिणां वादिनां **मौलिषु पदं चक्रे किल** । तान् निराकरोदित्यर्थः । स्पष्टः श्लेषार्थः ॥ ८० ॥

(त.चं.) विष्णुतत्वनिर्णयाख्योऽयं पार्थः विष्णुद्विषां तत्ववादद्विषां च मौलिषु पदं चक्रे ॥ ८० ॥

वादादयः प्रकरणस्फुलिङ्गास्तनवोऽप्यलम् ।
विपक्षकक्षं क्षिण्वन्ति मारुतेन त्वयेरिताः ॥ ८१ ॥

(प.दी.) वादेति । **मारुतेन** वायुना **त्वया ईरिताः** प्रोक्ताः **वादादयः** वादप्रकरणाख्यतत्वोद्योतादयः **प्रकरणस्फुलिङ्गाः** प्रकरणाख्याग्निकणाः **अलं तनवोऽपि** अणवोऽपि **विपक्षकक्षं** शत्रुवनं **क्षिण्वन्ति** नाशयन्ति । वायुनोद्बोधिता अग्निकणा यथा वनं नाशयन्ति तद्वद् वायुना त्वया प्रोक्तानि श्रीतत्वोद्योतादिप्रकरणानि प्रतिवादिनो निराकुर्वन्तीत्यर्थः ॥ ८१ ॥

(त.चं.) वादादयः । वादः तत्वोद्योत इति प्रथितः । 'ग्रन्थो वादाह्वयोऽभवत्' इति चोक्तम् । आदिना मायावाददूषणम्, उपाधिदूषणम्, मिथ्यात्वानुमानदूषणम्, तत्वविवेकः, तत्वसङ्ख्यानं च । जयन्तीनिर्णयादयश्च । शास्त्रार्थेषु कश्चनैकमर्थमधिकृत्य प्रवृत्तं प्रकरणमित्युच्यते । विपक्षकक्षम् । 'वृ-तॄ-वदि-हनि-कमि-कषि-यु-मुचिभ्यः सः'[९.२१] इति दशपादिका ।

वृणातीति वर्षम्। तरन्त्यनेनेति तर्षः। वदत्यभीक्ष्णमिति वत्सः। हन्त्यध्वानमिति हंसः। कामयते काम्यते वा कंसः। कसिधातोर्गतिशासनार्थात् कंस इत्यन्ये। कष्यते गवादिभिरिति कक्षः। कष हिंसायाम्। यूयत इति योषा। यू मिश्रणे। जोष्यत्वाद् योषेति प्रतना नैरुक्ताः। मोचनं मोक्षः। कक्ष इति किमुच्यते? बह्वोऽस्यार्थाः। 'कक्षः स्मृतो भुजामूले कक्षोऽरण्ये च वीरुधि। कक्षः शुष्कतृणे प्रोक्तः कक्षः कच्छ उदाहृतः' इति। कश्चात्र विवक्षितः? कक्ष इति स्यादरण्यम्। स्याद् वीरुत्। अपि स्यात् शुष्कतृणम्। क्षिण्वन्ति। क्षिणु हिंसायाम् ॥ ८१ ॥

अनन्तोऽर्थः प्रकटितस्त्वयाऽणौ भाष्यसङ्ग्रहे।
अहो आत्मपरिज्ञप्त्यै कृष्णेनेवाऽननान्तरे ॥ ८२ ॥

(प.दी.) **अनन्त** इति। **त्वया आत्मपरिज्ञप्त्यै** स्वसामर्थ्यज्ञापनाय **अणौ भाष्यसङ्ग्रहे** अणुवेदान्तभाष्ये **अनन्तोऽर्थः प्रकटितः**। **अहो** एतदाश्चर्यम्। केनेव? **कृष्णेन** यशोदानन्दनेन **आननान्तरे** विवृतवदनान्तरे **अनन्तोऽर्थ इव** अनन्तः प्रपञ्च इव। तदपि **आत्मपरिज्ञप्त्यै** ॥ ८२ ॥

(त.चं.) भाष्यसङ्ग्रहे सर्वशास्त्रार्थसङ्ग्रहे। आत्मपरिज्ञप्त्यै स्वाविष्काराय कृष्णेन। परमात्मपरिज्ञप्त्यै स्वस्य वायुत्वपरिज्ञप्त्यै वा मध्वेन ॥ ८२ ॥

भगवंश्चित्रकवितां लौकिकीं दर्शयन् किल।
गोप्यं भारतसङ्क्षेपमकृथा विश्वविस्मयम् ॥ ८३ ॥

(प.दी.) **भगवन्निति**। हे **भगवन्, लौकिकीं** लोकविषयां **चित्रकवितां दर्शयन्** त्वं **गोप्यं भारतसङ्क्षेपं** यमककल्पं श्रीमहाभारतसङ्क्षेपं **अकृथाः** कृतवानसि **किल**। कथम्भूतम्? **विश्वविस्मयं** विश्वाश्चर्यकरम् ॥ ८३ ॥

(त.चं.) भारतसङ्क्षेपं महाभारततात्पर्यम्। यमकबद्धमिति यमकभारतमिति प्रथितम् ॥ ८३ ॥

नानासुभाषितस्तोत्रगाथादिकृतिसत्कृतीः ।
त्वयि रत्नाकरे रत्नश्रेणीर्वा गणयन्ति के ॥ ८४ ॥

(प.दी.) नानेति । **त्वयि** विद्यमानाः, त्वया कृता इत्यर्थः, **नानासुभाषितस्तोत्रगाथादिकृतिसत्कृतीः** नानाविधसुभाषित[स्तोत्र]गाथादीनां कृतिः निर्माणम्, तदात्मिकाः सत्कृतीः शोभनानि करणानि **के गणयन्ति? रत्नाकरे** समुद्रे **रत्नश्रेणीर्वा** रत्नसमूहानिव ॥ ८४ ॥

(त.चं.) यद् विना गानं पठ्यते तत् स्तोत्रम् । यद् गीयते सा गाथा । 'उषि-कुषि-गर्तिभ्यस्थन्'[६.२९]इति दशपादिका । उष दाहे । उष्यत इत्योष्ठः । कुष निष्कर्षे । कुष्यतेऽस्मिन्नाहारजातमिति कोष्ठमुदरम् । गीयत इति गाथा । 'हाडुगब्ब'[ಹಾಡುಗಬ್ಬ] इति भाषायाम् । 'ऋग् गाथा कुम्ब्या तन्मितम्' इत्यैतरेयोपनिषदि । नियतस्वरं नियताक्षरं छन्द ऋक् । अनियतस्वरं नियताक्षरं छन्दो गाथा । अनियताक्षरं कुम्ब्या । तथाहि भाष्ये शब्दनिर्णयवचनम्–'स्वराणां नियमो यत्र ह्यृचो नामैव ताः स्मृताः । अन्या मिताक्षरा यास्तु ता गाथाः परिकीर्तिताः । खण्डवाक्यानि कुम्ब्याः स्युरसमानि परस्परम्' इति । तदेवं गाथाविदो बहुधा विश्लेषयन्ति गाथाम् । या गीयते सा गाथेति तु प्रकृतोपयोगि प्रायः सर्वानुगतं च । अक्षरगणबद्धं स्तोत्रम् । मात्रागणबद्धा गाथेति वा । सुभाषितानि 'रामोऽखिलानन्दतनुः स एव' इत्यादीनि । स्तोत्राणि 'वन्दे वन्द्यम्' इत्यादीनि । गाथाः– 'अव नः श्रीपतिरप्रतिः–' इत्याद्याः । कृतयः काव्यकृतयः । ता एव सत्कृतयः वाङ्मयभूषणायिता भगवद्गुणवचनाः साधुरचनाः ॥ ८४ ॥

एषु दभ्रमतीन् दभ्रान् हसत्युच्चैः सतां सभा ।
चिन्तामणींश्चिन्तयन्ती मितानप्यमितार्थदान् ॥ ८५ ॥

(प.दी.) एष्विति । **सतां** सज्जनानां **सभा एषु** भवत्प्रणीतेषु श्रीमद्भाष्य-

प्रकरणस्तोत्रगाथादिग्रन्थेषु **दभ्रमतीन्** अल्पबुद्धीन्, एते ग्रन्था अल्पा इति मन्यमानानित्यर्थः, **दभ्रान्** अल्पान् **उच्चैर्हसति** । स्वयं कथम्भूता सत्सभा? **मितानपि** शब्दतः परिमितानपि **अमितार्थदान्** एतान् ग्रन्थान् **चिन्तामणीन्** चिन्तामणिसदृशान् **चिन्तयन्ती** । चिन्तामणयः परिमाणतो मिता अपि यथाऽमिताभीष्टप्रदा एवमेते भगवत्प्रणीता ग्रन्थाः शब्दतो मिता अप्यमितार्थवाचकाः । तानेतान् दभ्रान् मन्यामनानल्पबुद्धीन् पुरुषान् सतां सभा उच्चैर्हसतीति भावः ॥ ८५ ॥

(त.चं.) एतानि ग्रन्थरत्नानि दभ्राणीति मतिर्येषां ते स्वयं दभ्राः क्षुद्राः । कथमदभ्रचेतसं दभ्राणां चेतः परिमिमीते ॥ ८५ ॥

अपरोऽपीष्यतेऽस्माभिर्ग्रन्थेष्वतेषु सत्स्वपि ।
सत्स्वपीन्द्रादिषु पुरा तारकारिरिवामरैः ॥ ८६ ॥

(प.दी.) अपर इति । **एतेषु ग्रन्थेषु सत्स्वपि अस्माभिरपरोऽपि** ग्रन्थः **इष्यते** । **पुरा इन्द्रादिषु सत्स्वपि अमरैः अपरः तारकारिरिव** स्कन्द इव ॥

(त.चं.) अपरोऽपि सूत्रभाष्यविवृतिरूपः ॥ ८६ ॥

ग्रन्थेभ्य एभ्योऽगाधेभ्यो युक्तयो नो दुरुद्धराः ।
मनोमान्द्यात् ततो ग्रन्थं व्यक्ततर्कततिं कुरु ॥ ८७ ॥

(प.दी.) अपरो ग्रन्थः कुत इष्यत इत्यत आह– **ग्रन्थेभ्य** इति । **अगाधेभ्यः एभ्यः ग्रन्थेभ्यः युक्तयः** भवदभिप्रेता युक्तयः **नः** अस्माकं **दुरुद्धराः** उद्धर्तुमशक्याः । कुतः? **मनोमान्द्यात्** । अस्मद्बुद्धेरल्पविषयत्वादित्यर्थः । **ततः** अस्माकं **व्यक्ततर्कततिं** स्पष्टतर्कयुक्तं अपरं **ग्रन्थं कुरु** ॥ ८७ ॥

(त.चं.) अव्यक्ततया नो दुरुद्धराः । ततो व्यक्ता तर्कततिर्यत्र तादृशमपरं ग्रन्थं कुरु ॥ ८७ ॥

इत्यर्थितो व्यधान्मध्वः सोऽनुव्याख्यां सतां सुधाम् ।
दुर्वादिगर्वाद्रिपविं मायिध्वान्तरविद्युतिम् ॥ ८८ ॥

(प.दी.) इतीति । त्रिविक्रमार्येण **इत्यर्थितः सः मध्वः सतां सुधां** अमृतवत् परितोषकारिणीं **अनुव्याख्यां व्यधात् । दुर्वादिगर्वाद्रिपविं** दुर्वादिनां गर्वपर्वतस्य वज्रायिताम् । **मायिध्वान्तरविद्युतिं** मायिमताख्यान्धकारनिरासे रविप्रभासमाम् ॥ ८८ ॥

(त.चं.) भाष्यमनुगता व्याख्याऽनुव्याख्या । गुर्वाज्ञया तत्वदीपिकोदिता । शिष्यप्रार्थनयाऽनुव्याख्यानमित्यहो अपूर्वोऽयं गुरुशिष्यसमागमः । 'पविरशनिः शतधारं वज्रम्' इति च ॥ ८८ ॥

युगपद्रचयन्नेनां कदाचित् स निरन्तरम् ।
चतुरश्चतुरः शिष्यांल्लीलयाऽलेखयत् खलु ॥ ८९ ॥

(भा.प्र.) निरन्तरमलेखयत् ॥

(प.दी) युगपदिति । एनां श्रीमदनुव्याख्यां **रचयन् चतुरः** कुशलः **सः** श्रीमध्वः **कदाचित् निरन्तरं चतुरः शिष्यान् युगपत् लीलया अलेखयत् खलु** । स्वयं रचयन्नेवाध्यायचतुष्टयं चतुर्भिः शिष्यैः निरन्तरमलेखयदित्यर्थः ॥

(त.चं.) एकं श्लोकमेकः, द्वितीयमपर इति क्रमेण चतुरः शिष्यान् निरन्तरं निर्व्यवधानमलेखयत् । तदपि लीलयाऽनायासेन ॥ ८९ ॥

युक्ताया युक्तिमालायाः प्रोक्तायास्तत्र चाऽत्मना ।
व्यक्तं चक्रे विवरणं कवीन्द्रैरेष दुष्करम् ॥ ९० ॥

(प.दी) युक्ताया इति । **एषः** श्रीमन्मध्वः **तत्र च** श्रीमदनुव्याख्याने **आत्मना प्रोक्तायाः युक्तायाः** उपपन्नायाः **युक्तिमालायाः विवरणं व्यक्तं**

यथा भवति तथा **चक्रे** । कथम्भूतम्? **कवीन्द्रैः दुष्करम्** । श्रीमदनुव्याख्यानोक्तपूर्वपक्षसिद्धान्तपक्षयुक्तिप्रकाशानुरूपं श्रीमन्न्यायविवरणाख्यमपरं ग्रन्थं चक्र इत्यर्थः ॥ ९० ॥

(त.चं.) व्यक्तं चक्रे विवरणं न्यायविवरणं नाम । कवीन्द्रैरपि दुष्करम् । खण्डार्थनिर्णयः कृष्णामतृमहार्णवश्चेति द्वे कृती उपरिष्टादुल्लिख्येते । तथाचात्रेमा मुखत उल्लिखिताः सूचिताश्च कृतयः–

१.ब्रह्मसूत्रभाष्यम् २.सर्वशास्त्रार्थसङ्ग्रहः [सङ्ग्रहभाष्यम्] ३.अनुव्याख्यानम् ४.न्यायविवरणम् ५. महैतरेयोपनिषद्भाष्यम् ६. बृहदारण्यकोपनिषद्भाष्यम् ७.छन्दोगोपनिषद्भाष्यम् ८. तैत्तिरीयोपनिषद्भाष्यम् ९.तलवकारोपनिषद्भाष्यम् १०.काठकोपनिषद्भाष्यम् ११.आथर्वणोपनिषद्भाष्यम् १२.षट्प्रश्नोपनिषद्भाष्यम् १३.याज्ञीयमन्त्रव्याख्यानम् १४.माण्डूकोपनिषद्भाष्यम् १५. गीताभाष्यम् १६.गीतातात्पर्यम् १७. महाभारततात्पर्यनिर्णयः १८. भागवततात्पर्यनिर्णयः १९. तन्त्रसारसङ्ग्रहः २०.वादलक्षणम् २१.मानलक्षणम् २२.विष्णुतत्वविनिर्णयः २३.वादः [तत्वोद्योतः] २४.महाभारततात्पर्यम् [यमकभारतम्] २५. खण्डार्थनिर्णयः [कर्मनिर्णयः] २६. कृष्णामृतमहार्णवः २७. नखस्तुतिः, २८-३८ इतरस्तोत्राणि गाथाश्च, ३९-४० सुभाषितद्वयम् । तथाहि हृषीकेशतीर्थीये–

'रामोऽखिलानन्दतनुः स एव भीमोऽतिपापेषु दुरन्तवीर्यः ।
कामः स एवाजितकामिनीषु सोमः सएवाऽत्मपदाश्रितेषु' इत्येकम् ।

'चञ्चलोऽयं मनोमीनः समानेयो हरिस्थळे ।
विषयोदकसञ्चारी सुयत्नबळिशाहृतः' इत्यपरम् ।

'वादादयः' इत्यादिपदेनोट्टङ्किताः प्रकरणग्रन्थाः–

४१.मायावाददूषणम् ४२.उपाधिदूषणम् ४३. मिथ्यात्वानुमानदूषणम् ४४.तत्वविवेकः ४५. तत्वसङ्ख्यानम्

अवशिष्टा ग्रन्थाः–

४६.सदाचारस्मृतिः ४७.जयन्तीनिर्णयः ४८.ओन्तत्सत्प्रणवकल्पः [यति-प्रणवकल्पः] ४९. न्यासपद्धतिः ५०.तिथिनिर्णयः ५१.ऋग्भाष्यम् । अपूर्णमिदमृचां भाष्यमाचार्यमध्वस्य चरमा कृतिरिति भाति । अपरा लक्ष्मीकान्तस्तुतिः । या नखस्तुतिभागत्वेन सम्प्रति पठ्यते । अन्या च कन्दुकस्तुतिः, या भगवत्पादेन बाल्ये रचितेति वदन्ति । तदिमा उपलभ्यमाना आचार्यकृतयः । अनुव्याख्यानन्तरभाविनोऽत्रानुल्लिखिता इति स्फुटम् । ननु सप्तत्रिंशदिति श्रूयते । सत्यम् । सप्तत्रिंशदपि चकार । पुनरन्यानपि प्रणिनाय । नतु सप्तत्रिंशदेव । सावधारणानि वचनानि भवन्ति । तद् यथा– शाकपाकः । यः शाकमेव पचति न मांसम् । नहि शाकमपि पचतीति श्वपाकः शाकपाको भवति । अन्यथा तद्वचनवैयर्थ्यम् । ननु कथमवधारयसि, 'तत्कृतीः गणयन्ति के' इति जाग्रति पण्डिताचार्यवचने? 'शतग्रन्थकर्ता' इति च प्रमेयनवमालिका । यः शतं ग्रन्थान् करोति ततोऽधिकं वा करोति स शतग्रन्थकर्ता भवति । न सप्तत्रिंशत्कर्ता । सत्यमगणितग्रन्थकर्ता भगवत्पादः । वयं तूपलब्धानां वाचमाचक्ष्महे । सूक्तमुक्तं भवता । तथाप्य-नियता ह्युपलब्धिर्भवति । यदा तु सप्तत्रिंशदुपलब्धं तदा 'सप्तत्रिंशदमन्दधीः' इत्याहुः । ततोऽधिकं सम्प्रत्युपलभ्यते । अथापि पूर्वाभ्यस्तमेव रोमन्थयति भवान्, ननु पण्डिताः परिहसन्ति भवन्तमन्तःश्मश्रु । अत्रैवं व्यवस्था– द्वौ ग्रन्थौ नूतनतयोपलब्धौ न्यासपद्धतिरिति, तिथिनिर्णय इति । न्यासपद्धति-र्विष्णुतीर्थीयस्य मूलमिति सुरोत्तमतीर्थाः । तथाहि तद्वचनम्– 'भगवत्पाद-कृतप्रणवकल्पन्यासपद्धत्यादौ कार्त्स्न्येन कर्मसम्बन्धिधर्माणां स्फुटा-प्रतिभानात् भगवत्पादाज्ञामकुटं शिरसि परमादरेण धृत्वा प्रणवकल्पादि-विवृतिरूपं श्रीविष्णुतीर्थीयाख्यमध्यायचतुष्टयात्मकं ग्रन्थं निर्मम इत्या-म्नायः' इति । तिथिनिर्णयोऽपि मधुसूदनभिक्षुणा व्याख्यायि । अगणित-ग्रन्थकर्ताऽपि भगवान् गणितग्रन्थकर्ता । पूर्वमुपलब्धेष्वपि स्तोत्राणां गाथानां

चैकीकरणेन द्वादशस्तोत्रमित्यैकग्रन्थ्यं तत्र चैकैकस्य स्तोत्रस्याध्यायत्व-कल्पनं चेति सर्वमिदमर्वाचीनम् । एकैकाऽपि स्तुतिरेको ग्रन्थः । अन्यान्य-स्थलेषु यात्रायां समूहगानार्थं प्रणीता हि ताः । सर्वमिदं प्राचीनकोश-परिशीलिनां करतलामलकवत् स्फुटम् । अदीर्घप्रज्ञा अदृष्टप्रतनग्रन्था अनधिगतशास्त्रहृदयाः सदाऽपि वर्तन्त एव । 'जानन्ति ते किमपि तान् प्रति नैष यत्नः' ॥ ९० ॥

मध्वेन्दोर्नित्यसम्बन्धान्निस्तमस्तापचेतसोः ।
वैकुण्ठं यातयोः पित्रोर्गेहेऽस्यावरजोऽवसत् ॥ ९१ ॥

(प.दी.) अथ विष्णुतीर्थमहिमानं वक्तुमुपक्रमते– **मध्वेन्दोरि**त्यादिना । **मध्वेन्दोः नित्यसम्बन्धात्** दर्शनश्रवणादिरूपनित्यसम्बन्धात् **निस्त-मस्तापचेतसोः** अज्ञानेन तापेन च रहितचेतसोः **पित्रोः वैकुण्ठं यातयोः** सतोः **अस्य** श्रीमध्वस्य **अवरजः गेहेऽवसत्** ॥ ९१ ॥

(त.चं.) अथ विष्णुतीर्थस्य भगवत्पादशिष्येष्वनितरसाधारणो महिमा कथ्यते– 'वैकुण्ठं यातयोः–' इत्यादि, 'आरुरोह दुरारोहम्–'[११९] इत्यन्तमेकोनत्रिंशता श्लोकैः ॥ ९१ ॥

विधिभ्रूविभ्रमभ्रश्यद्धनगोधान्यसम्पदा ।
निर्वेदिना वेदविदा तेनाऽपे वेदवादिराट् ॥ ९२ ॥

(प.दी.) विधीति । **विधिभ्रूविभ्रमभ्रश्यद्धनगोधान्यसम्पदा निर्वेदिना** विरक्तिमता **वेदविदा तेन** अवरजेन **वेदवादिराट्** वेदवादिश्रेष्ठः श्रीमन्मध्वः **आपे** प्राप्तः । विधिवशाद् धनादिनाशे सति विरक्तो मध्वानुजो मध्व-मगमदित्यर्थः ॥ ९२ ॥

(त.चं.) निर्वेदः खेदो विरक्तिर्वा । तेनाऽपे विष्णुमङ्गलगतः ॥ ९२ ॥

पारिव्राज्यं प्रार्थयन्तं पादानम्रमिमं मुहुः ।
समयापेक्षयोर्वीशो गमयामास धाम तम् ॥ ९३ ॥

(प.दी.) पारिव्राज्यमिति । उर्वीक्षः श्रीपूर्णप्रज्ञाचार्यः **पारिव्राज्यं** यत्याश्रमं **प्रार्थयन्तं मुहुः पादानम्रं तं इमं** स्वानुजं **समयापेक्षया** कालापेक्षया **धाम गमयामास** । नायं कालः सन्न्यासस्य, कालान्तरे भविष्यतीत्युक्त्वा तावत् गृहं गमयामासेत्यर्थः ॥ ९३ ॥

(त.चं.) सन्न्यासोचितसमयापेक्षया । उर्वीक्षः । उर्वी पूर्णा ईक्षा प्रेक्षा प्रज्ञाऽस्येति पूर्णप्रज्ञः ॥ ९३ ॥

न जघास न सुष्वाप न जहास स धीरधीः ।
समयार्थी स्मरन् ज्येष्ठं रामं रामानुजो यथा ॥ ९४ ॥

(प.दी) नेति । **समयार्थी** सन्न्यासकालं प्रतीक्षमाणः सन् **ज्येष्ठं स्मरन् धीरधीः सः** मध्वानुजः **न जघास,** नाऽदत्, **न सुष्वाप, न जहास** । **समयार्थी** चतुर्दशवत्सरान्ते समेष्यामीति श्रीरामकृतसमयार्थी **रामं स्मरन् रामानुजो यथा** ॥ ९४ ॥

(त.चं.) रामानुजो भरतः । न जघास नाऽद । अद भक्षणे । 'लिट्यन्यतर-स्याम्' [२.४.४०] । लिटि परतोऽदः घसलादेशो वा भवति । जघास । आद । न जहास परिहासविजल्पितानि विजहौ । ज्येष्ठं मध्वं स्मरन् मध्वानुजः ज्येष्ठं रामं स्मरन् रामानुज इव ॥ ९४ ॥

राज्ये कथञ्चित् संस्थाप्य[१] राजानं विरहार्दितम् ।
अवतारभुवं प्रायाद् भगवान् शरदत्यये ॥ ९५ ॥

(प.दी.) राज्य इति । **भगवान्** श्रीमध्वः **शरदत्यये** शरदवसाने **अवतारभुवं** पाजकं **प्रायात्** । किं कृत्वा? **विरहार्दितं** भविष्यन्मध्वविरहाद् दुःखितं **राजानं** जयसिंहं **राज्ये कथञ्चित् संस्थाप्य** ॥ ९५ ॥

(त.चं.) शरदत्यये मार्गशीर्षे ॥ ९५ ॥

---

१. 'कथञ्चिन्निक्षिप्य' इति प्रचुरः पाठः । वेदाङ्गतीर्थीये विश्वपतितीर्थीये वा 'निक्षिप्य' इति प्रतीकं न गृहीतम् ।

विशुद्धद्विकुलं श्रौतं शुचिं कृतपितृक्रियम् ।
विरक्तं विषयान् भुक्त्वा व्यधान्मध्वोऽनुजं यतिम् ॥ ९६ ॥

(भा.प्र.) विशुद्धद्विकुलमित्यादि हेतुगर्भम् ॥

(प.दी) विशुद्धेति । **मध्वः अनुजं यतिं व्यधात्** । कथम्भूतम्? **विशुद्धद्विकुलं** निर्दुष्टमातृपितृवंशजम् । **श्रौतं** श्रुतिसम्बन्धिनम् । श्रुतिपाठवदर्थावधारण-युक्तम् । **शुचिं** मनोवाक्कायशुद्धिमन्तम् । **कृतपितृक्रियं** अनुष्ठितनित्य-नैमित्तिकपितृकार्यम्, तत्कालानुष्ठितजीवश्राद्धात्मकपितृकार्यं च । **विषयान् भुक्त्वा विरक्तम्** । अत्र विशुद्धद्विकुलत्वादयो विशेषा यत्याश्रमदाने हेतव इत्यर्थः ॥ ९६ ॥

(त.चं.) विषयान् भुक्त्वा । 'जान्तनशां विभाषा'[६.४.३२]। जान्तानां नशेश्च क्त्वाप्रत्यये नकारलोपो भवति नवा भवति । भुक्त्वा । भुङ्क्त्वा । नष्ट्वा नंष्ट्वा ॥ ९६ ॥

रहस्यतिरहस्यं तद् ब्रह्म ब्रह्मसमो ददौ ।
अमुष्मै पञ्चतपसो न विदुर्यत् तपस्विनः ॥ ९७ ॥

(प.दी.) रहसीति । **ब्रह्मसमः** चतुर्मुखसमः **रहसि अतिरहस्यं तद् ब्रह्म अमुष्मै ददौ** उपदिदेश । **पञ्चतपसः** पञ्चाग्निमध्ये तपश्चरन्तः **तपस्विनः यद् ब्रह्म न विदुः** तद् ब्रह्म ददावित्यर्थः ॥ ९७ ॥

(त.चं.) ब्रह्म प्रणवप्रतिपाद्यम् ॥ ९७ ॥

प्रेमामृतप्रसन्नास्यस्मिताङ्गापाङ्गपूर्वकम् ।
श्रीविष्णुतीर्थनामास्मै प्रीतितीर्थः प्रदत्तवान् ॥ ९८ ॥

(प.दी) प्रेमेति । **प्रीतितीर्थः प्रेमामृतप्रसन्नास्यस्मिताङ्गापाङ्गपूर्वकम्**, प्रेमामृतेन स्नेहामृतेन प्रसन्नं प्रेमामृतप्रसन्नम्, प्रेमामृतप्रसन्नं च तदास्यं मुखं चेति प्रेमामृतप्रसन्नास्यम्, स्मितमेवाङ्गं सहकारि यस्य स स्मिताङ्गः, स्मिता-

ङ्गश्चासावपाङ्गश्चेति स्मिताङ्गापाङ्गः, प्रेमामृतप्रसन्नास्यस्य स्मिताङ्गापाङ्ग-पूर्वकं यथा भवति तथा **अस्मै** यतिभूताय स्वावरजाय **श्रीविष्णुतीर्थनाम प्रदत्तवान्** ॥ ९८ ॥

(त.चं.) प्रेमामृतप्रसन्ने आस्ये यत् स्मितं तेनाङ्गभूतेन सहकृतो योऽपाङ्गः तत्पूर्वकम् । प्रेमपूर्णेन सस्मितेन कटाक्षेण तमनुगृह्णानः । विष्णुतीर्थ इति नाम प्रदत्तवान् ॥ ९८ ॥

श्रवणेनानुवादेन मननेनावृथाऽकरोत् ।
कालं वेदान्तशास्त्रस्य वेदान्तगुरुसोदरः ॥ ९९ ॥

(प.दी.) श्रवणेति । **वेदान्तगुरुसोदरः** श्रीविष्णुतीर्थार्यः **वेदान्तशास्त्रस्य श्रवणेन अनुवादेन** प्रमेयानुवादेन **मननेन** चिन्तनेन च **कालं** सकलमपि कालं **अवृथाऽकरोत्** अवन्ध्यमकरोत् ॥ ९९ ॥

(त.चं.) अनुवादेन प्रवचनेन । 'स्वाध्यायप्रवचनाभ्यां न प्रमदितव्यम्' इति हि श्रुतिः ॥ ९९ ॥

स दान्तिभक्तिमाधुर्यपरिचर्यादिमेदुरैः ।
महाविटपिनं चक्रे गुरोः स्वस्थं कृपाङ्कुरम् ॥ १०० ॥

(प.दी.) स इति । **सः** श्रीविष्णुतीर्थार्यः **स्वस्थं** स्वस्मिन् स्थितं **गुरोः** श्रीमध्वाचार्यस्य **कृपाङ्कुरं दान्तिभक्तिमाधुर्यपरिचर्यादिमेदुरैः** । [1]दान्तिश्च इन्द्रियनिग्रहश्च भक्तिश्च माधुर्यं च [2]वाङ्गनसोरपारुष्यं च परिचर्या च शुश्रूषा च दान्तिभक्तिमाधुर्यपरिचर्याः, ताः आदयो येषां गुणानां ते दान्तिभक्ति-माधुर्यपरिचर्यादयः, त एव मेदुराणि दान्तिभक्तिमाधुर्यपरिचर्यादिमेदुराणि

१ कोशे तावदेवं पठ्यते– 'दान्तिश्च इन्द्रियनिग्रहश्च माधुर्यं च वाङ्गनसोरपारुष्यं च परिचर्या च शुश्रूषा च दान्तिमाधुर्यपरिचर्याणि । तान्यादीनि येषां गुणानां ते दान्ति-माधुर्य–' इत्यादि । स्फुटो लिपिकृत्प्रमादः । २. 'वाङ्गनसयोः' इति पठनीयम् ।

तैः । **महाविटपिनं** महावृक्षं **चक्रे** । मेदुरं नाम सस्यवृद्धिकारणं गोमयादिकम् । मेदुरैरङ्कुरं वर्धयित्वा कश्चित् क्रमेण यथा महावृक्षं कुर्यादेवं स्वस्थं गुरुकृपाङ्कुरं दान्त्यादिभिरवर्धयदित्यर्थः ॥ १०० ॥

(त.चं.) मेदुरम् । 'भञ्ज-भास-मिदो घुरच्' [३.२.१६१] । इत्युक्तम् [५.४५] मेदत इति मेदुरः पशुः । ञिमिदा स्नेहने । स्नेहयोगेन वर्धयतीति मेदुरं करीषादि ।'गोब्बर' [ಗೊಬ್ಬರ] इति भाषायाम् ॥

अनन्तमतिकारुण्यकल्पद्रुमवतो जनैः ।
अवर्ण्यो महिमा तस्य लौल्यात् संवर्ण्यते मनाक् ॥ १०१ ॥

(प.दी.) अनन्तेति । **अनन्तमतिकारुण्यकल्पद्रुमवतः** श्रीपूर्णप्रज्ञाचार्यकारुण्यकल्पवृक्षवतः **तस्य महिमा जनैः अवर्ण्यः** वक्तुमशक्योऽपि **लौल्यात्** तन्महिमानमनुक्त्वा स्थातुं धैर्याभावात् **मनाक्** ईषत् **संवर्ण्यते** ॥ १०१ ॥

(त.चं.) अनन्तमतिकारुण्यमेव कामितङ्कामितं कल्पयतीति कल्पद्रुमः । लौल्यात् उत्तमगुणसंवर्णनचापलात् ॥ १०१ ॥

चतुरोऽसौ प्रवचने मनुसंसिद्धिमान् मनः ।
सङ्ख्या मा पूरणी मा गान्मध्वदासमिति व्यधात् ॥ १०२ ॥

(प.दी.) चतुर इति । **प्रवचने** श्रीमध्वशास्त्रव्याख्याने **चतुरः मनुसंसिद्धिमान्** सम्यक् मन्त्रसिद्धिमान् **असौ** श्रीविष्णुतीर्थः **मनः इति व्यधात्** । मनसा एवममन्यतेत्यर्थः । कथम्? **मध्वदासं मा** मां **पूरणी सङ्ख्या मा गात्** न प्राप्नोतु । अस्मादयं द्वितीयः, अस्मादयं तृतीय इत्यादिः पूरणी सङ्ख्या । सा मां न प्राप्नोतु । मध्वशिष्यसङ्ख्यानावसरे जनो मां अस्मादयं द्वितीयस्तृतीय इति वा न वदेत् । किन्तु मां यथा श्रीमध्वशिष्याग्रण्यं वदेत् तथा यतिष्य इत्यमन्यतेति भावः ॥ १०२ ॥

(त.चं.) अयं मध्वदासेषु द्वितीयस्तृतीय इति पूरणी सङ्ख्या मा गात् किन्तु मध्वदासाग्रणीर्भूयासमिति मनश्चक्रे ॥ १०२ ॥

दिशं प्रयातं शशिनश्चरन्तं पर्यशोधयत् ।
तीर्थकं विष्णुतीर्थं च विष्णुतीर्थश्च तीर्थकम् ॥ १०३ ॥

(प.दी.) दिशमिति । **शशिनः दिशं प्रयातं** भुवि **चरन्तं विष्णुतीर्थं तीर्थकं** तीर्थजलं **च पर्यशोधयत् । विष्णुतीर्थश्च तीर्थकं** तीर्थजलं **पर्यशोधयत् ।** गङ्गादितीर्थस्नानेन श्रीविष्णुतीर्थार्यः शुद्धकायोऽभूत् । भागवतश्रेष्ठस्य तस्य मज्जनादेव तीर्थसलिलानि च पावनान्यभूवन्नित्यर्थः ॥ १०३ ॥

(त.चं.) शशिनः दिशमुत्तराम् ॥ १०३ ॥

अकामानामनेकेषां सिद्धिभूमिं तपस्विनाम् ।
तिरोहितात्मा प्रापासौ हरिश्चन्द्रमहीधरम् ॥ १०४ ॥

(प.दी.) अकामानामिति । **असौ** श्रीविष्णुतीर्थार्यः **अकामानां** काम्यानुष्ठानरहितानां **अनेकेषां तपस्विनां सिद्धिभूमिं** तपःसिद्धिस्थानं **हरिश्चन्द्रमहीधरं**[1] हरिश्चन्द्राख्यपर्वतं **तिरोहितात्मा** अन्तर्हितस्वरूपः **प्राप** ॥

(त.चं.) सिद्धिभूमिम् । 'भूमिर्वसुन्धरायां स्यात् स्थानमात्रेऽपि च स्त्रियाम्' इति च ॥ १०४ ॥

द्वन्द्वदुःखानले वीरो मात्सर्येण विमत्सरः ।
तत्याज मत्वा तस्यासावशनादीन्धनायितम् ॥ १०५ ॥

(प.दी.) द्वन्द्वेति । **वीरः** अध्यवसायान्तगामी **विमत्सरः** सन्नपि **असौ द्वन्द्वदुःखानले** शीतोष्णादिद्वन्द्वदुःखाग्नौ **मात्सर्येण अशनादि तत्याज ।** किमिति? अशनादिकं **तस्य** द्वन्द्वदुःखाग्नेः **इन्धनायितं मत्वा** ॥ १०५ ॥

---

१. 'हरिश्चन्द्रं महीधरम्' इत्यपि पाठान्तरम् ।

(त.चं.) द्वन्द्वदुःखानले मात्सर्येण । 'अप्रीतिर्मद्वशो नायमिति मत्सर ईरितः' ॥ १०५ ॥

भक्तैरनुगिरं नीतं प्रार्थितो यतिशेखरः ।
पञ्चगव्यं पपौ किञ्चित् पञ्चमेपञ्चमे दिने ॥ १०६ ॥

(भा.प्र.) अनुगिरम् । 'गिरेश्च सेनकस्य' इति टच् समासान्तप्रत्ययः ॥

(प.दी) भक्तैरिति । **यतिशेखरः भक्तैः अनुगिरं** गिरिसमीपं **नीतं पञ्चगव्यं पञ्चमेपञ्चमे दिने किञ्चित् पपौ** । कथम्भूतः? **प्रार्थितः** भक्तैः सम्प्रार्थितः ॥ १०६ ॥

(त.चं.) अनुगिरम् । 'गिरेश्च सेनकस्य'[५.४.११२] । गिरिशब्दान्तादव्ययीभावात् टच्प्रत्ययो भवतीति सेनकाचार्यस्य मतम् । अनुगिरम् । अनुगिरि । उपगिरम् । उपगिरि । अन्तर्गिरम् । अन्तर्गिरि । 'अनु हीने समीपे च' इति चाभिधानम् ॥ १०६ ॥

स त्यजन् साहसी तच्च तपस्तेपेऽतितापसम् ।
बिल्वपर्णैः क्षितौ पन्नैस्तृप्तिमान् सलिलैरपि ॥ १०७ ॥

(प.दी.) **स** इति । **साहसी** साहसयुक्तः **तच्च** पञ्चगव्यं च **त्यजन् सः अतितापसं** इतरतपस्विनोऽतिक्रम्य वर्तमानं **तपस्तेपे** । कथम्भूतः? **क्षितौ पन्नैः** पतितैः **बिल्वपर्णैः सलिलैरपि तृप्तिमान्** ॥ १०७ ॥

(त.चं.) पन्नैः । 'पन्नं तु पतितं प्रोक्तम्' इति च ॥ १०७ ॥

यथेष्टमध्यास्त शिलां यमी सुनियमी स ताम् ।
नाऽध्यासते यामेकाहं दैवभग्नास्तपस्विनः ॥ १०८ ॥

(भा.प्र.) शिलामध्यास्त । 'अधिशीङ्स्थासां कर्म' इति ॥

(प.दी.) **यथेष्टमि**ति । **यमी** मनःसंयमवान् **सुनियमी** शोभनव्रतरूप-

नियमवान् **सः तां शिलां यथेष्टमध्यास्त** । **दैवभग्नास्तपस्विनो यां** शिलां **एकाहं नाध्यासते** । शिलामिति 'अधिशीङ्स्थासां कर्म' इति कर्मत्वम् । दैवानुग्रहरहितास्तपस्विनो यस्यां शिलायामेकाहमपि स्थातुमसमर्थाः तस्यां शिलायामयं बहुकालं वसंस्तपश्चकारेति भावः ॥ १०८ ॥

(त.चं.) यमी सुनियमी। अहिंसा सत्यमस्तेयं ब्रह्मचर्यमपरिग्रहश्च यमाः । शौचं तपस्तुष्टिः स्वाध्यायो हरिपूजनं च नियमाः । अष्टाङ्गे योगे यमनियमौ प्रथमौ द्वौ । अथ तृतीयमासनजयमाह– **अध्यास्त शिलाम्** । 'अधिशीङ्स्थासां कर्म'[१.४.४६] । अधिपूर्वाणां शीङ् स्था आस् इत्येतेषामाधारकारकं कर्मसञ्ज्ञं भवति । शिलामधिशेते । शिलामधितिष्ठति । शिलामध्यास्ते ॥ १०८ ॥

पवनांशानुजो जित्वा पवनं रेचकादिभिः ।
विषयेभ्यो हृषीकाश्वान् मनोयन्त्रा समाहरत्॥ १०९ ॥

(प.दी.) पवनेति । **पवनांशानुजः रेचकादिभिः** रेचकपूरककुम्भकैः **पवनं** शरीरवायुं **जित्वा हृषीकाश्वान्** इन्द्रियाख्याश्वान् **विषयेभ्यः** शब्दादिभ्यः **मनोयन्त्रा** मनोनाम्ना सारथिना **समाहरत्** ॥ १०९ ॥

(त.चं.) अथ चतुर्थः प्राणायाम उच्यते । पञ्चमः प्रत्याहारश्च । प्राणानायम्य पवनं जित्वा इन्द्रियाश्वान् विषयेभ्यः प्रत्याजहारेति । तदनेन पञ्चाङ्गान्युक्तानि भवन्ति ॥ १०९ ॥

स्मरन् मुरारेराकारं दध्यावध्यात्मकोविदः ।
समाधिमाधिशमनं योगिलभ्यं स लब्धवान् ॥ ११० ॥

(प.दी.) स्मरन्निति । **अध्यात्मकोविदः** अध्यात्मविचारविशारदः **सः मुरारेराकारं स्मरन्** गुरूक्तमार्गेण स्मरन् **दध्यौ** । एवं कुर्वन् **सः योगिलभ्यं** भगवति मनोयोगवद्भिर्लभ्यं **आधिशमनं** मनःक्लेशनिवर्तकं **समाधिं लब्ध-**

वान् । समाधिर्नाम निरन्तरं भगवति मनोयोगः । तथाचोक्तम्– 'परो हि योगो मनसः समाधिः' इति ॥ ११० ॥

(त.चं.) स्मरन्निति खण्डा स्मृतिर्धारणा नाम । दध्यावित्यखण्डा ध्यानम् । समाधिरिति अप्रयत्नेन ध्यानरूपः समाधिरित्यष्टाङ्गो योग उक्तो भवति ॥

मौकुन्दे सुन्दरे रूपे स्वानन्दादिगुणार्णवे ।
स्वाश्चर्यरत्ने मग्नात्मा नान्यत् किञ्चिद् विवेद सः ॥ १११ ॥

(प.दी.) **मौकुन्द** इति । **सुन्दरे स्वानन्दादिगुणार्णवे** निर्दोषपरमानन्दादिगुणनिधौ **स्वाश्चर्यरत्ने** शोभनेष्वाश्चर्येषूत्तमे **मौकुन्दे** मुकुन्दसम्बन्धिनि **रूपे मग्नात्मा** निमग्नचित्तः **सः अन्यत्** ध्यानविषयभगवद्रूपादन्यत् **किञ्चिन्न विवेद** । असम्प्रज्ञातसमाधिरभूदित्यर्थः ॥ १११ ॥

(त.चं.) विवेद विदाञ्चकार । विद ज्ञाने ॥ १११ ॥

कामत्रासविहीनस्य तस्य सुज्ञानचक्षुषः ।
विना कैवल्यसाम्राज्यं नार्घो योगमणेरभूत् ॥ ११२ ॥

(प.दी.) **कामेति** । **तस्य** श्रीविष्णुतीर्थार्यस्य **योगमणेः** योगाख्यरत्नस्य **कैवल्यसाम्राज्यं विना** अन्यत् **अर्घः** मूल्यं **नाभूत्** । यथा कस्यचिद् रत्नविशेषस्य साम्राज्यं विनाऽन्यन्मूल्यं न स्यात्, एवमेतद्योगस्यापि कैवल्यं मोक्षं विनाऽन्यत् फलतया नाभूदित्यर्थः । कथम्भूतस्य योगमणेः? **कामत्रासविहीनस्य** फलकामाख्यत्रासरहितस्य । त्रासो नाम मणिदोषः । मणिर्यथा दोषरहितः स्यादेवमस्य योगोऽपि फलकामाख्यदोषरहित इत्यर्थः । **सुज्ञानचक्षुषः** शोभनापरोक्षज्ञानाख्यचक्षुष्मतः । मणिप्रकाशश्च चक्षुरित्युच्यते । मणिर्यथा शोभनप्रकाशवान् स्यात् एवमेतद्योगोऽपि सम्यगपरोक्षज्ञानवानित्यर्थः ॥ ११२ ॥

(त.चं.) कामत्रासविहीनस्य । 'त्रासो भये मणेर्दोषे' । कामत्रासाभ्यां विही-

नस्य । कामाख्यत्रासविहीनस्य । स मणिस्त्रासदुष्टो यो धृतस्त्रासं जनयति । सुज्ञानमन्तश्चक्षुः । सूत्रग्रथनच्छिद्रं मणेश्चक्षुः । ज्योतिर्विशेषो वा । कैवल्यं केवलानन्दिता । 'कैवल्यं निर्वाणं मुक्तिर्मोक्षो महानन्दः' इति च ॥

मध्वानुजे मध्वनाथो यं प्रसादं व्यधात् तदा ।
स चित्ताविषयत्वाद् वा गोप्यत्वाद् वा न वर्ण्यते ॥ ११३ ॥

(प.दी.) मध्वानुज इति । **मध्वनाथः** हरिः **मध्वानुजे तदा यं प्रसादं** अनुग्रहं **व्यधात् सः** अनुग्रहः **चित्ताविषयत्वाद् वा गोप्यत्वाद् वा न वर्ण्यते** ॥

(त.चं.) केषाञ्चित् चित्ताविषयः । केषुचिद् गोप्यः ॥ ११३ ॥

अहो महाबोधसेवामहिमाऽस्मिन् युगे यतः ।
धन्योऽसौ सिद्धिमापेमां सोऽमरैरित्यलाळ्यत ॥ ११४ ॥

(प.दी.) **अहो** इति । **महाबोधसेवामहिमा** श्रीपूर्णप्रज्ञाचार्याणां सेवाया महिमा **अहो** आश्चर्यम् । कुतः? **असौ धन्यः अस्मिन् युगे इमां** एवम्भूतां **सिद्धिमाप यतः, इति सः** महाबोधसेवामहिमा **अमरैः अलाळ्यत** आदृतोऽभूत् ॥ ११४ ॥

(त.चं.) इमामनितरसुलभाम् । स विष्णुतीर्थः । अमरैरपि ॥ ११४ ॥

तीव्रव्रतोऽतीन्द्रियविद् विद्याब्धिस्तर्कपण्डितः ।
अनिरुद्धपदाधारः प्रेष्ठः शिष्यस्तमाययौ ॥ ११५ ॥

(प.दी.) **तीव्रेति** । **प्रेष्ठः** अतिप्रियः **शिष्यः** श्रीविष्णुतीर्थार्याणां शिष्यः **तं** स्वगुरुं **आययौ** हरिश्चन्द्रगिरौ ददर्शेत्यर्थः । कथम्भूतः? **तीव्रव्रतः** अन्यदुष्करव्रतविशेषयुक्तः । **अतीन्द्रियवित्** अतीन्द्रियज्ञानवान् । **विद्याब्धिः तर्कपण्डितः** तर्कशास्त्रचतुरः । **अनिरुद्धपदाधारः** अनिरुद्धनाम्न आधारः । अनिरुद्धतीर्थनामवाच्य इत्यर्थः ॥ ११५ ॥

(त.चं.) अनिरुद्धतीर्थः प्रथमः शिष्यः, यः पश्चात् सुब्रह्मण्यमठपरम्परां प्रवर्तयामास ॥ ११५ ॥

तेन सम्प्रार्थितं यातं रूप्यपीठमिमं पुनः ।
कृत्स्नज्ञं कृपया स्वेषु सम्प्राप्तं मेनिरे प्रजाः ॥ ११६ ॥

(प.दी.) तेनेति । **तेन** अनिरुद्धतीर्थार्येण **सम्प्रार्थितं** रूप्यपीठागमनाय सम्प्रार्थितम् । अत एव **रूप्यपीठं यातं इमं** श्रीविष्णुतीर्थार्यं **प्रजाः** शिष्यजनाः **स्वेषु कृपया पुनः सम्प्राप्तं कृत्स्नज्ञं** श्रीपूर्णप्रज्ञाचार्यं **मेनिरे** । श्रीमध्वतदनुजयोः सादृश्यात् प्रजाः श्रीमध्वानुजं दृष्ट्वा स्वेषु कृपया श्रीमध्वमेव पुनः प्राप्तं मेनिर इत्यर्थः ॥ ११६ ॥

(त.चं.) स्वेषु स्वजनेषु ॥ ११६ ॥

कवीन्द्रतिलको विद्वच्छेखरस्तापसाग्रणीः ।
मध्वकेळीशुकोऽस्याभूच्छिष्यो व्यासपदाश्रयः ॥ ११७ ॥

(प.दी.) कवीन्द्रेति । **अस्य** विष्णुतीर्थार्यस्य **कवीन्द्रतिलकः विद्वच्छेखरः तापसाग्रणीः, मध्वकेळीशुकः** श्रीमन्मध्वस्य क्रीडाशुकः, **व्यासपदाश्रयः** श्रीवेदव्यासवाचकबादरायणपदस्याऽश्रयः, बादरायणतीर्थार्य इत्यर्थः, एवम्भूतः **शिष्योऽभूत्** ॥ ११७ ॥

(त.चं.) व्यासपदाश्रयो बादरायणतीर्थोऽपरः शिष्यः, तमेतं वेदव्यासतीर्थ इति च व्याहरन्ति, सम्प्रति 'सोदेमठ'[ಸೋದೆಮಠ] इति प्रथितायाः परम्परायाः प्रवर्तकम् । यथा नरसिंहतीर्थ इति नरहरितीर्थम् । मध्वकेळीशुकः । शुकवल्लाळनीयः । प्रीतिपात्रम् ॥ ११७ ॥

असौ दास्यं ध्रुवं यातं महान्तं महतामपि ।
व्यधादनुग्रहं कुर्वन् सामर्थ्यैः कौतुकं नृणाम् ॥ ११८ ॥

(प.दी.) **असाविति** । **असौ** श्रीविष्णुतीर्थार्यः **ध्रुवं** निश्चलं यथा भवति तथा **दास्यं** स्वस्य दासत्वं **यातं** बादरायणतीर्थाख्यं **महतामपि महान्तं व्यधात्** । किं कुर्वन्? **अनुग्रहं कुर्वन्** तस्मिन् बादायणतीर्थार्ये तादृशमनुग्रहं कुर्वन्नित्यर्थः । स्वयं कथम्भूतः? **सामर्थ्यैः** स्वसामर्थ्यैः **नृणां कौतुकं** आश्चर्यं **कुर्वन्** ॥ ११८ ॥

(त.चं.) बादरायणतीर्थेऽनुग्रहं कुर्वन् । नृणां कौतुकं च कुर्वन् । वादे रतानामयनो बादरायणः ॥ ११८ ॥

आरुरोह दुरारोहं स परैः प्रीतिकृद्धरेः ।
महान्तं महिमानं च महीध्रं च गुहप्रियम् ॥ ११९ ॥

(प.दी.) **आरुरोहेति** । **हरेः प्रीतिकृत् सः** श्रीविष्णुतीर्थार्यः **परैः** अन्यैः **दुरारोहं** अप्राप्यं **महान्तं महिमानं च आरुरोह** । प्रापेत्यर्थः । **गुहप्रियं** षण्मुखप्रियं **महीध्रं चाऽरुरोह** । नरागम्यं कुमारपर्वताख्यं सह्यशिखरमारुरोहेत्यर्थः ॥ ११९ ॥

(त.चं.) महीध्रं च गुहप्रियम् । कुमाराद्रिम् । योऽद्यापि तपस्तप्यते तत्र गिराविति विदो वदन्ति ॥ ११९ ॥

आकृष्टोऽस्य गुणैर्व्याप्तैर्यो गोदाया उपाययौ ।
स पद्मनाभतीर्थाख्यः शिष्योऽन्योऽभूत् सुचेतसः ॥ १२० ॥

(प.दी.) आकृष्ट इति । **व्याप्तैः अस्य** मध्वस्य **गुणैराकृष्टः यः गोदायाः** गोदावरीतीरात् **उपाययौ सः सुचेतसः** श्रीपूर्णप्रज्ञाचार्यस्य **पद्मनाभतीर्थाख्यः अन्यः शिष्योऽभूत्** ॥ १२० ॥

(त.चं.) अथ सप्तभिः श्लोकैः पद्मनाभतीर्थस्य महिमानमाह– आकृष्टोऽस्य गुणैः । यः शोभनोपपदभट्टनामको गोदायास्तटादुपाययौ ॥ १२० ॥

श्रुत्या मत्या सदा भक्त्या विरक्त्या नित्यसेवया ।
यस्मै प्रसन्नः प्राज्येक्षः सद्यो विद्यां ददौ शुभाम् ॥ १२१ ॥

(प.दी.) श्रुत्येति । **श्रुत्या** वेदान्तशास्त्रस्य श्रवणेन **मत्या** मननेन **सदा** सदातनया **भक्त्या विरक्त्या नित्यसेवया** च **प्रसन्नः प्राज्येक्षः** श्रीपूर्णप्रज्ञाचार्यः **यस्मै** श्रीपद्मनाभतीर्थार्याय **सद्यः** द्राक्, 'सद्यो द्राङ् मङ्क्षु च द्रुतम्' इत्यमरः । **शुभां विद्यां ददौ** परमात्मतत्वविद्यां ददौ ॥ १२१ ॥

(त.चं.) सद्यः उपगमनसमनन्तरमेव ॥ १२१ ॥

वेदान्ताब्धिं न यो जातु जहौ विद्वत्तिमिङ्गिलः ।
युक्तिप्रवाहसंरम्भात् परशास्त्रनदीचरः ॥ १२२ ॥

(प.दी.) वेदान्तेति । **यो विद्वत्तिमिङ्गिलः जातु** कदाऽपि **वेदान्ताब्धिं** वेदान्तशास्त्राख्यसमुद्रं **न जहौ** । तिमिङ्गिलो नाम मत्स्यविशेषः । स यथा जात्वपि समुद्रं न जहाति एवमसौ वेदान्तशास्त्रं न जात्वपि जहावित्यर्थः । कथम्भूतः? **युक्तिप्रवाहसंरम्भात्** वैशेषिकादीनां युक्तिप्रवाहेषु कोपात् तन्न्यायेन तद्युक्तिनिराकरणार्थं **परशास्त्रनदीचरः** वैशेषिकादिशास्त्राख्यनदीषु प्रवर्तमानः ॥ १२२ ॥

(त.चं.) 'संरम्भः सम्भ्रमस्तथाऽऽटोपः' इति च । प्रवाहसंरम्भात् कदाचित् नदीचरोऽपि ॥ १२२ ॥

व्याख्याप्रणादमात्रेण वीरम्मन्यान् स्वमण्डले ।
मायाविग्रामसिंहान् यो वादिसिंहो निराकरोत् ॥ १२३ ॥

(प.दी.) व्याख्येति । **यो वादिसिंहः स्वमण्डले** स्वयूथे **वीरम्मन्यान्** वयमेव वीरा इति मन्यमानान् **मायाविग्रामसिंहान्** मायावादिसारमेयान् **व्याख्याप्रणादमात्रेण निराकरोत्** । तस्य व्याख्याप्रणादमात्रेण व्याख्याप्रणादश्रवणमात्रेण मायिनो बिभ्यति स्मेति भावः ॥ १२३ ॥

(त.चं.) ग्रामसिंहा अपि स्वमण्डल एव वीरम्मन्याः ॥ १२३ ॥

मत्तदुर्वादिमातङ्गतर्कमस्तकदारणे ।
पञ्चास्यो योऽभवद् व्यक्तं चतुरास्योऽपि केवलम् ॥ १२४ ॥

(भा.प्र.) चतुरास्योऽपि चतुरवदनोऽपि ॥

(प.दी.) **मत्तेति**। यः **केवलं चतुरास्योऽपि** भद्रवदनोऽपि **मत्तदुर्वादिमातङ्गतर्कमस्तकदारणे**, मत्तानां विद्यागर्ववतां दुर्वादिमातङ्गानां तर्कमस्तकदारणे कुतर्ककुम्भदलने **व्यक्तं पञ्चास्यः** सिंहः **अभवत्** । चतुर्वदनोऽपि पञ्चवदनोऽभवदिति विरुद्धालङ्कारः ॥ १२४ ॥

(त.चं.) चतुरास्योऽपि पञ्चास्यः। चतुरवदनश्च । प्रवचनचतुर इत्येतत् ॥

सन्न्यायरत्नावळिरप्युदपादि यतः परा ।
टीका परानुव्याख्याया अनर्घा बोधसागरात् ॥ १२५ ॥

(प.दी.) **सन्न्यायेति**। **बोधसागरात्** ज्ञानसमुद्रात् **यतः** श्रीपद्मनाभतीर्थार्यात् **परानुव्याख्यायाः परा** उत्तमा टीका **सन्न्यायरत्नावळिरपि** सन्न्यायरत्नावळ्याख्यग्रन्थोऽपि **उदपादि** जज्ञे । कथम्भूता? **अनर्घा** । असदृशेत्यर्थः । समुद्रादनर्घा रत्नावळिरिवेति श्लेषार्थः ॥ १२५ ॥

(त.चं.) सन्न्यायरत्नावळिरपि । टीका अपरा अनुव्याख्याया इति वा च्छेदः । एका स्वकृता नयचन्द्रिका । शङ्करार्यकृता वा सम्बन्धदीपिका । अपरा, अथापि परा ॥ १२५ ॥

वेदप्रवचनाचार्यशिष्योऽसाविति पूजितः ।
सभ्यः सभायां यो वेदं व्याचख्यौ वेदसारवित् ॥ १२६ ॥

(प.दी.) **वेदेति**। **असौ वेदप्रवचनाचार्यशिष्य इति पूजितः सभ्यः** सभाया

उचितः **यः** श्रीपद्मनाभतीर्थार्यः **वेदसारवित्** वेदार्थाभिज्ञः सन् **सभायां वेदं व्याचख्यौ** ॥ १२६ ॥

(त.चं.) सभ्यः । 'सभाया यः'[४.४.१०५] । सभायां साधुः । सभासु पूज्यः कृती कुलीनः सज्जनश्च ॥ १२६ ॥

अनयोः प्रथमे शिष्याश्चरमे चाभवन्निह ।
अनन्तबोधस्यानेके यतीन्द्रा बहुदेशजाः ॥ १२७ ॥

(प.दी.) अनयोरिति । **अनन्तबोधस्य** श्रीपूर्णप्रज्ञाचार्यस्य **अनयोः** श्रीविष्णुतीर्थार्यात् श्रीमद्मनाभतीर्थार्याच्च **प्रथमे चरमे च** प्राक्तनाः पश्चात्तनाश्च **अनेके** बहवः **यतीन्द्राः शिष्या इह अभवन्** । कथम्भूताः? **बहुदेशजाः** नानादेशसम्भवाः ॥ १२७ ॥

(त.चं.) प्रथमे हृषीकेशतीर्थादयः । अनेकेषु नव यतीन्द्राः सम्प्रदायप्रवर्तका अभवन्निति ॥ १२७ ॥

वशीकृतहृषीकाश्च जननाद्युपमर्दिनः ।
नरसिंहपदाधारा अभ्यस्तोपेन्द्रनामकाः ॥ १२८ ॥

अदीर्घान्याभिधानाश्च[1] श्रीमद्रामपदाश्रयाः ।
अप्रत्यक्षगुणोद्रिक्ता भक्तिवैराग्यसागराः ॥ १२९ ॥

(भा.प्र.) हृषीकेशतीर्थाः । जनार्दनतीर्थाः । नरहरितीर्थाः । लोकैरभ्यस्तं 'उपेन्द्रतीर्थाः' इति नामैषाम् ।'अदीर्घ' इत्यर्थतः, अन्यत् 'वामनतीर्थाः' इत्यभिधानमेषाम् । अल्पीकृतलौकिकव्यवहाराश्च । रामतीर्थाः । अक्षजं प्रत्यक्षमधो यद्गुणेभ्यस्तेऽधोक्षजतीर्था इति । 'हृषीकेश' इत्यादि सूचितम् । '[2]भक्तिज्ञान-

---

१.'अदीर्घान्याभिधाना ये' इति प्रचुरः पाठः । वेदाङ्गतीर्थीये विश्वपतितीर्थीये च 'अदीर्घान्याभिधानाश्च' इत्येव पाठः ।

२.अर्थानुवादोऽयम् –'भक्तिवैराग्यसागराः' इत्यस्य ।

वैराग्यसागराः' इति सर्वत्रापि तीर्थशब्दोऽभिप्रेतः। सागरस्यापि शुद्धतीर्थत्वात्। एतेषामेतानि नामानि गुणयोगैर्वर्तन्त इति प्रकटयितुं तत्तद्गुणवत्त्वकथनेन सूचितानि। यथायोग्यं सर्वेषां सर्वगुणवत्त्वज्ञापनाय च॥

(प.दी.) तत्रापि महत्तमानां केषाञ्चिन्नामधेयान्याह— **वशीकृते**त्यादिना। **वशीकृतहृषीकाः** वशीकृतेन्द्रियाः, 'हृषीकं विषयेन्द्रियम्' इत्यमरः, अत एवेन्द्रियाणामीशत्वात् हृषीकेशतीर्थार्या इत्यर्थः। **जननाद्युपमर्दिनः च**। जन्ममरणादिदोषनिराकरणशीलाः। अत एव जनार्दनतीर्थार्या इति भावः। **नरसिंहपदाधाराः** श्रीनरसिंहचरणारविन्दाश्रयाः, नरसिंहपदस्य नरसिंहतीर्थनाम्नः आधाराश्चेति भावः। **अभ्यस्तोपेन्द्रनामकाः** अभ्यस्तं लोकैः परिचितं उपेन्द्र इति नाम येषां ते अभ्यस्तोपेन्द्रनामकाः। उपेन्द्रतीर्थनामवत्त्वेन लोके प्रसिद्धा इत्यर्थः। सम्यगुच्चारितभगवन्नामान इति च ध्वनितार्थः॥ * ॥ **अदीर्घन्याभिधानाश्च**। अदीर्घो वामनः। वामन इत्यन्यत् उक्तेभ्योऽन्यत् अभिधानं नाम येषां ते अदीर्घान्याभिधानाः, वामनतीर्थाख्या इत्यर्थः। अल्पीकृतलौकिकव्यवहाराश्च। **श्रीमद्रामपदाश्रयाः** श्रीमद्रामनाम्नः आश्रयाः, श्रीरामतीर्था इत्यर्थः। **अप्रत्यक्षगुणोद्रिक्ताः** प्रत्यक्षागोचरगुणैरुद्रिक्ताः। तस्मादधोक्षजतीर्था इत्यर्थः। अधःकृतमक्षजं प्रत्यक्षं येन सः अधोक्षज इति व्युत्पत्तिः। अक्षजाधःकरणं च तदगोचरगुणवत्त्वम्। 'वशीकृतहृषीकाश्च' इत्यादिनोक्ताः सर्वेऽपि यतयः **भक्तिवैराग्यसागराः**। भक्तिवैराग्यज्ञानादिगुणसागरत्वमेव वशीकृतहृषीकत्वादिविशेषणैः सूचितम्। भक्त्यादिसागरत्वोक्त्यैव हृषीकेशनरसिंहजनार्दनादिनाम्नां तीर्थशिरस्कत्वं च सूचितम्। सागरस्यापि विशिष्टतीर्थत्वात्। एतेषामेतानि नामानि तत्तद्गुणयोगैरेव वर्तन्त इति सूचयितुं तत्तद्गुणकथनपूर्वकमेव नामानि सूचितानि। यथायोग्यं सर्वेषां च सर्वगुणवत्त्वज्ञापनाय सर्वत्र बहुवचनम्॥ १२८॥ १२९॥

(त.चं) अवशिष्टानां सप्तानां नामान्याह– वशीकृतहृषीकाः । हृषीकाणामीशत इति हृषीकेशतीर्थाः । जननाद्युपमर्दिनः । जनं जननमर्दयन्तीति जनार्दनतीर्थाः । नरसिंहपदाधाराः । नरहरितीर्थाः । नरसिंहपदाश्रया नरहरिपदगदिताश्चेति । नरसिंहतीर्था इति चैतेषामेव नामान्तरम् । यथा बादरायणतीर्था व्यासतीर्था इति । नरहरितीर्था अन्ये, नृसिंहतीर्थाश्चान्य इति वदन्तश्चिन्त्याः । भावप्रकाशिकाविरोधात् । अभ्यस्तोपेन्द्रनामकाः उपेन्द्रतीर्थाः । अभ्यस्तं उपेन्द्रस्य नामैभिरिति, जनैरभ्यस्तं उपेन्द्रतीर्था इति नामैषामिति च । अदीर्घान्याभिधानाः । वामनतीर्थाः । अदीर्घ इत्यर्थे यदन्यदभिधानं वामन इति, तत् तेषामभिधानमिति । अदीर्घमल्पं अन्याभिधानं लौकिकं व्याहरणमेषामिति च । श्रीमद्रामपदाश्रयाः । रामतीर्थाः । श्रीमद्रामचरणाश्रया रामपदगदिताश्च । अप्रत्यक्षगुणोद्रिक्ताः । अधोक्षजतीर्थाः । अधःकृतमक्षजं यैरलौकिकगुणद्वारा । सर्वेऽपि सर्वगुणा भक्तिवैराग्यसागराः । वामनतीर्थादनन्तरा विष्णुतीर्थाः । सन्न्यासक्रमेण चायमुद्देशः । यदा वेदान्तसाम्राज्याभिषेकस्तदा तीर्थनामप्रदानम् । यथा पूर्णप्रज्ञ इत्यानन्दतीर्थ इति । पीठारोहणक्रमेण तु हृषीकेशतीर्थाः, ततो नरहरितीर्थाः, ततो जनार्दनतीर्था इतीयान् भेदः । अन्यत् समानम् । तथाहि सम्प्रदायविदः पठन्ति– 'वन्दे हृषीकेशमथो नृसिंहं जनार्दनं चिन्तय धीरुपेन्द्रम् । श्रीवामनं संस्मर विष्णुमेमि श्रीराममञ्चेऽहमधोक्षजं च' इति । हृषीकेशतीर्थानां सन्न्यसनादनन्तरं पद्मनाभतीर्थानां सन्न्यसनमिति तु मूल एव स्फुटम् । न प्रथमे । किन्तु कतमे त इति न स्फुटम् । नरहरितीर्थेभ्यः पूर्वमिति तु गुरुपरम्परयाऽवसीयते । तेन हृषीकेशतीर्थेभ्यः समनन्तरं द्वितीयतया जनार्दनतीर्थेभ्यः समनन्तरं तृतीयतया वा तेषां सन्न्यसनमासीदिति तु सम्भावितः पन्थाः ॥ १२८ ॥ १२९ ॥

पादैः पुनन्तः पृथिवीं दर्शयन्तो हरेः पदम् ।
धूतदुःसमयध्वान्ता भास्करा इव गां गताः ॥ १३० ॥

(प.दी.) पुनः कथम्भूताः? **गां भुवं गताः भास्करा इव** । कुतः? **पादैः** स्वचरणैः **पृथिवीं पुनन्तः** । सूर्यकिरणसम्बन्धाद् भुवो यथा शुद्धिः स्यादेवमेतच्चरणसम्बन्धादपीति भावः । **हरेः पदम्** । पद्यत इति पदं स्वरूपम् । तद् **दर्शयन्तः** सच्छास्त्रव्याख्यानेन प्रकाशयन्तः । भास्कराश्च विष्णुपदमाकाशं प्रकाशयन्ति । **धूतदुःसमयध्वान्ताः** सच्छास्त्रव्याख्यानेनैव निरस्तदुःशास्त्रतिमिराः । सूर्याश्च निरस्ततिमिरा हि ॥ १३० ॥

(त.चं.) सर्वेऽपि ज्ञानभास्करा इत्याह– पादैः पुनन्तः । पादैः किरणैश्च । हरेःपदमाकाशं च ॥ १३० ॥

मोक्षशास्त्रामृताम्भोधिसेवया नित्यनिर्वृताः ।
चक्रिचारुतरार्चासु चक्रिणश्चरणार्चकाः ॥ १३१ ॥

(प.दी.) **मोक्षेति** । **मोक्षशास्त्रामृताम्भोधिसेवया** । मोक्षशास्त्रं नाम मोक्षसाधनं श्रीमन्मध्वप्रणीतं वेदान्तशास्त्रम्, तदेवामृतसमुद्र इव, तस्य सेवया श्रवणमननादिना **नित्यनिर्वृताः** सर्वदा सुखं प्राप्ताः । **चक्रिचारुतरार्चासु** । चक्रिणो हरेः चारुतरासु अर्चासु प्रतिमासु **चक्रिणश्चरणार्चकाः** चक्रायुधस्य चरणारविन्दपूजकाः ॥ १३१ ॥

(त.चं.) भगवत्पादप्रदत्तासु अर्चासु । तथाहि सम्प्रदायविदः–'रघुपौ काळियमथनौ सुविट्ठलौ सूकरं नृसिंहं च । अन्यं विठ्ठलमगणितमतिशिष्यैः पूजितान् नमामि सदा' इति । हृषीकेशतीर्थपद्मनाभतीर्थयोः रघुपौ । उकारवाच्यस्य रामस्यार्चे । नरहरिजनार्दनतीर्थयोरकारवाच्यौ काळियमथनौ कृष्णौ । उपेन्द्रवामनतीर्थयोरप्यकारवाच्यौ सुविट्ठलौ गोपालकृष्णौ । विष्णुतीर्थस्य नादवाच्यः सूकरः । रामतीर्थस्य च मकारवाच्यो नरसिंहः । अधोक्षजतीर्थस्य पुनरकारवाच्यः कृष्णात्मा विट्ठल इति । सर्वेऽपि प्रणवोपासकाः । अथाप्युपासनाभेदेनार्चाभेद इति ॥ १३१ ॥

मध्वप्रशिष्या बहवो शिष्या एषां मुहुस्तथा ।
अलश्चक्रुरलं पृथ्वीं सर्वे सद्गुणभूषणाः ॥ १३२ ॥

(भा.प्र.) एषां प्रशिष्याणां शिष्यास्तथा बहवः ॥

(प.दी.) मध्वेति । **बहवो मध्वप्रशिष्याः तथा एषां मुहुः शिष्याः** च **सर्वे पृथ्वीं अलं** सम्यक् **अलश्चक्रुः** । कथम्भूताः? **सद्गुणभूषणाः** तपोज्ञानभक्ति-वैराग्यादिसद्गुणा एव भूषणं येषां ते तथोक्ताः ॥ १३२ ॥

(त.चं.) यथा शिष्याः प्रशिष्याश्च बहव आसन् एवमेषां प्रशिष्याणां शिष्या अपि तथा बहव आसन् । ये स्वयं सद्गुणैरलङ्कृताः पृथ्वीमप्य-लश्चक्रुः ॥ १३२ ॥

सदा सकलसच्छास्त्रव्याख्यासौख्यामृताब्धिगाः ।
सर्वे दुर्वादिदुर्वादकाण्डखण्डनमण्डनाः ॥ १३३ ॥

(प.दी.) सदेति । **सर्वे** अपि **सदा सकलसच्छास्त्रव्याख्यासौख्यामृता-ब्धिगाः** । स्पष्टोऽर्थः । **दुर्वादिदुर्वादकाण्डखण्डनमण्डनाः** । दुर्वादिनां दुर्वादाः दुर्वचनानि । ते दुर्वादा एव काण्डमिव । तस्य खण्डनमेव मण्डनं येषां ते तथोक्ताः । काण्डं नाम वृक्षवेण्वादीनां पर्वनामकं कठिनस्थलम् ॥

(त.चं.) सच्छास्त्रव्याख्याने व्याख्यानेन वा यत् सौख्यं स एवामृ-ताब्धिः । तत्र निमग्नाः । दुर्वादाख्याः काण्डाः बाणाः । दुर्वादानां काण्डः सङ्घातो वा । दुर्वाद एव काण्डं कुत्सितं कर्म वा । 'प्रस्तावे सङ्घाते कुत्सायामायुधे जले काण्डम्' इति च ॥ १३३ ॥

भूरिभक्तिभराः [1]केचिदेष्वल्पश्रुतसम्पदः ।
अप्यल्पबोधा अपरे बहुश्रुतमहागुणाः ॥ १३४ ॥

---

१. 'केचिदप्यल्प–' इति प्रचुरः पाठः ।

(प.दी.) भूरीति । एषु श्रीमन्मध्वशिष्यप्रशिष्यादिषु **केचित् अल्पश्रुतसम्पदोऽपि भूरिभक्तिभराः । अपरे अल्पबोधा अपि बहुश्रुतमहागुणाः** ॥

(त.चं.) केचिद् भक्तिप्रधानाः । केचिज्ज्ञानप्रधानाः । केचिद् वैराग्यप्रधानाः । तदेतदाह– भूरिभक्तिभराः केचित् ॥ १३४ ॥

बहवो गृहिणोऽप्यस्मात् समग्रानुग्रहं ययुः ।
दीप्रा यत्राग्नय इव त्रयो लिकुचशेखराः ॥ १३५ ॥

(भा.प्र.) त्रयः । त्रिविक्रमार्यः शङ्करार्यौ द्वौ च ॥

(प.दी) **बहव** इति । **अस्मात्** श्रीमन्मध्वात् **बहवः गृहिणोऽपि समग्रानुग्रहं ययुः** । **यत्र** शिष्यभूतगृहिणां मध्ये **त्रयो लिकुचशेखराः** त्रिविक्रमार्य एकः, शङ्करार्यनामानौ द्वाविति त्रयो लिकुचवंशश्रेष्ठाः **अग्नय इव दीप्राः** ॥

(त.चं.) दीप्राः । दीपी दीप्तौ । 'नमि-कम्पि-स्मि-अजस-कम-हिंस-दीपो रः'[३.२.१६७] । नमति नम्रः । कम्पते कम्प्रः । स्मयते स्मेरम् । न जस्यति अजस्रम् । जसु मोक्षणे । कामयते कम्रा । हिनस्ति हिंस्रः । दीप्यते दीप्रः । त्रयो लिकुचशेखराः । एकस्तावत् ग्रन्थकर्तुः पिता त्रिविक्रमपण्डिताचार्यः । अपरः पितृव्यः शङ्करार्यः । यो मध्वस्य ग्रन्थपाल आसीत् । तृतीयः शङ्करार्यः क इति मृग्यम् । द्वे च शङ्करार्यकृती सम्प्रत्युपलभ्येते– अनुव्याख्यानसम्बन्धदीपिका, अनुव्याख्यानन्यायविवरणसम्बन्धदीपिका च । प्रबन्धा चानयोः कतर इति विम्रष्टव्यम् ॥ १३५ ॥

माध्वं नियोगं ये प्रायो नाऽत्यजन् विदुषां वराः ।
शिष्यक्षेत्रेषु सद्विद्याबीजावापैकदीक्षिताः ॥ १३६ ॥

(प.दी.) माध्वमिति । **विदुषां वराः ये** त्रयो लिकुचशेखराः **प्रायो माध्वं नियोगं** आज्ञां **नात्यजन्** । कथम्भूताः? **शिष्यक्षेत्रेषु** शिष्याख्यक्षेत्रेषु **सद्विद्याबीजावापैकदीक्षिताः** । सद्विद्याबीजावाप एव मुख्यतो निरताः ॥

(त.चं.) आवापः परिक्षेपः ॥ १३६ ॥

ग्रामण्यो ब्राह्मणाग्रण्यो प्रापुः पूर्णेक्षशिष्यताम् ।
येषां सद्गुप्तिमात्रेण भवेत् किल परं पदम् ॥ १३७ ॥

(प.दी.) **ग्रामण्य** इति । **ग्रामण्यः** ब्राह्मणानां समर्थभूताः **ब्राह्मणाग्रण्यः** ब्राह्मणश्रेष्ठाः चत्वारो ब्रह्मक्षत्रियाख्याः **पूर्णेक्षशिष्यतां** श्रीपूर्णप्रज्ञाचार्यशिष्यतां **प्रापुः** । के ते? **येषां** ग्रामण्यां **सद्गुप्तिमात्रेण** सतां रक्षणमात्रेण **परं पदं** मोक्षः **भवेत् किल** । उपलक्षणमेतत् । असतां निग्रहाच्चेति ज्ञातव्यम् । पूर्वं भगवता भार्गवेण तौळवमण्डलस्थानां सतां रक्षायै दुष्टानां नियमनार्थं च नियुक्तत्वात् तदुभयं तेषां विहितकर्म । विहितकर्मणा च परं पदं भवत्येव हीति भावः ॥ १३७ ॥

(त.चं.) ग्रामण्यः । तौळवसम्प्रदाये प्रथिताः । विवृतं पुरस्तात् ॥

शुश्रूषापक्षपाताद्यैः केभ्यश्चित् केवलं ददौ ।
रामप्रियो राम इव स्वां गतिं योगिदुर्लभाम् ॥ १३८ ॥

(प.दी.) शुश्रूषेति । **रामप्रियः** श्रीमन्मध्वः **केभ्यश्चित् केवलं शुश्रूषापक्षपाताद्यैः योगिदुर्लभां स्वां गतिं ददौ** । क इव? **राम इव** । रामो यथा स्वां गतिं स्वसम्बन्धिनीं गतिं ददौ एवं श्रीमध्वोऽपि केषाञ्चिच्छुश्रूषादिना प्रसन्नः सन् स्वां गतिं स्वस्य या गतिस्तां ददौ । स्वेन गम्यं ब्रह्म गमयामासेत्यर्थः । वायुर्हि ब्रह्म गमयितुं समर्थो नान्यः । 'स एनान् ब्रह्म गमयति', 'विद्युत्पतिर्वायुरेव नयेद् ब्रह्म नचापरः' इत्यादिश्रुतिस्मृतिभ्यः ॥

(त.चं.) शुश्रूषापक्षपाताद्यैः । हरेः गुरोश्च शुश्रूषा । वैष्णवपक्षपातः । आदिना भक्तिश्रद्धादयः ॥ १३८ ॥

शिष्यप्रशिष्यातिशया ईदृशा यद्दयोदयात् ।
को नेच्छेत् सुलभं भक्त्या तत्पादसुरपादपम् ॥ १३९ ॥

(प.दी.) शिष्येति । **यद्दयोदयात्** यस्य श्रीमन्मध्वस्य कृपाया उदयात् **शिष्यप्रशिष्यातिशयाः** श्रीमन्मध्वशिष्याणां तच्छिष्याणां चातिशयाः सामर्थ्यविशेषाः **ईदृशाः** उक्तप्रकारेण प्रसिद्धाः [१]यत् यस्मात्, **भक्त्या सुलभं तत्पादसुरपादपं** श्रीमन्मध्वचरणारविन्दाख्यकल्पवृक्षं **को नेच्छेत्?** ॥

(त.चं.) शिष्याणां प्रशिष्याणां शिष्यप्रशिष्याणां च महिमातिशयाः ईदृशाः अन्यत्रासुलभाः । शिष्यं प्रगताः प्रशिष्याः । सोऽयं भगवत्पादसुरपादपः केवलं भक्त्या सुलभः । को नेच्छेत् तं यो हतभाग्यः । यो गङ्गातीरे कूपं खनति । यः कल्पद्रुसविधे कण्टकद्रुं प्ररोहयति ॥ १३९ ॥

इत्थं सद्भिः सद्भिरर्च्यो धरायां
चक्रे वासं शेषशय्ये शयाने ।
ग्रामे वातैः पाविते काण्वतीर्थै-
र्भक्तप्रीत्या सन्मठेऽनूनबोधः ॥ १४० ॥

(भा.प्र.) किं बहुना? तदा धरायां जातैः सद्भिः पूज्यः । शयनैकादश्याम-तीतायाम् । सन्मठे 'तान्त्य'[२] इत्यपभ्रष्टनाम्नि अधिवासे ।

इति नारायणपण्डिताचार्यविरचितायां
स्वकृतश्रीमध्वविजयस्यभावप्रकाशिकाख्यटीकायां
पञ्चदशः सर्गः

—०—

(प.दी.) इत्थमिति । **धरायां इत्थं** एवं **सद्भिः** तदा धरायां जातैः **सद्भिः** सज्जनैः **अर्च्यः अनूनबोधः** श्रीपूर्णप्रज्ञाचार्यः **शेषशय्ये** [श्रीहरौ]**शयाने** सति शयनैकादश्यां शेषभोगे शयाने सति **काण्वतीर्थैः** कण्वतीर्थादागतैः **वातैः पाविते** पवित्रीकृते **ग्रामे** एकवाटनामके ग्रामे सन्मठे 'तान्त्य' इत्यप-

१. वस्तुतः 'यद्दयोदयात्' इति समस्तपाठे पुनर्यत्पदं मूले न पठ्यते । पुनर्यदिति प्रश्लिष्य योजनीयम् । विश्वपतितीर्थीयेऽप्येवम् । २.'तान्त्र्य' इति क्वचित् पाठान्तरम् ।

भ्रष्टनामाधिवासगते शोभनमठे **भक्तप्रीत्या** तद्ग्रामगतभक्तानुग्रहेण **वासं चक्रे** चातुर्मास्यमुवासेति भावः ॥ १४० ॥

(त.चं.) धरायां सद्भिर्विद्यमानैः सद्भिरर्च्यैः । सन्मठे । 'तान्त्यमठ' [ತಾಂತ್ಯಮಠ] इति भाषायाम् । त्रैष्टुभी शालिनी च्छन्दः ॥ १४० ॥

आनन्दतीर्थभगवद्वदनेन्दुबिम्बं
विद्यासुधाविततकान्ति सुकान्तिकान्तम् ।
यैः प्रैक्ष्यतात्र भवतापशमाय भक्तै-
स्तद्दासदास्यमपि किं न ददाति पुंसः ॥ १४१ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये
महाकाव्ये आनन्दाङ्किते पञ्चदशः सर्गः

—०—

(प.दी.) आनन्दतीर्थेति । **यैः भक्तैः भवतापशमाय** संसारक्लेशनाशाय समर्थमिति यावत्, **विद्यासुधाविततकान्ति** विद्यारूपा सुधामयी चेति विद्यासुधा, विद्यासुधा वितता व्याप्ता च कान्तिर्यस्य तत् विद्यासुधा-विततकान्ति । विद्यासुधामयकान्तियुक्तमित्यर्थः । **सुकान्तिकान्तं** शोभनया कान्त्या श्रिया च कान्तं भद्रम् । **आनन्दतीर्थभगवद्वदनेन्दुबिम्बं अत्र प्रैक्ष्यत** दृष्टं **तद्दासदास्यमपि** श्रीमदानन्दतीर्थभगवद्वदनारविन्दं दृष्टवतां भक्तानां ये दासाः तेषां दास्यमपि **पुंसः किं न ददाति?** सर्वमप्यभीष्टं ददातीति भावः ॥ १४१ ॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां पञ्चदशः सर्गः

—०—

(त.चं.) विद्यासुधैव विततचन्द्रिकाकान्तिः । बिम्बं चापि स्वतः सुकान्ति-कान्तम् । किं न ददाति? मोक्षान्तं किमपि दद्यादेव । चतुर्दशाक्षरा शक्करी

वसन्ततिलका नाम च्छन्दः । सिंहोन्नतेति काश्यपः । सिंहोद्धतेति कृष्णावधूतः । मधुमाधवीति गोमानसः । चेतोहितेति रामकीर्तिः ।। १४१ ।।

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याख्यत् पञ्चदशं सर्गं सुधियां धीविशुद्धये ।।

इत्याचार्यगोविन्दस्य कृतिषु मध्वविजयटीकायां
तत्वचन्द्रिकायां पञ्चदशः सर्गः

—०—

[आदितः श्लोकाः – ८०७+१४१=९४८]

षोडशः सर्गः

[केनचिद् विदुषा मध्वकथावर्णनम् । गोमतीतीरे वेदानामप्रामाण्यं साधयन्तमन्त्यवर्णं क्षितिपतिं निरस्य मुद्गबीजं हस्ते निधाय ओषधिसूक्तं पठित्वा तत्राङ्कुरदलपुष्पबीजसृष्टिः । व्याख्यानावसरे दीपे प्रशान्ते स्वाङ्गुष्ठनखप्रकाशेनैव मध्वेन प्रवचनम् । भद्रातीरे विपुलशिलाया एकहस्तेनाऽनीय स्थापनम् । सूर्यग्रहणे समुद्रस्नानार्थमागमनम् । समुद्रवर्णनम् । समुद्रतटे मध्वेनर्ग्वेदमन्त्राणां प्रवचनम् । मोक्षकाले समुद्रस्नानम् । लहरीनिमग्नं मध्वं दृष्ट्वा दुर्जनानां परिहासः । मध्व-कटाक्षक्षेपेण समुद्रस्य स्तब्धता । गण्डवाटेन तदग्रजेन च मध्वस्य कण्ठनिष्पेषः । श्रान्तयोस्तयोर्भूमौ निपतनम् । धरायां निहितां मध्वस्याङ्गुलिमपि चालयितुं तयोरसमर्थता । मध्वेन वटुमधिरुह्य नृसिंहगेहपर्यटनम् । पुनः पूर्ववाटेन गळप्रपेषः । तत्पराजयः । अङ्गुलि-चालनेऽपि तस्याप्यसमर्थता । तनुरुहपाटनेऽपि मल्लानामसामर्थ्या-विष्करणम् । पारन्तीदेवालये पूजाव्यवस्था । 'इडेतुदे' ग्रामे ग्रीष्मे वर्षणेन तटाकपूरणम् । प्रहर्तुमागतेन ग्रामेशेन रविप्रभमाचार्यं दृष्ट्वा प्रणामः । 'कोक्कड' ग्रामे भक्तानुग्रहाय 'कृष्णामृतमहार्णव' रचना । 'उजिरे' ग्रामे याज्ञिकानां गर्वभङ्गाय ऐतरेयखण्डार्थविवरणम् । खण्डार्थनिर्णयाख्य-ग्रन्थनिर्माणं च । निःस्वैर्दत्तस्य भिक्षान्नस्य चतुर्गुणतया वर्धनम् । धनवतां त्रिदशनरोपभोग्यस्यान्नस्य स्वयमेव भोजनम् । एवं मध्वमहिम्नो दिवि गन्धर्वैर्गानम् । मध्वविजयोत्सवदिदृक्षया गगनस्थितैर्मुनिभिर्देवैश्च तदीयमैतरेयप्रवचनं श्रुत्वा तदुपरि दिव्यपुष्पवृष्टिः ।]

साधुभ्यो मधुमथनाङ्घ्रिभक्तिभाग्भ्यः
श्रौतेभ्यो विततमतेर्महानुभावम् ।
वेदान्तं स्वयमिव बन्धमोक्षमूलं
व्याचष्ट स्फुटमथ कोऽपि कोविदोऽत्र ॥ १ ॥

(प.दी.) साधुभ्य इति । **अथ अत्र** श्रीमध्वशिष्येषु **कोऽपि** कश्चित् **कोविदः** विद्वान् **स्वयं** स्वयमेव श्रीमन्मध्वभक्तानुकम्पया **मधुमथनाङ्घ्रिभक्तिभाग्भ्यः** । मधुमथनो मधुसूदनः, तदङ्घ्रिभक्तिभाग्भ्यः । **श्रौतेभ्यः** श्रुतिसम्बन्धिभ्यः, वैदिकेभ्यः इत्यर्थः, **साधुभ्यः** सज्जनेभ्यः, **विततमतेः महानुभावं** महान्तमनुभावम्, तदनुभावप्रकटनरूपां कथाम् **स्फुटं** सम्यक् **व्याचष्ट** जगाद । कथम्भूतम्? **बन्धमोक्षमूलं** संसारबन्धनान्मोक्षस्य कारणभूतम् । [1]किमिव? **वेदान्तमिव** वेदान्तशास्त्रमिव ॥ १ ॥

(त.चं.) प्रहर्षिण्योपसंहरति– साधुभ्यः । कोविदोऽत्र । अत्र श्रीमध्वशिष्येष्विति प्राचीनम् । 'तांत्य'[७०३]नामके मठे वा । कश्चित् सुधीः श्रौतेभ्यः श्रोत्रियेभ्यः श्रोतृभ्यः विततमतेः पूर्णप्रज्ञस्य महान्तमनुभावं व्याचष्ट । वेदान्त इत्युपनिषदो वा ब्रह्मसूत्राणि वा । आ पञ्चपञ्चाशं पद्यमतिजगती प्रहर्षिणी च्छन्दः । लक्षणं तूक्तमष्टमे ॥ १ ॥

गोमत्यास्तटनिकटेऽच्छकीर्तिचन्द्रं
विश्वज्ञं क्षितिपतिरन्त्यवर्णजन्मा ।

---

१ 'कमिव' इति स्वरसम् ।

विद्वेष्टा श्रुतिगुणसाधकं श्रुतीनां
वाचालो वचनमुवाच वाग्मिवर्यम् ॥ २ ॥

(प.दी.) **गोमत्या** इति। **गोमत्याः** गोमत्याख्यनद्याः **तटनिकटे** तीरसमीपदेशे वर्तमानः **श्रुतीनां विद्वेष्टा** वेददूषकः **वाचालः** बहुभाषणः **अन्त्यवर्णजन्मा** शूद्रवर्णजातः कश्चित् **क्षितिपतिः** राजा **अच्छकीर्तिचन्द्रम्**, अच्छया स्वच्छया कीर्त्या चन्द्रं चन्द्रवत् प्रकाशमानं **श्रुतिगुणसाधकं** श्रुतीनां प्रामाण्यादिगुणानां साधकं **वाग्मिवर्यं विश्वज्ञं इति वचनमुवाच** ॥ २ ॥

(त.चं.) कोविदोक्ताः कथाः सङ्गृह्याऽह– गोमत्या इत्यारभ्य आऽष्ट-चत्वारिंशं पद्यम् ॥ २ ॥

उन्मत्तप्रलपितवन्न तद्धि मानं
यद् वाक्यं व्यभिचरति क्वचित् फलेऽत्र ।
दृष्टान्तो भवति तदप्रमाणतायां
सर्वेषां श्रुतिवचसां च सर्वथेति ॥ ३ ॥

(भा.प्र.) इदमाकूतम्– 'या ओषधीः–' इत्यादिसूक्तैर्जप्तैरोषधीबीजेभ्यः सद्यः पुष्पफलादिनिष्पत्तिरुच्यते वैदिकैः। न चोपलभ्यते। ततस्तेषां व्यभिचारित्वम्। स इह च प्रयोगः–'विमतं वाक्यं न मानम्, व्यभिचारित्वात्, उन्मत्तवाक्यवत्' इति। अथ च सर्वो वेदोऽप्रमाणम्, वेदत्वात्, व्यभिचारिवेदवाक्यवदिति ॥

(प.दी.) **उन्मत्ते**ति। अत्र वेदे **यद्** यद् वाक्यं **क्वचित्** कुत्रचित् **फले व्यभिचरति तद्** वाक्यं **उन्मत्तप्रलपितवत् मानं** प्रमाणं **न हि**। **तत्** फले व्यभिचारि तद्वाक्यं **सर्वेषां श्रुतिवचसां च अप्रमाणतायां दृष्टान्तः सर्वथा** भवति **इति** उवाचेति पूर्वेण सम्बन्धः। अयमत्राभिप्रायः– श्रुतावोषधिबीजं हस्ते गृहीत्वा 'या ओषधीः पूर्वा जाता देवेभ्यः–' इत्यादिसूक्तजपात् सद्य एवाङ्कुर-दलपुष्पफलाद्युत्पत्तिर्भवतीत्युच्यते। इदानीं तावत् केनचित् तथा कृतेऽपि

तत् फलं न दृश्यते । तस्मात् 'या ओषधीः–' इत्यादिसूक्तोक्तफलानुपलम्भात् तद् वाक्यं फले व्यभिचारीति सम्मतम् । तथाचायमत्र प्रयोगप्रकारः– 'या ओषधीः–' इत्यादिवाक्यं प्रमाणं न भवति, फले व्यभिचारित्वात्, उन्मत्तवाक्यवदिति । ततश्च तद्वाक्यदृष्टान्तेन वेदमात्रस्याप्यप्रामाण्यं साधयितुं शक्यते । तथाहि– विप्रतिपन्नं सर्वं वेदवाक्यमप्रमाणम्, वेदत्वात्, 'या ओषधीः' इत्यादिवाक्यवदिति ॥ ३ ॥

(त.चं.) यद् वाक्यं यत्फलकमिति कथ्यते तद् वाक्यं तस्मिन् फले व्यभिचरति चेत् तत् न मानम् । तथाच 'या ओषधीः–' इत्यादिना सूक्तेन पठितेन सद्यः प्रसवोद्गमः सञ्जायत इति श्रूयते । नच तद् दृश्यते । तेन तत् तावदप्रमाणमिति सुस्थम् । तत्सामान्यादितरेष्वपि तथात्वम् । ततः समग्रोऽपि वेदोऽप्रमाणमिति वाचालवचनाशयः ।

तथाहि सूक्तमृग्वेदे दशमे मण्डले ९७तमम्–

> या ओषधीः पूर्वा जाता देवेभ्यस्त्रियुगं पुरा ।
> मनै नु बभ्रूणामहं शतं धामानि सप्त च ॥ १ ॥
>
> शतं वो अम्ब धामानि सहस्रमुत वो रुहः ।
> अधा शतक्रत्वो यूयमिमं मे अगदं कृत ॥ २ ॥
>
> ओषधीः प्रति मोदध्वं पुष्पवतीः प्रसूवरीः ।
> अश्वाइव सजित्वरीर्वीरुधः पारयिष्णवः ॥ ३ ॥
>
> ओषधीरिति मातरस्तद् वो देवीरुप ब्रुवे ।
> सनेयमश्वं गां वास आत्मानं तव पूरुष ॥ ४ ॥
>
> अश्वत्थे वो निषदनं पर्णे वो वसतिष्कृता ।
> गोभाज इत् किलासथ यत् सनवथ पूरुषम् ॥ ५ ॥
>
> यत्रौषधीः समग्मत राजानः समिताविव ।
> विप्रः स उच्यते भिषग् रक्षोहाऽमीवचातनः ॥ ६ ॥

अश्वावतीं सोमावतीमूर्जयन्तीमुदोजसम् ।
आऽवित्सि सर्वा ओषधीरस्मा अरिष्टतातये ॥ ७ ॥

उच्छुष्मा ओषधीनां गावो गोष्ठादिवेरते ।
धनं सनिष्यन्तीनामात्मानं तव पूरुष ॥ ८ ॥

इष्कृतिर्नाम वो माताऽथो यूयं स्थ निष्कृतीः ।
सीराः पतत्रिणीः स्थन यदामयति निष्कृथ ॥ ९ ॥

अति विश्वाः परिष्ठाः स्तेनइव व्रजमक्रमुः ।
ओषधीः प्राचुच्यवुर्यत् किं च तन्वो३ रपः ॥ १० ॥

यदिमा वाजयन्नहमोषधीर्हस्त आदधे ।
आत्मा यक्ष्मस्य नश्यति पुरा जीवगृभो यथा ॥ ११ ॥

यस्यौषधीः प्रसर्पथाङ्गमङ्गं परुष्परुः ।
ततो यक्ष्मं वि बाधध्व उग्रो मध्यमशीरिव ॥ १२ ॥

साकं यक्ष्म प्र पत चाषेण किकिदीविना ।
साकं वातस्य ध्राज्या साकं नश्य निहाकया ॥ १३ ॥

अन्या वो अन्यामवत्वन्याऽन्यस्या उपावत ।
ताः सर्वाः संविदाना इदं मे प्रावता वचः ॥ १४ ॥

याः फलिनीर्या अफला अपुष्पा याश्च पुष्पिणीः ।
बृहस्पतिप्रसूतास्ता नो मुञ्चन्त्वंहसः ॥ १५ ॥

मुञ्चन्तु मा शपथ्या३दथो वरुण्यादुत ।
अथो यमस्य पड्बीशात् सर्वस्माद् देवकिल्बिषात् ॥ १६ ॥

अवपतन्तीरवदन् दिव ओषधयस्परि ।
यं जीवमश्नवामहै न स रिष्याति पूरुषः ॥ १७ ॥

या ओषधीः सोमराज्ञीर्बह्वीः शतविचक्षणाः ।
तासां त्वमस्युत्तमाऽरं कामाय शं हृदे ॥ १८ ॥

या ओषधीः सोमराज्ञीर्विष्ठिताः पृथिवीमनु ।
बृहस्पतिप्रसूता अस्यै सं दत्त वीर्यम् ॥ १९ ॥

मा वो रिषत् खनिता यस्मै चाहं खनामि वः ।
द्विपच्चतुष्पदस्माकं सर्वमस्त्वनातुरम् ॥ २० ॥

याश्चेदमुपशृण्वन्ति याश्च दूरं परागताः ।
सर्वाः सङ्गत्य वीरुधोऽस्यै सं दत्त वीर्यम् ॥ २१ ॥

ओषधयः सं वदन्ते सोमेन सह राज्ञा ।
यस्मै कृणोति ब्राह्मणस्तं राजन् पारयामसि ॥ २२ ॥

त्वमुत्तमाऽस्योषधे तव वृक्षा उपस्तयः ।
उपस्तिरस्तु सो३स्माकं यो अस्माँ अभिदासति ॥ २३ ॥

तदिदं त्रयोविंशत्यृचं सूक्तमाथर्वणस्य भिषज आर्षम् । अनुष्टुप् छन्दः । ओषधिमानिन्योऽवान्तरदेवताः । ओषधीशश्चन्द्रमण्डलगतो धन्वन्तरिर्देवता । तथाचानुक्रमणिका–'या ओषधीस्त्र्यधिका, आथर्वणो भिषक्, ओषधिस्तुतिः, आनुष्टभम्' इति । यद्यप्यस्य विनियोगो दीक्षितानामुपतापे सम्मार्जनायेत्याश्वलायनो मन्यते । 'प्रयोगे भिषजस्त्वेतद् यक्ष्मनाशाय कल्पते' इति च बृहद्देवतायां शौनकः । अत्र त्वपूर्वं प्रमेयान्तरमाविष्कृतम्–सूक्तेनानेनाभिमन्त्रितस्य बीजस्याङ्कुरदलपुष्पबीजसृष्टिरिति । सूक्तमिदं तैत्तिरीयसंहितायमपि पठ्यते [४.२.६]। तत्र तु विंशतिरेव मन्त्राः पठिताः । बहुधा विभिन्नः पाठः, विभिन्ना चाऽनुपूर्वी । अग्निश्च सूक्तर्षिः । ओषधिवापे विनियोग इति च श्रूयते । एत एव च मन्त्रा वाजसनेयकेऽपि पठ्यन्त ईषद्व्यत्यासेन । तत्पाठे सप्तविंशतिर्मन्त्राः[१२.७५-१०१] । काण्वसंहितायामपि । परन्तु तत्र पञ्चविंशतिर्मन्त्राः । [१३.७६-१००] स्फुटं च वाजसनेयकेऽस्य सूक्तस्याङ्कुरादिप्ररोहहेतुत्वम्– 'अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात्'[१२.१००] इति। ओषधिवापे विनियोग

इति च स्फुटं याजुषैरभ्युपगम्यते । तदनुगुणतया चात्र सूक्तार्थो वर्ण्यते । तथाचायं मन्त्रार्थः–

या ओषधयः पुरातन्यः सम्प्रति जाताः, अङ्कुरिता भवन्तु पल्लविताः । देवेभ्यः, अस्माभिः स्तुतेभ्यः ओषधिमानिभ्यः । अस्माकं वा स्तुतिभ्यः । दिवु स्तुतौ । देवेभ्य इति मुख्यत ओषधिमानिगतो बहुरूपो देवो धन्वन्तरिः । त्रिषु युगेषु पुरा जाताः । मयाऽऽहूता अस्मिन्नपि युगे भवन्तु जाताः । मन्ये नु बभ्रुवर्णानामोषधीनामहं शतं जन्मस्थानानि सामर्थ्यानि च, सप्तापि लोकान्, सप्तसु लोकेषु च । पुरुषमगदङ्कारेण बिभ्रतीति च बभ्रवः ॥ १ ॥

अम्ब मातर ओषधयः, भवदवानलदग्धानां निधानानि भगवद्रूपाणि च, वो धामानि स्थानानि सामर्थ्यानि च शतममितानि । उत वः प्ररोहः प्रादुर्भावश्च सहस्रममितः । अथ हे शतक्रत्वः, अमितज्ञाना अमितकर्माणः, इमं मे हस्तगतं धान्यविशेषं प्ररोहप्रतिबन्धकगदरहितं कुरुत, अगदाख्यं वेमं मुद्गं प्ररोहन्तं कुरुत ॥ २ ॥

हे ओषधयः,मया स्तुतेन भगवता प्रत्येकं मुदिता भवत । मोदयत च पुष्पवत्यः फलवत्यो भूत्वा । अश्वाइव सह जयन्त्यः शत्रून् , ये वेदस्यामानतां मन्यन्ते । वीरुधो विरोहन्त्यः, पारयन्त्यश्च स्वीयं जनम् ॥ ३ ॥

हे ओषधयः, देव्यो मातरः बीजेनाङ्कुरादेर्जनयित्र्यः, वः पुरुषं भगवन्तं प्रतीत्थं तद् वच उप ब्रुवे । कथम्? हे परमपुरुष धन्वन्तरे, तवाहमश्वं गां वासः आत्मानमपि सनेयं दद्यामिति । अश्व इत्यन्तःप्रज्ञा, इन्द्रियाणि च । गौरिति वाक् । वास इति शरीरम् । तदुक्तं भागवते– 'कायेन वाचा मनसेन्द्रियैर्वा–' इत्यादि ॥ ४ ॥

वः अश्वत्थे निषदनम् । पर्णे पलाशवृक्षे च वो वसतिः कृता । विशिष्य यज्ञोपयोगितया तत्र हि विशेषतः सन्निहितो भगवान् । अथ च अश्वत्थमये

पात्रे वो निषदनम् । पलाशमये च । अश्वत्थकाष्ठनिर्मिते पात्रे पालाशे वा यज्ञकर्मण्योषधयो निधीयन्त इत्यप्याहुः । यद् यदा यूयं परमपुरुषं सनवथ सम्भजध्वे तदा मुख्यतो भगवत्पराणां गवां वेदवाचां यूयमपि भाजनान्यासथ भवथ किल । अथ च यदा हविष्ट्वेन हुतास्तदा गोभाजो गामादित्यं भजमाना भवथ किल । यदुक्तम्–'अग्नौ प्रास्ताऽऽहुतिः सम्यगादित्य-मुपतिष्ठते' इति । आदित्यद्वारा परमपुरुषं च सनवथ ॥ ५ ॥

यत्रौषधयः समगच्छन्त यथा युद्धे राजानः । तत्र विप्रः सर्वज्ञः स भिषगुच्यते धन्वन्तरिर्भगवान् रक्षोहा व्याधीनां नाशयिता ॥ ६ ॥

अश्ववती सोमवती ऊर्जस्वती ओजस्वती इत्येताश्चतुर्विधा ओषधयः । अश्ववती या स्मृतिशक्तिं वर्धयति । सोमवती मनोबलम् । ऊर्जस्वतीन्द्रिय-पाटवम् । ओजस्वती देहबलमिति । ता एता ओषधीः सर्वा आवित्सि जानन् स्तौमि । अस्मा अरिष्टतातये प्ररोहप्रतिबन्धकदोषनाशाय ॥ ७ ॥

ओषधीनां शुष्माः सामर्थ्यानि उदीरते उद्गच्छन्ति । गोष्ठादिव गावः । हे परमपुरुष, सम्पद्रूपमात्मानं तव समर्पयितुकामानाम् ॥ ८ ॥

हे ओषधयः, वो माता भगवन्मूर्तिः इष्कृतिर्नाम बलकर्त्रीति । अथो त-स्माद् यूयमपि दोषनिराकृतयः स्थ । सीरा उत्सरणशीला उत्पतनशीलाश्च स्थन भवथ । यदा कश्चिदज्ञानादिभिरामयवान् भवति तदा तं निष्कृथ संस्कुरुथ ॥ ९ ॥

विश्वतो व्याप्ताः परितः स्थिताः ओषधयः स्तेनइव गोष्ठं दोषमतिक्रान्त-वत्यः । यत् किञ्च तन्वो रपो दुरितमस्ति तच्च प्राच्यावयन्निति । निश्चितम-तीतत्वेन भण्यते । प्रच्यावयन्त्विति वा ॥ १० ॥

यदिमा ओषधीः वाजयन् बलमादधदहं हस्त आदधे ततः पुरैव यक्ष्मस्य ओषधिप्ररोहप्रतिबन्धकस्याऽत्मा स्वरूपं नश्यति । यथा जीवग्रहान्मृत्यो-र्जीवात्मा नश्यति तथेति ॥ ११ ॥

हे ओषधयः, यस्य सस्यस्य अङ्गमङ्गं पर्वपर्व च प्रसर्पथ ततस्ततः रोहविरोधि यक्ष्मं विबाधध्वे । उग्रो मध्यमस्थानगो राजा दुर्बलान् शत्रूनिव । हृदयमध्यमध्यासीन उग्रो रुद्रो हृद्रोगमिव च ॥ १२ ॥

हे बीजक्षयहेतुभूत यक्ष्म, साकं चाषेण पक्षिणा किकीति शब्दापयता दूरं प्रपत । वातस्य ध्राज्या वेगेन सह । ध्रज गतौ । तदेव स्फुटमाह– निहाकया वात्यया साकं नाशं गच्छ नितरां हन्तीति निहाका । गोधिकेत्येके ॥ १३ ॥

हे ओषधयः, अन्या ओषधिस्ततोऽन्यां प्रविशतु । तथाऽन्या अन्यस्याः समीपम् । एवं परस्परं सङ्गता उपगच्छत । सर्वास्ता देवताः संविदानाः सङ्गताः सत्य इदं मे वचः प्रावत ॥ १४ ॥

याः फलवत्यः या अफला या अपुष्पा याश्च पुष्पवत्यः बृहस्पतिना मुख्यप्राणेन नारायणेन चानुज्ञातास्ता नोंऽहसो मोचयन्तु ॥ १५ ॥

शपथसञ्जातात् पापान्मां मोचयन्तु । अथो वरुणपाशसम्भवाज्जलविलयादिरूपात् पापादपि । अथो यमस्य पड्बीशात् पादशृङ्खलारूपात् पाशात् । किमेतस्मादेतस्मादिति विशिष्य कथनेन? सर्वस्मादपि देवकिल्बिषात् ॥ १६ ॥

दिवोऽधः पतन्त्य ओषधिमानिन्य इत्थं पर्यवदन् । कथम्? यं जीवं व्याप्नुमः शक्त्याधानेन न स नश्यति पूरुष इति । पुरुषश्रेष्ठः ॥ १७ ॥

या ओषधयः सोमनियम्याः । सोमो ह्योषधीश उच्यते । बहुविधा बहुजानन्त्यश्च । तासां त्वमस्युत्तमा । अलं कामाय कमनीयाय हृदयाय शं सुखकरी भव । त्वां प्ररोहन्तीं कामयमानाय अङ्कुरादिभावेन प्ररूढा सुखदा भव । 'तासामसि त्वमुत्तमा' इति वाजसनेयके ॥ १८ ॥

या ओषधयः सोमदेवत्याः पृथिवीमनुगत्य विविधं स्थिताः । बृहस्पतिनाऽनुज्ञाता यूयमस्या ओषध्यै वीर्यं सन्दत्त ॥ १९ ॥

हे ओषधयः, भूमेः खनिता कुद्दालादिर्मा वो हिंसीत् । यस्मै चाहं खनामि वः स च मा हिंसीत् । हिंसकोऽयमिति भावं मा कुरुत । द्विपत् पुत्रादिकं चतुष्पद् गवादिकं चेति सर्वमस्माकमनातुरमस्तु । 'द्विपाच्चतुष्पात्' इति वाजसनेयके पाठान्तरम् ।। २० ।।

याश्च ओषधय इदं स्तोत्रमुपशृण्वन्ति, याश्च दूरं परावृत्य गताः ताः सर्वा वीरुधो विरोपयन्त्योऽस्या ओषध्यै वीर्यं सन्दत्त । वाजसनेयकेऽयं मन्त्रः 'मा वो रिषत्' इत्यतः पूर्वं पठ्यते ।। २१ ।।

ओषधयः सोमेन राज्ञा सह संवदन्ते । 'समवदन्त' इति वाजसनेयिनां पाठः । किमिति? यस्मै पुरुषार्थाय ब्राह्मणो ज्ञानी प्रार्थनां करोति तं हे राजन्, पुरुषार्थं प्रापयाम इति ।। २२ ।।

हे ओषधे, त्वमुत्तमाऽसि मन्त्रसंस्कृता हस्ते प्ररोहन्ती । तव पुरस्तादन्ये वृक्षा उपस्तयोऽधःकृता योग्यतया । योऽस्मानभिहिनस्ति वेदा उन्मत्तभाषितमिति वदन्, सोऽप्यस्माकमुपस्तिरधःस्थितोऽस्तु पराजित इति ।। २३ ।।

वाजसनेयकेऽनयोर्द्वाविंशत्रयोविंशयोर्मन्त्रयोर्मध्ये त इमे चत्वारो मन्त्राः पठ्यन्ते–

नाशयित्री बलासस्यार्शस उपचितामसि ।
अथो शतस्य यक्ष्माणां पाकारोरसि नाशनी ।।

त्वां गन्धर्वा अखनँस्त्वामिन्द्रस्त्वां बृहस्पतिः ।
त्वामोषधे सोमो राजा विद्वान् यक्ष्मादमुच्यत ।।

सहस्व मे अरातीः सहस्व पृतनायतः ।
सहस्व सर्वं पाप्मान१ सहमानाऽस्योषधे ।।

दीर्घायुस्त ओषधे खनिता यस्मै च त्वा खनाम्यहम् ।
अथो त्वं दीर्घायुर्भूत्वा शतवल्शा विरोहतात् ।।

बलासमिति शक्तिहीनता । उपचिदित्यतिपीनता । पाकारुरित्यपचनम् । यक्ष्माणीति स्फुटमविदितानि रोगमूलानि । शतवल्शा शताङ्कुरा । अन्यत् स्फुटम् । चरमं मन्त्रद्वयं काण्वी संहिता न पठति ॥ * ॥

इतीदं बीजप्ररोहणमगदङ्कारं च सूक्तम् ॥ ३ ॥

वेदोक्तं फलमलमाप्यतेऽधिकारा-
दित्युक्तोऽतनुमनसाऽभ्यधत्त धूर्तः ।
योग्यत्वे सति न हि दृश्यतेऽधिकारी
नातः स्यात् स खरविषाणवत् सदेति ॥ ४ ॥

(भा.प्र.) विशुद्धमातापितृजन्यत्वादिमूलाधिकाराद्धि फलमुच्यत इति व्यभिचारित्वहेतोरसिद्धिरित्युक्तो धूर्त आह[1]– नास्ति कोऽप्यधिकारी योग्यत्वे सत्यनुपलभ्यमानत्वात्, खरविषाणवदिति ॥

(प.दी.) **वेदोक्तमिति** । **अधिकारात्** वेदोक्तानुष्ठाने तदुक्तफलप्राप्तौ चाधिकारे सत्येव **वेदोक्तं फलं अलं** सम्यक् **आप्यते** । नानुष्ठानमात्रेण । अयं भावः– वेदोक्तकर्मानुष्ठानेऽपि फलादर्शनमात्रेण न वेदाप्रामाण्यमनुमातुं शक्यते । फलादर्शनस्याधिकाराभावनिबन्धनत्वात् । तत्तद्वेदोक्तकर्माधिकारिणा च कृते कर्मणि फलं दृश्यत एव । अनधिकारिणा कृतेऽपि तत्फलं न दृश्यते । अनधिकारिकृतमकृतमेवेति न्यायादिति । **अतनुमनसा इत्युक्तः धूर्तः** शूद्रः **इत्यभ्यधत्त** । **अधिकारी** वेदोक्तं फलं प्राप्तुं योग्यः पुरुषः **योग्यत्वे सति** द्रष्टुं योग्यत्वे सति **न दृश्यते हि** यस्मात् **अतः** तस्मात् **सः** भवद्विवक्षितोऽधिकारी **सदा न स्यात्** । नास्त्येवेत्यर्थः । किमिव? **खरविषाणवत्** । अयं भावः– यदुक्तमधिकारिणो वेदोक्तं फलं भवतीति तदनुपपन्नम् । कुत्रापि तादृशाधिकारिणोऽनुपलम्भात् । तथाह्यत्र प्रयोगः–

१.'–रसिद्धिद्योतकोक्तो–' इति कश्चिन्मुद्रितः पाठः । प्रामादिक इति स्फुटम् ।

भवद्विवक्षितोऽधिकारी नास्त्येव योग्यत्वे सत्यनुपलभ्यमानत्वात् खर-विषाणवदिति ॥ ४ ॥

(त.चं.) समग्राधिकारात् अलं समग्रं फलम् । असमग्रादसमग्रम् । अन-धिकारिणस्तु न किमपि फलमिति ॥ ४ ॥

आक्षेपं तमसहमान उच्चमानः
सद्योऽसौ निजकरपल्लवद्वयेन ।
आदाय व्यतनुत बीजमोषधीनां
सूक्तेनाङ्कुरदलपुष्पबीजसृष्टिम् ॥ ५ ॥

(भा.प्र.) ओषधीनां मुद्राह्वयानाम् ॥

(प.दी.) आक्षेपमिति । तं तेन कृतं **आक्षेपं असहमानः उच्चमानः** महाभिमानवान् **असौ** श्रीमध्वाचार्यः **ओषधीनां** [१]अगदाख्यानां धान्यानां **बीजं निजकरपल्लवद्वयेन आदाय सूक्तेन** 'या ओषधीः–' इत्यादिना सूक्तेन जप्त्वा **सद्यः अङ्कुरदलपुष्पबीजसृष्टिं व्यतनुत** ॥ ५ ॥

(त.चं.) उच्चमानः । मानं ज्ञानम् । पूर्णप्रज्ञः । मानश्चित्तोन्नतिः । उच्चमानः अभिमानधनः । ओषधीनां बीजम् । 'मुद्राह्वयानाम्' इति भावप्रकाशि-का । 'हसुरु', 'हेसरु' [ಹಸುರು, ಹೆಸರು] इति भाषायाम् ॥ ५ ॥

व्याख्याता [२]निशि स कदाचन प्रदीपे
संशान्ते पुनरपि वाचयाम्बभूव ।
शिष्यान् स्वान् पुरुकरुणाम्बुधिर्निजाङ्घ्रे-
रङ्गुष्ठस्फुटनखरान्तरोचिषैव ॥ ६ ॥

(प.दी.) व्याख्यातेति । **कदाचन निशि व्याख्याता** व्याख्यानं कुर्वन् **सः**

---

१. 'मुद्राख्यानाम्' इति स्वरसम् ।
२. 'स निशि' इति मन्दारमरन्दे ।

प्रदीपे संशान्ते नष्टेऽपि **निजाङ्कैः** स्वचरणस्य **अङ्गुष्ठस्फुटनखरान्तरोचिषा** । नखरान्तो नखराग्रम् । नखरान्तस्य रोचिः नखरान्तरोचिः । स्फुटं च तन्नखरान्तरोचिश्चेति स्फुटनखरान्तरोचिः । अङ्गुष्ठस्य स्फुटनखरान्तरोचिः अङ्गुष्ठस्फुटनखरान्तरोचिः । तेन **एव पुनरपि स्वान् शिष्यान् वाचयाम्बभूव** । कथम्भूतः? **पुरुकरुणाम्बुधिः** शिष्येषु बहुकृपासमुद्रः ॥ ६ ॥

(त.चं.) अथान्यं महिमानमाह– व्याख्याता ॥ ६ ॥

तीर्थार्थं पृथुतरवप्रपातिवारां
धाराणां रयसहनक्षमां महेक्षः ।
आनीतां दशशतपुम्भिरत्यशक्त्या
प्रेक्ष्योचे विपुलशिलां क्वचित् स मुक्ताम् ॥ ७ ॥

(प.दी.) तीर्थेति । **स महेक्षः क्वचित्** कुत्रचिद् देशे **विपुलशिलां** विशालां शिलां **प्रेक्ष्य** इति **ऊचे** । कथम्भूतां शिलाम्? **तीर्थार्थं** नदीतीरे स्थापनार्थं **दशशतपुम्भिः** सहस्रसङ्ख्याकैः पुरुषैः **आनीतां** किञ्चिद् दूरं कथञ्चिदानीताम्, **अत्यशक्त्या** मध्ये **मुक्तां** त्यक्ताम् । पुनः कथम्भूतां शिलाम्? **पृथुतरवप्रपातिवारां** पृथुतराद् वप्रादुन्नतस्थलात् पततां वारां जलानां **धाराणां** उन्नतस्थलात् पतज्जलधाराणां **रयसहनक्षमाम्**, प्रवाहवेगं वोढुं समर्थाम् ॥

(त.चं.) अथ कथान्तरम्– तीर्थार्थम् । तीर्थं जलावतारः । यत्रावतीर्य स्नान्ति जनाः । तत्र स्नातॄणां जलरंहसा प्रतिरोधो मा भूदिति । पृथुतरवप्रपातिवाराम् । पृथुतराणां वप्रपातिनां च वारां धाराणाम् । 'वृधिवपिभ्यां रन्'[८.४५] इति दशपादिका । 'अम्भसा स्पृष्टं सद् वर्धत इति वर्ध्रम् । चर्मच्छेदः । डुवप् बीजतन्तुसन्ताने । उप्यतेऽस्मिन् बीजमिति वप्रं क्षेत्रम्, प्राकारजातिर्वा' इति व्याचक्षते । 'गिरिसानुन्यपि वप्रम्' इति च । अत्र तु वप्रमिति किमुच्यते? उन्नतस्थलमिति प्राचीनटीकाकाराः । वप्रमिति

केदारः स्यात् । परितः केदारेषु पतित्वा व्याप्नुवन्ति । व्याप्य च सस्यं नाशयन्ति । वप्रमिति परितः क्षेत्रं परिखीकृतो मृदां चयः स्यात् । 'दरे'[ದರೆ] इति भाषायाम् । वप्रं निर्भिद्य क्षेत्रमापूर्य सस्यं नाशयन्ति वारि । वप्रमिति गिरिसानुः स्यात् । 'तप्पलु'[ತಪ್ಪಲು] इति भाषायाम् । गिरेरधोऽधः सानुषु पतित्वा सर्वं निम्नं भूभागमाप्लावयन्ति वारि । विपुलशिलाया आनयनेन जातया अत्यधिकया अशक्त्या आयासेन मुक्तां शिलां प्रेक्ष्य महेक्षः सर्वज्ञो मध्वः जानन्नपि तत्कारणं जिज्ञासुरिवोचे ॥ ७ ॥

लोकानामुपकृतये कुतः शिलेयं
निन्ये नो इति जनता जगाद तत्र ।
नेतारो यतिवर मानवा न हीमां
भीमश्चेदिह यतते नयेन्न वेति ॥ ८ ॥

(प.दी.) **लोकानामिति** । **लोकानां** जनानां **उपकृतये** उपकाराय क्षमा इयं **शिला** कुतो **नो निन्ये** इत्यूचे इति सम्बन्धः । **तत्र** तदा तत्र स्थिता **जनता इति जगाद** । कथम्? **यतिवर, इमां** शिलां **नेतारः** नेतुं समर्थाः **मानवाः न हि** न विद्यन्ते हि । **भीमश्चेत्** श्रीभीमसेन इमां शिलां पश्येच्चेत्, **इह यतते** इमां नेतुं प्रयत्नं तावत् कुर्यात् । **नयेन्न वा इति जनता जगाद** इति सम्बन्धः ॥ ८ ॥

(त.चं.) किमित्यूचे? आह– लोकानामुपकृतये । लोकोपकारायाऽनीतेयं शिला किमिति नो निन्ये यत्र नेतुमुद्दिष्टम् । इह नयनविषये भीमः । यतते चेत्, नयेद् वा नवा ॥ ८ ॥

निन्ये तां गिरिमिव वानरीकृतात्मा
लीलावत्करकमलेन सोऽमलेन ।
तत्रापि न्यधित तयाऽस्य सूच्यतेऽलं
तत् तुङ्गां ननु निकषाऽधुनाऽपि कर्म ॥ ९ ॥

(प.दी.) **निन्य** इति । **सः** श्रीमध्वः **अमलेन**[१] **लीलावत्करकमलेन तां** शिलां **निन्ये** । अत्र 'लीलावत्' इत्युक्त्या अनायासः सूचितः । कः कमिव? **वानरीकृतात्मा** वानरत्वेन कृतावताररूपः **सः** स्वयं[२] **गिरिमिव** गन्धमादनगिरिमिव । **तत्र** यत्र सा शिला स्थापयितुमिष्टा तत्र **न्यधितापि** निहितवांश्च । कुत्र? **तुङ्गां निकषा** तुङ्गभद्रायाः समीपे न्यधितेत्यर्थः । 'अभितः-परितः-समया-निकषा–' इत्यादिना तुङ्गामिति षष्ठ्यर्थे द्वितीया । **अस्य** श्रीमध्वाचार्यस्य **तत् कर्म अधुनाऽपि तया** शिलया **अलं** सम्यक् **सूच्यते ननु** । कलशाख्यदेशे तुङ्गभद्रातीरे इयं शिला पुरा कैश्चन यतिभिरानीता किलेति वार्ता श्रूयत इति भावः ॥ ९ ॥

(त.चं.) लीलावत् लीलायुक्तं यथा स्यादिति क्रियाविशेषणं वा । तत् तुङ्गां ननु निकषा तुङ्गाया निकटे । 'आः समिण्निकषिभ्याम्' [दशपा. १०.१८] इत्युक्तम् । कथमथ तुङ्गां निकषा? 'कळस'प्रदेशे भद्रा किल प्रवहति? तेन 'तद् भद्रां ननु निकषा' इति पठनीयम् । तथ्यमाह भवान् । अथापि सङ्कीर्णवचनाः कवयो भवन्ति । तद् यथा– मन्दाकिनीत्येका शाखा । भागीरथीत्यपरा । काव्येषु तु साङ्कर्येण व्यवहरन्ति । मन्दाकिनीमपि भागीरथीमाहुः । भागीरथीमपि मन्दाकिनीम् । अत्रापि तुङ्गेत्येका शाखा । भद्रेत्यपरा । तामेतां साङ्कर्येणाऽहुः । अथवा तुङ्गामुन्नतां भद्रामिति व्याख्येयम् । 'वप्रपातिवाराम्' इति पूर्वमुक्तम् । 'उन्नतस्थलात् पततां जलानाम्' इति च वेदाङ्गतीर्थाः । 'कळस'[ಕಳಸ] इति प्रथितस्य नगरस्य समीपे भद्रामध्ये तां शिलां प्रदर्शयन्ति । तस्यां 'मध्वाचार्यैरेकहस्तेन आनीय स्थापिता शिला' इति लेखः, लेखपार्श्वे रेखामयी मध्वप्रतिकृतिश्चोट्टङ्किता सम्प्रति दृश्यते । तुङ्गामिति तुङ्गभद्रामिति तु सर्वे प्राचीनटीकाकाराः ॥

सङ्घातैरधिकघनैरलङ्कृताध्वा
शिष्याणां यतमनसामुतेतरेषाम् ।

१.कोशेषु 'अमळेन', '–कमळेन' इत्यादि पठ्यते । २. 'स्वयमिव' इत्यपि क्वचित् ।

यत्रामा वसति तिथाविनेन चन्द्र-
स्तत्रासौ सकलमतिः ससार सिन्धुम् ॥ १० ॥

(भा.प्र.) यतमनसां यतीनाम्। इतरेषां गृहिणाम्॥

(प.दी.) **सङ्घातैरिति।** **असौ सकलमतिः** दशमतिः **यत्र** यस्यां **तिथौ चन्द्रः इनेन** सूर्येण **अमा** सह **वसति तत्र** तस्यां तिथौ। अमावास्याया-मित्यर्थः। तस्यामुपरागे च सति स्नातुं **सिन्धुं ससार**। कथम्भूतः? **यतमनसां** यतीनाम्, **उतेतरेषां** गृहिणामुत, एवमुभयेषां शिष्याणां **अधिकघनैः** मार्गे अतिसम्मर्दभाग्भिः **सङ्घातैः** समूहैः **अलङ्कृताध्वा** अलङ्कृतमार्गः ॥ १० ॥

(त.चं.) अथान्या कथा– सङ्घातैः। अधिकघनैः सङ्घातैः सह कण्वतीर्थात् सागरतीरं प्रति सरन् मध्वोऽध्वानमलञ्चकार ॥ १० ॥

आर्द्राङ्गाः सपदि निमज्जनात् सरस्यां
कण्वस्य द्विजवृषभस्य वल्लभायाम्।
तत्राऽयन् खरकिरणोपरागहेतो-
र्ग्रामीणा अपि सकलाः सबालवृद्धाः ॥ ११ ॥

(प.दी.) आर्द्रेति। **तत्र** तस्मिन् काले **सबालवृद्धाः सकलाः ग्रामीणाः अपि** एकवाटग्रामजना अपि **खरकिरणोपरागहेतोः** सूर्यग्रहणनिमित्तं समुद्रस्नानार्थं **तत्र आयन्** आगताः। कथम्भूताः? **द्विजवृषभस्य कण्वस्य वल्लभायां सरस्यां सपदि निमज्जनात् आर्द्राङ्गाः** ॥ ११ ॥

(त.चं.) कण्वस्य वल्लभायां सरस्यां कण्वतीर्थे ॥ ११ ॥

सर्वज्ञं सपरिजनं समीक्षमाणाः
फुल्लाक्षाः स्मितवदनाः शुभा ननन्दुः।

दौर्मुख्यं दधत उतापरे निनिन्दु-
र्नाऽश्चर्यं द्वयमपि तत् स्वभावतन्त्रम् ॥ १२ ॥

(प.दी.) सर्वज्ञमिति । **सपरिजनं** सपरिवारं **सर्वज्ञं** श्रीपूर्णप्रज्ञाचार्यं **समीक्षमाणाः** अत एव **स्मितवदनाः फुल्लाक्षाः शुभाः** सज्जनाः **ननन्दुः** । **दौर्मुख्यं** तद्दर्शनेन दुर्मुखत्वं **दधतः अपरे उत** दुर्जनाः **निनिन्दुः** । **तत् द्वयमपि** तं दृष्ट्वा शुभा ननन्दुरपरे निनिन्दुरिति तद् द्वयमपि **आश्चर्यं न** । कुतः? **स्वभावतन्त्रं** स्वभावाधीनं यस्मादिति हेतुगर्भविशेषणमेतत् ॥ १२ ॥

(त.चं.) फुल्लाक्षाः विकचनयनाः । दौर्मुख्यं दधतः । अप्रियस्य दर्शनेन श्रवणेन वा या मुखविकृतिस्तद् दौर्मुख्यम् । मौखर्यं च दौर्मुख्यम् । अशक्ततेत्येतत् ॥ १२ ॥

मामैनं भुवनगुरुं विनिन्दतेत्थं
निर्भत्स्याभ्यपतदिवोत्तरङ्गहस्तः ।
सङ्क्षोभी घनघनघोषघोरवेषः
संरम्भी खलदमनाय सिन्धुराजः ॥ १३ ॥

(प.दी.) मामेति । उत्तरङ्गहस्तः उन्नततरङ्गाख्यहस्तयुक्तः, **सङ्क्षोभी** अत्यन्तक्षोभयुक्तः, **घनघनघोषघोरवेषः,** घनघनेन अतिगम्भीरेण घोषेण घोररूपः, **संरम्भी** कोपवान् **सिन्धुराजः** समुद्रः **'एनं भुवनगुरुं मामा विनिन्दत'** इत्थं एवं **निर्भत्स्य खलदमनाय अभ्यपतदिव** । श्रीमध्वं द्विषतां खलानां निग्रहाय समुद्रोऽभ्यगादिव ॥ १३ ॥

(त.चं.) निर्भत्स्य । सर्वत्र कोशेष्वेवमेव पठ्यते । ग्रन्थान्तरेषु च । भत्सधातुरेव प्राचीन इत्युक्तम् । घनघनघोषघोरवेषः । मेघगम्भीरघोषेण घोरवेषः ॥ १३ ॥

सम्मोदात् तरळतरो द्रुताभिगामी
गम्भीरस्वननुतिमान् सुफेनहासः ।
वीच्यङ्गैरधिकतरैरिहाधिवेलं
मध्वाय प्रणतिमिव व्यधात् समुद्रः ॥ १४ ॥

(प.दी.) सम्मोदादिति । **समुद्रः अधिकतरैः वीच्यङ्गैः** तरङ्गाख्यैरङ्गैः **अधिवेलं** वेलायां [इह] **मध्वाय प्रणतिं व्यधादिव** । कथम्भूतः? **सम्मोदात्** सन्तोषादिव **तरळतरः** अतिचञ्चलः । **द्रुताभिगामी** तरङ्गरूपेण द्रुतमभि-गच्छन् । **गम्भीरस्वननुतिमान्** गम्भीरनिर्घोषाख्यस्तोत्रवान् । **सुफेनहासः** धवळतया शोभनफेनाख्यहासयुक्तः । चिरादागतं स्वगुरुं दृष्ट्वा यथा कश्चित् गुरवे प्रणमेत् तद्वदिति भावः ॥ १४ ॥

(त.चं.) सुफेनहासः । धावळ्यात् ॥ १४ ॥

गोलीलास्वतिशयिनावगाधभावा-
न्नोल्लङ्घ्यौ विविधगुणप्रकाशरत्नौ ।
मध्वाब्धी परममतेः प्रियं जनानां
लावण्यं न तु जलधेरयं विशेषः ॥ १५ ॥

(भा.प्र.) विविधगुणज्ञानाख्यरत्नः, विविधवर्णतेजस्करत्नश्च । लावण्यं सौन्दर्यम्, लवणभावश्च ॥

(प.दी.) गोलीलेति । **मध्वाब्धी** श्रीमध्वश्च समुद्रश्च **गोलीलास्वतिश-यिनौ** विविधवाग्विलासेष्वतिशयवान् मध्वः । समुद्रो जलविलासेष्वतिशय-वान् । **अगाधभावात्** गम्भीरत्वात् **नोल्लङ्घ्यौ** । **विविधगुणप्रकाशरत्नौ** । विविधाः गुणा यस्य स विविधगुणः । विविधगुणश्चासौ प्रकाशश्चेति विविधगुणप्रकाशः । भक्तिवैराग्यादिनानागुणयुक्तः प्रकाशो ज्ञानमेव रत्नं यस्य स विविधगुणप्रकाशरत्नः । समुद्रोऽपि विविधगुणश्चासौ प्रकाशरत्नश्चेति

विविधगुणप्रकाशरत्नः । रक्तनीलत्वादिनानावर्णतेजस्करत्नयुक्तः[१] । तथाऽपि **परममतेः** श्रीपूर्णप्रज्ञाचार्यस्य **लावण्यं** सौन्दर्यं **जनानां** पश्यतां जनानां **प्रियम् । जलधेः** लावण्यं लवणत्वं **तु** जनानां प्रियं **न** । एवं मध्वाब्ध्योः **अयं विशेषः** ॥ १५ ॥

(त.चं.) अतुलत्वादिविविधगुणः प्रकाशो ज्ञानमेव रत्नं श्रीमध्वे । विविधगुणः विविधवर्णः प्रकाशः प्रभा येषां तानि रत्नानि समुद्रे ॥ १५ ॥

अम्भोधेस्त्वरिततरोर्मिपाणिमृष्टे
स्वच्छेऽसौ विकटतटासने निषण्णः ।
व्याचख्यावतिचिरमैतरेयशाखा-
सूक्तानि प्रभुरतिसुन्दरप्रकारम् ॥ १६ ॥

(प.दी) अम्भोधेरिति । **प्रभुः असौ** श्रीमध्वः **अम्भोधेः त्वरिततरोर्मिपाणिमृष्टे** अतिवेगयुक्ततरङ्गाख्यपाणिभिः मृष्टे सम्मृष्टे **स्वच्छे** निर्मले **विकटतटासने** विकटे श्रेष्ठे तटासने तटाख्यासने **निषण्णः** सन् **ऐतरेयशाखासूक्तानि** ऐतेयशाखागतसूक्तानि **अतिसुन्दरप्रकारं** यथा भवति तथा **अतिचिरं व्याचख्यौ** ॥ १६ ॥

(त.चं.) विकटतटासने । विकटं विशालम् । ऐतरेयशाखासूक्तानि । ऋक्संहितागतानि सूक्तानि ॥ १६ ॥

गाम्भीर्यात् स्वनमधरीकरोति सिन्धोः
श्राव्यत्वं वहति तथाऽप्यहो स्वनोऽस्य ।
पूर्णेन्दुप्रभवदनः क एष धन्यो
मत्वेत्थं जनजलधिस्तमाशु पर्यैत् ॥ १७ ॥

---

१ एतद्विवरणानुगुणतया 'विविधगुणप्रकाशानि रत्नानि यस्मिन्' इति व्याख्येयम् । विविधगुणश्चासौ प्रकाशरत्नश्चेति विग्रहप्रदर्शनं नातीवानुगुणम् । लिपिकृतां प्रमादः सम्भाव्यते ।

(प.दी.) गाम्भीर्यादिति । **अस्य स्वनः गाम्भीर्यात् सिन्धोः स्वनमधरीकरोति** नीचीकरोति । **तथाऽपि** समुद्रस्वनादतिगम्भीरोऽपि **श्राव्यत्वं** श्रोतव्यत्वं **वहति, अहो** एतदाश्चर्यम् । **पूर्णेन्दुप्रभवदनः एषः धन्यः कः इत्थं मत्वा जनजलधिः** जनसमूहः **तं** श्रीमध्वं **आशु पर्यैत्** आवृणोत् ॥ १७ ॥

(त.चं.) जनजलधिः यः अदृष्टपूर्वमध्वः, तदात्वे अज्ञातमध्वागमनश्च ॥

वेदानां समुचितभाववाददक्षं
ये वेदद्विषमिममूचिरे महेर्ष्याः ।
धिग्धिक् तानिति जनता जगाद तत्र
स्वाश्चर्यात् किल कलिताञ्जलिर्नमन्ती ॥ १८ ॥

(प.दी.) वेदानामिति । **महेर्ष्याः** महाभ्यसूयोपेताः **ये** दुर्जनाः **वेदानां समुचितभाववाददक्षं** अत्युपपन्नाभिप्रायकथने चतुरं **इमं वेदद्विषं** वेददूषकं **ऊचिरे तान् दुष्टान् धिग्धिक्** । तात्पर्ये द्विरुक्तिः । इति **तत्र** मिळिता **जनता जगाद किल** । कथम्भूता? **स्वाश्चर्यात् कलिताञ्जलिः** बद्धाञ्जलिः भूत्वा **नमन्ती** ॥ १८ ॥

(त.चं.) 'महेर्ष्याः' । 'ईर्षा गतिहिंसादानेषु' इति काशकृत्स्नः । 'ईर्ष्य ईर्ष्यायाम्' इत्यन्ये । 'ईर्ष्या कामजमसहनम्' इति क्षीरस्वामी । ईर्ष्यतीतीर्ष्या मात्सर्यम् । ईर्ष्यणं वा । अघ्न्यादित्वाद् यक् । तद् यथा– न हन्यत इत्यघ्न्या गौः, वाक् च । न हन्तीत्यघ्न्यो धर्मः ॥ १८ ॥

सन्नामं विपुलहृदे विधाय भक्त्या
बिभ्राणाश्चरणरजः सुरेन्द्रसेव्यम् ।
तत्स्नानादधिकशुचौ नदाधिराजे
सस्नुस्ते द्विजनिकराः प्रशस्तकाले ॥ १९ ॥

(प.दी.) सन्नाममिति । ते द्विजनिकराः विपुलहृदे भक्त्या सन्नामं विधाय सुरेन्द्रसेव्यं चरणरजः बिभ्राणाः सन्तः **तत्स्नानात्** तस्य स्नानात् **अधिकशुचौ** अतिपवित्रे **नदाधिराजे** समुद्रे **प्रशस्तकाले सस्नुः ।** समुद्रस्नानं चक्रुः ॥

(त.चं.) सन्नामं प्रणामम् । अष्टाङ्गतैव प्रकर्षो नाम । यत् स्वयमेव नम्राः सभक्त्युन्मेषमनंसत सोऽयं सन्नामो नाम । प्रशस्ते ग्रहणमोक्षकाले ॥

कल्लोलैः करिनिकरैरिवानिवार्यै-
रुल्लोलैर्जननिकरान् निपातयद्भिः ।
आक्रान्ताः प्रबलतरैश्च लोठ्यमाना
हास्यत्वं प्रययुरुदन्वतीह नैके ॥ २० ॥

(प.दी.) कल्लोलैरिति । इह उदन्वति समुद्रे स्नानं कुर्वन्तः **नैके** बहवो जनाः **हास्यत्वं प्रययुः** । कथम्भूताः? **उल्लोलैः** अतिचञ्चलैः **अनिवार्यैः जननिकरान् निपातयद्भिः प्रबलतरैः** अतिप्रबलैः **च कल्लोलैः** तरङ्गैः **आक्रान्ताः** । अत एव पतिताः सन्तो **लोठ्यमानाः** । तरङ्गैरिति भावः । कथम्भूतैः कल्लोलैः? **करिनिकरैरिव** । उल्लोलशब्दो महातरङ्गवाचको वा । 'भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिरथोर्मिषु । महत्सूल्लोलकल्लोलौ' इत्यमरः । तथाच **उल्लोलैः** उल्लोलाख्यमहातरङ्गैः **कल्लोलैः** कल्लोलाख्यमहातरङ्गैरपि **आक्रान्ताः** इति योजना ॥ २० ॥

(त.चं.) कल्लोलैः । 'वीचिर्भङ्गस्तरङ्गः स्यात् तन्महत्त्वे च कथ्यते । ऊर्मि-रुत्कलिकोल्लोलः कल्लोलो लहरी तथा' इति । तर्हि उल्लोलैरिति पुनरुक्तम्? न पुनरुक्तम् । ऊर्ध्वं लोडयद्भिः कल्लोलैरिति योगार्थग्रहणात् । लोठ्यमानाः ताड्यमानाः । लुठ प्रतिघाते । काशकृत्स्नस्तु लुठ उपघात इति परस्मैभाषं धात्वन्तरमेव पठति । प्रतिघातः प्रतिहिंसा । उपघातस्ताडनम् । उदन्व-तीह । इह कण्वतीर्थाख्यक्षेत्रगते समुद्रे । प्रभूतमुदकवानुदन्वान् भवति । उदकशब्दस्योदन्भाव उदधावर्थे । तथाहि पाणिनिः–'उदन्वानुदधौ च'

[८.२.१३] । चकारात् सञ्ज्ञायां च । उदन्वानिति कस्यचनर्षेः सञ्ज्ञा । एतेन उदकवानपि घटः 'उदन्वान् घटः' इति नोच्यते ॥ २० ॥

मज्जन्तं पृथुलहरीनिगूढमूर्तिं
सम्पूर्णप्रमतिमसज्जनो जहास ।
यो लोकत्रयविजयी गुरुः प्रसिद्धः
सोऽयं ही पतति लघूर्मिलीलयेति ॥ २१ ॥

(प.दी.) मज्जन्तमिति । असज्जनः मज्जन्तं स्नातुं निमज्जन्तं **पृथुलहरीनिगूढमूर्तिम्,** पृथुभिर्लहरीभिः तरङ्गैर्निगूढशरीरं **सम्पूर्णप्रमतिं** इति **जहास** । कथम्? **लोकत्रयविजयी गुरुः प्रसिद्धः यः सोऽयं लघूर्मिलीलया** अल्पानां तरङ्गाणां लीलया **पतति, ही** एतत् कष्टम् ॥ २१ ॥

(त.चं.) पृथुलहरीनिगूढमूर्तिम् । पृथुस्तरङ्गो लहरी भवति । कल्लोलो भवति । अयं पुनरुल्लोलः कल्लोलः । लहरीष्वपि पृथव इमा लहर्य इति पृथुलहरीत्याह । 'ही' इति विस्मये विषादे परिहासे च ॥ २१ ॥

नीचानामवचवचांस्यजीगणन्नो
दभ्राणां क्षुभितकराण्यदभ्रबोधः ।
क्रोष्टूनां श्वकळकळप्रदं विरावं
पञ्चास्यो न हि गणयेदुदारवीर्यः ॥ २२ ॥

(प.दी.) नीचानामिति । अदभ्रबोधः श्रीपूर्णप्रज्ञाचार्यः **दभ्राणां** अल्पानां **क्षुभितकराणि** चित्तक्षोभकराणि **नीचानां** दुर्जनानां **अवचवचांसि** नीचवचनानि । वक्तुमनुचितानि वचनानीति वा । **नो अजीगणत्** न गणयामास । तथाहि– **श्वकळकळप्रदं** शुनां कोलाहलप्रदं **क्रोष्टूनां** सृगालानां **विरावं उदारवीर्यः पञ्चास्यः** सिंहः **न गणयेद् हि** ॥ २२ ॥

(त.चं.) नीचानामवचवचांसि । अवचनीयानि वचांसि । अर्थान्तरं च युज्यत इत्युपपादितं प्रथमे । क्षुभितं क्षोभः । क्रोष्टूनाम् । 'सि-तनि-गमि-मसि-सचि-अवि-धाञ्-क्रुशिभ्यस्तुन्'[१.१२२] इति दशपादिका । षिञ् बन्धने । सिनोत्युभयपार्श्वमिति सेतुः । सिन्वन्ति तमिति सेतुरित्यपि व्याचक्षते । तनु विस्तारे । तन्यत इति तन्तुः । गम्लृ गतौ । गच्छतीति गन्तुः पथिकः । मसी परिणामे । मस्यतेऽनेनेति मस्तु दध्यवयवः । षच सेचने । सच्यन्तेऽमीभिः प्राणा इति सक्तव इति व्याचक्षते । अव रक्षणे । अवत्याखुभ्य इत्योतुर्मार्जारः । डु धाञ् धारणपोषणयोः । दधात्यर्थमिति धातुः । क्रुश रोदने । अत्यर्थं क्रोशतीति क्रोष्टा सृगालः । 'तृज्वत् क्रोष्टुः' [७.१.९५] इति स्मरणात् तृजन्तवत् क्रोष्टा क्रोष्टारौ क्रोष्टार इत्येव रूपम् । 'विभाषा तृतीयादिष्वचि'[७.१.९७] 'तृतीयादिषु विभक्तिष्वजादिषु क्रोष्टुर्विभाषा तृज्वद् भवति' इति प्रतिप्रसवात् षष्ठ्यां तृजन्तवद् भवति, नवा भवति– क्रोष्टुः क्रोष्टोः क्रोष्ट्रोः क्रोष्ट्वोः क्रोष्टूनाम् ॥ २२ ॥

जन्मस्थित्यवसितिदायिनं कटाक्षं
लोकानामघटयदम्बुधौ बृहद्धीः ।
आक्रान्तोऽधिकगुरुणा स तेन ताव-
न्मुञ्चन् सञ्चलनमभूत् तटाकदेश्यः ॥ २३ ॥

(प.दी.) **जन्मेति** । **बृहद्धीः** श्रीपूर्णप्रज्ञाचार्यः **लोकानां जन्मस्थित्यवसितिदायिनं** उत्पत्तिस्थितिलयप्रदानशीलं **कटाक्षं** अपाङ्गं **अम्बुधावघटयत्** । कटाक्षेणाम्बुधिं ददर्शेति भावः । **तावत्** तदा **अधिकगुरुणा** महाभारवता **तेन** कटाक्षेण **आक्रान्तः सः अम्बुधिः सञ्चलनं मुञ्चन् तटाकदेश्यः** तटाकसदृशः **अभूत्** ॥ २३ ॥

(त.चं.) तटाकदेश्यः । 'ईषदसमाप्तौ कल्पब्-देश्य-देशीयरः' [५.३.६७] । ईषदसमाप्तस्तटाकः तटाकदेश्यः । 'सम्पूर्णता पदार्थानां समाप्तिः ।

स्तोकेनासम्पूर्णता ईषदसमाप्तिः' इति जयादित्यः । न पूर्णतया, किन्त्वीषत् तटाकसदृशो बभूवेत्यर्थः ॥ २३ ॥

इत्याद्यैरपि चरितैरनन्यसाध्यै-
र्न स्थेष्ठां बहुमतिमाप दुर्जनोऽस्मिन् ।
विद्वेषं व्यधित पुनर्निरस्तभाग्ये
तस्मिन् दुर्मनसि तदेव शोभनं स्यात् ॥ २४ ॥

(प.दी.) इतीति । **दुर्जनः इत्याद्यैः अनन्यसाध्यैः चरितैः** कर्मभिरुपलक्षिते **अपि अस्मिन्** श्रीमध्वे **स्थेष्ठां** अतिस्थिरां **बहुमतिं नाऽप** । इत्याद्यनन्यसाध्यचरितेऽप्यस्मिन् दुर्जनो नातिबहुमतिं चकारेति भावः । न केवलमेतावत् । **पुनः विद्वेषं व्यधित** । **निरस्तभाग्ये दुर्मनसि** दुष्टचित्ते **तस्मिन्** दुर्जने **तदेव शोभनं स्यात्** । तमोयोग्यानां दुर्जनानां तस्मिन् विद्वेष एव युक्त इत्यर्थः ॥ २४ ॥

(त.चं.) ननु तदा किमसज्जनश्चकार यः 'सोऽयं ही पतति लघूर्मिलीलया' इति जहास? आह– इत्याद्यैरपि । दुर्मनसि । दुष्टं मनोऽस्येति दुर्मनाः । दुःखयोग्यं मनोऽस्येति वा ॥ २४ ॥

सम्प्राप्तं सह सहजेन गण्डवाटं
स्वोजस्सम्प्रकटन आदिशद् विशङ्कम् ।
शुश्रूषामयमुचितो विधातुमीष-
ल्लोकानामिति वचसा परीक्षकाणाम् ॥ २५ ॥

(भा.प्र.) गण्डवाटस्य 'कोडिआडि' इत्यपभ्रष्टभाषा ॥

(प.दी.) सम्प्राप्तमिति । कर्तृपदमध्याहार्यम् । सः श्रीमध्वः **सहजेन** भ्रात्रा **सह सम्प्राप्तं** अन्तिकमागतं **गण्डवाटं** गण्टवाटाख्यद्विजं **स्वोजःसम्प्रकटने** स्वसामर्थ्यप्रकटनार्थं **विशङ्कं** यथा भवति तथा **आदिशत्** । मयि

त्वत्सामर्थ्यं प्रकाशयेत्यवददिति भावः । कुतः? **अयं** गण्डवाटः **ईषत् शुश्रूषां** सेवां **विधातुं** कर्तुं **उचितः इति लोकानां वचसा** । कथम्भूतानां लोकानाम्? **परीक्षकाणां** स्वसार्थ्यपरीक्षकाणाम् । 'गण्डवाट' इत्यस्य 'कोडिञ्जाडि' इत्यपभ्रष्टसञ्ज्ञा ॥ २५ ॥

(त.चं.) अथान्यं दुर्जनकृतं प्रसङ्गमाह– सम्प्राप्तं सह सहजेन गण्डवाटम् । 'गण्डवाटस्य 'कोडिंजाडि'[ಕೊಡಿಂಜಾಡಿ] इत्यपभ्रष्टभाषा' इति भावप्रकाशिका । सम्प्रत्येतादृशं कुलनाम तौळवेषु न श्रूयते । 'कोडिञ्जाडि' इति ग्रामविशेषः । स एवाधुना 'कोडिम्बाडि' [ಕೊಡಿಂಬಾಡಿ] इति व्यवह्रियत इति वदन्ति । तद्ग्रामणीरयमासीदिति च । गण्डवाट इति तु किम्मूलमिति मृग्यं निर्वचनम् ॥ २५ ॥

श्रीकान्तेश्वरसदनेऽनयत् किलैको
यस्त्रिंशन्नरवरनीतकेतुयष्टिम् ।
आहत्या गुरुगदयैव नाळिकेराद्
यो लेभे तरळतरात् फलानि कामम् ॥ २६ ॥

(प.दी.) श्रीकान्तेति । **यः** गण्डवाटः **श्रीकान्तेश्वरसदने** श्रीकान्तेश्वराख्यामरसदने **त्रिंशन्नरवरनीतकेतुयष्टिं** त्रिंशत्पुरुषश्रेष्ठैर्नीतध्वजस्तम्भं **एकोऽनयत् किल** । **यः** गण्डवाटः **गुरुगदया** गुर्व्या गदया **आहत्या** ताडनेन **एव तरळतरात्** अतिचञ्चलात् **नाळिकेरात् फलानि कामं लेभे** ॥ २६ ॥

(त.चं.) गण्डवाटस्य सामर्थ्यातिशयमाह– श्रीकान्तेश्वरसदने । सम्प्रति 'कान्तावर'[ಕಾಂತಾವರ] इति प्रसिद्धमेव श्रीकान्तेश्वरसदनमिति वदन्ति ।
॥ २६ ॥

एतादृग्बलविभवः स तस्य कण्ठं
तज्ज्येष्ठोऽप्यभित उभौ समं गृहीत्वा ।

निष्पेष्टुं परममवापतुः प्रयत्नं
सङ्घर्षात् क्रमपरिवर्धमानतैक्ष्ण्यम् ॥ २७ ॥

(प.दी.) एतादृगिति । **एतादृग्बलविभवः** एवमुक्तप्रकारेण बलविभवः **सः** गण्डवाटः **तज्ज्येष्ठोऽपि** तत्समानबलः ज्येष्ठोऽपि **उभौ तस्य कण्ठं अभितः समं** युगपत् **गृहीत्वा निष्पेष्टुं** कण्ठं निष्पेष्टुं **परमं प्रयत्नमवापतुः** । कथम्भूतम्? **सङ्घर्षात्** तयोः करैर्मथनात् **क्रमपरिवर्धमानतैक्ष्ण्यं** क्रमेण वर्धमानतीक्ष्णतायुक्तम् ॥ २७ ॥

(त.चं.) एतादृग्बलविभवः स च, तज्ज्येष्ठो भ्राता च ॥ २७ ॥

आस्विन्नावलसतरौ गुरोर्नियोगा-
च्छत्राग्रयानिलमहितौ च तावुभाभ्याम् ।
मुक्त्वाऽयःकठिनतरत्वचं शिरोधिं
पर्यायस्फुटवचनां निपेततुः कौ ॥ २८ ॥

(प.दी.) आस्विन्नाविति । **आस्विन्नौ** अतितरां स्वेदं प्राप्तौ । **गुरोः** श्रीमध्वाचार्यस्य **नियोगात् उभाभ्यां** शिष्याभ्यां **छत्राग्रयानिलमहितौ** छत्राग्रयाभ्यां वीजनाज्जातेन वायुना महितौ आश्वासितौ च । **अलसतरौ** अतिश्रान्तौ **तौ कौ** भूमौ **निपेततुः** । किं कृत्वा? **अयःकठिनतरत्वचं** अयोवदतिकठिनत्वचम्, [**पर्यायस्फुटवचनाम्**] पर्यायात् क्रमेण स्फुटवचनां स्पष्टं निर्यद्वचनयुक्तां **शिरोधिं** कण्ठं **मुक्त्वा** ॥ २८ ॥

(त.चं.) अलसतरौ । न लसतीत्यलसो विवर्णवदन आयस्तः । पर्यायस्फुटवचनाम् । 'पर्यायस्तु प्रकारे स्यान्निर्माणेऽवसरे क्रमे' इति च ॥

आश्वस्तौ शुचिहृदिमावनूनमाना-
वुद्धर्तुं समगददङ्गुलिं धरास्थाम् ।

सङ्गृह्य प्रसभरसादपि प्रयत्तौ
सामर्थ्यं ययतुरिमौ न कम्पनेऽस्याः ॥ २९ ॥

(प.दी.) **आश्वस्ताविति** । शुचिहृत् **आश्वस्तौ** गतश्रमौ **अनूनमानौ** सम्पूर्णाहङ्कारौ **इमौ** गण्डवाटौ **धरास्थां** धरायां स्थितां **अङ्गुलिं** आत्मनोऽङ्गुलिं **उद्धर्तुं समगदत्** जगाद । **प्रसभरसात्** अतिबलात्कारेण **सङ्गृह्य** गृहीत्वा **प्रयत्तावपि** अङ्गुलिमुद्धर्तुं प्रयत्नवन्तावपि **इमौ** गण्डवाटौ **अस्याः** अङ्गुल्याः **कम्पने** चालने **सामर्थ्यं न ययतुः** ॥ २९ ॥

(त.चं.) अङ्गुलिं धरास्थाम् । अमतीत्यङ्गुलिरङ्गुरिर्वा । अम गतिशब्दभक्तिषु । 'अमेर्गुरी रश्च लो वा'[१.४५] इति दशपादिका । अमेर्धातोर्गुरिः प्रत्ययः । रेफस्य वा लकारः । अन्ये तु 'अगि गतौ' इति धातोरुलिप्रत्ययेन शब्दस्वरूपं व्युत्पादयन्ति अङ्गतीत्यङ्गुलिरिति । तदेवमव्यवस्थाभूषणा वैयाकरणाः । आह च क्षीरस्वामी– 'निरूढादीनां प्रकृतिप्रत्ययौ यथाकथञ्चित् कल्पनीयाविति ज्ञाप्यते' इति । अङ्गान्यलन्ति भूषयन्तीति चाङ्गुलयः । प्रसभरसादपि । 'क्लीबे तु प्रसभं हठः' इति । प्रसभेनोपात्तो रसः वीर्यम् । प्रसभमेव वा रसः । प्रयत्तौ कृतप्रयत्नौ 'श्वीदितो निष्ठायाम्' [७.२.१४] । श्वयतेरीदितश्च निष्ठायामिडागमो न भवति । टुओश्वि गतिवृद्ध्योः । शूनः । यती प्रयत्ने । यत्तः ॥ २९ ॥

निर्यत्नं वटुमधिरुह्य मन्दहासी
स प्रायादिह परितो नृसिंहगेहम् ।
ऐश्वर्यैरिति लघिमादिकैरुपेतो
मध्वोऽभूत् त्रिभुवनचित्ररत्नराजः ॥ ३० ॥

(प.दी.) **निर्यत्नमिति** । **सः** श्रीमध्वः इह तौळवमण्डले **निर्यत्नं** स्वत एव प्रयत्नशून्यं **वटुं** ब्रह्मचारिणं **अधिरुह्य मन्दहासी** मन्दहासवान् **नृसिंहगेहं**

परितः प्रायात् । अनेन लघिमा सूचितः । **इति** उक्तप्रकारेण **लघिमादिकैरैश्वर्यैः** अणिमा, गरिमा, लघिमा, महिमा, ईशित्वम्, वशित्वम्, प्राकाश्यम्, परकायप्रवेश इत्यष्टभिरैश्वर्यैः **उपेतः मध्वः त्रिभुवनचित्ररत्नराजः** त्रिभुवने यानि चित्ररत्नानि[१] आश्चर्यतमानि तेषां राजा श्रेष्ठः **अभूत्** ॥

(त.चं.) इह परितो नृसिंहगेहम् । इह कान्तेश्वरसदने इति वदन्ति । यद्यपि न तत्र सम्प्रति नृसिंहगेहम् । ईश्वरसदनं हि तत् । ईशान्तर्यामिणः नृसिंहस्य विवक्षयेदं गदितमिति च वदन्ति । 'नाश्यं'[೩೩೬] इति प्रथिते नृसिंहगेह इति च वदन्ति । साधु चेदं भाति । अणिमा, गरिमा, लघिमा, महिमा, ईशित्वम्, वशित्वम्, प्राकाश्यमित्यष्टावैश्वर्यसिद्धयः । क्वचिद् गरिम्णः स्थाने प्राप्तिं पठन्ति । अन्येन्द्रियैर्विषयप्राप्तिः, मनोजवः, कामरूपम्, परकायप्रवेशादिश्च प्राप्तिः । दूरश्रवणदर्शने त्रिकालज्ञत्वादिश्च प्राकाश्यम् । अग्निस्तम्भनादिरूपं शक्तिप्रेरणमीशित्वम् । गुणेष्वसङ्गो वशित्वम् । इच्छामात्रेण कामितावाप्तिः प्राकाश्यम् । तथाहि भागवते [११.१५.४-५] –'अणिमा महिमा मूर्तेर्लघिमा प्राप्तिरिन्द्रियैः । प्राकाश्यं श्रुतदृष्टेषु शक्तिप्रेरणमीशिता । गुणेष्वसङ्गो वशिता यत्कामस्तदवाप्स्यति । एता मे सिद्धयः सौम्य अष्टावौत्पत्तिका मताः' इति । एतत्पक्षे गरिम्णो महिम्न्येवान्तर्भावः । प्रथमपक्षे प्राप्तेः प्राकाश्ये । तथाहि भागवततात्पर्ये प्राकाश्यवचनम्–'गरिम्णः सैव हेतुः स्यान्महिमाहेतुधारणा । प्रायोऽष्टसिद्धिकथनेष्वथो न पृथगुच्यते' इति, 'प्राप्तिप्राकाश्य-योश्चापि धारणैकाऽपि सम्भवेत् । अत ऐक्येन तामुक्त्वा गरिमाणं पृथक् क्वचित्' इति च ॥ ३० ॥

पञ्चाशन्नरपनरोपनीतमात्रां
यो वार्क्षीं गृहमधिरोहिणीं निनाय ।

१.कोशे 'चित्राणि रत्नानि' इति पठ्यते । नूनं लिपिकृत्प्रमादः ।

स व्याख्यास्वरदमनाय पूर्ववाटो
निर्देशाद् व्यधित गुरोर्गळप्रपेषम् ॥ ३१ ॥

(भा.प्र.) पूर्ववाटस्य 'मूडेम्बाडि' इत्यपभ्रष्टभाषा ॥

(प.दी.) **पञ्चाशदिति** । यः पूर्ववाटः **पञ्चाशन्नरपनरोपनीतमात्राम्**, पञ्चाशत्सङ्ख्याकैः नरपनरैः राजपुरुषैः उपनीतमात्रां कथञ्चिदुपनीताम्, **वार्क्षीं** वृक्षमयीं **अधिरोहिणीं** निःश्रेणीं **गृहं** स्वगृहं **निनाय सः पूर्ववाटः गुरोः** श्रीमध्वस्य **निर्देशात् व्याख्यास्वरदमनाय** व्याख्यासमये स्वरनिग्रहं कर्तुं **गळप्रपेषं** कण्ठनिष्पेषं **व्यधित** । पूर्ववाटस्य 'मूडेम्बाडि' इत्यपभ्रष्टसञ्ज्ञा ॥

(त.चं.) गण्डवाटसमानयोगक्षमः पूर्ववाटः । 'मूडेम्बाडि' [ಮೂಡೆಂಬಾಡಿ] इति भाषायाम् । 'मूडम्पाडित्ताय' [ಮೂಡಂಪಾಡಿತ್ತಾಯ] इति, 'मूडम्बडित्ताय' [ಮೂಡಂಬಡಿತ್ತಾಯ] इति च । अधिरोहिणी, 'निच्चणिगे' [ನಿಚ್ಚಣಿಗೆ] इति भाषायाम् । गुरोर्निर्देशात् । गुरोर्गळप्रपेषम् ॥ ३१ ॥

स्विन्नेऽस्मिन्नपि यतमान आग्रहोग्रे
प्राच्यात् तत्प्रवचननिस्वनोऽतिरेजे ।
उद्धर्तुं विपुलहृदङ्गुलीं च नालं
सोऽभूदित्यजनि कुतूहलं जनानाम् ॥ ३२ ॥

(प.दी.) **स्विन्नेऽस्मिन्निति** । **आग्रहोग्रे** व्याख्यास्वरदमनाय आग्रहेणोग्रे तीव्रे । अतितीव्राग्रहयुक्त इत्यर्थः । अत एव **स्विन्ने अस्मिन्** पूर्ववाटे **यतमाने** पुनः **अपि** तद्व्याख्यास्वरदमनाय प्रयत्नं कुर्वति सति **तत्प्रवचननिस्वनः** तस्य श्रीमध्वस्य व्याख्यानिनादः **प्राच्यात्** पूर्वं विद्यमानादपि प्रवचननिस्वनात् **अतिरेजे** अतितरां रेज इत्यर्थः । **सः** पूर्ववाटः **विपुलहृदङ्गुलीं उद्धर्तुं च अलं** समर्थः **नाभूत् इति जनानां कुतूहलमजनि** ॥ ३२ ॥

(त.चं.) प्राच्यात् पूर्वतनादपि स्वनात् । अङ्गुलिरीदन्तोऽपि ॥ ३२ ॥

पर्यैक्षि प्रभुरितरैः शिवाग्निपूर्वै-
र्नोपैक्षि प्रबलतरैस्तथा प्रयत्नैः ।
नावैक्षि क्वचिदपि शक्त्यपूर्तिरस्मि-
न्नुत्प्रैक्षि स्वयमपि भीम इत्यवश्यम् ॥ ३३ ॥

(भा.प्र.) पूर्वशब्देन वासुदेवोग्रामोदादयः[१] ॥

(प.दी.) परीति । **प्रभुः** श्रीमध्वाचार्यः **इतरैः** अन्यैः **शिवाग्निपूर्वैः** । शिवाग्निर्नाम कश्चिद् द्विजः । तत्पुरःसरैः **बलिभिः पर्यैक्षि** परीक्षितोऽभूत् । **तथा प्रयत्नैः** प्रयत्नवद्भिः **प्रबलतरैः** पुरुषैः **नोपैक्षि** नोपेक्षितः । **अस्मिन्** श्रीमध्वाचार्ये **क्वचिदपि** कस्मिंश्चिदपि विषये **शक्त्यपूर्तिः** शक्तेरपूर्तिः **नावैक्षि** न दृष्टा । **स्वयमपि अवश्यं भीम इति उत्प्रैक्षि** । अयं सर्वथा श्रीभीमसेनो भवितुमर्हतीति जनैरुत्प्रेक्षितश्च ॥ ३३ ॥

(त.चं.) इतरैरपि मल्लक्रीडापटुभिः शिवाग्निपूर्वैः । शिवाग्निर्नाम कश्चिद् द्विज इति प्राचीनटीका । शिवशर्मा अग्निशर्मा चेति द्वाविति सुवचम् । 'शिवत्ताय' [ಶಿವತ್ತಾಯ] इति, 'अग्गित्ताय'[ಅಗ್ಗಿತ್ತಾಯ] इति तौळवकुलनामप्रसिद्धौ । प्रयत्नैः प्रबलयत्नैः प्रबलतरैः पुरुषैः । शिवाग्निपूर्वैरपि नोपैक्षि । किन्तु प्रबलतरैः प्रयत्नैः पर्यैक्षीति वा ॥ ३३ ॥

लेखिन्यां मुहुरपिनह्य कृष्यमाणं
नाप्येकं तनुरुहमस्य तूदपाटि ।

१.अत्र शुद्धपाठनिर्णयो दुष्कर इति भाति । 'वासुदेवोग्रामोदादयः' इति कोऽर्थः । वासुदेव+उग्रामोदादय इति तु च्छेदो न सम्भवी । नहि 'उग्रः, आमोदः' इति वा 'उग्रामोदः' इति वा कस्यापि नामधेयमिति स्वरसम् । '-ग्रामोच्छादयः' इति क्वचित् । स्फुटं लिपिकृतः प्रामाद्यन् । 'वासुदेवदामोदरादयः' इति स्याद् वा? यत्र प्राचीनटीकाकारा अपि मूकायन्ते तत्र कथं वयं वाचाटा भवेम?

नासाग्रे मृदुनि कृतैश्च मुष्टिघातै-
र्नास्येन्दोरतिबलिभिः प्रसन्नताऽऽसि ॥ ३४ ॥

(प.दी.) लेखिन्यामिति । **अतिबलिभिः** पुरुषैः **लेखिन्यां मुहुः** बहुवारं **अपिनह्य** संवेष्ट्य **कृष्यमाणं** आकृष्यमाणं **अपि अस्य तु** श्रीमध्वाचार्यस्य **एकं तनुरुहमपि** लोमापि **नोदपादि** नोत्पादितम् । **मृदुनि नासाग्रे कृतैश्च मुष्टिघातैः** मुष्टिताडनैः **आस्येन्दोः** श्रीमध्वमुखचन्द्रस्य **प्रसन्नता न आसि** निराकृता । 'असु क्षेपणे' इति धातोः कर्मणि लुङ् ॥ ३४ ॥

(त.चं.) केके प्रयत्नाः? आह– लेखिन्याम् ॥ ३४ ॥

पश्चास्यः श्वभिरिव ही विहीनसारै-
रम्भोधिर्नगसरितां जलैरिवाल्पैः ।
खद्योतैरिव तरणिर्विडम्बयन् नॄन्
प्रत्यर्थिस्वसमनरैर्व्यवाहरत् सः ॥ ३५ ॥

(भा.प्र.) श्वादयः क्रमेण प्रत्यर्थ्यादिदृष्टान्ताः ॥

(प.दी.) पश्चास्य इति । **नॄन्** नरान् **विडम्बयन् सः** श्रीमध्वाचार्यः **प्रत्यर्थिस्वसमनरैः** । प्रत्यर्थिभिर्विरोधिभिर्नरैः, स्वैः स्वभक्तैर्नरैः, समैरुदासीनैर्नरैश्च **व्यवाहरत्** व्यवहृतवान् । प्रत्यर्थिनश्च स्वे च समाश्चेति द्वन्द्वः । एतैर्नरैर्यथायथं व्यवाहरत् । तत्र कैःकैः कथङ्कथमिव? **पश्चास्यः** प्रत्यर्थिभिः **विहीनसारैः** दुर्बलैः **श्वभिरिव** । **ही** इति व्यवहारायोग्यतोच्यते । **अम्भोधिः** समुद्रः स्वकीयैः **अल्पैः नगसरितां** नगादुत्पन्नानां नदीनां **जलैरिव** । **तरणिः** सूर्यः समैः **खद्योतैरिव** इति योजना ॥ ३५ ॥

(त.चं.) खद्योतो न सूर्यस्य प्रत्यर्थी । नापि स्वीय इति समः तटस्थः । खे द्योतत इति खद्योतः । 'मिणुकुहुळ' [ಮಿಣುಕುಹುಳ] इति भाषायाम् ॥

पारन्तीसुरसदनं विशालसंवित्
सम्प्राप्तः खलु सुचिरान्निवेद्यहीनम् ।
ग्राम्याग्र्यक्षितिपतिभिर्दिनार्धमात्रात्
तद्भूतीर्व्यधित सभूतबल्यनल्पाः ॥ ३६ ॥

(भा.प्र.) पारन्तीसुरसदनस्य '[1]केवुड [केट]देवल' इत्यपभ्रष्टभाषा ॥

(प.दी.) पारन्तीति । **विशालसंवित्** श्रीपूर्णप्रज्ञाचार्यः **सुचिरात्** बहुकालं **निवेद्यहीनं** नैवेद्यादिहीनं **परान्तीसुरसदनं** पारन्त्याख्यामरालयं **सम्प्राप्तः** **ग्राम्यग्रयक्षितिपतिभिः**, ग्रामे भवा ग्राम्याः, ग्राम्याणामग्रयाः ग्राम्याग्रयाः, ग्रामण्य इत्यर्थः, तैः पारन्तीसुरसदनयोगक्षेमविचाराधिकृतैर्ग्रामणीभिः क्षितिपतिना च सह, **दिनार्धमात्रात्** दिनस्यार्धमात्रेण, उदयमारभ्या-स्तमयपर्यन्तेन कालेन, **सभूतबलि** भूतबलिसहितं यथा भवति तथा **अ-नल्पाः** अतिबहळाः **तद्भूतीः** तद्देवालयगतदेवविभवान् **व्यधित खलु** कारयामासेत्यर्थः ॥ ३६ ॥

(त.चं.) अपरा कथा– पारन्तीति । 'पारन्ती'ग्रामगं सुरसदनम् । 'केवुड-देवल' [ಕೆವುಡದೇವಲ] इति तौळवभाषायामिति भावप्रकाशिका । ननु भोः, न पारन्तीनामा ग्रामः श्रूयते दृश्यते वा? अत्र केचिदेवं प्रथां निर्वर्णयन्ति– सम्प्रति 'बाळ्तोट्टु'[ಬಾಳ್ತೊಟ್ಟು] इति व्यवह्रियमाणो ग्राम एवात्रोक्तः 'पा-रन्ती'ग्राम इति । तस्य पूर्वतनं नाम 'पारेन्तबोट्टु'[ಪಾರೆಂತಬೊಟ್ಟು] इति । तस्यैव सङ्क्षिप्तं रूपम्, 'पारन्ती' इति । तदेव क्रमशः 'पारेन्तोट्टु'[ಪಾರೆಂತೊಟ್ಟು] इति, 'पार्त्तोट्टु'[ಪಾರ್ತೊಟ್ಟು] इति, 'बार्तोट्टु'[ಬಾರ್ತೊಟ್ಟು] इति, 'बाळ्तोट्टु'[ಬಾಳ್ತೊಟ್ಟು] इति च रूपान्तरमापेति । एवं 'केवुडदेवल'पदं च क्रमेण, 'केड्देवल'[ಕೆಡ್ದೇವಲ] इति, 'केळ्देवल'[ಕೆಳ್ದೇವಲ] इति,

१. 'केवुडदेल' इति क्वचित् ।

'केळ्देवेल्'[ಕೆಳ್ದೆವೆಲ್] इति, केळ्देवैल्'[ಕೆಳ್ದೆವೈಲ್] इति नानारूपाणि प्राप्य सम्प्रति 'केळ्दवैल्'[ಕೆಳ್ದವೈಲ್] इति व्यवह्रियते । तत्र पुरा पञ्चात्मनो मुररिपोरालय आसीत् । सम्प्रति तदपि भग्नम् । अवशेषमात्रं तु दृश्यत इति । अन्ये तु 'उप्पिनङ्गडि'[ಉಪ್ಪಿನಂಗಡಿ] प्रदेशादनतिदूरे 'मुद्य'[ಮುದ್ಯ] नामके ग्रामभेदे सम्प्रत्यपि पूज्यमानस्य पञ्चलिङ्गात्मनो मुररिपोरालय एवात्रोक्तं पारन्तीसुरसदनमिति निगदन्ति । तथ्यमन्वेष्टव्यं भवति ॥ ३६ ॥

भीमत्वे सह सहजैः प्रतिष्ठितः प्राक्
पञ्चात्मा मुररिपुरञ्चितो यदत्र ।
पाञ्चाल्या बलिसलिलं समं ददत्या
सोऽस्मार्षीत् तमिममथ प्रपूज्यपूज्यः ॥ ३७ ॥

(प.दी.) **भीमत्व** इति । **भीमत्वे** स्वस्य पूर्वं भीमत्वे **सहजैः** धर्मराजादिभिः **सह अत्र** पारन्तीसुरसदने **प्राक् प्रतिष्ठितः पञ्चात्मा मुररिपुः अञ्चितः** पूजितः **यत्** । **बलिसलिलं** श्रीबलिपूजाङ्गभूतमुदकं **ददत्या** समानीय प्रदिशन्त्या **पाञ्चाल्या** द्रौपद्या च **समम्** । **प्रपूज्यपूज्यः** प्रकर्षेण पूज्यैः रुद्रादिभिः पूज्यः **सः** श्रीमध्वः अस्मात् कारणात् **अथ** एतत्सुरसदनसन्दर्शनसमनन्तरं **तमिमं** अत्राऽऽत्मना प्रतिष्ठितमञ्चितं मुररिपुं **अस्मार्षीत्** ॥ ३७ ॥

(त.चं.) कुतोऽयं पारन्तीसुरसदने प्रेमातिशय इत्यतः पूर्वेतिहासमाह– भीमत्वे सह सहजैः प्रतिष्ठितः प्राक् । ननु तत्र पञ्चलिङ्गेश्वरः श्रूयते? नेत्याह– पञ्चात्मा मुररिपुः । बलिसलिलं पूजासलिलम् ॥ ३७ ॥

आयास्यन् किल सरिदन्तराख्यदेशं
ग्रीष्मे निर्जलमिह शुश्रुवांस्तटाकम् ।
तत्काले परमभिवर्षयन् घनौघं
तत्पूर्त्यै व्यधित कुतूहलं जनानाम् ॥ ३८ ॥

(भा.प्र.) सरिदन्तरस्य 'इडेतुदे' इत्यपभ्रष्टभाषा ॥

(प.दी.) आयास्यन्निति । **ग्रीष्मे सरिदन्तराख्यदेशं आयास्यन्** आगमिष्यन् **इह** अस्मिन् ग्रामे **तटाकं निर्जलं शुश्रुवान्** श्रुतवान्, **तत्काले** तस्मिन् काले, ग्रीष्मकाल इत्यर्थः, **परं** केवलं **तत्पूर्त्यै** तद्ग्रामतटाकपूर्त्यर्थमेव **घनौघमभिवर्षयन्** श्रीमध्वाचार्यः **जनानां कुतूहलं व्यधित किल** । सरिदन्तरदेशस्य 'इडेतुदे' इत्यपभ्रष्टसञ्ज्ञा ॥ ३८ ॥

(त.चं.) प्रसङ्गान्तरमाह– आयास्यन् । अन्तरं 'इडे'[ಇಡೆ] इत्युच्यते । सरित् 'तुदे'[ತುದೆ] इति । तेन सरिदन्तराख्यदेशम्, सुब्रह्मण्यक्षेत्रस्य समीपे विद्यमानं 'इडेतुदे'[ಇಡೆತುದೆ] इति नामकं ग्रामम् । सम्प्रति तु 'एर्कि' [ಎರ್ಕಿ] इति व्याहरन्ति ॥ ३८ ॥

दुर्मन्त्रैः खलपटलैः प्रचोद्यमानो
ग्रामेशो वृषळपतिः प्रहर्तुमेनम् ।
सम्प्राप्तस्तत उत यान्तमीक्षमाणः
प्रोद्यन्तं रविमिव विस्मितो ननाम ॥ ३९ ॥

(प.दी.) दुर्मन्त्रैरिति । **खलपटलैः** कर्तृभिः **दुर्मन्त्रैः** करणैः एनं श्रीमध्वाचार्यं **प्रहर्तुं** हन्तुं **प्रचोद्यमानः** प्रेर्यमाणः **ग्रामेशः** सरिदन्तरग्रामाधिपः **वृषळपतिः** एनं प्रहर्तुं **सम्प्राप्तः** सन् **तत उत** तस्माद् ग्रामात् **यान्तं** गच्छन्तं **प्रोद्यन्तं रविमिव ईक्षमाणः** पश्यन् **विस्मितो ननाम** ॥ ३९ ॥

(त.चं.) ततो निर्गमनसमये प्रवृत्तं प्रसङ्गमाह–दुर्मन्त्रैः । खलपटलैः । 'पटलं पेटकं चक्रं चक्रवाळं च मण्डलम्' इति च ॥ ३९ ॥

क्षेत्राग्र्यं त्रिभुवनवैद्यनाथनाथं
प्रस्थाय प्रचुरतरान्तरः प्रभावी ।

श्रीकृष्णामृतपरमार्णवाभिधानां
चक्रे सद्वचनततिं स्वभक्तभूत्यै ॥ ४० ॥

(प.दी.) क्षेत्रत्रयमिति । **प्रभावी** सामर्थ्यवान् **प्रचुरतरान्तरः** श्रीपूर्णप्रज्ञाचार्यः **त्रिभुवनवैद्यनाथनाथम्**, त्रिभुवने ये वैद्याः तेषां नाथो धन्वन्तरिः, स नाथः स्वामी यस्य तत् त्रिभुवनवैद्यनाथनाथम्, तत् **क्षेत्रत्रयम्**, 'इडय'[१] इत्यपभ्रष्टाख्यं ग्रामश्रेष्ठं **प्रस्थाय** गत्वा **स्वभक्तभूत्यै** तद्ग्रामस्थस्य स्वभक्तस्य 'इडेपाडित्ताय' इत्यपभ्रष्टाख्यद्विजवरस्य श्रेयसे । तस्य ज्ञानोपदेशायेत्यर्थः, **श्रीकृष्णामृतपरमार्णवाभिधानां** श्रीकृष्णामृतमहार्णवाख्यां **सद्वचनततिम्**, सतामप्रामाण्यदोषरहितानां प्रमाणीकृतपुराणादिगतानां वचनानां समूहं **चक्रे** । पुराणादिगतवचनसङ्ग्रहात्मकं ग्रन्थं चक्र इत्यर्थः ॥

(त.चं.) रामकुञ्जाद् सुब्रह्मण्यक्षेत्राद् वा उच्चभूतिं जनार्दनक्षेत्रं जिगमिषूणां मार्गमध्ये 'कोक्कड'[ಕೊಕ್ಕಡ] इति क्षेत्रमाप्यते । यत्र वैद्यनाथेश्वरः पूज्यते । स्वभक्तस्य 'इडेपाडित्ताय'[ಇಡೆಪಾಡಿತ್ತಾಯ]नाम्नो विप्रस्य भूत्यै श्रीकृष्णामृतमहार्णवाभिधानां सद्वचनततिं चक्रे ॥ ४० ॥

स ग्रामं परमपि यात उच्चभूतिं
विद्वांसः क्व कुहरकूपदर्दुराभाः ।
इत्यूचे मदमतिमानिनोऽखिलज्ञ-
म्मन्यस्य क्षपयितुमेव तज्जनस्य ॥ ४१ ॥

(भा.प्र.) उच्चस्य[२] 'उजेर्य' इत्यपभ्रष्टभाषा ॥

(प.दी.) स इति । **सः** श्रीमध्वाचार्यः **उच्चभूतिं** 'उजेर्य' इत्यपभ्रष्टनामकं **परं** अन्यं **ग्राममपि यातः** गतः सन् **अतिमानिनः** अत्यहङ्कारयुक्तस्य । अत

---

१. 'कोक्कड' इति वक्तव्यम् । 'इडय' इति लिपिकृत्प्रमादपतितं स्यात् ।

२. 'उच्चभूतेः' इति स्वरसम् ।

एव **अखिलज्ञम्मन्यस्य** आत्मानं सर्वज्ञं मन्यमानस्य **तज्जनस्य** तद्ग्राम-स्थस्य जनस्य **मदं क्षपयितुं** नाशयितुं **एव इत्यूचे** । कथम्? **कुहरकूपद-र्दुराभाः** अतिगम्भीरकूपगतमण्डूकसदृशाः **विद्वांसः** एतद्ग्रामगतविद्वांसः **क्व** कुत्र वर्तन्ते? किमिति मन्निकटं नाऽयान्तीति भावः ॥ ४१ ॥

(त.चं.) खण्डार्थनिर्णयाख्यस्य ग्रन्थस्य निर्माणकारणं प्रसङ्गं प्रस्तौति– स ग्रामम् । उच्चभूतिम् । तदानीं भाषायाम्, 'उजेर्य[ಉಜೆರ್ಯ] इति प्रथितं ग्रामम् । 'उजिरे'[ಉಜಿರೆ] इतीदानीन्तनाः ॥ ४१ ॥

सर्वज्ञोऽप्ययमधिकं न यज्ञभङ्गीं
संवित्ते यतिरिति बद्धनिश्चयोऽसौ ।
आभान्तं परिषदि मत्सरादपृच्छत्
कर्मार्थश्रुतिगहनार्थखण्डभावम् ॥ ४२ ॥

(भा.प्र.) 'छन्दसां वै षष्ठेनाह्नाऽऽप्तानां रसोऽत्यनेदत् । स प्रजापतिरबिभेत् पराङ्ङयं छन्दसां रसो लोकानत्येष्यतीति । तं पुरस्ताच्छन्दोभिः पर्यगृह्णात् । नाराशंस्या गायत्र्या रैभ्या त्रिष्टुभः' इत्यादि ॥

(प.दी.) सर्वज्ञ इति । **अयं** श्रीमध्वः **सर्वज्ञोऽपि यतिः**, हेतुगर्भविशेषणमेतत्, यतित्वादित्यर्थः, अयं सर्वज्ञोऽपि यतित्वाद् यज्ञानधिकारित्वात् **यज्ञभङ्गीं** यज्ञप्रकारं **अधिकं न संवित्ते** न जानाति **इति बद्धनिश्चयः असौ** जनः **परिषदि** सभायां **आभान्तं** शोभमानं श्रीमध्वाचार्यं **कर्मार्थश्रुतिगहनार्थ-खण्डभावम्,** कर्मपरा श्रुतिः कर्मार्थश्रुतिः, ब्राह्मणमित्यर्थः, पदसमन्वयपक्षे सर्वश्रुतीनां परममुख्यवृत्त्या ब्रह्मपरत्वेऽपि ब्राह्मणस्य वाक्यसमन्वयपक्षे भगवत्पूजार्थत्वेन कर्मपरत्वाभ्युपगमात् । तथाच कर्मार्थश्रुतौ बह्वृचब्राह्मणे विद्यमानस्य गहनार्थस्य दुर्विज्ञेयार्थस्य खण्डस्य– 'छन्दसां वै षष्ठेना-ह्नाऽऽप्तानां रसोऽत्यनेदत् । स प्रजिपतिरबिभेत् । पराङ्ङयं छन्दसां रसो

लोकानत्येष्यतीति । तं पुरस्ताच्छन्दोभिः पर्यगृह्णान्नाराशंस्या गायत्र्या रैभ्या त्रिष्टुभः' इत्यस्य खण्डस्यार्थं **मत्सरात् अपृच्छत्** । 'दुहियाचि–' इत्यादिना द्विकर्मकत्वम् ॥ ४२ ॥

(त.चं.) कर्मार्थश्रुतिगहनार्थखण्डभावम् । कर्मार्थाया ऐतरेय्याः श्रुतेः गहनार्थो यो खण्डस्तस्य भावं मत्सरादपृच्छत् । अप्रीतिर्मद्वशो नायमिति मत्सरः । तथाह्यैतरेये चात्वारिंशब्राह्मणे त्रिंशेऽध्याये षष्ठः खण्डः–

'छन्दसां वै षष्ठेनाह्नाऽऽप्तानां रसोऽत्यनेदत् । स प्रजापतिरबिभेत् । पराङ् अयं छन्दसां रसो लोकानत्येष्यतीति । तं पुरस्ताच्छन्दोभिः पर्यगृह्णात् । नाराशंस्या गायत्र्याः । रैभ्या त्रिष्टुभः । पारिक्षित्या जगत्याः । कारव्याऽनुष्टुभः । तत् पुनश्छन्दस्सु रसमदधात् । सरसैर्हास्य च्छन्दोभिरिष्टं भवति । सरसैश्छन्दोभिर्यज्ञं तनुते य एवं वेद' [ऐ.ब्रा.३०.६] । अयमर्थः– पृष्ठ्यषळहनामके क्रतुभेदे ब्राह्मणाच्छंसिना शंसनीयेषु शस्त्रमन्त्रेषु त्रिंशदृचं कुन्तापाख्यं खिलसूक्तं तृतीयम् । कुन्तापपठने हेतुरत्रोच्यते । पृष्ठ्यषळहस्य षष्ठेऽह्नि प्राप्तानां गायत्र्यादीनां छन्दसां रसः सारः अतिशयेन अनेदत् गलितोऽभूत् । तदा स भयरहितोऽपि प्रजापतिरबिभेदिव । किमिति? अयं छन्दसां सारः पराङ् विमुखो भूत्वा लोकानतिक्रम्य गमिष्यतीति । ततस्तं छन्दःसारं छन्दोभिर्गायत्र्यादिभिः पर्यगृह्णात् परिसञ्जग्राह । कथम्? नाराशंस्या गायत्र्याः सारं पर्यगृह्णात् । कुन्तापसूक्तगताभिः 'नराशंस स्तविष्यते' इति नराशंसपदघटिततया नाराशंसीभिः 'इदं जनाः' इत्यादिभिस्तिसृभिर्ऋग्भिः । 'वच्यस्व रेभ' इत्यादिभिस्तिसृभी रेभपदघटिततया रैभीभिस्त्रिष्टुभः सारं पर्यगृह्णात् । 'राष्ट्रे राज्ञः परिक्षितः' इति परिक्षित्पदघटिततया पारिक्षितीभिः 'राज्ञो विश्वजनीनस्य' इत्यादिभिश्चतसृभिर्जगत्याः सारं पर्यगृह्णात् । कारुपदघटिततया कारवीभिः 'इन्द्रः कारुम्' इत्यादिभिश्चतसृभिरनुष्टुभः सारं पर्यगृह्णात् । तत् तस्मात् नारा-

शंसीरैभीपारिक्षितीकारव्याख्यानां चतुर्दशसङ्ख्याकानामृचां शंसनात् छन्दस्सु पुनः सारमदधात् । य एवं वेद तेन सरसैश्छन्दोभिरिष्टं भवति । सरसैश्छन्दोभिर्यज्ञं च विस्तारयति स इति ॥ ४२ ॥

छन्दोभ्यश्च्युतरससङ्ग्रहप्रवीणान्
षष्ठेऽह्नि प्रतिविहितान् प्रजाधिपेन ।
नाराशंस्यचरमचारुमन्त्रभेदा-
नूचेऽसौ तमभिदधद् विसंशयांशः ॥ ४३ ॥

(प.दी.) छन्दोभ्य इति । **विसंशयांशः** विगतसंशयलेशः **असौ** श्रीमध्वः **तं** तत्पृष्टस्य खण्डस्यार्थं **अभिदधत्** वदन् । तत्र च 'नीवीव नर्देत् स हि तासां न्यूङ्खः' इत्यस्य वाक्यस्य 'यथा नीवी वस्त्रं सुधौतं विकासितं नर्देत् नादं करोति तथा नर्देत् । स हि तासां न्यूङ्खः' इत्यादि तस्यार्थं वदन्नित्यर्थः । **छन्दोभ्यः** छन्दसां सकाशात् **च्युतरससङ्ग्रहप्रवीणान्** निर्गतस्य रसस्य सङ्ग्रहे प्रवीणान् समर्थान् **प्रजाधिपेन** ब्रह्मणा **षष्ठेऽह्नि प्रतिविहितान्** विनियुक्तान् **नाराशंस्यचरमचारुमन्त्रभेदान्** । नाराशंस्यचरमाश्च ते चारुमन्त्रभेदाश्चेति नाराशंस्यचरमचारुमन्त्रभेदाः । नाराशंस्यादिनामकमन्त्रभेदा इत्यर्थः । तान् **ऊचे** । अयं भावः– 'छन्दसां वै षष्ठेनाह्ना–' इत्यस्य खण्डस्यार्थं कथयन्नेव 'नीवीव नर्देत्' इत्यादिविवक्षितमर्थं वदन् 'नाराशंस्या गायत्र्या रैभ्या' इत्यादेर्नाराशंस्यादिचारुमन्त्रभेदपरतामूच इति ॥ ४३ ॥

(त.चं.) एतमेवार्थमुत्तरपद्येन सङ्क्षिप्याऽह– छन्दोभ्यः । गायत्र्यास्त्रिष्टुभो जगत्या अनुष्टुभश्च च्छन्दोभ्यश्च्युतानां रसानां सङ्ग्रहे, सङ्गृह्य प्रत्याधाने च प्रवीणान्, पृष्ठ्यषळहस्य षष्ठेऽह्नि शंसनीयतया प्रजाधिपेन प्रजापतिना प्रतिविहितान् कुन्तापसूक्तगतान् मन्त्रविशेषानूचे । कीदृशान्? नाराशंसी ऋक्त्रयी अचरमा प्रथमा येषां तान् चारूंश्च मन्त्रविशेषान् । तदिदं कथं कुन्तापसूक्तम्? कुत्सितं दोषं दुष्टं वा तापयन्त्युद्वेजयन्तीति कुन्तापा

मन्त्राः । तेषामिदं सूक्तं भवति । कुत्सिततापको भगवानेव मुख्यतः कुन्तापः । कुं भूमिं तापयति सन्निहितः सवितरीति वा । कुन्तवदाप्नोति शत्रूनिति वा । तस्येदं सूक्तं भवति । कुत्सितं शरीरं तापयन्ति कृच्छ्रेण तपसा शोधयन्तीति कुन्तापाः क्रान्तदर्शिनो मुनयः । तेषामिदं सूक्तं भवति । त्रिंशदृचं कुन्तापसूक्तमृग्वेदखिलेषु पठ्यते । अथर्वसंहिताखिलेषु च सूक्तद्वयात्मना [२०.१२७-१२८] । तत्राऽऽद्याश्चतुर्दश मन्त्राः प्रथमं सूक्तम् । त एव चात्र समुल्लिखिताः । तथाहि तिस्रो नाराशंस्यः–

इदं जना उप श्रुत[1] नराशंस[2] स्तविष्यते ।
षष्टिं सहस्रा नवतिं च कौरव[3] आ रुशमेषु दद्महे ॥ १ ॥

उष्ट्रा यस्य प्रवाहिणो[4] वधूमन्तो द्विर्दश ।
वर्ष्मा रथस्य नि जिहीळते[5] दिव ईषमाणा उपस्पृशः ॥ २ ॥

एष इषाय[6] मामहे शतं निष्कान् दश स्रजः ।
त्रीणि शतान्यर्वतां सहस्रा दश गोनाम् ॥ ३ ॥

अथ किञ्चिदिव मन्त्रार्थः प्रस्तूयते । नराशंसः स्तविष्यते– इति प्रतृण्णम् । नरैराशंसनीयत्वान्नराशंसः । नरेषु स्तोतृषु स्थित्वा स्वयमेव स्वात्मानमाशंसतीति वा नराशंसः । स भगवानस्माभिः स्तोष्यते । तदिदं जना उपशृणुत । 'नाराशंसः स्तविष्यते' इति पाठे नराशंसोऽग्निर्यज्ञो वा । तत्र गतस्तदाराध्यो भगवान्नाराशंसः । 'उपश्रुतम्' इति पाठे सर्वैरुपश्रुतं यथा स्यात् तथोच्चकैः स्तोष्यते । अवधारणे वा बिन्दुः । कौ यज्ञभूमौ शस्त्रमन्त्राणां शंसितरि स्थितः स्वयं रौतीति कौरवोऽपि भगवानेव । 'वृषभो रोरवीति' इति श्रुतेः । कौ रुवन् रमत इति कौरम इत्याथर्वणाः । हे कौरव, एषु

---

१. 'उपश्रुतम्' इति काश्मीरपाठः । २. 'नाराशंस' इत्यप्याथर्वणः पाठः ।
३. 'कौरम' इति च । ४. 'प्रवाहणो–' इति च ।
५. 'जिहीषते' इति पैप्पलादाः । ६. 'ईषाय' इति कचित् ।'एष ऋषये' इति च ।

स्तुतिवचनेषु प्रोच्यमानेषु, एतन्निमित्तं वा, षष्टिं सहस्राणि नवतिं च रुशं दीप्तं रुग्ममादद्महे । भगवदनुग्रहेण लप्स्यामहे, ऋत्विग्भ्यो वा दास्यामः । षष्टिः संवत्सरा इति प्रतिवत्सरं सहस्राण्यक्षय्याणि रुग्माणि भवन्ति । नवतिरिज्याः प्रधानदेवताः । तथाहि– प्रधानवायुना सह पञ्चाशन्मरुतः, अष्टौ वसवः, एकादश रुद्राः, विष्णुं विहायैकादशाऽदित्याः, नव प्रजापतयो ब्रह्मा चेति नवतिर्देवाः । तैः प्रत्येकं दत्ता नवतिश्च रुग्मभाराणां भवति ॥

उष्ट्राः क्रमेलका वृषभा वा । उष्ट्रीभिः सहिता विंशतिरुष्ट्राः यस्य रुग्मस्य रथस्य वा वाहकाः, तस्य रथस्य वर्ष्माणि नि जिहीळते वोढुं निराकुर्वन्ति । 'जिहीषते' इति पाठेऽपि स एवार्थः । कीदृशस्य रथस्य? रुग्मभारेण दिवो द्योतमानस्य । कीदृशाः उष्ट्राः? उपस्पृशः दीर्घग्रीवतया मुखमुन्नमय्य उपरिभागं स्पृशन्तो गगनं पिबन्त इव ईषमाणा धावन्तः । तदिमे आदिमे ऋचौ बृहतीबद्धौ [८+८+१२+८ =३६] । अन्त्या पङ्क्तिः । अन्या अनुष्टुभः ॥ २ ॥

एष इषाय अभीष्टदानाय प्रभुरिति मन्यामहे । 'एष ऋषये' इति पाठे ऋषये ज्ञानिने सर्वेष्टद इति मन्यामहे । 'छिन्द्यां स्वबाहुमपि वः प्रतिकूलवृत्तिम्' इति हि भागवते । किं तदभीष्टम्? शतं प्रभूतान् निष्कान् सुवर्णपणान्, दश प्रभूताः सुवर्णस्रजः, अश्वानां त्रीणि शतानि, गवां च दश सहस्राणि च तेन मन्महे । तदेवं बृहतीभ्यामनुष्टुभा च स्तुतो नराशंसो वासुदेवो गायत्र्या रसं सञ्जहार ॥ ३ ॥

एतास्तिस्रो 'नराशंस स्तविष्यते' इति नराशंसपदघटिता नाराशंस्यः । अथ तिस्रो रैभ्यः–

वच्यस्व रेभ वच्यस्व वृक्षे न पक्वे शकुनः ।
[१]नष्टे जिह्वा चर्चरीति क्षुरो न भुरिजोरिव ॥ ४ ॥

---

१. 'निष्टे' इति का.पाठः । 'ओष्ठे' इति कश्चित् ।

प्र रेभासो मनीषया[१] वृथा गाव इवेरते ।
अमोत पुत्रका एषामु मोदका[२] उपासते ॥ ५ ॥

प्र रेभ धियं[३] भरस्व गोविदं वसुविदम् ।
देवत्रेमां वाचं [४]शृणीहीषुर्नो वीरस्तारम्[५] ॥ ६ ॥

रे रेभ रे स्तोतः, पक्वफले वृक्षे पिक इव मधुरं वच्यस्व स्तुहि । छन्दसां रसे नष्टे तदाधानाय भगवन्तं स्तोतुं ते जिह्वा चर्चरीति अधिकं चञ्चला भवति । कथमिव? क्षुरो न भुरिजोरिव । नापितस्य भुरिजोः बाह्वोः स्थितः क्षुर इव । 'निष्टे' इति पाठे ते जिह्वा निश्चयेन चर्चरीति । 'ओष्ठे' इति पाठे स्फुटोऽर्थः ॥ ४ ॥

वृथा निष्कारणं फलकामनां विना, गाव इव पुङ्गवा इवाभीष्टवर्षणपटवो गभीरनादा रेभासः स्तोतारः मनीषया प्रज्ञापूर्वकं प्र ईरते स्तोतुं प्रवर्तन्ते । 'मनीषा' इति पाठेऽपि समानोऽर्थः । एषां पुत्रका उत तनया अपि, शिष्या अपि वा, अमा सहैव स्तोतुमुप आसते तेषां समीपे तिष्ठन्ति, तेन तेषां मोदकाः सन्तः । 'अमोत गा इवाऽसते' इति पाठे महद्भिर्वृषैः सहाणवो गावस्तर्णका यथाऽऽसते तथेत्यर्थः । प्रधानर्त्विग्भिः सह पुत्रस्थानीयाः सहायका ऋत्विजो वा ॥ ५ ॥

हे स्तोतः, इषुर्न इषुरिव,लक्ष्यवेधे दर्शितपाटवः, त्वं तादृशीं धियं वीरः आ समन्तात् प्रभरस्व । याऽस्माकं गा वसूनि च वेदयति प्रापयति । 'धीम्' इति पाठेऽपि समानोऽर्थः । देवत्र देवेषु इमां स्तुतिरूपां वाचं तारमुच्चकैः शृणीहि विध्य । 'शरो ह्यात्मा ब्रह्म तल्लक्षमुच्यते । अप्रमत्तेन वेद्धव्यम्–'

१.'मनीषा' इत्याथर्वणः पाठः । २.'एषाममोत गा इवासते' इति च ।'एषाममोत गा उपासते' इति क्वचित् । ३.'धीम्' इति च । ४.'श्रीणीहीषु–' इति च । ५.'वीरास्तारम्' इति काश्मीरपाठः ।

इति हि श्रुतिः । 'श्रीणीहीषुः' इति पाठे प्रसादयोग्यपरिपाकवतीं कुरु । शॄञ् हिंसायाम् । श्रीञ् पाके । तदेवं तिसृभिरनुष्टुब्भिः स्तुतो रैभ्योऽनिरुद्धस्त्रिष्टुभो रसं सञ्जहार ॥ ६ ॥

एतास्तिस्रो 'वच्यस्व रेभ वच्यस्व' इति रेभपदघटिता इति रैभ्यः । अथ पारिक्षित्यश्चतस्रः–

राज्ञो विश्वजनीनस्य यो देवो मर्त्याँ अति ।
वैश्वानरस्य सुष्टुतिमा सुनोता[१] परिक्षितः ॥ ७ ॥

[२]परिक्षिन्नः क्षेममकरत् तम आसनमासरम्[३] ।
[४]अराय्यं कुर्वन् कौरव्यः पतिर्वदति जायया ॥ ८ ॥

कतरत् त आ हराणि दधि मन्थां३ परिस्रुतम्[५] ।
[६]जाया पतिं वि पृच्छति राष्ट्रे राज्ञः परिक्षितः ॥ ९ ॥

अभीव स्वः प्र जिहीते यवः पक्वः पथो[७] बिलम् ।
जनः स भद्रमेधते[८] राष्ट्रे राज्ञः परिक्षितः ॥ १० ॥

परिक्षितः विश्वं परिक्षपयतः, हृदयकमले निवसतः, सर्वत्र परिगतस्य वा । परित ईक्षत इति सर्वद्रष्टुर्वा । परीक्षिदेव परिक्षित् । 'सर्वेक्षणात् परो विष्णुः परीक्षिदिति कीर्तितः' इति हि स्मरन्ति । राज्ञो दीप्तस्य भक्तरञ्जनस्य वा, विश्वजनहितस्य, अत एव वैश्वानरस्य विश्वजीवान्तरस्य नारायणस्य सुष्टुतिमा सुनोत प्रेरयत । यो देवः सर्वान् मर्त्यान् क्षरजीवानतीत्य वर्तते । 'शृणोता' इति पाठे– इमां सुष्टुतिमाशृणुत ॥ ७ ॥

---

१. 'शृणोता' इति क्वचित् ।
२. 'परिच्छिन्नः क्षेममकरोत्' इति च ।
३. '–चरन्' इति च ।
४. 'कुलायं कृण्वन्' इति च ।
५. 'परिश्रुतम्' इति च ।
६. 'जायाः पतिम्' इति च ।
७. 'परो–' इति क्वचित् ।
८. 'भद्रमेधति' इति च ।

यजमानः स्वजायया सह सम्भाषमाण एवं वदति। किमिति? कौ यज्ञभूमौ क्रियमाणः रवः वेदघोषः कौरवः। तेन स्तूयमानः कौरव्यः परिक्षिन्नारायणः। 'परिच्छिन्नः' इति पाठे परिच्छिन्नेनाणीयसा रूपेण हृदि साक्षात्कृतो नारायणः। आसनं सर्वतो निरासकं आ समन्तात् प्रसृतं नस्तमः अराय्यं अनुपद्रवदं कुर्वन् नः क्षेममकरोदिति। करोत्विति वा। 'आसनमाचरन् कुलायं कृण्वन्' इति पाठे– सर्वतो निरासकं तम आचरन् नाशयन्। चर गतिभक्षणयोः। आसनमाचरन् आसनवदधःपातयन् वा। तथा कुलायं कुत्सितलयोपेतं कुर्वन् इत्यर्थः ॥ ८ ॥

राज्ञः परिक्षितो राष्ट्रे यज्ञभूमौ यजमानजाया पतिं विविधं पृच्छति। किमिति? मन्थम्मन्थं परिस्रुतम्, मन्थानं परितः स्रुतं वा, कतरद् दधि त आहराणीति। गव्यसमृद्धिः सर्वां समृद्धिमुपलक्षयति। 'मन्थां परिश्रुतम्' इत्याथर्वणपाठेऽपि 'मथनजातं परिस्रुतम्' इत्येवार्थः। तृतीयोऽतिशये। 'जायाः' इत्यपि बहुवचनमाद्यर्थे। जायाद्याः स्त्रियो विविधं पृच्छति पृच्छन्ति। पृच्छा सर्वासामपि समृद्ध्येकविषयेत्येकवचनम् ॥ ९ ॥

यो राज्ञः परिक्षितो राष्ट्रे भवति स जनो भद्रमेधते। यस्य राष्ट्रे वासमिच्छन् जनः स्वर्गमप्यभितः प्रजिहीत इव त्यजतीव। नेच्छतीत्येतत्। अत्र भगवद्भक्तानामधिकसाहचर्यलाभात्। यत्र समृद्धः पक्वो यवः। आहारसमृद्धिरित्येतत्। समृद्धः सञ्चारपथः। विहारसमृद्धिरित्येतत्। समृद्धं बिलं सम्पन्निगूहनस्थानं च। सुरक्षिततेत्येतत्। पथः सञ्चारमार्गादापदि निगूहनार्थं बिलमिति वा। 'परो बिलम्' इति पाठे परः श्रेष्ठः समृद्ध इति स्फुटम्। तदेवं चतसृभिरनुष्टुब्भिः स्तुतः परिक्षित् सङ्कर्षणो जगत्या रसं सञ्जहार ॥

एताश्चतस्रः 'आ सुनोता परिक्षितः' इति परिक्षित्पदघटिततया पारिक्षित्यः।

अथ कारव्यश्चतस्रः–

इन्द्रः कारुमबूबुधदुत्तिष्ठ वि चरा चरन्[१] ।
ममेदुग्रस्य चर्कृतिः[२] सर्व इत् ते पृणादरिः ॥ ११ ॥

इह गावः प्र जायध्वमिहाश्वा इह पूरुषाः ।
इहो सहस्रदक्षिणो वीरस्त्राता नि षीदतु[३] ॥ १२ ॥

[४]मेमा इन्द्र गावो रिषन्मो आसां गोपती रिषत्[५] ।
मासाममित्रयुर्जन इन्द्र मा स्तेन ईशत ॥ १३ ॥

[६]उप वो नर एमसि सूक्तेन वचसा वयं भद्रेण वचसा वयम् ।
[७]वनो दधिष्व नो गिरो न रिष्येम कदा चन ॥ १४ ॥

इन्द्रः परमेश्वरो नारायणः कारुं यज्ञकर्तारमबोधयत्। किमिति? उत्तिष्ठ जागृहि। कर्तव्यं कर्माऽचरन् विचर विहर। 'विचरा जनम्' इति पाठे – विहितं चरेति कारुं जनमबूबुधदित्यन्वयः। 'जरन्' इति पाठे– आयुर्जरयन् विचर। येनाहं प्रीतः स्याम्। एवमकुर्वति त्वय्यहमुग्रः स्याम्। मम पुनरुग्रस्य चर्कृतिः कर्मेदम्। येन ते सर्वोऽप्यरिवर्गः पृणात् सन्तुष्येत् ॥

हे गावः, इहास्मद्गृहे प्रजायध्वम्। हे अश्वाः, हे पूरुषाः, यूयमपीह प्रजायध्वम्। इह सहस्रदक्षिणो वीरस्त्राता यजमानोऽपि सुखं निषीदतु। भगवान् वा निषीदतु। 'सहस्रदक्षिणोऽपि पूषा निषीदति' इति पाठे, पूषा सम्पत्पुष्टो यजमानः पूर्णो वा भगवान् ॥ १२ ॥

हे परमेश्वर, इमा गावो मा रिषन् मा नाम नशन्। आसां गोप्ता यजमानश्च

---

१. 'जनम्' इति च। 'जरन्' इति क्वचित्। २. 'चर्कृधि' इति च।
३. '–दक्षिणोऽपि पूषा निषीदति' इति च।
४. 'नेमा–' इति काश्मीरपाठः। आथर्वणिकानां च।
५. 'गोप रीरषत्' इति च।
६. 'उप नो न रमसि' इति च। 'उप नरं नोनुमसि' इति क्वचित्।
७. 'वना दधिष्व' इति च।

मा रिषत् मा नशत् । आसाममित्रेण सङ्गतोऽपि जनः शत्रुपक्षपाती मा ईशत मा ईशिष्ट, आसां हिंसने मा भूत् समर्थः । हे परमेश्वर, मा च स्तेन ईशिष्ट । तदेवं तिसृभिरनुष्टुब्भिः स्तुत इन्द्रः प्रद्युम्नोऽनुष्टुभो रसं सञ्जहार ॥ १३ ॥

व इतिचतूरूपो नारायणः स्तूयते चतुर्णामपि च्छन्दसां सवीर्यत्वाय । नरो मनुष्या वयं युष्माकं शरणमुपगताः, सूक्तेन च भद्रेण च स्तुतिवचसा । 'उप नरं नोनुमसि' इति पाठे नरं नाशरहितं चतूरूपं नारायणं नोनुमः । 'उप नो न रमसि' इति पाठे नः न उपरमयसि, उपरतान् न करोषि । न कुरु वा । सदा त्वत्पूजारतान् कुरु । येन सूक्तेन वचसा वयं त्वां स्तूयामेत्यध्याहारः । नो गिरः चनः सुखं यथा स्यात् तथा दधिष्व हृदि धारय । चनो दधिष्व मनसि धारयेति वा । 'वना दधिष्व' इत्याथर्वणपाठे वननीया नो गिरो दधिष्व । यथा वयं कदाऽपि त्वदनुग्रहेण न नश्येम । 'बुद्धिनाशाद् विनश्यति' इति ह्युक्तम् ॥ १४ ॥

एताश्चतस्रः 'इन्द्रः कारुमबूबुधत्' इति कारुपदघटिता इति कारव्यः । एवं कुन्तापसूक्तगतांश्चतुर्दशमन्त्रभेदान् निःशङ्कमूचे तं खण्डार्थमभिदधदिति । तदा यथाकथञ्चित् तं विजेतुकामो विपक्षसङ्घः तस्मिन्नेव खण्डे उपरिष्टात् पठ्यमानस्य 'न तासु न्यूङ्खयेत् । नीवीव नर्देत् स हि तासां न्यूङ्खः' इति वाक्यस्यार्थं पप्रच्छ । मध्वस्तदर्थमपि सपदि विववार । तद् यथा– तासु नाराशंसीषु पठ्यमानासु न्यूङ्खं न कुर्यात् । किन्तु नीवी यथा नर्दति तथा नर्देत् । तदेव नाराशंसीनां न्यूङ्खस्थानीयमिति । का नीवी? कटिबन्धनं वस्त्रम् । निवीयत इति नीवी । वेञ् तन्तुसन्ताने । वैयाकरणास्तु व्येञ् संवरण इत्यतो यलोपेन नीवीपदं निर्वदन्ति । यथा सुधौतं विकासितं वस्त्रं पटपटायते तद्वन्नाराशंसीः पठेदिति । न्यूङ्खकरणमिति किमुच्यते? आश्वलायन उवाच– 'द्वितीयं स्वरमोकारं त्रिमात्रमुदात्तं त्रिः । तस्यतस्य चोपरिष्टादपरिमितान् पञ्च वाऽर्धौकाराननुदात्तान् । उत्तमस्य तु त्रीन्' इति । अयमर्थः– अर्धर्चयोर्यो द्वितीयः स्वरः संहितावस्थायां तमोकारं

त्रिमात्रमुदात्तं कृत्वा त्रिः ब्रूयात् । तस्यतस्यौकारस्योपरिष्टादर्धौकारान-नुदात्तानपरिमितान् त्रीन् चतुरः पञ्च वा ब्रूयात् । अर्धश्चासावोकार-श्चेत्यर्धौकारः । उत्तमस्यौकारस्योपरिष्टात् त्रीनेवार्धौकारान् ब्रूयात् । तदिदं निदर्शनं भवति– 'आपो३उउउउउ ओ३उउउउउ ओ३उउउश्च स्थः स्वपस्य पत्नीः सरस्वती तद् गृणते' इत्यादि । अत्र उकाराकारेण ये दर्शिता-स्तेऽर्धौकारा इति बोध्यम् । कर्णाटकभाषायामर्धौकारः स्फुटं व्यवह्रियते 'ೞ' इति । वैयाकरणा अप्याहुः-' न्युङ्खा ओङ्काराः षोडश' इति । न्यूङ्ख इति न्युङ्ख इति चानर्थान्तरम् । ओङ्कारा इत्योकाराः । अर्वाचीनास्तु 'नी वी व नर्देत् स हि तासां न्यूङ्खः' इत्येतदन्यथा व्याचक्षते– 'नी इति दीर्घः सांहितः । नि वि इव इति पदपाठः । नि इव नर्देत् वि विशेषेण निनर्दमेव कुर्यात्' इति । निनर्दशब्दार्थं चाऽहुः– 'तृतीयपादस्य प्रथमाक्षरमनुदात्तत्वेन द्वितीयाक्षरमुदात्तत्वेनोच्चारयेदिति यदस्ति सोऽयं निनर्दः' इति ॥ ४३ ॥

पाण्डित्यं परममवेत्य तस्य तादृक्
सङ्घर्षक्षुभितमना विपक्षसङ्घः ।
नार्थः स्यादयमिति वर्णयन्नथ त्वं
तं ब्रूहीत्युरुमतिनेरितोऽद्रवद् द्राक् ॥ ४४ ॥

(भा.प्र.) तत्र **'नीवीव नर्देत् स हि तासां न्यूङ्खः' इत्यस्य 'यथा नीवी वस्त्रं सुधौतं विकासितं नर्देत् तथा नर्देत् । स एव हि तासां न्यूङ्खः' इति भगवदुक्तं श्रुत्वा निर्हेतुकं नेत्युक्तवान् । तेन पृष्टः स्वयमविद्वानपागमत् ॥**

(प.दी.) पाण्डित्यमिति । 'छन्दसां वै षष्ठेनाह्ना–' इत्यादेरर्थकथनेन 'नीवीव नर्देत्' इत्यत्र नीवीशब्दस्य तदुक्तमर्थं श्रुत्वा **तस्य तादृक्** तादृशं **परमं पाण्डित्यं अवेत्य** अपि **सङ्घर्षक्षुभितमनाः** सङ्घर्षात् वादविवादरूप-मथनेन क्षुभितमनाः सङ्क्षोभितचित्तः **विपक्षसङ्घः** अयं भवद्भिरुदीरितः **अर्थः**

न स्यात् इति वर्णयन् निर्हेतुकं वदन्, अथ एवं तर्हि त्वं तं तस्य खण्डस्यार्थं ब्रूहि इत्युरुमतिना श्रीपूर्णप्रज्ञाचार्येण ईरितः द्रागद्रवत् ॥ ४४ ॥

(त.चं.) अद्रवत् स्वयं तदर्थवर्णनेऽसमर्थः ॥ ४४ ॥

सोऽपृच्छत् तमथ महाह्वयोपसर्गा
यत्रोक्ता मनुचरणोपसृज्यरूपाः ।
तस्यार्थं वचनचयस्य तं ब्रुवाणः
स्थैर्यार्थं सपदि स लेखयाम्बभूव ॥ ४५ ॥

(भा.प्र.) 'महानाम्नीनामुपसर्गानुपसृजति' इत्यादिखण्डस्य ॥

(प.दी.) **स** इति । **सः** विपक्षसङ्घः **अथ** पुनरागत्य **तं** श्रीमन्मध्वं **तस्य** खण्डस्य **अर्थमपृच्छत्** । **यत्र** यस्मिन् खण्डे **महाह्वयोपसर्गाः** महाह्वयानां महानाम्नीनामृचाम्–'विदा मघवन् विदा गातुमनुशंसिषो दिशः । शिक्षा शचीनां पते पूर्वीणां पुरूवसो' इत्यादीनामुपसर्गा अवयवाः 'प्रचेतन । प्रचेतय । आयाहि पिब मत्स्व । क्रतुच्छन्द ऋतं बृहत् । सुम्न आधेहि नो वसो' इति पञ्चावयवाः । **मनुचरणोपसृज्यरूपाः** । मनुचरणैः ऋङ्मन्त्रपादैः सह– 'अधत्तान्यं जठरे प्रेमरिच्यत । दाता राधः स्तुवते काम्यं वसु । अस्माकं बोधि चोदिता । तं त्वा परिष्वजामहे । या ते रातिर्ददिर्वसु' इत्यन्तैः पञ्चभिर्मनुचरणैः सह उपसृज्यरूपाः संयोजनीया **उक्ताः** इत्यर्थः । तत्संयोजनप्रकारश्च श्रीमध्वाचार्यैः खण्डार्थाख्यप्रकरणे स्वयमेवोक्तः । तथाहि– 'अधत्तान्यं जठरे प्रेमरिच्यत प्रचेतन । दाता राधः स्तुवते काम्यं वसु प्रचेतय । अस्माकं बोधि चोदिताऽऽयाहि पिब मत्स्व । तं त्वा परिष्वजामहे क्रतुच्छन्दऋतं बृहत् । याते रातिर्ददिर्वसु सुम्न आधेहि नो वसो' इति यथाक्रमं पञ्चाह्वयोपसर्गाणां पञ्चभिर्मनुचरणैः सह संयोजनप्रकारः प्रदर्शितः । एवं च **तस्य** तैः पृष्टस्य–'महानाम्मीनामुपसर्गानुपसृजति' इत्यादेः **वचनचयस्य तमर्थं ब्रुवाणः सः** श्रीमध्वः **स्थैर्यार्थं** अव्युच्छेदेन लोके

प्रचयगमनार्थं **सपदि लेखयाम्बभूव** । महतो विष्णोरिन्द्रादिनाम यास्वृक्षु विद्यन्ते ता महानाम्न्य इति विग्रहः ॥ ४५ ॥

(त.चं.) स्थैर्यार्थं विपक्षपराजयस्थैर्यार्थं खण्डार्थप्रचयार्थं च लेखयाम्बभूव । स एव खण्डार्थनिर्णयो नाम ग्रन्थः 'महानाम्नीनामुपसर्गानुपसृजति' [ऐ.ब्रा.१६.४] इत्यादि खण्डार्थनिर्णयात्मकः । यं कर्मनिर्णय इति चाभिदधति । खण्डार्थस्तत एवावगन्तव्यः ॥ ४५ ॥

सम्पूर्णं शशिनमिवोदितं कृशः श्वा
चुक्षोभाशुभनिकरो निरीक्ष्य मध्वम् ।
प्रत्यर्थी स्वयमिति दूरवोऽभिधावन्
किं तेन क्षतममृताकरस्य तस्य ॥ ४६ ॥

(भा.प्र.) अमृतं मोक्षश्च ॥

(प.दी.) **सम्पूर्णमिति । अशुभनिकरः मध्वं निरीक्ष्य चुक्षोभ** । 'क्षुभ सञ्चलने' इति धातुः । पराभूतः सन् नष्टधैर्योऽभूदिति भावः । क इव? **कृशः श्वा** दुर्बलः सारमेयः **सम्पूर्णं उदितं शशिनं** दृष्ट्वा इव । किं कुर्वन्? **स्वयं प्रत्यर्थी इति** स्वयं श्रीमध्वस्य प्रत्यर्थीति कृत्वा **दूरवः** दुर्ध्वनिविशिष्टः **अभिधावन्** । **अमृताकरस्य** मोक्षाकरस्य, सकलसज्जनानां मोक्षप्रदस्येत्यर्थः, **तस्य** श्रीमध्वाचार्यस्य **तेन** तेषामशुभाजनानां क्षोभेण दुष्टेन कळकळध्वनिनाऽभिगमनेन च **किं क्षतम्?** किं क्लिष्टम्? **अमृताकरस्य** अमृतमयकिरणानामाकरस्य शशिनः शुनां वाशितेनेव ॥ ४६ ॥

(त.चं.) दुष्टरवो दूरवः । तद् यथा श्वा चन्द्रस्य स्वयं प्रत्यर्थीति मन्वानो भषमाणोऽभिधावति ॥ ४६ ॥

निःस्वानां कतिपयभुक्तियुक्तभक्तं
भक्तानां व्यधित चतुर्गुणं दयालुः ।

भुङ्क्ते स्म त्रिदशनरोपभोग्यमन्नं
सम्प्रीत्यै स धनवतां बृहत्प्रबोधः ॥ ४७ ॥

(प.दी.) **निःस्वानामिति** । **दयालुः सः बृहत्प्रबोधः निःस्वानां** निर्धनानां **भक्तानां कतिपयभुक्तियुक्तभक्तं** कतिपयजनानां भुक्त्यै भोजनाय युक्तं भक्तं **अन्नं चतुर्गुणं व्यधित** । **धनवतां** भक्तानां **सम्प्रीत्यै त्रिदशनरोपभोग्यं** त्रिंशत्पुरुषैर्भोग्यं **अन्नं भुङ्क्ते स्म** बुभुजे ॥ ४७ ॥

(त.चं.) महिमान्तरमाह– **निःस्वानाम्** । 'अन्धः क्रूरं भक्तं दीदिविरन्नं तथौदनं भिक्षा' इति च । 'तथौदनं भिस्सा' इति च पठन्ति ॥ ४७ ॥

वृष्ट्यादेः स नियमनादि चक्र एत-
च्चित्रं किं भुवननियामके समीरे ।
अप्येवं भुवनगुरोः कृतानुवादः
कृत्येषु प्रवर इतीह वर्णयामः ॥ ४८ ॥

(प.दी.) वृष्ट्यादेरिति । **सः** श्रीमध्वः **वृष्ट्यादेः नियमनादि चक्रे** । **भुवननियामके समीरे एतत्** वृष्ट्यादिनियमनं **किं चित्रम्**? किमाश्चर्यम्? **एवमपि भुवनगुरोः** श्रीमध्वस्य **कृतानुवादः** चरितानुवादः **कृत्येषु** तदितरसमस्तव्यापाराणां मध्ये **प्रवरः इति** इत्येवं **इह वर्णयामः** ॥ ४८ ॥

(त.चं.) कृतस्य विहितस्य कर्मणोऽनुवादः कृत्येषु प्रवर इति हेतोः ॥

इत्यूचे धरणिसुरेण केवलं नो
माध्वीयं विविधकथा कथासु मान्या ।
साक्षादप्यमरवरैरुदीर्यमाणा
गन्धर्वैर्द्युसदसि तन्मुदे जगेऽसौ ॥ ४९ ॥

(प.दी.) इतीति । **कथासु** विविधकथानां मध्ये **मान्या माध्वी** श्रीमध्व-

सम्बन्धिनी इयं विविधकथा केवलं धरणिसुरेण ब्राह्मणेन इत्यूचे इति नो । किन्तु अमरवरैरपि साक्षादुदीर्यमाणा असौ माध्वी कथा द्युसदसि स्वर्गसभायां[१] तन्मुदे अमरवराणां मुदे गन्धर्वैः जगे अगीयत ॥ ४९ ॥

(त.चं.) गन्धर्वैर्द्युसदसि । उक्तं हि– 'भाति गन्धर्वगीतं प्रत्येकं देवसंसत्स्वपि तव भगवन् नर्तितद्योवधूषु' इति ॥ ४९ ॥

तां पद्यप्रणिगदितां तु मूर्छयित्वा
तानानामुचिततयाऽऽत्तपञ्चमाद्याः ।
गान्धारं द्युविषयमुज्ज्वलं सृजन्तो
ग्रामं ते प्रजगुरकाकिकम्रकण्ठाः ॥ ५० ॥

(भा.प्र.) मूर्छयित्वा स्वरविकासानामादिं कृत्वा । आदिस्वरावस्था मूर्छनेत्यभिहिता । तानानामुचिततया असङ्करत्वेन । गानाद् गानान्तरप्राप्तिस्तानम् । एकैकधनुर्मण्डलमात्रं श्रुतिः । पञ्चमाद्याः स्वराः ।

'द्वेद्वे निषादगान्धारौ त्रिश्रुती धैवतर्षभौ ।
'चतुःश्रुतय उद्दिष्टाः षड्जमध्यमपञ्चमाः' इति ।

सरिगमपधनि इति क्रमः । श्रुतिसमुदायो ग्रामः । 'षड्जग्रामो मध्यमग्रामो गान्धारग्रामः' इति त्रिविधो ग्रामः । तत्र गान्धारस्तु द्युविषय एव ।

'सप्त स्वरास्त्रयो ग्रामा एकविंशतिमूर्छनाः ।
'तानान्येकोनपञ्चाशदेतद् गानस्य लक्षणम्' इति च ।
'काकिश्च तुम्बुरुश्चैव कण्ठदोषौ प्रकीर्तितौ' इति च ॥

(प.दी.) तामिति । ते गन्धर्वाः **पद्यप्रणिगदितां** पद्यरूपेण देवैरुक्तां विरचितां **तां** माध्वीं कथां **प्रजगुः** । कथम्भूताः? **अकाकिकम्रकण्ठाः** काकिरहितत्वेन रमणीयस्वरयुक्तकन्धराः । काकिरिति कण्ठदोषः । 'काकिश्च

---
१ कोशेषु 'द्युसदःसु स्वर्गसभासु' इति पठ्यते ।

तुम्बुरुश्चैव कण्ठदोषौ प्रकीर्तितौ' इत्यभिधानात्। किं कृत्वा प्रजगुः? **मूर्छयित्वा** तत्तत्स्वरविकासानामादिं कृत्वा। 'आदिः स्वरविकासो मूर्छना' इति हि। **तानानां** गानाद् गानान्तरप्राप्तीनां **उचिततया** असङ्करत्वेन **आत्तपञ्चमाद्याः** गातुमिष्टतयाऽङ्गीकृपञ्चमादिस्वराः। 'गानाद् गानान्तरप्राप्तिस्तानम्' इति। 'निषादर्षभगान्धारषड्जमध्यमधैवताः। पञ्चमश्च' इति सप्त स्वराः। पुनः कथम्भूताः? **द्युविषयं** स्वर्गलोकविषयं **उज्ज्वलं गान्धारं ग्रामं उत्सृजन्तः**[१] उच्चैः सृजन्तः, प्रकटयन्त इत्यर्थः। ग्रामो नाम श्रुतिसमुदायः। एकधनुर्मण्डलमात्रव्यापी स्वरः श्रुतिरित्युच्यते। तत्र निषादगान्धारयोर्द्वेद्वे श्रुती। धैवतर्षभयोस्तिस्रस्तिस्रः श्रुतयः। षड्जमध्यमपञ्चमानां चतस्रश्चतस्रः श्रुतयः। तथाचोक्तं गानलक्षणे– 'द्वेद्वे निषादगान्धारौ त्रिश्रुती धैवतर्षभौ। चतुःश्रुतय उद्दिष्टाः षड्जमध्यमपञ्चमाः' इति। तत्र षड्जग्रामो मध्यमग्रामो गान्धारग्राम इति त्रिविधो ग्रामः। तत्र च गान्धारस्तु द्युविषय एव। 'सप्त स्वरास्त्रयो ग्रामा एकविंशतिमूर्छनाः। तानान्येकोनपञ्चाशदेतद् गानस्य लक्षणम्' इति। अकाकिकम्रकण्ठाः द्युविषयमुज्ज्वलं गान्धारं ग्राममुत्सृजन्तः तानानामुचिततया आत्तपञ्चमाद्याः ते गन्धर्वाः मूर्छयित्वा तां प्रजगुरिति योजना ॥ ५० ॥

(त.चं.) कथं जगे?– तां पद्यप्रणिगदिताम्। पद्यबद्धां तां माध्वीं कथां मूर्छयित्वा। स्वराणामूर्ध्वमुच्छ्रयणाद् विकसनं मूर्छना। तां निष्पाद्य। ततस्तानानामुचिततया आत्तपञ्चमाद्याः। परस्परस्वराणां तननात् तानानि। 'रागं तानं' इति भाषायामपि। तेषामसङ्कीर्णतया स्वरसाङ्कर्यमृते असम्पृक्ततया गानार्थमात्तपञ्चमादिस्वराः। द्युविषयं स्वर्गलोक एव प्रचलितं गान्धाराख्यं विशिष्टश्रुतिसमुदायं व्यञ्जयन्तः प्रजगुः। अकाकितया कमनीयकण्ठाः। कमनीयगाना इत्यर्थः। 'काकिश्च तुम्बुरुश्चैव कण्ठदोषौ' इति भावप्रकाशिका। कः काकिकण्ठः? काकस्वरवान्। तथाहि तल्लक्षणम्–

---

१. मूले निरुपसर्गं 'सृजन्तः' इतीयदेव पठ्यते–'द्युविषयमुज्ज्वलं सृजन्तः' इति।

'कण्ठस्थाननिष्पीडनेन गानं काकस्वरम्' इति । अथ कस्तुम्बुरुस्वरः? शिरसिगतं गानं तुम्बुरुस्वरमित्याहुः । तथाहि तल्लक्षणम्– 'अत्युच्चैरपरिपूर्णं गानं शिरसि गतम्' इति । अत्युच्चैरित्यतितारस्थायि ।

अत्रेयं परिभाषा– षड्ज-ऋषभ-गान्धार-मध्यम-पञ्चम-धैवत-निषादाः क्रमेण सप्त स्वराः । तथाहि नारदीयशीक्षायाम्–

'षड्जश्च ऋषभश्चैव गान्धारो मध्यमस्तथा ।
'पञ्चमो धैवतश्चैव निषादः सप्तमः स्वरः' इति ।

त एव स रि ग म प ध नि इति सङ्केतिताः । तत्र गीतिष्वाधारतया षड्जः पञ्चमश्चोपयुज्येते । आधारस्वरसमाहारः श्रुतिः । सप्त मरुतः स्वकीयं धनुराकारं तन्त्रीमण्डलवाद्यमवादयन् । तेन सप्तस्वरमूला श्रुतिरुत्पन्नेत्याभाणकम् । तेन षड्जपञ्चमौ प्रकृतिस्वरावभिधीयेते । न क्वापि विकृतिमापद्येते इति । ऋषभगान्धारौ धैवतनिषादौ त्रिधात्रिधा विक्रियन्ते । मध्यमश्च द्विधा । तेन रिगमधनि पञ्चैते विकृतिस्वराः । केषाञ्चिन्मते पञ्चापि द्विधा ।

तत्र श्रुतयस्तावद् द्वाविंशतिर्भवन्ति–

'द्वेद्वे निषादगान्धारौ त्रिश्रुती धैवतर्षभौ ।
चतुःश्रुतय उद्दिष्टा षड्जमध्यमपञ्चमाः' इति ।

अयमर्थः– प्रथमश्रुतेश्चतुर्थश्रुतिपर्यन्तं षड्जस्थानम् । पञ्चमी षष्ठी सप्तमी च श्रुतिः ऋषभस्थानम् । अष्टमी नवमी च गान्धारस्थानम् । दशम्येकादशी द्वादशी च त्रयोदशी मध्यमस्थानम् । आ चतुर्दश्या आ सप्तदशीं पञ्चम-स्थानम् । अष्टादशी एकान्नविंशी विंशी च धैवतस्थानम् । एकविंशी द्वाविंशी च श्रुतिर्निषादस्थानमिति तदेवमाहत्य द्वाविंशतिः श्रुतयः ।

द्वेद्वे निषादगान्धारौ । निषादस्य द्वे श्रुती[२१-२२] उग्रा क्षोभिणी च । गान्धारस्य च द्वे [८-९] रौद्री च क्रोधिनी च । त्रिश्रुती धैवतर्षभौ । धैवतस्य तिस्रः श्रुतयः [१८-२०] मदयन्ती रोहिणी रम्या च । ऋषभस्य च तिस्रः

[५-७] दयावती रञ्जनी रतिका च । चतुःश्रुतयः षड्जमध्यमपञ्चमाः । षड्जस्य चतस्रः श्रुतयः[१-४] तीव्रा कुमुद्वती मन्दा छन्दोमती च । मध्यमस्य च चतस्रः [१०-१३] वज्रिका प्रसारिणी प्रीतिर्मार्जनी च । पञ्चमस्य च चतस्रः [१४-१७] क्षितिः रक्ता सन्दीपिनी आलापिनी चेति ।

एत एवोदात्तानुदात्तस्वरितसञ्ज्ञा भवन्तीति याज्ञवल्क्यः–

'उच्चौ निषादगान्धारौ नीचावृषभधैवतौ ।
'शेषास्तु स्वरिता ज्ञेयाः षड्जमध्यमपञ्चमाः' इति ।

षड्जानुसारेण कदाचित् स्वरः प्रस्तूयते । क्वचिन्मध्यमानुसारेण गान्धारानुसारेण वा । त एते त्रयो ग्रामाः– षड्जग्रामः, मध्यमग्रामः, गान्धारग्राम इति ।

तथाहि नारदः–

'षड्जमध्यमगान्धारास्त्रयो ग्रामाः प्रकीर्तिताः ।
'भूर्लोकाज्जायते षड्जो भुवोलोकाच्च मध्यमः ।
'स्वर्गान्नान्यत्र गान्धारो नारदस्य मतं यथा ।
'स्वररागविशेषेण ग्रामरागा इति स्मृताः ।
'विंशतिर्मध्यमग्रामे षड्जग्रामे चतुर्दश ।
'तानान् पञ्चदशेच्छन्ति गान्धारग्राममाश्रितान्' इति ।

मध्यमादनन्तरं गान्धारस्ततः षड्जस्तत ऋषभ इत्येवं प्रकारेण स्वराणां प्रयोगे मध्यमग्रामे विंशतिस्तानानि स्वरविस्तारा भवन्ति । तथा षड्जग्रामे चतुर्दश । गान्धारग्रामे पञ्चदशेत्येवमेकोनपञ्चाशदुच्यन्ते तानानि । प्रतिग्रामं स्वरसप्तकभावनादेकविंशतिर्मूर्छनाः । तासां देवतानामानि च निर्दिदेश नारदः–

'नन्दी विशाला सुमुखी चित्रा चित्रवती सुखा ।
'बला या चाथ विज्ञेया देवानां सप्त मूर्छनाः ।

‘आप्यायिनी विश्वसृजा चन्द्रा हेमा कपर्दिनी ।
‘मैत्री च बार्हती चैव पितॄणां सप्त मूर्छनाः ।
‘षड्जे तूत्तरमन्द्रा स्यादृषभे चापि हृद्गता ।
‘अश्वक्रान्ता तु गान्धारे तृतीया मूर्छना स्मृता ।
‘मध्यमे खलु सौवीरा हृष्यका पञ्चमे स्वरे ।
‘धैवते चापि विज्ञेया मूर्छना तूत्तरायता ।
‘निषादाद् रजनीं विद्यादृषीणां सप्त मूर्छनाः ।
‘उपजीवन्ति गन्धर्वा देवानां सप्त मूर्छनाः ।
‘पितॄणां मूर्छनाः सप्त तथा यक्षा न संशयः ।
‘ऋषीणां मूर्छनाः सप्त यास्त्विमे लौकिकाः स्मृताः’ इति ।

ग्रन्थान्तरे तु प्रतिग्रामं सप्त नामानि निर्दिष्टानि । तद्यथा– उपरितनप्रमाणे ऋषीणां मूर्छनात्वेनोक्ता उत्तरमन्द्राद्याः सप्त षड्जग्राममूर्छनाः । नन्दीप्रभृतयः नन्दाप्रभृतयो वा सप्त मध्यमग्रामस्य । गान्धारग्रामस्य त्विमाः सप्त मूर्छनाः –सावेरी, हरिणाश्वा, कलोपनता, शुद्धमध्या, मार्गा, पौरवी, हृष्यका चेति ।

षड्जमध्यमग्रामयोर्लक्षणं चोक्तं नारदीये–

‘गान्धारस्याऽधिपत्येन निषादस्य गतागतैः ।
‘धैवतस्य च दौर्बल्यान्मध्यमग्राम उच्यते ।

मध्यमेन प्रारम्भे गान्धारस्याऽधिक्यं यदा भवति निषादस्य पुनःपुनरुच्चारणाद् गमनागमनं च धैवतस्य सकृदुच्चारणं षड्जऋषभपञ्चमानां सामान्येनावस्थानं तदा मध्यमग्रामो भवति ।

‘ईषत्स्पृष्टो निषादस्तु गान्धारश्चाधिको भवेत् ।
‘धैवतः कम्पितो यत्र षड्जग्रामं तु निर्दिशेत् ॥

षड्जेन प्रारम्भे निषादस्य लाघवेनोच्चारणम्, गान्धारस्य चाऽधिक्येनोच्चा-

रणम्, धैवतस्य च कम्पनपातनम्, स्वरान्तराणामनन्तरं यथारुचि गानमेवं षड्जग्रामो भवति ।

सङ्गीतरत्नाकरे तु ग्रामत्रयलक्षणान्येवमभिहितानि–

'षड्जग्रामः पञ्चमेऽस्य चतुर्थश्रुतिसंस्थिते ।
'स्वोपान्तश्रुतिसंस्थेऽस्मिन् मध्यमग्राम इष्यते ।
'गान्धारग्राममाचष्टे तदधो नारदो मुनिः ।
'प्रवर्तते स्वर्गलोके ग्रामोऽसौ न महीतळे' इति ।

अयमर्थः– यत्र पञ्चमः षड्जस्य चतुर्थश्रुतिसंस्थितो गीयते स षड्जग्रामः । यत्र पञ्चमः स्वोपान्तस्य मध्यमस्य श्रुतिस्थाने [१०-१३] गीयते स मध्यमग्रामः । यत्र पुनः पञ्चमः ततोऽप्यधः गान्धारस्य श्रुतिस्थाने [८-९] गीयते स गान्धारग्राम इति । तदेवम्–

'सप्त स्वरास्त्रयो ग्रामा मूर्छनास्त्वेकविंशतिः ।
'ताना एकोनपञ्चाशदित्येतत् स्वरमण्डलम्' इति नारदः ।

'सप्त स्वरास्त्रयो ग्रामा एकविंशतिमूर्छनाः ।
'तानान्येकोनपञ्चाशदेतद् गानस्य लक्षणम्'
इति च भावप्रकाशिकायाम् ।

अधिकं तु सङ्गीतविदां चरणपरिचरणेनावगन्तव्यम् ॥ ५० ॥

आनम्रैः सुमकुटमौलिभिः कराग्रै-
राताम्रैः प्रतिकलितैः स्मितैर्मुखाब्जैः ।
आश्रावि स्थिरतरभक्तिभिः सुरेन्द्रै-
स्तद्गीता दशधिषणार्यवर्यचर्या ॥ ५१ ॥

(प.दी.) आनम्रैरिति । **स्थिरतरभक्तिभिः** अतिस्थिरभक्तिभिः **सुरेन्द्रैः तद्गीता** गन्धर्वैर्गीता **दशधिषणार्यवर्यचर्या** श्रीमत्पूर्णप्रज्ञाचार्यस्य चर्या

चरित्रं **आश्रावि** श्रुता । कथम्भूतैः? **आनम्रैः** सम्यक् प्रवणैः **सुमकुटमौलिभिः** शोभनकिरीटयुक्तमौलिभिः । आनम्रसुमकुटमौलिभिरुपलक्षितैरित्यर्थः । **प्रतिकलितैः** अञ्जलित्वेन शिरसि प्रतिकलितैः **आताम्रैः** अतिलोहितैः **कराग्रैः** उपलक्षितैः । **स्मितैर्मुखाब्जैः** उपलक्षितैः । सर्वत्रेत्थम्भूतलक्षणे तृतीया ॥

(त.चं.) सुरेन्द्रैः देवप्रधानैः ॥ ५१ ॥

गीर्वाणैर्विजयमहोत्सवस्य पूजां
कुर्वाणैरविरळसंविदस्तदानीम् ।
विस्मेरैर्मुनिनिकरोपदेवयुक्तैः
सुस्मेरैरथ तमवेक्षितुं प्रजग्मे ॥ ५२ ॥

(प.दी.) **गीर्वाणैरिति** । **अथ तदानीं अविरळसंविदः** श्रीपूर्णप्रज्ञाचार्यस्य **विजयमहोत्सवस्य** नानादुर्वादिविजयाख्यमहोत्सवस्य **पूजां कुर्वाणैः सुस्मेरैः** सुष्ठु मन्दस्मितयुक्तैः **विस्मेरैः मुनिनिकरोपदेवयुक्तैः गीर्वाणैः तं** श्रीमध्वाचार्यं **अवेक्षितुं** द्रष्टुं **प्रजग्मे** गतम् ॥ ५२ ॥

(त.चं.) गीर्वाणैः । गीरेव बाणो येषाम् । वचनमात्रेण निग्रहानुग्रहसमर्थाः । गीर्वेदवाक् बाणं शरीरं येषां वा । मन्त्रेषु सन्निहिता अभीष्टदा इति देवा गीर्बाणा उच्यन्ते । उपदेवा गन्धर्वाप्सरःप्रभृतयो देवयोनयः । 'उप स्यादधिकार्थे च हीनार्थासन्नयोरपि' इति च । विस्मेरैः विस्मितैः, सुस्मेरैः सुस्मितैः । स्मयते रः । स्मिङ् ईषद्धसने ॥ ५२ ॥

आदर्शं गुणगणदर्शने मुरारेः
सच्छास्त्रं रचितमनेन वर्णयन्तः ।
प्रद्योतैरुडुपदवीं प्रकाशयन्तः
प्रैक्षन्त प्रचुरमनोविलासमेते ॥ ५३ ॥

(प.दी.) आदर्शमिति। **मुरारेः गुणगणदर्शने** गुणसमूहज्ञाने **आदर्शं** दर्पणायितं **अनेन** श्रीमध्वाचार्येण **रचितं सच्छास्त्रं वर्णयन्तः प्रद्योतैः** प्रकाशैः **उडुपदवीं** आकाशमार्गं **प्रकाशयन्तः एते** गीर्वाणाः **प्रचुरमनोविलासं** श्रीपूर्णप्रज्ञाचार्यं **प्रैक्षन्त** ददृशुः ॥ ५३ ॥

(त.चं.) 'आदर्शो दर्पणे टीकाप्रतिपुस्तकयोरपि' इति च ॥ ५३ ॥

नाकीन्द्रास्तमवनिभागमावसन्तं
सुश्लोकैरपि भुवनानि भूषयन्तम् ।
नेमुः खादुपनिषदं तदैतरयीं
व्याख्यान्तं विविधविशिष्टशिष्यमध्ये ॥ ५४ ॥

(भा.प्र.) आवसन्तम्, 'उपान्वध्याङ् वसः' इति कर्मत्वम् ॥

(प.दी.) नाकीन्द्रा इति। **नाकीन्द्राः** तं श्रीमध्वाचार्यं **खात्** आकाशात् **नेमुः** । कथम्भूतम्? **अवनिभागं आवसन्तं** भूलोकप्रदेशे आवसन्तम् । 'उपान्वध्याङ् वसः' इति कर्मत्वम् । **सुश्लोकैः** शोभनयशोभिः **भुवनानि अपि भूषयन्तम्** । 'पद्ये यशसि च श्लोकः' इत्यमरः । **विविधविशिष्टशिष्यमध्ये** ब्रह्मचार्यादिनानाविधानां विशिष्टानां ज्ञानभक्त्यादिगुणैरुत्तमानां शिष्याणां मध्ये **ऐतरेयीं उपनिषदं व्याख्यान्तं** व्याकुर्वन्तम् ॥ ५४ ॥

(त.चं.) अवनिभागमावसन्तम्। अवनिभागे वसन्तम्। 'उपान्वध्याङ्वसः' [१.४.४८] इत्याधारस्य कर्मत्वमित्युक्तम् । सुश्लोकैः न केवलमवनिभागं किन्तु त्रीण्यपि भुवनानि भूषयन्तम् । 'कीर्तिः श्लोको यशोऽभिख्यासमाख्यास्तुल्यलक्षणाः' इति च । खात् आकाशं प्राप्य ॥ ५४ ॥

श्रीमन्तं शशिवदनं कुशेशयाक्षं
गम्भीरस्वरमतिदिव्यलक्षणाढ्यम् ।

पश्यन्तः स्वगुरुमथाऽर्चिचन् कृतार्था
वाण्या तं हरिरतिपूर्णकाममेते ॥ ५५ ॥

(प.दी.) **श्रीमन्तमिति । श्रीमन्तं शशिवदनं कुशेशयाक्षं गम्भीरस्वरं अतिदिव्यलक्षणाढ्यं स्वगुरुं पश्यन्तः** । अत एव **कृतार्थाः एते** देववराः **तं** श्रीमध्वाचार्यं [**अथ**] **वाण्या** वचनेन **आर्चिचन्** अर्चयामासुः । अस्तुवन्नित्यर्थः । कथम्भूतम्? **हरिरतिपूर्णकामम्** । हरौ रत्या पूर्णकामम् । परदर्शनादिजन्यं सुखं रतिरुच्यते । हरिदर्शनादिजन्यसुखेन पूर्णकाममित्यर्थः ॥ ५५ ॥

(त.चं.) कुशे जले शेत इति कुशेशयम् । 'शयवासवासिष्वकालात्' [६.३.१८] । कुशेशयम् । गृहेवासः । गृहेवासी । 'दर्भेऽस्त्री कुशं जले' इति; 'कुशेशयं तामरसं सरोरुहम्' इति च । अतिशयेन दिव्यलक्षणाढ्यम् । हरौ रती रागः । सक्तिरित्येतत् । तेनैव चरितार्थम् ॥ ५५ ॥

अहरो दुरागमतमः स्वगोगणै-
रकरोर्मुकुन्दगुणवृन्ददर्शनम् ।
अजयश्चतुर्दश जगन्ति सद्गुणैः
शरणं गुरो करुणयाऽपि नो भवेः ॥ ५६ ॥

(प.दी.) अहर इति । **स्वगोगणैः** स्ववचनसमूहैः **दुरागमतमः** दुःशास्त्राख्यान्धकारं **अहरः** निराकृतवानसि । **मुकुन्दगुणवृन्ददर्शनं** च **अकरोः** कृतवानसि । **सद्गुणैः** निर्दोषैस्तव गुणैः **चतुर्दश जगन्ति** चतुर्दशलोकान् **अजयः** । हे **गुरो नः** अस्माकं **करुणया शरणमपि भवेः** ॥ ५६ ॥

(त.चं.) करुणया नः अस्माकमपि शरणं भवेः । 'शरणं गृहरक्षित्रोर्वधरक्षणयोरपि' इति च । अतिजगती मञ्जुभाषिणी च्छन्दः । लक्षणमुक्तं सप्तमे ॥ ५६ ॥

नमस्ते प्राणेश प्रणतविभवायावनिमगा
नमः स्वामिन् रामप्रियतम हनूमन् गुरुगुण ।
नमस्तुभ्यं भीम प्रबलतम कृष्णेष्ट भगवन्
नमः श्रीमन् मध्व प्रदिश सुदृशं नो जयजय ॥ ५७ ॥

(प.दी.) **नम** इति । हे **प्राणेश**, **प्रणतविभवाय** प्रणतजनभूतये **अवनिं** भुवं **अगाः** भुव्यवतीर्णोऽसि । तस्मै **ते नमः** । **रामप्रियतम गुरुगुण स्वामिन्** हे **हनूमन्**, **नमः** । **प्रबलतम कृष्णेष्ट भगवन् भीम**, **तुभ्यं नमः** । **श्रीमन् मध्व**, तुभ्यं **नमः** । **नः सुदृशं** सुष्ठुज्ञानं **प्रदिश** देहि । त्वं **जयजय** दुष्टान् विजयस्व । तात्पर्ये द्विरुक्तिः ॥ ५७ ॥

(त.चं.) कृतावतारत्रयं प्राणं प्रणमति– नमस्ते । यस्त्वमवनिमगास्तस्मै नमस्ते । अत्यष्टिः शिखरिणी च्छन्द इत्युक्तं तृतीये ॥ ५७ ॥

इति निगदितवन्तस्तत्र वृन्दारकेन्द्रा
गुरुविजयमहं तं लाळयन्तो महान्तम् ।
ववृषुरखिलदृश्यं पुष्पवारं सुगन्धं
हरिदयितवरिष्ठे श्रीमदानन्दतीर्थे ॥ ५८ ॥

इति श्रीमत्कविकुलतिलकत्रिविक्रमपण्डिताचार्यसुत-
नारायणपण्डिताचार्यविरचिते श्रीमध्वविजये महाकाव्ये
आनन्दाङ्किते षोडशः सर्गः

(भा.प्र.) [१]सुरनाथगुरुः सुरभीकृतदिङ्मुखया नवचन्दनमिश्रितया ।
अतिकोमलया तुळसीप्रसवच्छटयैक्ष्यत पुम्भिरसौ लसितः ॥

१.'ववृषुरखिलदृश्यं पुष्पवारं सुगन्धम्' इत्युक्तम् । किं तदाऽपूर्वमदृश्यताखिलैः पुम्भिरित्याह– सुरनाथगुरुः । तुळसीप्रसवच्छटया तुळसीकुसुमनिचयेन । 'पुष्पं प्रसवः कुसुमम्' इति हलायुधः ।

प्राणाधीशः प्राण उक्थो ज्येष्ठः श्रेष्ठोऽखिलेश्वरः ।
पाप्मनाऽविद्ध इत्यादिनानोपनिषदीरितः[१] ॥

[२]स देवश्रेष्ठ इत्यादिभारताद्यैश्च वर्णितः ।
प्राण इत्येव लोकैश्च स महामहिमा ह्यतः ॥

सर्वज्ञानबलादीनामनुसन्धानसुक्षमः[३] ।
प्राणावतारेष्वभितस्तस्मान्नात्राप्यपूर्णता ॥

सामर्थ्यांशांशमेवात्र प्रादुश्चक्रे जगद्गुरुः ।
तत्राप्यमर्त्यदृश्यांशो देवैरेवान्वभूयत ॥

चर्या दृष्टा नरैः काश्चिद् विस्मृता देवमायया ।
अविस्मृताश्च पुरुषैर्नास्माभिः सकलाः श्रुताः ॥

श्रुताश्च काश्चिन्नैवोक्ता देवगुह्यत्वनिश्चयात् ।
अन्यास्तथैव न प्रोक्ता ग्रन्थबाहुल्यभीतितः ॥

१.'नवै वाचो न चक्षूंषि न श्रोत्राणि न मनांसीत्याचक्षते प्राणा इत्येवाऽचक्षते प्राणो ह्येवैतानि सर्वाणि भवति', 'स यदा स्वपिति प्राणं तर्हि वागप्येति प्राणं चक्षुः प्राणं श्रोत्रं प्राणं मनः प्राणो ह्येवैतान् सर्वान् संवृङ्क्ते', 'यः प्राणः स वायुः', ' प्राणो वा आशाया भूयान्',' प्राणो वा उक्थम् । प्राणो हीदं सर्वमुत्थापयति', 'प्राणो वै ज्येष्ठश्च श्रेष्ठश्च', 'प्राणो ह्येवैतानि सर्वाणि भवति', 'प्राणस्यैतद् वशे सर्वं त्रिदिवे यत् प्रतिष्ठितम्', 'प्राण उदगायत्.... तमभिद्रुत्य पाप्मनाऽविध्यन् । स यथाऽश्मानमृत्वा लोष्टो विध्वंसेतैवं हैव विध्वंसमाना विष्वञ्चो विनेशुः' इत्यादिनानोपनिषदीरितः ।

२.'तस्माद् वायुर्देवदेवो विशिष्टः', 'देवश्रेष्ठस्तु मारुतः' इत्यादिना भारताद्यैश्च वर्णितः । आद्यशब्देन 'विष्णोः पदे परमे मध्व उत्सः', 'तस्याङ्गं प्रथमो वायुः प्रादुर्भावत्रयान्वितः', 'वायुर्हि ब्रह्मतामेति तस्माद् ब्रह्मैव स स्मृतः' इत्यादिश्रुतिपुराणवाक्यैश्च ।

३.अनुसन्धानं प्रादुष्करणम् । अभिव्यञ्जनमित्यर्थः ।

उक्ताश्च विस्तृता नैव तस्मादेवात्र कारणात्[१] ।
प्रायेण नैकमात्रोक्ताः [२]कथिता इह सर्वशः ॥

मया दृष्टा ध्रुवमिति प्रोक्ताः प्रायेण पूरुषैः ।[३]
[४]द्वयोर्वक्त्रोर्विरोधेऽत्र स्वीकृता प्रबलस्य गीः ।
तुल्यं तत् सूक्ष्मदृष्ट्यादौ दैवे नैव परीक्ष्यते ॥

काव्यश्रिये वा गुरुकीर्तये वा प्रोक्तं स्वयैवापि मनीषयेति ।
तस्मान्न शङ्क्येत महाजनेन [५]पुंसा कुशाग्रीयधियाऽप्यवश्यम् ॥

मन्दप्रबोधजनतोपकृतिं विधित्सु-
र्मध्वप्रसङ्गपरमोत्सवलम्पटोऽसौ ।
कृत्वाऽपि मध्वविजयं व्यधितास्य किञ्चिद्-
भावप्रकाशनमिदं हरये [६]नमोऽस्तु ॥

१.तस्मादेवात्र कारणात् । ग्रन्थबाहुल्यभयादेव ।

२.अनेकैरेकरूपतयोक्ता इह कथिताः । देवैर्वायोरवतारार्थं प्रार्थना, मध्वस्य व्यासनारायणाश्रमसन्दर्शनमित्यादीनां बहूक्तिसंवादासम्भवात् प्रायेणेति ।

३.मया ध्रुवं दृष्टा इति याश्चर्याः बाहुल्येन पुरुषैरैककण्ठचेन प्रोक्तास्ता एवेह प्रोक्ताः ।

४.'प्रायेण नैकमात्रोक्ताः' इत्यस्यापवादमाह–द्वयोः । एकस्यापि प्रबलस्य गीः स्वीकृता प्रमाणत्वेन । सूक्ष्मदृष्टिगम्येष्वपि विषयेषु प्रबलस्य सूक्ष्मदृष्टिरेव स्वीकृतेति पूर्वन्यायतुल्यमेतत् । देवलोके यद् वृत्तम्, देवैरेव गम्यं यद्वृत्तम्, मध्वदेवेनैव च यत् प्रोक्तं तत्र नैवं परीक्षापेक्षेति । क्वचित् 'तुल्यं तु सूक्ष्मं दृष्ट्वाऽऽदौ दैवे नैव परीक्ष्यते' इति पठ्यते । क्वचित् 'तुल्येन सूक्ष्मदृष्ट्याऽऽदौ दैवे नैव परीक्षते' इति च । बहुधा प्रमाद्यन्त्यहो लिपिकृतः ।

५. ' महाजनेऽस्मिन्' इति क्वचित् । न स्वरसमेतत् ।

६.तदिदं भावप्रकाशनं हरयेऽर्पितमस्तु । अस्या भावप्रकाशिकायाः 'भावदीपः' इति च नामान्तरम् । स्वयमेवाऽह हि प्रमेयनवमालिकायाम्– 'व्यधित भावदीपाह्वयम्' इति ।

त्रिविक्रमविपश्चितो गुणनिधेः सुशिष्याः सुताः
सतामभिमतास्त्रयो यस्तृतीयोऽत्र नारायणः।[१]
स मध्वविजयं व्यधाद् गुरुगिरा सदानन्ददः[२]
प्रसीदतु ततः सदा दशमतिः सनारायणः॥

इति नारायणपण्डिताचार्यविरचितायां
स्वकृतश्रीमध्वविजयस्य भावप्रकाशिकाख्यटीकायां
षोडशः सर्गः

—०—

(प.दी.) इतीति । इति 'अहरः' इत्यारभ्योक्तप्रकारेण **निगदितवन्तः** नितरां वाचमुक्तवन्तः **महान्तं तं गुरुविजयमहं** गुरोः श्रीमध्वाचार्यस्य विजयमहं दुर्वादिविजयोत्सवं **लाळयन्तः वृन्दारकेन्द्राः हरिदयितवरिष्ठे** श्री-हरिप्रियेषूत्तमे **तत्र** तस्मिन् **श्रीमदानन्दतीर्थे सुगन्धं** शोभनपरिमळाढ्यं **पुष्पवारं** कुसुमसमूहं **अखिलदृश्यं** अखिलैर्मनुजाद्यैः द्रष्टुं शक्यं यथा भवति तथा **ववृषुः** । पुष्पवृष्टिं चक्रुरित्यर्थः ॥ ५८ ॥

श्रीमन्मध्वमुनिप्रबर्हविलसच्चित्तारविन्दालयः
सान्द्रानन्दचिदादिसद्गुणतनुर्दोषातिदूरः सदा।
ब्रह्माहीन्द्रसुरेन्द्रपूर्वविबुधैराराधिताङ्घ्रिद्वयः
सुप्रीतो भवतात् सदा मम हरिर्भक्तेष्टचिन्तामणिः॥ *॥

इति श्रीमध्वविजयटीकायां पदार्थदीपिकायां
वेदाङ्गतीर्थमुनिकृतायां षोडशः सर्गः

—०—

१.तृतीयचतुर्थयोर्जगणसगणयोः स्थाने यगणद्वयम् । पुराणग्रन्थेष्वेवं विपुलं छन्दांसि भङ्क्त्वा बन्धे काचन सुषमाऽऽधीयते। महाभारततात्पर्यनिर्णये चाऽचार्यैः। 'सतामभिमतास्त्रयोऽप्यवरजोऽत्र नारायणः' इति वा पाठनीयम् ।

२.गुरुगिरा। पितुः त्रिविक्रमपण्डिताचार्यस्याऽऽदेशेन। गुरोर्मध्वस्य च वा। सदानन्ददः सतामेवाऽऽनन्ददः दशमतिश्च नारायणश्च ।

(त.चं.) उपसंहरति– इति निगदितवन्तः । वृन्दशोऽर्यन्त इति वृन्दारकाः । गणशो हि देवा भवन्ति । तत्तत्पदयोग्याः । प्रशस्तं वृन्दमेषामिति मत्वर्थ आरकन्प्रत्यय इति तु वैयाकरणाः । तथाहि वार्तिकम्–'शृङ्गवृन्दाभ्यामारकन् वक्तव्यः' [५.२.१२२] इति । गुरोः विजयमहं तत्ववादविजयोत्सवम् । 'उत्सवः स्यान्महः क्षणः' इति च । लाळयन्तः । लड उपसेवायाम् । प्रीत्या कीर्तयन्तः । पुष्पवारं पुष्पनिचयम् । 'जालं जातं तथा व्यूहो वारः स्तोमश्च ते समाः' इति च । ननु कथं सुगन्धम्? 'गन्धस्येदुत्पूतिसुसुरभिभ्यः' [५.४.१३५] इति सुपूर्वस्य गन्धपदस्येद्भावमाह किल पाणिनिः । दत्तोत्तरमेतत् । अयोगव्यवच्छेद एवायं नान्ययोगव्यवच्छेद इति । तदा मध्वः तुळसीप्रसवच्छटया वृन्दारकवृष्टया लसितः पुम्भिरैक्ष्यतेति प्रमेयविशेषो भावप्रकाशिकायाम् । एतेन तत्र पुष्पराशौ निमग्नो मध्वोऽदृश्यो भूत्वा बदरीं जगामेति निर्मूलां कथां कथयन्तः परास्ताः । 'श्रीमदानन्दतीर्थे' इति गुरोः परममङ्गलनामनिबन्धनेन गुरुगुणमालिन्या मालिन्या मङ्गलान्तं काव्यमुपसञ्जहारेत्यतिमङ्गलम् ॥ ५८ ॥

इममाचार्यगोविन्दः श्रीमध्वविजये शुभे ।
व्याचख्यौ षोडशं सर्गं सुधियां धीविशुद्धये ॥

सत्यभामा प्रसूर्यस्य पिता नारायणः सुधीः ।
विपश्चिता विरचिता तेनेयं तत्वचन्द्रिका ॥

इत्याचार्यगोविन्दस्य कृतिषु मध्वविजयटीकायां
तत्वचन्द्रिकायां षोडशः सर्गः

—०—

[आदितः श्लोकाः – ९४८+५८=१००६]

समाप्तश्चायं ग्रन्थः

श्रीकृष्णार्पणमस्तु

मन्दहासमृदुसुन्दराननं नन्दनन्दनमतीन्द्रियाकृतिम् ।
सुन्दरं स इह सन्न्यधापयद् वन्द्यमाकृतिशुचिप्रतिष्ठया ॥ [९.४३]

नारायणपण्डिताचार्यविरचिता

प्रमेयनवमालिका

[श्रीरघुवर्यतीर्थकृतया सौरभप्रकाशिकया आचार्यगोविन्दकृतया श्रीमध्वविजय-प्रमेयनवमालिका-सम्बन्धदीपिकया च टीकया संवलिता ।]

[प्रथमसर्गकथा]

श्रीशप्रीत्यै प्रजातः सुमहितमहिमा श्रीहनूमान् निदेशाद्
रामस्योल्लङ्घिताब्धिः सहरिरथ गतः सेतुना पिष्टदुष्टः ।
भूभृन्नी रावणारिं पुरगमुरुदयं पूजयित्वा ससीतं
पश्यन् किम्पूरुषे तं सततमपि महाप्राणमुख्योऽवतान्माम् ॥ १ ॥

सौरभप्रकाशिका

रामं सीतापतिं नत्वा पूर्णबोधान् गुरूनपि ।
विवृणोमि यथाबोधं प्रमेयनवमालिकाम् ॥

श्रीनारायणपरमानुग्रहपात्रभूतसकलसुरगुरुश्रीमुख्यप्राणावतारलीला-प्रतिपादनलोलः श्रीनारायणपण्डिताचार्यः कृतश्रीमध्वविजयाख्यकाव्योऽपि तस्यानल्पतया प्रतिदिनं पठनं व्यसनशतकुण्ठितसत्कर्मणां पुंसामशक्यमिति तदनुजिघृक्षया त्रिभिस्त्रिभिः श्लोकैर्दशमषोडशसर्गकथाप्रतिपादकम्, एकैक-श्लोकेनैकादशत्रयोदशसर्गकथाप्रतिपादकम्, द्वाभ्यान्द्वाभ्यां श्लोकाभ्या-मितरसर्गकथाप्रतिपादकम्, एवं सङ्क्षेपेण मध्वविजयोक्ताखिलप्रमेय-प्रतिपादकम्, अत एव प्रमेयनवमालिकाख्यम्, प्रतिश्लोकं वन्दनप्रार्थनान्य-तररूपतयाऽतिशयेन ऐहिकामुष्मिकश्रेयःसाधनं ग्रन्थं चिकीर्षुः सन् ब्रह्म-रुद्रेन्द्रादिसकलसुराश्रयभूतश्रीपतित्वगुणवैशिष्ट्यप्रतिपादकहरिनामो-च्चारणेन वस्तुनिर्देशात्मकं मङ्गलमाचरन्नेव हनुमदवतारचरितं[1] तावत्

१. 'हनुमदवतारकथाम्' इति क्वचित् ।

सङ्क्षेपेणाऽऽह– **श्रीशेति** । ननु 'जयत्यब्जभवेशेन्द्रवन्दितः कमलापतिः' [तं.सा.सं.१.१] इत्यादिवत् जयतीत्यादिक्रियापदाभावात् कथमिदं वस्तुनिर्देशात्मकं मङ्गलमिति चेन्न । 'सर्वत्राखिलसच्छक्तिः स्वतन्त्रोऽशेषदर्शनः । नित्यातादृशचिच्चेत्ययन्तेष्टो नो रमापतिः' [वाद.१] इत्यादौ क्रियापदाभावेऽपि वस्तुनिर्देशात्मकमङ्गलोपलम्भात् । ननु च स्तुतिरूपस्योदाहृतश्लोकस्य युक्तं मङ्गलपरत्वम् । प्रकृते तु कस्य प्रीत्यै प्रजात इत्याकाङ्क्षाशान्तये कृतं श्रीशपदकीर्तनं कथं मङ्गलार्थमिति चेत्, सत्यम् । 'स्वतन्त्रमस्वतन्त्रं च द्विविधं तत्वमिष्यते'[तत्वसं.१] इत्यादाविवान्यपरमपि भक्त्याऽनुष्ठितं तत्पदकीर्तनं साधयत्येव मङ्गलम् । यथोक्तम्– 'अन्यपरमपि तद् भक्त्याऽनुष्ठितं साधयत्येवाखिलमङ्गलानि' [तत्वसं.टी.] इति । माङ्गलिकश्चायं श्रीशब्दः । तथाच 'अथातो ब्रह्मजिज्ञासा' [ब्र.सू.१.१.१] इत्यादाविव मङ्गलसिद्धिः । प्रतिश्लोकं मङ्गलरूपश्चायं ग्रन्थ इति बहुधा मङ्गलसिद्धिरिति ज्ञातव्यम् । **श्रीशप्रीत्यै** भूभारक्षपणेऽङ्गत्वप्राप्त्या श्रीशस्य लक्ष्मीपतेः प्रीत्यै प्रसादार्थमिति तादर्थ्ये चतुर्थी । 'स्वसम्भवः केसरिणो गृहे प्रभुः' [ता.नि.३.६८] इति श्रीमद्भारततात्पर्यनिर्णयोक्तरीत्या अञ्जनायां वायोः सकाशात् **प्रजातः** । जननं च गर्भवासादिदुःखाननुभवान्न निकृष्टमिति भावेन प्रेत्युपसर्गप्रयोगः । **सुमहितमहिमा,** सुतरां महिताः पूजिताः महिमानो यस्य स तथोक्तः । 'कर्माणि कुर्वन् परमाद्भुतानि' [म.वि.१.११] इत्युक्तरीत्याऽवतारानन्तरमेवात्यद्भुतानि कर्माणि कृतवानिति भावः । 'हनशब्दो ज्ञानवाची हनूमान् मतिशब्दितः' इत्यादिप्रमाणानुसारेण, 'येये गुणा नाम जगत्प्रसिद्धाः'[म.वि.१.१०] इत्युक्तरीत्या च ज्ञानोपलक्षितमहिमोपेतत्वात् **हनूमान्** हनूमन्नामकः[१] । **श्री**शब्दः पूज्यार्थः । कथाविशेषलाभार्थं **'सहरिः'** इत्यादिपदान्यावर्तनीयानि । **सहरिः,** हरिणा रामेण सहित इत्यर्थः । ऋष्यमूकपर्वते रामदर्शनवानिति भावः । **अथ** 'आरोप्य चांसयुगलं

१.'तन्नामकः' इति क्वचित् ।

भगवन्तमेनमस्यानुजं च हनुमान् प्रययौ कपीन्द्रम्' [ता. नि.६.२] इति भगवत्पादोक्तरीत्या सख्यकरणार्थं सुग्रीवसमीपं प्रति **भूभृन्नीः** । भुवं बिभर्ति पुष्णातीति भूभृत् राजा रामः । तमूढ्वा नयतीति तथोक्तः । 'राजा राट् पार्थिवः क्ष्माभृत्' इत्यमरः । 'सत्सूद्विष–'[३.२.६१] इत्यादिना णीञ् प्रापण इति धातोः क्विप् । **अथ** श्रीरामसख्येन सुग्रीवस्य राज्यप्राप्त्यनन्तरं कतिपयमासेष्वतीतेष्वित्यर्थः । 'न विस्मृतिस्ते रघुवर्यकार्ये कार्या कुतश्चित् स हि नोऽभिपूज्यः'[ता.नि.६.२५] इत्युक्तरीत्या **भूभृन्नीः** । भूभृत् राजा, कपिराजः सुग्रीव इत्यर्थः । तं रामसमीपं प्रति नयतीति तथोक्तः । **अथ रामस्य निदेशात्,** निदेशः आज्ञा, 'अतस्त्वमेव प्रतियाहि दक्षिणां दिशं समादाय मदङ्गुलीयकम्' [ता.नि.६.२४] इत्येवंरूपा, तस्मात् । 'प्रैषादेश-निदेशाज्ञा नियोगः शासनं तथा' इति धनञ्जयः । **सहरिः** अङ्गदादिकपिभिः सहितः सन् । 'चन्द्रे सूर्ये यमे विष्णौ वासवे दर्दुरे हये । मृगेन्द्रे वानरे वायौ दशस्वपि हरिः स्मृतः' इति धनञ्जयः । **गतः** दक्षिणां दिशं गत इत्यर्थः । **अथ उल्लङ्घिताब्धिः** । उल्लङ्घितः अब्धिः येन स तथोक्तः । **अथ पिष्टदुष्टः** । पिष्टा मुष्टिपिष्टा दुष्टा लङ्काभिमानिनी देवता येन स तथोक्तः । 'स्त्रियाः पुंवद्भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणीप्रियादिषु' [६.३.३४] इति पूर्वपदस्य पुंवद्भावे स्त्रीप्रत्ययलोपः । परपदस्य 'गोस्त्रियोरुपसर्जनस्य' [१.२.४८] इति ह्रस्वः । 'रुद्धोऽनयाऽऽश्वथ विजित्य च तां स्वमुष्टि-पिष्टां तयाऽनुमत एव विवेश लङ्काम्' [ता.नि.७.७] इति वचनमत्रार्थे प्रमाणम् । **अथ पिष्टदुष्टः** । पिष्टाः चूर्णीकृताः दुष्टाः अक्षकुमाराद्याः येन स तथोक्तः । **अथ सहरिः** सन् । पूर्वोक्त एवार्थः । **गतः** रामसमीपं गत इत्यर्थः । **अथ** 'आरुह्य वायुसुतमङ्गदगेन युक्तः' [ता.नि.८.१] इति वच-नानुसारेण **भूभृन्नीः**, भूभृत् रामः, तमूढ्वा नयतीति तथोक्तः । **सहरिः** सकल-वानरसहितः सन् अब्धितीरं **गतः** । अथ **भूभृन्नीः** सेतुबन्धनार्थं[1] पर्वतान्

१. 'सेतुबन्धार्थम्' इति पाठान्तरम् ।

नयतीति तथोक्तः । **अथ** सेतुना लङ्कां **गतः** । **अथ पिष्टदुष्टः** पिष्टाः चूर्णीकृताः दुष्टाः राक्षसाः येन स तथोक्तः । 'मुष्टिप्रहारं दशकाय सीतासन्तर्जनाग्रयोत्तरमेषकोऽदात्' [म.वि.१.१७] इत्युक्तरीत्या, 'दृष्ट्वा दुष्टाधिपोरः स्फुटितकनकसद्वर्म घृष्टास्थिकूटं निष्पिष्टम्' [वायुस्तु.२०] इत्युक्तरीत्या च पिष्टः मुष्टिपिष्टः दुष्टः रावणः येन स तथोक्त इत्यप्यर्थः । **अथ** मृतवानरजीवनाद्यर्थं **भूभृन्नीः,** भूभृतं अर्धलक्षयोजनव्यवहितं गन्धमादनपर्वतं नयतीति तथोक्तः । **अथ रावणारिं** हतरावणमिति भावः । **अथ ससीतम्,** सीतया सहितमित्यर्थः । 'गोस्त्रियोः-'[१.२.४८] इति ह्रस्वः । **अथ पुरगम्,** अयोध्यापुरगतमित्यर्थः[१] । 'हनूमतो न प्रतिकर्तृता स्यात् स्वभावभक्तस्य निरौपधं मे' [ता.नि.८.२३३] इत्याद्युक्तरीत्या **उरुदयम्** । उर्वी महती दया यस्य तं तथोक्तम् । **तं** रामं **पूजयित्वा, अथापि** वैकुण्ठारोहानन्तरमपीत्यर्थः । **किम्पूरुषे** किम्पुरुषाख्ये खण्डे । **तं** रामम्, 'असाविदानीं च निषेवमाणो रामं पतिं किम्पुरुषे किलाऽस्ते' [म.वि.१.२७] इत्युक्तरीत्या **सततं पूजयित्वा पश्यन्,** पूजयन् सन् पश्यन् इत्यर्थः । 'नेत्रे निमील्य हसति', आस्यं व्यादाय स्वपिति' इत्यादिवत् तत्काले क्त्वा । **महाप्राणमुख्यः** । प्राणाः मरुतः । तेषु मुख्यः । महांश्चासौ प्राणमुख्यश्चेति तथोक्तः । ज्ञानभक्तिवीर्यशौर्यधैर्यादिना श्रेष्ठो हनूमन्नामा मुख्यप्राण इत्यर्थः । **मां सततमवतात्** रक्षतु । अव रक्षण इति धातोराशिषि लोट् । 'तुह्योस्तातङ् आशिष्यन्यतरस्याम्' [७.१.३५] इति तातङ्आदेशः ॥ १ ॥

सम्बन्धदीपिका

नत्वा नारायणं देवं नन्दितीर्थमथो गुरुम् ।
विवृणोमि मितैर्वाक्यैः प्रमेयनवमालिकाम् ॥

अथ कृतश्रीमध्वविजयः कृतभावप्रकाशिकश्च लिकुचकविनन्दनः पुनरपि

१.'–पुरगमित्यर्थः' इति पा. ।

श्रीमध्वचरितामृतलौल्यात् तच्चरितप्रमेयाणां नवामिमां मालिकां जग्रन्थ । श्रीमध्वविजयोऽपि हि प्रमेयमालिकैव । यदाह– 'मालाकृतस्तच्चरिताख्यरत्नैः' [म.वि.१.८] इति । तत इयं भवति नवमालिका । अथचात्र स्वतातकृतिं श्रीवायुस्तुतिं मनसि निधाय तद्वदेव स्रग्धरया मध्वमहिमततिस्रग्धरया वायोरवतारलीलां सञ्चिक्षेप । मरभना यत्रयं च हि स्रग्धरा ।

प्रथमं द्वाभ्यां पद्याभ्यां प्रथमसर्गसङ्क्षेपः । अत्र च यानि विशेषणानि प्रस्तुतानि यथायोग्यं तानि मूलगतपद्यसङ्ख्यया संयोज्यन्ते । तथाहि– श्रीशप्रीत्यै प्रजातः [म.वि.१.९] सुमहितमहिमा श्रीहनूमान् [१०] रामस्य निदेशादुल्लङ्घिताब्धिः [१३;१५] सहरिरथ गतः सेतुना पिष्टदुष्टः [१७] भूभृन्नीः [१९] रावणारिं पुरगमुरुदयं पूजयित्वा ससीतम् [२०-२४], पश्यन् किम्पूरुषे तं सततमपि [२७] मुख्यप्राणस्य प्रथमावतारभूतोऽञ्जनाजातोऽवतान्माम् । एकवचनमिदं बहुवचनपर्यवसायि । य एतां चकार तं मां योय एतां पठति तस्यतस्य च माम्मामित्यन्वयात् ॥ १ ॥

भीमोऽभूद् यो नभेद्यश्चकितरिपुकृतापत्प्रतारी सलीलं
रक्षोघ्नः प्राप्तकृष्णो मखकृदुत वने दुष्टहा कीचकघ्नः ।
हत्वा दुर्योधनादीन् स्वपदमुपगतो यद्विषः क्रोधतन्त्रा
भूत्वा भूमौ कुशास्त्रं व्यधिषत मणिमत्पूर्वकाः पातु सोऽस्मान् ॥
॥ २ ॥

(सौ.प्र.) द्वितीयावतारचरितं तृतीयावतारप्रसक्तिं च निरूपयति– **भीम** इति । **यः** वायुः कुन्त्यां वायोः सकाशात्[१] **भीमः** भीमनामकः सन् **अभूत्** आविरभूत् । य इत्युत्तरत्रापि सम्बध्यते । अस्य च भीमरूपी यो वायुरित्यर्थः । एवं च यच्छब्दावृत्त्या **यः भेद्यो न, यः चकितरिपुकृतापत्प्रतारी**

२.'वायोः सकाशात्' इति नात्रातीव सङ्गतम् । सम्पातायातं स्यात् । 'यः वायुः कुन्त्यां भीमः भीमनामकः सन् अभूत्' इति पर्याप्तम् ।

इत्यादिरूपः प्रत्येकमन्वयः । यद्वा नैकधेत्यादिवत् नसमासाश्रयणात् **नभेद्य** इत्येकं पदम्। तथाच **यो** वायुः **नभेद्य** इत्येतत्पूर्वकैः **स्वपदमुपगत** इत्येतदन्तैर्विशेषणैर्विशिष्टो **भीमोऽभूत्** इत्येकान्वयः । **भेद्यः** भेत्तुं शक्यः **न** । 'शकि लिङ् च' [३.३.१७२] इति शक्यार्थे ण्यत्प्रत्ययः। द्वितीयपक्षे **नभेद्यः** भेत्तुमशक्य इत्यर्थः । शार्दूलभीतजननीकराग्रात् शतशृङ्गपर्वते पतितोऽपि न स्वयं भिन्नः, किन्तु पर्वतमेव बिभेदेति कथाऽनेन सूचिता । **सलीलं** इति क्रियाविशेषणं **चकितरिपुकृतापत्प्रतारी** इत्यादिभिः सम्बध्यते । चकिताः स्वस्माद् भीताः ये रिपवः सुयोधनाद्याः तैः कृताः या आपदः विषप्रयोगप्रमाणकोटिनिपातनाद्याः ताः प्रकर्षेण तरति तच्छील इत्यर्थः । 'आपत्प्रणोदी' इति पाठे आपदः प्रणुदति निराकरोति तच्छील इत्यर्थः । ताच्छीलिकणिनिप्रत्ययेन आपदां तरणं न देवतावरमन्त्रौषधादिना किन्तु श्रीहर्यनुग्रहायत्तस्वरूपसामर्थ्येनैवेति सूचितम्। **उत** वारणावतं गत्वा तत्र लाक्षागृहं दग्ध्वा वनप्राप्त्यनन्तरमित्यर्थः । उतशब्दोऽप्यर्थो विकल्पार्थश्च प्रसिद्धः । तथाऽपि, 'उत अनन्तरम्' इति व्याख्यातारो व्याख्यान्ति तत्रतत्र । **रक्षोघ्नः** रक्षः हिडिम्बं हन्तीति तथोक्तः । अमनुष्यकर्तृकत्वेऽपि बहुलग्रहणसामर्थ्या 'चोरघातो हस्ती' इत्यत्र यथा न प्राप्तष्टक्प्रत्ययः, किन्त्वण्प्रत्ययः, मनुष्यकर्तृकत्वेऽपि क्वचित् टक्प्रत्ययो भवति बहुलग्रहणसामर्थ्यादे भिप्रेत्येदमुक्तमिति ध्येयम् । **उत प्राप्तकृष्णः** । हिडिम्बीं ग्राहयितुं स्व प्राप्तः कृष्णः व्यासो यस्य स तथोक्तः । **उत रक्षोघ्नः** । रक्षःशब्देनात्र गृह्यते । द्रौपदीप्राप्तेः पूर्वमेकचक्रानगरे तस्य हतत्वात् । **उत प्राप्तकृष्णः**, कृष्णा द्रौपदी येन स तथोक्तः । उत कुम्भकारशालायां **प्राप्तकृष्णः** स्वसमीपं प्राप्तः कृष्णः यादवकृष्णः यस्य स तथा । उत, 'दत्त्वाऽभयं स भगवान् द्रुपदस्य कार्ये तेनोमिति स्म कथिते स्वयमेव सर्वाम् । वैवाहिकीं कृतिमथ व्यदधाच्च धौम्ययुक्तः क्रमेण निखिला जगृहुश्च पाणिम्' [ता.नि.१९.१५८] इत्युक्तरीत्या युधिष्ठिरादीनां पञ्चानामपि द्रौपदी-

पाणिग्रहणसिद्ध्यर्थं द्रुपदराजधान्यां **प्राप्तकृष्णः** । कृष्णोऽत्र व्यासः । समासः पूर्ववत् । **उत** इन्द्रप्रस्थप्राप्त्यनन्तरमित्यर्थः । **प्राप्तकृष्णः** राजसूयं कारयितुं प्राप्तौ स्वसमीपं प्राप्तौ कृष्णौ वासिष्ठयादवौ यस्य स तथोक्तः । **उत मखकृत्** । मखं राजसूयं करोतीति तथोक्तः । 'सुकर्मपापमन्त्रपुण्येषु कृञः' [३.२.८९] इत्यत्र उपपदान्तरेऽपीत्युक्तेरत्र कृञः क्विपि 'ह्रस्वस्य पिति कृति तुक्' [६.१.७१] इति तुगागमः । अथवा 'क्विप् च' [३.२.७६] इति क्विप् । **उत** वनप्रवेशानन्तरं **वने दुष्टहा** । दुष्टं किर्मीरं हन्तीति तथोक्तः । हन्तेः क्विप् । दुष्टशब्देन मणिमदादयः क्रोधवशा अपि गृह्यन्ते । सौगन्धिकार्थं गमनकाले तेषामपि हतत्वात् । **उत** अज्ञातवासकाल इत्यर्थः । **कीचकघ्नः** । कीचकाः षडुत्तरशतसङ्ख्याकाः विराटस्यालाः । तान् हन्तीति तथोक्तः । **उत** अज्ञातवाससमाप्त्यनन्तरमित्यर्थः । **दुर्योधनादीन् हत्वा स्वपदं** स्वस्थानं हस्तिनराजधानीमिति यावत्, **उपगतः** सन्; **उत**, 'समारब्धं कलियुगं यदा दुर्योधनोऽपतत् । षट्त्रिंशाब्दं पुनः कृष्णः कृतमेवान्ववर्तयत्' [म.ता.नि.३२.१०] इत्युक्तरीत्या षट्त्रिंशद्वर्षानन्तरमित्यर्थः, स्वस्य पदं मूलरूपम्, पदं स्थानं परलोकमिति वा, **उपगतः** । **यद्द्विषः**, यस्य वायोः भीमरूपस्य द्विषः शत्रवः । **मणिमत्पूर्वकाः** । मणिमान् पूर्व आद्यो येषां ते तथोक्ताः । 'शेषाद् विभाषा' [५.४.१५४] इति कप्प्रत्ययः । **क्रोधतन्त्राः** क्रोधवशाख्या दैत्याः । **भूमौ** सङ्करादिरूपेण **भूत्वा कुशास्त्रं** जीवब्रह्मैक्यजगन्मिथ्यात्वादिप्रतिपादकतया कुत्सितं शास्त्रं **व्यधिषत** अकार्षुः । डुधाञ् धारणपोषणयोरिति धातोर्लुङ् । उपसर्गबलादर्थान्तरम् । यथोक्तम्– 'धात्वर्थं बाधते कश्चित् कश्चित् तमनुवर्तते । तमेव विशिनष्ट्यन्य उपसर्गगतिस्त्रिधा' इति । अथवा अनादिकालतो वृत्तं कुशास्त्रं विशेषेण पुपुषुरित्यर्थः । यथोक्तमनुव्याख्याने समयचरणे– 'अनादिकालतो वृत्ताः समया हि प्रवाहतः'[अनु.२.२] इति । **सः** भीमरूपी वायुः **अस्मान् पातु** । पा रक्षणे लोट् ॥ २ ॥

(सं.दी.) द्वितीयेन पद्येन द्वितीयावतारकथामाह– यो भीमोऽभूत् [२८] नभेद्यः [२९] चकितरिपुकृतापत्प्रतारी सलीलम् [३१], रक्षोघ्नः, कृष्णौ च वासिष्ठयादवौ प्राप्त इति प्राप्तकृष्णः [३२;३४-३५], उत मखकृत् [३६] वने दुष्टहा [३८-३९] कीचकघ्नः [४०], हत्वा दुर्योधनादीन् [४३] स्वपदमुपगतः [४३-४४], यद्द्विषः मणिमत्पूर्वका भूमौ भूत्वा [४७] कुशास्त्रं व्यधिषत [५५]। के ते भीमद्विषः? आह– क्रोधतन्त्राः । क्रोधवशा नाम दैत्या इति । स भीमरूपोऽस्मान् पातु । आत्मनि बहुवचनम् । वक्तारं च पाठकांश्चेति चास्मान् ।। २ ।।

[द्वितीयसर्गकथा]

अज्ञानोत्सादनार्थं सुरवरवचसा सूचितो रूप्यभर्त्रा
जातो मध्यालयार्याद् गुरुमतितपसो वासुदेवाभिधानः ।
गोदात्रे मोक्षदाता रजतपतिपदासेवको भूतभर्त्रा
मान्यः प्राणः कुलस्थैरपि निजसहजातर्पितः प्रीयतां मे ।। ३ ।।

(सौ.प्र.) तृतीयावतारं तच्चरित्रं च वक्तुमुपक्रमते– **अज्ञाने**ति ।**अज्ञानोत्सादनार्थम्**। जीवब्रह्मैक्यादिविषयकाज्ञानस्य[१] उत्सादनं विनाशनं अर्थः प्रयोजनं यथा भवति तथेति क्रियाविशेषणम् । अस्य च यथाश्रुतान्वये 'प्रवृत्तेन' इति शेषः । 'मध्यालयार्याज्जात' इत्यनेनान्वये तु न शेषाध्याहारः । **सुरवरवचसा**। सुरवरस्य हरेः वचसा, 'आनन्दयेः सुमुख भूषितभूमिभागो रूपान्त-

१.नात्र अज्ञानमिति ज्ञानाभावः । किन्तु विपरीतज्ञानम् । जीवेश्वरैक्यादिविषयकं मिथ्याज्ञानमुत्सादयितुमिति यावत् । संशयविपर्ययादिना बहुप्रकारं ज्ञानाभावं च दर्शयितुं मूलेऽज्ञानपदोपादानम्। यदाह तत्त्वप्रदीपे– 'केषाञ्चिदिदं वा तत्वमदो वेति संशयो बभूव। तत्र चैकतरप्राधान्यं केषाञ्चित्। अन्यतरप्राधान्यमन्येषाम्। इदमेव नान्यदित्यन्येषाम्। तद्विपरीतमपरेषामिति ज्ञानमाकुलीबभूव' इति। सर्वोऽप्ययमज्ञानप्रकारः प्रायोऽत्र गृह्यते ।

रेण मम सद्गुणनिर्णयेन'[म.वि.२.३] इत्येवंरूपेण हरिवचनेन । सुरवराणां रुद्रादीनां 'हे स्वामिन्, भूमाववतीर्य सन्मतं प्रवर्तय' इत्येवं याच्ञारूपवचसा च । 'हारावलीमिव हृदा विबुधेन्द्रयाच्ञाम्' [म.वि.२.४] इत्युक्तत्वात् । ननु 'सुरवर' इत्यत्र सुराणां वर इति षष्ठीतत्पुरुषो वा, सुरेषु वर इति सप्तमीतत्पुरुषो वा? नाऽऽद्यः । अत्र षष्ठ्या निर्धारणार्थकत्वात्, निर्धारणषष्ठ्याश्च 'न निर्धारणे'[२.२.१०] इति समासप्रतिषेधात् । न द्वितीयः । 'सप्तमी शौण्डैः'[२.१.४०] इति शौण्डादिभिरेव सप्तम्याः समासविधानात्, वरशब्दस्य च शौण्डादिष्वपाठादिति चेत्, न । बहुलग्रहणसामर्थ्येन शौण्डादिष्वपठितेनापि वरशब्देन सप्तम्याः समासोपपत्तेः । उक्तं च कौमुद्याम्– 'कर्तृकरणे कृता बहुलमिति बहुलोक्तेरन्यत्रापि द्वितीयादिविभक्तीनां प्रयोगवशात् समासो ज्ञेयः' इति । **रूप्यभर्त्रा** । 'नामैकदेशग्रहणे नामग्रहणम्' इति न्यायेन 'व्यासो वेदव्यासः', 'सत्या सत्यभामा' इत्यादिवद् रूप्यं शिवरूप्यं रूप्यपीठमिति वा सिद्ध्यति । तस्य ग्रामस्य 'शिवबेळ्ळि' इति प्राकृतसञ्ज्ञा । तस्य भर्ता स्वामी; पत्यर्थभर्तृशब्दस्य याजकादित्वात् 'याजकादिभिश्च'[२.२.९] इत्यनेन समासः; तेन । उत्सवकाले मिलितानां जनानां पुरतः पुरुषाविष्टेन ध्वजस्तम्भस्योपरि नृत्यता अनन्तासनेनेति भावः । 'उत्पत्स्यते जगति विश्वजनीनवृत्तिः'[म.वि.२.८] इत्युक्तरीत्या **सूचितः** सन् । **मध्यालयार्यात्** । मध्यालयः मध्यगेहकुलोत्पन्नः । 'नडिल्लाय' इति प्राकृतसञ्ज्ञा । स चासौ आर्यः साधुश्च तस्मात् । 'आर्यः साधुकुलीनयोः' इति वैजयन्ती । तथाच 'यं भट्ट इत्यभिवदन्ति जना विनीतम्' [म.वि.२.१४] इत्युक्तरीत्या मध्यगेहाख्यसाधोरित्यर्थः । अथवा मध्यालये मध्यगेहाख्ये कुले आर्यः श्रेष्ठ इत्यर्थः । उक्तं च– 'सन्मध्यगेहकुलमौलिमणिर्द्विजोऽभूत्'[म.वि.२.९] इति । तस्मात् **जातः** । कीदृशात्? 'विज्ञातभारतपुराणमहारहस्यम्'[म.वि.२.१४], 'तीव्रैः पयोव्रतमुखैर्विविधव्रताग्र्यैः' [म.वि.२.२१] इत्युक्तरीत्या **गुरुमतितपसः** । मतयश्च तपांसि च मति-

तपांसि । गुरूणि महान्ति मतितपांसि यस्य स तथोक्तः, तस्मात् । 'गुरु-र्महत्याङ्गिरसे पित्रादौ धर्मदर्शके । अलघौ दुर्जरे चापि' इति हेमचन्द्रः । 'ज्ञानार्थमेव यदभूद्वसुदेव एषः' [म.वि.२.२९] इत्युक्तप्रकारेण वार्थं ज्ञानार्थं जातः असुदेवः वासुदेव इति व्युत्पत्त्या **वासुदेवाभिधानः** । वासुदेव इति अभिधानं नाम यस्य स तथोक्तः । **गोदात्रे** । बाल्ये पयःपानार्थं गोः दाता गोदाता पूर्वालयः । तस्मै **मोक्षदाता** । पूर्वालयस्य 'मूडिल्लाय' इति प्राकृत-सञ्ज्ञा । स्वपुत्रपुत्रत्वेनोत्पन्नः पूर्वालयः श्रीमध्वशिष्यो भूत्वा मोक्षहेतुं तत्वज्ञानमापेति भावः । 'तत्पुत्ररत्नमुपगृह्य कदाचिदाप्तः स्वस्वामिने बुध उपायनमार्पयत् सः' [म.वि.२.३१] इत्युक्तप्रकारेण पाजकक्षेत्रगतात् स्वगृहात् रूप्यपीठालयं नीत्वा देवस्य पुरतः पित्रा यदा स्वयमर्पितः तदा **रजतपतिपदासेवकः** । रजतपतेः अनन्तासनस्य पदयोः आ सम्यक् सेवक इत्यर्थः । तदा मानसनमस्कारादिरूपसेवां कृतवानिति भावः । ननु 'गोदात्रे मोक्षदाता', रजतपतिपदासेवकः' इत्यत्र कथं षष्ठीसमासः? 'कर्तरि च' [२.२.१६] इति तृजकाभ्यां योगे षष्ठीसमासप्रतिषेधादिति चेत्, उच्यते । 'जनिकर्तुः प्रकृतिः' [१.४.३०], तत्प्रयोजको हेतुश्च' [१.४.५५] इति ज्ञापकात्, 'अनधिगतार्थगन्तृ प्रमाणम्' इत्यादिप्रयोगाच्च कृद्योगलक्षण-षष्ठ्या एव तत्र तत्प्रतिषेधः, न शेषषष्ठ्याः । प्रकृते च शेषषष्ठ्याश्रयणान्न दोषः । ननु मोक्षस्य दातेत्यत्र मोक्षस्य कर्मत्वविवक्षाऽभावे 'कर्मणा यम-भिप्रैति स सम्प्रदानम्' [१.४.३२] इत्युक्तसम्प्रदानसञ्ज्ञाप्राप्त्यभावाद् गोदात्र इत्यत्र चतुर्थी न स्यादिति चेत्, उच्यते । गोदातारं सन्तोषयितुं मोक्षदातेत्यर्थस्वीकारेण 'फलेभ्यो याति' इत्यादिवत् सम्प्रदानसञ्ज्ञाऽभा-वेऽपि 'क्रियार्थोपपदस्य च कर्मणि स्थानिनः' [२.३.१४] इत्यनेन चतुर्थी घटते । अथवा दातेति तृनन्तं पदम् । नन्वेवं सति 'न लोकाव्यय–' [२.३.६९] इति षष्ठीप्रतिषेधात् तृनन्तपदयोगे षष्ठ्येव न सम्भवीति चेत्, सत्यम्, द्वितीयातत्पुरुषः स्यात् । 'द्वितीया श्रितातीत–' [२.१.२४] इति

सूत्रे श्रितादिभिरेव द्वितीयातत्पुरुषो विहित इति चेत्, दातृपदस्य गम्यादित्वाद्वा बहुलग्रहणाद्वा समासोपपत्तिरित्यलम् । रात्रौ देवालयाद् गृहं प्रति गमनसमये वने पुरुषाविष्टेन **भूतभर्त्रा** भूतनाथेन, महता ग्रहेणेत्यर्थः । 'यच्छक्तिगुप्तिरहितानलमस्मि हन्तुं लोकेश्वरः स बत बालतमः किलेति' [म.वि.२.३४] इत्युक्तरीत्या **मान्यः** पूज्यः । कुलस्थैः कुलस्थाख्यधान्यविशेषैः । करणे तृतीया । अन्यत्र शरीरपीडाकरैः **अपि** इत्यपेरर्थः । **निजसहजातर्पितः** । निजा या सहजा सोदरी तया, कर्त्रर्थे तृतीया, तर्पितः प्रतोषितः । कदाचिद् बालकरक्षणार्थं कन्यां नियुज्य मातर्यन्यत्र गतायां रुदन्तमेनं सान्त्वयितुं सा कन्या पक्वं कुलस्थकुलं प्राभोजयत् । तेन चायं पूर्णोदरो निरुपद्रवश्चाभूदिति भावः । एतादृशः **प्राणः** मुख्यप्राणः **मे प्रीयताम्** प्रसन्नो भवतु । प्रीङ् प्रीणने लोट् ॥ ३ ॥

(सं.दी.) अथ द्वाभ्यां द्वितीयसर्गसङ्क्षेपः । अज्ञानोत्सादनार्थं सुरवरवचसा जातः [२.१.४] रूप्यभर्त्रा सूचितः [६-८], गुरुमतितपसः [१४-२०] । मध्यालयार्यात् [९] । जातः [२३-२५] वासुदेवाभिधानः [२९] गोदात्रे मोक्षदाता [३०] रजतपतिपदासेवकः [३१] भूतभर्त्रा मान्यः [३३-३४] कुलस्थैरपि पक्वधान्यविशेषैः निजसहजातर्पितः [३५-३९] । बालरूपः प्राणः प्रीयतां मे ॥ ३ ॥

आनन्दं मन्दहासामृतरसकलया सन्दधानः प्रजाना-
मास्येन्दोः शोभमानैरपि कलवचनैर्बाललीलाविलासैः ।
गोपुच्छालम्बनाद्यैर्वृषपतिविहितापत्प्रणोदी प्रणुद्या-
दज्ञानाद्यापदं मे स्वयमिव भगवान् वासुदेवोऽसुदेवः ॥ ४ ॥

(सौ.प्र.) **आनन्दमिति** । 'वासुदेवमिह वाऽसुदेवतासत्कलामभिननन्द तं जनः । वासुदेवमिति वासुदेवसन्नामकं विविधलीलमर्भकम्' [म.वि.२.५४]

इति मध्वविजयोक्तरीत्या वसुदेवस्यापत्यं पुमान् **वासुदेवः** । 'ऋष्यन्धकवृष्णिकुरुभ्यश्च'[४.१.११४] इत्यपत्यार्थेऽण्प्रत्ययः । **भगवान्** कृष्णः **स्वयमिव** । **आस्येन्दोः** । आस्यं इन्दुरिव आस्येन्दुः । तस्य **मन्दहासामृतरसकलया** । अमृतरसरूपा कला अमृतरसकला[१] । मन्दहासः अमृतरसकलेव तयेत्यर्थः । 'कला तु षोडशो भागः' इत्यमरः । **शोभमानैः कलवचनैरपि** अव्यक्तमधुरवचनैरपीत्यर्थः । **गोपुच्छालम्बनाद्यैः** । गोः वृषभस्य पुच्छम्, तस्य आलम्बनं आश्रयणं आद्यं येषां ते तथोक्तैः । आद्यशब्देन वयोऽनुसारिव्यापारविशेषा गृह्यन्ते । **बाललीलाविलासैः** । बाललीलानां विलासैः, बाललीलात्मकविलासैरिति वा । सर्वत्र करणार्थे तृतीया । **प्रजानां** सज्जनानां **आनन्दं सन्दधानः** कुर्वन् । 'सर्वोऽपि तन्मुखसुहासरसायनोत्कः' [म.वि. २.४२], 'अव्यक्तया प्रथमतो वदनेऽस्य वाण्या शालीनयेव भुवनार्चितया विजह्रे' [म.वि.२.४३] इत्याद्युक्तप्रकारेण मन्दहासादिना सतां मोदं व्यदधादिति भावः । कृष्णोऽपि 'लीलाभिर्भावगर्भाभिर्जनमानन्दयन् बभौ' इत्याद्युक्तरीत्या मन्दहासकलवचनैः गोपालतादशायां गोपुच्छालम्बनाद्यैश्च **प्रजानामानन्दं सन्दधानः** । अत्राऽद्यशब्देन दशमस्कन्धोक्तलीलाविशेषा ग्राह्याः । पुनः कीदृशः? **वृषपतिविहितापत्प्रणोदी** । वृषस्य वृषभस्य पतिः स्वामी । मूल्यार्थं वृषदातेति भावः । तेन विहिता कृता या आपत् भोजननिरोधलक्षणा तां प्रणुदति परिहरतीति तथोक्त इत्यर्थः । वृषमूल्यमदत्त्वा न भोक्तव्यमिति पितरं निवारयन्तं धनिकम्, 'बीजान्तराणि किल कानिचिदाशु तस्मै'[म.वि.२.५१] इत्युक्तरीत्या मन्दस्मितपूर्वकबीजविशेषदानेन तोषयित्वा प्रेषयामासेति भावः । कृष्णोऽपि वृषपतिविहितापत्प्रणोदी। वृषपतिः वृषभश्रेष्ठाकारोऽरिष्टासुरः । तत्कृतापत्प्रणोदीत्यर्थः । नीलां ग्रहीतुं कुम्भकाख्यगोपालवचसा सप्तसङ्ख्याकवृषपतिविहितापत्प्रणोदी चेति ज्ञेयम् । वासुदेव इत्येतद् **असुदेव** इत्यनेनापि

१.अमृतद्रवस्य कला बिन्दुरिति वा व्याख्येयम् ।

सम्बध्यते । वासुदेवनामा **असुदेवः** मुख्यप्राणः **मे** मम, **अज्ञानाद्यापदम्** । अज्ञानं आदिः यस्याः सा अज्ञानादिः । तथोक्ता च सा आपच्च । तां **प्रणुद्यात्** परिहरतु । णुद प्रेरण इति धातोराशिषि लिङ् । प्रेरणार्थकस्यापि नुदधातोरिदमर्थान्तरमुपसर्गबलाद् धातूनामनेकार्थत्वाद्वा लभ्यते । धातूनामनेकार्थत्वं च 'मृषस्तितिक्षायाम्'[१.२.२०] इति ज्ञापकादिति विश्वकर्मविदुषोक्तम् । एवमन्यदपि ज्ञापकं शास्त्रोक्तमनुसन्धेयमिति ॥ ४ ॥

(सं.दी.) आस्येन्दोः मन्दहासामृतरसकलया प्रजानामानन्दं सन्दधानः [४२], शोभमानैः कलवचनैरपि प्रजानामानन्दं सन्दधानः [४३], बाललीलाविलासैः [४४] गोपुच्छालम्बनाद्यैरपि प्रजानामानन्दं सन्दधानः [४५-४९], वृषपतिविहितापत्प्रणोदी [५०-५२] भगवान् वासुदेव इव [५३] स्वयमसुदेवः [५३] अज्ञानाद्यापदं मे प्रणुद्यात् ॥ ४ ॥

[तृतीयसर्गकथा]

एकाकी योजनाभ्यां व्यवहितमगमद् यस्त्रिवर्षोऽमरौको
यो लाळ्यो लोकमात्रा स्वलिपिपरिचये तातविस्मेरताकृत् ।
प्राज्ञम्मन्यं शिवाख्यं परिषदि जितवान् शाखिनामार्थमूचे
दुर्गं पित्रोपनीतः सुरवरमहितो मह्यतां मे वचोभिः ॥ ५ ॥

(सौ.प्र.) एकाकीति । **त्रिवर्षः** । त्रयो वर्षा वत्सरा यस्य स तथोक्तः । तत्परिमितवयस्क इत्यर्थः । 'वर्षोऽस्त्री भारताद्यब्दवृष्टिषु प्रावृषि स्त्रियाम्' इत्यभिधानम् । **यः** वासुदेवः **एकाकी** सन् । 'शरणतो रणतो निरगान्नृभिः' [म.वि.३.२], 'त्वरितमेत्य स काननदेवतासदनमत्र ननाम रमापतिम्' [म.वि.३.४] इत्याद्युक्तप्रकारेण उत्सवनिमित्तेन मातापितृभ्यां सह स्वेन प्राप्ताद् बन्धुगृहाद् योजनाभ्यां योजनद्वयेन व्यवहितं तावद्दूरस्थितमित्यर्थः । **अमरौकः** । अमरस्य रूप्येश्वरस्य ओकः आवासस्थानम् । 'धिष्ण्य-

मोको निवसनम्' इत्यमरः । **अगमत्** । गमेर्लुङ् । बन्धुगृहापेक्षया रूप्य-पीठालयो योजनद्वयव्यवहित इति मध्वविजयानुक्तप्रमेयमिति ज्ञातव्यम् । **यः लोकमात्रा** सर्वलोकजनन्या पाजकक्षेत्रगतविमानगिरिस्थया दुर्गये-त्यर्थः । **लाळ्यः** लाळनीयः । 'वरविमानगिरावपि चण्डिका शिशुमहो जननी तमलाळयत्'[म.वि.३.१५] इत्युक्तरीत्या तल्लाळनाभावे देवतादि-सहायमन्तरेण चिरं पाजकक्षेत्रे न वसेदिति भावः । **यः स्वलिपिपरिचये,** स्वस्य लिपिपरिचयः मातृकाभ्यासः, तस्मिन् विषये, 'लिखितमेव पुन-र्लिखितं कुतः'[म.वि.३.१९] इत्युक्त्वा **तातविस्मेरताकृत्** । तातस्य पितुः विस्मेरता विस्मयशीलता, तां करोतीति तथोक्तः । **यः परिषदि** सभायां **प्राज्ञम्मन्यम्**, आत्मानं प्राज्ञं पण्डितं मन्यत इति प्राज्ञम्मन्यः, तम् । 'आत्म-माने खश् च' [३.२.८३] इति मन्यतेः खश् । 'अरुर्द्विषदजन्तस्य मुम्' [६.३.६७] इत्युपपदस्य मुमागमः । **शिवाख्यं** द्विजं **जितवान्** । मात्रा सह 'घृतवल्ली'[1] नामकग्रामं गत्वा तत्र परिषदि कथां कथयन्तं धौतपटान्वयजं शिवाख्यं द्विजं 'अपरथा कथितं कथक त्वया'[म.वि.३.२३] इत्याद्युक्त्वा जितवानिति भावः । **सुरवरमहितः** इत्येतदत्रापि सम्बध्यते । 'स समलाळ्यत विस्मयिभिर्नरैरपि सुरैर्विजयाङ्कुरपूजकैः'[म.वि.३.२५] इति मध्वविजये प्रोक्तत्वात् । योजना तु यच्छब्दावृत्त्या पूर्ववत् । **यः पित्रा दुर्गं** दुर्गमं दुर्ज्ञेय-मिति यावत् । 'दुर्गो राष्ट्रे वने दुर्गं दुर्गमे नरके पुरे' इति वैजयन्ती । **शाखि-नामार्थम्** । शाखिनः वृक्षस्य नाम लिकुचपदमित्यर्थः । तस्य अर्थं **ऊचे** । ब्रूञ् व्यक्तायां वाचीत्यतो लिट् । 'ब्रुवो वचिः'[३.४.५३] इति वच्या-देशः । नतु वच परिभाषण इति धातुः । तस्य परस्मैपदित्वात् । 'कथयतां प्रथमे कथयत्यलं स्वजनके जनसङ्घवृते कथाम् । सकललोकमनोनयनोत्स-वश्चतुरधीः स कदाचिदवाचयत्'[म.वि.३.२८] इत्युक्तरीत्या कदाचित् स्वपितरि कथां कथयति स्वयं वाचयति सति पित्रा अज्ञातं [2]लिकुचपदार्थं

१. 'नेयम्बळ्ळि' इति प्राकृतसञ्ज्ञा ।   २.'लिकुचशब्दार्थम्' इति पाठान्तरम् ।

स्वयमुक्त्वा जनान् तोषयामासेति भावः । **पित्रा** इत्येतद् देहलीदीप-न्यायेन उपनीत इत्यनेनापि सम्बध्यते । उचिते वयसि उचिते मुहूर्ते **यः पित्रा उपनीतः** कृतोपनयन इत्यर्थः । **यः सुरवरमहितः** देवश्रेष्ठैः पूजित इत्यर्थः । 'परिचराग्निगुरू चरितव्रतः'[म.वि.३.३५] इत्यादिपितृकृतशिक्षां श्रुत्वा सुरा जहसुः, पटखण्डधारणादिकं दृष्ट्वा कुतूहलिनश्च जाता इति कथाऽनेन विशेषणेन सूचिता । य इति श्रवणात् स इति लभ्यते । स वासुदेवः **मे वचोभिः** स्तोत्ररूपैः वचनैः **मह्यताम्** पूज्यताम् । मह पूजायामिति धातोः कर्मणि लोट् ॥ ५ ॥

(सं.दी.) अथ द्वाभ्यां तृतीयसर्गसङ्क्षेपः । य एकाकी अमरौकोऽगमत् [३.१-५] । अमरौकः काननदेवतासदनमगमत् । ततोऽमरौको लघु-नाळिकेर्युपपदान्तरसदनम् । ततोऽमरौकश्चन्द्रमौळीश्वरमन्दिरं पूर्वदिगा-लयम् । ततश्चामरौकोऽनन्तासनसदनम् । कियद् व्यवहितं बन्धुगृहाद-नन्तासनसदनम्? तदेतदनुक्तं मध्वविजय इत्यत्र स्फुटयति– योजनाभ्यां व्यवहितम् । कियद्वयास्तदाऽयं वासुदेवः? एतदपि तत्रानुक्तमत्राऽह– त्रिवर्षः । यः लोकमात्रा लाळ्यः [१७] स्वलिपिपरिचये तातविस्मेरताकृत् [१९] प्राज्ञम्मन्यं शिवाख्यं परिषदि जितवान् [२२-२५], दुर्गं शाखि-नामार्थमूचे [२८-३०], पित्रा उपनीतः [३२;३४] सुरवरमहितः [३३;३५;३७] मे वचोभिर्मह्यताम् ॥ ५ ॥

पायान्मां यो भुजङ्गं सदरिमदमयद् द्रागुपाध्यायसेवी
विश्वेभ्यो वेगदूरप्लवनविधिनियुद्धादिवीर्यातिशायी ।
येनास्ता मूढशङ्का श्रुतिशुचिवचसाऽलं गुरोः शीर्षशूला
सख्युर्नारायणज्ञोऽथ य उपनिषदं व्याख्यतास्मै सुरार्थ्यः ॥ ६ ॥

(सौ.प्र.) पायादिति । **यः** वासुदेवः **सदरिम्,** सतां अरिः सदरिः, तम् । दैत्यात्मकमित्यर्थः । **भुजङ्गं** स्वपादं दष्टवन्तं सर्पम् । **द्राक्** सपदि । 'द्राक् तत्क्षणं च सपदि' इति धनञ्जयः । **अदमयत्** चारुतराङ्गुलीविहारमात्रेण

निगृहीतवान्, संहृतवानिति भावः । दमु दमन इति धातोर्लङ् । अथ **यः** वासुदेवः, 'धर्मो हि सर्वविदुषामपि दैवतानां प्राप्ते नरेषु जनने नरवत् प्रवृत्तिः । ज्ञानादिगूहनमुताध्ययनादिरत्र' [ता.नि.१४.४] इति श्रीमद्भारततात्पर्यनिर्णयोक्तप्रकारेण **उपाध्यायसेवी** । उपेत्य अस्मादधीत इति उपाध्यायः अध्यापकः । 'इङश्च' [३.३.२१] इत्यपादाने घञ् । स च पूगवनान्वयजः । 'तोटन्तिल्लाय' इति प्राकृतसञ्ज्ञा । तं सेवते तच्छील आसीत् । 'कारकाणां प्रयोगे तु क्रियाभावेऽस्ति तिष्ठति' इति वचनात् 'आसीत्' इति लभ्यते । **यः** गुरुकुलावासकाले **विश्वेभ्यः** सर्वेभ्यः सखिभ्यः **वेगदूरप्लवनविधिनियुद्धादिवीर्यातिशायी** । कञ्चनावधिं कृत्वा सर्वेषु धावत्सु वेगः स च, दूरे प्लवनविधिः प्लवनव्यापारः स च, नियुद्धं बाहुयुद्धम्, 'नियुद्धं बाहुयुद्धं स्यात्' इत्यमरः, तानि आदीनि येषां तानि । आदिशब्देन गुरुभारोद्धरणादिकं गृह्यते । एतेषु यद्वीर्यं तदतिशेते तच्छीलः । **येन** वासुदेवेन, 'पठसि नो शठ ते सखिभिः समम्' [म.वि.३.५०] इत्याद्युक्तप्रकारेण **गुरोः** उपाध्यायस्य या **मूढशङ्का** क्रीडासक्तोऽयं वटुर्मूढ इति शङ्का सा श्रुतिशुचिवचसा, श्रुतेः वेदस्य शुचि शुद्धं स्वरव्यत्यासादिरहितमित्यर्थः, तादृशं वचः वचनं उच्चारणमिति यावत्, तेन **अस्ता** निरस्ता । **अथ येन** वासुदेवेन **सख्युः** गुरुपुत्रस्येत्यैतिह्यम् । **शीर्षशूला** शिरोवेदना कर्णकुहरं प्रविष्टेन स्वमुखवायुना **अलं** सम्यक् **अस्ता** । **अथ नारायणज्ञः** । नारायणं जानातीति तथोक्तः[1] । 'इगुपधज्ञाप्रीकिरः कः' [३.१.१३५] इति कप्रत्ययः । 'आतो लोप इटि च' [६.४.६४] इत्याकारलोपः । पूर्णानन्दत्वादिप्रकारेण[2] हरिविषयकज्ञानवानिति भावः । इदं च विशेषणमुपनिष्द्व्याख्यानसामर्थ्यं द्योतयितुम् । एतादृशः **यः** वासुदेवः **अस्मै** अध्यापकाय **उपनिषदं** ऐतरेयोप-

---

१.नारायणोपनिषत्प्रतिपाद्यं नारायणं जानन् इत्यर्थः । एतेन 'अधिगतोपनिषच्च सकृच्छ्रुता प्रकटभागवतीति न विस्मयः' [३.५१] इति पद्यं विवृतम् ।

२.'–प्रकारकहरिविषयक–' इति पा. ।

निषदं **व्याख्यत** व्याचख्यौ । चक्षिङ् व्यक्तायां वाचीत्यतो लुङि 'चक्षिङः ख्याञ्' [२.४.५४] इति ख्याञ्आदेशे 'अस्यतिवक्तिख्यातिभ्योऽङ्' [३.१.५२] इति ङेरङि इदं रूपं सिद्ध्यति । 'व्याख्यदस्मै सुरार्थ्य' इति पाठे परस्मैपदित्वात् ख्या प्रकथन इत्यपि धातुः स्यात् । पाठव्याजेन रहसि ऐतरेयोपनिषदर्थरसानुक्त्वाऽध्यापकाय गोविन्दभक्तिलक्षणां गुरुदक्षिणां ददाविति भावः । **अथ** उपाध्यायादनुज्ञां प्राप्य गमनसमये 'अयि स्वामिन् दुष्टान् दमयदमय'[म.वि.३.५६] इत्यादिरीत्या **सुरार्थ्यः** सुरैः प्रार्थनीयः । स वासुदेवो **मां पायात्** इत्यन्वयः ॥ ६ ॥

(सं.दी.) यः सदरिं भुजङ्गं द्रागदमयत् [३८-४०], उपाध्यायसेवी [४१], विश्वेभ्यो वेग[४४]दूरप्लवनविधि[४५-४६]नियुद्धादिवीर्यातिशायी [४७-४८], येन गुरोर्मूढशङ्का श्रुतिशुचिवचसाऽलं निरस्ता [५०-५३], सख्युः शीर्षमूला च निरस्ता [५३] । नारायणोपनिषत्प्रतिपाद्यं जानातीति नारायणज्ञः [५४], अथास्मै गुरवे य उपनिषदं व्याख्यत [५५], सुरार्थ्यः [५६] स पायादपायान्माम् ॥ ६ ॥

[चतुर्थसर्गकथा]

सन्न्यासे बद्धबुद्धिः कृतहरिनमनः पार्थपूज्यं यतिं प्राक्
प्राज्ञं गुर्वाज्ञयाऽलं सुगुणहरिविदं सत्तपस्तृप्तदेवम् ।
प्राप्तं सर्वज्ञशिष्याख्यवरमुपगतो द्विः स्वतातं निषेद्धुं
प्राप्तं चानुत्तरं यो व्यधित सहजवान् मातरं चावतान्माम् ॥ ७ ॥

(सौ.प्र.) **सन्न्यास** इति । **यः सन्न्यासे बद्धबुद्धिः** इत्यादिरूपः पृथगन्वयः । यद्वा सन्न्यासे बद्धबुद्धिरित्यादिविशेषणविशिष्टः **यः स्वतातं अनुत्तरं व्यधित** इति योज्यम् । 'असङ्गमस्मात् प्रकटीकरोम्यहं निजं भजन् पारमहंस्यमाश्रमम् । मम प्रभोर्नापरथा हि शोभते द्विषत्सु विष्णुं यददण्डधारणम्'[म.वि.४.२-३] इत्याद्युक्तरीत्या **सन्न्यासे** चतुर्थाश्रमे बद्धा

स्थिरीकृता बुद्धिः येन स तथोक्तः। 'असावनुज्ञार्थमथानमद्धरिं समस्तसंव्यापिनमात्मदायगम्'[म.वि.४.४] इत्युक्तरीत्या **कृतहरिनमनः** । कृतं गृहक्षेत्राद्यन्तर्गतस्य हरेः नमनं येन स तथोक्तः। अनन्तरं **यतिं उपगतः** । कीदृशम्? **प्राक्** पूर्वजन्मनि 'पुरैष कृष्णाकरसिद्धशुद्धिमद्वराऽन्नभुक्त्या किल पाण्डवालये'[म.वि.४-७] इत्युक्तरीत्या **पार्थपूज्यम्** । पार्थैः पाण्डवैः पूज्यं आदरणीयम्। प्रशस्ता प्रज्ञा बुद्धिरस्यास्तीति प्राज्ञः, तम्। 'प्रज्ञाश्रद्धार्चावृत्तिभ्यो णः'[५.२.१०१][1] इति मतुबर्थे प्रशंसायां णप्रत्ययः। 'भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने। सम्बन्धेऽस्तिविवक्षायां भवन्ति मतुबादयः' इति वचनात्। प्रशस्ता प्रज्ञा चाच्युतविषयैव। 'द्वे विद्ये वेदितव्ये परा चैवापरा च' इति श्रुतावच्युतविषयकज्ञानजनकविद्यानां परविद्यात्वोक्तिसामर्थ्यात्। तथाच 'प्राज्ञमि'त्यनेनाच्युतप्रज्ञनामकमिति[2] सूचितं भवति। 'निरन्वये मायावादिशास्त्रे विश्वासं न कुरु। तत्वज्ञानसिद्ध्यर्थं मुकुन्दं भज' इत्येवंरूपया **गुर्वाज्ञया** स्वगुरोराज्ञया **अलं** सम्यक् **सुगुणहरिविदं** सुगुणं ज्ञानानन्दादिशुभगुणयुक्तं हरिं वेत्तीति तथोक्तस्तम्। विद ज्ञान इति धातोः क्विप्। सुगुणो हरिरिति ज्ञानवन्तमिति भावः। **सत्तपस्तृप्तदेवम्**। सत्तपसा समीचीनतपसा तृप्तः सन्तुष्टः देवः अनन्तासनः यस्य स तथोक्तः, तम्। अत एव **सर्वज्ञशिष्याख्यवरं प्राप्तम्**। तपसा सन्तुष्टो देवः कश्चन पुरुषमाविश्य भविष्यतः सर्वज्ञाच्छिष्यान्मत्तत्वं विद्धीति वरं ददाविति भावः। 'सन्न्यासे बद्धबुद्धिरि'त्यत्र प्रस्तुतं सन्न्यासं निषेद्धुं निवारयितुं **द्विः** द्विवारम्, 'द्वित्रिचतुर्भ्यः सुच्'[५.४.१८] इति सुच्प्रत्ययः।

---

१. एके 'प्रज्ञाश्रद्धाऽर्चाभ्यो णः' इत्येव सूत्रं पठित्वा तत्पूरकं 'वृत्तेश्च' इति वार्तिकमिति मन्यन्ते। ग्रन्थकृदुद्धृत एव प्राचीनपाठः।

२. 'अच्युतप्रेक्षनामकम्' इति लिपिकृत्प्रमादः। प्राज्ञपदस्वारस्यात् 'अच्युतप्रज्ञनामकम्' इत्येव वक्तव्यम्। अच्युतप्रज्ञ इत्येव प्राचीनः पाठः। न क्वाप्यच्युतप्रेक्ष इति। वेदाङ्गतीर्थीये चेदं स्फुटम्। तदनुसारि चेदं व्याख्यानमिति नात्राच्युतप्रेक्षपदस्यावकाशः।

प्राप्तं च प्राप्तमपि **स्वतातं** स्वपितरं **अनुत्तरम्,** न विद्यते उत्तरं यस्य स तथोक्तः, तं **व्यधित** अकरोत् । डुधाञ् धारणपोषणयोरिति धातोर्लुङ् । रूप्यपीठं गत्वा 'वृद्धौ मातापितरौ परित्यज्य वराश्रमो न ग्राह्यः' इति याच्ञापूर्वकं सभार्येण मध्यगेहभट्टेन नमस्कृतो वासुदेवः 'नमस्कारायोग्योऽहं भवद्भ्यां नमस्कृतः, ततो वराश्रमानुज्ञा विधात्रा दापिता' इत्युक्त्वा पितरं निरुत्तरमकरोत् । पुनः कदाचिन्नेत्रावतीं तीर्त्वा गतो मध्यगेहभट्टो मठविशेषेऽच्युतप्रेक्षेण[१] सह स्थितं पुत्रं वीक्ष्य,'सुतस्य कौपीनधृतौ हि साहसप्रतिश्रवो मे दृढः'[म.वि.४.२०] इत्याद्युक्त्वाऽनन्तरं 'अहं बहुश्रुतत्वात् तव विरहं बलात् सहे तव माता न सोढुं शक्ता' इत्यवदत् । तदा वासुदेवः 'तावद् भवाननुज्ञां ददातु' इत्युत्त्वा ननाम । तदा निरुत्तरीकृतो द्विजः 'तथाऽस्तु माताऽनुवदेद् यदि'[म.वि.४.२५] इत्युक्त्वा प्रययाविति कथाऽनेन सूचिता । **सहजवान्** अनुजवान् सन् **मातरं च** । चशब्देनानुत्तरशब्दो लिङ्गविपरिणामेनानुकृष्यते । अनुत्तरां व्यधितेत्यर्थः । सहजोत्पत्त्यनन्तरं गृहं गत्वा 'दम्पत्योर्युवयोः रक्षकः पुत्र उत्पन्नः, इतः परं मम सन्न्यासानुज्ञा दातव्या' इति स्वोक्तं वचनं श्रुत्वाऽपि निवारयन्तीं मातरं 'यदि कदाचिदपि मां द्रष्टुमिच्छसि तर्हि सन्न्यासमङ्गीकुरु । न चेद् दूरं व्रजामि । न कदाचिद् दृष्टिविषयो भवामि' इत्युक्त्वा निरुत्तरां व्यधितेति भावः । स वासुदेवो **मां अवतात्** रक्षतु ॥ ७ ॥

(सं.दी.) अथ द्वाभ्यां चतुर्थसर्गसङ्क्षेपः । सन्न्यासे बद्धबुद्धिः [४.१-४] कृतहरिनमनः [४], प्राज्ञं यतिम् [६] प्राक् पार्थपूज्यम् [७] गुर्वाज्ञयाऽलं सुगुणहरिविदम् [१०-१२] सत्तपस्तृप्तदेवम् [१३] सर्वज्ञशिष्याख्यवरं प्राप्तमुपगतः [१४], निषेद्धुं द्विः प्राप्तं स्वतातम् [१५-१६;१९-२०;२२] योऽनुत्तरं व्यधित [१७-१८;२१;२३-२५], सहजवान् [२६] मातरं च योऽनुत्तरां व्यधित [२६-२८] सोऽवतान्माम् ॥ ७ ॥

१.'अच्युतप्रज्ञेन' इति पठनीयम् । लिपिकृत्प्रमादः ।

पूर्णप्रज्ञाख्य आसीद् यतिकुलतिलको यः शुभाचार ईश-
प्रत्तोऽस्मा ईश्वराज्ञागतसुरसरिति स्नानकृज्जैत्रपत्रः ।
दुष्पद्यच्छिच्च लोके प्रवचनचतुरः सत्पुराणेतिहास-
स्योक्तौ मेधाप्रदर्शी दिशतु शुभदृशं मह्यमृज्वग्रणीः सः ॥ ८ ॥

(सौ.प्र.) पूर्णप्रज्ञाख्य इति । **यः** वासुदेवः 'दशप्रमतिं जनयन्त योषणः' इति श्रुत्यनुसारेण **पूर्णप्रज्ञाख्यः यतिकुलतिलकः** सन् **शुभाचारः आसीत्, ईशप्रत्तः आसीत्** इत्यादिरूपोऽन्वयः । यतिकुलतिलक इत्युक्त्या 'अमुं धृताषाढमवेक्ष्य मेनिरे स्वभावशोभाऽनुपमेति जन्तवः' [म.वि.४.३४] इत्युक्तकथा सूचिता । **शुभाचारः** । शुभः आश्रमोचितः आचारः यस्य स तथोक्तः । आचारशिक्षां चिकीर्षुर्गुरुस्तस्य सदाचारं दृष्ट्वा स्वयं ततो विशेषशिक्षां प्राप्य विस्मयं प्रापेति कथाऽनेन सूचिता । **अस्मै** अच्युतप्रज्ञाय[१] **ईशप्रत्तः** । ईशेन अनन्तासनेन[२] प्रत्तः प्रकर्षेण दत्तः । अनुग्रहपूर्वकं दत्त इत्यर्थः । प्रपूर्वकाद् दाणः क्तप्रत्यये 'अच उपसर्गात् तः' १[७.४.४७] इति धातोस्तादेशे प्रत्त इति रूपं सिद्ध्यति । नमस्कारसमये पुरुषाविष्टोऽनन्तासनः पूर्णप्रज्ञाचार्यं हस्ते गृहीत्वा 'त्वदीयतपःफलरूपमेतं ददामि' इत्युक्त्वाऽच्युतप्रज्ञाय[१] ददाविति कथाऽनेन सूचिता । **ईश्वराज्ञागतसुरसरिति** । ईश्वराज्ञया सरोवरमागता या सुरसरित् गङ्गा तस्यां **स्नानकृत्** । अनेन 'गङ्गायात्रार्थमनुज्ञा दातव्या' इति मध्वे गुरुं प्रति वदति सति तद्विरहमसहमानो गुरुरनन्तासनमस्मरत् । तदा पुरुषाविष्टः स रूप्यपीठपतिः 'इतस्तृतीये दिवसे गङ्गा त्वदर्थेऽस्मत्तटाकमाव्रजेत् । ततो न गच्छ' इत्याह । तदाज्ञानुसारेण रूप्यपीठसरोवरमागतायां गङ्गायां मध्वो जनैः सह सस्नाविति कथा सूचिता । **जैत्रपत्रः** जयशीलो जेता तत्सम्बन्धि जैत्रम् । तादृशं पत्रं यस्य स तथोक्तः । अनेन वैशेषिकतन्त्रविशारदान् वासुदेवपण्डितादिकान्

१. अत्रापि लिखितपुस्तके 'अच्युतप्रेक्षाय' इति पठ्यते । साम्प्रदायिकः प्रमादः ।
२.'अनन्तशयनेन' इति कश्चित् ।

पत्रावलम्बनपूर्वकं जिगायेति कथा सूचिता । गुरुप्रेरणया इष्टसिद्ध्याख्य-साङ्करग्रन्थश्रवणारम्भकाले **दुष्पद्यच्छित्** । दुष्टं पद्यं दुष्पद्यम् । तद्ग्रन्थगताद्यपद्यमित्यर्थः । तद् द्वात्रिंशद्दूषणाभिधानेन छिनत्ति निराकरोतीति तथोक्तः । उक्तवक्ष्यमाणसमुच्चायकः चशब्दः । **लोके प्रवचनचतुरः** व्याख्याने प्रौढः । 'अविदुषः श्रवणं विदुषः प्रवचनं यतेर्विशेषादेतदुभयं कार्यम् । त्वं तु विचित्रप्रज्ञः । ततो व्याख्याहि' इति लोकवचनेन परशास्त्रं व्याचख्यौ । तदा चतुरा बुभूषवो बहवः पण्डिता मध्वसमीपमागता इति कथाऽनेन सूचिता । **सत्पुराणेतिहासस्य,** 'कलिमलसंसृतिकालनोऽखिलेशो हरिरितरत्र न गीयते ह्यभीक्ष्णम् । इह तु पुनर्भगवानशेषमूर्तिः परिपठितोऽनुपदं कथाप्रसङ्गैः' [भाग.१२.१२.६५] इति द्वादशस्कन्धोक्तरीत्या इतरपुराणापेक्षया सत् उत्तमं पुराणं भागवतमित्यर्थः । अथवा 'मुख्यस्य निर्विशेषेण शब्दोऽन्येषां विशेषतः' इति न्यायेन निरुपपदपुराणशब्दवाच्यं भागवतम् । सत् निर्दुष्टं अपपाठादिदोषरहितमित्यर्थः । सत्पुराणं च इतिहासः भारतं च सत्पुराणेतिहासमिति द्वन्द्वैकवद्भावः । तस्य **उक्तौ मेधाप्रदर्शी** । मेधां बुद्धिं प्रदर्शयति तच्छील इत्यर्थः । कदाचिद् गुरुसमीपे शिष्यैरनेकधा पञ्चमस्कन्धे वाच्यमाने 'अयमेव व्यासाभिमतः प्रकारः' इत्यनेनोक्तो गुरुः 'व्यासकृतिस्थितिं जानासि चेत् पञ्चमस्कन्धगतं गद्यं गद्यताम्' इत्याह । तदाऽयं कांश्चिदध्यायानभ्यधादिति कथाऽनेन सूचिता । [1]नन्वाचार्येण पञ्चमस्कन्धगतगद्योक्त्या भारतोक्तौ कथं मेधा प्रदर्शितेति चेत्, उच्यते । 'अध्यायनिकायमभ्यधात्' [म.वि.४.५२] इत्यस्य मध्वविजयवाक्यस्य 'अर्थतः पाठतश्चाभ्यधात्' इति [2]टीकाकारैर्व्याख्यातत्वादाचार्येणार्थो[3]ऽप्युपपादित इत्यवगम्यते । तथा चात्र विचित्रार्थरसान् ब्रुवाणोऽयमेवमेव भारतमपि ब्रूयादेवेति तद्विषयकमेधाऽपि दर्शिता भवति । यद्वा, अर्थोपपादनसमये समाख्यात्वेन भारतवाक्यमुदाहृत्य तन्मेधा-

१.'नन्वाचार्यैः' इति क्वचित् । २. वेदाङ्गतीर्थैरित्यर्थः । ३.'–राचार्यैरर्थो–' इति च ।

प्रदर्शनमिति भावः । अथवा, 'पूर्वजन्मसु हि वेद पुरेदं सर्वमित्यमितबुद्धिरुवाच'[म.वि.४.५३] इत्युक्तरीत्या 'अहं सर्वं वेद' इत्युक्तत्वात् तन्मेधाप्रदर्शनमिति भावः । यद्वा, सत्पुराणं च इतिहासः तदीयपुरावृत्तं च तस्येत्यर्थः । 'इतिहासः पुरावृत्तम्' इत्यमरः । एतदभिप्रेत्य 'अध्यायनिकायमभ्यधात्' इति वाक्यं 'अर्थतः पाठतश्चाभ्यधात्' इति टीकाकारैर्व्याख्यातमिति द्रष्टव्यम् । **सः ऋज्वग्रणीः** । ब्रह्मत्वयोग्या जीवा ऋजवः, तेषु अग्रणीः श्रेष्ठ इत्यर्थः । ऋजूनां परस्परं समत्वेऽपि 'क्रमेण वर्धमानमा मुक्तेः'[प्रमाणल.] इत्युक्तरीत्या अप्राप्तवायुपदानामृजूनामपेक्षया [१]प्राप्तवायुपदस्य ज्ञानाधिकत्वादग्रणीत्वव्यवहारः । यद्वा, ऋजुश्चासावग्रणीश्च रुद्राद्यपेक्षया श्रेष्ठश्च इति कर्मधारयसमासः । अथवा मनोवाक्कर्मणामेकप्रकारत्वाद् ऋजवः सज्जनाः । तेषु अग्रणीरित्यर्थः । वायोः सर्वजीवोत्तमत्त्वं[२] च 'वायुर्भीमो भीमनादो महौजाः सर्वेषां च प्राणिनां प्राणभूतः' [मोक्षधर्म. २५८.४०] इत्यादौ प्रसिद्धम् । **मह्यं शुभदृशं** मङ्गलज्ञानं **दिशतु** ददातु । दिश अतिसर्जन इति धातोराशिषि लोट् ॥ ८ ॥

(सं.दी.) यः पूर्णप्रज्ञाख्यो यतिकुलतिलक आसीत् [३२-३३], शुभाचारः [३६] अस्मायच्युतप्रज्ञायेशप्रत्तः [३७-३८] ईश्वराज्ञागतसुरसरिति स्नानकृत् [४१-४२] जैत्रपत्रः [४३] दुष्पद्यच्छिच्च [४४-४५] लोके प्रवचनचतुरः [४७] सत्पुराणेतिहासस्योक्तौ मेधाप्रदर्शी [४९-५२] स ऋज्वग्रणीर्मे दिशतु शुभदृशम् ॥ ८ ॥

[पञ्चमसर्गकथा]

साक्षादानन्दतीर्थोऽनुमितिभिरुरुजिद् योऽनुमातीर्थनामा
बुद्ध्यब्धिं वादिसिंहं सपदि विजितवान् दुष्टभाष्यापनोदी ।

१. '–मपेक्षयाऽस्य ज्ञानाधिक–' इति क्वचित् ।
२. 'सर्वसज्जीवोत्तमत्वम्' इति क्वचित् ।

अच्छेद्योक्तिः प्रमोदं पितुरपि कृतवान् नर्मगर्भं गुरूक्तो
भाष्यं कर्तुं ह्यवोचत् प्रियसखयतये सूत्रभावं स माऽव्यात् ॥ ९ ॥

(सौ.प्र.) **साक्षादिति** । **यः** पूर्णप्रज्ञः **साक्षात्** मुख्यवृत्त्या आनन्दतीर्थः आनन्दतीर्थनामक इत्यर्थः । आनन्दप्रदं तीर्थं शास्त्रं यस्मात् स तथोक्त इत्यन्वर्थसञ्ज्ञः । नतु डित्थादिवत् साङ्केतिकनामेति भावः । 'तीर्थं शास्त्रे गुरौ यज्ञे पुण्यक्षेत्रावतारयोः' इति हेमचन्द्रः । अनेन आनन्दतीर्थ इति नामकथनपूर्वकं 'वेदान्तविद्यानां पालको भव' इति सङ्कल्प्य गुरुणा शङ्खोदकेनाभिषिक्तोऽभूदिति कथा सूचिता । **अनुमितिभिः** अनुमानैरित्यर्थः । 'स्त्रियां क्तिन्'[३.३.९४] इत्यत्र 'अकर्तरि च कारके–' [३.३.१९] इत्यनुवृत्तेः करणेऽत्र क्तिन् प्रत्ययः । **उरुजित्** । उरून् बहून् विदुषो जयतीति तथोक्तः । अच्युतप्रज्ञ[१]समीपमागतस्य तत्सखिभूतस्य कस्यचिद् यतेः शिष्यान् तत्रतत्रान्यांश्च पण्डितान् वेदाद्यनुसारिभिरनुमानैर्जिगायेति कथाऽनेन सूचिता । **अनुमातीर्थनामा** अनुमातीर्थ इति नाम यस्य स तथोक्तः । अनुमानैः सर्वविजेतृत्वात् सभास्वनुमानतीर्थ इति प्रसिद्धोऽभूदिति भावः । बुद्ध्यब्धिः बुद्धिसागरः बौद्धाग्रेसरः । वादिसिंहः पूर्वं वैशेषिकः पश्चाद् बुद्धिसागरेण जितः सन् तत्पक्षमाश्रितः । तत्र पूर्वं **वादिसिंहं** पश्चाद् बुद्धिसागरं च **सपदि** मुहूर्तमात्रं प्रसङ्गं कृत्वेति भावः, **विजितवान्** । **दुष्टभाष्यापनोदी** । दुष्टं च तत् भाष्यं च, दुष्टस्य भाष्यमिति[२] वा, सङ्करप्रणीतं भाष्यमित्यर्थः । तदपनुदति निराकरोति तच्छीलः । कदाचित् तद्भाष्यव्याख्यानसमये 'सूत्रविरुद्धार्थप्रतिपादकमेवेदं भाष्यम्' इति निराचक्र इति भावः । 'कथं तर्हि त्वदभिमतः सूत्रार्थः' इति विद्वद्भिरुक्ते सति **अच्छेद्योक्तिः** । अच्छेद्या निराकर्तुमशक्या उक्तिः सूत्रार्थविषयकोपन्यासरूपवचनं यस्य स तथोक्तः । **पितुः** स्वसमीपं प्राप्तस्य मध्यगेहार्यस्य[३] पूर्वं विमनी-

---

१.अत्रापि 'अच्युतप्रेक्ष–' इति लिपिकृत्प्रमादः । २.'भाष्यं वा' इति पाठान्तरम् ।
३.'मध्यगेहस्य' इति पाठान्तरम् ।

कृतस्यापीति **अपि**शब्दाभिप्रायः । **प्रमोदं** सन्तोषं **कृतवान्** । 'मुत् प्रीतिः प्रमदो हर्षः प्रमोदामोदसम्मदाः' इत्यमरः । 'कदाचिदेनं प्रतिगम्य सौम्यधीः स मध्यगेहार्यवरः प्रसेदिवान् । हेतोः कुतश्चिद् विमनीकृतोऽप्यहो गुणाब्धिलुब्धः सुजनः प्रसीदति । तेजोऽमृतं नन्दनगात्रपात्रगं नेत्राञ्जलिभ्या-मपिबत् सदाऽव्ययम्'[म.वि.५.२३-२४] इत्याद्युक्तरीत्या स द्विजो मध्वस्य तेजो दृष्ट्वा सूत्रार्थादिविषयकं वचनं च श्रुत्वा तुष्टोऽभूदिति भावः । **नर्म-गर्भं** परिहासगर्भमिति क्रियाविशेषणम् । 'द्रवकेळिपरीहासाः क्रीडा लीला च नर्म च'[१] इत्यमरः । **भाष्यं कर्तुं गुरूक्तः** गुरुणा उक्त इत्यर्थः । कदाचित् साङ्करभाष्यं सूत्राननुगुणमिति गुरुणा सह विवादे प्रस्तुते 'तद्भाष्यमयुक्तं चेद् वेदादिसम्मतमन्यद् भाष्यं त्वं कुरु' इति भाष्यान्तरनिर्माणमशक्य-मिति भावेन परिहासपूर्वकं गुरुरवददिति कथाऽनेन सूचिता । यद्यपि 'सूत्रार्थविच्चेत् कुरु भाष्यमञ्जसेत्याक्षेपपूर्वं गुरुरभ्यधादिमम्'[म.वि.५.२५] इत्यत्राऽऽक्षेपपूर्वकमित्युक्तम् । उत्तरत्रापि 'तल्लीनमाक्षेपमुपैक्षताफलम्' [म.वि.५.२६] इति तथैवोक्तम् । तथाऽप्याक्षेपोऽपि परिहासप्रयुक्त एव नतु मत्सरप्रयुक्त इत्यभिप्रेत्य 'नर्मगर्भमि'त्युक्तम् । अत एव तत्रापि पूर्वार्धे 'लीलाविवादे गुरुणा जगद्गुरोः'[म.वि.५.२५] इत्युक्तमित्यनुसन्धेयम् । **प्रियसखयतये** । प्रियश्चासौ सखा च प्रियसखः । 'राजाहःसखिभ्यष्टच्' [५.४.९१] इति समासान्तष्टच् । स चासौ यतिश्च तस्मै । **सूत्रभावं** ब्रह्म-सूत्राभिप्रायम् । 'भावो लीलाक्रियाचेष्टाभूत्यभिप्रायजन्तुषु । पदार्थमात्रे सत्तायाम्' इति वैजयन्ती । **अवोचत्** । वच परिभाषण इति धातोर्लुङ् । अ-श्रुतप्रतिभान्वितस्य मध्वस्य प्रवक्तृत्वसामर्थ्यं प्रसिद्धमिति **हि**शब्देन सूच-यति । 'साङ्करभाष्यादिकमयुक्तं चेदस्तु । महानुभावस्त्वमस्मभ्यं समी-चीनं सूत्रभावं ब्रूहि' इत्याश्रमज्येष्ठेन लिकुचान्वयोद्भवेन यतिना प्रार्थितः सूत्राण्येव व्याचख्याविति भावः । **सः** पूर्णप्रज्ञः । **मा** माम् । 'त्वामौ द्विती-

---

१. 'खेला च नर्म च' इति प्रचलितः पाठः ।

यायाः’ [८.१.२३] इति मादेशः । **अव्यात्** । अव रक्षण इति धातोराशिषि लिङ् ॥ ९ ॥

(सं.दी.) अथ द्वाभ्यां पञ्चमसर्गसङ्क्षेपः । यः साक्षादानन्दतीर्थः [५.१-२] । अनुमितिभिरुरुजित् [३-६] अनुमातीर्थनामा [७] वादिसिंहं सपदि विजितवान् [११-१३], बुद्ध्यब्धिं च सपदि विजितवान् [१४], दुष्टभाष्यापनोदी [१७-१८] अच्छेद्योक्तिः [१९] पितुरपि प्रमोदं कृतवान् [२३-२४], भाष्यं कर्तुं नर्मगर्भं गुरूक्तः [२५] प्रियसखयतये सूत्रभावमवोचत् [२९] स हि माऽव्यात् । अवतिरत्र रक्षणे प्रवेशे वा ॥

याम्याशां यान् प्रभोक्ता बहुफलसमितेः क्षीरिणीं प्रेक्ष्य यान्तीं
स्यानन्दूरं[1] च दैत्यं सपदि विजितवान् फाल्गुनं तीर्थमाप्तः ।
सेतुं चात्रापि हास्यं खलमथ कृतवान् सर्वजिद् रङ्गनाथं
नत्वा यान् विश्ववन्द्यो ह्युपनदि विबुधौकस्यवेन्मां स धन्यः ॥
॥ १० ॥

(सौ.प्र.) **याम्याशामिति** । यमस्येयं याम्या । ‘यमाच्चेष्यते[2]’[४.१.८५] इति ण्यप्रत्ययः । सा च सा आशा दिक् च ताम्, रूप्यपीठापेक्षया दक्षिणां दिशमित्यर्तः । ‘आशाः ककुभः काष्ठाः’ इति हलः । **यान्** गच्छन् । या प्रापण इति धातोः शतृप्रत्ययः । **बहुफलसमितेः** । बहूनां फलानां समितिः समूहः, तस्या इति कर्मणि षष्ठी । ‘सङ्घातः समितिस्ततिः’ इति धनञ्जयः । **प्रभोक्ता** प्रकर्षेण भोक्ता । दक्षिणदेशे स्थितं विष्णुमङ्गलग्रामं गत्वा कस्यचिद् गृहस्थस्य गृहे द्विशताधिकानि पक्वकदळीफलानि भिक्षावसाने भुक्तवानिति भावः । **अथ यान्तीं** तद्देशे स्यन्दमानां **क्षीरिणीं** पयस्विनीं नदीं **प्रेक्ष्य** । तीर्त्वेत्याद्यनुक्त्वा प्रेक्ष्येत्युक्त्या ‘स्वहेळया पातितपार्थिवव्रजाम्’ [म.वि.५.३५] इत्याद्युक्तरीत्या स्वतीरभाविदुर्गासमानविशेषणविशिष्टां

१.‘स्यानन्दूरे च’ इति स्वरसः पाठः ।

२. अस्मिन् वार्तिकवचने– ‘यमाच्चेति वक्यव्यम्’ इति पाठान्तरं क्वचित् ।

पयस्विनीं दृष्ट्वा तां दुर्गां सस्मार, सदृशवस्तुदर्शनस्य स्मृतिहेतुत्वादिति सूचितम् । 'स्यानन्दूरपुरे पुरन्दरहरब्रह्मादिभिः पूर्वजैः' इत्यादेः **स्यानन्दूरं** अनन्तशयनक्षेत्रम् । **आप्तः** इत्येतदनेनापि सम्बध्यते । तत्क्षेत्रमाप्तः सन् इत्यर्थः । कर्तरि क्तप्रत्ययः । 'स्यानन्दूरे च' इति पाठे यथाश्रुतान्वयः । **दैत्यम्,** 'अप्रांशुनूत्नोपपदाधिवासजः स सङ्करो वैरपरायणः पुनः' [म.वि. ५.३८] इत्युक्तरीत्या केरळदेशे पुनरुत्पन्नं सङ्करमित्यर्थः । **च**शब्दोऽनेन सम्बध्यते । तथाच 'पर्याकुलानेकसरस्वतीततीन् न्यायोपपन्नान् विविधार्थ-संयुतान् । अतीत्य देशान् समयांश्च चारुधीः' [म.वि.५.३४] इत्युक्तरीत्याऽ-त्राऽगमनसमये यथा बहून् कुवादिनो जिगाय तथा **स्यानन्दूरमाप्तः** सन् सङ्कराख्यं **दैत्यं च सपदि विजितवान्** इत्यनुक्तार्थः समुच्चितो भवति । स्यानन्दूरे व्याख्यानकाले प्राप्तं 'भाष्यमकृत्वा प्रकारान्तरेण सूत्रार्थवादो महानतिक्रमः' इति वदन्तं सङ्करं 'उत्तरं भाति चेद् वद, भाष्यं तु करिष्यामः' इत्युक्त्वा जिगायेति भावः । **विश्ववन्द्यः** इत्येतदत्रापि सम्बध्यते । सर्वैः प्राज्ञैः स्तुत्य इत्यर्थः । 'प्राज्ञैर्महापूरुषसर्वलक्षणैः सम्पन्नदेहोऽयमितीरिते प्रभौ' [म.वि.५.४०] इत्युक्तरीत्या सङ्करसमीपे विद्वद्भिः श्रीमदाचार्यस्तुतेः कृतत्वात् । **अथ फाल्गुनं तीर्थं** कन्यातीर्थं **आप्तः** । तत्र शापेन ग्राहत्वं प्राप्तानां पञ्चाप्सरसामर्जुनेन मोचितत्वात् कन्यातीर्थं फाल्गुनमित्युच्यते । उक्तं च श्रीमद्भारततात्पर्यनिर्णये– 'विप्रापहासात् कुत्सितयोनितस्ताः कन्यातीर्थे पाण्डवः सम्प्रमोच्य' [ता.नि.२०.१६५] इति । अनेन 'स्नात्वाऽत्र तीर्थेष्वचिरेण कन्यकातीर्थे सुतीर्थे सुखतीर्थ आप्लुतः' [म.वि.५.४२] इत्युक्तकथा सूचिता । सेतुं च समुद्रसेतुं चेत्यर्थः । **आप्तः** । **अत्रापि** सेतावपि **खलं** सङ्करं **हास्यं** परिहासविषयं **कृतवान्** । 'मदीयदण्डखण्डनस्यानन्त-शयनक्षेत्रे त्वया प्रतिज्ञातत्वात् तदनुसारेण दण्डखण्डनं कुरु । न चेत् त्वं नपुंसकः' इत्याद्युक्त्या परिहासविषयं कृतवानिति भावः । अनन्तशयनक्षेत्रे

तन्मतदूषणेन तदीयस्फिग्दूषणेन च यथा तं हास्यं कृतवान् तथा अत्रापि इत्यपिशब्दाभिप्रायः । तत्रतत्र सभासु, सेतौ चातुर्मास्यमुपविश्य च **सर्वजित्** सर्वान् विदुषो जयतीति तथोक्तः । 'यायाः प्रसक्ताः परिषत्सु पूरुषैः' [म.वि.५.४५], 'अचाल्यमानः सगुरुः स चापलैः' [म.वि.५.४५] इत्युक्तकथाऽनेन सूचिता । **अथ** रङ्गक्षेत्रमागत्य तत्र **रङ्गनाथं नत्वा** । 'आशामुदीचीं प्रययावसौ क्रमात्' [म.वि.५.४८] इत्युक्तक्रमेण **यान्** गच्छन् इत्यर्थः । **उपनदि** नद्याः पयस्विन्याः समीप इत्यर्थः । 'अव्ययं विभक्तिसमीप–'[२.१.६] इत्यादिनाऽव्ययीभावसमासः । 'अव्ययीभावश्च' [२.४.१८] इत्यनेनाव्ययता क्लीबता च । अव्ययात् 'अव्ययादाप्सुपः' [२.४.८२] इति सप्तम्या लुक् । क्लीबत्वात् 'ह्रस्वो नपुंसके प्रातिपदिकस्य' [१.२.४७] इति ह्रस्वः । 'स्थिते' इति शेषः । **विबुधौकसि** कस्मिंश्चिद् देवालये **विश्ववन्द्यः** । पयस्विनीतीरगतदेवालयप्रवेशानन्तरं 'प्रापुर्द्विजेन्द्रास्तमपूर्वपूरुषम्'[म.वि.५.५०] इत्याद्युक्तप्रकारेण दिदृक्षया आगतैर्विश्वैः जनैः वन्द्य इत्यर्थः । **धन्यः** कृतार्थः ।'अनपेक्षो गुणैः पूर्णो धन्य इत्यभिधीयते' इति वचनात् । धन्यः इति विशेषणेन 'सुस्मितेन्दुमरविन्दलोचनम्' [म.वि.५.५१] 'विद्योरुद्युतिधीरतारकतिरस्कारे पतङ्गायितः'[म.वि.५२] इति श्लोकद्वयोक्तं माहात्म्यं सूचितं भवति । एवंविधः **सः** मध्वः **मां अवेत्** रक्षत्वित्यर्थः । अव रक्षण इति धातोर्विधौ लिङ् ॥

(सं.दी.) याम्याशां यान् [३०] बहुफलसमितेः प्रभोक्ता [३१], यान्तीं क्षीरिणीं प्रेक्ष्य [३५], स्यानन्दूरे गतमनन्तशयनं च प्रेक्ष्य [३६], तत्र दैत्यं च सपदि विजितवान् [३८-३९] फाल्गुनं तीर्थमाप्तः [४२] सेतुं चाऽप्तः [४२], अथात्रापि खलं हास्यं कृतवान् [४३-४४] सर्वजित् [४५] । रङ्गनाथं नत्वा [४७] यान् उपनदि विबुधौकसि विश्ववन्द्यः [४८-५२] स धन्यो मध्वो मामवेत् ॥ १० ॥

[षष्ठसर्गकथा]

**विश्वादीनां शतार्थप्रवचनचतुरो दानसूक्तार्थवादी
दिव्यज्ञानप्रकाशी सकलजिदखिलज्ञाभिधः प्राप्तरूप्यः ।
भीमो वा भीमसन्धः खलकुलदमने गीतिकाभाष्यकारी
गुर्वर्ची[1] यानुदीर्ची मम मनसि लसेत् तीर्थशोधी स मध्वः ॥ ११ ॥**

(सौ.प्र.) विश्वादीनामिति । तस्मिन् देवालये ऐतरेयशाखागतसूक्तोपन्यासकाले प्रसङ्गात् **विश्वादीनाम्**, 'विश्वं विष्णुर्वषट्कारः' इत्यादीनां विष्णुसहस्रनाम्नां **शतार्थप्रवचनचतुरः** । शतसङ्ख्याकानामर्थानां प्रवचनं प्रकृष्टं वचनम्, उपनिषद्व्याकरणाद्यनुसारेणोपपादनमित्यर्थः । तस्मिन् चतुरः । निखिलकेरळदेशीयपण्डितमण्डितदेवालयान्तरे **दानसूक्तार्थवादी** । 'स इद् भोजो यो गृहवे ददात्यन्नकामाय चरते कृशाय' [ऋ.१०.११७.३], 'उतापृणन् मर्डितारं न विन्दते' [ऋ.१०. ११७.१] इति दातृप्रशंसकमदातृनिन्दकं 'नवा उ देवा–'[ऋ.१०.११७.१] इत्यादि सूक्तं दानसूक्तम् । तस्य अर्थं वदतीति तथोक्तः । अन्यत्र च कुत्रचित् सदसि **दानसूक्तार्थवादी** । अत्र दानसूक्तम् 'कन्या वारवायती सोममपि सुताऽविदत्'[ऋ.८.९१.१] इत्यादिकम् । 'कन्यकाहृतसुरेन्द्रवपुःश्रीदानवाचिवरसूक्तहृदुक्तौ' [म.वि.६.१७] इत्युक्तरीत्या कन्ययाऽऽहृत इन्द्रस्तस्यै कान्तिमददादित्यर्थप्रतिपादकत्वात् तदपि दानसूक्तमिति द्रष्टव्यम् । तत्रैव सदसि **दिव्यज्ञानप्रकाशी** । दिव्यं अनागतादिविषयकत्वेनालौकिकं यत् ज्ञानं तत् प्रकाशयति प्रकटयतीति तथोक्तः । 'विद्वज्ज्ञानप्रदर्शी' इति पाठे विदुषो ज्ञानं विद्वज्ज्ञानमिति कर्मणि षष्ठ्याः समासः । तत् प्रदर्शयतीति तथोक्त इत्यर्थः । तत्सूक्तगतापालाशब्दस्यातितरुणी वाच्येति स्वोक्तार्थमनङ्गीकुर्वतस्तत्रत्यान् विपश्चितः

१.'गुर्वर्थी' इति तु स्वरसः पाठः ।

प्रति, 'कश्चिद् विद्वानिहाऽयास्यति, तं पृच्छत' इत्युक्त्वा स्वयं जगाम । अथाचिरात् कश्चिद् विद्वानिहाऽगत्य तैः पृष्ट आचार्योक्तमेवार्थमाह । अनेन विद्वानायास्यतीति यद् विद्वज्ज्ञानमनागतविषयं तत् तेभ्यः प्रदर्शितं भवति । एतेन च 'अप्यनागतगतप्रतिपत्तिं श्रद्दधुः पृथुलचेतस एते' [म. वि. ६.२०] इत्युक्तरीत्या दिव्यज्ञानं प्रदर्शितं भवतीति भावः । एवमन्यत्रापि **सकलजित्** सकलान् जयतीति तथोक्तः । अत एव **अखिलज्ञाभिधः** । अखिलज्ञ इति अभिधा यस्य स तथोक्तः । सर्वविद्यास्वपि प्रौढत्वात् सर्वज्ञयतिरिति पण्डितसभासु प्रसिद्धोऽभूदिति भावः । एवं सर्वत्र कीर्तिं प्रसार्य **प्राप्तरूप्यः** प्राप्तं रूप्यं रूप्यपीठं येन स तथोक्त इत्यर्थः । **भीमो वा** भीमसेन इव । 'वा विकल्पोपमानयोः' इत्यभिधानम् । **खलकुलदमने** । खलानां दुष्टानां कुलं समूहः तस्य दमनं निग्रहः, तस्मिन् विषये **भीम-सन्धः** । भीमा भयङ्कररूपा सन्धा प्रतिज्ञा यस्य स तथोक्तः । 'सन्धा सन्धौ प्रतिज्ञायाम्' इति वैजयन्ती । दुःशासनकृतकेशाकर्षणादिना दूनां द्रौपदीं दृष्ट्वा भीमो दुःशासनादिनिग्रहमिव शिरःस्थानीयवेदान्तानां सङ्करादि-कृतापव्याख्यानरूपापकर्षणेन दूनां श्रुतिततिं दृष्ट्वा दुर्वादिनिग्रहं प्रतिज्ञात-वानिति भावः । **गीतिकाभाष्यकारी** । गीतिका भगवद्गीता । तस्याः भाष्यं करोतीति तथोक्तः । **गुर्वर्ची** । गुरुं अच्युतपज्ञं[१] अर्चयतीति तथोक्तः । 'ज्यायसे सगुरवे हरिगीताभाष्यमेष विरचय्य तदाऽदात् । हेतुवादिनि विशङ्कटबुद्धौ तीर्थमर्थयति गन्तुमनुज्ञाम्' [म.वि.६.३२-३३] इत्युक्तरीत्या गीताभाष्यं दत्वा तीर्थयात्रार्थमनुज्ञाप्रार्थनात्मकमत्र गुर्वर्चनमिति ज्ञेयम् । 'गुर्वर्थी' इति पाठे स्पष्टोऽर्थः । **उदीची** उत्तरां दिशं **यान्** गच्छन् सन् **तीर्थशोधी** । तीर्थं गङ्गादितीर्थं श्रुतिसूत्रपुराणादिशास्त्रं च शोधयतीति तथोक्तः । गुरोर्याच्ञापूर्वकमनुज्ञां प्राप्योत्तराशां गतो मध्वः स्वावगाहनेन तीर्थेषु महिमातिशयाधानलक्षणशुद्धिं शास्त्रेषु पूर्वोत्तरपरामर्शेन काल्प-

१. पूर्ववदत्रापि लिखितपुस्तके 'अच्युतप्रेक्षम्' इति पठ्यते ।

निकपाठोद्धारादिरूपशुद्धिं च कृतवानिति भावः । **सः मध्वः मम मनसि लसेत्** प्रकाशताम् । लस श्लेषणक्रीडनयोरिति[1] धातोर्लिङ् ॥ ११ ॥

(सं.दी.) अथ द्वाभ्यां षष्ठसर्गसङ्क्षेपः । विश्वादीनां शतार्थप्रवचनचतुरः [६.७], दानसूक्तार्थवादी [१३-१४;१७], दिव्यज्ञानप्रकाशी [१८-१९], सकलजित्, अखिलज्ञाभिधः[२१], प्राप्तरूप्यः [२३], खलकुल-दमने भीमो वा भीम इव भीमसन्धः [२४-३१], गीतिकाभाष्यकारी [३२], गुर्वर्थी [३३] । उदीर्चीं यान् [३४] तीर्थशोधी [३५] स मध्वो मम मनसि लसेत् ॥ ११ ॥

गङ्गातारी सुकर्मोपगतबदरिकान्तोऽत्र नारायणं यो
नत्वैकान्ते समुद् यः[2] प्रवचनकृदथो सत्तपाः कृष्णनुन्नः ।
आप्तेभ्यः कार्यलेखी स्वमनुगतनिजप्रेरकः पाणिमात्रा-
न्मारुत्याभः प्रपश्यन् हरिमपि गिरिणा सार्धमृद्ध्यै स मे स्यात् ॥
॥ १२ ॥

(सौ.प्र.) गङ्गेति । **यः गङ्गातारी** गङ्गां तरति तच्छीलः । गङ्गां तीर्त्वा गत इति भावः । गुणतोऽपि गङ्गातरणमत्र विवक्षितम् । 'वासुदेवपदसन्ततसङ्गी तेजसाऽप्यलमधःकृतशर्वः' [म.वि.६.३६] इत्यादेः । **यः सुकर्मा** सु शोभनानि कर्माणि यस्य स तथोक्तः सन् । स्मरतां चित्तशुद्धिद्वारा सुखदानि कर्माणि तत्रतत्र कुर्वन् सन्नित्यर्थः । **उपगतबदरिकान्तः** । उपगतः बदरिकान्तः बदरिकाश्रमसमीपं येन स तथोक्तः । 'अन्तोऽस्त्र्यवसिते मृत्यौ स्वरूपे निश्चयेऽन्तिके' इति वैजयन्ती । **यः अत्र** बदरिकाश्रमस्थानन्तमठे **नारायणं नत्वा अथो एकान्ते** रहसि **समुद्** मुदा आनन्देन सहितोऽभूदित्यर्थः । नमनानन्तरं जनतामपसार्य देवस्य पुरतः गीताभाष्यवाचनसमये 'त्वमति-

---

१.'लस कान्ताविति' इति पाठान्तरम् ।

२.'समुद्यत्प्रवचनकृत्' इति स्वरसः पाठः ।

सूक्ष्मानपि गीतार्थान् वेत्सि । तस्मात् 'गीतार्थं वक्ष्यामि शक्तितः' इत्यत्र 'लेशतः' इति वक्तव्यम्' इति नारायणवचनं श्रुत्वा मुमोदेति भावः । **अथो प्रवचनकृत्** गीताभाष्यव्याख्यानकृदित्यर्थः । 'समुद्यत्पवचनकृत्' इति पाठे सम् सम्यक् उद्यत् शोभमानं प्रवचनं करोतीति तथोक्त इत्यर्थः । **अथो** रात्रौ शयनानन्तरमपीत्यर्थः[१] । **कृष्णनुन्नः** । कृष्णः पूर्णसुखो नारायणः । 'कृषिर्भूवाचकः शब्दो णश्च निर्वृतिवाचकः' इति वचनात् । तेन नुन्नः पृथिवीताडनपूर्वकम्, 'उच्यतामुच्यताम्' इति वचनेन प्रेरितः सन्नित्यर्थः । **प्रवचनकृत्** शयनादुत्थाय प्रवचनकृदित्यर्थः । **यः सत्तपाः** । सत् उत्तमं शीतलगङ्गास्नानोपवासकाष्ठमौनादिरूपं तपः यस्य स तथोक्तः । **अथो** दिनमण्डलानन्तरमित्यर्थः । **कृष्णनुन्नः** रात्रावागतेन व्यासेन 'मदाश्रम-मायाहि' इति नुन्न इत्यर्थः । **अथो** सूर्योदयादनन्तरमित्यर्थः । **आप्तेभ्यः** शिष्येभ्यः **कार्यलेखी** कार्यं लिखति तच्छीलः । 'नेदृशं स्थलमलं शमलघ्नं नास्य तीर्थसलिलस्य समं वाः । नास्ति विष्णुसदृशं ननु दैवं नास्मदुक्ति-सदृशं हितरूपम्[२] । याति तावदधुनैव जनोऽयं व्यासरूपमजितं प्रदिदृक्षुः' [म.वि. ६.४७-४८] इत्यादिप्रकारेण कर्तव्यं दयया लिखितवानिति भावः । **अथो** लिखित्वा निर्गमनान्तरमित्यर्थः । **पाणिमात्रात्** हस्तव्यापार-मात्रादित्यर्थः । **स्वं** आत्मानम् । **अनुगतनिजप्रेरकः** अनुगतः अनुयातश्चासौ निजः स्वकीयश्च अनुगतनिजः सत्यतीर्थः । नित्यसापेक्षत्वात् समासः । 'असूर्यललाटयोर्दृशितपोः' [३.२.३६] इति ज्ञापकेन क्वचिदसमर्थ-समासाभ्यानुज्ञानाद् वा । तस्य प्रेरकः । स्वविरहमसहमानमत एवाऽत्मा-नमनुयातं सत्यतीर्थमादित्येऽरुणीभवति सति आवृत्तदेहो मध्वो गमन-सूचकहस्तव्यापारमात्रेण याहीति प्रैरयत् । प्रेरितश्च अतिशीघ्रेणानन्त-

१. 'शयनानन्तरमित्यर्थः' इति क्वचित् । २. 'नास्मदुक्तिसदृशं हितरूपं नास्ति विष्णु-सदृशं ननु दैवम्' इति वेदाङ्गतीर्थसम्मतः पाठ इति भाति ।

मठमाप । अथ तत्रत्येभ्यः स्वजनेभ्यः स्वस्मिन् मध्वेन कृतमनुग्रहविशेषं व्याश्रयान्तरसुदूरशिलास्वतिचित्रं [म.वि. ६.५१-५३] तत्प्लवनमपि वर्णयामासेति कथाऽनेन सूचिता । **अथो** गमनसमये **मारुत्याभः** । मारुतस्य अपत्ये मारुती 'अत इञ्'[४.१.९५] इत्यपत्यार्थे इञ्प्रत्ययः । तयोराभेव आभा यस्य स तथोक्तः । हनुमद्भीमसेनसमान इत्यर्थः । समुद्रतरणादिसमये हनुमानिव वेगवान् । सौगन्धिकार्थं गमनकाले भीम इव मार्गस्थानां नानारूप-दैत्यानां भयङ्कर इति भावः । **अथो यः गिरिणा** हिमवत्पर्वतेन **सार्धं हरिमपि प्रपश्यन्** अभूत् । मध्वविजये 'सुहसितकमलाकरोपगूढम्'[६.५६] इत्यादि-श्लोकद्वयोक्तरीत्या सुहसितकमलाकरोपगूढत्वादिविशेषणानां हरौ गिरौ च साम्यात् 'सदृशादृष्टचिन्ताद्याः स्मृतिबीजस्य बोधकाः' इति न्यायेन गिरिं दृष्ट्वा हरिं सस्मारेति भावः । 'हरिमपि गुरुणा' इति पाठे गमनसमये कदा नु तं द्रक्ष्यामीति स्मर्यमाणेन गुरुणा व्यासेन सार्धं गिरिदर्शनेन निमित्तेन[१] हरिमपि क्षीराब्धिगतं मूलरूपमपि स्मरन् इत्यर्थः । पर्वतं दृष्ट्वा स्मृतं मूलरूपमित्यत्र मध्वविजयोक्तं 'सुजनसुखार्थमनन्तभोगशय्यम्' [६.५६] इत्येतत् ज्ञापकमित्यनुसन्धेयम् । ननु 'दृष्ट्वा तं धरणीधरं सुवन-मालोल्लासिनं सुन्दरं स्वानन्दाकृतिमस्मरन्मुररिपुं स्वानन्दतीर्थस्तदा'[म. वि.३.५७] इत्यत्र पर्वतदर्शनं मुररिपुस्मरणं चोक्तम् । तत्कथमत्र 'मारुत्याभः प्रपश्यन्' इत्युभयविषयकदर्शनकथनमिति चेदुच्यते । 'पश्यार्थैश्चानालोचने' [८.१.२५] इति सूत्रे ज्ञानार्थैरिति वक्तव्ये पश्यार्थैरित्युक्तत्वाद् दृशि-धातुर्ज्ञानसामान्यस्यापि वाचकः । अत एव 'दृष्टिर्ज्ञानेऽक्ष्णि दर्शने' इत्यमर-कोशेऽप्युक्तम् । तथाच प्रकृते ज्ञानसामान्यपरं प्रपश्यत्पदं गिरौ हरौ च यथायोग्यं पर्यवस्यति । पाठान्तरे तु स्मरणार्थमादायैव पर्यवस्यतीति ज्ञेयम् । **सः** मध्वः **मे** मम ऋद्ध्यै ज्ञानादिवृद्ध्यै **स्यात्** । ज्ञानादिवृद्धि-दोऽस्त्विति भावः । अस भुवीति धातोर्लिङ् ॥ १२ ॥

१, ' गिरिदर्शननिमित्तेन' इति क्वचित् ।

(सं.दी.) गङ्गातारी [३६] सुकर्मा [३७] उपगतबदरिकान्तः [३७] योऽत्रैकान्ते नारायणं नत्वा संमुद्यत्प्रवचनकृत् [३८-३९;४१-४२], अथो सत्तपाः [४३-४४] कृष्णनुन्नः [४५] आप्तेभ्यः कार्यलेखी [४६-४८] स्वमनुगतनिजप्रेरकः पाणिमात्रात् [५०-५२] । मारुत्याभः [५४], गिरिणा सार्धं हरिमपि मनसा प्रपश्यन् [५५-५७] ऋद्ध्यै स मे स्यात् ज्ञानभक्त्यादिसमृद्ध्यै ॥ १२ ॥

[सप्तमसर्गकथा]

योऽपश्यत् स्वाश्रमाग्र्यं मुनिमहितगुणो दिव्यसालं च चित्रं
तत्रर्षीणां समाजे हरिमपि मुनितः सत्यवत्यां प्रजातम् ।
कर्तारं भारतादेर्भरतवरगुरुं ब्रह्मसूत्रस्य चाहो
निर्दोषं नित्यपूर्णागणितगुणमसौ प्रीयतां मे स चेशः ॥ १३ ॥

(सौ.प्र.) य इति । यः मध्वः । **स्वाश्रमाग्र्यं** । शोभनाः आश्रमाः स्वाश्रमाः । तेषु अग्र्यं श्रेष्ठमित्यर्थः । हिमवत उत्तरभागे स्थितं बदरिकाश्रममिति भावः । **अपश्यत्** । दृशिर् प्रेक्षणे इति धातोर्लङ् । कीदृशः? **मुनिमहितगुणः** । मुनिभिः व्यासशिष्यैः महिताः पूजिताः गुणाः यस्य स तथोक्तः । आश्रममागच्छन्तमेनं दृष्ट्वा 'अयं ब्रह्मा वा पवनो वा स्यात् । अन्यथैतादृशलक्षणसम्पत्त्ययोगात्' इति मुनयो व्यचिन्तयन् इति कथाऽनेन विशेषणेन सूचिता । **चित्रं** आश्चर्यं **दिव्यसालं च** दिव्यं वृक्षं च **अपश्यत्** । 'वृक्षो महीरुहः शाखी विटपी पादपस्तरुः । अनोकहः कुजः सालः' इत्यमरः । 'अविळम्बगतिर्न्यशामयत् तरुमारात् सुरपादपोत्तमम्' [म.वि.७.१०] इत्युक्तरीत्या मन्दारादिदेववृक्षवदुत्तमत्त्वं द्योतयितुं दिव्यपदम् । चित्रमित्युक्त्या 'मसृणत्वचमुन्नतं ततम्'[म.वि.७.११] इत्याद्युक्तरीत्या शेषगरुडनिगमोपमितत्वं वृक्षस्यासूचि । **तत्र** तस्मिन् आश्रमे । तद्वृक्षवेदिकायामित्यर्थः । **ऋषीणां समाजेऽपि** इत्यपिशब्दसम्बन्धः । तथाच 'निजहृत्क-

मलेऽतिनिर्मले सततं साधु निशामयन्नपि'[म.वि.७.१७] इत्युक्तरीत्या न केवलं हृदय एव हरिं पश्यति । किं नाम? ऋषीणां समाजः समूहः । तत्रापि तन्मध्येऽपीति यावत्, **हरिमपश्यत्** इति सूचितम् । कीदृशं हरिम्? **मुनितः** पराशरादित्यर्थः । 'सर्वप्रातिपदिकेभ्यस्तसिलिति केचित्' इत्युक्तेर्मुनि-शब्दात् तसिल् । **सत्यवत्यां प्रजातं** अवतीर्णम् । **भारतादेः** । भारतं श्रीमन्महा-भारतं आदिः यस्य स तथोक्तः तस्य । आदिशब्देन पुराणसमूह उच्यते । **ब्रह्मसूत्रस्य च** । समुदायाभिप्रायमेकवचनम् । उभयत्र कर्मणि षष्ठी । **कर्तारं** निर्मातरम् । **भरतवरगुरुम्** । भरतगोत्रोत्पन्नाः भरताः । गोत्रापत्यार्थक-स्याण्प्रत्ययस्य तद्राजसञ्ज्ञायां 'तद्राजस्य बहुषु तेनैवास्त्रियाम्' [२.४.६२] इति लुक् । तेषु वराः श्रेष्ठाः पाण्डुसुताः । तेषां गुरुं तदुपलक्षितसज्जनगुरुमि-त्यर्थः । **निर्दोषं नित्यपूर्णागणितगुणम्** । नित्याः पूर्णाः प्रत्येकं पूर्णाः अगणिताः अमिताः गुणाः आनन्दाद्याः यस्य तं तथोक्तम् । उक्तविशेषण-विशिष्टत्वेन वेदव्यासमपश्यदिति भावः । **अहो** इत्यनेन 'अवलोक्य पुनःपुनर्नवं तमसौ विस्मित इत्यचिन्तयत्'[म.वि.७.१७] इत्युक्तरीत्या आश्चर्य-बुद्ध्या तमपश्यदिति सूचितम् । **असौ** मध्वः **मे प्रीयताम्** । **ईशः** स्वामी स च व्यासश्च **मे प्रीयताम्** इति प्रत्येकं सम्बन्धः । प्रीङ् प्रीणन इति धातोर्लोट् ॥ १३ ॥

(सं.दी.) अथ द्वाभ्यां सप्तमसर्गसङ्क्षेपः । यः स्वाश्रमाग्र्यमपश्यत् [७.१-३], मुनिमहितगुणः [५-९] चित्रं दिव्यसालं चापश्यत् [१०-१३], तत्रर्षीणां समाजे [१४-१५] मुनितः सत्यवत्यां प्रजातं हरिमप्यपश्यत् [१६-१८], भारतादेः ब्रह्मसूत्रस्य च कर्तारम् [२०] भरतवरगुरुम् [२१] निर्दोषं नित्यपूर्णागणितगुणगणम् [१८], अहो सोऽसौ मे प्रीयताम् । स ईशश्च मे प्रीयताम् ॥ १३ ॥

सर्वाङ्गैः सर्ववन्द्यैर्विमलकुवलयश्यामलैः शोभमानं
सज्ज्ञानानन्दतेजःप्रवरगुणमयैः पूर्णलावण्यरूपैः ।

बिम्बोष्ठं पद्मपादं शुभकपिशजटं सैणचर्माणमीशं
दृष्ट्वा नत्वोपगूढः स गुरुरवतु नः सूपविष्टो मुनीष्टः ॥ १४ ॥

(सौ.प्र.) सर्वाङ्गैरिति । ईशं व्यासं **दृष्ट्वा** अथ **नत्वा** व्यासेन **उपगूढः** आश्लिष्टः सन् **सूपविष्टः** मुनिदत्तासने सम्यगुपविष्टः अथ **मुनीष्टः**, 'अवगम्य तं मुनिगणा वरिष्ठतो विधिवद् व्यधुर्विधिविदोऽस्य माननाम्' [म. वि. ७. ५८] इत्याद्युक्तरीत्या मुनीष्टः, व्यासवाक्येन स्वस्वरूपज्ञैर्मुनिभिः इष्टः पूजितः । यजधातोः क्तप्रत्यये 'वचिस्वपि–'[६.१.१५] इत्यादिना यकारस्य सम्प्रसारणे 'व्रश्चभ्रस्ज–' [८.२. ३६] इत्यादिना जकारषत्वे ष्टुत्वे च सति इष्ट इति रूपं सिद्ध्यति। **सः गुरुः** मध्वः **नः** अस्मान् **अवतु** इत्यन्वयः । कीदृशमीशम्? **सर्वाङ्गैः** सर्वावयवैरित्यर्थः । 'अङ्गं प्रतीकोऽवयवः' इत्यभिधानम् । **शोभमानम्** । कीदृशैः सर्वाङ्गैः? **सर्ववन्द्यैः** सर्वैः नम्यैः स्तुत्यैर्वा । वदि अभिवादनस्तुत्योरिति धातोः । **विमलकुवलयश्यामलैः** विमलं कुवलयमिव श्यामलैरित्यर्थः । 'उपमानानि सामान्यवचनैः' [२.१.५५] इत्यनेन समासः। 'स्यादुत्पलं कुवलयम्' इत्यमरः। **सज्ज्ञानानन्दतेजःप्रवरगुणमयैः** । सन्ति च तानि ज्ञानानन्दतेजांसि च। 'तेजः प्रभावे दीप्तौ च बले' इत्यमरः । ज्ञानस्य सत्त्वं याथार्थ्यम्; आनन्दस्य सत्त्वं नाम दुःखासम्भिन्नत्वम्; तेजसः सत्त्वं तु अन्यतेजसाऽनभिभूतत्वमिति द्रष्टव्यम्। तानि प्रवराणि येषां ते सज्ज्ञानानन्दतेजःप्रवराः। प्रवरत्वमौपचारिकम्; भगवद्गुणानामन्योन्यं तारतम्याभावादिति द्रष्टव्यम् । तादृशाः ये गुणाः तन्मयैः तदात्मकैरित्यर्थः । तादात्म्ये मयट्प्रत्ययः । **पूर्णलावण्यरूपैः** पूर्णं लावण्यं सौन्दर्यं यस्य तत् पूर्णलावण्यम् । तादृशं रूपं स्वरूपं येषां तैस्तथोक्तैरित्यर्थः । पुनः कीदृशमीशम्? **बिम्बोष्ठम्** । बिम्बमिव ओष्ठौ यस्य तं तथोक्तम् । पक्वबिम्बफलवद् रक्तवर्णाभ्यामोष्ठाभ्यां युक्तमित्यर्थः । **पद्मपादम्** । पद्ममिव पादौ यस्य तं तथोक्तम् । नैर्मल्यसौन्दर्यसौकुमार्यादिगुणयुक्तचरणोपेतमित्यर्थः । **शुभकपिशजटम्** । शुभा कपिशा पिङ्ग-

वर्णा जटा यस्य स तथोक्तः तम् । 'नवमम्बुधरं विडम्बयद् वरविद्युद्वलयं जगद्गुरोः' [म.वि.७.४५] इत्युक्तरीत्या विद्युद्वर्णजटोपेतमित्यर्थः । **सैण-चर्माणम्** । एणः कृष्णसारः । तस्य चर्मणा सहितमित्यर्थः ॥ १४ ॥

(सं.दी.) सर्ववन्द्यैः [२५] विमलकुवलयश्यामलैः [२३] सज्ज्ञानानन्दतेजःप्रवरगुणमयैः [२४] पूर्णलावण्यरूपैः सर्वाङ्गैः शोभमानम् [२६-४५] । सर्वाङ्गैरिति सामान्यत उक्तमिदानीं विशिष्याह– बिम्बोष्ठम् [३९] पद्मपादम् [२५-२६] शुभकपिशजटम् [४५] सैणचर्माणम् [३१] ईशं दृष्ट्वा [१६] नत्वा [५०] उपगूढः [५२] सूपविष्टः [५७] । मुनीष्टः [५८] स गुरुरवतु नः ॥ १४ ॥

[अष्टमसर्गकथा]

शिष्यं व्यासस्य नारायणमथ च गतं सर्वहेतुं सुमत्स्यं
साश्वास्यं कूर्मकोलौ नृहरिमथ मनुं वामनं बुद्धरामौ ।
व्यासं काकुत्स्थकृष्णावतिचिरमितरानन्दनं कल्कियज्ञौ
सिद्धेशं नौमि धन्वन्तरिवरवनिताख्यं तमेनं स्मरन्तम् ॥ १५ ॥

(सौ.प्र.) शिष्यमिति । **व्यासस्य शिष्यम्** । **अथ नारायणं च** आश्रमान्तरे स्थितं धर्मसुतं नारायणं च **गतं** गतवन्तम् । **अथ** तं नारायणं **स्मरन्तं एनं** मध्वं **नौमि** स्तौमीत्यन्वयः । णु स्तुताविति धातोर्लट् । **अतिचिरम्** इत्येतत् स्मरन्तं नौमि इत्याभ्यां सम्बध्यते । बहुकालमित्यर्थः । एतेन वेदव्यासादुपनिषद्ब्रह्मसूत्राद्यर्थं श्रुत्वा व्यासेन सह नारायणाश्रमं गत्वा तं सस्मारेति कथा सूचिता । नारायणस्मरणं च सर्वजगत्कारणत्वेनानन्तावतारात्मकतया चेत्यभिप्रेत्याऽऽह– **सर्वहेतुमि**त्यादिना । **सर्वहेतुं** [1]सर्वजगत्कर्तारमित्यर्थः । **सुमत्स्यं** शोभनमत्स्यरूपमित्यर्थः । सु इत्यनेन 'सुखमय मीन हे भव मम शरणम्' [द्वा.स्तु.] इत्युक्तरीत्या प्राकृतमत्स्यवैलक्षण्यं द्योतयति । **साश्वा-**

१. 'जगत्कर्तारमित्यर्थः' इति क्वचित् ।

स्यम् । अश्वस्य आस्यमिव आस्यं यस्य स तथोक्तः । 'सप्तम्युपमान-पूर्वपदस्योत्तरपदलोपश्च[1]' [२.२.२४] इत्यनेन समासः । तेनावतारेण सहितः साश्वास्यः, तमित्यर्थः । 'तेन सहेति तुल्ययोगे' [२.२.२८] इति समासः । 'वोपसर्जनस्य' [६.३.८२] इति सहस्य सादेशः । **कूर्मकोलौ** कूर्मवराहौ । 'वराहः सूकरो घृष्टिः कोलः पोत्री किरिः किटिः' इत्यमरः । **नृहरिम्** नृसिंहमित्यर्थः । 'सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः' इत्यमरः । **मनुं** गजेन्द्रमोक्षदं तापसमनुमित्यर्थः । 'हरिस्तापसनामाऽसौ जातस्तपसि वै मनुः । गजेन्द्रं मोचयामास ससर्ज च जगद् विभुः' इति मात्स्यवचनात् । **[अथ वामनम्]। बुद्धरामौ** इत्यत्र रामः परशुरामः । **[अथ व्यासम्]। काकुत्स्थकृष्णौ** । ककुत्स्थः पुरञ्जयः । तस्य गोत्रापत्यं काकुत्स्थो रामचन्द्रः । 'शशाद इति विश्रुतः । पुरञ्जयस्तस्य सुत इन्द्रवाह इतीरितः । ककुत्स्थ इति चाप्युक्तः–' [भाग.९.६.११-१२] इति नवमस्कन्धवचनात् । कृष्णो गोपालकृष्णः । **इतरानन्दनम्** । इतराख्यायाः पुत्रं महिदासमित्यर्थः । 'महिदासाभिधो जज्ञ इतरायास्तपोबलात्' [ऐत.भा.] इति वचनात् । **कल्कियज्ञौ** आकूत्यां रुचिप्रजेश्वराज्जातो यज्ञनामा । **सिद्धेशं** कपिलमित्यर्थः । 'सिद्धानां कपिलो मुनिः' [१०.२६] इति गीतावचनात् । **धन्वन्तरिवरवनिताख्यम्** । धन्वन्तरिर्वरवनितेत्याख्ये नामनी यस्य तं तथोक्तम् । अमृतकलशं गृहीत्वा क्षीराब्धेराविर्भूतो धन्वन्तरिः । देवानाममृतपरिवेषणाय गृहीतं स्त्रीरूपं वरवनिता । एवंविधं **तं नारायणं** इति विशेषणविशेष्यभावः । ननु कूर्मकोलावित्यादीनां द्विवचनान्तानां तमित्येकवचनान्तस्य च कथं विशेषणविशेष्यभावः? उच्यते । 'द्वित्वं चैकस्य युज्यते । यः सेतुरिति चैकत्ववचनेन विशेषणात्' इत्यनुव्याख्यानोक्तरीत्या 'ऋतं पिबन्तौ सुकृतस्य लोके' [कठ.१.३.१], 'यः सेतुरीजानानामक्षरं ब्रह्म यत्परम्' [१.३.२] इत्यादिवद् भिन्नवचनत्वेऽपि घटते विशेषणविशेष्यभावः । अथवा तं नारायणं सर्वहेतुं

---

१. '–लोपश्च वक्तव्यः' इति समग्रं वार्तिकम् ।

स्मरन्तं सुमत्स्यं स्मरन्तं साश्वास्यं स्मरन्तं कूर्मकोलौ स्मरन्तमित्यादिरीत्या उद्देश्यविधेयभावेनान्वयः । तं सर्वहेतुत्वसुमत्स्यत्वसाश्वास्यत्वकूर्मकोलत्वादिना स्मरन्तमित्यर्थः । तथाच वेदाः प्रमाणमित्यादिवद् भिन्नवचनत्वं घटते । मत्स्यादिरूपान्वितं तं स्मरन्तमिति योजनाङ्गीकारे सर्वहेतुमित्यादेस्तथा पृथगन्वयासम्भवाद् विशेषणत्वादिनाऽन्वयेऽङ्गीकर्तव्ये द्वैरूप्यापत्तिः । किञ्च तथा सति नारायणोऽयं मत्स्याद्यवतारात्मक इति स्मरणमनुक्तं स्यात् । 'प्रददावसावनिमिषेश्वरः प्रभुः' [म.वि.८.१४], ललितबाल्यवानयम्' [८.१७] इत्युक्त्या मध्वविजये तादृशं स्मरणं विवक्षितमित्यवगम्यते च । तस्मादैकरूप्येणान्वयसिद्ध्यर्थमर्थविशेषलाभार्थं चैवं योजितमित्यनुसन्धेयम् ॥ १५ ॥

(सं.दी.) अथ द्वाभ्यामष्टमसर्गसङ्क्षेपः । व्यासस्य शिष्यम् [२-५], अथ च नारायणं गतम् [६], सर्वहेतुम् [११-१२] सुमत्स्यं साश्वास्यम् [१४] कूर्मकोलौ[१५] नृहरिमथ मनुं तापसम् [१६] वामनं बुद्धं च [१७] परशुरामं व्यासं च [१८] काकुत्स्थकृष्णौ [१९-३४] इतरानन्दनं महिदासं कल्किनं च [३५] यज्ञं सिद्धेशं च कपिलम् [३६] धन्वन्तरिं वरवनिताख्यं च मोहिनीरूपम् [३७] स्मरन्तम् [९] तमेनं मध्वं नौमि ॥ १५ ॥

दत्तात्रेयं कुमारं हृदि दधदृषभं हंसकृष्णौ हरिं तं
धार्मं नारायणाख्यं सदशशतसहस्राद्यनन्तावतारम् ।
तन्नुन्नस्तत्वसूक्त्यै वरमुचितनरैरेष सेव्यत्वमाप्तः
कृच्छ्राद् यात्रोन्मुखो मे स गतिरपि हरिर्व्यासनाराणाख्यः ॥ १६ ॥

(सौ.प्र.) दत्तात्रेयमिति । अत्रेरपत्यमात्रेयः । 'इतश्चानिञः' [४.१.१२२] इत्यपत्यार्थे ढक्प्रत्ययः । दत्तश्चासौ आत्रेयश्चेति तथोक्तः । दत्तनामक आत्रेय इत्यर्थः । विशेषणविशेष्यभावस्य कामचारित्वात् समासः । कुमारः

सनत्कुमारापरनामा ब्रह्मचारिरूपः, तम् । 'कुमारनामा भगवान् स्वयं स्वस्मादजायत । दिदेश ब्रह्मणे ब्रह्म ब्रह्मचर्ये स्थितो विभुः' इति प्रथमस्कन्धतात्पर्योदाहृतवाक्यात्; 'सनत्कुमारनामा तु ब्रह्मचारिवपुर्हरिः । सनत्कुमारमपरं ब्रह्मपुत्रं विवेश यः' इति षष्ठस्कन्धतात्पर्योदाहृतवाक्याच्च । **ऋषभं** नाभिराजपुत्रम् । सनकादीनां तत्वोपदेशाय गृहीतं हंसरूपम् । 'तस्याहं हंसरूपेण सकाशमगमं तदा । दृष्ट्वा मां त उपव्रज्य कृत्वा पादाभिवन्दनम्'[भाग.११.१३.१९-२०] इत्येकादशस्कन्धवचनात् । कृष्णो धर्मसूनुः । हरिरपि तत्सूनुः । 'नरो नारायणश्चैव हरिः कृष्णस्तथैव च । चत्वारो धर्मतनया हरिरेव त्रयो मताः' इति षाड्गुण्यवचनात् । **धार्मं** धर्मसुतं **नारायणाख्यम्** । **सदशशतसहस्राद्यनन्तावतारम्** । दश च शतं च सहस्रं च तान्यादयो येषां ते दशशतसहस्रादयः । तथोक्ताश्च ते अनन्तावताराश्च तैः सहितमित्यर्थः । मत्स्याद्या दश । 'नारायणो नरः शौरिः' इत्यादि शतम् । विश्वादि सहस्रमिति द्रष्टव्यम् । **तं** पुरोवर्तिनं परमात्मानं **हृदि दधत्** स्मरन् इत्यर्थः । 'नाभ्यस्ताच्छतुः' [७.१.७८] इति नुमभावः । धार्मं नारायणाख्यं इत्यनेन पुरोवर्तिरूपे धार्मत्वादिकं च स्मृतवानित्युक्तं भवति । सदशशतेत्यनेन 'परमात्मने सततमेकरूपिणे' [म.वि.८.४१] इत्युक्तरीत्या पुनर्मत्स्याद्यात्मकतामनुक्तानन्तावतारात्मकतां च स्मृतवानित्युक्तं भवति । पुनः कीदृशः? **तत्वसूक्त्यै** । परापरतत्वानां सूक्तिः सम्यग् वचनम् । तस्यै **तन्नुन्नः** । तेन नारायणेन नुन्नः प्रेरितः । अनेन मध्वेन नतो नारायणो व्यासमध्वाभ्यां सहोपविश्य विविधाः सङ्कथाः कृत्वा मध्वं प्रति 'ब्रह्मसूत्रभाष्यं कुरु । श्रुत्यादिकं यथावद् व्याकुरु । सत्वरं व्रज' इति जगादेति कथा सूचिता । पुनः कीदृशः? **उचितनरैः** तत्वज्ञानयोग्यैर्नरैर्मनुष्यैः **सेव्यत्वं वरं** सेव्यत्वलक्षणं वरमित्यर्थः । **आप्तः** प्राप्तवानित्यर्थः । 'भवत्पादसमर्चनं कुर्वन् सन् अत्र स्थातुमिच्छामि । तथाऽनुग्रहोऽस्तु । कलिकाले योग्या जना भुवि न सन्ति च' इति मध्वेनोक्तो नारायणः 'भुवि

दुर्मतकलुषितचित्ताः सज्जनाः सन्ति । कर्दमपतितरत्नानि जलैरिव तान् भाष्यादिरूपवचनैस्त्वं शोधय । तव कीर्तिरसतां खेदकर्यपि सतां परमानन्दकरी । तस्मात् सन्तस्त्वां सेवेरन् । ममाऽऽज्ञया विशेषतस्त्वत्कीर्तिश्रवणेन तुष्टास्त्वां सेवेरन्' इति जगादेति भावः । पुनः कीदृशः? व्यासनारायणविरहासहतया **कृच्छ्रात्** कष्टात् **यात्रोन्मुखः** । यात्रायां प्रयाणे उन्मुखः उद्युक्तः **एषः** मध्वः **मे गतिः** भूयादिति शेषः । **व्यासनारायणाख्यः** । व्यासनारायणाविति आख्ये यस्य स तथोक्तः **सः हरिरपि मे गतिः** भूयादिति प्रत्येकमन्वयः । तेन गतिरित्येकवचनोपपत्तिः ॥ १६ ॥

(सं.दी.) दत्तात्रेयं सनत्कुमारं च [३८] ऋषभं हंसं च [३९] धार्मं कृष्णं हरिं नारायणाख्यं च [४०] सदशशतसहस्राद्यनन्तावतारम् [४१] हृदि दधत् [४२] तत्वसूक्त्यै तन्नुन्नः [४४-४६] उचितनरैः सेव्यत्वं वरमाप्तः [५०-५१] कृच्छ्राद् यात्रोन्मुखः [५३] स मध्वो मे गतिः । हरिरपि व्यासनारायणाख्यः भूयान्मे गतिः ॥ १६ ॥

[नवमसर्गकथा]

लब्ध्वाऽनुज्ञां मुकुन्दात् स्वजनमुपगतोऽनेकभिक्षाप्रभोक्ता-
ऽतुल्यं भाष्यं च कुर्वन् स्वसमगुणगणं सम्प्रयातः पुनर्यान् ।
षट्छास्त्राशेषशाखास्वखिलविजयवान् शोभनं सूरिवर्यं
शिष्यं लब्ध्वाऽतिजैत्रं पुनरपि विविधान् प्राप्तरूप्यो गतिर्मे ॥ १७॥

(सौ.प्र.) लब्ध्वेति । अत्र मध्व इति विशेष्यपदं भूयादिति क्रियापदं चाध्याहृत्य मध्वो **मे गतिः** भूयादिति योजनीयम् । कीदृशो मध्वः? **मुकुन्दात्** द्विरूपात् हरेः **अनुज्ञां लब्ध्वा** प्राप्य दक्षिणबदरिकाश्रमस्थं **स्वजनं** शिष्यजनमिति भावः । **उपगतः** । **अनेकभिक्षाप्रभोक्ता** । अनेकेषां भिक्षाः अग्निशर्मपूर्वकैर्बहुभिर्द्विजैराहृतान्यन्नानीत्यर्थः । 'दीदिविरन्नं तथौदनं भिक्षा' इति हलः । तासां प्रभोक्ता । मध्वं सत्वरं जिगमिषुं मत्वाऽहमहमिकया ते

विप्रा भिक्षार्थमामन्त्रणमकार्षुः । भक्ताधीनो मध्वः सर्वेभ्यः क्षणं ददौ च । अथ सपरिवारस्यास्य यथा पर्याप्तं स्यात् तथा सोपस्करं बह्वन्नं ते प्रत्येकमाजह्रुः । तदन्नं यावदपेक्षितं शिष्येभ्यः शेषयित्वाऽतिरिक्तमन्नसमूहं स्वयं बुभुज इति भावः । तत्रैव **भाष्यं** ब्रह्मसूत्रभाष्यं कुर्वन् । कीदृशम्? **अतुल्यं स्वसमगुणगणं च** इति विशेषणसमुच्चायकतया चशब्दः सम्बध्यते । एकविंशतिकुभाष्यदूषकतया श्रुतिस्मृत्युपबृंहिततया च न विद्यते तुल्यं यस्य तत् तथोक्तम् । स्वेन समः गुणगणः यस्य तत् तथोक्तम् । वेदव्यासमनःप्रियत्ववासुदेवगुणसाधकत्वादिगुणा मध्वे भाष्ये च सन्तीति भावः । 'प्रदर्शिते विष्णुबले समस्ततो हराच्च निःसङ्ख्यतया महाधिके'[ता.नि.४.५३] 'योगीन्द्राश्चित्रलोकाधिपनिभविभवा मध्वदासा जयन्ति'[तीर्थप्र.१.८] इत्यादिवत् 'स्वसमे'त्यनेन स्वगुणसमेति लभ्यते । क्वचित् 'स्वगुणसमगुणं' इति पाठः । अथानन्तमठात् **सम्प्रयातः** प्रस्थितः सन् **पुनः यान्** पुनरपि क्रमेण दक्षिणाभिमुखतया गोदावरीतीरं गच्छन् इत्यर्थः । गोदावरीतीरे **अखिलविजयवान्** अखिलानां पण्डितानां विजयोऽस्यास्तीति तथोक्तः, अखिलान् जितवानित्यर्थः । कासु विद्यासु? **षट्छास्त्राशेषशाखासु ।** षट् च तानि शास्त्राणि चेति विशेषणसमासः । द्विगुत्वं नाऽश्रितम् । तथा सति पञ्चपूलीत्यादिवत् 'द्विगोः'[४.१.२१] इति ङीप्प्रत्यये षट्च्छास्त्रीति स्यात् । अथवा षट्सङ्ख्यानि शास्त्रणीति समासः । शाकपार्थिवादित्वादुत्तरपदलोपः । षट् शास्त्राणि चात्र भाट्टप्राभाकरवैशेषिकनैयायिकबौद्धचार्वाकरूपाणि । तानि च अशेषशाखाः सर्वाः वेदशाखाश्च । 'पण्डितैर्द्विनवशाखिभिः श्रुतीः'[म.वि.९.१५] इत्युक्तरीत्या अष्टादशवेदशाखाश्चेत्यर्थः । तासु । विषयसप्तमीयम् । **अतिजैत्रम्** । जयशीलो जेता । स एव जैत्रः ।'प्रज्ञादिभ्यश्च' [५.४.३८] इति स्वार्थेऽण्प्रत्ययः । अतिशयेन जैत्रः अतिजैत्रः । अथवा जैत्रान् अतिक्रान्तः अतिजैत्रः । 'अत्यादयः क्रान्ताद्यर्थे द्वितीयया'[वा.२.२.१८] इति समासः, तम् । **सूरिवर्यं** पण्डितश्रेष्ठम् ।

'पण्डितः सूरिराचार्यः' इति धनञ्जयः । **शोभनं** शोभनभट्टनामकं **शिष्यं लब्ध्वा** । अतिजैत्रमित्यादिविशेषणेन 'यस्त्रयीसकलपक्षशिक्षकस्तत्र संसदि वरिष्ठसम्मतः'[म.वि.९.१७] इत्यादिनोक्तं तन्माहात्म्यं सूचितम् । स्वपाण्डित्यमुपलभ्यातिविस्मितायात एव शिष्यत्वं प्राप्ताय शोभनभट्टाय भाष्यं व्याचख्याविति कथाऽनेन सूचिता । 'निम्नभूरिव सतीः प्रजा व्रजन्' [म.वि.९.२८] इत्युक्तरीत्या **पुनरपि विविधान्** शिष्यान् **लब्ध्वा प्राप्तरूप्यः** । प्राप्तं रूप्यं रूप्यपीठं येन स तथोक्त इत्यर्थः ॥ १७ ॥

(सं.दी.) अथ द्वाभ्यां नवमसर्गसङ्क्षेपः । मुकुन्दादनुज्ञां लब्ध्वा [९.३] स्वजनमुपगतः [६] अनेकभिक्षाप्रभोक्ता [७], स्वसमगुणगणमतुल्यं भाष्यं च कुर्वन् [८-१२] सम्प्रयातः पुनर्यान् [१४] षट्शास्त्राशेषशाखास्वखिलविजयवान् [१५-१६] अतिजैत्रम् [२०] शोभनं सूरिवर्यं शिष्यं लब्ध्वा [१७-१८], पुनरपि विविधान् शिष्यान् लब्ध्वा [२८], प्राप्तरूप्यः[२९] स मे गतिः शरणम् ॥ १७ ॥

सख्ये व्याख्याय भाष्यं कलिमलमपनीयाच्युतज्ञाय चालं
कार्ष्णीमर्चामचाल्यां त्रिदशकतरुणैर्लीलयाऽऽनीय रूप्ये ।
आस्थाप्योदस्य यज्ञप्रतिहतिनिरतान् कारयित्वा स्वयज्ञं
व्यासं नत्वा पुनश्च प्रतिगतरजतः सम्प्रसीदेत् स मध्वः ॥ १८ ॥

(सौ.प्र.) **सख्य** इति । **सख्ये** लिकुचकुलान्वयोद्भवाय ज्येष्ठाय यतये **भाष्यं व्याख्याय, अच्युतज्ञाय च** अच्युतप्रज्ञाय[१] **भाष्यं व्याख्याय,** 'सानुनीतिरथ नीनिमानयं भाष्यसद्गुणगणानवर्णयत् । शोभनाय गुरवे स्वभावतः'[म.वि.९.३३] इत्याद्युक्तरीत्या विशेषेणाऽख्याय । भाष्यं श्रुतिस्मृत्युपबृंहितत्वादिगुणविशिष्टमित्युक्त्वेति भावः । **अलं** सम्यक् **कलिमलं** कल्यावेशनिमित्तकं मलं सच्छास्त्रारुचिबीजं दोषमित्यर्थः । **अपनीय** परि-

१.अत्राप्यच्युतप्रेक्षायेति लिपिकृतां प्रमाद एव ।

हृत्य । **कार्ष्णीम्,** कृष्णस्य इयं कार्ष्णी, ताम् । **अर्चां** प्रतिमाम् । 'पूजा-प्रतिमयोरर्चा' इत्यभिधानम् । **लीलयाऽऽनीय** । **रूप्ये** रूप्यपीठे तत्रत्यमठ इति भावः । **आस्थाप्य** प्रतिष्ठाप्य । कीदृशीम्? **त्रिदशकतरुणैः** । त्रयः दश मानं येषां ते त्रिदशकाः । त्रिंशत्सङ्ख्याका इति यावत् । ते च ते तरुणा युवानश्च तथोक्तैः शिष्यैः । **अचाल्यां** चालयितुमशक्यामित्यर्थः । अयं भावः– 'नन्वन्यशरणात्मनां सतां सिद्धिविघ्नमुखदोषभेषजम् । ऐच्छदच्छल-दयोदयादयं रूप्यपीठपुरगः कदाचन' [म.वि.९.४०] इत्याद्युक्तरीत्या श्रीमध्वः कलियुगे सज्जनानां पूजनदर्शनादिना निःश्रेयसविघ्नविघातार्थं श्री-कृष्णं प्रतिष्ठापयामीति सत्सु दययाऽकामयत । तदा द्वारकायां रुग्मिणी-वनाख्यप्रदेशे गोपीचन्दनमध्ये लग्नां गोपीचन्दनबुद्ध्या सांयात्रिकैरानीतां रूप्यपीठसमीपे प्लवे भिन्ने जलधौ मग्नां श्रीकृष्णप्रतिमामानीय शिष्यैस्तटाके शोधयित्वा स्वयमभिषिच्य समन्त्रकं स्पृष्ट्वाऽत एव भगवत्सन्निधानाति-शयभरितामत एव त्रिंशच्छिष्यैरपि सुदुर्धरां लोके बालकमिव स्वयमेवाऽनीय मठे प्रतिष्ठापयामासेति । अत्रैवं पूर्वाचार्यप्रवादः–

'कदाचिद् देवकी देवी द्वारकायां सुतं हरिम् ।
'उवाच बाललीलानां दर्शनोत्सुकमानसा ॥

'यशोदा बाललीलास्ते विलोक्य परमां मुदम् ।
'जगाम किल तत्रैकां लीलां मे कृष्ण दर्शय ॥

'एवं मात्रा चोदितो द्वारकायां
'कृष्णो भूत्वा बालकः कर्हिचित् ताम् ।
'प्रापामन्दं दधि सँल्लोडयन्तीं
'लीलाभावै रञ्जयन्मातृचित्तम् ॥

'तदङ्कमारुह्य पपौ सुतं स स्तन्यं तदास्यं प्रसमीक्षमाणः ।
'तदा तदीक्षाविवशान्तरा सा सुखाम्बुराशौ विजहार देवी ॥

‘दध्यमत्रं विभज्याथ नवनीतं प्रभक्षयन् ।
‘नवनीतविलिप्ताङ्गो मन्थानं दाम चाहरत् ॥

‘कालमल्पं विहृत्यैवमाकृतिं तामथाप्यधात् ।
‘देवकी चातिसन्तुष्टा विस्मिता चाभवन्मुहुः ॥

‘तदैव भैष्मी च समीक्ष्य माधवं सदाऽप्यनन्ताकृतिदृष्टिमत्यपि ।
‘पुनःपुनर्नूतनमेतदाकृतिं निर्मापयामास मुदा तदाकृतिम् ॥

‘जनान् विडम्बयन्ती सा नित्यं तत्प्रतिमागतम् ।
‘पूजयामास विभवैः साक्षात् तं [१]पूजयन्त्यपि ॥

‘कृष्णावतारेऽवसिते फल्गुनो द्वारकास्थिताम् ।
‘स्थापयामास तामर्चामुत्तमां रुग्मिणीवने ॥

‘गोपीचन्दनलग्नत्वाद् गोपीचन्दनबुद्धयः ।
‘प्रतिमां तां समाजह्रुर्दैवात् सांयात्रिकाः कलौ ॥

‘रूप्यपीठान्तिकग्रामे वार्धौ भिन्नोऽभवत् प्लवः ।
‘तदर्थसूचकेनासौ ग्रामो नाम्ना युतोऽभवत्[२] ॥

‘श्रेयोविघ्नविघातार्थं सज्जनानां दयाम्बुधिः ।
‘चिन्तयन् सर्वविन्मध्वो जगाम च तदन्तिकम् ॥

‘तत्र मग्नां समादाय प्रतिमां द्वादश स्तुतीः ।
‘कुर्वन्नानीय तां रूप्य आस्थापयदनल्पधीः’ इति ।

‘पाशमन्थानसंयुक्तं यशोदायै प्रदर्शितम् ।
‘तद्रूपं द्रष्टुकामायै पुनर्मात्रे प्रदर्शितम् ॥

---

१. ‘पूजयत्यपि’ इति क्वचित् ।

२. ‘यतोऽभवत्’ इति पाठान्तरम् । ‘ओडपाण्डेश्वर’ [ಒಡಪಾಂಡೇಶ್ವರ] इति, ‘ओडभाण्डेश्वर’ [ಒಡಭಾಂಡೇಶ್ವರ] इति वा नाम्ना युतः ।

'कृष्णाज्ञया निर्मितं तत्स्वरूपं विश्वकर्मणा ।

'तद्रूपे भगवान् कृष्णः स्वयं व्यक्तो बभूव ह ॥'

इति स्कान्दगतसह्याद्रिखण्डवचनात् 'भैष्मी तदाकृतिं निर्मापयामासे'त्यत्र पतिं प्रति विज्ञाप्य तद्द्वारा निर्मापयामासेत्यादिप्रमेयविशेषो बोध्यः । 'एतस्मिन्नन्तरे ब्रह्मन्नारुह्य मकरं स्वयम् । वरुणस्त्वानयामास तद्रूपं नारदेरितः' इति पूर्वोक्तपुराणवाक्यात् 'तत्र मग्नां समादाये'त्यत्र साक्षाद्वरुणेन दत्तां समादायेत्यपि विशेषो[१] बोद्धव्यः । कृष्णप्रतिष्ठानन्तरं यज्ञप्रतिहतिनिरतान् । यज्ञप्रतिहतिः यज्ञविघातः । तत्र निरतान् जनान् उदस्य निराकृत्य स्वयज्ञं स्वकीयस्य यज्ञं कारयित्वा । श्रवणादिकं ज्ञानासाधारणकारणम्; कर्मापि चित्तशुद्धिद्वारा ज्ञानस्याङ्गम्; अतस्तदपि ब्रह्मज्ञानार्थिभिरनुष्ठेयमिति सज्जनशिक्षार्थं वासुदेवनामकेन पूगवनान्वयजोपाध्यायसुतेन यज्ञं कारयिष्यन् मध्वः 'अस्मिन् यज्ञे मयैव होत्रा भाव्यम्' इति यज्ञविघ्नं कुर्वन्तं जराघटितगोत्रं प्राकृतभाषया 'मरडित्ताय' इति प्रसिद्धं तत्सहायानन्यांश्च जनान् रूप्यपीठग्रामगतजनानां बालकन्यापुराधिपतेः[२] पूर्वालयपश्चिमालययोश्च समक्षं स्वयं निराकृत्य स्वस्यानुजं होतारं कृत्वा श्रीकृष्णसन्निधौ यज्ञं कारयामासेति कथाऽनेन सूचिता । पुनश्च श्रीकृष्णप्रतिष्ठानन्तरमपीत्यर्थः । बदरिकाश्रमं गत्वा व्यासं नत्वा पुनश्च प्रतिगतरजतः । सम्प्राप्तरजतपीठः स मध्वः सम्प्रसीदेत् सम्यक् प्रसन्नो भवतु । षद्लृ विशरणगत्यवसादनेष्विति धातोर्विधौ लिङ् ॥ १८ ॥

(सं.दी.) सख्ये व्याख्याय भाष्यम् [३२], अच्युतज्ञाय चालं भाष्यं व्याख्याय [३३], कलिमलमपनीय [३५], त्रिदशकतरुणैरचाल्यां कार्ष्णीमर्चां लीलयाऽऽनीय [४१-४२], रूप्य आस्थाप्य [४३], यज्ञप्रतिहतिनिरतानुदस्य [४४-४५], स्वकीययज्ञं कारयित्वा [४७], व्यासं नत्वा पुनश्च प्रतिगतरजतः [५५] सम्प्रसीदेत् स मध्वः ॥ १८ ॥

१. 'समादायेत्यर्थविशेषो बोध्यः' इति क्वचित् पा. ।

२. इदानीमस्य 'बारकूरु'[ಬಾರಕೂರು] इति प्रसिद्धिः ।

[दशमसर्गकथा]

सागस्त्वादीशदेवं परवशखननं यो व्यधादप्लवः स्वै-
र्गङ्गातारी स्वनीत्या वशितयवनराड् वर्त्मनि क्वापि चोरान्।
हन्तुं यातान् मिथोऽहन् क्वचिदपि निजशिष्येण चाद्रावयद् द्राग्
योगेनाभूच्छिलाभः क्वचिदपि सगणस्तं महेक्षं दिदृक्षे ॥ १९ ॥

(सौ.प्र.) श्रीमध्वो बदरिकाश्रमादिकं गत इति श्रुत्वा विस्तरेण श्रोतुं कुतूहलयुक्तेभ्यो जनेभ्यः केनचिदाचार्यशिष्येणोक्तानि तीर्थयात्राकाले प्रवृत्तानि चरितानि **सागस्त्वादित्यादि**श्लोकत्रयेणाऽह । **यः मध्वः सागस्त्वात्**। आगसा अपराधेन सहितः सागाः, तस्य भावः सागस्त्वं तस्मादित्यर्थः। **ईशदेवं** ईश्वरदेवनामकं भूपं **परवशखननम्,** परवशं खननं यस्य तं तथोक्तं **व्यधात्** अकार्षीत्। क्वचित् पान्थजनैर्बलात्कारेण खननं कारयन्तं स्वात्मानं प्रत्यपि खननं कार्यमिति वदन्तं भूपं 'अकुशलानस्मान् सकृत् खननं कृत्वा बोधय' इति मध्वो जगाद। तदा स खलः खननं कर्तुमारभ्य न विरराम। महदतिक्रमात् परवशखननोऽभूदिति भावः। **यः अप्लवः**। प्लवो नौः तद्रहितः सन् इत्यर्थः। 'उडुपं तु प्लवः कोलः' इत्यमरः। 'अप्लवैः' इति पाठे 'स्वैः'इत्यनेन सम्बद्ध्यते। **स्वैः** जनैः सहेत्यर्थः। सहयोगाभावेऽपि 'वृद्धो यूना–' [१.२.६५] इति ज्ञापकात् तृतीया। **स्वनीत्या** स्वस्य नीत्या **वशितयवनराट्**। यवनः म्लेच्छः राट् राजा येषां ते तथोक्ताः यवनराजभृत्या इत्यर्थः। वशिताः वशीकृताः यवनराजो येन स तथोक्तः सन् **गङ्गातारी** अभूत्। शत्रुभीत्या त्याजितप्लवां गङ्गां स्वयं पुरस्ताद् गच्छन् पृष्ठगामिनः पूर्वपूर्वाश्रितान् कृत्वा ततार। 'नीतिं प्रकाशयितुमेव विपत्सु कार्या गन्तुं प्रभुः प्रसभतोऽपि तथा व्यधात् सः'[म.वि.१०.१९] इत्युक्तप्रकारेण तदानीं वारकान् राजभृत्यान् प्रति 'भवद्राजदर्शनार्थमस्माभिरागम्यते' इत्यादि तद्भाषयोक्त्वा वशीचकारेति भावः। यः एवं नदीं तीर्त्वा

राजधानीसमीपे गमनकाले **स्वनीत्या वशितयवनराट्** । यवनानां राट् यवनराट् वशितः यवनराट् येन स तथोक्तः अभूत् इत्यर्थः । गच्छन्तं मध्वं दृष्ट्वा हृष्टो यवनराजः 'कथं नदी तीर्णा? कुत्र वा जिगमिषसि?' इति पप्रच्छ । तदा 'योऽसौ देवो विश्वदीपः प्रदीप्तः कुर्मः सर्वं तत्परानुग्रहेण' [म.वि.१०.१७] इत्यादिना वाक्येन मध्वेन वशीकृतो राजा राज्यार्धमस्मै समर्पयामासेति कथाऽनेन सूचिता । **यः क्वापि वर्त्मनि** कुत्रचित् मार्गे **हन्तुं यातान्** प्राप्तान् **चोरान् मिथः** परस्परं **अहन्** । णिजत्रान्तर्णीतः । तथाच अघातयदित्यर्थः । हन हिंसागत्योरिति धातोर्लङ् । चोरान् दृष्ट्वा स्वीयानेकत्र संस्थाप्य पिण्डीकृते स्वहस्तगते पटे चोराणां धनबुद्धिमुत्पाद्य स्वयं च तन्मध्यगतो भूत्वा तान् मोहयित्वा मिथो घातयामसेति कथाऽनेन सूचिता । **क्वचिदपि मार्गे चोरान् निजशिष्येण च** स्वकीयशिष्येणैव **द्राक्** सपदि **अद्रावयत्** पलायितानकरोत् । णिजन्ताद् द्रु गताविति धातोर्लङ्[१] । क्वचित् कुठारधारिणश्चोरान् दृष्ट्वा उपेन्द्रतीर्थनामकयतिना कुठाराकर्षणपूर्वकं चोरयूथपं ताडयित्वा द्रावयामासेति भावः । **क्वचिदपि** मार्गे **सगणः** शिष्यसमूहयुतः[२] **यः** मध्वः **योगेन** उपायेन सामर्थ्यविशेषेणेति यावत्[३] । **शिलाभः** शिलायाः आभेव आभा यस्य स तथोक्तः । शिलावद् दृश्यमान इत्यर्थः, **अभूत्** । स्वस्मिन् स्वशिष्येषु च शिलासमूहा एत इति भ्रान्तिमुत्पाद्य क्वचिदागतान् चोरान् निवर्तयामास । निवृत्ताश्च ते पुनः सम्यग् ज्ञात्वा मध्वमनमन् इति कथाऽनेन सूचिता । अहं **तं महेक्षम्;** महती ईक्षा प्रज्ञा यस्य तं तथोक्तम्, पूर्णप्रज्ञमित्यर्थः, **दिदृक्षे** द्रष्टुमिच्छामि । दृशिर् प्रेक्षण इति धातोः सन्नन्ताल्लट् । 'ज्ञाश्रुस्मृदृशां सनः'[१.३.५७] इत्यात्मनेपदम् ।। १९ ।।

(सं.दी.) अथ त्रिभिर्दशमसर्गसङ्क्षेपः । यः ईशदेवं सागस्त्वात् परवशखननं व्यधात् [१०.४-५], अप्लवः स्वैः सह गङ्गातारी [८-९], स्वनीत्या

१. 'गतावित्यस्माल्लङ्' इति पा । २. '–समूहयुक्तः' इति पा. ।
३. '–विशेषेणेति भावः' इति पा. ।

वशितयवनराट् [१४-१९], क्वापि वर्त्मनि हन्तुं यातान् चोरान् मिथोऽहन् [२०], क्वचिदपि च निजशिष्येण द्रागद्रावयत् [२१], क्वचिदपि योगेन सगणः शिलाभोऽभूत् [२२], तं महेक्षं दिदृक्षे ॥ १९ ॥

दैत्यव्याघ्रोपघाती नरसखकरतो लब्धगौरोपलार्चो
व्यासाज्ञाभृत् सुतर्ता लघु सुरसरितो वारिसंस्तम्भयोगात् ।
भित्त्वा भूमिं द्युनद्या मठमुपगतया वन्दितो मूर्तिमत्या
यूनोऽनेकान् विजिग्ये युगपदपि गतान् यः सलीलं तमीडे ॥ २० ॥

(सौ.प्र.) दैत्येति । यः मध्वः **दैत्यव्याघ्रोपघाती** । दैत्यात्मको व्याघ्रः दैत्यव्याघ्रः । तमुपहन्ति तच्छीलः । देवं गृहीत्वा पुरस्ताद् गच्छतः सत्यतीर्थस्य जिघांसयाऽऽगतं व्याघ्राकारं दैत्यं किञ्चित् ताडनमात्रेण निराचक्र इति भावः । **नरसखकरतः** । नरस्य सखा नरसखः । धर्मसुतो नारायणः । समासान्तष्टच् । तस्य करादिति करतः । 'सर्वप्रातिपदिकेभ्यस्तसिलिति केचित्' इत्युक्तेस्तसिल् । **लब्धगौरोपलार्चः** । उपलार्चाः शिलारूपप्रतिमाः । 'पाषाणप्रस्तरग्रावोपलाश्मानः शिला दृषत्' इत्यमरः । गौर्यः शुभ्राश्च ताः उपलार्चाश्च गौरोपलार्चाः । 'पुंवत् कर्मधारयजातीयदेशीयेषु'[६.३.४२] इति पूर्वपदस्य पुंवद्भावे 'षिद्गौरादिभ्यश्च'[४.१.४१] इत्यनेन प्राप्तस्य ङीषो लोपः । लब्धाः गौरोपलार्चाः येन स तथोक्त इत्यर्थः । अथवा गौराः शुद्धा उपला गौरोपलाः, शुद्धशिलाः इत्यर्थः । तद्रूपा अर्चा इत्यर्थः । कथं गौरशब्दः शुद्धार्थः? 'अपि हंसैः परमैरमेचकैः'[म.वि.७.३] 'व्यहरद्धलक्षतमपक्षशोभनम्'[म.वि.८.३९] इत्यादिषु शुक्लपर्यायाणां शुद्धार्थत्वदर्शनात् । चतुर्थस्कन्धे पृथुचरिते 'प्रांशुः पीनायतभुजो गौरः कञ्जारुणेक्षणः' [भा.४.२१.१५] इत्यत्र स्थितस्य गौरशब्दस्य 'गौरो निर्मलः' इति विजयध्वजार्यैर्व्याख्यातत्वाच्च । उक्तं च मध्वविजये 'प्राप स नारायणतः शुद्धशिलात्मप्रतिमाः'[म.वि.१०.२४] इति । **व्यासाज्ञाभृत्** । व्यासस्य

आज्ञा 'श्रीमद्भारततात्पर्यार्थं ब्रूहि' इत्येवंरूपा तां बिभर्तीति तथोक्तः । **लघु** क्षिप्रम् । 'लघु क्षिप्रमरं द्रुतम्' इत्यमरः । **वारिसंस्तम्भयोगात्** । वारिणः उदकस्य संस्तम्भः संस्तम्भनम्, स एव योगः उपायः, तस्मात् । **सुरसरितः** गङ्गाया इति कर्मणि षष्ठी । **सुतर्ता** सुष्ठुतर्ता । पुनर्गङ्गातीरं प्राप्तो मध्वः प्लव-रहितां गङ्गां जलस्तम्भयोगेनानार्द्रवस्त्रः सन् ततार । एतत्सामर्थ्यं दृष्ट्वा वि-स्मितेन राज्ञा प्रेषितेन प्लवेन शिष्यांश्च स्वसमीपमागमयामासेति भावः । **भूमिं भित्त्वा मठमुपगतया मूर्तिमत्या** प्राकृतदृष्टिगोचरस्त्रीरूपया **द्युनद्या** गङ्गया **वन्दितः** नमस्कृतः । 'प्राप्तस्ततो हस्तिनराजधानीम्' [म.वि.१०.३४] इत्याद्युक्तरीत्या . हस्तिनराजधानीं प्राप्य तत्र गङ्गाया असमीपे एका-न्तदेशे मठविशेषे चातुर्मास्यमुवास । तदा शाखाविशेषेण भुवं भित्त्वा तन्मठसमीपं गता गङ्गा मूर्ता सती मध्वं ननामेति भावः । **यः** आत्मना सह नियोद्धुं **युगपत् गतानपि** प्राप्तानपि **अनेकान्** पञ्चदशसङ्ख्याकानिति भावः । **यूनः** तरुणान् शिष्यान् । **सलीलं** इति क्रियाविशेषणम् । **विजिग्ये** जितवान् ।'विपराभ्यां जेः'[१.३.१९] इत्यात्मनेपदम् । युगपत् इति अने-नापि सम्बद्ध्यते । चातुर्मास्यसमाप्त्यनन्तरं वाराणसीं[१] प्राप्तो मध्वः कदा-चिल्लीलावसरे दृप्तान् स्वशिष्यान् दृष्ट्वा 'सर्वे यूयं नियुद्धार्थं युगपत् मामा-गच्छत । अत्र च यः समग्रशक्तिं न करोति तस्य मदाज्ञोल्लङ्घनदोषः स्यात्' इति जगाद । तदा युगपदागत्य यथाशक्ति नियुद्धं कुर्वतस्तान् युगपन्न्य-पातयदिति भावः । **तं** मध्वं **ईडे** स्तौमि । ईड स्तुताविति धातोर्लट् ॥

(सं.दी.) यो दैत्यव्याघ्रोपघाती [२३], नरसखकरतो लब्धगौरोपलार्चः [२४], व्यासाज्ञाभृत् [२५], वारिसंस्तम्भयोगात् लघु सुरसरितः सुतर्ता [२७;३०], भूमिं भित्त्वा मठमुपगतया मूर्तिमत्या द्युनद्या वन्दितः [३५-३६], युगपद्गतानप्यनेकान् यूनः सलीलं युगपद् विजिग्ये [३९] तं मध्व-मीडे ॥ २० ॥

१.'वारणसीम्' इति पा. ।

स्वर्गाह्वोक्तिप्रखण्डी सकलसमयिजिद् व्याख्ययाऽभात् पुराऽऽजौ
शिष्याणामायुधानि प्रकटयति पुरा पूजितः शूलिनाऽभूत् ।
प्रत्यक्षेण क्वचिद् यो दशशतगुरुरम्भापयोभुक् क्षणात् सद्-
गानात् पुष्पादिकारीत्यभिहितचरितो यः शुभैस्तं प्रपद्ये ॥ २१ ॥

(सौ.प्र.) स्वर्गाह्वेति । **यः स्वर्गाह्वोक्तिप्रखण्डी** । स्वर्गस्य आह्वा अभिधानं अमरेन्द्रपुरीति सैव आह्वा यस्य स तथोक्तः । 'आख्याह्वे अभिधानं च नामधेयं च नाम च' इत्यमरः । तस्य उक्तिः वचनम् । तां प्रखण्डयतीति तथोक्तः । अमरेन्द्रपुर्याख्येन मायिना यतिना प्रसक्तप्रमेये युक्त्यपरिस्फूर्त्या ज्ञानपदार्थे पृष्टे 'त्वं ज्ञान्यसि वा नवा? आद्ये ज्ञानपदार्थोऽवगत एव । द्वितीये घटवत् प्रश्नो न घटते' इति तदुक्तिं खण्डितवानित्यर्थः । **यः सकलसमयिजित्** । 'सकलसमयिहस्ताम्भोजबन्धाभिनन्दी' [म.वि. १०. ४४] इत्युक्तरीत्या सकलान् समयिनः सिद्धान्तिनः जयतीति तथोक्तः सन् । 'सङ्केताचारसिद्धान्तकालेषु समयः स्मृतः' इति धनञ्जयः । **व्याख्यया अभात्** अशोभत । भा दीप्ताविति धातोर्लङ् । सभासु दुर्वादिनो निराकुर्वन् व्याख्यया रेज इति भावः । **यः** मध्वः **पुरा** पूर्वजन्मनि क्षत्रियत्वावस्थाया-मित्यर्थः, गृहीतानीति शेषः, आजौ भारतयुद्धकाले पतितानीति शेषः, **आयुधानि, आजौ** युद्धभूम्यां कुरुक्षेत्रे इति चार्थः, **शिष्याणां प्रकटयति पुरा** प्रकटीचकारेत्यर्थः । 'पुरि लुङ् चास्मे' [३.२.१२२] इति पुराशब्दयोगे लिडर्थे लट् । कुरुक्षेत्रं प्राप्तो मध्वो भूखननं कारयित्वाऽऽयुधानि दर्शया-मासेति भावः । उक्तं च 'यौधोऽत्र राजाऽहमितीरितेऽमुना तवाऽयुधं केति जगाद सत्यवाक्[१] । खातेऽमुनोक्ते कुतळे महागदां दृष्ट्वाऽऽप्तवाचं श्रद-धुर्गुरुं हि ते' इति । सत्यवाक् सत्यतीर्थः । कुतळे भूतळ इत्यर्थः । **यः**

१.'यौधोऽत्र राजा त्वमितीरितेऽमुना ममाऽयुधं केति जगाद सत्यवाक्' इति पाठान्तरम् । रुचिरमिदं पाठान्तरम् । तदा तु शिष्याणामेव पूर्वं नृपत्वावस्थायां धृतान्यायुधानि शिष्याणां प्रकटयामासेत्यर्थः ।

कचित् हृषीकेशदेश इत्यर्थः । **प्रत्यक्षेण** । अक्षं प्रतिगतः प्रत्यक्षः । तेन सर्वदृग्विषयेणेत्यर्थः । प्रादिसमासः । **शूलिना रुद्रेण पूजितः अभूत्** । विप्ररूपो रुद्रो मध्वमभिगम्य भिक्षाक्षणार्थं नमस्कृत्य [१]तदैवादृश्योऽभूत् । अथ स्वप्ने स्वप्रेरितेन ग्रामान्तर[२]गतस्वालयाधिकारिणा पुरुषेणाऽनीतैर्भक्ष्यभोज्यैर्मध्वं प्राभोजयदिति कथाऽनेन सूचिता[३] । **यः कचित् दशशतगुरुरम्भापयोभुक्** । रम्भाणां कदळीनां फलानि रम्भाः । 'रम्भा कदळी मोचा' इति हलः । फलरूपविकारार्थकस्याण्प्रत्ययस्य 'फलपाकशुषां लुबिष्टः'[४] [४.३.१६६] इति लुपि सति 'लुपि युक्तवद् व्यक्तिवचने'[१.२.५१] इति प्रकृतिवल्लिङ्गवचने । गुरवः स्थूलाश्च ताः रम्भाश्च । दशशतानि च ताः गुरुरम्भाश्च, ताः पयः क्षीरं च भुङ्क्ते अभ्यवहरतीति तथोक्तः । इषुपाताख्यक्षेत्रे भिक्षावसाने केनचिद् दत्तमतिस्थूलपक्वकदळीफलसहस्रमभक्षयत् । पुनर्गोवाख्यदेशे त्रिंशत्कलशपरिपूर्णं क्षीरं च पपाविति भावः । उपलक्षणमेतत्– 'गरिष्ठकदळीलसद्दशशतीचतुष्कं चरन्'[म.वि.१०.५२] इत्युक्तरीत्या क्षीरपानात् पूर्वं कदळीफलसहस्रचतुष्टयमभक्षयदित्यपि द्रष्टव्यम् । अथवा **दशशतगुरुरम्भापयोभुक्** इत्यत्र दशशब्दो बहुत्वपरः । बहुत्वस्य च यथायोग्यं पर्यवसानम् । तथाच सहस्रसङ्ख्याकानि चतुःसहस्रसङ्ख्याकानि च कदळीफलान्यभक्षयदित्येकयोक्त्या सूचितं भवतीति ज्ञेयम् । **यः कचित् सद्गानात्** उत्तमाद् गानात् **क्षणात्** सपदीति भावः । **पुष्पादिकारी** । पुष्पं आदि यस्य तत् पुष्पादि । तत्करोतीति तच्छीलः । [५]गोविषयाख्यदेशे कुत्रचित् सभायां जनैरर्थितः श्रवणमात्रेण जनसुप्तिदेनासदृशेन गानेन पूगादौ झटिति पुष्पफले ससर्जेति भावः । **यः** मध्वः **इति**

१.'तत्रैवा–' इति पा. । २.'–गतालया–' इति पा. । ३. 'कथाऽनेनासूचि' इति पा. ।
४.'लुप्प्रकरणे फलपाकशुषामुपसङ्ख्यानम्' इति वार्तिकम् । फलपाकेन शुष्यन्ति ये तेषामपि लुबिष्ट इति ।
५. 'गोविषये तदाख्यदेशे' इति स्वरसम् । 'पशुपे'[ಪಶುಪೆ] इत्यपभ्रष्टभाषायाम् ।

'सागस्त्वादीशदेवम्' इत्याद्युक्तप्रकारेण **शुभैः** सद्भिः **अभिहितचरितः** अभिहितं चरितं यस्य स तथोक्तः अभूत् । 'दशमतिशिष्यः कश्चित्' [म.वि.१०.२] इत्युक्तरीत्या केनचित् स्वशिष्येण 'श्रवणमननकीर्तनैरभीष्टं प्रतिददतीत्यमराः प्रकीर्तयन्ति'[म.वि.१०.५५] इत्युक्तरीत्या दैवैश्च प्रतिपादितचरित इति भावः । **तं** मध्वं **प्रपद्ये** शरणमिति शेषः । पद गताविति धातोर्लट् ॥ २१ ॥

(सं.दी.) यः स्वर्गाद्वोक्तिप्रखण्डी [४२-४३] सकलसमयिजित् [४४] व्याख्ययाऽभात् [४५-४८], पुराऽजौ शिष्याणामायुधानि प्रकटयति पुरा [४९], यः क्वचित् प्रत्यक्षेण शूलिना पूजितोऽभूत् [५०], क्वचिद् दशशतगुरुरम्भापयोभुक् [५१-५२], क्वचित् सद्दानात् क्षणात् पुष्पादिकारी [५३], इति शुभैरभिहितचरितः [५५] यस्तं प्रपद्ये ॥ २१ ॥

[एकादशसर्गकथा]

व्याख्यां श्रुत्वा मुनिभ्योऽभ्यधित समयतो यस्य लभ्यं फणीन्द्रो
वैकुण्ठं हेमनानामणिमयसदनं श्रीशधामास्तदोषम् ।
सायुज्याद्याप्तसौख्यैरखिलविषयिभिः सुन्दरीभोगभाग्भि-
र्ब्रह्माद्यैर्नाथदृग्भिर्विलसितमतुलं सोऽनुगृह्णातु नोऽलम् ॥ २२ ॥

(सौ.प्र.) **व्याख्यामि**ति । **फणीन्द्रः** शेषः **यस्य** मध्वस्य **व्याख्यां श्रुत्वा मुनिभ्यः** सनकादिभ्यः **वैकुण्ठं** वैकुण्ठलोकं **यस्य समयतः** शास्त्रात्, श्रवणादिना सेवितादिति भावः, **लभ्यं** लब्धुं शक्यं लब्धुं योग्यं चेत्यर्थः । 'शकि लिङ् च'[३.३.१७२],'अर्हे कृत्यतृचश्च'[३.३.१६९] इत्युक्तेः । **अभ्यधित** अब्रवीत् । डुधाञ् धारणपोषणयोरिति धातोर्लुङ् । शेषः सनकादिभिः सहाऽगत्य मध्वव्याख्यानं श्रुत्वा स्वधाम जगाम । अथ मध्वशास्त्रश्रवणादेः किं फलमिति सनकादिभिः पृष्टः शेषः 'स्वर्गादिकमेतच्छास्त्रश्रवणादिना लब्धुं शक्यमपि न लब्धुं योग्यम् । नहि रत्नमुष्टिफलत्वं

प्राप्तुं तण्डुलमुष्टिरर्हति । तथाच तेन लब्धुं शक्यो योग्यश्च वैकुण्ठलोक एव' इत्याहेत्यर्थः । कीदृशं वैकुण्ठम्? **अतुलम्** । न विद्यते तुला उपमा यस्य तं तथोक्तम् । अतुलत्वोपपादनार्थं **हेमे**त्यादि । हेम सुवर्णं तच्च नानामणयो नानाविधरत्नानि च तेषां स्वरूपाणि हेमनानामणिमयानि । ताद्रूप्ये मयट् । तादृशानि सदनानि गृहाणि यस्मिन् तं तथोक्तम् । **श्रीशधाम** लक्ष्मीपतेरावासस्थानम् । श्रियो लक्ष्म्याः ईशधाम भर्तृगृहभूतमिति वा । अनेन 'स्वयमिन्दिरैव पतिमानकरी गृहकर्म यत्र कुरुते सुतराम्' [म.वि. ११.१६] इत्युक्तरीत्या भर्तृगृहत्वान्मार्जनादि गृहकर्म लक्ष्मीः स्वयमेव कुरुत इति सूचितं भवति । **अस्तदोषम्** । अस्ताः निरस्ताः दोषाः जराद्याः यस्मिन् तं तथोक्तम् । पुनः कथम्भूतम्? **ब्रह्माद्यैः विलसितम्** । कीदृशैः? **सायुज्यादि** सायुज्यं आदि यथा भवति तथा **आप्तसौख्यैः** आप्तं आविर्भूतं सौख्यं येषां तैस्तथोक्तैः । सायुज्यादिना आप्तसौख्यैरिति वा । सायुज्य-सारूप्य-सामीप्य-सालोक्यलक्षणचतुर्विधमुक्तियुक्तैरिति भावः । **अखिलविषयिभिः** । अखिलाः विषयाः अमृतस्रक्चन्दनाद्याः । ते एषां सन्तीति तथोक्तास्तैः । 'न कर्मधारयान्मत्वर्थीयः' इत्यस्यानित्यत्वादिनिप्रत्ययोपपत्तिः । **सुन्दरीभोगभाग्भिः** । सुन्दर्यः तरुण्यः । तासां भोगं भजन्तीति तथोक्तास्तैः । 'भजो ण्विः'[३.२.६२] इति ण्विप्रत्ययः । 'अत उपधायाः' [७.२.११६] इत्युपधावृद्धिः । **नाथदृग्भिः** । नाथं मणिराजिराजितमहामकुटत्वादि[१]विशिष्टं [म.वि.११.६३] हरिं पश्यन्तीति तथोक्तास्तैरित्यर्थः । **सः** मध्वः **नः** अस्मान् **अलं** अत्यन्तं **अनुगृह्णातु** । ग्रह उपादान इति धातोराशिषि लोट् ॥ २२ ॥

(सं.दी.) अथैकेनैकादशसर्गसङ्क्षेपः । यस्य व्याख्यां श्रुत्वा फणीन्द्रः [११.१] मुनिभ्योऽभ्यधित [२-५], यस्य समयतो लभ्यं वैकुण्ठम् [६-७]

१.'-मुकुटत्वादि-' इति पा. ।

हेमनानामणिमयसदनम् [८-१३] श्रीशधाम [१५-१६]। अस्तदोषम् [२३] सायुज्याद्याप्तसौख्यैरखिलविषयिभिः सुन्दरीभोगभाग्भिः [२४-६१] ब्रह्माद्यैर्नाथदृग्भिर्विलसितम् [२०-२२] अतुलम् [८;२२], एतादृशमभ्यधित सोऽनुगृह्णातु नोऽलम् ॥ २२ ॥

[द्वादशसर्गकथा]

नानादुर्नीतिवादैर्विहितमुरुमदं मायिभूतासुरेन्द्रै-
र्योऽयं वेदान्तिसिंहो व्यजयत कुरवं पुण्डरीकं च काण्डम् ।
विश्वाश्चर्यप्रकारं प्रवचनमकरोच्छन्दसां यत्स्पृधाऽन्य-
स्तत् कुर्वन् हास्य आसीद् द्विजवरनिकरे स्याम तद्दासदासाः ॥
॥ २३ ॥

(सौ.प्र.) नानेति । **वेदान्तिसिंहः** । वेदान्तिनो वेदान्तशास्त्राभिज्ञाः । तेषु श्रेष्ठ इत्यर्थः । 'स्युरुत्तरपदे व्याघ्रपुङ्गवर्षभकुञ्जराः । सिंहशार्दूलनागाद्याः पुंसि श्रेष्ठार्थवाचकाः' इत्यभिधानात् । **योऽयं** मध्वः **पुण्डरीकं** पुण्डरीकपुर्याख्यं मायिनं यतिं **व्यजयत** । जि जय इत्यस्माद् धातोर्लङ् । 'विपराभ्यां जेः' [१.३.१९] इत्यात्मनेपदम् । कीदृशम्? **नानादुर्नीतिवादैः** । नानाविधाः दुर्नीतयः कुनीतयः येषु ते तथोक्ताः वादा वचनानि येषां तैः तथोक्तैः । **मायिभूतासुरेन्द्रैः** मायावादिस्वरूपासुरेन्द्रैः **विहितं** प्रेरितं **काण्डं** बाणम् । 'सायकः प्रदरः काण्डः' इत्यमरः । मायिभिः स्वात्मानं लक्षीकृत्य प्रयुक्तो बाण इव स्थित इत्यर्थः । **उरुमदं** उरुः बहळो[१] विद्यामन्त्रादिप्रयुक्तो मदो यस्य तं तथोक्तम् । कुरवम्, मया साकं कथार्थमायाहीति कुत्सितः रवः शब्दः यस्य तं तथोक्तम् । अथवा वेदान्ती मध्वः । स सिंह इव, तदाख्यः सिंह इत्यर्थः । 'वादिद्वीपिध्वंसिनं मध्वसिंहम्' [म.वि.१२.४१] इत्युक्तरीत्या **पुण्डरीकं** तरक्षुमिति ध्वनिः ।'तत्रानन्तस्वान्तवेदान्तिसिंहे मुख्यव्याख्या-

१.'बहुलो–' इति पा. ।

निस्वने जृम्भमाणे' [म.वि.१२.१] इत्युक्तरीत्या सर्वे मायिनः श्रीमदाचार्य-व्याख्यानमहिमानं श्रुत्वा सिंहध्वनिं श्रुत्वा सृगाला इव किं कुर्मो वयमिति चपला भूत्वा पद्मतीर्थपुण्डरीकपुर्योः समीपे मन्त्रयामासुः । 'पुरातनं शाङ्करं मतं नूतनेन मध्वेन नाशितम्' इत्यादि तत्रतत्रास्माभिरुक्त्वा सामाद्युपायैर्जना वशीकर्तव्याः । ग्रामेग्रामे माध्वानां मानना वारणीया । तदीयग्रन्थाकर्षादि च कार्यमिति । अथ तथैव च तत्रतत्र चक्रुः । पुण्डरीकं पुरस्कृत्य रूप्य-पीठं ययुश्च । तत्र सिंहं ग्रामसिंह इव हंसं काक इव तरक्षुं सृगाल इव मध्वं पुण्डरीकः कथार्थमाह्वयत् । तदा मध्व आगत्य श्रुतिस्मृतियुक्तिबलेन परमतनिराकरणपूर्वकं स्वमतमसाधयत् । तदा तदुपन्यासखण्डनेऽसमर्थः पुण्डरीकस्ततो जगामेति कथाऽनेन सूचिता । **योऽयं छन्दसां** वेदानां **प्रवचनं** व्याख्यानं **अकरोत्** । डुकृञ् करण इत्यस्माद्धातोर्लङ् । कीदृशम्? **विश्वाश्चर्यप्रकारम्** । विश्वेषां सर्वेषां जनानां आश्चर्यः प्रकारो यस्य तत् तथोक्तम् । विश्वं जगत् तत्र आश्चर्यः प्रकारो यस्येति वा । [1]शिक्षा-कल्पव्याकरणाद्यनुसारेण वेदोच्चारणपूर्वकं तद्व्याख्यानं वेदज्ञानां ब्राह्मणानां मध्ये विष्णुप्रीत्यै चकारेति कथाऽनेन सूचिता । **यत्स्पृधा** । यस्मिन् मध्वे स्पृधा मत्सरेण । **द्विजवरनिकरे** ब्राह्मणश्रेष्ठानां समूहे **तत्** श्रुतिव्याख्यानं **कुर्वन् अन्यः** पुण्डरीकः **हास्यः** परिहासविषयः **आसीत्**। अस भुवीत्यस्मा-ल्लुङ् । मध्वकृतप्रवचनं श्रुत्वा मध्वपुण्डरीकयोः को महानिति जिज्ञासया ते विप्राः पुण्डरीकसमीपं गत्वा मध्वप्रवचनमहिमानमुक्त्वा 'भवताऽपि वेदाः प्रवचनीयाः' इत्याहुः । तदा सोऽपि मध्वसाम्याकाङ्क्षया वेदव्याख्याना-र्थमुपक्रम्य 'अग्निना रयिमश्नवत्' इत्यत्र 'अग्निना रयिं अश्नवत्' इति च्छेत्तव्ये 'अग्निनार' इत्येवं पदं चिच्छेद । ततो विप्रास्तं जहसुर्निनिन्दुश्चेति भावः । वयं **तद्दासदासाः** । तस्य मध्वस्य दासाः रुद्राद्याः तेषां दासाः **स्याम** भवामेत्यर्थः । अस भुवीत्यस्माद् विधौ लिङ् ॥ २३ ॥

१. 'शीक्षा–' इति स्वरसं प्रतनप्रयोगानुगुणम् ।

(सं.दी.) अथ द्वाभ्यां द्वादशसर्गसङ्क्षेपः । योऽयं वेदान्तिसिंहः[१२.१] नानादुर्नीतिवादैः [१९-२४] मायिभूतासुरेन्द्रैः [१] विहितमुरुमदं पुण्डरीकं च [२६] कुरवं [२७] व्यजयत [२८;४१] । असुरेन्द्रैः प्रहितं काण्डं बाणमिवेत्यालङ्कारिक्या वचनभङ्ग्याऽऽह । विश्वाश्चर्यप्रकारं [३१-३६] छन्दसां प्रवचनमकरोत् [२९], यत्स्पृधाऽन्यः पुण्डरीकपुरी तत् प्रवचनं कुर्वन् द्विजवरनिकरे हास्य आसीत् [३९-४०], तद्दासदासाः स्याम ॥ २३ ॥

पद्माख्यं सिन्धुराजं प्रियजनपरमागस्कृतं प्राप्य भीते-
रन्यान् कुर्वाणमग्रे सपदि निजगृहे गोगणैर्मध्वपार्थः ।
यो यद्दासोक्तिबाणैर्विदलितहृदया दुद्रुवुर्मायिदैत्या
विश्वज्ञाह्वो हरिर्यो जगति विजयते स प्रदद्याज्जयं नः ॥ २४ ॥

(सौ.प्र.) पद्माख्यमिति । यः मध्वपार्थः मध्वाख्यार्जुनः । **प्रियजनपरमागस्कृतम्** । प्रियजनः शङ्करार्यः । तस्मिन् परमागः परमापराधं[1] करोतीति तथोक्तस्तम् । प्रियजनेषु परमः उत्तमः शङ्करार्यः । तत्राऽगस्कृतमिति वा । सन्तर्जनादिपूर्वकं शङ्करार्यात् शास्त्रग्रन्थकवळिकामपहृतवन्तमित्यर्थः । **पद्माख्यं** पद्मतीर्थाख्यं **सिन्धुराजं** सिन्धुदेशाधिपतिं जयद्रथमित्यर्थः । **प्राप्य गोगणैः** वाक्समूहैः **निजगृहे** निगृहीतवानित्यर्थः । ग्रह उपादान इत्यस्माल्लिट् ।

'विष्णुमङ्गलदेशान्ते हृतां कवळिकां निजाम् ।
'श्रुत्वा रजतपीठस्थ एकवाटं ययौ गुरुः ॥
'तत्रस्थं चोळजं दृष्ट्वा स्वशिष्यैस्तं रुरोध सः ।
'त्वच्छास्त्रं साधयसि चेत् प्राश्निकानानयेत्यसौ ॥
'मध्वस्तेनोदितः प्रोचेऽत्राऽह्वयेच्छसि चेदिति ।
'कृतकृत्योऽस्मि मच्छास्त्रं व्याप्तमित्युदितेऽमुना ॥

१.'परमागः महापराधम्' इति पा. ।

'प्रोचे मध्वो मम व्याप्तं त्रैलोक्ये शास्त्रमित्यमुम् ।
'अन्तर्यामी हन्त वेद तवेदं शाठ्यभाषितम् ॥
'इति ब्रुवाणं तं प्रोचे मध्वः स्मितमुखाम्बुजः ।
'व्याप्तं त्वय्येव मच्छास्त्रं किमुतान्यत्र बालिश ।
'अन्तर्यामी नियम्यश्च त्वयैवाङ्गीकृताविति ॥'

इति भावप्रकाशिकोक्तरीत्या पद्मतीर्थं निराकृतवानिति भावः । वनवासकाले द्रौपद्याख्ये धौम्याख्ये च प्रियजने आकर्षणादिरूपं महापराधं कृतवन्तं जयद्रथं प्राप्य अर्जुनः गोगणैः बाणगणैः यथा निजगृहे तद्वदिति श्लेषार्थः । 'वाचि वारि पशौ भूमौ दिशि लोम्नि पवौ दिवि । विशिखे दीधितौ दृष्टौ ह्येकादशसु गौः स्मृतः' इति धनञ्जयः । पुनः सभ्यादिमेळनानन्तरं **यो मध्वपार्थः भीतेः** पराजयभयात् **अन्यान्** पुण्डरीकपुर्यादीन् **अग्रे कुर्वाणं** पूर्वं कथार्थं प्रेरयन्तमित्यर्थः । **पद्माख्यं सिन्धुराजं सपदि गोगणैः निजगृहे** । प्रागागतान् निगृह्य पश्चात् स्वकृतमुपन्यासमखण्डयित्वा तूर्ष्णीं स्थितं पद्मतीर्थमनुक्त्याख्यनिग्रहस्थानेन निराकृतवानिति भावः । भारतयुद्धेऽभिमन्युलक्षणप्रियजनेऽपराधकृतं द्रौण्यादीन् अन्यान् अग्रे कुर्वाणं तेषां पृष्ठभागे स्थितमिति भावः, जयद्रथं पार्थो यथा निराकृतवान् तद्वदिति श्लेषार्थः । एवं प्रमेयविशेषलाभार्थमावृत्त्याऽन्वयद्वयमाश्रितमिति ज्ञेयम् । अनन्तरं **मायिदैत्याः** मायिरूपा दैत्याः **यद्दासोक्तिबाणैः** । यस्य मध्वस्य दासाः सज्जनाः । तेषामुक्तयः 'आस्तामास्तामेष वो विश्वमोषो रेरे मायावादिचोरा द्रवेत' [म.वि.१२.४७] इत्यादिवचनानि । ता एव बाणाः तैः **विदलितहृदयाः** विभिन्नहृदयाः सन्तः **दुद्रुवुः** । द्रु गतावित्यस्माल्लिट् । **जगति विश्वज्ञाह्वः** । विश्वज्ञ इत्याह्वा नाम यस्य स तथोक्तः । सर्वज्ञमध्वाख्य इत्यर्थः । **यः हरिः** सूर्यः । **हरिः** नरहरिः । नामैकदेशग्रहणे नामग्रहणमिति न्यायात् । **हरिः** नारायणः **विजयते** उत्कृष्टो वर्तते । अनेन दासोक्त-

योऽप्येवंरूपा इति सूचितम् । 'मध्वादित्यं संश्रितं कोऽपिधत्ते' [म.वि. १२.५०], 'अदभ्रधिषणाभिधो नरहरिर्हि जाज्वल्यते' [म.वि.१२. ५१], 'मध्वाख्यनारायणः' [म.वि.१२.५३] इत्युक्तरीत्या हरिशब्दस्यार्थत्रय-मुक्तमिति ध्येयम् । **सः** मध्वः **नः** अस्मभ्यं **जयं प्रदद्यात्** । डुदाञ् दान इत्यस्माद्विधौ लिङ् ॥ २४ ॥

(सं.दी.) यः पद्माख्यं सिन्धुराजं प्रियजनपरमागस्कृतं [४२] प्राप्य [४३] भीतेरन्यानग्रे कुर्वाणं [४५] सपदि गोगणैर्निजगृहे [४३;४६] मध्वपार्थः [४६], यद्दासोक्तिबाणैर्विदलितहृदया मायिदैत्या दुद्रुवुः [४७-५३], यो विश्वज्ञाह्वो हरिर्जगति विजयते [४९-५१; ५३] स प्रदद्याज्जयं नः ॥

[त्रयोदशसर्गकथा]

श्रीकान्ताङ्घ्रिप्रसङ्गादधिकशुचितमो यान् यथा गाङ्ग ओघो
राज्ञा संवन्दिताङ्घ्रिः सकलगुणगणोपेतपादादिकान्तः ।
सर्वेषां दर्शनीयो लिकुचकुलभवो वेदशास्त्रादिवेदी
प्रापायुग्विक्रमार्यो यमखिलगुरुमानन्दतीर्थं प्रवन्दे ॥ २५ ॥

(सौ.प्र.) **श्रीकान्तेति** । अत्र य इत्यध्याहर्तव्यम् । **गाङ्गः** गङ्गासम्बन्धी **ओघः** प्रवाहः **यथा** तथा । 'ओघः परम्परायां स्याज्जलस्रोतसि सञ्चये' इति यादवः । **यान्** गच्छन् । गङ्गाप्रवाहसाम्यमेकेन विशेषणेन सूचयति[1]– **श्रीकान्ताङ्घ्रिप्रसङ्गात्** । श्रीकान्तस्य अङ्घ्र्योः प्रकृष्टः सङ्गः स्नेहः भक्तिरिति यावत्, तस्मात् । **अधिकशुचितमः** । अधिकशब्देन वा तमप्प्रत्ययेन वा पूर्ताबुभयोपादानं 'भुवने पावनपावनो निकामम्' [म.वि.१३.७] इत्युक्त-रीत्या पावित्र्ये परमातिशयज्ञापनार्थम् । 'अथापि यत्पादनखावसृष्टं जगद् विरिञ्चोपहृतार्हणाम्भः । सेशं पुनाति' इत्याद्युक्तरीत्या श्रीकान्ताङ्घ्रि-

१ 'दर्शयति' इति क्वचित् ।

नखावसृष्टत्वेन तत्प्रक्षाळनोदकत्वेन च तदङ्घ्रिप्रकृष्टसङ्गादधिकशुचितम इति श्लेषार्थः । स्वारामाख्यग्रामे पद्मतीर्थं निराकृत्य प्राग्रवाटे[1] चातुर्मास्य-मुषित्वाऽनन्तरं सह्यं प्राप्य पुनर्जयसिंहराजप्रेषितपुरुषाभ्यर्थनया परावृत्त्य तौळवं देशमागच्छन्निति भावः । यो मध्वः **राज्ञा** जयसिंहेन **संवन्दि-ताङ्घ्रिः** । संवन्दितौ अङ्घ्री यस्य स तथोक्तः । जयसिंहविषयं प्राप्तोऽभि-गमनपूर्वकमनेन वन्दितोऽभूदिति भावः । **सकलगुणगणोपेतपादादि-कान्तः** । सकलः लक्षणशास्त्रोक्तः यो गुणगणः तेनोपेतं सहितं पादादि कान्तं शिरःपर्यन्तं अवयवजातं यस्य स तथोक्तः । [2]'पुंसि कः कं शिरोऽम्बुनोः' इत्यमरः । अत एव मिलित्वा पश्यतां **सर्वेषां** जनानां **दर्शनीयः** नेत्रोत्सव-प्रदः । कुतूहलिभिर्नरैः भूपतिना सह गमनसमये ससम्भ्रमं दृष्टोऽभूदिति भावः । **लिकुचकुलभवः** लिकुचनामककुलोत्पन्नः । तस्य 'पिजत्ताय' इति प्राकृतसञ्ज्ञा । **वेदशास्त्रादिवेदी** । वेदशास्त्रादि वेत्तीति तच्छीलः । आदिशब्देन कवित्वं गृह्यते । **अयुग्विक्रमार्यः** । अयुक्शब्दस्त्रित्वपर्यवसायी । तथाच त्रिविक्रमपण्डिताचार्य इत्यर्थः । वेदशास्त्रादिवेदित्वादेव वेदे कवितायां वेदान्तशास्त्रे चेति त्रिषु विक्रमोऽवगतिरस्येति त्रिविक्रम इत्यन्वर्थसञ्ज्ञेति ज्ञातव्यम् । **अखिलगुरुं यं** मध्वं **प्राप** । विष्णुमङ्गलदेवालयमागत्य राजादिभिः सहोपविष्टं मध्वं त्रिविक्रमार्यः प्रापेति भावः । 'क्षणदासु विचक्षणः समीक्ष्य[3] प्रचुरप्रज्ञमनोज्ञशास्त्रसारम्' [म.वि.१३.६७] इत्याद्युक्तरीत्या स्वसहजेन शङ्करार्येण स्वगृहे स्थापितान् माध्वग्रन्थान् रात्राववलोक्य तच्छास्त्रसारं गृहीत्वा तन्मतग्रहणोद्देशेनैव तत्समीपमापेति सूचितम्–'अखिलगुरुम्' इत्यनेन विशेषणेन । यच्छब्दश्रवणात् तमिति लभ्यते । **तं आनन्दतीर्थं**

---

१. 'कोडिपाडि' [ಕೊಡಿಪಾಡಿ] इति प्राकृतभाषायाम् । स्वाराम इति च 'कावु' [ಕಾವು] इति भाषायाम् ।

२. 'कं शिरोऽम्बुनोः' इत्येव पर्याप्तम् । 'मारुते वेधसि ब्रध्ने पुंसि कः' इति भिन्नवाक्यम् ।

३. 'स वीक्ष्य' इति प्राचीनटीकानुगुणः पाठः ।

प्रवन्दे प्रकर्षेण वन्दे । वदि अभिवादनस्तुत्योरिति धातोर्लट् । 'तमीडे' इति पाठे ईड स्तुताविति धातोर्लट् ॥ २५ ॥

(सं.दी.) अथैकेन त्रयोदशसर्गसङ्क्षेपः । यथा गाङ्ग ओघस्तथा श्रीकान्ताङ्घ्रि-प्रसङ्गादधिकशुचितमः [१३.७-८] यान् राज्ञा संवन्दिताङ्घ्रिः [२१-२२] सकलगुणगणोपेतपादादिकान्तः [२८-३६], यः सर्वेषां दर्शनीयः [३७], अपिच, लिकुचकुलभवः [४३-४५] वेदशास्त्रादिवेदी [६०;६३] अयुग्वि-क्रमार्यः[४६] यं प्राप [६९] तमखिलगुरुमानन्दतीर्थं प्रवन्दे ॥ २५ ॥

[चतुर्दशसर्गकथा]

लब्धग्रन्थः स्तुतोऽलं लिकुचकविवरेणेह निन्ये दिनानि
श्रीभर्तुः प्रीतिसिद्ध्यै[१] विविधशुभकृतीः केवलं यस्तु कुर्वन् ।
निर्लेपो दग्धकर्मा मतिकृतिकरणैर्लोकशिक्षां च कर्तुं
देवैर्वृष्टामृतार्चः प्रवचनचतुरो मे प्रवक्तृत्वदः स्यात् ॥ २६ ॥

(सौ.प्र.) **लब्धग्रन्थ** इति । **यः** मध्वः **लब्धग्रन्थः** । शङ्करार्यद्वारा लब्धाः ग्रन्थाः येन स तथोक्तः । अनेन 'दशहृदयनियोगादग्रहीच्छङ्करार्यः' [म. वि.१४.२] इत्युक्तरीत्या विष्णुमङ्गलदेवालये राज्ञा दापितं पूर्वं पद्म-तीर्थेनापहृतं मध्वशास्त्रग्रन्थजातं शङ्करार्यः श्रीमध्वानुज्ञया जग्राहेति[२] कथा सूचिता । **यः लिकुचकविवरेण** । लिकुचकुलोत्पन्नेन कविवरेण त्रिविक्र-मपण्डिताचार्येणेत्यर्थः । **अलं** सम्यक् **स्तुतः** । सहजस्य पुस्तकलाभाख्य-विजयात् सन्तुष्टस्त्रिविक्रमार्यः श्रीमध्वाचार्यसमीपेऽवनतं सकलग्रामीणजन-परिवृतं जयसिंहभूपम्—'स्वःसुन्दरीभुजलतापरिरम्भणी धूः पौरन्दरी भवति यं भजतां भुजिष्या । आनन्दतीर्थभगवत्पदपद्मरेणुः स्वानन्ददो भवतु ते जयसिंहभूप' इत्येवं मध्वस्तुतिरूपेणाऽशीर्वचनेनातोषयदिति कथाऽनेन सूचिता । **निर्लेपः**, अपरोक्षीकृतभगवत्स्वरूपत्वात्, तत्रापि भाविब्रह्मात्म-

१.'प्रीतिवृद्ध्यै' इति पाठान्तरम् । २.'जगृह इति' इति पा. ।

कत्वाच्चाशुभलेपरहितः । 'तद् यथा पुष्करपलाश आपो न श्लिष्यन्त एव-मेवंविदि पापं कर्म न श्लिष्यते'[छा.४.१४.३], 'येन स्यात् केन स्यात् तेनेदृश एव' [बृ.४.५.१] इत्यादिश्रुतेः 'स्वेच्छयैव प्रवृत्तिस्तु ब्रह्मणो विधिचोदिता' इत्यादिस्मृतेश्च । अत एव **दग्धकर्मा** भस्मीभूताखिलबन्धक-कर्मा । 'ज्ञानाग्निः सर्वकर्माणि भस्मसात् कुरुते तथा' [भ.गी. ४.३७] इत्यादेः । एवंविधः **यः** मध्वः । **तु**शब्देनाच्छिन्नभगवद्भक्तत्वाख्यं विशेषं द्योतयति । **केवलं श्रीभर्तुः** हरेः प्रीतिसिद्ध्यै[१] प्रसादातिशयाय । **लोकशिक्षां कर्तुं च** । 'लोकस्तु भुवने जने' इत्यमरः । ननु प्रत्यवायपरिहाराद्यपेक्षयेति भावः । **मतिकृतिकरणैः** । मतिकृत्योः ज्ञानकर्मणोः करणानि इन्द्रियाणि । तैः ज्ञानेन्द्रियैः कर्मेन्द्रियैश्चेत्यर्थः । 'खमिन्द्रियं हृषीकं च स्रोतोऽक्षं करणं विदुः' इति धनञ्जयः । **विविधशुभकृतीः** स्नानहरिध्यानव्याख्यानार्चनादि-नानाविधशुभकर्माणीत्यर्थः । **कुर्वन्** सन् । **मतिकृतिकरणैः लोकशिक्षां कर्तुं च** इति वा सम्बन्धः । मतिः मननं व्याख्यानमिति यावत् । कृतिकरणानि कर्माचरणानि तैरित्यर्थः । **इह** विष्णुमङ्गले **दिनानि** कतिपयदिवसान् **निन्ये** प्रापयामास[२] । णीञ् प्रापण इति धातोर्लिट् । **यः देवैः वृष्टामृतार्चः** । वृष्टं अमृतं यासु तास्तथोक्ताः अर्चाः साळग्रामरूपाः प्रतिमाः यस्य स तथो-क्तः । अनेन निर्माल्यविसर्जनसमये साळग्रामेषु स्थितं देवैरभिवृष्टममृतं शिष्या ददृशुरिति कथा सूचिता । **यः प्रवचनचतुरः** । स्नानध्यानादिप्रातः-कालानुष्ठेयकर्मानुष्ठानानन्तरं व्याख्यानमकरोदिति भावः । चतुर इत्यनेन 'प्रवचनमतिचित्रं देहभाजां श्रुतीनाममृतममृतभावस्यैष हेतुं चकार' [म.वि. १४.२४] 'धनमिव सधनायेभ्योऽर्कसूनुः प्रसन्नः शरशतमिव पार्थः संयुगार्थिभ्य उग्रः'[म.वि.१४.२५] इत्युक्ता व्याख्यानचातुरी सूचिता । सः मध्वः **मे प्रवक्तृत्वदः** व्याख्यातृत्वप्रदः **स्यात्** भवतु । अस भुवीत्यस्माल्लिङ् ॥

(सं.दी.) अथ द्वाभ्यां चतुर्दशसर्गसङ्क्षेपः । लब्धग्रन्थः [१४.२] लिकुच-

१.'प्रीतिवृद्ध्यै' इति पा. । २.'यापयामास' इति स्वरसः पाठः ।

कविवरेणालं स्तुतः [३-४] इह निन्ये दिनानि [६], निर्लेपः सन्नपि दग्ध-कर्मा सन्नपि केवलं श्रीभर्तुः प्रीतिसिद्ध्यै लोकशिक्षां कर्तुं च मतिकृतिकरणै-र्विविधशुभकृतीः कुर्वन्निति समग्रसर्गाभिप्रायमेकयोक्त्या सङ्गृह्याऽह। दैवैर्वृष्टा-मृतार्चः[१३] प्रवचनचतुरः [२३-२४] मे प्रवक्तृत्वदः स्यात् ॥ २६ ॥

स्नातो देवाभिषेक्ता सदरिदरधरस्तन्त्रशास्त्रानुवृत्त्या
सम्यक् सम्पूज्य विष्णुं वरतुळसिकया दर्शनीयोऽथ भुक्त्वा ।
नानालोकाभिनन्दी गुरुरथ विलसद्व्याख्यया सान्ध्यकृत्यं
कृत्वा गोविन्दलीलाकथक उत कथां वैष्णवीं वाचयेन्नः ॥ २७ ॥

(सौ.प्र.) स्नात इति। मध्याह्नपर्यन्तं व्याख्याय **स्नातः** कृतमाध्याह्निकस्नान इत्यर्थः । अकर्मकत्वात् 'गत्यर्थाकर्मक–' [३.४.७२] इत्यादिना कर्तरि क्तः। **अथ देवाभिषेक्ता** देवस्याभिषेक्ता। स्नानानन्तरं साळग्राममभिषिच्य तीर्थं पीतवानिति भावः। **अथ सदरिदरधरः**। सन्तौ उत्तमौ अरिदरौ चक्र-शङ्खौ धरतीति तथोक्तः । ऊर्ध्वपुण्ड्रधारणानन्तरं चक्रादिकं धृतवानिति भावः । अथ **तन्त्रशास्त्रानुवृत्त्या** । तन्त्रशास्त्रं पञ्चरात्रं तदनुसारेणेत्यर्थः । **वरतुळसिकया** । वरा सकलपुष्पश्रेष्ठा या तुळसिका तया । तुळसीशब्दात् स्वार्थे कन्प्रत्यये 'केऽणः' [७.४.१३] इति ह्रस्वे टाप् । **विष्णुं सम्यक् सम्पूज्य** । 'स ददधिकबोधः षोडशात्रोपचारान् व्यरहयद्गुणान् द्वात्रिंश-दागःपुरोगान्'[म.वि.१४.३६] इत्याद्युक्तरीत्या सकलोपचारसाहित्य-महाभक्तिपूर्वकत्वरूपसम्यक्त्वं समित्युपसर्गेण सूचितम् । द्वात्रिंशद-पराधपूर्वकदोषराहित्यरूपसम्यक्त्वं सम्यगित्यनेन। **अथ दर्शनीयः**। 'कृत-परमसपर्यः सान्द्रसच्चन्दनाम्भःपरिमळितभुजोरोमण्डलांसो मनीषी । स्मित-रुचिरमुखेन्दुः स्निग्धकौशेयवासाः'[म.वि.१४.३८] इत्युक्तरीत्या हर्यर्पित-श्रीगन्धलेपनकौशेयधारणादिना सर्वेषां नेत्रोत्सवप्रद इत्यर्थः। **अथ भुक्त्वा**

भिक्षां कृत्वा । **नानालोकाभिनन्दी** । भिक्षानन्तरं व्याख्यानमण्टपे आसनश्रेष्ठे उपविश्य नानाविद्याविलासैः नानालोकान् नानाविधविद्वज्जनान् अभिनन्दयति तच्छीलस्तथोक्तः । भिक्षार्थमामन्त्रयतो नानाजनान् तदङ्गीकारेण अभिनन्दयतीति तथोक्तः । स्वदिदृक्षया आगतान् नानाजनपदस्थान् जनान् आस्यतामिति सबहुमानेन वचसा अभिनन्दयतीति तथोक्तः । **अथ** श्रवणार्थं शिष्येष्वागतेषु **विलसद्व्याख्यया** शोभमानेन व्याख्यानेन **नानालोकाभिनन्दी** । 'अरमयदिह नानाहृद्यविद्याविलासैः'[म.वि.१४.४०] इत्यादिनोक्तस्यार्थस्य सङ्ग्रहार्थं नानालोकाभिनन्दीत्येतच्चतुर्वारमावर्तितमिति[१] ज्ञेयम् । **उत सान्ध्यकृत्यं** सान्ध्यं सन्ध्याकालसम्बन्धि तत्कालानुष्ठेयमित्यर्थः । कृत्यं कर्म **कृत्वा उत** रात्रावित्यर्थः । **गोविन्दलीलाकथकः** । 'दलितेन्द्रनील–'[म.वि.१४.५३] इत्याद्युक्तरीत्या गोविन्दलीलानां कृष्णलीलानां कथकः प्रतिपादकः । कृष्णलीलाप्रतिपादकग्रन्थप्रवचनं कुर्वन्नित्यर्थः । **गुरुः** मध्वः **नः** अस्मान् **वैष्णवीं** विष्णुसम्बन्धिनीं **कथां वाचयेत्** । [२]णिजन्तात् वच परिभाषण इति धातोः विधौ लिङ् । 'गतिबुद्धिप्रत्यवसानार्थशब्दकर्माकर्मकाणामणि कर्ता स णौ'[१.४.५२] इति द्विकर्मकत्वम् ॥ २७ ॥

(सं.दी.) विविधशुभकृतीः कुर्वन्निति सङ्गृह्योक्तमिह किञ्चिद् विविच्याऽह । स्नातः [२६-२७] देवाभिषेक्ता [२८]सदरिदरधरः [३०] तन्त्रशास्त्रानुवृत्त्या वरतुळसिकया विष्णुं सम्यक् सम्पूज्य [३४-३७] दर्शनीयः [३८] अथ भुक्त्वा [३९] अथ विलसद्व्याख्यया नानालोकाभिनन्दी गुरुः [४३;४५] सान्ध्यकृत्यं कृत्वा [४८] उत गोविन्दलीलाकथकः [५२-५५] नोऽपि वैष्णवीं कथां वाचयेत् ॥ २७ ॥

१.'–मावर्तनीयमिति' इति पा.

२.'वच भाषणे' इति धातुपाठे द्विः पठ्यते, अदादौ च चुरादौ च । वक्तीति वाचयतीति । तत्र ण्यन्तस्य वक्तेरिदं रूपमित्यर्थः ।

[पञ्चदशसर्गकथा]

मान्योपन्यासधन्यो हरिरखिलगुणो ब्रह्म वेदैकवेद्यः
कर्ता विश्वस्य मोक्षं शुभसुखविषयं राति भक्तेभ्य इत्थम् ।
सत्तर्कैः साधयित्वा श्रुतिशतसहितैः सूरिसूनुं विजित्य
व्याख्याता तस्य पूर्णप्रमतिरनुदिनं व्याख्ययाऽऽप्याययेन्माम् ॥
॥ २८ ॥

(सौ.प्र.) **मान्येति** । **पूर्णप्रमतिः** पूर्णप्रज्ञाचार्यः । **अनुदिनं** प्रतिदिवसमित्यर्थः । वीप्सायामव्ययीभावः । **व्याख्यया** व्याख्यानेन **मां आप्याययेत्** आप्यायितं कुर्यात्, सन्तोषयत्विति भावः । 'ओप्यायी वृद्धौ' इति धातोर्णिजन्ताद् विधौ लिङ् । कथम्भूतः? **मान्योपन्यासधन्यः** । अतिविलम्बातित्वरास्खलनादिराहित्येन श्रुत्याद्यनुसारित्वेन च मान्यः पूजनीयो य उपन्यासः तेन धन्य इत्यर्थः । अनेन 'कुडेल्' इति प्राकृतनामके ग्रामे ग्रामीणजनसाधारणे देवालये भाष्यं व्याकुर्वन् मध्वः प्रतिवादित्वेनाऽगतं त्रिविक्रमार्यं दृष्ट्वोपन्यासमकार्षीदिति कथा सूचिता । पुनः कथम्भूतः? **सूरिसूनुम्** । सूरेः सुब्रह्मण्याख्यपण्डितस्य सूनुं त्रिविक्रमार्यं **विजित्य तस्य** त्रिविक्रमार्यस्य **व्याख्याता** । पराभवानन्तरं शिष्यभावं प्राप्ताय तस्मै भाष्यं व्याख्यातवानिति भावः । किं प्रमेयं साधयित्वा तं जिगाय कश्चोपन्यासविषयोऽर्थ इति जिज्ञासायामाह– **हरिरखिलगुण** इत्यादि । **हरिः** अखिलाः गुणाः ज्ञानानन्दादिशुभधर्माः यस्य स तथोक्तः । **ब्रह्म**, 'सत्यं ज्ञानमनन्तं ब्रह्म'[तै.२.१] इत्यादौ ब्रह्मशब्दवाच्य इत्यर्थः । **वेदैकवेद्यः** केवलं वेदैर्ज्ञेय इत्यर्थः । केवलार्थकस्यैकशब्दस्य 'दोषैकदृक्' इत्यादाविव पूर्वनिपाताभाव इति ज्ञातव्यम् । **विश्वस्य** जगतः **कर्ता** । **भक्तेभ्यः मोक्षं राति** ददाति । रा दान इति धातोर्लट् । भक्तेभ्य इत्यनेन भक्तिर्मोक्षसाधनमिति सूचितम् । कीदृशं मोक्षम्? **शुभसुखविषयम्** । शुभं दुःखासम्भिन्नं सुखं स्वरूप-

सुखं विषयः भोग्यं यस्मिन् तं तथोक्तम् । स्वरूपानन्दाविर्भावात्मकमिति भावः । शुभं सुखं येभ्यस्ते शुभसुखाः । स्वरूपसुखव्यञ्जका इत्यर्थः । तथोक्ताः विषयाः यस्मिन् इति चार्थः । 'स्वानन्दविषये मोक्षे वेदोक्ते युक्तिसाधिते'[म.वि.१५.६२]; 'यत्र स्वानन्दिनः सन्तः सेवन्ते विषयान् बहून्' [म.वि.१५.४७] इत्युक्तेः । अथवा सुखं च विषयाश्च सुखविषयाः । शुभाः सुखविषयाः यस्मिन् तं तथोक्तमित्येकयोक्त्याऽर्थद्वयलाभ इति ज्ञेयम् । **इत्थं श्रुतिशतसहितैः** । शतशब्दो बहुत्वार्थः । बहुश्रुतिसहितैरित्यर्थः । अत एव **सत्तर्कैः** समीचीनयुक्तिभिः । 'ऊहस्तर्कोऽनुमा युक्तिः' इत्यमरः । **साधयित्वा सूरिसूनुं विजित्य** इत्यनेनान्वयः । साधयित्वेत्युपलक्षणम् । मतान्तराणि दूषयित्वेत्यपि ग्राह्यम् । 'प्रधानमपराधीनं कारणम्'[1][म.वि. १५.९] इत्याद्युक्तरीत्या तेषां दूषितत्वात् । 'नहि वञ्चितपरप्रहारोऽपि युयुत्सुस्तमप्रहरमाणो विजयते । नापि स्वात्मानमरक्षन् परघाती विजयी' इति कथालक्षणटीकोक्तन्यायेन विजयार्थं स्वपरपक्षसाधनोपालम्भनयोः कर्तव्यत्वाच्चेति बोध्यम् ॥ २८ ॥

(सं.दी.) अथ द्वाभ्यां पञ्चदशसर्गसङ्क्षेपः । मान्योपन्यासधन्यः [१५.३-७] हरिरखिलगुणः, ब्रह्म, वेदैकवेद्यः, विश्वस्य कर्ता [८] । शुभसुखविषयं मोक्षं भक्तेभ्यो राति [४७] । इत्थं श्रुतिशतसहितैः सत्तर्कैः साधयित्वा [८-६३] सूरिसूनुं विजित्य [६६-६९] तस्य व्याख्याता [७१] पूर्णप्रमतिरनुदिनं व्याख्ययाऽऽप्याययेन्माम् ॥ २८ ॥

साम्प्रत्नैविक्रमार्याद् व्यरचयदनुभाष्यं शतग्रन्थकर्ता
सोदर्यं स्वं विरक्तं यतिमकृत महासद्गुणं विष्णुतीर्थम् ।
वादीन्द्रं पद्मनाभं प्रियमथ च परान् सद्गुणान् श्लाघ्यशिष्यान्
योऽनेकान् सद्गृहस्थानपि स विजयते कण्वतीर्थान्तिकस्थः ॥ २९ ॥

१.' प्रधानमपराधीनम्' इतीयदेव क्वचित् ।

(सौ.प्र.) साम्न इति । **शतग्रन्थकर्ता** । शतशब्दो बहुत्वार्थः । श्रीमत्सूत्रभाष्योपनिषद्भाष्यगीताभाष्यादिबहुग्रन्थकर्तेत्यर्थः । **यः** मध्वः **त्रैविक्रमार्यात्** त्रिविक्रमार्यसम्बन्धिनः **साम्नः** । प्रार्थनारूपं वचनं साम, तस्मादित्यर्थः । **अनुभाष्यं** [1]अनुव्याख्यानाह्वयं ग्रन्थं **व्यरचयत्** अकरोत् । [2]रच विस्तार इत्यस्माण्णिजन्ताल्लङ् । अनेन 'यद्यपि भवता बहवः सद्ग्रन्थाः रचिताः । तथाऽपि– 'ग्रन्थेभ्य एभ्योऽगाधेभ्यो युक्तयो नो दुरुद्धराः । मनोमान्द्यात् ततो ग्रन्थं व्यक्ततर्कततिं कुरु' [म.वि.१५.८७] इति ग्रन्थान्तरप्रशंसनपूर्वकं त्रिविक्रमार्यैः कृतया प्रार्थनयाऽनुव्याख्यां चकारेति कथा सूचिता । व्यरचयत् इत्यत्र वीत्युपसर्गेणानुव्याख्यानं[3] रचयन् मध्वश्चतुर्भिः शिष्यैरध्यायचतुष्टयं युगपदलेखयदिति विशेषः सूचितो भवति । **अथ यः विरक्तम्,** अत एव पारिव्राज्यं प्रार्थयन्तमिति भावः । **स्वं** स्वकीयं **सोदर्यम्,** समानोदरे शयितः सोदर्यः, भ्रातेति यावत्, तम् । 'सोदराद् यः' [४.४.१०९] इति यप्रत्ययः । **महासद्गुणम्** । महान्तः सद्गुणाः श्रवणमननशमदमाद्याः यस्य तं तथोक्तम् । **विष्णुतीर्थं यतिं** विष्णुतीर्थनामकं यतिं **अकृत** अकार्षीत् । डुकृञ् करण इत्यस्माल्लुङ् । **अथ** गोदातीरादागतं शोभनभट्टाख्यं द्विजं **पद्मनाभं यतिं** पद्मनाभतीर्थाख्यं यतिं **अकृत** । कीदृशम्? **वादीन्द्रं** वादिश्रेष्ठम् । दुर्वादिनिराकरणे दक्षमिति भावः । श्रुतिमतिभक्तिविरक्त्यादिसद्गुणसम्पन्नत्वात्[4] **प्रियं** प्रीतिविषयम् । अत एव सद्यः शुभां विद्यां ददाविति भावः । **यः परांश्च** उक्तोभयव्यतिरिक्तांश्च **सद्गुणान्** शमदमादिसद्गुणयुक्तान् **अनेकान् श्लाघ्यशिष्यान् अकृत** । बहून् सद्द्विजान् हृषीकेशादिनामकयतीनकृतेति भावः । हृषीकेशतीर्थादिषु केचिद् विष्णुतीर्थपद्मनाभतीर्थयोः सकाशात् प्रथमे केचिच्चरमे इति ज्ञातव्यम् । **यः सद्गृहस्थानपि**

१.'अनुव्याख्याह्वयम्' इति च । २.वस्तुतस्तु चुरादिरयं धातुः– 'रच प्रतियत्ने' इति ।
३.'–व्याख्याम्' इति च । ४.'–क्त्यादिगुणसम्पन्नत्वात्' इति च ।

लिकुचसूर्यादीन् समीचीनान् गृहस्थानपि **अनेकान् श्लाघ्यशिष्यान्** मुख्य-शिष्यान् **अकृत** । **कण्वतीर्थान्तिकस्थः** । कण्वतीर्थान्तिके कण्वतीर्थ-समीपे तिष्ठतीति तथोक्तः । कण्वतीर्थान्तिकग्रामे एकवाटे 'तान्त्य' इति प्राकृतनामकाधिवासगते मठे चातुर्मास्यमुषितवानिति भावः । **सः** मध्वः **विजयते** उत्कृष्टो वर्तते । जि जय इत्यस्माल्लट् ।। २९ ।।

(सं.दी.) त्रैविक्रमार्यात् साम्नः [७२-८७] योऽनुभाष्यं व्यरचयत् [८८-८९] शतग्रन्थकर्ता [८४], विरक्तं महासद्गुणं [९९-११४] स्वं सोदर्यं विष्णुतीर्थं यतिमकृत [९६-९८], प्रियं वादीन्द्रं च पद्मनाभं यतिमकृत [१२०-१२४], अथच यः परान् सद्गुणान् श्लाघ्यशिष्यान् यतीनकृत [१२७-१३४], अनेकान् सद्गृहस्थानपि श्लाघ्यशिष्यानकृत [१३५-१३७], कण्वतीर्थान्तिकस्थः [१४०] स मध्वो विजयते ।। २९ ।।

[षोडशसर्गकथा]

संस्तव्यो वेदमानं समवितुमतनोदोषधीर्यः क्षणान्ते
दीप्ताङ्गुष्ठः शिलानीः श्रुतिविवरणकृद् वर्णितः स्तम्भिताब्धिः ।
अङ्गुल्या गण्डवाटावतुलबलचणौ चालने यस्य नालं
प्राग्वाटो वा वदूढो मम मनसि लसेदप्यलाव्यैकलोमा ।। ३० ।।

(सौ.प्र.) संस्तव्य इति । **यः** मध्वः **संस्तव्यः** सम्यक् स्तोतव्यः । अनेन कश्चन कोविदो मध्वशिष्यः श्रीहरिभक्तेभ्यो वैदिकेभ्यः श्रीमध्वानुभावं वर्णयामासेति कथा सूचिता । कथं वर्णयामासेति जिज्ञासायामाह– **वेद-मानमित्यादि** । **यः वेदमानं** वेदाख्यं प्रमाणं **समवितुं** सम्यग् रक्षितुम् । तत्प्रामाण्यं समर्थयितुमित्यर्थः । **क्षणान्ते** क्षणमध्ये । 'सद्योऽसौ निजकर-पल्लवद्वयेन' [म.वि.१६.५] इत्युक्तरीत्या सद्य इति भावः । **ओषधीः अतनोत्** । तनु विस्तार इत्यस्माल्लङ् । अनेन ओषधिविशेषबीजं गृहीत्वा 'या ओषधीः पूर्वा जाताः' [ऋ.१०.९७.१] इत्यादिसूक्तजपे कृते सद्य

एवाङ्कुराद्युत्पत्तिर्भवतीति श्रुतावुच्यते, तथाकरणेऽप्युक्तफलानुपलम्भाद् वेदवाक्यमप्रमाणमिति गोमतीतीरे केनचिच्छूद्रेण राज्ञाऽभिहितो मध्वः श्रुत्युक्तं फलमधिकारिणामेव भवतीत्याह स्म; अनुपलम्भादधिकारी खर-विषाणायित इति पुनस्तेनाऽऽक्षेपे कृते सद्य ओषधिविशेषबीजं गृहीत्वा तत् सूक्तं जपित्वाऽङ्कुरदलपुष्पबीजानि ससर्जेति कथा सूचिता । **दीप्ताङ्गुष्ठः** । दीप्तोऽङ्गुष्ठो यस्य स तथोक्तः । 'पुंस्यङ्गुष्ठः प्रदेशिनी' इत्यमरः[१] । कदाचिद् रात्रौ व्याख्यानसमये दीपे संशान्ते दीपं विना स्वपदाङ्गुष्ठनखकान्त्यैव शिष्यान् वाचयमासेति कथाऽनेन सूचिता । **शिलानीः** । शिलां नयतीति तथोक्तः । तुङ्गभद्रातीरे कलशाख्यक्षेत्रे नदीतीरे स्थापयितुं सहस्रग्रामजनैः[२] किञ्चिद् दूरं नीतां पश्चादशक्त्या मुक्तां स्थूलां शिलां स्वयमेक एव नीत्वाऽभिमतस्थले स्थापयामासेति कथाऽनेन सूचिता । **श्रुतिविवरण-कृत्** । श्रुतीनां विवरणं व्याख्यानं करोतीति तथोक्तः । **वर्णितः** । 'वेदानां समुचितभाववाददक्षम्'[म.वि.१६.१८] इत्याद्युक्तरीत्या स्तुत इत्यर्थः । **स्तम्भिताब्धिः** । स्तम्भितोऽब्धिर्येन स तथोक्तः । कदाचित् सूर्योपराग-कालेऽखिलजनैः सह स्नानार्थं कण्वतीर्थप्रदेशेऽब्धिं गतो मध्वस्तत्तीरे वेदान् व्याचख्यौ । तदा व्याख्यां श्रुत्वा सद्भिः स्तुतोऽसौ तेषां स्वस्मिन् भक्त्य-तिशयार्थं स्नानानन्तरं कटाक्षं प्रयुज्याब्धिं तटाकवच्चलनरहितं कृतवानिति कथाऽनेन सूचिता । **अतुलबलचणौ** । अतुलं असदृशं यद् बलम्, तेन प्रसिद्धावित्यर्थः । 'तेन वित्तश्चुञ्चुप्चणपौ'[५.२.२६] इति चणप्प्रत्ययः । गण्डवाटौ गण्डवाटकुलोद्भवौ । तस्य कुलस्य 'कोडिञाडि' इति प्राकृत-सञ्ज्ञा । **यस्य** मध्वस्य **अङ्गुल्याः चालने** विषये । अलमिति पर्याप्तौ । **अलं** समर्थौ **न** अभूतामित्यर्थः । **प्राग्वाटो वा** । वाशब्दोऽप्यर्थे । प्राग्वाटकुलो-द्भवोऽपीत्यर्थः । तस्य 'मूडेम्बाडि' इति प्राकृतसञ्ज्ञा । **यस्य अङ्गुल्याः**

---

१. नेदं वक्तव्यम् । नहीदं पर्यायवचनम् । अथ लिङ्गानुशासनायेदमुदितम्– 'अङ्गुष्ठ इति पुंसि' इति, तथाऽपि प्रदेशिनीति न वक्तव्यम् । २.'सहस्रजनैः' इति पा.

चालने अलं समर्थौ न अभूदित्यन्वयः। अनेन त्रिंशन्नरवरनीतध्वजयष्टिनयनादिनाऽतिबलिष्ठाविति प्रथितौ गण्डवाटावागत्य स्वकण्ठपेषणं कर्तुमुद्युक्तौ, आस्विन्नावलसौ भूत्वा भूमौ पेततुश्च; अथ मध्वः श्रमपरिहारार्थं स्ववाक्येन शिष्याभ्यां छत्राभ्यां वीजितौ तौ भूतळस्थस्वाङ्गुलिसमुद्धरणार्थमादिशत्; तदर्थं यतमानौ तौ चालयितुमपि नाशक्नुताम्; एवमेव प्राग्वाटोऽप्यभूदिति कथे सूचिते। **वटूढः**। वटुना ऊढः धृत्वा नीतः। **अलाव्यैकलोमाऽपि**। अलाव्यं छेत्तुमशक्यं एकं लोम रोम यस्य स तथोक्तः। विशेषणसमुच्चये अपिशब्दः। अनेन गण्डवाटपराभवानन्तरं तयोरपमानातिशयार्थं लघिमानं दर्शयितुं च कश्चन वटुमधिरुह्य कश्चन देवालयं परितो जगाम। पूर्ववाटजयानन्तरं बहुभिर्बलिष्ठैर्लेखिन्यां वेष्टयित्वा कृष्यमाणमप्यस्य लोम 'नाप्येकं तनुरुहमस्य तूद्पाटि'[म.वि.१६.३४] इत्युक्तरीत्या नोत्पाटितमिति कथे सूचिते। यः इति श्रवणात् सः इति लभ्यते। क्वचित् 'स स्तव्यः' इति पाठः। **मम मनसि लसेत्** प्रकाशताम्। लस श्लेषणक्रीडनयोरित्यस्माल्लिङ्। **मम मनस्यपि** इति वाऽपिशब्दसम्बन्धः। तथाच यथा महात्मनां मनसि लसति तथा मम मनस्यपीत्यर्थः॥ ३० ॥

(सं.दी.) अथ त्रिभिः षोडशसर्गसङ्क्षेपः। यः संस्तव्यः [१६.१] वेदमानं समवितुं क्षणान्त ओषधीरतनोत् [२-५], दीप्ताङ्गुष्ठः [६] शिलानीः [७-९] श्रुतिविवरणकृत् [१६] वर्णितः [१७-१८] स्तम्भिताब्धिः [२३], यस्याङ्गुल्याश्चालनेऽपि अतुलबलचणौ गण्डवाटौ नालम् [२५-२९], प्राग्वाटो वा नालम् [३१-३२], वटूढः [३०] अलाव्यैकलोमा [३४] स मम मनसि लसेत्॥ ३० ॥

पारन्तीशाभिनन्दी सपदि च सरितामन्तरेऽवर्षयद् यो
ग्रीष्मे मित्रीचकाराप्यहितमथ गतो वैद्यनाथं स्वभूत्यै।

छन्दःखण्डार्थवादी जितकुमतिकुलो दुर्जनेर्ष्याभ्युपेक्षी
लघ्वन्नं बृंहयेदत्त्यपि बहु धनिनामल्पकल्पेन तुष्येत् ॥ ३१ ॥

(सौ.प्र.) पारन्तीशेति । **यः** मध्वः **पारन्तीशाभिनन्दी** । पारन्त्याः ईशः पारन्त्याख्यायतनस्वामी पञ्चात्मा मुररिपुरित्यर्थः । तमभिनन्दयतीति तथोक्तः । अनेन बहुकालं नैवेद्यादिहीनं पारन्तीसुरसदनं प्राप्तो मध्वो राजादीन् मेळयित्वा दिनार्द्धमात्रात् तद्देवालयगतदेवविभवान् कारयामासेति कथा सूचिता । **यः सरितामन्तरे** सरिदन्तराख्यग्रामे । 'इडेतुदे' इति प्राकृतसञ्ज्ञा । नेत्रावतीकुमारधारामध्यगतत्वात् सा सञ्ज्ञा । तत्समीपस्थनद्यन्तरविवक्षया सरितामिति बहुवचनम् । नदीद्वयनिष्ठशुभधर्मबाहुल्यापेक्षया वा । **ग्रीष्मे च** ग्रीष्मर्तावपीत्यर्थः । **सपदि अवर्षयत्** । वृष सेचन इत्यस्माण्णिजन्ताल्लङ् । सरिदन्तराख्यग्राममायास्यन् मध्वः तत्रत्यतटाकं निर्जलं श्रुत्वा तत्पूर्त्यर्थं मेघौघं सपद्यवर्षयदिति कथाऽनेन सूचिता । **अहितमपि** शत्रुमपीत्यर्थः । **मित्रीचकार** । अमित्रं मित्रं सम्पद्यते तच्चकार मित्रीचकार । सुहृदं चकारेति भावः । 'अभूततद्भावे कृभ्वस्तियोगे सम्पद्यकर्तरि च्विः' [५.४.५०] इति च्विप्रत्यये, 'अस्य च्वौ'[७.४.३२] इत्यकारस्येकारः । कथं मित्रीचकारेत्याकाङ्क्षायां **मित्रीचकार** इत्यावर्तनीयम् । स्वात्मानमिति शेषः । **मित्रीचकार** सूर्यसदृशं चकारेत्यर्थः । सूर्यवद् भासमानं दर्शयामासेति भावः । 'द्युमणिस्तरणिर्मित्रः' इत्यमरः । अनेन दुर्जनप्रेरितः पूर्वोक्तग्रामपतिः शूद्रश्रेष्ठः मध्वं प्रहर्तुमागत्य सूर्यवद् भासमानं ततो गच्छन्तमेनं दृष्ट्वा विस्मितो ननामेति कथा सूचिता । **अथ स्वभूत्यै** । स्वः स्वकीयः । आत्मात्मीयधनेषु स्वशब्दस्मरणात् । तस्य भूत्यै । ज्ञानभक्त्याद्यैश्वर्यार्थमिति तादर्थ्ये चतुर्थी । **वैद्यनाथम्** । 'क्षेत्राग्र्यं त्रिभुवनवैद्यनाथनाथम्' [म.वि. १६.४०] इत्युक्तरीत्या वैद्यो धन्वन्तरिः । 'मुख्ये सम्प्रत्ययः' इति न्यायात् । सः नाथः यस्य तत् तथोक्तम् । क्षेत्रमिति शेषः । तस्य 'इडेय' इति[१] प्राकृत-

---

१.यद्यपि इदानीमिदं क्षेत्रं कोक्कड इति प्रख्यायते । विश्वपतितीर्थीये मध्वविजयव्याख्यानेऽपि

सञ्ज्ञा । **गतः** । गत्यर्थात् कर्तरि क्तः । अथवा **वैद्यनाथं** वैद्यनाथनामकं देवं **गतः** इत्यर्थः । अनेन तद्ग्रामप्राप्तिरुक्ता भवति । अत्र क्षेत्रमिति नाध्याहर्तव्यम् । अनेन तं ग्रामं[१] प्राप्य तत्रत्याय 'इडेपाडित्ताय' इति प्राकृतसञ्ज्ञकाय स्वभक्तायोपदेष्टुं कृष्णामृतमहार्णवाख्यं ग्रन्थं चकारेति कथा सूचिता । **छन्दःखण्डार्थवादी** । 'छन्दसां वै षष्ठेनाह्नाऽऽप्तानां रसोऽत्यनेदत्' [ऐ.ब्रा.३०.६] 'महानाम्नीनामुपसर्गानुपसृजति' [ऐ.ब्रा.१६.४] इत्येवंरूपयोर्ब्राह्मणखण्डयोरर्थं वदतीति तथोक्तः । **जितकुमतिकुलः** । जितं कुमतीनां दुर्जनानां कुलं समूहो येन स तथोक्तः । **दुर्जनेर्ष्याभ्युपेक्षी** । दुर्जनानां ईर्ष्यां मत्सरं अभ्युपेक्षत इति तथोक्तः । उच्चभूतिं 'उजेर्य' इति प्राकृतनामकं ग्रामं प्राप्तो मध्वो तत्रत्यदुर्जनैः पृष्टं ब्राह्मणखण्डार्थमुक्त्वा तान् जिगाय । पराजिताश्च ते मत्सरेण कोलाहलपूर्वकमेनमभिगताः । तदा [२]मध्वस्तानुपेक्षाञ्चक्र इति कथाऽनेन सूचिता । **लघु** स्वल्पं **अन्नं बृंहयेत्** बहळीकुर्यात् । बृहि वृद्धाविति धातोः 'शकि लिङ् च'[३.३.१७२] इति शक्यार्थे लिङ् । स्वल्पमन्नं बृंहयितुं शक्त इत्यर्थः । अनेन निर्धनैर्भक्तैरानीतमल्पमप्यन्नं चतुर्गुणं चकारेति कथा सूचिता । **धनिनां** पुरुषाणां **अन्नं बह्वपि** धनिभिरानीतं बह्वन्नमपीत्यर्थः । **अत्ति** भक्षयति । अद भक्षण इत्यस्माल्लट् । किमायासेनात्ति? नेत्याह– **अल्पकल्पेनेति** । 'ईषदसमाप्तौ कल्पब्देश्यदेशीयरः' [५.३.६७] इति सादृश्यपर्यवसायिनीषदसमाप्त्यर्थे कल्पप्प्रत्ययः । भावप्रधानश्च निर्देशः । तथा च अल्पतुल्यत्वेनेत्यर्थः । यथाऽल्पमन्नमनायासेनात्ति तथा बह्वन्नमप्यत्तीति भावः । अनेन धनिनां भक्तानां प्रीत्यै त्रिंशत्पुरुषैर्भोज्यमन्नं स्वयं बुभुज इति कथा सूचिता । स मध्वः **तुष्येत्** तुष्टो भवतु । तुष तुष्टाविति धातोर्विधौ लिङ् ॥ ३१ ॥

तथा । तथाऽपि वेदाङ्गतीर्थैः 'इडेय' इति तन्नामनिर्देशात् तदपि तस्य नामान्तरं पुराऽऽसीद् वेति विभावनीयम् । सम्प्रति 'इड्य'इति ग्रामान्तरमन्यत्रैव दृश्यते ।

१.'तद्ग्रामम्' इति पा. २.'मध्वस्तदुपेक्षा–' इति क्वचित् ।

(सं.दी.) यः पारन्तीशाभिनन्दी [३६-३७] सपदि च ग्रीष्मे सरितामन्तरेऽवर्षयत् [३८], अहितमपि मित्रीचकार [३९], अथ स्वभक्तभूत्यै वैद्यनाथं गतः [४०] छन्दःखण्डार्थवादी [४१-४३] जितकुमतिकुलः [४४-४५] दुर्जनेर्ष्याभ्युपेक्षी [४६] लघ्वन्नं बृंहयेत् [४७], धनिनां बह्वन्नमप्यल्पकल्पेनात्ति [४७] स तुष्येत् ॥ ३१ ॥

वृष्ट्यादीनां नियन्तेत्यभिहितचरितः सर्वगीर्वाणरत्नै-
र्गन्धर्वैर्गीयमानो द्युसदसि सकलैः कौतुकान्नम्यमानः[१] ।
दृष्ट्वा संस्तूयमानः सुरतरुकुसुमैरार्य आकीर्यमाणो
मध्वो जाज्वल्यतेऽसौ जगति विजयते सत्सभामङ्गलाय ॥ ३२ ॥

(सौ.प्र.) **वृष्ट्यादीनामिति** । **वृष्ट्यादीनां नियन्ता** नियामकः । **इति**, 'वेदमानं समवितुमतनोदोषधीर्यः' इत्याद्युक्तप्रकारेणेत्यर्थः । केनचिन्निजशिष्येण **अभिहितचरितः** । अभिहितं प्रतिपादितं चरितं यस्य स तथोक्तः । न केवलं निजशिष्येण अभिहितचरितः । किं नाम? 'इत्यूचे धरणिसुरेण केवलं नो माध्वीयं विविधकथा कथासु मान्या । साक्षादप्यमरवरैरुदीर्यमाणा'[म.वि.१६.४९] इत्युक्तरीत्या देवैरपीति भावेनाऽह– **सर्वगीर्वाणरत्नैरिति** । सकलदेवश्रेष्ठैरित्यर्थः । **द्युसदसि**, दिवः स्वर्गस्य सदः सभा तस्मिन्, **अभिहितचरितः** इति सम्बन्धः । **गन्धर्वैः द्युसदसि गीयमानः** गानरूपेण स्तूयमान इत्यर्थः । पद्यबन्धेन देवैरुक्तां माध्वीं कथां देवप्रीत्यै गन्धर्वास्तत्सभायां जगुरिति भावः । **सकलैः कौतुकात्** कुतूहलात् [२]**नम्यमानः दृष्ट्वा संस्तूयमानः** विविधविशिष्टशिष्यमध्ये ऐतरेयोपनिषदं व्याख्यान्तं मध्वं समुनिगन्धर्वा देवा आगत्य आकाशान्नेमुः । 'अहरो दुरागमतमः स्वर्गोगणैः' [म.वि.१६.५६] इत्याद्युक्तप्रकारेण तुष्टुवुश्चेति भावः । **सुरतरुकुसुमैः** सुरतरवो देववृक्षाः मन्दारादयः । तेषां कुसुमैः पुष्पैः । **आकीर्यमाणः**

१.'कौतुकाद् गम्यमानः' इति पाठान्तरम् । २.'गम्यमानः' इत्यपि पाठः ।

अभिवृष्यमाणः **आर्यः** श्रेष्ठः **मध्वः जगति जाज्वल्यते** । पुनःपुनरतिशयेन वा ज्वलतीत्यर्थः । ज्वल दीप्ताविति धातोः 'धातोरेकाचो हलादेः क्रियासमभिहारे यङ्' [३.१.२२] इति यङ् । 'इति निगदितवन्तस्तत्र वृन्दारकेन्द्रा गुरुविजयमहं तं लाळयन्तो महान्तम् । ववृषुरखिलदृश्यं पुष्पवारं सुगन्धं हरिदयितवरिष्ठे श्रीमदानन्दतीर्थे' [म.वि.१६.५८] इत्याद्युक्तकथाऽनेन सूचिता । **असौ मध्वः सत्सभामङ्गलाय** सतां सभाया मङ्गलार्थं **विजयते** उत्कृष्टो वर्तत इत्यर्थः ॥ ३२ ॥

(सं.दी.) वृष्ट्यादीनां नियन्ता [४८] इत्यभिहितचरितः सर्वगीर्वाणरत्नैरपि [४९] गन्धर्वैर्गीयमानः [४९-५०] द्युसदसि सकलैः कौतुकात् नम्यमानः [५१-५३] दृष्ट्वा संस्तूयमानः [५५-५७] सुरतरुकुसुमैराकीर्यमाणः [५८] आर्यो मध्वो जाज्वल्यतेऽसौ जगति विजयते सत्सभामङ्गलाय ॥ ३२ ॥

दशप्रमतिविक्रमं बहुविधात्मना हेमवत्
स मध्वविजयाभिधं व्यधित भावदीपाह्वयम् ।
प्रमेयनवमालिकां पुनरिमां च दक्षाश्रितां
सतां श्रवणभूषणं व्यदधदेष नारायणः ॥ ३३ ॥

इति श्रीनारायणपण्डिताचार्यविरचिता प्रमेयनवमालिका समाप्ता

—०—

(सौ.प्र.) एवं समापितग्रन्थो नारायणपण्डिताचार्यः केन कृतोऽयं ग्रन्थ इति शिष्यजनमनोगतामाशङ्कां परिहर्तुं स्वकीर्तिमनुवर्तयितुं च स्वनाम निर्दिशन् मध्वचारित्रप्रतिपादकग्रन्थत्रयस्यापि नामकथनपूर्वकं स्वकर्तृत्वं ब्रवीति– **दशप्रमतिविक्रममि**ति । **स एष नारायणः** नारायणाख्यो लिकुचपण्डित इत्यर्थः । **दशप्रमतिविक्रमं** पूर्णप्रज्ञाचार्यपराक्रमं **हेमवत्** सुवर्णवत् **बहुविधात्मना** बहुविधस्वरूपेण **व्यधित** विशेषेण पोषितवान्, बहुधा

प्रतिपादितवानिति यावत् । डुधाञ् धारणपोषणयोरित्यस्माल्लुङ् । यथा सुवर्णं कटकमकुटाद्याकारेण रचयन्ति तद्वदिति भावः । कथं बहुविधात्मना व्यधितेत्यत उक्तम्— **मध्वविजयाभिधमित्यादि । मध्वविजयाभिधं व्यदधत्, भावदीपाह्वयं च व्यदधत्** इति योजना । 'सुमध्वविजयाभिधम्' इति क्वचित् पाठः । मध्वचरित्रप्रतिपादको भावप्रकाशिकापरनामको भावदीपाह्वयो ग्रन्थो ग्रन्थकृता कृतोऽस्ति । वेदाङ्गतीर्थश्रीमच्चरणैस्तत्रतत्र समाख्यात्वेनोदाहृतानि वचनानि प्रायशस्तत्रत्यानि[1] । उक्तं च तैर्द्वादशे सर्गे—'कृष्णाभीष्टेत्यारभ्योक्तं प्रमेयं ग्रन्थकृता स्वयमेव सङ्गृह्याप्युक्तं भावप्रकाशिकायाम् । तदस्माभिरुदाह्रियते' इति । सङ्क्षेपेणाखिलप्रमेयप्रतिपादकत्वात् **दक्षाश्रिताम्** । दक्षैः पटुभिः अश्रितां आदृताम् । अत एव **सतां श्रवणभूषणं** कर्णभूषणायितामित्यर्थः । **इमां प्रमेयनवमालिकां च पुनः व्यदधत्** अकरोत् । एवं दशप्रमतिविक्रमं बहुविधात्मना व्यधित इति भावः । शब्विकरणाद् दध धारण इति धातोर्लङ् । नतु डुधाञ् धारणपोषणयोः इति धातुः[2] । तथा सति लङि 'व्यदधात्' इति स्यादिति ज्ञेयम् । 'व्यतनुतैष नारायणः' इति क्वचित् पाठः । 'सतां श्रवणभूषणं व्यदधदेष नारायणः' इति नारायणशब्दप्रयोगादन्तेऽपि मङ्गलमनुष्ठितं भवतीत्यशेषमतिमङ्गलम् ॥

श्रीमत्प्रमेयनवमालिकया सुयोगाद्
गङ्गापयोमिलितमार्गजलोपमेन ।
ग्राह्येण मद्वचनपुष्पकदम्बकेन
स्वात्मार्पितेन मुदमेतु हरिर्गुरुस्थः ॥

१.तदात्वेऽनुपलब्धोऽयं स्वकृतमध्वविजयव्याख्यानरूपः भावप्रकाशिकाभिधो ग्रन्थः सम्प्रत्युपलब्धः । तदिदं भाग्यं नः ।

२.धाञ्धातोरात्मनेभाषाल्लुङि 'व्यधित' इति रूपम् । परस्मैभाषाच्च व्यदधादिति । दधधातोर्लङि व्यदधदिति रूपमिति भावः । यद्यपि भ्वादिर्दधधातुरात्मनेभाषः । सर्वस्मादुभयं पदं वक्तव्यम् । 'व्यदधतैषः' इति वा पठनीयम् । 'व्यतनुतैषः' इति पाठे न कोऽप्युपद्रवः ।

श्रीहनूमद्भीमसेनमध्वहृत्पङ्कजालयः ।
श्रीरामकृष्णव्यासात्मा प्रसीदतु रमापतिः ॥

सुमध्वागमपीयूषं मां योऽपाययदाशु तम् ।
रघूत्तममुनिं वन्दे परमं गुरुमन्वहम् ॥

श्रीरामभद्रगुरवे शत्रुपक्षादभीरवे ।
दुर्वादिभूभृत्स्वरवे[1] सत्कल्पतरवे नमः ॥

गुणांशतोषिणः सन्तो दोषराशेरुपेक्षकाः ।
विदाङ्कुर्वन्तु विद्वांसो रघुवर्ययतेः कृतिम् ॥

हयास्यरूपिणे शङ्खज्ञानमुद्रादिधारिणे ।
अनिष्टहारिणे भक्तरक्षिणे चक्रिणे नमः ॥

इति श्रीरघुवर्यतीर्थविरचिता श्रीप्रमेयनवमालिकाटीका
सौरभप्रकाशिका समाप्ता ।

—०—

(सं.दी.) भावदीपाह्वयमिति भावप्रकाशिकाह्वयम् । 'श्रीशप्रीत्यै' इति, 'व्यदधदेष नारायणः' इति आद्यन्तयोः श्रीशनारायणपदाभ्यां सम्पुटीकरणाद् गुरुप्रसादद्वारा विष्णुप्रसादकृदयं ग्रन्थ इति सूचितम् ॥ ३३ ॥

इमामाचार्यगोविन्दः श्रीमध्वविजयोक्तिभिः ।
सम्बध्य दीपयामास प्रमेयनवमालिकाम् ॥

इत्याचार्यगोविन्दस्य कृतिषु
श्रीमध्वविजयप्रमेयनवमालिकासम्बन्धदीपिका समाप्ता

—०—

१. 'स्वरुः शम्बो दम्भोलिरशनिः' इत्यभिधानम् ।

श्रीवेदाङ्गतीर्थानां वृन्दावनम्, बिळगि



वेदाङ्गतीर्थमुनये गुणगणनिधये तपस्विजनघृणये ।
सुनये विद्वन्मणये प्रणयेनायं नमोवाकः ॥
महाभारततात्पर्यनिर्णयं व्याचकार यः ।
काव्यं च मध्वविजयं नुमस्तं सुजनप्रियम् ॥

श्रीरघुवर्यतीर्थानां वृन्दावनम्, फलिमारु



कृतहरिचरणसपर्यं विद्वद्वर्यं प्रणौमि रघुवर्यम् ।
शुभगुणचर्यं मस्करिगणधुर्यं वाग्विलासमाधुर्यम् ॥
रघुवर्यमुनिं स्तौमि व्याख्यया यो मनोज्ञया ।
योजयामास विमलां प्रमेयनवमालिकाम् ॥

परिशिष्टानि

१. छन्दोमीमांसा
२. बन्धमीमांसा
३. काव्यमीमांसा
४. अलङ्कारमीमांसा
५. तारतम्यमीमांसा
६. शासनमीमांसा
७. नाममीमांसा
८. श्लोकार्द्धानुक्रमणिका

छन्दोमीमांसा १

काव्यमिदं विविधसुवृत्तमिति ग्रन्थकृदेव स्वयमाह।

संहृत्य चत्वारि च चत्वारिंशच्च छन्दांस्यत्रोपयुक्तानि।

दशमसर्ग एव ४१ च्छन्दांसि प्रयुक्तानि। षोडश केवलं दशम एव। तथा उपजातेरुपेन्द्रमालायाश्चतुर्दश प्रभेदाश्च व्यवस्थया।

कथं छन्दांसि? छादयन्तीति छन्दांसि भवन्ति। किं छादयन्ति? अर्थमयं रत्नपूगं छादयन्ति करण्डकानीव च्छन्दांसि। कवेश्छन्दं व्यञ्जयन्ति च विशिष्टया भणितिभङ्ग्चेति।

द्विविधानि छन्दांसि भवन्ति। वर्णच्छन्दांसि मात्राच्छन्दांसीति।

वर्णच्छन्दांसि च मूलतस्त्रिविधानि भवन्ति– समच्छन्दांसि, अर्धसमच्छन्दांसि, विषमच्छन्दांसि चेति।

अत्रोपात्तेषु छन्दस्सु ३९ वर्णच्छन्दांसि। ५ मात्राच्छन्दांसि।

तथाहि मात्राच्छन्दांसि चेमाः पञ्च– पथ्यार्या, तस्या एव प्रभेदश्चपलार्या, गीतिः, उपगीतिः, मधुगीतिका चेति।

वर्णगणबद्धं वर्णच्छन्दः। मात्रागणबद्धं मात्राच्छन्दः। अक्षरत्रितयात्मकः वर्णगणः। कलाचतुष्टयात्मा मात्रागणः।

वर्णगणा अष्टधा। त्रिगुरुर्मगणः। त्रिलघुर्नगणः। आदिगुरुर्भगणः। आदिलघुर्यगणः। मध्यगुरुर्जगणः। मध्यलघू रगणः। अन्तगुरुः सगणः। अन्तलघुस्तगण इति। तद् यथा—

मगणः	नगणः	भगणः	यगणः	जगणः	रगणः	सगणः	तगणः
SSS	।।।	S।।	।SS	।S।	S।S	।।S	SS।

पूतात्मन्। परम। पावन। विधातः। वराह। श्रीपते। सुगते। गोविन्द।

अष्टानां गणानामिमा अष्टौ देवता भवन्ति —

'मस्य भूमिर्देवता स्यात् सम्पत्तिः फलमिष्यते।
'यस्य पाथो देवता स्यात् फलं वृद्धिः प्रकीर्तिता।
'रस्य वह्निर्देवता स्यात् फलं मरणमीरितम्।
'सस्य वायुर्देवता स्याद् देशान्तरगतिः फलम्।
'तस्याऽकाशो देवता स्यात् फलं शून्यं प्रकीर्तितम्।
'जस्य सूर्यो देवता स्याद् रोगप्राप्तिः फलं मता।
'भस्य चन्द्रो देवता स्यात् फलं कीर्तिरुदाहृता।
'नस्य नाको देवता स्यात् फलं च सुखमच्युतम्' इति कृष्णावधूतः।

मात्रागणानां चैता एव यथायोग्यम्।

मात्रागणः पञ्चधा। आदिगुरुः, मध्यगुरुः, अन्तगुरुः, सर्वगुरुः, सर्वलघुश्चेति। तद् यथा–

S।।	।S।	।।S	SS	।।।।
माधव।	**नृसिंह।**	**सुमते।**	**विष्णो।**	**परतर।**

१. अथ पथ्यार्या

तथाच पथ्यार्यालक्षणम्–'ओजे गणत्रयं पादे द्वितीये तच्चतुष्टयम्। गुरुश्च तुर्येऽपि तथा किन्तु लोऽत्र तृतीयके। विषमे जगणो नात्र पथ्यार्या सम्प्रकीर्तिता' इति। ओजे विषमपादे गणत्रयम्। मात्रागणत्रयम्– १२ मात्राः। द्वितीये तच्चतुष्टयम्। मात्रागणचतुष्टयम्– १६मात्राः, गुरुश्च, द्वे मात्रे च। एवं द्वितीयपादे १८ मात्राः। तुर्येऽपि पादे तथा। किन्तु तृतीयगणस्थाने एकमात्रो लघुः। ४+ ४+१+४+२=१५ मात्राः। विषमपादे क्वापि चतुर्मात्रो जगणो न

प्रयोक्तव्यः। तथाहि भगणश्चतुर्मात्रो गणो भवति– रोधसि। जगणोऽपि– तटेषु। सगणोऽपि– नळिनम्। तत्र जगणो न प्रयोक्तव्यः पथ्यार्याया विषम-पादयोः। तदा तु च्छन्दोन्तरं भवति।

अस्मिन् काव्ये पथ्यार्याग्रथितमेकं पद्यं विद्यते। तथाहि—

४ ४ ४ =१२
सपदिस। मस्कुरु। तभृशं
४ ४ ४ ४ २ =१८
माधव। गुणसा। धकोऽथ। मध्वर। विः।
४ ४ ४ =१२
भृगुकुल। तिलक–। स्थानं
४ ४ १ ४ २ =१५
तापक। रःपा। प। पान्था। नाम्॥ [१०.१]

२. अथ चपलार्या

पथ्यार्याया एव यदा विषमपादयोः द्वितीयौ जगणौ समपादयोरादिमौ च जगणौ सा चपलार्या। तथाहि लक्षयन्ति–'द्वितीयावोजयोर्यत्र समयोरादिमौ तथा। जगणौ सम्प्रकाशेते चपलार्येति सा मता' इति। चपलार्याबद्धमप्येकं पद्यमत्र दृश्यते। तद् यथा–

४ ४जगण ४ =१२
असमो। त्तमोम। तोऽसौ
४जगण ४ ४ ४ २ =१८
श्रियःप। तिर्वि–। श्वतोवि। भिन्ना। त्मा।
४ जगण४ ४ =१२
परमान्। प्रकाम। मर्थान्
जगण४ ४ १ ४ २ =१५
प्रकाश। यामा। स। सेत्या। दीन्॥ [१०.४७]

अत्र प्रथमतृतीयपादयोः द्वितीयो जगणः, आद्यः सगणः। द्वितीयचतुर्थपादयोः

प्रथमो जगणः। द्वितीये पुनस्तृतीयश्च । तेन मात्रासाम्येऽपि जगणघटितेति चपलार्येयम्।

३. **अथापराऽऽर्या गीतिः**। 'गीतिः पथ्यादिमदललक्षणं दलयोर्यदि' इति। तथा च चतुर्थचरणे १५ मात्रा न भवन्ति। किन्तु द्वितीयचरणवदष्टादशैव मात्राः– १२+१८+१२+१८। इयमार्या गीतिरुच्यते। तथाह्यत्रैकं पद्यम्–

४ ४ ४ =१२
दशमति। शिष्यः। कश्चित्।
४ ४ ४ ४ २ =१८
शुभजन। तायै। कुतूह। लनता। यै।
४ ४ ४ =१२
विविधसु। वृत्तं। वाक्यं
४ ४ ४ ४ २ =१८
काव्यमि। वोचे। सनाय। कस्तव। कम्॥ [१०.२]

४. **अथापराऽऽर्या उपगीतिर्नाम**। पथ्यायाः पूर्वार्धतुल्यमुत्तरार्धं चेद् गीतिरित्युक्तम्। उत्तरार्धतुल्यं पूर्वार्धं चेदुपगीतिः। तथाहि लक्षयन्ति– 'उपगीतिस्तु दलयोः पथ्यार्योत्तरलक्ष्म चेत्' इति। तथाचैवं पादव्यवस्था–१२+१५+१२+१५ मात्राः। तथाह्यत्रैकं पद्यम्–

४ ४ ४ =१२
नाने। नेना। नेना।
४ ४ १ ४ २ =१५
नेनो। नूने। न। ननुनु–। न्नाः।
४ ४ ४ =१२
नाना। नानो। नूनं।
४ ४ १ ४ २ =१५
नाने। नानू। न। नानु–। न्नः॥ [१०.६]

५. **अथापराऽऽर्या मधुगीतिका नाम**। 'यत्रैकद्वित्रिमात्राणामाधिक्यं प्रथमे पदि। तदा विगीतिः कथिता द्वितीये चेत् सुगीतिका। तृतीये त्वतिगीतिः स्याच्चतुर्थे स्वरगीतिका। कटुगीतिस्त्वोजयोश्चेत् समयोर्मधुगीतिका' इत्यादि।

गीतेः द्वितीयचतुर्थयोर्यदि मात्राधिक्यं सा मधुगीतिकेति। अष्टादशमात्रास्थाने एकान्नविंशतिर्विंशतिरेकविंशतिर्वा । तत्रैका द्वितीयचतुर्थयोर्विंशतिमात्रा मधुगीतिका त्वत्र ग्रथिता । तथाहि–

४ ४ ४ =१२
वर्त- । स्वाध्यधि । सर्वं ।

४ ४ ४ ४ ४ =२०
दीव्ये । दंसो । निशंस्व । तन्त्रो । विष्णुः ।

४ ४ ४ =१२
उज्ज्वा । सयदु-। ष्टानां ।

४ ४ ४ ४ ४ =२०
संस्कुरु । साधून् । गुणाभि । पूर्णो । प्यगुणः ॥ [१०.४६]

इति मात्राच्छन्दांसि ।

—०—

अथ वर्णच्छन्दांसि

अकारादिक्षकारान्तानामेकपञ्चाशद्वर्णानां देवताः अजादिनृसिंहान्ता भगवत्पादोक्ता वेदितव्याः। अथ वर्णानां फलम्– 'ऋऌवर्णौ विहायाचः प्रोक्ताः सम्पत्करा बुधैः । कखौ गघौ च सम्पत्तौ ङश्चापयशसि स्मृतः । चः सुखे छः प्रेम्णि जस्तु मित्रलाभे च ञो भये। झो मृतौ च टठौ दुःखे डः शोभायां च णो भ्रमे। तः सुखे थश्च युद्धे ढो विशोभायां च दः सुखे। ध्नौ सन्तोषे च पः सौख्ये फो भये बो भवेन्मृतौ। भः क्लेशे मश्च दुःखे यो लक्ष्म्यां ल्वौ व्यसनेऽपि च। रो दाहे शः सुखे षो हः खेदे सः सौख्य एव च। ळः स्याच्च विलये क्षस्तु समृद्धौ सम्प्रकीर्तितः' इत्यादि कृष्णावधूतः।

अथ च्छन्दोदेवताः –

अग्नेर्गायत्र्यभवत् सयुग्वोष्णिहया सविता सं बभूव।
अनुष्टुभा सोम उक्थैर्महस्वान् बृहस्पतेर्बृहती वाचमावत्॥

विराण् मित्रावरुणयोरभिश्रीरिन्द्रस्य त्रिष्टुबिह भागो अह्नः ।
विश्वान् देवान् जगत्या विवेश तेन चाक्लृप्र ऋषयो मनुष्याः ॥
[ऋ.१०.१३०.४–५]

गायत्रीमानिनी स्वाहाऽग्नेः सयुग्वाऽभवत्। उष्णिहया उष्णिङ्मानिन्या सञ्ज्ञया सविता सङ्गतो बभूवेत्यादि। तथाचैतदनुसारेणायं देवतानुक्रमः–

गायत्र्या अग्निपत्नी स्वाहा देवता। उष्णिहः सूर्यपत्नी सञ्ज्ञा। अनुष्टुभश्चन्द्रपत्नी रोहिणी। बृहत्या बृहस्पतिपत्नी तारा। विराडुपलक्षितायाः पङ्क्तेर्मित्रा-वरुणयोर्भार्ये रेवती गङ्गा च। त्रिष्टुभ इन्द्रपत्नी शची। जगत्याः सर्वा एता देव्यो मानिन्य इति।

पिङ्गलनागस्तु तामेतां श्रुतिमन्यथा व्याचख्यौ। तथाहि तद्वचनम्–

'अग्निः सविता सोमो बृहस्पतिर्मित्रावरुणाविन्द्रो विश्वेदेवा देवताः' [३.६३] इति। श्रुत्यर्थानवगतिजननी भ्रान्तिरेवेयं पिङ्गलनागस्य। स्त्रियो हि च्छन्दो-देवताः। अतश्छन्दसां नियत्या स्त्रीलिङ्गेनैव व्यपदेशः–'गायत्री, उष्णिक्, अनुष्टुप्–' इत्यादि। यद्यग्न्यादय एव देवता अभविष्यन्, नूनं तदा पुम्पदेनैव व्यपादेक्ष्यन्त।

ननु तर्हि अग्निपुराणं कुप्यति। इतिहासपुराणाभ्यां हि वेदं समुपबृंहयेत्? तथाह्याग्नेयवचनम्– '–छन्दसां देवताः क्रमात्। अग्निः सूर्यः शशी जीवो वरुणश्चेन्द्र एव च। विश्वेदेवाश्च–' [३३०–१९] इति।

आपातत एवेदम्। 'कश्चित् ग्रन्थान् प्रक्षिपन्ति' इत्यस्य च श्रेष्ठमुदाहरणमिदम्, यदाग्नेयमिति भवतोद्धृतम्। कोशालङ्कारशास्त्रादिमयस्य प्रचलितस्याऽग्नेयस्य मम्मटाद्यनन्तरकालभवत्वं स्फुटमितिहासविदाम्। अत एवाऽऽचार्यमध्वो नेममर्थमूरीचकार।

एताभिः सह काश्चनान्या अपि देवता ऋग्भाष्ये समुल्लिखिताः। तद् यथा–

'गायत्री बृहती चैव ताः सर्वा गरुडस्तथा ।
'ब्रह्माण्यनुष्टुबिन्द्राणी त्रिष्टुप्, स्वाहेति चोच्यते ॥
'गायत्री, जगती चैव वारुणी, रोहिणी तथा ।
'अनुष्टुप् , बृहती चैव तारा, पङ्क्तिः शची तथा ॥
'उष्णिक् सौरी, जगत्यश्च सर्वदेवस्त्रियो मताः ।
'विराण्मित्रावरुणयोर्भार्ये इति च कीर्तिते ।
'अतिच्छन्दांसि सर्वाणि सर्वदेवस्त्रियो मताः' इति ।

ताः सर्वा इति पूर्वोक्ताः श्रीः सरस्वती भारती च । तथाचायं समग्रो देवतानुक्रमः–

१. गायत्र्याः श्रीः, सरस्वती, भारती, गरुडः, स्वाहा चेति पञ्च देवताः ।

२. उष्णिहः सूर्यपत्नी सञ्ज्ञा ।

३. अनुष्टुभः सरस्वती, चन्द्रपत्नी रोहिणी च ।

४. बृहत्याः श्रीः, सरस्वती, भारती, गरुडः, देवगुरुभार्या तारा च देवताः ।

५. पङ्क्तेरिन्द्रपत्नी शची, मित्रावरुणयोर्भार्ये रेवती गङ्गा च ।

६. त्रिष्टुभः पुनरिन्द्रपत्नी शची ।

७. जगत्याः शेषभार्या वारुणी, स्वाहाद्याः सर्वदेवस्त्रियश्च देवता इति– स्वाहा, सञ्ज्ञा, रोहिणी, तारा, गङ्गारेवत्यौ, शची चेति ।

अतिजगत्यादीनां सर्वेषामप्यतिच्छन्दसां सर्वदेवस्त्रिय एवाभिमानिन्य इति च ।

तदिदं समग्रं छन्दोमानिनीनां देवतानामनुसन्धानं भवति ।

कृष्णावधूतः पुनरन्यथैव देवताक्रममाह—

'गायत्र्या देवता वह्निर्विश्वेदेवास्तथोष्णिहः ।
'बृहत्या देवता सूर्यो बृहस्पतिरनुष्टुभः ।
'अश्विनौ देवता पङ्क्तेस्त्रिष्टुभश्च सुधाकरः ।
'जगतीच्छन्दसः प्रोक्तो देवता नाकनायकः' इत्यादि ।

तत्र मूलं चिन्त्यम्। सर्वथा मन्त्रवर्णविरुद्धमाचार्यवचनविरुद्धं चेति न स्वीकारमर्हति।

तत्र प्रथममनुष्टुप् प्रस्तूयते।

अष्टाक्षराऽनुष्टुब् भवति। अत्र पञ्चविधा अनुष्टुप्प्रभेदाः प्रायुज्यन्त। पथ्यावक्त्रम्, युग्मविपुला, प्रमाणिका, विद्युन्माला, माणवकं चेति। पथ्यावक्त्रस्यैव युग्मविपुलायां पुनर्बहवोऽवान्तरभेदा भवन्ति।

६. अथ पथ्यावक्त्रम्

अथेदं लक्षणं भवति– 'सर्वपादेषु न स्यातां नसावाद्याक्षरात् परम्। अब्ध्यक्षरेभ्यो यगणो वक्त्रमाहुरनुष्टुभि। युजोरब्धेर्जकारश्चेत् पथ्यावक्त्रमुदाहृतम्' इति। आद्याक्षरात् परं नगण-सगणौ न स्याताम्। तदा त्वार्याच्छायं हि भवति। चतुर्थाक्षरात् परं यगणो भवत्ययुग्मयोः। युग्मयोर्जगणः। इदं पथ्यावक्त्रं नाम। अयुग्मयोर्यगणनियमाभावे त्वियं युग्मविपुलेत्युच्यते। तथाहि लक्षयन्ति– 'युग्मयोः सप्तमो लश्चेत् सा युग्मविपुला मता' इति। अयुग्मयोः सप्तमो लो वा स्यात्, मा वा भूत्। युग्मयोस्तु लघुरेवेति। तथाहि सप्तमस्य लघुता भगणेऽपि भवति। तगणेऽपि भवति। जगणेऽपि भवति। नगणेऽपि भवति। तत्र भगणादयोऽयुग्मयोरेव भवन्ति। युग्मयोस्तु जगणेनैव सप्तमलघुतानिर्वाह इति।

तथाच अयुजोः तत्रापि मुख्यतः प्रथमपादे, चतुर्थाक्षरात् परं तगणश्चेत् सा युग्मविपुला तविपुला नाम। रगणश्चेद् रविपुला नाम। भगणश्चेद् भविपुला नाम। नगणश्चेन्नविपुला नाम। मगणश्चेन्मविपुलेति। अयुजोर्नगणश्चेच्चपलावक्त्रमित्युच्यते। तथा हि लक्षयन्ति– 'अब्धेस्तश्चेत् तविपुला रश्चेद् रविपुला मता। भश्चेद् भविपुला प्रोक्ता नश्चेन्नविपुला मता' इति, 'चपलावक्त्रमुभयोः समुद्रान्नगणो यदि' इति च। तथाचात्र ७८ पद्यानि पथ्यावक्त्रच्छन्दोबद्धानि। तथाहि–

यगण जगण

। ऽ ऽ । ऽ ।

प्रकारं प्र । कटीक- । र्तु । मारभ्यवि । रराम । नो ।

यगण जगण

। ऽ ऽ । ऽ ।

महीयोम । तिमाहा । त्म्याद् । वैवश्येन । खननूख । लः ॥ [१०.५]

७. अथ युग्मविपुला

युग्मविपुलायां चत्वारः प्रभेदा अत्र दृश्यन्ते– प्रथमपादे तृतीये वा भगणोपेता युग्मविपुला भविपुला, रगणोपेता रविपुला, नगणोपेता नविपुला, मगणोपेता मविपुला चेति ।

अत्र सप्तदश भविपुला युग्मविपुलाः पठ्यन्ते (१५.४;८;११;४४;६०; ६४;८८;९२;१०३;१०८;११५;१२५; १३०;१३२;१३४; १३८; १३९)। तथाहि–

भगण जगण

ऽ । । । ऽ ।

नात्यत्वरा । नातिर । या । नस्खलन्ती । निरन्त । रा ।

यगण जगण

ऽ । । । ऽ ।

अनानाव । यवेत्ये । व । दवीयोभिः । प्रतर्कि । ता ॥ [१५.४]

द्वादश रविपुलाः–[१०.४८;१५.१२-१४;२०;२२;३४;४०; ८५;९३; ११३;११४] तथाहि–

रगण जगण

ऽ । ऽ । ऽ ।

समानया । यानमा । स । मायया त । तयाऽय । मा ।

रगण जगण

ऽ । ऽ । ऽ ।

नयासना । नास या । न । यातनाल । लनात । या ॥ [१०.४८]

सप्तदश नविपुलाः–[१५.१५;४९;५६;५७;५९;६५-६८;८१-८३;८६;९०;९७;१०२;१३५] तथाहि–

नगण जगण
। । । । ऽ ।
न विश्वकृत् । पशुप । तिः । श्रूयमाणा । गुणत्व । तः ।

यगण जगण
। ऽ ऽ । ऽ ।
चैत्रवत् किं । पुनर्वि । घ्न । ब्रध्नाद्या वा । लशङ्कि । ताः ॥ [१५.१५]

सप्तदश मविपुलाः–[१५.२;२३;३६;४३;५५;६९;७८;८७;९५; १०४; १०५;११०;१११;१२१;१२६;१२७;१३६] तथाहि–

यगण जगण
। ऽ ऽ । ऽ ।
परपक्ष । रथारू । ढं । खरतर्क । महायु । धम् ।

मगण जगण
ऽ ऽ ऽ । ऽ ।
त्रिविक्रमा । यं सोऽप । श्यत् । प्रतिवीर । मिवाग्र । तः ॥ [१५.२]

अत्र तृतीयचरणे मगणः । मान्त्यविपुलेयम् । यथा वा–

मगण जगण
ऽ ऽ ऽ । ऽ ।
अभावभा । वस्याभा । वाद् । भावरूप । स्य तस्य । तु ।

यगण जगण
। ऽ ऽ । ऽ ।
भावाभाव । विशेषा । णा- । मभावाद । विशेषि । णः ॥ [१५.३६]

अत्र प्रथमचरणे मगणः । मादिविपुलेयम् ।

उभयतोमगणा यथा—

मगण जगण
ऽ ऽ ऽ । ऽ ।
गुणादिभे । दे सम्ब- । न्ध । मपेक्ष्याप्य । नवस्थि । तेः ।

मगण जगण
ऽ ऽ ऽ । ऽ ।
विशेषमा । त्रेणान- । न्त्यं । गुणानांशो । भतेवि । भोः ॥ [१५.२३]

क्वचित् प्रथमे चतुर्थादनन्तरं नगणः, तृतीये मगणः, प्रथमे नगणः, तृतीये तगणः, प्रथमे भगणः, तृतीये मगणः, प्रथमे मगणस्तृतीये नगण इत्यादि पठ्यते ।

तत्रादिमस्य ग्रहणेन नविपुला, भविपुला इत्यादि निर्दिश्यते । अथवा तादृशानामपि च्छन्दसां नामान्तरं क्रियेत– नसविपुला, नतविपुला, भमविपुला, मनविपुलेत्यादि ।

८. अथ प्रमाणिका नामानुष्टुप्

'प्रमाणिका जरलगा न यतिः पादमध्यगा' इति ।

अष्टाक्षरेयं प्रमाणिका जगणेन रगणेन लघुगुरुभ्यां च पादवती भवति । अत्र काव्ये तावदेकं पद्यं प्रमाणिकाबद्धम् । तथाहि–

जगण रगण लघु गुरु जगण रगण लघु गुरु
। ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ । ऽ
कचिच्छि । लाच्छटा । भ्र । मा- । दमुं स । सङ्गम- । त्य । जन् ।

अवेक्ष्य । दस्यवः । पु । नः । कुतूह । लात्तमा । न । मन् ॥
[१०.२२]

लघुगुर्वोः क्रमेणानुवर्तनमित्येतत् । तद्यथा महाभारततात्पर्यनिर्णये भगवत्पादः–
कपे कुतोऽसि कस्य वा किमर्थमीदृशं कृतम् ।

९. अथ विद्युन्माला नामानुष्टुप्

यत्राष्टावपि गुर्वक्षराणि भवन्ति सा विद्युन्माला भवति । तथाहि लक्षयन्ति–
'विद्युन्माला ममगगा यतिर्विधिमुखैर्युगैः' इति ।

तदप्येकं पद्यमत्र । तद् यथा–

मगण मगण गुरु गुरु मगण मगण गुरु गुरु
ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ ऽ
सत्योच्छे । देसेच्छा । पा । तं । व्याघ्राका । रं दैत्य- । व्या । घ्रम् ।
प्रालेया । द्रेःप्रान्ते । प्रा । ज्ञः । पाणेर्ली । लालेशे । ना । स्यत् ।
[१०.२३]

१०. अथ माणवकं नामानुष्टुप्

'भतौ लगौ माणवकं यतिर्जलधिभिर्युगैः' इति ।

तदप्येकं पद्यमत्र । तथाहि–

भगण तगण लघु गुरु भगण तगण लघु गुरु
ऽ।। ऽऽ। । ऽ ऽ।। ऽऽ। । ऽ
प्रापस । नाराय । ण । तः । शुद्धशि । लात्मप्र । ति । माः ।
यासुस । पद्मास । हि । तो । दोष्यहि । तःसन्नि । हि । तः ॥

[१०.२४]

अथ पङ्क्तिच्छन्दः

११. त्रयी

दशाक्षरपादा पङ्क्तिः । पङ्क्तिच्छन्दोग्रथितमपूर्वं पद्यद्वयमत्र दृश्यते [७.५७ तथा ११.७४]।

'रैस्त्रिभिर्गुरुणा त्रयी' इति । रगणैस्त्रिभिः गुरुणा च पादवती त्रयी नाम पङ्क्तिप्रभेदश्छन्दो भवति । तथाहि–

रगण रगण रगण गु रगण रगण रगण गु
ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ ऽ।ऽ ऽ।ऽ ऽ।ऽ ऽ
आस्यता । मित्युदी । र्योपवि । ष्टे । सत्यव । त्याःसुते । सत्यवा । चि ।
नन्दयन् । मन्दहा । सावलो । कैः । तान्मुनी । न्द्रानिहो । पाविशत् । सः ॥

[७.५७]

स्रग्विण्या अन्त्याक्षरद्वयलोपेन त्रयी भवति । चतुर्भी रैर्हि स्रग्विणी भवति ।

अथ त्रिष्टुप्छन्दांसि

एकादशाक्षरा त्रिष्टुप् । तत्र अष्टौ च्छन्दःप्रभेदा अत्रोपयुक्ताः । उपेन्द्रमाला(५९ पद्यानि), इन्द्रवज्रा(८), उपेन्द्रवज्रा(४), रथोद्धता(५६), स्वागतम्(५५), शालिनी(५४), दोधकम्(१), वातोर्मी (१) च ।

ततजा गुरुद्वयं चेन्द्रवज्रा । जतजा गुरुद्वयं चोपेन्द्रवज्रा । मिश्रा तूपेन्द्रमाला । उपजातिरिति च यां वदन्ति ।

तथाहि लक्षयन्ति- 'इन्द्रवज्रा ततजगा गो हरास्यर्तुभिर्यतिः' इति , 'उपेन्द्रवज्रा जतजा गौ बाणऋतुभिर्यतिः', 'मिश्रा तूपेन्द्रमाला स्यादुपजातिं च तां विदुः' इति च ।

१२. इन्द्रवज्रा

तगण तगण जगण गुरु गुरु तगण तगण जगण गुरु गुरु
ऽऽ। ऽऽ। ।ऽ। ऽ ऽ ऽऽ। ऽऽ। ।ऽ। ऽ ऽ
तांमन्त्र । वर्णैर । नुवर्ण । नी । यां । शर्वेन्द्र । पूर्वैर । पिवक्तु । का । मे ।

सङ्क्षिप्त । वाक्येम । यिमन्द । बु । द्धौ । सन्तोगु । णाढ्याःक । रुणांक्रि । या । सुः ॥

[१.६]

१३. उपेन्द्रवज्रा

जगण तगण जगण गुरु गुरु जगण तगण जगण गुरु गुरु
।ऽ। ऽऽ। ।ऽ। ऽ ऽ ।ऽ। ऽऽ। ।ऽ। ऽ ऽ
नमोन । मोनाथ । नमोन । म- । स्ते । नमोन । मोराम । नमोन । म-। स्ते ।

पुनःपु । नस्ते च । रणार । विं । दं । नमामि । नाथेति । नमन् स । रे । मे ॥

[१.२५]

१४. उपेन्द्रमाला नामोपजातिः

तगण तगण जगण गुरु गुरु
ऽऽ। ऽऽ। ।ऽ। ऽ ऽ
कान्ताय । कल्याण । गुणैक । धा । म्ने । [इन्द्रवज्रा]

जगण तगण जगण गुरु गुरु
।ऽ। ऽऽ। ।ऽ। ऽ ऽ
नवद्यु । नाथप्र । तिमप्र । भा । य । [उपेन्द्रवज्रा]

तगण तगण जगण गुरु गुरु
ऽऽ। ऽऽ। ।ऽ। ऽ ऽ
नाराय । णायाखि । लकार । णा । य । [इन्द्रवज्रा]

तगण तगण जगण गुरु गुरु
ऽऽ। ऽऽ। ।ऽ। ऽ ऽ
श्रीप्राण । नाथाय । नमस्क । रो । मि ॥ [इन्द्रवज्रा]

[१.१]

अथ प्रथमतृतीयचतुर्थाः पादा तगणाद्या इतीन्द्रवज्रा। द्वितीयः पादः पुनर्जगणाद्य इत्युपेन्द्रवज्रा। तेनेन्द्रवज्रोपेन्द्रवज्राभ्यां मिश्रेयमुपेन्द्रमाला।

उपजातौ तावच्चतुर्दश भेदा भवन्ति। चतुर्षु चरणेष्वनयोर्विपरिवर्तनेन। तथाहि—

'कीर्तिर्वाणी माला शाला हंसी माया जाया बाला ।
आर्द्रा भद्रा प्रेमा रामा ऋद्धिर्बुद्धिर्नामान्यासाम्' इति ॥

१. उपेन्द्र+उपेन्द्र+उपेन्द्र+इन्द्रवज्रा।	माया
२. उपेन्द्र+उपेन्द्र+ इन्द्र+उपेन्द्रवज्रा।	प्रेमा
३. उपेन्द्र+इन्द्र+उपेन्द्र+उपेन्द्रवज्रा।	ऋद्धिः
४. इन्द्र+उपेन्द्र+उपेन्द्र+उपेन्द्रवज्रा।	बुद्धिः
५. उपेन्द्र+इन्द्र+इन्द्र+इन्द्रवज्रा।	कीर्तिः
६. इन्द्र+ उपेन्द्र+इन्द्र+इन्द्रवज्रा।	वाणी
७. इन्द्र+इन्द्र+उपेन्द्र+इन्द्रवज्रा।	शाला
८. इन्द्र+इन्द्र+इन्द्र+उपेन्द्रवज्रा।	बाला
९. उपेन्द्र+उपेन्द्र+इन्द्र+इन्द्रवज्रा।	माला
१०. इन्द्र+इन्द्र+उपेन्द्र+उपेन्द्रवज्रा।	रामा
११. उपेन्द्र+इन्द्र+उपेन्द्र+इन्द्रवज्रा।	हंसी
१२. उपेन्द्र+इन्द्र+इन्द्र+उपेन्द्रवज्रा।	आर्द्रा
१३. इन्द्र+उपेन्द्र+उपेन्द्र+इन्द्रवज्रा।	जाया
१४. इन्द्र+उपेन्द्र+इन्द्र+उपेन्द्रवज्रा।	भद्रा

अनेन पथा प्रथमेऽपि सर्गे उपजातेः प्रभेदा ज्ञातव्याः।

दशमसर्गे क्रमेणोदाहरणानि भवन्ति। आऽष्टविंशात् ऐकचत्वारिंशम्। तथाहि–

माया–

जगण	तगण	जगण	गुरु	गुरु	
।ऽ।	ऽऽ।	।ऽ।	ऽ	ऽ	
नवान।	रेन्द्रस्य।	विलङ्घि।	ता।	ब्धेः।	[उपेन्द्रवज्रा]
जगण	तगण	जगण	गुरु	गुरु	
।ऽ।	ऽऽ।	।ऽ।	ऽ	ऽ	
नवान।	रेन्द्रस्य।	विहर्तु।	र-	। स्याम्।	[उपेन्द्रवज्रा]
जगण	तगण	जगण	गुरु	गुरु	
।ऽ।	ऽऽ।	।ऽ।	ऽ	ऽ	
इमेऽस्म।	रंस्तद्व।	पुषोऽन्य।	था।	स्य।	[उपेन्द्रवज्रा]

तगण तगण जगण गुरु गुरु
ऽऽ। ऽऽ। ।ऽ। ऽ ऽ
शक्तस्य । शङ्केत । विपत्क । थं । तैः ॥ [इन्द्रवज्रा]
[१०.२८]

प्रेमा–

जगण तगण जगण गुरु गुरु
।ऽ। ऽऽ। ।ऽ। ऽ ऽ
जगत्प्र । दीपायि । तगोग । णा । ढ्ये । [उपेन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
।ऽ। ऽऽ। ।ऽ। ऽ ऽ
दिवाक। रेमध्व । दिवाक । रे । च । [उपेन्द्रवज्रा]

तगण तगण जगण गुरु गुरु
ऽऽ। ऽऽ। ।ऽ। ऽ ऽ
अव्यक्त । रूपेश्रि । यमत्य । जन् । द्राक् । [इन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
।ऽ। ऽऽ। ।ऽ। ऽ ऽ
सहाम्बु । जैस्तन्न । यनाम्बु । जा । नि ॥ [उपेन्द्रवज्रा]
[१०.२९]

ऋद्धिः–

जगण तगण जगण गुरु गुरु
।ऽ। ऽऽ। ।ऽ। ऽ ऽ
पदंप । शोर्बावि । नतात । नू । जः । [उपेन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽऽ। ऽऽ। ।ऽ। ऽ ऽ
तीर्त्वान । दीताव । ददीन । स- । त्त्वः । [इन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
।ऽ। ऽऽ। ।ऽ। ऽ ऽ
अनार्द्र । वासाःस । कुतूह । ला । द्रैः । [उपेन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
।ऽ। ऽऽ। ।ऽ। ऽ ऽ
नृदेव । भूदेव । मुखैर्व । वं । दे ॥ [उपेन्द्रवज्रा]
[१०.३०]

बुद्धिः–

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
भीतैर । रातेर । तिमात्र । म- । त्र । [इन्द्रवज्रा]

जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
नतार । कैरप्य । थतार । कैः । सः । [उपेन्द्रवज्रा]

जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
स्वतेज । साविस्मि । तभूप । नु- । न्नैः । [उपेन्द्रवज्रा]

जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
प्लवेन । शिष्यान्नि । रतार । यत् । ताम् ॥ [उपेन्द्रवज्रा]

[१०.३१]

कीर्तिः–

जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
विशङ्क । टंस्वस्त । टिनीत । टं । ते । [उपेन्द्रवज्रा]

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
दीपप्र । दीप्तंज । नताभि । पू । र्णम् । [इन्द्रवज्रा]

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
सञ्चोद । यत्पण्डि । तमण्ड । ला । ढ्यं । [इन्द्रवज्रा]

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
नाथाव । लोकोत्क । हृदोऽभ्य । प- । श्यन् ॥ [इन्द्रवज्रा] [१०.३२]

वाणी–

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
आम्नाय । माम्नाय । विदांवि । द- । ग्धं । [इन्द्रवज्रा]

जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
सभाव । भेदंप्र । वदन्त । म- । त्र । [उपेन्द्रवज्रा]

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
दैव्यांस । भायामि । वपद्म । यो । निं । [इन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
प्रैक्षन्त । साक्षात्सु । खतीर्थ । मे । ते ॥ [इन्द्रवज्रा]

[१०.३३]

शाला –

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
प्रासस्त । तोहस्ति । नराज । धा । नीं । [इन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
मासानु । वासेह । सवास । यो । ग्यान् । [इन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
मठान्त । रेऽनन्त । गुणान्त । रः । सन् । [उपेन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
एकान्त । देशेस । रितोऽस । मी । पे ॥ [इन्द्रवज्रा]

[१०.३४]

बाला–

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
भित्त्वाभु । वंदेव । नदीज । गा । म । [इन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
शाखावि । शेषेण । निषेवि । तुं । तम् । [इन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
वाणीच । यत्प्रेष्य । तयाकृ । ता । र्था । [इन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
शिवादि । वन्यान । तदत्र । चि- । त्रम् ॥ [उपेन्द्रवज्रा]

[१०.३५]

माला–

जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
गुरुप्र । बर्हस्य । पदार । विं । दं । [उपेन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
विदूर । तःसाप्र । णनाम । मू । र्ता । [उपेन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
औदार्य । सौन्दर्य । तनुंत । नुं । ताम् । [इन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
आलक्ष्य । शिष्यैर । तिविस्मि । तं । तैः ॥ [इन्द्रवज्रा]

[१०.३६]

रामा –

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
तेनोप । यातेन । कदाच । ना । थ । [इन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
वाराण । सींपाप । निवार । णे । न । [इन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
अवादि । वाणीब । लिनःस्व । शि- । ष्यान् । [उपेन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
विलोक्य । लीलाव । सरेऽव । लि- । सान् ॥ [उपेन्द्रवज्रा]

[१०.३७]

हंसी–

जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
नियुद्ध । सिद्धचैयु । गपद्धि । वी । रम्- । [उपेन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
मन्याभ । वन्तोऽभि । पतन्तु । मां । द्राक् । [इन्द्रवज्रा]

जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
समस्त । शक्तिंन । युनक्ति । यः । स्वाम् । [उपेन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
अत्रास्म । दाझांस । निराक । रो । ति ॥ [इन्द्रवज्रा]

[१०.३८]

आर्द्रा –

जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
इतीर । यन्नृपश्च । दशैष । यू । नः । [उपेन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
प्राप्तान्प्र । युद्धान्यु । गपन्नि । पा । त्य । [इन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
उत्थीय । तांयस्य । समर्थ । ता । स्यात् । [इन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
इतिब्रु । वाणःश । नकैर्ज । हा । स ॥ [उपेन्द्रवज्रा]

[१०.३९]

जाया–

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
सौमेर । वंगौर । वमाव । हं । ति । [इन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
तवाङ्ग । मङ्गाङ्गु । लयश्च । नो । ङ्गे । [उपेन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
पुरावि । नश्याम । इतोद । या । लो । [उपेन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
स्वामिन्वि । मुञ्चेत्य । वदंस्त । दा । ते ॥ [इन्द्रवज्रा]

[१०.४०]

भद्रा–

तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
तेनाथ । मुक्तैर । तिविस्म । य- । स्तैः । [इन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
अवाप्य । नालोच्य । हिततत्व । रू । पम् । [उपेन्द्रवज्रा]
तगण तगण जगण गुरु गुरु
ऽ ऽ । ऽ ऽ । । ऽ । ऽ ऽ
यद्भ्रूवि । जृम्भेण । सशम्भु । श- । क्रं । [इन्द्रवज्रा]
जगण तगण जगण गुरु गुरु
। ऽ । ऽ ऽ । । ऽ । ऽ ऽ
जगत्स । मस्तंनि । यतंनि । का । मम् ॥ [उपेन्द्रवज्रा]
[१०.४१]

१५. अथ रथोद्धता

रगण-नगण-जगणैः लघुगुरुभ्यां च रथोद्धता भवति ।

'रथोद्धता रनरला गो यतिर्न पदान्तरे' इति । तद् यथा–

रगण नगण रगण लघु गुरु
ऽ । ऽ । । । ऽ । ऽ । ऽ
वासुदे । वमिह । वासुदे । व । ता ।
सत्कला । मभिन । नन्दतं । ज । नः ।
वासुदे । वमिति । वासुदे । व । सन्- ।
नामकं । विविध । लीलम- । र्भ । कम् ॥ [२.५३]

१६. स्वागतमित्यपरा त्रिष्टुप्

रगण-नगण-भगणैः गुरुद्वयेन च स्वागतं भवति ।

'स्वागतं रो नभगगाः पादमध्ये यतिर्नहि ।' तद् यथा–

रगण नगण भगण गुरु गुरु
ऽ । ऽ । । । ऽ । । ऽ ऽ
ऐतरे । यमथ । किञ्चन । सू । क्तं ।
सूचयन् । सदसि । तत्रग । रि । ष्ठः ।

रगण नगण भगण गुरु गुरु
ऽ।ऽ ।।। ऽ।। ऽ ऽ
श्रोतुमि । च्छतिस । भाभग । व- । द्भ्यः ।
सूक्तभा । वमिति । तावदु । वा । च ॥ [६.१]

१७. शालिनी चापरा त्रिष्टुप्

मगणेन तगणाभ्यां गुरुद्वयेन च। तथाहि लक्षयन्ति– 'शालिनी मतता गौ च यतिः श्रुतितुरङ्गमैः' इति। तद् यथा–

मगण तगण तगण गुरु गुरु
ऽऽऽ ऽऽ। ऽऽ। ऽ ऽ
सज्ज्ञाना । याऽनन्द । विज्ञान । मू । र्ती ।
प्राप्तौपृ- । थ्वीमोंश्र । मेतत्र । ता । वत् ।
जाज्वल्ये । तेविष्णु । वायूस्म । दे । वौ ।
वेदव्या । सानन्द । तीर्थाभि । धा । नौ ॥ [७.५९]

१८. अथापरं दोधकम्

भगणत्रयं गुरुद्वयं च। तथाहि लक्षयन्ति– 'दोधकं भौ भगौ गः स्यात्' इति। तद् यथा–

भगण भगण भगण गुरु गुरु
।ऽ। ।ऽ। ।ऽ। ऽ ऽ
अप्लव । देवन । दीतर । णं । ते ।
हन्तक । थंचचि । कीर्षसि । किं । त्वम् ।
भगण भगण भगण गुरु गुरु
।ऽ। ।ऽ। ।ऽ। ऽ ऽ
तंनिग । दन्तमि । तिप्रभृ । ती । ह ।
स्माहम । हापुरु । षोत्तम । दा । सः ॥ [१०.१६]

१९. अथ वातोर्मी

मगण-भगण-तगणैः गुरुद्वयेन च। 'वातोर्मी मभता गौ च श्रुतिसप्तय-तिर्भवेत्।'

तथाहि दशमे–

मगण भगण तगण गुरु गुरु
ऽ ऽ ऽ ऽ । । ऽ ऽ । ऽ ऽ
पाराश । र्यःपर । तत्वप्र । सि- । द्धचै ।
तात्पर्या । र्थंपर । मंभार । त- । स्य ।
व्यक्तंव । क्तुंनियु । नक्तिस्म । सा । क्षात् ।
एनंध- । न्यंभुव । नेमन्य । मा । नः ॥ [१०.२५]

अथ जगतीप्रभेदाः

द्वादशाक्षरपादा जगती भवति। तत्प्रभेदा अत्र प्रयुक्ताः–प्रमिताक्षरा(७४), द्रुतविलम्बितम् (५७), वंशस्थम् (५५), इन्द्रवंशा (५), तयोः सङ्करेणोपजातिरिन्द्रमाला(४६), तोटकम् (३), भुजङ्गप्रयातम् (२), मणिमाला (१) चेति नव।

२०. अथ प्रमिताक्षरा

सगण-जगणाभ्यां पुनः सगणभ्यां च। तथाहि लक्षयन्ति– 'सजूससैः प्रमिताक्षरा' इति। तथाह्यष्टमे–

सगण जगण सगण सगण
। । ऽ । ऽ । । । ऽ । । ऽ
मतमि- । त्यवेत्य । महितं । महतोः ।
अभिधा । यबाढ । मितिधी । रमतिः ।
सगण जगण सगण सगण
। । ऽ । ऽ । । । ऽ । । ऽ
अनयो । र्नियोग । मधिरो । पितवान् ।
स्वशिर-। स्यनन्य । सुवहं । प्रणमन् ॥ [८.५३]

२१. अथ द्रुतविलम्बितम्

नगणेन भगणद्वयेन रगणेन च। तथाहि लक्षयन्ति– 'नभो भरौ चेद् द्रुतविलम्बितं न यतिः पदि' इति। तथाहि प्रथमे–

नगण	भगण	भगण	रगण
।।।	ऽ।।	ऽ।।	ऽ।ऽ
निगम	सन्मणि	दीपग	णोऽभवत् ।
तदुरु	वाग्गण	पङ्क्ति	गूढभाः ।
अविदु	षामिति	सङ्कर	ताकरः ।
सकिल	सङ्कर	इत्यभि	शुश्रुवे ॥ [१.५४]

२२. अथ वंशस्थम्

जगण-तगण-जगण-रगणैः। 'वंशस्थं स्याज्जतजरा गुहास्यऋतुभिर्यतिः' इति। यथा चतुर्थे–

जगण	तगण	जगण	रगण
।ऽ।	ऽऽ।	।ऽ।	ऽ।ऽ
अथैष	सल्लोक	दयासु	धार्द्रया ।
सदाग	मस्तेन	निरास	कामया ।
रमाव	रावास	भुवावि	शारदो ।
विशाल	याचिन्त	यदात्म	नोधिया ॥ [४.१]

२३. अथेन्द्रवंशा

वंशस्थस्य प्रथमजगणस्थाने तगणे सति इन्द्रवंशा। यथोपेन्द्रवज्राया इन्द्रवज्रा तथेन्द्रवंशा वंशस्थस्य। तथाह्यामनन्ति– 'इन्द्रवंशा ततौ जरौ' इति। तथाहि पञ्चमे–

तगण	तगण	जगण	रगण
ऽऽ।	ऽऽ।	।ऽ।	ऽ।ऽ
अक्लिष्ट	शब्दान्व	यमेष	सम्भवत् ।
सूत्रार्थ	मुच्चैर्व	चनंत	दाददे ।
मानीकृ	ताम्नाय	युतस्मृ	तिक्षणाद् ।
ऐष्यत्क	थाताण्ड	वसूत्र	धारकम् ॥ [५.२१]

२४. इन्द्रमाला

इन्द्रवज्रोपेन्द्रवज्रयोरिव इन्द्रवंशावंशस्थयोर्मिश्रणेन काचिदुपजातिर्भवति यामिन्द्रमालामाहुः। तद् यथा पञ्चम एव–

तगण तगण जगण रगण
ऽ ऽ। ऽ ऽ। ।ऽ। ऽ।ऽ
वेदान्त । विद्यानि । जराज्य । पालने । [इन्द्रवंशा]
सङ्कल्प्य । मानोगु । रुणाग । रीयसि । [इन्द्रवंशा]

जगण तगण जगण रगण
।ऽ। ऽऽ। ।ऽ। ऽ।ऽ
अदभ्र । चेताअ । भिषिच्य । तेपुरा । [वंशस्थम्]
सवारि । भिर्वारि । जपूरि । तैरथ ॥ [वंशस्थम्]
[५.१]

अस्यापि चतुर्दश प्रभेदा अभ्यूहनीयाः।

२५. अथ तोटकम्

'सैश्चतुर्भिस्तोटकं स्यात्' । तथाहि षष्ठे–

सगण सगण सगण सगण
।।ऽ ।।ऽ ।।ऽ ।।ऽ
बहुस- । त्त्वगुणं । सविकं । समहा ।
विषमो । क्षमहा । हिमवं । तमयम् ।
सगण सगण सगण सगण
।।ऽ ।।ऽ ।।ऽ ।।ऽ
विषमो । क्षमहा । हिमवं । तमयन् ।
नगमै । क्षतफु- । ल्लद्दग- । स्तभयः ॥ [६.५५]

२६. अथ भुजङ्गप्रयातम्

सैश्चतुर्भिः तोटकं गतम् । इदानीं यैश्चतुर्भिर्भुजङ्गप्रयातं प्रस्तूयते । तथाहि लक्षयन्ति– 'तद् भुजङ्गप्रयातं यौ यौ यतिर्न पदान्तरे' इति। तथाहि दशमे–

यगण	यगण	यगण	यगण
। ऽ ऽ	। ऽ ऽ	। ऽ ऽ	। ऽ ऽ
इमान्स्व-	स्वपूर्वा	श्रयाना	त्मवाक्यात् ।
सलीलं	दयालुः	समूला	श्रयात्मा ।
निषेद्धृ	ननाद्द-	त्त्रचान-	न्यलङ्घ्यां ।
तदाऽत्या	ययत्तां	नदींसं	सृतिंवा ॥ [१०.९]

२७. अथ स्रग्विणी

तृतीयगुरुणा सगणेन, द्वितीयतृतीयगुरुणा यगणेन निर्वृत्ते च्छन्दसी गते। इदानीं प्रथमतृतीयगुरुणा रगणेन प्रस्तूयते। 'स्रग्विणी रैश्चतुर्भिः स्यात्' इति। तथाहि दशम एव–

रगण	रगण	रगण	रगण
ऽ । ऽ	ऽ । ऽ	ऽ । ऽ	ऽ । ऽ
सश्वर-	नश्वनी	यःकदा	चिद्विभुः ।
र्विष्णुप-	द्यास्तटं	वैष्णवा	ग्रेसरः ।
प्रापदा	स्रैर्निजै	रेषशि-	ष्यैर्वृतः ।
त्यक्तवि-	श्वप्लवं	शात्रवा	तङ्कतः ॥ [१०.८]

२८. अथ मणिमाला

अन्तलघुना तगणेनाऽदिलघुना यगणेन च द्विरावृत्तेन। 'मणिमाला तयतयाश्छिन्नाः स्कन्दास्यदर्शनैः' इति। तथाहि दशम एव–

तगण	यगण	तगण	यगण
ऽ ऽ ।	। ऽ ऽ	ऽ ऽ ।	। ऽ ऽ
अन्यत्र	चचोरान्	धन्यप्र	वरोऽसौ ।
शूरान्श	तसङ्ख्यान्	प्राप्तान्स्व	जिघांसून् ।
एकेन	तुशिष्ये	णाकृष्ट	कुठारान् ।
निस्ताडि	तयूथ्या	नद्राव	यतद्राक् ॥ [१०.२१]

अथातिजगती

त्रयोदशाक्षरपादाऽतिजगती भवति। तस्या अत्र त्रयः प्रभेदा भवन्ति– प्रहर्षिणी(५७), मञ्जुभाषिणी (५६), अतिरुचिरा (१) चेति।

२९. प्रहर्षिणी

मगण-नगणाभ्यां जगण-रगणाभ्यां गुरुणा च। सर्वगुरुः सर्वलघुः मध्यगुरुर्मध्य-लघुश्चेति। तथाहि लक्षयन्ति– 'प्रहर्षिणी मनौ ज्रौ गो गङ्गाध्वककुभां यतिः' इति। तद् यथा–

मगण	नगण	जगण	रगण	गुरु
ऽऽऽ	ऽ।।	।ऽ।	ऽ।ऽ	ऽ
आम्नाया।	स्त्रयइ	। वतत्व।	बोधका।	स्ते।
पापघ्ना।	स्त्रयइ	। वपाव।	काःप्रजा।	नाम्।
लोकावा।	सकल।	भृतस्त्र।	योऽत्रे।	जुः।
सानन्दा।	मुनिसु।	तधर्म।	सूनुम-।	ध्वाः॥ [८.५४]

३०. अथ मञ्जुभाषिणी

अन्तगुरुणा सगणेन मध्यगुरुणा जगणेन च द्विरावृत्तेन, ततो गुरुणा च। तथाहि लक्षयन्ति– 'न विच्छिन्ना पदि सजसजगा मञ्जुभाषिणी' इति। तद् यथा–

सगण	जगण	सगण	जगण	गुरु
।।ऽ	।ऽ।	।।ऽ	।ऽ।	ऽ
अवग-	। म्यतंमु।	निगणा	। वरिष्ठ	। तो।
विधिवद्।	व्यधुर्वि।	धिविदो	। स्यमान।	नाम्।
अपिसं।	कथाःश्रु।	तिसुखाः।	कवीन्द्र।	योः।
अनयो	। निशम्य।	परमां	। मुदंय	। युः॥ [७.५८]

३१. अथातिरुचिरा

जगण-भगणाभ्यां सगण-जगणाभ्यां गुरुणा च। तथाहि लक्षयन्ति– 'ज्भौ स्जौ गोऽतिरुचिरा चतुर्भिर्नवभिर्यतिः' इति। तद् यथा–

जगण	भगण	सगण	जगण	गुरु
।ऽ।	ऽ।।	।।ऽ	।ऽ।	ऽ
अवाप्त।	वान्पुन।	रिषुपा।	तमस्म।	रत्।
रमाप	। तिंसप	। रशुरा	। ममाद।	रात्।

जगण भगण सगण जगण गुरु
। ऽ । ऽ । । । । ऽ । ऽ । ऽ
सराज । केळ्युरु । कदळी । सहस्र । कम् ।
तदाद । दत्यव । सितिद- । त्तमुत्त । मम् । [१०.५१]

अथ शक्वरी

चतुर्दशाक्षरपादा शक्वरी भवति । तस्यां द्वौ प्रभेदावत्र भवतः । वसन्ततिलका (५७), इन्दुवदना(१) चेति ।

३२. वसन्ततिलका

तगण-भगणाभ्यां जगणाभ्यां गुरुद्वयेन च । तथाहि लक्षयन्ति--'वसन्ततिलका प्रोक्ता तभजा जगगा यदि' इति । तामेतां सिंहोद्धतामाह काश्यपः । सिंहोन्नतेत्यन्ये । मधुमाधवीति गोमानसः । चेतोहारीति रामकीर्तिः । तद् यथा–

तगण भगण जगण जगण गुरु गुरु
ऽ ऽ । ऽ । । । ऽ । । ऽ । ऽ ऽ
विज्ञान । भानुम । तिकाल । बलेन । ली । ने ।
दुर्भाष्य । सन्तम । ससन्त । तितोज । ने । न्धे ।
तगण भगण जगण जगण गुरु गुरु
ऽ ऽ । ऽ । । । ऽ । । ऽ । ऽ ऽ
मार्गात्स । तांस्खल । तिखिन्न । हृदोमु । कुं । दम् ।
देवाश्च । तुर्मुख । मुखाःश । रणंप्र । ज- । ग्मुः ॥ [२.१]

३३. अथेन्दुवदना

भगण-जगणाभ्यां सगण-नगणाभ्यां गुरुद्वयेन च । तथाचोक्तम्– 'प्रोक्तेन्दुवदना प्राज्ञैः भजस्नैः सगुरुद्वयैः' इति । तथाहि दशमे–

भगण जगण सगण नगण गुरु गुरु
ऽ । । । ऽ । । । ऽ । । । ऽ ऽ
वारय । तवार । यतवै । रिसुह । दो । मून् ।
मारय । तमार । यतपा । रगम । नात् । प्राक् ।

भगण जगण सगण नगण गुरु गुरु
ऽ।। ।ऽ। ।।ऽ ।।। ऽ ऽ
आपत । तआल । पतइ- । त्यवद । दु- । चैः ।
सत्वर । कराज । पुरुषा । नुचित । वा । चा ॥ [१०.१०]

अथातिशक्करी

३४. मालिनी

पञ्चदशाक्षरपादा भवत्यतिशक्करी । तत्र केवलं मालिन्यत्रोपयुक्ता (५७) । आदौ नगणद्वयं मध्ये मगणः अन्ते च यगणद्वयं पादे यस्याः सा भवति मालिनी ।

तथाह्युक्तम्–'मालिनी स्यात् ननमयया: शिवमूर्तिस्वैर्यतिः' इति । तद् यथा–

नगण नगण मगण यगण यगण
।।। ।।। ऽऽऽ ।ऽऽ ।ऽऽ
इतिवि । हरति । मह्यांवि- । ष्णुदासे । पिगूढे ।
समज । निसुज । नानांचि- । त्तमानं । दपूर्णम् ।
उदय । तिघन । मालाली । नभानौ । चभानौ ।
ननुज । ननय । नाब्जैर्ल- । भ्यतेऽलं । विकासः ॥ [२.५४]

अथात्यष्टिः

षोडशाक्षरपादा भवत्यष्टिः । अष्टिप्रभेदाः अस्मिन् काव्ये न प्रयुक्ताः । सप्तदशाक्षरपादा चात्यष्टिः । तस्या अत्र चत्वारः प्रभेदा भवन्ति– शिखरिणी(३), पृथ्वी(३), मन्दाक्रान्ता(२), हरिणी (१) चेति ।

३५. अथ शिखरिणी

यगण-मगण-नगणैः सगण-भगणाभ्यां लघुना गुरुणा च शिखरिणी । तथाह्याचक्षते– ' यमनाः सभ्लाः शिखरिणी गो रसैः शङ्करैर्यतिः' इति । तद् यथा–

यगण मगण नगण सगण भगण लघु गुरु

। ऽ ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । । । ऽ

अयिस्वा । मिन्दुष्टान् । दमय । दमय- । स्पष्टम । चि । रात् ।

गुणान्नू । ढान्विष्णोः । कथय । कथय- । स्वान्प्रम । द । यन् ।

तदाऽनं । दंतन्वन् । इतिसु । मनसां । सोऽनुस । र । ताम् ।

अनुज्ञा । मादत्त- । त्रिभुव । नगुरु- । र्ब्राह्मण । गु । रोः ॥ [३.५६]

३६. अथ पृथ्वी

जगण-सगणाभ्यां द्विरावृत्ताभ्यां यगणेन लघुना गुरुणा च पादवती पृथ्वी भवति। तथाह्युक्तम्– 'पृथ्वी जसौ जसयला गश्छिन्ना वसुभिर्ग्रहैः' इति। तद् यथा–

जगण सगण जगण सगण यगण लघु गुरु

। ऽ । । । ऽ । ऽ । । । ऽ । ऽ ऽ । ऽ

प्रणम्य । गुरुमा । दराद । थनियो । गतोयो । ग्य । तः ।

सतस्य । जगतां । हितंवि । दधतो । गतःसा । नु । गः ।

महिष्ठ । हृदयो । महाम । हिमसिं । धुरानं । द । तो ।

निर्जैर । भिगतो । नमद्र । जतपी । ठवासं । ह । रिम् ॥ [९.५५]

३७. अथ मन्दाक्रान्ता

मगण-भगण-नगणैः तगणद्वयेन गुरुद्वयेन च। तथाहि लक्षयन्ति– 'मन्दाक्रान्ता मभ्नतास्तो गावब्धिषडगैर्यतिः' इति। तद् यथा–

मगण भगण नगण तगण तगण गुरु गुरु

ऽ ऽ ऽ ऽ । । । । । ऽ ऽ । ऽ ऽ । ऽ ऽ

विश्वंमि । थ्याविभु । रगुण । वानात्म । नांनास्ति । भे । दो ।

दैत्याइ- । त्थंव्यद । धतगि । रांदिक्षु । भूयःप्र । सि- । द्धिम् ।

आनन्दा । द्यैर्गुरु । गुणग । णैःपूरि । तोवासु । दे । वो ।

मन्दम्मं । दंमन । सिचस । तांहन्त । नूनंति । रो । भूत् ॥ [१.५५]

३८. अथ हरिणी

नगण-सगणाभ्यां मगणेन रगण-सगणाभ्यां लघुना गुरुणा च भवति हरिणी। तथाहि लक्षयन्ति–'हरिणी न्सम्रसलगाः षडब्धिभुवनैर्यतिः' इति। तद् यथा–

नगण	सगण	मगण	रगण	सगण	लघु	गुरु
।।।	।।ऽ	ऽऽऽ	ऽ।ऽ	।।ऽ	।	ऽ
इतिवि ।	विधगो ।	धारावा ।	रैर्विशा ।	रदवा ।	रि ।	दो ।
हरिप ।	दरतो ।	विद्यावि- ।	द्युत्प्रदी ।	पितदिङ् ।	मु ।	खः ।
भवभ ।	यमहा ।	घर्मोत्त- ।	संसदं ।	प्रियमं ।	ड ।	लम् ।
सफल ।	सुमनः ।	सान्द्रानं ।	दंव्यधा ।	दविप- ।	ल्ल ।	वम् ॥ [१०.५६]

अथातिधृतिः

अष्टादशाक्षरपादा धृतिर्नेह। एकान्नविंशत्यक्षरपादा भवत्यतिधृतिः। तस्यां शार्दूलविक्रीडितं (४) नाम च्छन्दोऽत्र प्रयुक्तम्।

३९. शार्दूलविक्रीडितम्

मगण-सगणाभ्यां जगण-सगणाभ्यां तगणाभ्यां गुरुणा च शार्दूलविक्रीडितम्। तथाहि लक्षणम्– 'शार्दूलविक्रीडितं तु यत्र मः सजसाः पुनः। ततगाः सूर्यऋषिभिर्विरतिस्तत्र कीर्तितम्' इति। शार्दूलविक्रीडितं कीर्तितमित्यन्वयः। तद् यथा–

मगण	सगण	जगण	सगण	तगण	तगण	गुरु
ऽऽऽ	।।ऽ	।ऽ।	।।ऽ	ऽऽ।	ऽऽ।	ऽ
विद्योरु- ।	द्युतिधी ।	रतार ।	कतिर- ।	स्कारेप ।	तङ्गायि ।	तो ।
दुर्वादी ।	भकुत- ।	केकुम्भ ।	दलने ।	सिंहप्र ।	बर्हायि ।	तः ।
लोलालो ।	ककलो ।	कद्दकु ।	मुदिनी ।	संह्लाद ।	नेब्जायि ।	तः ।
संसन्मं ।	डलमं ।	डनायि ।	तउत- ।	स्वानन्द ।	तीर्थोब ।	भौ ॥

[५.५२]

अथ प्रकृतिः

४०. स्रग्धरा

विंशत्यक्षरा कृतिर्नेह। एकविंशत्यक्षरा प्रकृतिः स्रग्धरा(२)। मगण-रगण-भगण-नगणा यगणत्रयं च स्रग्धरा। तथाह्युक्तम्– 'मरभनया यौ मुनिमुनिमुनिभिः स्यात् स्रग्धरा विभिन्नाङ्गी' इति। तद् यथा—

मगण	रगण	भगण	नगण	यगण	यगण	यगण
ऽऽऽ	ऽ।ऽ	ऽ।।	।।।	।ऽऽ	।ऽऽ	।ऽऽ
विप्रात्मे।	शःक्षणा।	थंकृत।	नतिर।	शितिश्री।	हृषीके।	शदेशे।
स्पष्टंद्द-।	ष्टोऽप्यद्द-।	ष्टःसप।	दिविहि।	तवान्वि-।	स्मयंदे।	हभाजाम्।
स्वप्रेस्व-।	प्रेरिता।	न्यस्थल।	गनिज।	नरोपा।	हृतैर्भ-।	क्ष्यभोज्यैः।
प्राज्यैःप्रा।	भोजयत्।	स्वंगुरु।	मखिल।	गुरुंवे।	दयन्वे।	दबन्धुम्॥

[१०-५०]

अथार्धसमवृत्तम्

त्रीण्यर्धसमवृत्तानि काव्येऽस्मिन् प्रयुक्तानि दृश्यन्ते– वियोगिनी (५७), फलिताग्रम्(६९), पुष्पिताग्रा(२) चेति। १०+११+१०+११ इत्यक्षरव्यवस्था वियोगिन्याः पादेषु। ११+१२+११+१२ इति फलिताग्रस्य। १२+१३+ १२+१३ इति पुष्पिताग्रायाः।

४१. अथ वियोगिनी

तस्याः पादेष्वियं गुरुलघुव्यवस्था– विषमपादयोः सगणौ जगणो गुरुश्चेति दशाक्षराणि। समयोः सगण-भगण-रगणा लघुर्गुरुश्चेत्याकादशाक्षराणि। तथाह्यामनन्ति– 'ओजे वियोगिनी सौ जगावनोजे सभरा लगौ' इति। वियोगिनीमेव सुन्दरीं केचिदाहुः। 'अयुजोर्यदि सौ लगौ लगौ समयोः स्भौ रलगाश्च सुन्दरीयम्' इति। तद् यथा–

सगण	सगण	जगण	गुरु
।।ऽ	।।ऽ	।ऽ।	ऽ
अथहै।	मवते।	तटान्त।	रे।

सगण भगण रगण लघु गुरु
।।ऽ ऽ।। ऽ।। । ऽ
बदरी । षण्डवि । शेषमं । डि । तम् ।
सगण सगण जगण गुरु
।।ऽ ।।ऽ ।ऽ। ऽ
परमा । श्रममा । श्रयंश्रि । यः ।
सगण भगण रगण लघु गुरु
।।ऽ ऽ।। ऽ।। । ऽ
सकल । ज्ञःसद । दर्शवि- । श्रु । तम् ॥ [७.१]

वैतालीयं चेदं मात्रागन्धि च्छन्दो भवति । तथाहि तल्लक्षणम्– 'ओजयोः पादयोरादौ षण्मात्रा रलगा अथ । युक्तयोः पादयोरादावष्टमात्रा रलौ गुरुः । केवलं नैव गुरुवस्त्वेतयोराद्यषट्कलाः । समस्तेष्वपि पादेषु द्वितुर्यारिस्थिताः कलाः । त्रिबाणसप्तमस्थानस्थितैश्च त्रुटिभिः सह । गुरुत्वं न भजेयुश्चेद् वैतालीयं प्रकीर्तितम्' इति ।

अयमर्थः–प्रथमतृतीयपादयोरादौ षण्मात्राः । ततो रगणलघुगुरवः । द्वितीयचतुर्थपादयोरादावष्टमात्राः । ततो रगणलघुगुरवः । समस्तेष्वपि पादेषु द्वितीयचतुर्थषष्ठस्थानिका मात्राः तृतीयपञ्चमसप्तमस्थानिकाभिः मात्राभिः सहैकगुरुत्वं न भजेयुश्चेद् वैतालीयं नाम वृत्तं भवतीति । तथाहीदमेवोदाहरणम्–

रगण ल गु
१ २ ४ ५ ६ ऽ।। । ऽ
अ थ है म व । ते तटा । न्त । रे
रगण लघु गुरु
१ २ ४ ६ ७ ८ ऽ।। । ऽ
ब द री ष ण्ड वि । शेषमं । डि । तम् ।
१ २ ४ ५ ६ ऽ।ऽ । ऽ
प र मा श्र म । माश्रयं । श्रि । यः ।
१ २ ४ ६ ७ ८ ऽ।ऽ । ऽ
स क ल ज्ञः स द । दर्शवि- । श्रु । तम् ॥ [७.१]

४२. अथ फलिताग्रम्

अन्ते एकगुर्वक्षराधिका वियोगिन्येव फलिताग्रम् । तथाहि लक्षयन्ति– 'फलिताग्रं

गाधिकान्ते वियोगिन्येव साऽङ्घ्रिषु' इति। चन्द्रिकेत्यपरे– 'विषमे ससजा गुरू यदि स्युः सभरा यश्च युजीह चन्द्रिका सा' इति। तद् यथा–

सगण सगण जगण गुरु गुरु
। । ऽ । । ऽ । ऽ । ऽ ऽ
सहभो। गमन-। न्यलभ्य। म-। स्मै।
सगण भगण रगण यगण
। । ऽ ऽ । । ऽ । ऽ । ऽ ऽ
हनुम-। द्रूपव। तेददौ। पुरा हि।
सगण सगण जगण गुरु गुरु
। । ऽ । । ऽ । ऽ । ऽ ऽ
अनवे। क्ष्यपरं। स्वभीष्ट। क। त्रे।
सगण भगण रगण यगण
। । ऽ ऽ । । ऽ । ऽ । ऽ ऽ
प्रतिदा। तुंहरि। रैधयत्। तमेव ॥ [९.५४]

४३. अथ पुष्पिताग्रा

नगणद्वयेन रगणयगणाभ्यां च प्रथमतृतीययोर्द्वादशाक्षरा पुष्पिताग्रा। द्वितीय-चतुर्थयोश्च नगणेन जगणाभ्यां रगणेन गुरुणा च त्रयोदशाक्षरा। तथाहि लक्षयन्ति –'पुष्पिताग्रा ननरया युक्ते तु नजजा रगौ' इति। तद् यथा–

नगण नगण रगण यगण
। । । । । । ऽ । ऽ । ऽ ऽ
सुहसि। तकम। लाकरो। पगूढं।
नगण जगण जगण रगण गुरु
। । । । ऽ । । ऽ । ऽ । ऽ ऽ
सुजन। सुखार्थ। मनन्त। भोगश-। य्यम्।
नगण नगण रगण यगण
। । । । । । ऽ । ऽ । ऽ ऽ
विकसि। तसुम। नोघटा। गमुच्चं।
नगण जगण जगण रगण गुरु
। । । । ऽ । । ऽ । ऽ । ऽ ऽ
मरत। करत्न। मयस्थ। लग्नयशो। भम् ॥ [६.५६]

इदमेव वैतालीयप्रभेद औपच्छन्दसिकं नाम च्छन्दो भवति। तथाह्यामनन्ति–

'औपच्छन्दसिकं प्रोक्तं सर्वत्रान्ते रयौ यदि' इति। अन्यत् सर्वं वैतालीयवदेव। तथाहि –

रगण यगण
१ २ ३ ४ ५ ६ ऽ।ऽ ।ऽऽ
सु ह सि त क म। लाकरो। पगूढं।
रगण यगण
१ २ ३ ४ ६ ७ ८ ऽ।ऽ ।ऽऽ
सु ज न सु खा र्थ म। नन्तभो। गशय्यम्॥

पिङ्गलनागोऽप्याह– 'पुष्पिताग्राभिधं केचिदौपच्छन्दसिकं तथा' इति।

अथ विषमवृत्तम्

४४. उद्गता

एकमेव विषमं वृत्तं काव्येऽत्र प्रयुक्तम्। उद्गताख्यं(१) तत्। तत्रैवं पादेष्वक्षरव्यवस्था–१०+१०+११+१३ इति। तथाहि लक्षणमामनन्ति– 'प्रथमे सजसा लश्चेद् द्वितीये नसजा गुरुः। तृतीये भ्नज् लगास्तुर्ये सज् सज्गैः सहितोद्गता' इति। सगणद्वयेन मध्यजगणेन लघुना च दशाक्षरः प्रथमः पादः। नगण-सगण-जगणैर्गुरुणा च दशाक्षरो द्वितीयः। भगण-नगण-जगणैर्लघुगुरुभ्यामेकादशाक्षरस्तृतीयः। सगणजगणाभ्यां द्विरावृत्ताभ्यां गुरुणा च त्रयोदशाक्षरश्चतुर्थः पाद इति। तथाहि–

सगण जगण सगण लघु
।।ऽ ।ऽ। ।।ऽ ।
अयमे। वगोवि। षयतो। पि।
नगण सगण जगण गुरु
।।। ।।ऽ ।ऽ। ऽ
सदसि। जनता। र्थितोज। वात्।
भगण नगण जगण लघु गुरु
ऽ।। ।।। ।ऽ। । ऽ
पुष्पमु। तफल। महोवि। द। धे।
सगण जगण सगण जगण गुरु
।।ऽ ।ऽ। ।।ऽ ।ऽ। ऽ
जनसु। प्रिदानु। पमगा। नसम्प। दा॥ [१०.५३]

उद्गतायां कश्चन विशेषमाह पिङ्गलनागः– 'उद्गतामेकतः, स्जौ स्लौ, न्सौ ज्गौ, भ्नौ ज्लौ ग्, स्जौ स्जौ ग्' [५.२५] इति।

व्याचख्यौ च हलायुधः– 'उद्गतामिति कर्मविभक्तिश्रवणात् पठेदित्यध्याहार्यम्। 'एकतः' इति। प्रथमं पादं द्वितीयेन सहाविलम्बेन पठेदित्यर्थः' इति। 'तरसोदिता सजसलेषु' इति च जयदेवः।

तथाच 'अयमेव गोविषयतोऽपि' इति प्रथमपादान्ते विराममकृत्वा, द्वितीयपादेन सह –'अयमेव गोविषयतोऽपि सदसि जनतार्थितो जवात्' इति समग्रं पूर्वार्धं निरन्तरं पठेदिति। इति विवृतानि च्छन्दांसि।

अच्छामच्छपदां छन्दोमीमांसां समदीदिपत्।
इमामाचार्यगोविन्दो विनेयजनवाञ्छया॥

—०—

अथ पद्यानां सङ्ख्यानुक्रमः

सर्गसङ्ख्या	पद्यसङ्ख्या
१.पथ्यावक्त्रम् [७८]	
१०	५
१५	१
,,	३
,,	५-७
,,	९
,,	१०
,,	१६-१९
,,	२१
,,	२४-३३
,,	३५
,,	३७-३९
,,	४१
,,	४२
,,	४५-४८
,,	५०-५४
,,	५८
,,	६१-६३
,,	७०-७७
,,	७९
,,	८०
,,	८४
,,	८९
,,	९१
,,	९४
,,	९६
,,	९८-१०१
,,	१०६-१०७
,,	१०९

स.सं	प.सं
१५	११२
,,	११६-१२०
,,	१२२-१२४
,,	१२८
,,	१२९
,,	१३१
,,	१३३
,,	१३७
२. प्रमिताक्षरा [७४]	
८	५३
१०	१२
११	१-७२
३.फलिताग्रम्–चन्द्रिका [६९]	
९	५४
१०	४
१३	१-६७
४.युग्मविपुला [६३]	
१०	४८
१५	२
,,	४
,,	८
,,	११-१५
,,	२०
,,	२२
,,	२३
,,	३४
,,	३६
,,	४०
,,	४३-४४

स.सं	प.सं
१५	४९
,,	५५-५७
,,	५९
,,	६०
,,	६४-६९
,,	७८
,,	८१-८३
,,	८५-८८
,,	९०
,,	९२
,,	९३
,,	९५
,,	९७
,,	१०२-१०५
,,	१०८
,,	११०
,,	१११
,,	११३-११५
,,	१२१
,,	१२५-१२७
,,	१३०
,,	१३२
,,	१३४-१३६
,,	१३८
,,	१३९

५.इन्द्रवज्रा+उपेन्द्रवज्रा
उपजातिः [५९]

स.सं	प.सं
१	१-५
,,	७-९
,,	११-१७
,,	२०
,,	२१
,,	२३
१	२४
,,	२७-४९
,,	५१-५३
१०	२८-४१

६. वसन्ततिलका [५७]

स.सं	प.सं
२	१-५२
३	५५
१०	१९
१३	६९
१४	५५
१५	१४१

७.मालिनी [५७]

स.सं	प.सं
२	५४
४	५४
१०	४४
१२	५८
१४	१-५२
१६	५८

८. द्रुतविलम्बितम् [५७]

स.सं	प.सं
१	५४
३	१-५४
१०	१५
१३	६८

९.प्रहर्षिणी [५७]

स.सं	प.सं
८	५४
१०	१८
१६	१-५५

१०. वियोगिनी-सुन्दरी-
वैतालीयम् [५७]

स.सं	प.सं
७	१-५५
१०	३
१४	५४

स.सं	प.सं
११. रथोद्धता[५६]	
२	५३
४	५३
५	५१
९	१-५२
१०	१४
१२.मञ्जुभाषिणी [५६]	
७	८
८	१-५२
१०	११
१४	५३
१६	५६
१३.वंशस्थम् [५५]	
४	१-५२
५	५
९	५३
१०	४२
१४. स्वागतम् [५५]	
६	१-५४
१०	१३
१५.शालिनी [५४]	
७	५९
१०	१७
११	७५
१२	१-५०
१५	१४०
१६.इन्द्रवंशा+वंशस्थम् उपजातिः [४६]	
५	१-४
,,	६-२०
,,	२२
,,	२३
५	२५-३२
,,	३४-५०
१७. इन्द्रवज्रा [८]	
१	६
,,	१०
,,	१८
,,	१९
,,	२२
,,	२६
१०	२६
११	२३
१८. इन्द्रवंशा [५]	
५	२१
,,	२४
,,	३३
१०	४३
११	७३
१९. उपेन्द्रवज्रा [४]	
१	२५
१	५०
७	५६
१०	२७
२०.शार्दूलविक्रीडितम् [४]	
५	५२
६	५७
१०	५४
१२	५३
२१. शिखरिणी [३]	
३	५६
१०	२०
१६	५७

स.सं	प.सं
२२. तोटकम् [३]	
६	५५
१०	७
,,	४५
२३. पृथ्वी [३]	
६	५५
१०	५२
१२	५१
२४. मन्दाक्रान्ता [२]	
१	५५
१०	४९
२५. पुष्पिताग्रा-औपच्छन्दसिकम् [२]	
६	५६
१०	५५
२६. त्रयी [२]	
७	५७
११	७४
२७. भुजङ्गप्रयातम् [२]	
१०	९
११	७७
२८. स्रग्धरा [२]	
१०	५०
१२	५२
२९. पथ्यार्या [१]	
१०	१
३०. गीतिः [१]	
,,	२
३१. उपगीतिः [१]	
,,	६

स.सं	प.सं
३२. स्रग्विणी [१]	
१०	८
३३. इन्दुवदना [१]	
,,	१०
३४. दोधकम् [१]	
,,	१६
३५. मणिमाला [१]	
,,	२१
३६. प्रमाणिका [१]	
,,	२२
३७. विद्युन्माला [१]	
,,	२३
३८. माणवकम् [१]	
,,	२४
३९. वातोर्मी [१]	
,,	२५
४०. मधुगीतिका [१]	
,,	४६
४१. चपलार्या [१]	
,,	४७
४२. अतिरुचिरा [१]	
,,	५१
४३. उद्गता [१]	
,,	५३
४४. हरिणी [१]	
,,	५६
संहत्य पद्यानां सङ्ख्या	१००६

—*—

छन्दसामक्षरानुक्रमः

१. अतिरुचिरा
२. इन्दुवदना
३. इन्द्रवंशा
४. इन्द्रवज्रा
५. उद्गता
६. उपगीतिः
७. उपजातिः [इन्द्रवज्रा+उपेन्द्रवज्रा]
८. उपजातिः [इन्द्रवंशा+वंशस्थम्]
९. उपेन्द्रवज्रा
१०. गीतिः
११. चपलार्या
१२. तोटकम्
१३. त्रयी
१४. दोधकम्
१५. द्रुतविलम्बितम्
१६. पथ्यार्या
१७. पथ्यावक्त्रम्
१८. पुष्पिताग्रा [औपच्छन्दसिकम्]
१९. पृथ्वी
२०. प्रमाणिका
२१. प्रमिताक्षरा
२२. प्रहर्षिणी
२३. फलिताग्रम् [चन्द्रिका]
२४. भुजङ्गप्रयातम्
२५. मञ्जुभाषिणी
२६. मणिमाला
२७. मधुगीतिका
२८. मन्दाक्रान्ता
२९. माणवकम्
३०. मालिनी
३१. युग्मविपुला
३२. रथोद्धता
३३. वसन्ततिलका
३४. वंशस्थम्
३५. वातोर्मी
३६. विद्युन्माला
३७. वियोगिनी [सुन्दरी-वैतालीयम्]
३८. शार्दूलविक्रीडितम्
३९. शालिनी
४०. शिखरिणी
४१. स्रग्धरा
४२. स्रग्विणी
४३. स्वागतम्
४४. हरिणी

—०—

बन्धमीमांसा २

अस्मिन् काव्ये द्वौ बन्धौ कविना ग्रथितौ सर्वतोभद्रं च चक्रबन्धश्च। तत्र सर्वतोभद्रं यथा–

समानया यानमास मायया ततयाऽयमा।
नयासना नास या न यातनाललनातया॥ [१०.४८]

अत्र पादशः क्रमपाठे व्युत्क्रमपाठे चैकरूपता। दीर्घे क्रमव्युत्क्रमाभ्यां वा ऊर्ध्वादधः क्रमव्युत्क्रमाभ्यां वा यथाकथाच पाठे सर्वथा समानाक्षरतेति सर्वतोभद्रमिदम्। तथाचायं रेखाविन्यासक्रमः–

स	मा	न	या	या	न	मा	स
मा	य	या	त	त	या	य	मा
न	या	स	ना	ना	स	या	न
या	त	ना	ल	ल	ना	त	या
या	त	ना	ल	ल	ना	त	या
न	या	स	ना	ना	स	या	न
मा	य	या	त	त	या	य	मा
स	मा	न	या	या	न	मा	स

रीत्यन्तरेण यथा—

स	मा	न	या
मा	य	या	त
न	या	स	ना
या	त	ना	ल

पूर्वं तु चतुःषष्टिकोष्ठम्। तत्र समग्रं पद्यं क्रमव्युत्क्रमाभ्यां द्विः पठितम्। इदं तु षोडशकोष्ठम्। प्रतिपङ्क्ति अक्षराणां गतागतेन पादपूर्तिः। एवमूर्ध्वादधः-पाठेऽपि।

*

अत्रैव चक्रबन्धग्रथितं शार्दूलविक्रीडितम्। तथाहि—

धन्योऽमह्यत नाकिनामहितहृद्बाणस्समोऽजस्य यो
मध्वो ध्वस्तदुरागमोऽत्र्ययहिमगुश्रीः काममायामिहृत्।
विष्णुं विश्वजयप्रदं स हि नमन् सेव्यं सुसौख्यं मुदा
दाक्ष्याच्छ्रीधरमामयादिविरही योगी सुहृत् सर्वदा॥ [१०. ५४]

यत्र प्रथमचरणस्याऽद्यन्तौ वर्णाविव चतुर्थस्य चतुर्थत्रयोदशौ [अत्र ध-यो], द्वितीयस्याऽद्यन्तौ चतुर्थस्य सप्तमषोळशौ [अत्र म-हृत्], तृतीयस्य प्रथम-श्चतुर्थस्य दशमः [अत्र वि], तृतीयस्यान्त्यवर्ण एव चतुर्थस्याऽदिरन्त्यश्च [अत्र दा], तथा प्रथमद्वितीयतृतीयचरणेषु मध्यगतो दशमो वर्णः [अत्र हि] समानः स चक्रबन्ध इत्युच्यते।

तथाहि रेखाविन्यासः–



अत्र षट्सु अरेषु तृतीयाक्षरस्य प्रादक्षिण्येन पठने 'मध्वविजयाख्यं' इति भवति। षष्ठस्य पठने 'नारायणकाव्यं' इति च।

*

विवृतो मूलगतश्चित्रबन्धः।

अथ विनेयजनशिक्षार्थं प्रसिद्धाप्रसिद्धाः कतिचन बन्धाः सङ्कलय्य प्रदर्श्यन्ते। यत एते नैकत्रालङ्कारशास्त्रेषूपलभ्यन्ते। क्वचन बहुशः सङ्गृहीता अपि प्रमादपारवश्यादसङ्गतरेखाविन्यासादिना प्रदर्शिताः। अतोऽत्र सरेखाविन्यासं स्वकृतपद्यैरेव बन्धाः प्रदर्श्यन्ते।

प्रथमं तावदन्तर्गतसप्तबन्धो महाचक्रबन्धः। अष्टभिः श्लोकैरयं बद्ध्यते। खड्ग-मुसल-धनुः-शर-शूल-शक्ति-हलबन्धा अत्र महाचक्रे संयुज्यन्ते।

१. तथाहि खड्गबन्धो द्वाभ्यां श्लोकाभ्याम्—



पातु हैयङ्गवीनस्य
हर्त्री सकलपालनी ।
नीलनीरदनीकाशा
कैशोरी काऽपि सा कृपा ॥

[१]पाशबन्धलसत्कुक्षि-
निक्षिप्ताखिलविष्टपा ।
पावनी ननु सा [२]वीशा-
हीशादिभिरनुस्मृता ॥

---

१. यशोदयोदरे दाम्ना बद्धः पाशबन्धलसत्कुक्षिर्दामोदरः । २. वीशो गरुडः । अहीशः शेषः ।

२.अथ मुसलबन्ध एकेन श्लोकेन–

पाहि देव रमाभूमी-
जानिरात्मेष्टदः पिता[१] ।
तानयित्वा किल निजा-
मीश्शे गतिमजार्चित ॥



१.आत्मीयानामिष्टदः पातीति पिता। निजां गतिं तानयित्वा विस्तार्य भक्तानुग्रहस्येश्शे।

३.अथ धनुर्बन्धः–

[1]पाया दयामयापायाच्चिररात्राय चिन्तित ।
तवेहन्ते स्वकार्येषु निर्जरा निर्भरा भिया ॥ ४ ॥



४.अथ शरबन्धः–

पातु मां सततं प्रज्ञा
स्वाधीनमननक्रिया ।
[2]या तु नानाग्रहा यातु
सा शुभा भास्वति स्थितम् ॥



१. चिररात्राय चिन्तितश्चिररात्राय पायाः । तव भिया स्वकार्येषु निर्जरा ईहन्ते चेष्टन्ते । 'भयादस्याग्निस्तपति' इत्यादेः । २. या नानाविधविषयग्रहणचपला सा सम्प्रति शुभा सती भास्वति स्थितं नारायणमेव यातु ।

५.अथ शूलबन्धः–

पापाळिपाटनपटुं गोपीजनमनोगतम् ।
[1]तं नमामानतं भाविविभातं विगतं गवि ॥



६.अथ शक्तिबन्धः–

पाविताखिलभक्तौघमघसङ्घहरं भुवि ।
[2]विपाहिपेशं शरणं यायास्तदितरज्जहि ॥



१.भावो भक्तिः । भगवति निलीनं वा मनः । तद्धन्तो भाविनः । तेषु विभातम् । विशेषेण च गवि सूर्ये गतम् । सर्वैरानतं स्वयमनतं नमाम । २. विपो गरुडः । अहिपः शेषः । इतरज्जहि–'अन्या वाचो मुञ्चथ' इति हि श्रुतिः ।

७.अथ हलबन्धः–

पाहि गोपीवृन्दमोद
सादरं त्वा भजेमहि ।
हिता सतामियं भक्ति-
स्त्वदाराधनसाधनी ॥



तदिमे सप्त बन्धाः। अष्टौ च श्लोकाः। एभिः सप्तभिर्बन्धैरष्टभिश्च श्लोकैरष्टमोऽत्र महाचक्रबन्धो भवति। अत्र चायं पाठक्रमः। नाभितः प्रारभ्य ऊर्ध्वं पाठे 'पातु हैयङ्गवीनस्य....' इत्यादि श्लोकार्धं भवति। तत उत्तरार्धं [नील-नीरदनीकाशा....] परिधौ भवति। ततः पुनर्नाभित आरभ्य प्रादक्षिण्यक्रमेण द्वितीयारगतश्लोकार्धं पठनीयम्। पुनः परिधिगतं तदुत्तरार्धम्। एवमुत्तरत्रापीति।

८. तथाच सप्तबन्धगर्भो महाचक्रबन्धो यथा–



कविनाम वैवक्षिकमिति नात्र स्फुटं निबद्धम्। अथापि गूढतया निबद्धमेव। तद् यथा– वामतः प्रादक्षिण्येन पठने प्रथमं वामवीथ्यामष्टममक्षरं 'गो' इति। तदनन्तरायां वीथ्यां प्रथममक्षरं 'वि' इति। तदनन्तरायां पञ्चममक्षरं 'न्द' इति। तदनन्तरायामेकादशं 'क' इति। तदनन्तरायां त्रयोदशं 'वि' इति। तदनन्तरायां चतुर्थं 'र' इति। तदनन्तरायां त्रयोदशं 'चि' इति। तदनन्तरायां पञ्चमं 'तं' इति। संहत्य 'गोविन्दकविरचितम्' इति भवति।

*

९.अपरश्चाणुश्चक्रबन्धो भवति। स यथा–

[१]गोगोपश्लिष्टं भज भक्ताशयविष्टं
गोविप्रप्रीतं निजपापव्रजलावि।
कुन्दश्रीदन्तं कुजनान्तं हृदि सन्तं
तं श्रीगोपीगोपकुलेष्टं कविगीतम्॥



अत्र प्रथमवलयगतानामक्षराणां मेलनेन 'गोविन्दविलासम्' इति भवति। 'गोविन्द' इति कवेः प्रतिपाद्यस्य भगवतश्च नाम।

तदेवं त्रेधा चक्रबन्धो विवृतो भवति।

१. गा गोपायन्तीति गोगोपा गोपालाः। गावश्च गोपाश्च वा। गोषु वेदेषु विप्रेषु च सुप्रीतम्। निजस्य पापव्रजस्य लावयुक्तं यथा भवति तथा भज। लूञ् छेदने।

१०.अन्यश्च बन्धो भवति कुलालचक्रं नाम। तद् यथा–

[१]या मे गदाभृन्निजतारमाया
या मारता भक्तनरावना या।
या नावरा सर्वगता विभाया
या भाविता पातु सदागमेया॥



१. हे गदाभृत्, या मे मदीया मदुपास्या तव माया महिमा। निजान् तारयतीति निज-तारा। रमायां रता। ज्ञाने वा। या भक्तजनानवति। या न भवत्यवरा। विशेषतो ये भान्ति तानयते। 'यदादित्यगतं तेजः' इत्यादेः। सा मया भाविता चिन्तिता पातु सदागमज्ञेया।

११. अयमेवाष्टदलपद्मबन्धोऽपि स्यात्–



१२. अयमेव पञ्चतीर्थबन्धोऽपि स्यात् । तद् यथा–



तीर्थबन्धे पादाद्यन्तेष्वेकाक्षरत्वनियमो नास्ति। तेन केवलतीर्थबन्धाय चेदं पद्यम्–

[१]जनार्दन त्वामुदवासवास
सवासवामर्त्यगुरोऽधिराज।
जराधिरोगत्यजना नतास्मि
स्मिताननाऽऽम्नायविनर्दनाज॥



१. उदवासे उदधौ वसति। अधिकं राजते च। त्वद्भक्तिभरेण जरामाधिं व्याधिं चातिक्रम्य नतास्मि निजानन्दानुभवेन स्मितानना। आम्नायानां प्रवक्तः हे अज। कस्याश्चित् वृद्धभक्ताया भणितिरियम्।

१३. चतुःषष्टिकोष्ठः, षोडशकोष्ठो वा सर्वतोभद्रबन्धः स्वयं ग्रन्थकृता मूले निबद्धः। स एव विन्यासान्तरेण नवरङ्गबन्धोऽपि भवति। तथाचायं नवरङ्गे रेखाविन्यासः –

समानया यानमास
मायया ततयाऽयमा।
नयासना नास या न
यातनाललनातया॥

[अस्यैव नामान्तरं क्रियेत– रूप्यपीठालयकृष्णदर्शन-गवाक्षबन्ध इति।]

स	न	स
मा	या	ना
य	त	ल

१४. तज्जातीय एवान्योऽपि बन्धो भवत्यर्धभ्रमणकं नाम द्वात्रिंशत्कोष्ठः। तद् यथा–

दामोदर श्रीपरम मोक्षदातः पराव नः[1]।
ददाव सुरवज्ञेशरतः सुरमनःशय॥

दा	मो	द	र	श्री	प	र	म
मो	क्ष	दा	तः	प	रा	व	नः
द	दा	व	सु	र	व	ज्ञे	श
र	तः	सु	र	म	नः	श	य

१. पर अव नोऽस्मान्। ददान् दानिनोऽवतीति ददावः। 'यज्ञदानतपःकर्म न त्याज्यम्' इति स्मरणात्। सुरवं वेदाख्यं जानन्तीति सुरवज्ञाः। वेदज्ञास्त्रैवर्णिकाः। तेषामीशा विप्राः। तेषु रतः। अनेन यज्ञप्रियत्वमुक्तम्। तपःकर्मेदानीमाह– सुरमनःशय। तपसा ध्यानेन भगवति रतं सुरं मनः। तत्र शेते। सुराणां च मनसि।

१५. महाचक्रान्तर्गतः खड्गबन्धः पूर्वमुदाहृतः। खड्गबन्धान्तरं च भवति। तद् यथा–

[१]नाकलोकशोकनाशदारितारिमीरितं तं नमामि भक्तलोकभूषणं रमाधवम्।
वन्दमानदेवजातमुन्नतं जगन्नतं [२]तन्द्रिदूरमिन्दुकान्तिमप्रमेयवैभवम्॥



१६. अपरश्च क्षुरबन्धो भवति। तद् यथा–

[३]हृदा वदावदामोदादापदादामुखं मुदा।
दासरं तरसा वन्दे देवं सारतरं सदा॥



१. नाकलोकशोकनाशाय दारितदैत्यम्।

२. तन्द्रिणामलसानां दुर्गमम्। तामसानामित्येतत्। ३. वदावदस्य प्रवक्तुर्यो वक्तृत्व आमोदस्तस्मान्निमित्ताद् देवं वन्दे स्तौमि। आपदामादा नाशकास्तात्त्विकदेवाः। आदन्ति आद्यन्तीति वा। तेषामामुखमग्रण्यं प्रमुखम्। दासान् भक्तान् रमयतीति दासरस्तम्।

एवं महाचक्रान्तर्गततया पूर्वं सविन्यासमेकस्तावद् धनुर्बन्धो दर्शितः। बन्धान्तरं चान्यत्र दृश्यते। तथाहि तत्रोदाहृतचक्रानन्तर्गतेन श्लोकान्तरेण सह स एव धनुर्बन्धः–

नवनीतमुषं कंसद्विषं चित्त विचिन्तय।
[१]यस्येहन्ते दयालेशममराः कातरा इव॥



१७. अपरो धनुर्बन्धः–

देवतागणयन्तारं रन्तारं श्रीकरं मुदा।
दासरं तरसा वन्दे देवं सारतरं सदा॥



१. ईहन्ते प्रतीक्षन्ते।

एवं शरबन्धोऽपि विन्यासभेदेन भिन्नो भवति।

महाचक्रान्तर्गतः शरबन्धः श्लोकान्तरनिबद्धः–

यौवनं भगसम्भ्रान्तं स्वलीनजननर्मदम्।
उरोजजघनोद्विग्नं विनष्टाष्टापदस्मयम्॥



१८. विन्यासभेदेनार्धचन्द्रशरबन्धो यथा–

मामसीमगुण त्राणचण रक्ष रमारत।
[1]सदामोदासदामोह वरं वह दरं दह॥



१. सतामामोदकः। असतामामोहक। वरं श्रेष्ठमभीष्टं प्रापय। संसारभयं वारय।

१९. एवं त्रिशूलबन्धमपि क्वचिदन्यथा विन्यस्यन्ति । यथाकथाच शक्यं रचयितुमयं छन्दोभेदेन विन्यासभेदेन च । अयमेकः प्रकारः–

[1]ज्ञानिमानिमुदे वादे देवसारतरं सदा ।
दानलीनमनस्त्वेन दासरं तरसा वदे ।



१. ज्ञानिनामत एव सप्रमाणानां समुन्नतचित्तानां वा मुदे। दुर्मतानामवदाने लीनमनस्त्वेन दासरं हरिं देवश्रेष्ठं वादे वदे निश्चयेन वदामि।

हलबन्धोऽप्यन्यादृशः क्वचिद् विन्यस्तः । अयं पूर्वनिर्दिष्टः महाचक्रान्तर्गतः श्लोकान्तरेण—

नीलं वृन्दवनीबालं लोलं लीलावशादलम् ।
लम्बमानलसन्मालं भजे कृष्णमतृष्णया ॥



२०. अयमेव विन्यासान्तरेण यथा—



[१]क्षरदास सदा रक्ष तेनतेन नतेन ते ।
येनयेन वदे वादे देवादेऽव नयेनये ॥

१. क्षरपुरुषा ब्रह्मादयो यस्य दासाः । 'क्षरः सर्वाणि भूतानि' इति स्मरणात् । मया तदातदाकृतेन तेनतेन नतेन नमनेन स्तवनेन च मां रक्ष । तथा हे देवानामादे, वादे प्रतिसमयं येनयेन प्रतिवादिना वदे सावधारणं स्वसमयं प्रतिपादयामि तदा विजयदानेन मामव ।

२१. अथ पद्मबन्धः । आदावष्टदलबन्धः–

[1]साध्वसाधुरसाधारा राधा सारदृगाप सा ।
सापगाध्वनि साकारा राका सारमसाध्वसा ॥



अन्या रीतिः पुरैव कुलालचक्रे प्रदर्शिता । पुनरन्यान्या रीतयः सम्भवन्ति छन्दोभेदेन दलसङ्ख्याभेदेन च। चतुर्दलादारभ्य चत्वारिंशद्दलपर्यन्तम्। । दिङ्मात्रमिह दर्शितम्। विधान्तराणि सुधीभिरूह्यानि भवन्ति ।

१. कुम्भकसुता नीलैव राधेत्युच्यते । सदा समाराधयति मनसा कृष्णमिति । अत एव साध्वसाधुरसयोर्भक्तिकामयोराधारा । कामभक्त्या कृष्णामाराधयन्ती । अत एव सारदृक् । सर्वश्रेष्ठमानन्दमयं कृष्णमेवान्तःपश्यन्ती तमेवाऽप सा । कुत्र? सापगाध्वनि । यमुनातीरे । साकारा राकेव पूर्णचन्द्रानना । कृष्णलाभेन गतसाध्वसा ।

२२. अथ षोडशदलबन्धो रीत्यन्तरेण विन्यस्तः–

[१]विश्वविद्याविदं विघ्नविषविग्नविपावितम् ।
विष्णुविन्नं विधुविभं विदां वित्तं विदो विदुः ॥



१. विश्वविद्याविदं सर्वज्ञम् । विघ्नविषेण विह्वला विशेषतः पाविता येन तम् । विष्णुर्यथावद् विदितः सर्वलोकैर्येन । विधुमिव विद्वन्नक्षत्रमण्डले भासमानम् ।

२३. अथ कमलमुकुलबन्धः–

[1]विज्ञेय तत यज्ञे विविद्यया ततया द्यवि ।
विना याततया नावि विश्रये ततये श्रवि ॥





२४. अयं चतुर्दलकुसुमबन्धोऽपि स्यात् । तद् यथा–

२५. अयमेव विन्यासान्तरेण मत्स्यबन्धोऽपि । तद् यथा–



१. देवलोके ततया विशिष्टया विद्यया विज्ञानेन विज्ञेय । 'देवादीनां तु यज्ज्ञानं विज्ञानम्–' इति स्मरणात् । यज्ञे चेज्यतया वितत । हठयोगादिरूपेण नावि यानेन विना सुकरं भवसागरं तर्तुं त्वामेव विशिष्य श्रये, श्रवणयुक्तं यथा स्यात् तथा त्वयि मनस्ततये । 'अथवा सततं शास्त्रविमर्शेन भविष्यति' इति स्मरणात् ।

२६. अथ मुरजबन्धः–

[१]चराम विषयं भक्त्या स्मराम हृदयं भयात् ।
याचामहे वयं पश्चात् वाचामविषयं पदम् ॥



२७. अथ गोमूत्रिकाबन्धः–

[२]यदायदा चलं चित्तं विषयेषु निवत्स्यति ।
तदातदाऽखिलं वित्तं भूषणेषुरवद्यति ॥



१. विषयजातमेव भक्त्या भजामः । हृदिगतं भगवन्तं केवलं भयादेव भजामः । न भक्त्या । अथापि फलकामा मनोवाचामविषयं तत्पदमेव याचामहे ।

२. भूषणाख्य इषुर्बाणः सर्वं वित्तं हरति । विषयलोलानां सर्वं वित्तं स्वप्रियावयवान् भूषयितुं केवलं पर्यवस्यति ।

२८. अथ हारबन्धः । स द्विविधः । पूर्वोर्धोत्तरार्धयोराद्यन्तयोरेकाक्षरत्वेन भिन्नाक्षरत्वेन च । तत्राऽद्यो यथा–

> [1]वीशं वीशं विशन्तं शमदमसमतायोगभागग्रगण्यं
> देहन्देहं वहन्तं भवदवलवनं रासहासप्रसन्नम् ।
> वीराभीराभिरामं गुणगणगणनासाधिताधिक्यधिष्ण्यं
> वन्देवन्दे विदे तं खलकुलदलनं पापतापप्रपन्नम् ॥



१. विगतेशम् । वीशं विशन्तं गरुडवाहनम् । तस्याप्यन्तर्यामिकम् । शमदमसमतायोगभाग्भिर्योगिभिः सदाऽग्रे गणनीयम् । शकटतृणावर्तादिभञ्जनेन वीरः । अत एवाऽभीराणां गोपानामभिरामः । गुणगणगणनावसरे गणनातीततया यद् विद्वद्भिः साधितमाधिक्यं तस्य निलयम् । पापानां दाहार्थं प्रपन्नम् ।

२९. द्वितीयो यथा–

वीशं वीशं विशन्तं शमदमसमतायोगभागग्रगण्यं
देहंदेहं वहन्तं भवदवलवनं रासहासप्रसन्नम् ।
[1]बोधेबोधे निधेयं गुणगणगणनासाधिताधिक्यधिष्ण्यं
वन्देवन्दे विदे तं खलकुलदलनं साधुमाधुर्यधुर्यम् ॥



१. बोधेबोधे प्रतिपदमनुसन्धेयम् । सर्वशब्दवाच्यत्वात् । साधु माधुर्यं नाम सर्वलोचनासेचनी सुषमा । सर्वलोकसुन्दरेष्वयमग्रणीः । साक्षान्मन्मथमन्मथः ।

३०. अथ नागबन्धः—

[१]वन्दे सर्वानुभातप्रभमपविपदं भावनिष्कम्पसूरि-
व्रातप्रादेशगम्यं सहजनिजगुणद्योतमज्ञेयभासम् ।
सन्तं तं पक्षिवाहं ततविभविबुधस्वागमानुप्रणद्धं
भक्तिज्ञेयं नितान्तं गुणगणभरितं वासुदेवं धरावम् ॥



१. सर्वानुभातप्रभम् । 'तमेव भान्तमनु भाति सर्वम्' इति हि श्रुतिः । भावेन भक्त्या निश्चलस्य ज्ञानिव्रातस्य प्रादेशमात्रे हृदये गम्यम् । ततप्रकाशा विबुधा देवा ज्ञानिनो वा । तैः सदागमनानुगुणं हृदि प्रणद्धम् । भक्त्यैव वा वशीकृतम् । धरामवति धरायामवतीर्णः ।

३१. केचिदक्षरविन्यासं नागफणात आरभ्य कुर्वन्तो रीत्यन्तरेणैनं बन्धमारचयन्ति। तद् यथा–

[१]देवे गोपस्वभावे विततभवदवत्याजके चित्तकं मे
रम्ये कल्याणकामिन्यपहतकितवे भिक्षुवित्ते बभाज।
भक्तिं साकं विरक्तिं कटुकटुकलसत्कामिनीभावभिन्ने
तत्राबन्ने चिदक्तिं श्रुतिमतिचरणैरर्पणन्यासभावे॥



१. मे क्षुद्रमपि चित्तं देवे भक्तिं बभाज। साकं कामिनीभावभ्रान्तेऽबन्नमये काये विरक्तिं च। श्रुत्या मत्या सदाचरणेन च भगवति सर्वार्पणरूपे न्यासभावे चित आसक्तिं च। कीदृशे देवे? कल्याणकामिनि। भक्तानां कल्याणमेव कामयति। अत एवाभक्तान् कितवानपहन्ति।

३२. अयमेकनागबन्धः । नागद्वयबन्धेन तृतीयः प्रकारो यथा–

[१]वन्दे सर्वस्वभूतप्रदमनविनतं भावनिष्णातभूरि-
बोधस्वन्यासगम्यं सहजनिजविपत्पातमज्ञातभातम् ।
प्रीतं स्वर्जातजातप्रधनमनुमतं दूनगम्यं स्वरूप-
स्वादर्शज्ञाननिष्ठं स्वरमणमपरिज्ञातमन्यायिदूरम् ॥



१. सर्वं स्वरूपभूतं ज्ञानानन्दादिकं मोक्षे प्रददात्यावरणमपगमय्य । सर्वे ये स्वीयास्तेषां भूतिमन्तमात्मानमेव प्रददाति । 'अस्य महतो भूतस्य' इति श्रवणात् । 'एको विष्णुर्महद् भूतम्' इति च स्मरणात् । सर्वे ये स्वस्मिन् भगवति भूता गतास्तेषां प्रकृष्टदातारम् ।

३३. अत्र ऊर्ध्वनागबन्धः। तद् यथा–

[१]भवादे नो मनः पादे
स्यादेव च तव स्वतः।
देवोत्तम हृदावास
वामदेव वदेम वा॥



अत्र नागयोर्मध्वसन्धिषु गतागतेन तुर्यपादः सम्पद्यते।

प्राणविनतम्। भक्तिनिष्णाता ये भूरिज्ञाना योगिनस्तेषां पुत्रकळत्रादिसर्वस्वन्यासेन गम्यम्। शास्त्रभावनिर्वर्णननिष्णातेन पूर्णप्रज्ञेन श्रीमध्वेन तुर्याश्रमस्वीकारेण स्वात्मनिवेदनेन सदा गम्यम्। सहजतया ये निजास्तेषां विपदः पातयति नाशयति। अज्ञात एव भाति। स्वर्जातस्य पारिजातस्य कृते स्वर्जातैर्देवैः सह जातप्रधनम्। शास्त्रानुगुणं ध्यातम्। प्रधने वा मनुभिर्देवैरन्ते मतमवगतम्। स्वरूपभूतं, स्वस्याऽदर्शकम्, स्वदर्शनाय दर्पणायितं वा ज्ञानं येषां ते स्वरूपस्वादर्शज्ञानाः। तेषु नितरां तिष्ठति। प्रेमातिशयो वा निष्ठा।

१. हे भवादे, तव पादे नो मनः स्यात्। भवमत्तीति संसारतारके वा तव पादे। किमेवं वदेम वा? अवादेऽपि हृदावासस्य किं न ज्ञायते। वामदेवो वामनः। 'मध्ये वामनमासीनं विश्वे देवा उपासते' इति श्रवणात्।

३४. अयमेव तुर्यपादे गतागतं विना पाशबन्धः। तद् यथा–

[१]हितं श्रुतिमितं प्रेमादरनम्यकथं नुतम्।
नासारदुर्जनायत्तं यदुनाथं नमामि तम्॥



३५. अयमेव रेखाविन्यासभेदेन मकुटबन्धोऽपि स्यात्–



१. प्रेमादराभ्यां नम्यकथं स्तुत्यकथम्। असारा ये दुर्जनास्तदायत्तो न भवति।

३६. अथ गुच्छबन्धः ।

[१]सदा मुदा सदानन्दे पदे वेदेरितेऽमिते ।
रते त्वयि त्वयि मयि गोपालः पातु पातकात् ॥



१. सदानन्दे भगवत्पदारविन्दे निरते त्वयि मयि च विषये, अयि भक्तलोक, गोपालः पातकानि परिहृत्य पातु ।

३७. अथ च्छत्रबन्धः ।

[1]गीताऽधीता श्रुतानीता हन्ताहन्ता चिता जिता ।
नीलकायभ पक्षे सा साक्षेपभयकालनी ॥



१. श्रुतेन श्रवणेन बुद्धिपथमानीता । चिता स्वरूपज्ञानेन हन्त, अहन्ता च जिता । नीला कायकान्तिरस्येति नीलाकायभः । साऽधीता गीता, जिता चाहन्ता सम्प्रति मम पक्षे । मम साहाय्यकारिणी । कथम्? यतः साधिक्षेपं संसारभयकालनी ।

३८. अयमेव कुसुमबन्धोऽपि स्यात्–



३९. अयमेव गदाबन्धोऽपि स्यात्–



एवमाकारभेदेन बहवो वृक्षादिबन्धा अप्यनयैव दिशा भवेयुः ।

४०. तत्र वृक्षबन्धो यथा–



४१. अथाङ्कुशबन्धः–

[१]नरतत्वात तत्वात दारतर्पिततर्पित ।
नतदास रवज्ञेय यज्ञे वर सदातन ॥



१. न विद्यते संसारे रतत्वं येषां ते नरतत्वाः । तानयमतति । तत्वानि च स्वसृष्टानि नियन्तुमन्तः प्रविशति । यद्वा न रीयत इति नरमक्षरं तत्वम् । अतति निरन्तरं विकारमृच्छतीति क्षरं तत्वमततत्वमुच्यते । एवं क्षराक्षरे उभे अपि तत्वे अयमतति व्याप्नोति पुरुषोत्तमः । यद्वा नरतत्वे जीवसमुदाय आततत्वेन अतः अवगतः । सौगन्धिकहरणेन दारा येन तर्पितास्तेनायं भीमेन तर्पितो जरासन्धवधादिना । नतास्तव दासाः । त्वं च दासेषु नत इव भक्तपराधीनः । रवैर्वेदैः, सर्वशब्दैः सर्वघोषैश्च ज्ञेयः । यज्ञे देवत्वेन वरणीयः । यत इन्द्राग्न्यादिरवैरयमेव ज्ञेयः ।

४२. अयमेव परशुबन्धोऽपि स्यात्–



४३. आन्दोलिकाबन्धः–

[१]रातु रासससमुद्युक्ता मुद्युक्ता मम काचन ।
नच कामयमानस्य मानस्य प्रसरातुरा ॥



४४. षट्कोणबन्धः–

विद्यावितविप्रं विनिविष्टं विश्वे ।
विष्णुं विधिविष्टं विदि विष्टं विद्धि[२] ॥



१.मम मदीया काचन देवता मदभीष्टं ज्ञानभक्त्यादिकं रातु । या फलकामस्य ज्ञान-प्रसरणे नातुरा । अफलकामस्य च मानवर्द्धने पुनरातुरा । कामेन संयमेन चानितीति वा कामयमानः । कामस्य संयमेन वा ।

२. विदि ज्ञानिनि विशेषत आविष्टं विद्धि । 'ज्ञानी त्वात्मैव मे मतम्' इति ह्युक्तम् ।

४५. अयमेव द्वादशदलपद्मबन्धोऽपि स्यात् –



४६. अथ वृन्दावनबन्धः–

[1]भवदावसहे देहे तमसीममुदा हृदा ।
देवं प्रवंदितं प्रीतं श्रीतं वन्दामहे वयम् ॥

१. असीममुदा हृदा । भगवदनुभूत्या प्राप्तामितानन्देन हृदयेन । प्रकृष्टैरपि वन्दितम् । श्रिया समेतम् ।



तदिमे षट्चत्वारिंशत्, मध्वविजयगते द्वे– चक्रबन्धः सर्वतोभद्रं च– इति संहत्य ४८ बन्धाः सन्दर्शिताः।

एवं सहस्रं बन्धा भवन्ति यथाबुद्धिविभवम्। नान्तो रेखाविन्यासस्य। नापि कविकौशलस्य। ऊहयन्ति ते ये कुशलाः। उक्तेऽपि नावगच्छन्ति ये पुनरकुशला इत्यलं विवृत्य।

इमामाचार्यगोविन्दः स्वकैर्ललितपद्यकैः।
चकार बन्धमीमांसां विनेयजनवाञ्छया॥

—o—

३ काव्यमीमांसा

अथातः काव्यमीमांसा।

अदोषौ सगुणौ शब्दार्थौ काव्यं क्वचिदनलङ्कृती अपीति मम्मटः।

तदेतन्नाऽऽद्रत्यम्। नात्र शब्द इति ध्वनिमात्रमुच्यते। किन्त्वर्थवत् सुप्तिङन्तम्। तेन व्यर्थं पुनरर्थग्रहणम्।

आह च दण्डी–'इष्टार्थव्यवच्छिन्ना पदावली' इति।

नन्वदोषत्वे सति सगुणत्वमिति किं भगवतो लक्षणमुच्यते? उत काव्यस्य? केवलं ब्रह्मैव निर्दोषं गुणपूर्णं च शुश्रुम पूर्वेषाम्। नहि तादृशं किमपि लोके वस्तु भवति।

नन्वदोषावित्यल्पदोषावुच्येते। तर्ह्यल्पदोषवत्त्वं काव्यत्वमित्युक्तं भवति। अहो तर्हि दोषवत्त्वाय काव्ये कविना प्रयतितव्यम्। न चेत् कविकर्म काव्यमेव न स्यात्। अदोषत्वं विवक्षता दोषा एव विहिता इत्यहो लक्षणशैली। नहि लक्षणज्ञा एवं व्याचक्षते।

एवं सगुणावित्यल्पगुणावित्यायातम्। किमेतदपि भणितव्यं लक्षणे? यावता स्वकाव्यं सर्वतोऽधिकगुणं स्यादिति सर्वोऽपि प्रयतते।

अलङ्कारास्तु न लक्षणम्। किन्तूपलक्षणम्। नहि कटकी कुण्डली दण्डी चोष्णीषी च पुरुष इति पुरुषलक्षणं भवति। काष्ठपुरुषोऽपि स्यात् कटकी कुण्डली दण्डी चोष्णीषी च। तत् तन्नाऽऽद्रत्यम्।

ननु भोः स्वभावकथनमेवैतत्, यावच्छक्ति दोषाल्पत्वाय गुणाधिक्याय च प्रबन्धा प्रयतितव्यमिति। अस्तु नाम, तुष्यतु भवान्।

वक्रोक्तिः काव्यजीवितमिति कुन्तकः। इदमपि न लक्षणम्। भूयोदर्शनादुपलक्षणमेव। क्वचिदवक्राऽप्युक्तिः काव्यं भवति। ननु स्वभावोक्तिरपि भूषणम्, नतु दूषणम्। अपिच किं नाम वक्रत्वमित्यनुयोगे ध्वनावेवान्ततः पर्यवसीयते।

तदेव परिस्फुटमाहाऽनन्दवर्धनः– 'काव्यस्याऽत्मा ध्वनिः' इति। अयमपि किञ्चिदिव बभ्राम। ध्वनिर्न केवलं शब्दधर्मः। नाट्येऽप्यस्ति ध्वनिः। नादेऽप्यस्ति। अस्ति चित्रकलादिष्वपि। नायं शब्दमात्रधर्म इति भ्रमितव्यम्।

न केवलं काव्यस्याऽत्मा ध्वनिः। नाट्यस्यापि। गानस्यापि। रेखाया अपि। किं बहुना? सर्वस्या अपि ललितकलाया आत्मा ध्वनिः। येन विना सर्वाऽपि कला कुणपायते।

वाक्यं रसात्मकं तदिति विश्वनाथः। अत्रापि रस इति न केवलं शृङ्गारादिरेव। नहि रसध्वनिरेव काव्यम्। किन्तु रसनीयं स्वदनीयं वाक्यमित्यायातम्।

तदेवाऽह जगन्नाथः– 'रमणीयार्थप्रतिपादकः शब्दः काव्यम्' इति। इदमप्याहोपुरुषिकामात्रम्। अर्थवानेव शब्दो भवतीत्युक्तम्। रमणीयः शब्दः काव्यम्– इति पर्याप्तम्। रमणीयत्वं च शब्दतोऽर्थतश्च। रमणीयमर्थं प्रतिपादयन् रमणीयः शब्द इत्युक्तं भवति।

किञ्च किं रमणीयं किमरमणीयमिति का व्यवस्था? यदेकस्य रमणीयं भवति तदेवापरस्यारमणीयं भवति। नहि सर्वानुगतमविगीतं रमणीयत्वं नाम किञ्चिदस्ति काव्येष्वपि कामिनीष्विव।

आह श्रीहर्षः– 'यथा यूनस्तद्वत् परमरमणीयाऽपि रमणी कुमाराणामन्तःकरणहरणं नैव कुरुते' इति। सोमदेवोऽपि–'या यस्याभिमता मूर्ख सुरूपा तस्य सा भवेत्' इति।

ननु तद्रमणीयं यत् सहृदयहृदयमावर्जयति। कस्तर्हि सहृदयः? स किल सहृदयो यः काव्यास्वादस्येष्टे। तदियमन्योन्याश्रया प्रक्रिया वैयाकरणानां धातुपाठ इव– 'भू सत्तायाम्' इति, 'अस भुवि' इति। वरमवचनमेव निर्वचनादपि।

किं तर्हि काव्यम्? अशब्दं प्रत्याययन् शब्दः काव्यम्। ध्वननशीलः शब्द इत्येतत्। शब्दबोध्यार्थप्रतिपादनद्वारा शब्दाबोध्यार्थद्योतकत्वं काव्यत्वमित्युक्तं भवति।

ननु 'घटादिः' इत्यपि काव्यं स्यात्। तत्र ह्यादिशब्दोऽशब्दं पटादिकं बोधयति। सत्यमाह भवान्। घटेनाऽदिमानिति पटादिं बोधयत्येव। न द्योतयति।

ननु तर्हीदमपरं काव्यम्– काकेभ्यो दधि रक्ष्यतामिति। अशब्दं मार्जारं प्रत्याययन् काकशब्दः किमिति न काव्यं स्यात्। स्यादेव यदि भवतश्चित्तं चमत्कुर्यात्। ननु अशब्दं प्रत्याययन् शब्दः काव्यमित्युक्तम्। नतु चमत्कृतिजनकः शब्दः काव्यमिति। अनवगतभावो भवान्। क्वचिद् दीपशिखेव शब्दः पदार्थान् व्याधुत्योपस्थापयति। क्वचिद् विद्युदिव द्योतयति। सेयं द्युतिश्चमत्कृतिगर्भिणी भवति। भगवती चमत्कृतिरेव च काव्यत्वेऽकाव्यत्वे च मानदण्डः।

तदिदमुक्तेनानुक्तस्य स्फोरणमेव ध्वनिरित्युच्यते येन चेतश्चमत्क्रियते।

लक्षणायां च व्यञ्जनायां चार्थान्तरावगमनं समानम्। वाच्यार्थानुपपत्तौ लक्षणा प्रसरति। उपपत्तावपि व्यञ्जना प्रभवति। अनुपपत्तिरेव लक्षणाबीजम्। चेतश्चमत्करणमेव व्यञ्जनाबीजम्।

ननु तत्रापि वक्तृतात्पर्यानुपपत्तिर्बीजमिति शक्यं वक्तुम्। न शक्यम्। वक्तृतात्पर्याविषया अपि क्वचिद् ध्वनयो भवन्ति। तद् यथा भवभूतेरनभिप्रेतमपि ध्वनिं तन्नाटके घनश्यामः पश्यति– 'भगवति वसुन्धरे, देहि मे विवरमित्यश्लीलध्वनिः' इति।

सङ्गतमर्थं हि पदानि ध्वनयन्ति। स्मृतं चोपेक्षानर्हं च सर्वं सङ्गतं भवति वक्तुरभिप्रेतमनभिप्रेतं वा। तदिदमशब्देनार्थवचनं कवेः कौशलम्।

ननु कथमथ शब्दचित्रं काव्यम्? का कथन्ता? ननु तत्र शब्द एव सर्वस्वम्, नाशब्दं किमपि।

नह्यात्मा सर्वं देहं व्याप्नोति। हृदि तिष्ठन् समग्रं शरीरं भासयति। नहि ध्वनिः सर्वं शब्दग्रामं व्याप्नोति। क्वापि तिष्ठन् स्वसम्बद्धं सर्वं वाङ्मयमावर्जयति।

* * *

ऐतिहासिकं पौराणिकं वा कथानकं विस्तारयत्, शब्दतोऽर्थतश्च महत् काव्येषु महाकाव्यमित्युच्यते। अष्टादशवर्णनं महाकाव्यमिति केचित्। तथाह्याहुः–

'नगरार्णवशैलर्तुचन्द्रार्कोदयवर्णनैः।
'उद्यानसलिलक्रीडामधुपानरतोत्सवैः।
'विप्रलम्भैर्विवाहैश्च कुमारोदयवर्णनैः।
'मन्त्रद्यूतप्रयाणाजिनायकाभ्युदयैरपि।
'एतैरुपनिबद्धं यत् तन्महाकाव्यमिष्यते।
'एवमष्टादशानां यैःकैश्चिन्न्यूनमपीष्यते' इति।

अन्ततोऽर्थवैपुल्यमेव ग्राह्यम्। इयन्तो वर्णनीया एवेति इयन्त एव वर्णनीया इति नियोगपर्यनुयोगानर्हस्य कवेः का नियन्त्रणा?

'सर्गबन्धो महाकाव्यम्' इत्यन्ये।

अनेकसर्गव्यापी शब्दतो विस्तृत इत्येवात्रापि तात्पर्यम्। नहि कश्चित् सर्गमुच्छ्वासं वा परिच्छेदं वा व्याजहारेति काव्यमकाव्यं भवति। अत एवोक्तम्– 'असर्गबन्धमपि च महाकाव्यमितीष्यते' इति।

अपिच भवतु नामाष्टादशवर्णनोपेतं महाकाव्यम्। सर्गबन्ध एव वा। अथापि श्रीमध्वविजयस्य महाकाव्यत्वे न काऽपि क्षतिः। यतोऽत्र विहितः सर्गबन्धः। नगरार्णवशैलादिवर्णनमात्रपर्यवसितकाव्यप्रज्ञानामपि मनःसौहित्याय विशिष्य न्यबध्यतैकादशः सर्गः।

तथाहि वैकुण्ठनगरवर्णनमेकादशे [८-१४]। अर्णववर्णनं षोडशे[१३-१९]। शैलवर्णनं षष्ठे[५४-५७]। ऋतुवर्णनमेकादशे [३९-४४]। चन्द्रोदयवर्णनं चतुर्दशे [५१-५५], अर्कोदयवर्णनं च [१५-१७]। उद्यानवर्णनम् [३६-३८], सलिलक्रीडावर्णनम् [४९-५०], मधुपानवर्णनम् [५२], रतोत्सववर्णनं [५३-६१] चैकादशे। नात्र विप्रलम्भो विवाहः कुमारोदयवर्णनं वा। अथापि भवति सीतारामयोः विप्रलम्भसूचनम्[१५], विवाहवर्णनं च भीमसेनस्य प्रथमे [३४], मध्यगेहभट्टस्य विवाहवर्णनम् [१२], कुमारोदयवर्णनं [२३-२७] च द्वितीये । प्रतिवादिनां दुर्मन्त्रवर्णनं द्वादशे [१-२५]। नात्र द्यूतवर्णनमाजिवर्णनं वा। अथापि भवति भीमस्याऽजिवर्णनम् [४१-४२],द्यूतकुपितस्य भीमस्य वर्णनं [३७] च प्रथमे। प्रयाणवर्णनं पञ्चमे [३०-५२], षष्ठे[३४-५४],अष्टमे [६-५३], नवमे[१-६;१४-१६], विशिष्य दशमे षोडशे च। नायकाभ्युदयश्च सर्वत्र विशिष्य च पञ्चदशे सर्ग इति।

ननु सत्यं श्रूयन्ते विलसन्ति निधुवनानि। अथापि नास्ति नायिकैव। कथमनायकमनायिकं वा काव्यं भवति? कथन्तरां महाकाव्यम्?

ननु भोः, विस्मृतं भवता महाकाव्यलक्षणम्। अष्टादशसु वर्णनीयेषु सुरतवर्णनं करणीयमित्येवोक्तम्, न नायिकागतं सुरतमिति। नापि नायिकां विना न सर्गो बध्यते। तद् युक्तमत्र वैकुण्ठपुरनायकानां नायिकानां च निधुवनवर्णनमिति।

अनायिकमपि काव्यं भवति यदि मुनिर्नायकः। तेनात्र महाकाव्ये केवलं नायक एव। न नायिका। लोकोत्तरश्च नायक इति। यथाऽऽहुः–

'–सर्वगुणोपेतः कथाव्यापी च नायकः' इति।

'वर्ण्यो मुख्यतया नेता लोकोत्तरगुणोत्तरः।
'तेन कर्तुः प्रबन्धस्य प्रतिष्ठा महती भवेत्।

'कुलाचारयशःशोर्यत्यागशीलादिवर्णनम् ।
'क्रियते नायकस्यैव यत् तदेवातिसम्मतम् ।
'अथवा तद्विरुद्धस्य वर्णयित्वा बहून् गुणान् ।
'तज्जयान्नायकोत्कर्षवर्णनं च मतं क्वचित्' इति च ।

उक्ताश्च नायकगुणाः–

'सौन्दर्यौदार्यगाम्भीर्यमाधुर्यस्थैर्यशक्तयः ।
'लोकानुरागमहिममहाभाग्यकुलीनताः ।
'तेजोवैदग्ध्यलालित्यवाग्मिताधर्मसङ्ग्रहाः ।
'पण्डाविलासकरुणाधर्मतारुण्यशुद्धयः ।
'इति द्वाविंशतिर्नेतुर्गुणा अन्ये यथोचितम्' इति ।

प्रायः सर्वेऽप्येते गुणाः स्फुटं भगवत्पादेऽत्र प्रतिपादिताः । विशिष्य च सौन्दर्यशक्तिमहिमतेजःपण्डाविलासशुद्धयः । तथाहि सौन्दर्यम्–

कनकातुलताळसन्निभः कमलाक्षो विमलेन्दुसन्मुखः ।
गजराजगतिर्महाभुजः प्रतियान् कोऽयमपूर्वपूरुषः[७.६] इत्यादि ।

इदमित्थमितीक्षणैर्नराणामपरिच्छेद्यमहिष्ठधामरूपम् ।
अधिकं धरणीमलञ्चिकीर्षु स्फुटमुद्यन्तमिव द्युनाथमन्यम् [१३.२७]
इत्यादि च ।

असाध्यसाधनी शक्तिर्यथा–

त्रिंशदुद्यतनरैः सुदुर्धरां लीलयाऽनयदिमामसौ मठम् [९.४२]
इत्यादि ।

पयः कलशपञ्चकत्रिकयुगाभिपूर्णं पपा-
वदृष्टगतिरप्यभून्नृपनृमण्डलैरुद्यतैः[१०.५२] इत्यादि ।
निन्ये तां गिरिमिव वानरीकृतात्मा
लीलावत्करकमलेन सोऽमलेन[१६.९] इत्यादि च ।

देवांशत्वरूपो महिमा यथा–

देवतास्वसुलभा प्रतिभा ते मानुषेषु चपलेषु कथा का[६.१०] इत्यादि।
वृष्ट्यादेः स नियमनादि चक्र एतच्चित्रं किं भुवननियामके समीरे[१६.४८]
इत्यादि च।

अधिक्षेपाद्यसहनं नाम तेजो यथा–

तमाव्रजन्तं यतिवेषधारिणं दण्डं प्रकाश्यैष हसन्नभाषत।
खण्ड्येत दण्डो यदि चण्ड न त्वया त्वं पण्डकोऽपण्डित वन्ध्यवागिति।
[५.४३] इत्यादि च।

आक्षेपं तमसहमान उच्चमानः
सद्योऽसौ निजकरपल्लवद्वयेन।
आदाय व्यतनुत बीजमोषधीनां
सूक्तेनाङ्कुरदलपुष्पबीजसृष्टिम् [१६.५] इत्यादि च।

सर्वविद्यासु समानमसमानं पाण्डित्यं पण्डा यथा–

अत्र जन्मनि न यत् पठितं ते जैत्र भाति कथमित्यमुनोक्ते।
पूर्वजन्मसु हि वेद पुरेदं सर्वमित्यमितबुद्धिरुवाच[४.५३] इत्यादि।
विजित्य विश्वान् विदुषां सभास्वसौ
जगाम नाम्नाऽप्यनुमानतीर्थताम् [५.७] इत्यादि च।
यायाः प्रसक्ताः परिषत्सु पूरुषैर्विद्या विदग्धैर्विविधैः समागमे।
स तासुतासु प्रतिभातिभासुरो विद्यासु विद्याधिपतिर्जिगाय तान्।
[५.४५] इत्यादि च।

तत्प्रसङ्गबलतोऽखिलविद्यापाटवं पृथुहृदः प्रतिबुध्य।
आनमन् सबहुमानममी तं यं नमन्ति किल नाकिनिकायाः [६.१६]
इत्यादि च।

सधैर्या गतिश्च दृष्टिश्च, सस्मितं च वचो विलासः। तद् यथा–

भत्सयन्निति जहास सुहासो मत्सराकुलधियो जडयन् सः[६.१५] इत्यादि।

वीरदृष्टिकृतसिंहविभ्रमः शान्तदृष्टिकृतशान्तसम्मदः[९.५] इत्यादि च।

अशनैः शनकैरिवाऽव्रजन्तं युवसिंहप्रवरप्रगल्भयानम् [१३.२८] इत्यादि च।

कथनं तदुदारधैर्यसारं मधुरं पुष्कलभाववत् प्रसन्नम्[१३.४१] इत्यादि च।

शुद्धिर्यथा–

बुद्धिशुद्धिकरगोनिकराढ्यं तीर्थजातमुभयं च धरण्याम्।
आत्ममज्जनत एव निकामं पर्यशोधयदमन्दमनीषः[६.३५] इत्यादि च।

अत्यवर्तत नितान्तमथासौ गाङ्गमोघमघनाशनकीर्तिः[६.३६] इत्यादि च।

चतुर्विधाः काव्यनायकाः श्रूयन्ते– धीरोदात्तः, धीरोद्धतः, धीरललितः, धीरशान्तश्चेति। धीरशान्तश्चायं नेता। तथा ह्याहुः–

'धीरः शान्तः प्रसन्नात्मा धीरशान्तो द्विजादिकः' इति।

'सदाचारो विवेकश्च समता च दया तथा।
महिमा सत्यवाक्यत्वं धीरशान्तगुणा मताः' इति च।

उत्तमश्चायं नेता सात्त्विकतमत्वात्। तथाहि वदन्ति–

'पुनस्त्रिधा स गुणत उत्तमो मध्यमोऽधमः।
प्रकृतेः सात्त्विकोऽपि स्याद् राजसस्तामसोऽपिच' इति च।

पुनस्त्रेधा नायकप्रभेदानाहुः– दिव्योऽदिव्यो दिव्यादिव्यश्चेति। दिव्यादिव्यश्चात्र नेता। यः स्वयं दिविभवः, भुवि चावतीर्णः स किल दिव्यादिव्य उच्यते। तद् यथेन्द्रो दिव्यः। दुःषन्तोऽदिव्यः। कृष्णो दिव्यादिव्यः। इति नायकमीमांसा।

***

अथातो रसमीमांसा।

अथ कोऽत्र नवसु प्रधानो रसः? न कोऽपि। तर्हि नीरसं काव्यम्? न भोः, दशमं रसमाचक्ष्महे। तथाहि प्रथमं तावदालङ्कारिकाः शङ्कं दध्मुरष्टावेव रसा इति। ततः शान्तोऽपि नवमो रस इति जगदुः। यथा महाभारते। भक्तिरपि दशमो रस इति तु वयम्। यथा भागवते। तत्र हि स्फुटं जगाद व्यास एव– 'मुहुरहो रसिका भुवि भावुकाः' इति। भाव इति भक्तिः। भावुका इति भक्ता उच्यन्ते। तेन हि भक्तिरसिका रसिकाः पिबत भागवतं भक्तिरसमित्युक्तं भवति।

त्रिविक्रमपण्डिताचार्योऽप्याहोषाहरणे–

'तस्यास्तु दुर्भाषणदस्युदोषविध्वंसिनो भक्तिरसः सखा मे।
'सङ्गन्तुकामस्य पदारविन्दे पापापहे पूर्णसुखस्य विष्णोः' इति।

स्वतातमनुकुर्वन् स्वयं चाहाऽत्र ग्रन्थकृत्–

'मुकुन्दभक्त्यै गुरुभक्तिजायै.....वक्ष्यामि वायोरवतारलीलाम्'
[१.५] इति।

नन्वत्र कः स्थायी भावः? प्रीतिरिति गृहाण।

समानयोः प्रीतिः स्नेहो भवति। सैव स्त्रीपुंसनिष्ठा रतिर्भवति। रतिः शृङ्गारतामापद्यते। उच्चं प्रत्यवरनिष्ठा भक्तिताम्। ननु तर्ह्यवरं प्रत्युच्चगता प्रीतिरपि वात्सल्यं नामैकादशो रसः स्यात्? स्यान्नाम। किं ते च्छिन्नम्? नहि कापि राज्ञामाज्ञाऽस्ति– एतावन्त एव रसाः परिगणनीया इति। तथाहि भणन्ति–

'रसोऽपि नवमः शान्तो शमस्थायीति केचन।
'अन्ये तु करुणास्थायी वात्सल्यं दशमोऽपि च' इति।

तथापि भक्तौ प्रीतेर्यथा स्थायित्वं न तथा वात्सल्ये। करुणयाऽपि वात्सल्यं भवतीत्युक्तम्। तदपि न चिरमवतिष्ठते, यथा स्त्रीपुंसयोः शृङ्गारः, यथा वा

भक्तस्य भगवति भक्तिः। तस्माद् वात्सल्यं नाम सञ्चारिभाव एवायम्। भक्त्या सह दश रसा इति तु सुन्दरम्। शृङ्गारस्येव भक्तेरपि देवता विष्णुः। वर्णः श्यामः।

तमिमं रसं द्वेधा प्रचक्षते–

'आत्मचेतःसन्निकर्षमात्रजातस्त्वलौकिकः।
बहिः स्वसन्निकर्षेभ्यः स्यादुद्भूतस्तु लौकिकः' इति।

भक्तिरप्येवमलौकिकी भवति केषाञ्चिद् येऽन्तर्भक्ताः। लौकिकी च भवति बहिर्व्यक्तभक्तिप्रसराणाम्।

अपिच भक्तिश्चतुर्विधाऽपि भवति। अर्जुनादीनां सख्यमयी भक्तिः। यशोदादीनां वात्सल्यमयी। गोप्यादीनां शृङ्गारमयी। नारदादीनां च केवला भक्तिरिति।

अन्ये तु शृङ्गारमेव चतुर्विधमाहुः– धर्मशृङ्गारो यत्र धीरोदात्तो नेता। अर्थशृङ्गारो यत्र धीरोद्धतो नेता। कामशृङ्गारो यत्र धीरललितो नेता। मोक्षशृङ्गारो यत्र धीरशान्तो नेता। तद्विशेष एव भक्तिर्नामेति। तथाहि वदन्ति–

'रसो वै स इति श्रुत्या रस एकः प्रकीर्तितः।
अतो रसः स्याच्छृङ्गार एक एवेतरे तु न।
धर्मार्थकाममोक्षाख्यभेदेन स चतुर्विधः' इत्यादि।

इयांस्तु भेदः– मोक्षशृङ्गारो नायिकामपेक्षते। भक्तिस्तु केवला भवति। न नायिकामपेक्षते। यद्यस्ति नायिका, अथापि भवति, यदि नास्ति, अथापि भवति।

***

अथातो रीतिमीमांसा।

ननु वदति रीतिरात्मा काव्यस्येति वामनः। आत्मेति विशिष्टाऽवयवरचना। तेन रसानुगुणा पदसङ्घटना रीतिः। सा च देशाभिरुचिभेदेन चतुर्धा भवतीति

च वदन्ति। काचिद् विदर्भाणामिष्टा। अपरा लाटानाम्। अन्या गौडानाम्। इतरा पञ्चालानामिति।

का तर्हि वैदर्भी रीतिः? अपरुषपदबन्धा नातिदीर्घसमासा च रीतिर्वैदर्भी भवति। तद् यथाऽत्रैव–

मन्दहासमृदुसुन्दराननं नन्दनन्दनमतीन्द्रियाकृतिम्।
सुन्दरं स इह सन्न्यधापयत् [९.४३] इति।

अतिसुन्दराः सुरभयः पुरुषा हरिचन्दनेन नवचन्द्ररुचा।
चलचारुचामरधरानुचरा विचरन्ति नित्यतरुणा इह ते [११.२८]
इत्यादि च।

इतो नातिभिन्ना शान्ताक्षरबहुला चादीर्घसमासा च लाटी रीतिर्भवति–

हृदये कृतसज्जनोदये सुविशाले विमले मनोहरे।
उभयं वहति त्रयीमयं भगवान् ब्रह्मसुसूत्रमुत्तमम् [७.३३] इति।

समासबहुला चोज्ज्वलवर्णा च गौडी रीतिर्भवति–

विभवाभिभवोद्भवादिकं भुवनानां भुवनप्रभोर्भुवोः।
अनयोरपि दभ्रविभ्रमात् सभवाम्भोजभवात्मनां भवेत् [७.४३] इति।

'भ्रमदभिभवभूभृद्भूरिभूभारसद्भिद्भिदनवविभवभ्रूविभ्रमादभ्रशुभ्र।
'ऋभुभवभयभेत्तर्भासि भोभो विभोऽभीर्दहदह नरसिंहासह्यवीर्याहितं मे'
इति च नृसिंहस्तुतौ।

वस्तुतस्तु द्वे एवेमे भवतः। श्लक्ष्णा च तीक्ष्णा च। वैदर्भी च गौडी च। तदुभयात्मिका पञ्चालानां प्रिया तृतीया भवति पाञ्चाली। सैव सर्वरसानुगुणा। सैव कर्णाटानां प्रिया कार्णाटी च। सैवात्र काव्ये प्रचुरा रीतिः। तद् यथा–

सुस्मितेन्दुमरविन्दलोचनं स्वर्णवर्णमतिभद्रभाषणम्।
वीतभूषमपि विश्वभूषणं तं दिदृक्षुरलमापतज्जनः[५.५१] इत्यादि।

अरुणतरणिबिम्बच्छद्मना पद्मरागः
कपिशकरकलापोल्लास्यभूत् प्रेक्षणीयः[१४.४७] इत्यादि च।

तदेतदुक्तमुषाहरणेऽपि–

'वैदर्भमार्गानुगताः कवीन्द्राः केचित् परे गौडपथप्रवीणाः।
'प्रायेण तेषामनुवृत्त्यभावाद् द्वयानभिज्ञस्त्वपथेन यामि' इति।

अथ के कोमला वर्णाः? के च शान्ताः? विना टवर्गं वर्गेष्वाद्यतृतीया वर्गान्त्ययुक्ता यवलाश्चातिकोमलाः। धनौ रणौ शसौ हश्च शान्ताः। इति रीतिमीमांसा।

अत्र प्रायो रीतिरिव पाकोऽपि साङ्कर्येण भवति नाळिकेरपाकश्च द्राक्षापाकश्च। तद् यथा–'आदौ ह्रस्वत्वेन वत्सानुसृत्याम्–' [१२.३२] इत्यादिर्नाळिकेरपाकः। 'तदिदं वपुरस्य दृश्यते दळितेन्दीवरसुन्दरद्युति' [७.२३] इत्यादिर्द्राक्षापाक इति।

ममन्थ काव्यमीमांसां सेव्यां बुधजनैरपि।
इमामाचार्यगोविन्दो विनेयजनवाञ्छया॥

—०—

४ अलङ्कारमीमांसा

अथातोऽलङ्कारमीमांसा।

द्वयी पुनरलङ्कारस्य गतिर्भवति। शाब्दी चार्थी च। यदामनन्ति– 'अलङ्करोति शब्दार्थावित्यलङ्कार इष्यते' इति।

तत्र शब्दानामनुवर्तनेन प्रासनं नाम शब्दालङ्कारोऽनुप्रासः। स त्रेधा भवति– छेनुकानुप्रासो वृत्त्यनुप्रासो लाटानुप्रास इति।

अव्यवधानेन सजातीयवर्णद्वयस्य द्वित्राणां वा व्यञ्जनानामावर्तनं छेकानुप्रासमाचक्षते। 'छेको विदग्धस्तत्प्रयोज्यत्वाच्छेकानुप्रास' इति विश्वनाथः। छेका गृहशकुन्ताः। तेषां हि प्रायो द्विर्भाषितं भवतीत्यन्ये।

तद् यथा–'सवासवा दिविभवाः सन्तु सन्तोषदाः सदा'। व्यञ्जनानामनियत्याऽऽवर्तनं वृत्त्यनुप्रासमाहुः। तद् यथा-'दस्माक्षो भस्मसाच्चक्रे स स्मरं लोकघस्मरम्। सुस्मेरवदनं तस्मादस्मद्देवमनुस्मर'। यत्र शब्दार्थयोरुभयोरावर्तनं स लाटानुप्रास इत्याहुः। तद् यथा–'मधुरो यमुनोद्देशो मधुरो मधुरो वसन्तकालोऽयम्। मधुरादपि मधुरतरो मधुरानाथो मनो हरति' इति।

काव्येऽस्मिन् छेकवृत्त्यनुप्रासयोः प्राचुर्यमुपलभ्यते। छेकानुप्रासो यथा– विषं विषण्णो विषभृद्व्रणोऽतः[१.३१]; नानावनेषु चरतश्चरतस्तृणानि [२.४५]; शरणतो रणतो निरगान्नृभिः[३.२]; अयि कृपालय पालय बालकम् [३.१५]; भुजे भुजेनाऽशु भुजङ्गशायिना [४.३७]; उवाच वाचं परिहासहासवान्

[५.१७]; मानमानमयतीह कथं नो[६.१२]; कमलाकमलासनानिलैः [७.२५]; विशिशेष शेषशयनः पुनर्धियम्[८.५]; ऐच्छदच्छलदयोदयादयम् [९.४०]; स युक्तिनखरैः खरैः–[१२.५१]; अवभाति ननु प्रभाप्रभावी [१३.४७]; तदा तदाननाम्भोजात्..... सेना सेनाग्रहा दिव्या... [१५.३] इत्यादि ।

लाटानुप्रासो यथा– न समग्रं जगतां पितुः पितुः [७.५५] इति । मधु मधुकरराजो निष्पतन् पौष्पमाप्तुम् [१४.५] इत्याद्यपि लाटानुप्रास एव। सम्प्राप्तं सह सहजेन गण्डवाटम् [१६.२५] इत्यादि च ।

व्यवधाने तु वृत्त्यनुप्रास एव। रसविषयव्यापारवती वर्णरचना वृत्तिः, तदनुगतत्वेन प्रकर्षेण न्यसनाद् वृत्त्यनुप्रास इति विश्वनाथः। तद् यथा– भूयोबोधस्ततो भूयो व्याचख्यौ भाष्यमद्भुतम् [१५.१] इति। आपादादामौलि वृत्त्यनुप्रासप्रायं चेदं समग्रं काव्यम्। दिङ्मात्रं यथा–नारायणायाखिलकारणाय[१.१], तस्मै नमो नीरदनीलभासे[१.२], उदयति घनमालालीनभानौ च भानौ [२.५४], नळिननाभनिभालनसम्मदागमविकस्वरभास्वरलोचनः [३.५], सुजन-कुमुदवृन्दानन्ददा चन्द्रिकेव[४.५४], खण्ड्येत दण्डो यदि चण्ड न त्वया त्वं पण्डकोऽपण्डित वन्ध्यवागिति [५.४३], सुन्दरेषु सुरमन्दिरवृन्देष्विन्दिरा-रमणवन्दनकृत्यम्[६.२३], सुमनोनिकरेण पूरितं स्वमनोऽभीष्टदमल्पदुर्गमम् [७.४], शृणु देवकार्यमवधार्य धैर्यवद् यदुदीर्यमाणमिदमार्यसम्मतम्[८.४४], सानुनीतिरथ नीतिमानयं भाष्यसद्गुणगणानवर्णयत्[९.३३], वायुना त्रिरपि पूर्वपायिना [९.५०], शुभजनतायै कुतूहलनतायै [१०.२], प्लवैरपेतामवलोक्य सिन्धुं सरोजबन्धुं च तदाऽप्तसिन्धुम्। तटे निषण्णानधिकं विषण्णान्–[१०.२७], चलचारुचामरधरानुचरा विचरन्ति नित्यतरुणा इह ते [११.२५], स्वानां चेतो नन्दयन् मन्दचेता धृष्टामुच्चैर्वाचमाचष्ट कष्टः [१२.१७], क्षणदासु विचक्षणः स वीक्ष्य प्रचुरप्रज्ञमनोज्ञशास्त्रसारम् [१३.६७], अखिलखलकुलानां वर्धयन् द्वेषदोषम्[१४.६], अखण्ड-

यदखण्डङ्गो द्वयांश्चाखण्डलद्विषः [१५.२७], वाचालो वचनमुवाच वाग्मिवर्यम् [१६.२] इत्यादि ।

कर्णाटभाषायां कविसमयसिद्धो द्वितीयाक्षरप्रासोऽपि कविनाऽत्र बहुलमुपायुज्यत। वृत्त्यनुप्रासभेद एवायम्। तद् यथा–

प**दा**रविन्दप्रणतो हरीन्द्रस्त**दा** महाभक्तिभराभिनुन्नः [१.१२], अ**त्र** जन्मनि न यत् पठितं ते **जै**त्र भाति कथमित्यमुनोक्ते । पू**र्व**जन्मसु हि वेद पुरेदं स**र्व**मित्यमितबुद्धिरुवाच [४.५३], त**र्क**तन्त्रकुशलानपि पुंसश्च**र्क**रीति बत सोऽयममानान् [६.१२], **भत्स**यन्निति जहास सुहासो **मत्स**राकुलधियो जडयन् सः [६.१५], **मन्द**हासमृदुसुन्दराननं **नन्द**नन्दनमतीन्द्रियाकृतिम्। सु**न्द**रं स इह सन्न्यधापयद् **वन्द्य**माकृतिशुचिप्रतिष्ठया [९.४३] इत्यादि।

भागवते गोपीगीतादिषु भगवत्तमेन बादरायणेन, स्तोत्रकाव्येषु भगवत्पादेन च दर्शितोऽयं पन्थाः।

क्वचित् तृतीयाक्षरप्रासोऽपि। तद् यथा–

मा तात तात सुमुखेति पुनः प्ररोदी**र्माता त**नोति रुचितं त्वरितं तवेति[२.३६], ह**रिता**मधीश...। स्फु**रिता**मिह प्रियतमाम्...[८.३०], गी**र्वाणै**र्विजयमहोत्सवस्य पूजां कु**र्वाणै**रविरळसंविदस्तदानीम्। वि**स्मेरै**र्मुनिनिकरोपदेवयुक्तैः सु**स्मेरै**रथ तमवेक्षितुं प्रजग्मे [१६.५२], प**र्यै**क्षि प्रभुरितरैः शिवाग्निपूर्वैर्नो**पे**क्षि प्रबलतरैस्तथा प्रयत्नैः। ना**वै**क्षि क्वचिदपि शक्त्यपूर्तिरस्मिन्नुत्प्रे**क्षि** स्वयमपि भीम इत्यवश्यम् [१६.३३] इत्यादि।

इयान् पुनरत्र विशेषः। प्रथमे त्रयाणामप्यक्षराणामनुवृत्तिः। द्वितीये तृतीये चोदाहरणे द्वितीयतृतीयाक्षरयोरेव। चतुर्थे तृतीयाक्षरस्यैवेति।

यमकमित्यनुप्रासभेद एव। असकृदेकानुपूर्वीकवर्णसमूहघटितं यमकमित्याचक्षते। अर्थभेदे सतीत्युपस्कर्तव्यम्। तेन– 'नमोनमो नाथ नमोनमस्ते नमोनमो राम नमोनमस्ते' [१.२५] इत्यादिषु न यमकम्। अर्थैक्यादेव नेदमपि–

'कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः ससोदरोऽराजत वीरराजः'[१.४३] इति । स्यादेवायमन्त्यानुप्रासः । न यमकभेदः । तथाच चमत्कारजननी भिन्नार्थाऽसकृदेकानुपूर्वीकवर्णसमूहघटना यमकम् ।

ननु तर्हि छेकानुप्रासे गतम् । न दोषः । क्वचिद् यमकं छेकानुप्रासोऽपि भवति; छेकानुप्रासो वा यमकमित्यभ्युपगमात् । तद् यथा– 'सकलया कलया सह विद्यया' [३.४२] इति तु यमकं च छेकानुप्रासश्च ।

अथवा यमकानुप्रासयोरसङ्कीर्णतायै पादेषु, पादयोः, एकस्मिन् वा पादे नियततया प्रतिपद्यम्, असकृदावृत्तस्यानेकार्थस्यैकानुपूर्वीकस्य वर्णसमूहस्य घटना यमकमिति परिष्करणीयम् । अस्मिन् पक्षे–'सकलया कलया–' इत्यादि छेकानुप्रास एव । यद्वा व्यञ्जनसाम्ये किञ्चित्स्वरभेदेऽपि छेकानुप्रासो भवति । यमके तु स्वराणां व्यञ्जनानां चैकरूप्यनियतिरिति । तदिदं यमकं पादादिगं पादमध्यगं पादान्त्यगं त्रिपादगं द्विपादगमन्त्यपादगमित्यादिभेदेन बहुविधम् । यथाऽत्र पादद्वययमके द्वितीयतृतीयपादयोः–

बहुसत्त्वगणं सविकं समहा-
विषमोक्षमहाहिमवन्तमयम् ।
विषमोक्षमहाहिमवन्तमयन्
नगमैक्षत फुल्लदृगस्तभयः [६.५५] इति ।

यथा वा प्रथमचतुर्थयोः–

यमशेषभवप्रभवः स्मरता-
मसुखाब्धिरपैति न चित्रमिदम् ।
मरुतीदृशि भान्ति हि यत्स्तवने
यमशेषभवप्रभवः स्म रताः [१०.७] इति ।

यथा वा प्रथमतृतीययोः–

वैकुण्ठे ते श्रीविशेषा जनाना-
मत्याश्चर्यं चित्तवाचामभूमिः ।

वैकुण्ठेते श्रीविशेषाजनाना-

मुक्तश्लाघ्ये युक्तमेतादृशत्वम् [११.७५] इति।

यथा वा द्वितीयचतुर्थयोः–

सन्मात्सर्यं बद्धमूचेऽशुभानां

वाचाऽलोलं कोपि गां धारकस्य।

मध्ये तेषां नीचनीत्या समानो

वाचालोऽलं कोऽपि गान्धारकस्य [१२.३] इति।

सर्वपादावृत्तियमकं पादमध्यगतं यथा–

जननं **समयेसमये** जगतः

प्रथिते **समये समये**दमिते।

सनिरा**समयेऽसमये** स्थितियुक्

स्ववभा**समयेऽसमये**ष्टधिया [१०.४५] इति।

इति यमकमीमांसा।

चित्रमित्यपरः शब्दालङ्कारः। एकाक्षरादिबद्धत्वं चक्राद्याकारहेतुभूतवर्णत्वं वा चित्रत्वमित्याहुः। अत्र तु त्रीणि चित्राणि। एकाक्षरम्, सर्वतोभद्रम्, चक्रबन्धश्चेति। एकाक्षरं स्फुटम्–

नानेनेनानेनानेनोनूनेन ननु नुन्नाः।

नानाना नो नूनं नानेनानूननाऽनुन्नः [१०.६] इति।

प्रतिपादमनुलोमविलोमपठनेन सर्वतोभद्रबन्धो भवति। अनुष्टुप्पादस्य पूर्वाणि चतुरक्षराण्येव प्रातिलोम्येन पठितानि पाश्चात्यानि चतुरक्षराणि भवन्तीति। तद् यथा–

समानया-यानमास माययात-तयायमा।

नयासना-नास या न यातनाल-लना तया॥ [१०.४८]

चक्रबन्धः शार्दूलविक्रीडिते यथा–

धन्योऽ**म**ह्यत **ना**किनामहितहृद्बा**ण**स्समोऽ**ज**स्य यो
मध्वो **ध्व**स्तदु**रा**गमोऽग्र्यहिमगुश्रीः **का**ममा**या**मिहृत् ।
विष्णुं **वि**श्वज**य**प्रदं स हि नमन् से**व्यं** सुसौ**ख्यं** मुदा
दाक्ष्याच्छ्रीधरमामयादिविरही योगी सुहृत् सर्वदा ॥[१०.५४] इति ।

उषाहरणेऽप्ययमीदृश एव बन्धो निबद्धः । तद् यथा–

'वक्त्र**त्रि**द्वय**उ**द्यदौष्ण्यसलिलैस्तै**र**ग्निजे**म**न्धरे
'सत्रा**विष्टरुषा**गणैश्चसभयैर्बा**णा**पदः **का**रणे ।
'सच्च**क्र**न्दर**हृ**स्तमेत्यसदधत्स**ख्यं** स्वर**व्यं**जितं
'तंशूलीवपुषासदोल्लसदसिं रेजेरणेशिक्षितम्' [८.७५] इति ।

अमयत्र बन्धोद्धारक्रमः–

'लिखित्वा मण्डालाकारा दश रेखास्तदन्तरे ।
'रेखायुग्मेन विलिखेत् तिस्रो वीथीरमूषु च ॥

'प्रथमायां पादमाद्यं द्वितीयस्यां द्वितीयकम् ।
'तृतीयस्यां तृतीयं च प्रादक्षिण्यक्रमाल्लिखेत् ॥

'एकमेव लिखेन्नाभौ त्रिपादीदशमाक्षरम् ।
'चक्रस्य मण्डले बाह्ये तृतीयस्यान्त्यमक्षरम् ॥

'चतुर्थस्याऽदिमं कृत्वा वीथीनामन्तराळगैः ।
'आन्द्यन्तगैश्च पादानां तुर्यः पादोऽक्षरैर्भवेत् ॥

'कविकाव्यादिनामानि वलयेषु यथारुचि ।
'विन्यसेच्चक्रबन्धोऽयं चित्रवेदिभिरीरितः' इति ।

उषाहरणे तृतीयवलये कविनाम निबद्धम्– 'त्रिविक्रमकाव्यम्' इति; षष्ठवलये

काव्यनाम–'उषाहरणाख्यम्' इति । अत्र तु तृतीयवलये काव्यनाम– 'मध्वविजयाख्यम्' इति; षष्ठवलये कविनाम– 'नारायणकाव्यम्' इति।

अस्य बन्धद्वयस्य रेखाविन्यासादिकं बन्धमीमांसायां द्रष्टव्यम् ।

इति चित्रकाव्यमीमांसा

* * *

अथातोऽर्थालङ्कारमीमांसा।

सादृश्यगर्भाः सर्वेऽप्यलङ्कारा उपमामूला इत्यर्थालङ्कारेषूपमा प्राथम्यमर्हति । यच्चमत्कारातिशयाधानाय प्रकृतमप्रकृतेनोपमीयते सोपमा नामालङ्कारः ।

पर्वतो वह्निमान् धूमान्महानसवदित्यप्युपमा भवति। किन्तु नालङ्कारो भवति। यद्यपि प्रकृतः पर्वतोऽप्रकृतेन महानसेनोपमीयते । अथापि न चमत्काराय । किन्त्वर्थावगमाय। तद् यथा–

हारावळीमिव हृदा विबुधेन्द्रयाच्ञां
बिभ्रन्निजाननुजिघृक्षुरवातितीर्षत् [२.४.] इति।

अत्रोपमानोपमेययोः, हृदि धारणरूपस्य साधर्म्यस्य, उपमावाचकस्य चेवशब्दस्य चोपादानात् पूर्णोपमा । उपमाद्योतकानि प्रतिमादिपदानि विहाय वाचकस्येवशब्दस्यैव प्रयोगात् श्रौती चेयमुपमा। 'इवेन समासः–' इत्यभ्युपगमे समासगोपमा। समासस्य वैकल्पिकत्वात् 'हारावळीम्, इव' इति द्वे पदे इति पक्षे वाक्यगैवेयमुपमा । 'पद्माकरं वा कलुषीचिकीर्षुः'[१.४९] इति स्फुटं वाक्यगा। यथा वा–

कन्यां सुवर्णलसितामिव वेदविद्यां
जग्राह विप्रवृषभप्रतिपादितां सः[२.१२] इति।

यथा वा–

रेमेऽच्छयोपनिषदेव महाविवेको
भक्त्येव शुद्धकरणः परमश्रिताऽलम्।
मिथ्याभिमानरहितः परयेव मुक्त्या
स्वानन्दसन्तन्तिकृता स तया द्विजेन्द्रः [२.१३] इति च।

मालोपमा चेयम्।

यथा वा– 'नवद्युनाथप्रतिमप्रभाय' [१.१]इति। अत्रोपमाद्योतकस्य प्रतिम-पदस्योपादानादियमार्थी समासगा पूर्णोपमा। 'कनकातुलतालसन्निभः' [७.६] इत्यार्थी अपूर्णा समासगा। 'द्विजमण्डलस्थशशिमण्डलवत्' [११.१५] इत्यत्र तेन तुल्यमित्यर्थे वतिरिति तद्धितगेयमुपमाऽऽर्थी।

'पद्मोदरसुन्दराभ्याम्' [१.१२] इत्यादि लुप्तोपमा। 'निजनन्दनमिन्दु-वक्त्रम्' [२.२८] इत्यादि च। प्रथम उपमावाचकपदलोपात्। द्वितीये तूपमावाचकस्य साधर्म्यवाचकस्य च लोपात्। 'सुस्मितेन्दुमरविन्दलोचनम्' [५.५१] इत्यत्र चन्द्रिकाधवळस्मितोपेतमुखानुयोगिकसादृश्यप्रतियोगी चन्द्र इति बोधादुपमेयोपमासाधर्म्याणां लोपः।

'पतङ्गायितः....सिंहप्रबर्हायितः......अब्जायितः' [५.५२] इत्यादौ पतङ्ग इवाचरति पतङ्गायत इति क्यङा सादृश्यबोध इतीयमार्थी भवत्युपमा। 'नवमम्बुधरं विबम्डयत्' [७.४५] इत्यादिरप्यार्थी। विडम्बनमनुकार इति तद्वारा सादृश्यबोध इति।

यमजाम्युदवास ऊर्जितो यदि जाम्बूनदवारि संव्रजेत्।
कनकद्युतिमध्वसङ्गवानुपमीयेत स तेन नीलभाः [७.५३]

इति चाभूतोपमा। असम्बन्धेऽपि सम्बन्धकल्पनं नामातिशयोक्तिरेवेयम्।

'भूसुरप्रवरबुद्धिसमृद्धिव्यक्तयुक्तवपुषम्–' [६.२४] इत्यारभ्य, 'पुष्टबुद्धिर-करोत् करुणाब्धिर्दुष्टपक्षदमनस्थिरसन्धाम्' [६.३१] इतिपर्यन्ता श्लोकाष्टक-

व्यापिनी महोपमा। 'मानिनोऽपि हि वशीचकार यः–'[९.४४] इत्यारभ्य, 'धर्मसूनुमिव धार्मिकं पुरा भीममूर्तिरयमेव भूसुरम्' [९.४७] इत्यन्ता च। 'अशुभानपहाय–'[१३.४] इत्यारभ्य, 'सुरसिन्धोरिव सन्ततप्रवाहः' [१३.८] इत्यन्ता च। महता श्लोकनिचयेन बहुभिः साधर्म्यैर्घटितेतीयं महोपमा। यत्र च साधर्म्यं श्लेषगर्भं सा श्लिष्टोपमा।

सादृश्यवाचकानि सूचकानि च बाहुल्येन दण्डिना सङ्गृहीतानि यथा–

'इव-वद्-वा-यथाशब्दाः समान-निभ-सन्निभाः।
'तुल्य-सङ्काश-नीकाश-प्रकाश-प्रतिरूपकाः॥

'प्रतिपक्ष-प्रतिद्वन्द्वि-प्रत्यनीक-विरोधिनः।
'सदृक्-सदृश-संवादि-सजातीयानुवादिनः॥

'प्रतिबिम्ब-प्रतिच्छन्द-सरूप-सम-सम्मिताः।
'सलक्षण-सदृक्षाभ-सपक्षोपमितोपमाः॥

कल्प-देशीय-देश्यादि-प्रख्य-प्रतिनिधी अपि।
'सवर्ण-तुलितौ शब्दौ ये च न्यूनार्थवादिनः॥

'समासश्च बहुव्रीहिः शशाङ्कवदनादिषु।
'स्पर्धते जयति द्वेष्टि द्रुह्यति प्रतिगर्जति॥

'आक्रोशत्यवजानाति कदर्थयति निन्दति।
'विडम्बयति सन्धत्ते हसतीर्ष्यत्यसूयति॥

'तस्य मुष्णाति सौभाग्यं तस्य कान्तिं विलुम्पति।
'तेन सार्धं विगृह्णाति तुलां तेनाधिरोहति॥

'तत्पदव्यां पदं धत्ते तस्य कक्षां विगाहते।
'तमन्वेत्यनुबध्नाति तच्छीलं तं निषेधति।
'तस्य चानुकरोतीति शब्दाः सादृश्यसूचकाः' इति।

तद् यथाऽस्मिन्नेव महाकाव्ये–

नवद्युनाथ**प्रतिम**प्रभाय[१.१], अमृत**कल्प**वाचा [१.१३], इन्दीवर-श्री**जयि**सुन्दराभम् [१.३५], हेमाद्रिराजविभुराजदिळावृ**ताभः** [२.१०], सुहयमेधगणा**तिशयालवः**[३.६], **जित**कुमारगुणम् [३.३६], ननु मनोजव**जित्** पवनोऽसकौ [३.४४], विष्टपभूष**णायितम्** [४.३४], केरळभूष**णायिताम्** [५.३५], देवतागुरुमसा**वतिशेते** [६.३], कनका-तुलताल**सन्निभः** [७.६], **सुविडम्बित**कम्बुः [७.३७], **अधरीकुरुते** स्वशोभया [७.३८], –नवमुक्तावलिमस्य **लज्जयेत्** [७.३९], स्फुटशोणोप-लपङ्क्ति**सन्निभः**[७.४४], नवमम्बुधरं **विडम्बयत्** [७.४५], नयनद्वयेन नळिनप्रभा**मुषा**[८.९], –हरिवेश्मकृ**त्समः** [९.१३], तस्य हन्त पुरुषस्य **तुल्यताम्** [९.२४], यस्तमुत्तमगुणं **विडम्बयेत्** [९.२६], जग**त्प्रदीपा-यित**गोगणाढ्ये [१०.२९], **समो**ऽजस्य यः[१०.५४], उपलभ्यते य**दुप-मानपदं** प्रतिबिम्बमेव मणिवप्रगतम् [११.८], **अनुयाति** मूर्तिमसुरासुहृतः [११.९], द्विजमण्डलस्थशशिमण्डल**वत्** [११.१५], शिखिनो**ऽनुयान्ति** हि सहस्रदृशम् [११.४१], परिपूर्णचन्द्र**परिहासि**मुखम् [११.६४], वरहस्तिहस्त**सदृशो**रुयुगम् [११.६८], मध्ये तेषां नीचनीत्या **समानो** वाचालोऽलं कोऽपि गान्धारकस्य[१२.३], नख**निर्जित**पद्मरागरागम्..... द्विरदोदारक**रोपमो**रुयुगमम् [१३.२९], सुन्दरास्येन्दु**कल्पः** [१४.५१], ब्रह्म ब्रह्म**समो** ददौ [१५.९७], अशनादीन्**धनायितम्** [१५.१०५], पूर्णेन्दु**प्रभ**वदनः[१६.१७] इत्यादि।

अथात्र कतिचन मुख्यान्युदाहरणानि–

> सान्नाय्यमव्यक्तहृदाखुभुग् वा श्वा वा पुरोडाशमसारकामः।
> मणिस्रजं वा प्लवगोऽव्यवस्थो जग्राह वेदादिकमेष पापः[१.४८]।

मालोपमेयम् ।

अच्छाम्बरेव रजनी परिपूरिताशा
भाविन्यपास्ततमसं विधुमाद्यपक्षात् [२.२३]।

बालो दिवाकर इवोदयपर्वतस्य [२.४६]।

चिन्तामणीन्द्रमिव चिन्तितदं दरिद्रो
विज्ञानमार्गमिव विष्णुपरं मुमुक्षुः [२.४९], इयं च मालापमैव।

गरुडतुण्डमिव प्रतिपन्नवान्[३.४०]।

निशाचरारेरिव लक्ष्मणः पुरा वृकोदरस्येव सुरेन्द्रनन्दनः।
गदोऽथ शौरेरिव कर्मकृत्प्रियः सुभक्तिमान् विश्वविदोऽनुजोऽभवत्।
[४.२६] इति च मालोपमा।

वानरेन्द्र इव वायुजवोऽसौ भीमसेन इव दानवभीमः [६.५४] इति च।
अपरस्परमत्सरप्रजं ननु वैकुण्ठमिवाच्युतालयम् [७.४]।
भगवन्तमनन्तमन्तिके स्थितमीशस्य निषेवणाय वा [७.११],
मुनिनन्दनमिन्दिरापतेरधिकेष्टं पततामिवाधिपम् [७.१२],
श्रितसाधुपुराणभारतं निगमं मूर्तमिवोरुशाखिनम् [७.१३]इति च मालोपमा।

आम्नायास्त्रय इव तत्वबोधकास्ते
पापघ्नास्त्रय इव पावकाः प्रजानाम्।
लोका वा सकलभृतस्त्रयोऽत्र रेजुः
सानन्दा मुनिसुतधर्मसूनुमध्वाः [८.५४] इति च।

वानरेन्द्र इव तीर्णवारिधिर्वासुदेव इव रत्नराजवान्।
भीमसेन इव सूनवर्यहृन्निर्वृतिं स्वजनमानिनाय सः [९.६] इति च।

निष्कळङ्कमिव चन्द्रमण्डलं पुण्डरीकमिव फुल्लतां गतम्।
वारि शारदमिव प्रसादवच्चित्तमच्युतमतेर्भृशं बभौ [९.३६] इति च।

धनमिव सधनायेभ्योऽर्कसूनुः प्रसन्नः
शरशतमिव पार्थः संयुगार्थिभ्य उग्रः [१४.२५], इति च।

पश्चास्यः श्वभिरिव ह्री विहीनसारै-
रम्भोधिर्नगसरितां जलैरिवाल्पैः।
खद्योतैरिव तरणिर्विडम्बयन् नॄन्
प्रत्यर्थिस्वसमनरैर्व्यवाहरत् सः [१६.३५] इति च।

वर्धितोर्मिर्हरिप्रेष्ठा सुपयोधरसुस्वना।
सवितानप्रकाशार्था सागरी श्रीरिवापरा [१९.६],
इत्यनेकश्लेषपदा मालोपमैव।

प्रायः श्लेषसङ्कीर्णैवोपमाऽत्र प्रचुरमुपलभ्यते।

***

साधर्म्यादभेदारोपो रूपकमुच्यते। उपमाया एव रूपान्तरम्।

बहुलं चात्र श्लेषगर्भं रूपकं भवति–

गोभिः समानन्दितरूपसीतः स्ववह्निनिर्दग्धपलाशिराशिः।
अहो हनूमन्नववारिदोऽसौ तीर्णाम्बुधिर्विष्णुपदे ननाम [१.१९],

जाज्वल्यमानस्य वनेवनेऽलं दिधक्षतः पार्थिवसार्थमुग्रम्।
सत्त्वानि पुंसां भयदानि नाशं वृकोदराग्नेर्गुरुतेजसाऽऽपुः [१.३८],

भोगाधिकाभोगवतोऽरुणाक्षा-
नितस्ततः संवलतो धरेन्द्रे।
बहून् द्विजिह्वान् मणिमत्पुरोगा-
नसौ कद्रून् क्रोधवशान् जघान [१.३९],

रसोज्झिताश्चञ्चलवृत्तयोऽलं शोभां न भेजुः सुरवैरिमेघाः [१.४५],

जनसदागतिसूचितवर्त्मना प्रतिपदं व्रजता परया तृषा ।
द्विजमहामधुपेन मनोहरं स्मितमलाभि सुताननवारिजम् [३.९]

उदयतीति हि बालदिवाकरे स्मितमभूत् सुजनाननवारिजम् [३.१६],

स्वशिष्यहस्तेन मठान्तरेषुधेः सुपक्षदक्षं सुखतीर्थमार्गणम् [५.९],

सपदि समस्कुरुत भृशं माधवगुणसाधकोऽथ मध्वरविः ।
भृगुकुलतिलकस्थानं तापकरः पापपान्थानाम् [१०.१],

सकलाङ्गयुतावभातशाखः समये प्राप्त उदारपक्षिसेव्यः ।
स ससर्ज सदध्वगोपकृत्यै लिकुचः काव्यफलं रसाभिरामम् [१३.४८],

मधुरपतगरावाः शान्तनैशाम्बुबाष्पाः
सपदि विपुलरागाः स्वाभिसारात् प्रसन्नाः ।
अरुणतरणिरत्यच्छाम्बरा दिक्पुरन्ध्रीः
स्मितसरसिजवक्त्राः स्वैः करैरालिलिङ्गे [१४.१६], इत्यादि ।

अश्लिष्टं रूपकं यथा–

नाथस्य भूरिकरुणासुधयाऽभिषिक्तौ [२.२२],

इत एव पुराणगौरगौ समहाभारतपारिजातके [७.२०],

भेजे क्षोभो मायिगोमायुयूथैः[१२.१],

अदभ्रधिषणाभिधो नरहरिर्हि जाज्वल्यते[१२.५१],

तव वेदनदीर्विगाह्य भूयः समयाम्भोधिषु कुर्वतो विहारम् [१३.६३],

सूत्रस्यन्दनवृन्दाढ्या दुर्वारश्रुतिवारणा [१५.५],

दुर्वादिगर्वाद्रिपविं मायिध्वान्तरविद्युतिम् [१५.८८],

विषयेभ्यो हृषीकाश्वान् मनोयन्त्रा समाहरत् [१५.१०९] इत्यादि ।

* * *

सदृशस्मरणं स्मृतिर्नामालङ्कारः। तद् यथा–

स्वहेळया पातितपार्थिवव्रजां
धीशुद्धिदां केरळभूषणायिताम् ।
पयस्विनीं प्रेक्ष्य पथि द्विजार्चितां
स भाविनीमस्मरदत्र चण्डिकाम् [५.३५]।

श्लेषगर्भोऽयं स्मृत्यलङ्कारः। सादृश्यं हि द्वेधा भवति। अर्थमूलं शब्दमूलं च। शब्दमूलं हि श्लेषगर्भं भवति। शब्दसाम्यात् साम्यमिति। यथा वा–

पादोपान्तनमन्महामुनिगणं हेमप्रदीप्ताम्बरं
श्रीमद्रत्नकलापमग्र्यकटकैर्विभ्राजितं हाटकैः ।
दृष्ट्वा तं धरणीधरं सुवनमालोल्लासिनं सुन्दरं
स्वानन्दाकृतिमस्मरन्मुररिपुं स्वानन्दतीर्थस्तदा [६.५७]।

अत्र न केवलं विशेषणपदानामेव श्लेषः। धवणीधरं पर्वतं दृष्ट्वा धरणीधरं नारायणमस्मरदिति विशेष्यमपि श्लिष्टमित्ययं विशेषः। स्पष्टत्वाय मुररिपुमिति नामान्तरग्रहणम् ।

***

सादृश्यादेवैकस्य बहुधोल्लेखनमुल्लेखो नामालङ्कारः। तद् यथा–

कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः कृष्णामुखाम्भोरुहहंसराजः ।
प्रजासरोजावलिरश्मिराजः ससोदरोऽराजत वीरराजः [१.४३]।

***

उपमानस्योपमेयात्मना क्रियान्वयिता परिणामो नामालङ्कारः। उपमानमेवोपमेयात्मना विपरिणमत इति। यथा–

रामस्य वाण्या मणिमञ्जुमाला-
व्याजेन दीर्घां करुणां बबन्ध [१.२२] इति ।

यथा वा–

सुन्दरनन्दनस्मितमुखेन्दुदृशां दयितौ नृणाम् [३.१] इति,

स्मितमभूत् सुजनाननवारिजम् [३.१६] इति,

सुताननेन्दोरनिशं ततोऽस्मरत् [४.१८] इति,

सुतरत्नं तदसूत सूरिपत्नी [१३.४५] इति,

मध्वेन्दोर्नित्यसम्बन्धान्निस्तमस्तापचेतसोः [१५.९१] इत्यादि ।

* * *

यत्रोपमेयापह्नवेनोपमानं निरूप्यते साऽपह्नुतिः । वेषान्तरमुपमायाः । यथा परिणामोदाहृते पूर्वपद्य एव–

मणिमञ्जुमालाव्याजेन दीर्घां करुणां बबन्ध [१.२२]।

अत्र हि मणिमञ्जुमालात्वमपह्नुत्य करुणात्वं निरूप्यते। तेन परिणामापह्नुत्योः संसृष्टिः । यथा वा–

बीजच्छलेन पुरुषार्थमहो विशिष्टम् [२.५२] इति ।

यथा वा–

अरुणतरणिबिम्बच्छद्मना पद्मरागः

कपिशकरकलापोल्लास्यभूत् प्रेक्षणीयः [१४.४७] इति ।

अत्रोपमेयस्य न मुखतो निषेधः श्रूयते। किन्तु व्याजच्छद्मादिपदैर्व्यज्यते। तेनेयं कैतवापह्नुतिरिति वदन्त्यलङ्कारविदः । यत्र तु मुखतो निषिध्यते– 'नेदं कान्तामुखम्, किन्तु शशिमण्डलम्' इत्यादौ, तत्र केवलापह्नुतिः।

* * *

वस्तुस्थितेरुद्धृत्य, किमप्यन्यदूहित्वा प्रेक्षणमुत्प्रेक्षा । अन्यथा स्थितस्यान्यथोत्प्रेक्षणम्, सम्भावनेत्येतत् । इवादिशब्दयोगेनाभिव्यज्यते च सा। यथाऽऽह दण्डी–

'मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः ।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः' इति ।

यथा–

सन्तुष्यतां सकलसन्निकरैरसद्भिः
खिद्येत वायुरयमाविरभूत् पृथिव्याम् ।
आख्यानितीव सुरदुन्दुभिमन्द्रनादः
प्राश्रावि कौतुकवशैरिह मानुषैश्च[२.२६] इति ।

यथा वा–

निजमानसरागपीडनादरुणीभूतमिवारुणं स्वयम् [७.२६] इति,

सततं गळता स्वतः श्रुतित्रितयेनेव निकाममङ्कितः ।
सुविडम्बितकम्बुरीक्ष्यते वररेखात्रयवान् गुरोर्गळः [७.३७] इति,

उपकर्णममुष्य भासिता तुळसी मन्त्रयतीव लाळिता ।
मम नाथ पदं न मत्सराज्जलजाद्यानि हरेयुरित्यलम् [७.४२] इति,

विविधस्तुलोपगतचित्रपटीसुवितानलम्बिमणिदामगणः ।
शरणान्तरेष्वधिकपूरणतः प्रचकास्ति विभ्रम इवावगळन् [११.१२] इति,

हरिणीदृशां निवसनानि बृहत्सुनितम्बबिम्बरुचिरोरुरुचा ।
शबळद्युतीनि मदनस्य जगज्जयवैजयन्त्य इति निश्चिनुमः [११.३१] इति,

प्रगतासु तासु रणितै रशनामणिनूपुरैरिव पुरा गदिताः ।
अनुवीक्षितुं तनुविलासमिमं तरुणा भवन्त्यथ निवृत्तमुखाः [११.३५] इति,

फलिनीकुलं कुसुमयञ्छिशिरो हसतीव फुल्लनवकुन्दरुचा [११.४३]इति,

अधिकं धरणीमलश्चिकीर्षुं स्फुटमुद्यन्तमिव द्युनाथमन्यम् [१३.२७]इति,

विमलमलयजाम्भोबिन्दुभिश्चर्चितार्चो
नवलळिततुळस्या पुष्पराज्याऽऽर्चिचत् सः ।

स्थलजजलजवल्लीवृक्षवीरुत्समस्त-
प्रसवविजयलक्ष्म्या मूर्तयेवेन्दिरेशम् [१४.३५] इति,

भास्करा इव गां गताः [१५.१३०] इति,

मामैनं भुवनगुरुं विनिन्दतेत्थं
निर्भत्स्याभ्यपतदिवोत्तरङ्गहस्तः [१६.१३] इति,

वीच्यङ्गैरधिकतरैरिहाधिवेलं
मध्वाय प्रणतिमिव व्यधात् समुद्रः [१६.१४] इत्यादि।

* * *

वर्ण्ये लोकविलक्षणं कमप्यतिशयमवगमयितुं वास्तवमतिशय्य या वर्णना सेयमतिशयोक्तिः। तद् यथा–

रामार्चने यो नयतः प्रसूनं द्वाभ्यां कराभ्यामभवत् प्रयत्नः।
एकेन दोष्णा नयतो गिरीन्द्रं सञ्जीवनाद्याश्रयमस्य नाभूत् [१.१९] इति।

हनूमतः शक्त्यतिशयं रामार्चने भक्त्यतिशयं च द्योतयितुं प्रसूनादपि लघुत्वं गिरीन्द्र आरोप्यते; गिरीन्द्रादपि दुष्करनेयता प्रसूने।

गिरीन्द्रनयनादपि दुष्करताया असम्बन्धेऽपि सम्बन्धकल्पनादियं सम्बन्धातिशयोक्तिरित्यपि वदन्ति।

* * *

यत्र सन्दिह्यते वर्ण्यमिदमदो वेति स सन्देहालङ्कारः। यथा–

'वेदव्यासो न्वेष वेदो नु मूर्तः' [१२.१२] इति।

धर्मिसन्देहोऽयम्। क्वचिद् धर्मसन्देहोऽपि स्यात्। तद् यथा–

'भीमश्चेदिह यतते नयेन्न वेति' [१६.८] इति।

* * *

एकत्र प्रयुक्तं क्रियापदादिकं सर्ववाक्येष्वनुवर्तमानं दीपकमुच्यते। यथा–

पौत्रे पवित्राह्वयजामिपौत्रे
धरां निधायासुरधीषु तापम्।
कीर्तिं त्रिलोक्यां हृदयं मुकुन्दे
भेजे पदं स्वं सहजैः स भीमः [१.४४] इति,

यत्र क्रियापदादीनामावृत्तिस्तदपि दीपकान्तरम्। यथा–

नेदृशं स्थलमलं शमलघ्नं नास्य तीर्थसलिलस्य समं वाः।
नास्मदुक्तिसदृशं हितरूपं नास्ति विष्णुसदृशं ननु दैवम् [६.४७] इति।

* * *

प्रतीते साधर्म्ये चमत्कारातिशयाय वैधर्म्योद्भावनं व्यतिरेको नामालङ्कारः। यथा–

गोभिस्तमांस्यपनयन् गतिदं प्रजाना-
मर्थान्तरं स भगवान् प्रकटीचकार।
आनन्दचिद्गुणगणं परिपूर्णसंवित्
चन्द्रस्तु शब्दगुणमित्ययमेव भेदः [१४.५५] इति।

यथा वा–

गोलीलास्वतिशयिनावगाधभावा-
न्नोल्लङ्घ्यौ विविधगुणप्रकाशरत्नौ।
मध्वाब्धी परममतेः प्रियं जनानां
लावण्यं न तु जलधेरयं विशेषः [१६.१९] इति।

अथायमपि भङ्ग्यन्तरेण व्यतिरेको भवति–

अतिशान्तवपुर्निशाकरः स्वयमेकान्तखरो दिवाकरः।
इति नास्य गुणार्णवाकृतेरुपमानं भुवनेषु लभ्यते [७.७] इति।

* * *

गुणानां कर्मणां वा चमत्कारि सहभावकथनं सहोक्तिः। यथा–

सज्जनान् सह महादरेण नूनं पापिनां प्रकृतितोऽप्रियाकृति।
दारुणाघगणदारणं स्म स ग्राहयत्यपि सुदर्शनद्वयम् [९.३९] इति।

उदतारयत् परिजनं मृतिभीसरितश्च देवसरितश्च समम् [१०.१२] इति,

व्याख्यां भाष्यस्य भूयोधीः श्रवणं सूरिनन्दनः।
सन्तः प्रीतिमसन्तोऽन्यां सममारेभिरे ततः [१५.७१] इति।

सहार्थकपदाभावोऽपि क्वचिद् भवति। यथा–

आरुरोह दुरारोहं स परैः प्रीतिकृद्वरैः।
महान्तं महिमानं च महीध्रं च गुहप्रियम् [१५.११९] इति।

अथवाऽयं समुच्चयः। स च वक्ष्यते।

* * *

येन विना न वर्ण्यस्य सामग्र्यं तदुक्तिर्विनोक्तिः। यथा–

विना कैवल्यसाम्राज्यं नार्घो योगमणेरभूत् [१५.११२] इति।

* * *

प्रस्तुतेनाप्रस्तुतस्फुरणम्, अप्रस्तुतेन वा प्रस्तुतस्य समासोक्तिः। यथा–

भोगाधिकाभोगवतोऽरुणाक्षा-
नितस्ततः संवलतो धरेन्द्रे।
बहून् द्विजिह्वान् मणिमत्पुरोगा-
नसौ कद्रून् क्रोधवशान् जघान॥ [१.३९]

इतश्चत्वार्यपि पद्यानि [३९.४२] प्रस्तुतेन भीमचरितेनाप्रस्तुतं सर्पवेणुहत्यादिकं श्लेषभङ्ग्या स्फोरयन्तीति श्लिष्टा समासोक्तिरियम्। यथा वा–

विहसितबिसभङ्गश्रीप्रकर्षं सितिम्ना
जलजममृतपूरैः पूरयामास रम्यम्।

समयगुणविशेषालोचकैर्लाळनीयः
ससुरभिसुमनोभिः स स्फुटं गौरपक्षः [१४.३४] इति ।

अत्र हि गौरपक्षो मध्वः प्रस्तुतः, अप्रस्तुतं शुक्लपक्षं श्लेषभङ्ग्या स्मारयति ।

* * *

यत्र चैकयोक्त्या नैकोऽर्थ उपक्षिप्यते स श्लेषो नामालङ्कारः ।

ननु सकृदुच्चरितः शब्दः सकृदेवार्थं गमयति? प्रायोवचनमेतत् । अन्यथा 'त्रयोऽर्थाः सर्ववेदेषु दशार्थाः सर्वभारते' इत्यादेः का गतिः? सापवादा ह्युत्सर्गा भवन्ति । अपि चैवंवादिने भवते श्लेषप्रिया कवयः कुप्यन्ति । न केवलं कवयः, लोकोऽपि कुप्यति । अन्यथा व्युत्पत्तिपरीक्षार्थं 'द्विविधं सैन्धवमानय' इत्युक्तः पित्रा पुत्रः कथमानयेल्लवणं चाश्वं च?

न भोः । सकृदेवार्थं गमयतीत्यस्यायमाशयो यद् विवक्षितमेवार्थं केवलं गमयति, न कोशपठितान् सर्वानप्यर्थानिति । तर्ह्यागतोऽसि पन्थानम् । वक्तृतात्पर्यं हि तर्हि गमकम् । यदि सकृदप्युच्चरितेनानेकानर्थानभिप्रैति तर्ह्यसकृदप्यर्थान् गमयतीति न काऽपि क्षतिः ।

प्रायः श्लेषप्रचुरमिदं काव्यम् । अलङ्कारान्तराण्यपि श्लेषगर्भाणि भवन्ति । तद्यथा श्लिष्टोपमा, श्लिष्टरूपकमित्यादि ।

अथापि किञ्चिदुदाहरणम्–

अनाकुलं गोकुलमुल्ललास यत्पालितं नित्यमनाविलात्म ।
तस्मै नमो नीरदनीलभासे कृष्णाय कृष्णारमणप्रियाय [१.२] इति ।

अत्र व्यासवासुदेवावेकयोक्त्या हि स्तूयेते । यथा वा–

वर्धितोर्मिर्हरिप्रेष्ठा सुपयोधरसुस्वना ।
सवितानप्रकाशार्था सागरी श्रीरिवापरा [१५.६] इति ।

अत्रैकयोक्त्या लक्ष्मीसमुद्रशोभाद्यास्त्रिचतुरा अर्थाः प्रस्तूयन्ते। स च द्विधा भवति सभङ्गोऽभङ्ग इति । सभङ्गः शब्दश्लेषोऽपि । तथाहि– 'कर्णान्तमानीय गुणग्रहीत्रा' [१.१४] इत्यभङ्गः । 'अदारिभावेन जगत्सु पूज्यः' [१.३२] इति सभङ्गः । 'अ+दारि+भावेन' इति, 'अद+अरिभावेन' इति द्वेधा पदभङ्गेन ह्यत्रार्थभेदः ।

अथचात्रान्येऽपि प्रभेदा भवन्ति। तद् यथा– 'स्वरिपुं क्षणेन सरसः स्फुरत्तनुम्' [८.१६] इति विभक्तिश्लेषः । एकत्र 'सरसः' इति प्रथमा । अन्यत्र पञ्चमीति । 'मात्रापादौ वर्तयन् दृश्यमानः'[१२.३२] इति च । एकत्र मात्रायाः पादाविति समस्तं पदम्; अपरत्र मात्रा जनन्येति तृतीयान्तं भिन्नं पदम् । 'दशरथोऽग्र्यसम्पदः' [८.१९] इति च। अयं वचनश्लेषोऽपि। एकत्र पञ्चम्येकवचनम्; अपरत्र द्वितीयाबहुवचनमिति । 'दशकं विजित्य'[८.३०] इति लिङ्गश्लेषः । एकत्र दशको रावण इति पुँल्लिङ्गता। अपरत्र हरितां दशकमिति नपुंसकत्वमिति ।

अपिचात्र श्लेषनिबद्धा भगवदवतारकथामयी भवति पद्यानां सप्तविंशतिः [८.१४-४०]। सोऽयं तारावळीनामा कश्चनापूर्वोऽवतारनिबन्धः। तथाहि निगदन्ति– 'ताराणां सङ्ख्यया पद्यैर्युक्ता तारावळी मता' इति ।

* * *

यत्राभिप्रायगर्भं विशेषणं स परिकरः। तादृशं विशेष्यं चेत् परिकाराङ्कुरः। यथा–
यथेष्टमध्यास्त शिलां यमी सुनियमी स ताम् [१५.१०८] इति ।

अत्र तपोनिमित्तमध्यासनात् पूर्वभाविनीं यमनियमसमृद्धिं सूचयती 'यमी सुनयमी' इति विशेषणे इति साभिप्राये विशेषणे। यथा वा–

गणयेद् रमाऽस्य न गुणानखिलान् चतुराननश्चतुरवागपि नो ।
न वयं सहस्रवदना अपि तानपरोदितानतिवदेम पुनः [११.१९] इति ।

अत्र चतुरानन इति विशेष्यमपि साभिप्रायमिति परिकराङ्कुरस्योदाहरणमपीदमेव भवति। यथा वा–

पूर्वजन्मसु हि वेद पुरेदं सर्वमित्यमितबुद्धिरुवाच [४.९३] इति। अमित-बुद्धित्वात् सर्वं वेदेति साभिप्रायं विशेष्यम्।

* * *

पर्यायोक्तं बहुविधमाचक्षते। विवक्षितं मुखतोऽनाख्याय प्रकारान्तरेण तस्य चारु निरूपणं पर्यायोक्तमित्येके। कार्यस्य वर्णनात् कारणं यत्र गम्यते तत् पर्यायोक्तमित्यपरे। केनचित्कारणमिषेण स्वस्येष्टसम्पादनं तदित्यन्ये। तद् यथा–

नवमल्लिकास्रजमभीष्टतमः शुचिसम्भवां प्रणयिनीशिरसि।
कलयन् स्वयं न कुशलेति किल प्रतिघट्टयत्युरुकुचावुरसा ॥ [११.४०]

* * *

सविमर्शं स्वोक्तस्यैव निषेध आक्षेपः। यथा–

अप्रमेयमतिशास्त्रमीदृशं यस्त्यजत्युपनतं सुदुर्लभम्।
तस्य तुल्यमतिरेष दुर्जनो नाथवाऽस्य सदृशोऽस्ति नीचधीः ॥ [९.२२]

यथा वा–

सकलावयवान् स्फुटं मिमानाः प्रतिमालक्षणलक्षणाय लक्ष्यम्।
चतुरा विदधुर्यदीयगात्रं स सुलक्ष्मेत्यधुना निगद्यते नो ॥ [१३.३६]

निषेधमुखेन निगदनं समर्थ्यत इत्येनमाभासिताक्षेपमाहुः।

* * *

आपाततो विरोधे विरोधाभासः। यथा–

अपि सप्ततया विराजितान् गतसङ्ख्यान् गुणिनो गुणोज्झितान्।
अपि मन्युमदादिवर्जितान् गतभोगान् पवनाशनान् सदा ॥ [७.१९]

सप्तसङ्ख्या अपि गतसङ्ख्याः, गुणिनोऽपि गुणोज्झिताः, पवनाशना अहयोऽपि गतभोगा इत्यापाततो विरोधः। अहिशरीरं हि भोगः। सजटाः सप्ताः, त्रिगुणवर्जिता उपवीतवर्जिता वा गुणोज्झिताः, विगतविषयभोगाः, वातमात्राहारा इति परिहारः। तेन नियत्या श्लेषगर्भोऽयमलङ्कारः। यथा वा–

पञ्चास्यो योऽभवद् व्यक्तं चतुरास्योऽपि केवलम् [१५.१२४]।

* * *

इष्टार्थोद्यमेनानिष्टप्राप्तिर्विषमम्। परानिष्टार्थमुद्यम्य स्वानिष्टप्राप्तिर्वा। यथा–

त्वरितमुद्यतविस्तृतमस्तकः प्रतिददंश यदैनमविक्षतम्।
प्रभुपदारुणचारुतराङ्गुलीविहृतिपिष्टतनुः प्रतताम सः[३.३९] इति।

अत्र बालकस्य वासुदेवस्य देहक्षतिरसुरस्य सर्पात्मन इष्टार्थः। तदर्थमुद्यम्य स्वयमेव हत इति विषमम्। यथा वा–

इत्युक्तस्तैरेष विस्तारिबुद्धेः प्राप्तुं साम्यं सम्प्रवृत्तो दुरात्मा।
हास्योऽत्राभूद् – [१२.३९] इति।

केचिदिमं विषादालङ्कारमाहुः। सङ्ख्यापूरणमात्रं तत्। 'इष्टार्थोद्यमतोऽनिष्ट-प्राप्तिर्विषमम्' इति, 'अपेक्षितविरुद्धार्थप्राप्तिर्विषादनम्' इति तयोर्लक्षणैक्यात्। ईषद्भेदस्त्वकिञ्चित्करः। एवमलङ्कारा बहुधा सङ्कीर्णा भवन्ति।

* * *

अनुरूपसमायोगः समम्। यथा–

ससोदरोऽथाऽदित राजहंसः स राजहंसीमिव राजकन्याम् [१.३४]।

यथा वा–

अवदत् स कथां रथाङ्गपाणेर्भगवान् भागवते भवापहन्त्रीम्।
अनुकूलगुणस्वरादिभाजा निजशिष्यप्रवरेण वाच्यमाने [१३.४०] इति।

* * *

आधाराधेययोरनानुरूप्यमधिकं नामालङ्कारः। आधेयादाधारस्याऽधिक्यमित्येतत्। यथा–

तनुनिम्नसुनाभिशोभिते वलिभे वारिजनाभ आदधे।
प्रतनावतिसुन्दरे मृदावुदरेऽस्मिन् जगदण्डमण्डलम् [७.३२] इति।

* * *

असम्भाव्यस्य सम्भवोऽसम्भवः। यथा–

बालस्य बालपरिलम्बनगोचरं तद्
व्यश्रवस्यतापि वचनं वनगोचरोक्तम्।
यत् सायमैक्षत जनः शिशुमाव्रजन्त-
मेकाब्दकं वृषभबालकृतावलम्बम् [२.४८] इति।

* * *

परस्परोपकारकत्वमन्योन्यं नामालङ्कारः। यथा–

जघनांशुकैरवयवाभरणैः कुचकुङ्कुमैश्च कचमाल्यवरैः।
नयनाञ्जनैरपि मिथोऽब्जदृशां घटितैरलङ्कृतिरलं क्रियते [११.५१]।

* * *

गुणानां वा क्रियाणां वा यौगपद्यं समुच्चयः। यथा–

इत्थं विचिन्त्य तनयां बहु भर्त्सयन्त्या
भीतं तयोत कुपितं मनसाऽनुतप्तम् [२.४०] इति।

यथा वा–

गाम्भीर्यं धृतिमुरुवीर्यमार्यभावं
तेजोऽग्र्यं गिरमपि देशकालयुक्ताम्।
राजाऽस्य स्फुटमुपलभ्य विस्मितोऽस्मै
राज्यार्धं सपदि समर्पयाम्बभूव [१०.१८] इति।

भिन्ननिष्ठत्वेऽपि समुच्चयो भवति। यथा–

स्तन्यं मुहुः किल ददौ जननी गृहीत्वा
क्षेमाय तं किल दधज्जनको जजाप।
अन्यो जनोऽपि किल लाळयति स्म किन्तु
सर्वोऽपि तन्मुखसुहासरसायनोत्कः [२.४२] इति।

यथा वा–

अरुणाश्मवर्णतनवस्तनवः शुभहारसन्निभरुचोऽप्यपराः।
हरिनीलनीलरुचयोऽत्र पराः प्रकटीभवन्ति विविधाभरणाः॥

[११.२८] इति।

* * *

एककारकगानां क्रियाणां कालभेदत एकत्र गुम्फनं कारकदीपकमुच्यते। यथा–

तत्त्वेऽप्यतत्त्वे विमतेऽनुमां वदन्
तदप्रतिष्ठां प्रतिपादुकः स्वयम्।
विजित्य विश्वान् विदुषां सभास्वसौ
जगाम नाम्नाऽप्यनुमानतीर्थताम् [५.७] इति।

* * *

अथ च तद् गुम्फनं कालक्रमानुगुणं चेद् तदा पर्यायो नामालङ्कारप्रभेदः। यथा–

प्राग् रिङ्गणं स्वयमथ स्थितिमेष चक्रे
पश्चाद् गतिं परिचयेन किल क्रमेण [२.४४]।

* * *

कैमुत्येनार्थनिष्पत्तिः काव्यार्थापत्तिः। यथा–

वृष्ट्यादेः स नियमनादि चक्र एत-
च्चित्रं किं भुवननियामके समीरे [१६.४८] इति।

* * *

उक्तस्यार्थस्य समर्थनाय हेतूद्भावनं काव्यलिङ्गम्। यथा–

वरविमानगिरावपि चण्डिका शिशुमहो जननी तमलाळयत्।
अपरथा परितुष्टमनाः कथं चिरमिहैष वसेद् विसहायकः [३.१७]।

यथा वा–

चतुरश्चतुराननः स्वयं पवनो वा व्रतिरूप आव्रजन्।
श्रुतिनाथदिदृक्षयाऽन्यथा न खलु स्यान्निखिलाग्र्यलक्ष्मवान् [७.९]।

* * *

यद्येवं तर्ह्येवमित्यादिचमत्कारि तर्कोट्टङ्कनं सम्भावना। यथा–

यदि नाभविष्यदिह विभ्रमतानियमो जनस्य निलयावळिषु।
विकटा विटङ्ककृतपत्रिततिः कृतकेत्यवैक्ष्यत कथञ्चन नो [११.११] इति।

* * *

किञ्चित् प्रस्तुतं समर्थयितुं तत्समानस्यार्थान्तरस्योपन्यसनमर्थान्तरन्यासः। यथा–

अगणयन्न शिवं जनता तदा सवचने वसुदेवसुताह्वये।
मुखरमिच्छति को मृगधूर्तकं प्रकृतहुङ्कृतसिंहशिशौ सति [३.२४] इति।

केचिदेतं दृष्टान्तालङ्कारमाहुः। अन्ततोऽर्थन्तरन्यास एवायम्। यथा वा–

अभूदसङ्गोऽपि स तत्सुसङ्गवानसङ्गभूषा ननु साधुसङ्गिता [४.३९] इति।

अत्र प्रस्तुतस्य विशेषस्य सामान्येनार्थान्तरेण समर्थनम्। पूर्वत्र विशेषेण विशेषस्य समर्थनमितीयान् भेदः। यथा वा–

कळभाषण एव सूरिपोतः कविरासीदनवद्यपद्यवादी।
अवभाति ननु प्रभाप्रभावी भगवान् बालतरोऽपि तिग्मभानुः [१३.४७]।

केचिदेतं दृष्टान्तं ब्रूयुः। अपरे ललितम्। ‘प्रस्तुतप्रतिबिम्बस्याप्रस्तुतस्य वर्णनं

ललितम्' इति हि लक्षयन्ति। सर्वमर्थान्तरन्यासगर्भे निलीनमित्युक्तम्। एवमुदाहरणान्तरमूह्यम्।

अर्थान्तरन्यासमिषेण बहून्यत्र सुभाषितानि भवन्ति। तथाहि–

दानं ध्रुवं फलति पात्रगुणानुकूल्यात् [२.३०], अहो महीयो महतां विडम्बनम् [४.३५], सन्तो हि गुणांशतोषिणः [५.२६], भाग्यदैवमिह योग्यतानुगम् [९.२३], प्रकृतिं प्रयाति सकलोऽपि सदा [११.४५], विनयो हि भूषयति सर्वरसम् [११.५३], न हि दाक्ष्यस्य समो गुणोऽपरोऽस्ति [१३.१४], ननु विमृश्य कृती कुरुतेऽखिलम् [१३.६८], सिद्ध्यै स्याद्धि यत्नः [१४.२१], शुचि हरिपदमापत्सम्पदोराश्रितानां न हि भवति विशेषः स्वप्रकाशोन्नतानाम् [१४.४६], कमपि सकलहृद्यं कल्पयेन्नैव दैवम् [१४.५२] इत्यादि।

* * *

प्रतिकूलेऽपि सन्दर्भे पूर्वरूपानुवृत्तिः पूर्वरूपम्। यथा–

व्याख्याता निशि स कदाचन प्रदीपे
संशान्ते पुनरपि वाचयाम्बभूव।
शिष्यान् स्वान् पुरुकरुणाम्बुधिर्निजाङ्घ्रे-
रङ्गुष्ठस्फुटनखरान्तरोचिषैव [१६.६] इति।

* * *

अन्यवस्तुनः सन्निधानेन स्वगुणोत्कर्षोऽनुगुणो नामालङ्कारः। यथा–

समतीतविद्रुमभुवां सुदृशां पदपल्लवाग्रयनखरक्तरुचीः।
परभागतः स्फटिककुट्टिमभूः प्रकटीकरोति न पुरा प्रकटाः [११.३०]।

* * *

भूतवृत्तस्य मनसि प्रत्यक्षमिव दर्शनं भाविकम्। यथा–

पुरे कुमारानलसान् विहारान्निरीक्ष्य सर्वानपि मन्दलीलः ।
कैशोरलीलां हतसिंहसङ्घां वृत्तां वने प्राक् स्मरति स्म सूत्कः ॥
[१.३०] इति ।

यथा वा–

प्राज्ञो राज्ञां त्रिदिवपदवीं कौरवं क्षेत्रमाप्तः
सस्माराथ स्वविहृतिपतद्धस्तियुद्धोत्सवानाम् [१०.४९] इति ।

यथा वा–

भीमत्वे सह सहजैः प्रतिष्ठितः प्राक्
पश्चात्मा मुररिपुरञ्चितो यदत्र ।
पाञ्चाल्या बलिसलिलं समं ददत्या
सोऽस्मार्षीत् तमिममथ प्रपूज्यपूज्यः [१६.३७] इति ।

दण्डी तु भाविकं प्रबन्धविषयं गुणमाह–

'भाविकत्वमिति प्राहुः प्रबन्धविषयं गुणम् ।
'भावः कवेरभिप्रायः काव्येष्वासिद्धि यः स्थितः ।
'परस्परोपकारित्वं सर्वेषां वस्तुपर्वणाम् ।
'विशेषणानां व्यर्थानामक्रिया स्थानवर्णना ।
'व्यक्तिरुक्तिक्रमबलाद् गम्भीरस्यापि वस्तुनः ।
'भावायत्तमिदं सर्वमिति तद् भाविकं विदुः' इति ।

***

रुचिरं यथावद् वस्तुवर्णनं स्वभावोक्तिः । वस्तुतो वाङ्मयप्रपञ्चेऽस्यैव प्राधान्यम् । आह च दण्डी– 'शास्त्रेष्वस्यैव साम्राज्यं काव्येष्वप्येतदीप्सितम्' इति ।

नारायणार्यकृतिरियं काव्यं च शास्त्रं चेति स्वभावोक्तिरत्र स्वरसमेव पारम्यमर्हति । दिङ्मात्रमुदाह्रियते –

येये गुणा नाम जगत्प्रसिद्धा यं तेषुतेषु स्म निदर्शयन्ति ।
साक्षान्महाभागवतप्रबर्हं श्रीमन्तमेनं हनुमन्तमाहुः [१.१०] ।

तस्य प्रभोश्चरणयोः कुलदेवताया
भक्तिं बबन्ध निजधर्मरतः स धीरः ।
विज्ञातभारतपुराणमहारहस्यं
यं भट्ट इत्यभिवदन्ति जना विनीतम् [२.१४] ।

स्वजनतापगमागमसङ्गमप्रतिसभाजितपूर्वकसम्भ्रमे ।
अविदुषी जननीति स बालकः शरणतो रणतो निरगान्नृभिः[३.२] ।

यदेतदात्मैक्यमुपास्तिचोदितं
न मे गुरोरप्यपरोक्षतां गतम् ।
पुरातनानामपि सौम्य कुत्रचित्
ततो मुकुन्दं भज संविदे मुदा [४.११] ।

इव एव वादोऽस्त्विति वादिनौ खला-
वद्योत्तरं भाति यदीर्यतामिति ।
मध्वे ब्रुवाणेऽमत तौ जितौ जनः
स निश्चिकायापि निशापलायनात् [५.१५] ।

देवतास्वसुलभा प्रतिभा ते मानुषेषु चपलेषु कथा का ।
क्षाम्य सौम्य सकलज्ञ नमस्ते ते ब्रुवन्त इति तं किल नेमुः [६.१०] ।

गुरुभक्तिभरानताकृतिर्विरचय्याञ्जलिबन्धमञ्जसा ।
क्षणमामुकुळीकृतेक्षणः स गुरुं केवलमभ्यवन्दत [७.४९] ।

परमात्मने सततमेकरूपिणे
दशरूपिणे शतसहस्ररूपिणे ।
अविकारिणे स्फुटमनन्तरूपिणे
सुखचित्समस्ततनवे नमोनमः [८.४१] ।

मन्दहासमृदुसुन्दराननं नन्दनन्दनमतीन्द्रियाकृतिम् ।
सुन्दरं स इह सन्न्यधापयद् वन्द्यमाकृतिशुचिप्रतिष्ठया [९.४३] ।

अन्यत्र च चोरान् धन्यप्रवरोऽसौ
शूरान् शतसङ्ख्यान् प्राप्तान् स्वजिघांसून् ।
एकेन तु शिष्येणाऽकृष्टकुठारान्
निस्ताडितयूथ्यानद्रावयत द्राक् [१०.२१] ।

परमागमार्थवरशास्त्रमिदं भजताममानवकलारचितम् ।
व्रजतामहो परमवैष्णवतां रतये स्वलोकमजितो दिशति [११.७] ।

प्रश्नः पृष्टः खण्ड्यते तेन नूनं
युक्तां युक्तिं वक्ति चासावखण्ड्याम् ।
वादिव्रातं लज्जयेन्नो विशेषा-
दाक्षेप्सेति श्रूयते किं नु कुर्मः [१२.१०] ।

अवतीर्य पुरैव वाहनात् स्वादपि मार्गादपसार्य सैनिकान् सः ।
सह कैश्चन भूसुरैरवाप्तस्त्रिजगत्पूज्यपदान्तिके ननाम [१३.२२] ।

श्रवणमननहेतोः प्राक् चिरायास्तनिद्रः
सपदि विवशयन्त्या निद्रया ग्रस्तचेताः ।
स्वयमपि नयति द्रागङ्गवस्त्रादि पूज्ये
झटिति विगतनिद्रः कोऽपि शिष्योऽन्वशेत [१४.१०] ।

विधिभ्रूविभ्रमभ्रश्यद्धनगोधान्यसम्पदा ।
निर्वेदिना वेदविदा तेनाऽपे वेदवादिराट् [१५.९२] ।

आर्द्राङ्गाः सपदि निमज्जनात् सरस्यां
कण्वस्य द्विजवृषभस्य वल्लभायाम् ।
तत्राऽयन् खरकिरणोपरागहेतो-
र्ग्रामीणा अपि सकलाः सबालवृद्धाः [१६.११] इत्यादि ।

***

अलङ्काराणां समावेशे चेयमत्र व्यवस्था। यत्र तिलतण्डुलवदसङ्कीर्णौ सङ्गतौ तत्र संसृष्टिः। यत्र क्षीरनीरवत् समवेतौ तत्रालङ्कारयोः सङ्कर इति। तदेवं प्राधान्येनालङ्कारा निरूपिताः। अन्येऽपि चेष्यन्ते। असङ्ख्या ह्यलङ्कारा भवन्ति। यथाऽऽह दण्डी–

'काव्यशोभाकरान् धर्मानलङ्कारान् प्रचक्षते।

'ते चाद्यापि विकल्प्यन्ते कस्तान् कार्त्स्न्येन वक्ष्यति' इति।

एकैकोऽप्यनेकधा भवति। अनेकेऽप्येकत्रान्तर्भवन्ति। तदलं बहुलोकविचिन्तनयेत्युपरम्यते।

अकलङ्कामलङ्कारमीमांसामर्थमांसलाम्।
चकाराऽचार्यगोविन्दो विनेयजनवाञ्छया॥

—o—

अत्रोद्धृतानामलङ्काराणामुदाहरणश्लोकानां चानुक्रमणिका

अर्थालङ्काराः

१. अतिशयोक्तिः

रामार्चने यो नयतः १.१९

२. अधिकम्

तनुनिम्नसुनाभि- ७.३२

३. अनुगुणः

समतीतविद्रुमभुवां ११.३०

४. अन्योन्यम्

जघनांशुकैरवयवा- ११.५१

५. अपह्नुतिः

अरुणतरणिबिम्ब- १४.४७
बीजच्छलेन पुरु- २.५२
मणिमञ्जुमाला- १.२२

६. अर्थान्तरन्यासः

अगणयन्न शिवं ३.३४
अभूदसङ्गोऽपि ४.३९
अहो महीयो महतां ४.३५
कमपि सकलहृद्यं १४.५२
कळभाषण एव १३.४७
दानं ध्रुवं फलति २.३०
ननु विमृश्य कृती १३.६८
नहि दाक्ष्यस्य समो- १३.१४
प्रकृतिं प्रयाति ११.४५
भाग्यदैवमिह ९.२३
विनयो हि भूषयति ११.५३
शुचि हरिपदमा- १४.४६
सन्तो हि गुणांश- ५.२६
सिद्ध्ये स्याद्धि यत्नः १४.२१

७. असम्भवः

बालस्य बालपरि- २.४८

८. आक्षेपः

अप्रमेयमतिशास्त्र- ९.२२
सकलावयवान् १३.३६

९. उत्प्रेक्षा

अधिकं धरणीम- १३.२७
उपकर्णममुष्य ७.४२
निजमानसराग- ७.२६
प्रगतासु तासु ११.३५
फलिनीकुलं कुसु- ११.४३
भास्करा इव गां १५.१३०
मामैनं भुवनगुरुं १६.१३
विमलमलयजाम्भो- १४.३५
विविधस्तुलोपगत- ११.१२
वीच्यङ्गैरधिकतरैं- १६.१४
सततं गळता स्वतः ७.३७
सन्तुष्यतां सकल- २.२६
हरिणीदृशां निव- ११.३१

१०. उपमा

अच्छाम्बरेव २.२३
अधरीकुरुते ७.३८
अनुयाति मूर्ति- ११.९
अपरस्परमत्सर- ७.४
अमृतकल्पवाचा १.२३
अशनादीन्धना- १५.१०५
अशुभानपहाय १३.४
आम्नायास्त्रय- ८.५४
इन्दीवरश्रीजयि- १.३५
उपलभ्यते यदुप- ११.८
कनकातुलताल- ७.६
कन्यां सुवर्णलसि- २.१२
केरळभूषणायिताम् ५.३५
गरुडतुण्डमिव प्रति- ३.४०
चिन्तामणीन्द्रमिव २.४९
जगत्प्रदीपायित- १०.२९
जितकुमारगुणं ३.३६
तस्य हन्त पुरुषस्य ९.२४
देवतागुरुमसा- ६.३
द्विजमण्डलस्थ- ११.१५
द्विरदोदारकरो- १३.२९
धनमिव सधना- १४.२५
धर्मसूनुमिव ९.४७
नखनिर्जितपद्म- १३.२९
ननु मनोजवजित् ३.४४
नयनद्वयेन नळिन- ८.९
नवद्युनाथप्रतिम- १.१
नवमम्बुधरं विड- ७.४५
नवमुक्तावलिमस्य ७.३९
निजनन्दनमिन्दु- २.२८
निशाचरारेरिव ४.२६
निष्कळङ्कमिव ९.३६
पञ्चास्यः श्वभिरिव १६.३५
पतङ्गायितः ५.५२
पद्माकरं वा कलु- १.४९
पद्मोदरसुन्दरा- १.१२
परिपूर्णचन्द्रपरि- ११.६४
पुष्टबुद्धिरकरोत् ६.३१
पूर्णेन्दुप्रभवदनः १६.१७
बालो दिवाकर- २.४६
ब्रह्म ब्रह्मसमो- १५.९७
भगवन्तमनन्त- ७.११
भूसुरप्रवरबुद्धि- ६.२४
मध्ये तेषां नीच- १२.३
मानिनोऽपि हि- ९.४४
मुनिनन्दनमिन्दि- ७.१२
यमजाम्युदवास- ७.५३
यस्तमुत्तमगुणं ९.२६
रेमेऽच्छयोपनि- २.१३
वरहस्तिहस्त- ११.६८
वर्धितोर्मिहरि- १५.६
वानरेन्द्र इव तीर्ण- ९.६
वानरेन्द्र इव वायु- ६.५४
विष्टपभूषणायितम् ४.३४
शिखिनोऽनुयान्ति ११.४१
समोऽजस्य यो १०.५४
सान्नाय्यमव्यक्त- १.४८
सुन्दरास्येन्दुकल्पः १४.५१
सुरसिन्धोरिव १३.८
सुविडम्बितकम्बु- ७.३७
सुस्मितेन्दुमरविन्द- ५.५१

सुहयमेधगणा- ३.६
स्फुटशोणोपल- ७.४४
-हरिवेश्मकृत्समः ९.१३
हारावळीमिव हृदा २.४
हेमाद्रिराजविभु- २.१०

११. उल्लेखः

कृष्णाब्धिपङ्केरुह- १.४३

१२.कारकदीपिकम्

तत्वेऽप्यतत्वे विमते ५.७

१३.काव्यलिङ्गम्

वरविमानगिरा- ३.१७

१४. काव्यार्थापत्तिः

वृष्ट्यादेः स नियम- १६.४८

१५.दीपकम्

नेदृशं स्थलमलं ६.४७
पौत्रे पवित्राह्वय- १.४४

१६.परिकरः

गणयेद् रमाऽस्य ११.१९
यथेष्टमध्यास्त १५.१०८

१७.परिकराङ्कुरः

पूर्वजन्मसु हि ४.५३

१८. परिणामः

मध्वेन्दोर्नित्यस- १५.९१
रामस्य वाण्या मणि- १.२२
सुतरत्नं तदसूत १३.४५
सुताननेन्दोरनिशं ४.१८
सुन्दरनन्दनस्मित- ३.१
स्मितमभूत् सुजना- ३.१६

१९. पर्यायः

प्राग् रिङ्गणं स्वयमथ २.४४

२०.पर्यायोक्तम्

नवमल्लिकास्रज- ११.४०

२१.पूर्वरूपम्

व्याख्याता निशि स १६.६

२२.भाविकम्

पुरे कुमारानलसान् १.३०
प्राज्ञो राज्ञां त्रिदिवपदवीं १०.४९
भीमत्वे सह सहजैः १६.३७

२३. रूपकम्

अदभ्रधिषणाभिधो- १२.५१
इत एव पुराणगौरगौ- ७.२०
उदयतीति हि बाल- ३.१६
गोभिः समानन्दित- १.१५
जनसदागतिसूचित- ३.९
जाज्वल्यमानस्य वने १.३८
तव वेदनदीर्विगाह्य १३.६३
दुर्वादिगर्वाद्रिपविं १५.८८
नाथस्य भूरिकरुणा- २.२२
भेजे क्षोभो मायिगोमायु- १२.१
भोगाधिकाभोगवतो १.३९
मधुरपतगरावाः १४.१६
रसोज्झिताश्वश्वल- १.४५
विषयेभ्यो हृषीकाश्वान् १५.१०९
सकलाङ्गयुतावभात- १३.४८
सपदि समस्कुरुत १०.१
सूत्रस्यन्दनवृन्दाढ्या १५.५
स्वशिष्यहस्तेन मठा- ५.९

२४. विनोक्तिः

विना कैवल्यसाम्राज्यम् १५.११२

२५. विरोधाभासः

अपि सप्ततया विराजितान् ७.१५
पश्चास्यो योऽभवद्- १५.१२४

२६. विषमम्

इत्युक्तस्तैरेष विस्तारि- १२.३९

त्वरितमुद्यतविस्तृत- ३.३९

२७. व्यतिरेकः

अतिशान्तवपुर्निशा- ७.७

गोभिस्तमांस्यपनयन् १४.५५

गोलीलास्वतिशयिना- १६.१५

२८. श्लेषः

अदारिभावेन जगत्सु १.३२

अनाकुलं गोकुल- १.२

कर्णान्तमानीय गुण- १.१४

दशकं विजित्य पर- ८.३०

दशरथोऽग्र्यसम्पदः ८.१९

मात्रा पादौ वर्तयन् १२.३२

वर्धितोर्मिहरिप्रेष्ठा १५.६

स्वरिपुं क्षणेन सरसः ८.१६

२९.सन्देहः

भीमश्चेदिह यतते १६.८

वेदव्यासो न्वेष वेदो- १२.१२

३०. समम्

अवदत् स कथां १३.४०

ससोदरोऽथादित १.३४

३१. समासोक्तिः

भोगाधिकाभोगवतो- १.३९

विहसितबिसभङ्ग- १४.३४

३२. समुच्चयः

अरुणाश्मवर्णतनव- ११.२८

इत्थं विचित्य तनयां २.४०

गाम्भीर्यं धृतिमुरुवीर्य- १०.१८

स्तन्यं मुहुः किल ददौ २.४२

३३.सम्भावना

यदि नाभविष्यदिह ११.११

३४. सहोक्तिः

आरुरोह दुरारोहं १५.११९

उदतारयत् परिजनं १०.१२

व्याख्यां भाष्यस्य १५.७१

सज्जनान् सह महा- ९.३९

३५. स्मृतिः

पादोपान्तनमन्महा - ६.५७

स्वहेळया पातित- ५.३५

३६. स्वभावोक्तिः

अन्यत्र च चोरान् धन्य- १०.२१

अवतीर्य पुरैव वाहनात् १३.२२

आर्द्राङ्गाः सपदि निमज्जनात् १६.११

गुरुभक्तिभरानताकृतिः ७.४९

तस्य प्रभोश्चरणयोः २.१४

देवतास्वसुलभा प्रतिभा ६.१०

परमागमार्थवरशास्त्र- ११.७

परमात्मने सततमेक- ८.४१

प्रश्नः पृष्टः खण्ड्यते १२.१०

मन्दहासमृदुसुन्दरा- ९.४३

यदेतदात्मैक्यमुपास्ति- ४.११

येये गुणा नाम जगत्- १.१०

विधिभ्रूविभ्रमभ्रश्यद्- १५.९२

श्रवणमननहेतोः प्राक् १४.१०

श्व एव वादोऽस्त्विति ५.१५

स्वजनतापगमागमसङ्गम- ३.२

* * *

शब्दालङ्काराः

१. एकाक्षरम्

नानेनेनानेना- १०.६

२. चक्रबन्धः

धन्योऽमह्यत नाकिना- १०.५४

३. छेकानुप्रासः

अयि कृपालय पालय ३.१५

अवभाति ननु प्रभाप्रभा- १३.४७

उवाच वाचं परिहास- ५.१७

ऐच्छदच्छलदयोदया- ९.४०

तदा तदाननाम्भोजात् १५.३

नानावनेषु चरत- २.४५

भुजे भुजेनाऽशु भुजङ्ग- ४.३७

मानमानमयतीह कथम् ६.१२

विशिशेष शेषशयनः ८.५

शरणतो रणतो निरगा- ३.२

स युक्तिनखरैः खरैः १२.५१

४. यमकम्

जननं समयेसमये १०.४५

बहुसत्वगुणं सविकं ६.५५

यमशेषभवप्रभवः १०.७

वैकुण्ठे ते श्रीविशेषा- ११.७५

सन्मात्सर्यं बद्धुमूचे १२.३

५. लाटानुप्रासः

न समग्रं जगतां पितुः ७.५५

मधु मधुकरराजो- १४.५

सम्प्राप्तं सह सहजेन १६.२५

६. वृत्त्यनुप्रासः

अखण्डयदखण्डज्ञो- १५.२७

अखिलखलकुलानां १४.६

उदयति घनमाला- २.५४

क्षणादासु विचक्षणः १३.६७

खण्डयेत दण्डो यदि ५.४३

चलचारुचामरधरा- ११.२५

तस्मै नमो नीरद नील- १.२

नळिननाभनिभालन- ३.५

नारायणायाखिलका- १.१

प्लवैरपेतामवलोक्य १०.२७

भूयोबोधस्ततो भूयो- १५.१

वाचालो वचनमुवाच १६.२

वायुना त्रिरपि पूर्व- ९.५०

शुभजनतायै कुतू- १०.२

शृणु देवकार्यमव- ८.४४

सानुनीतिरथ नीति- ९.३३

सुजनकुमुदवृन्दा- ४.५४

सुन्दरेषु सुरमन्दिर- ६.२३

सुमनोनिकरेण पूरितं ७.४

स्वानां चेतो नन्दयन् १२.१७

७. [द्वितीयाक्षरप्रासः]

अत्र जन्मनि न यत् ४.५३

तर्कतन्त्रकुशलानपि ६.१२

पदारविन्दप्रणतो- १.१२

भत्सयन्निति जहास ६.१५

मन्दहासमृदुसुन्दरा- ९.४३

८. [तृतीयाक्षरप्रासः]

गीर्वाणैर्विजयमहो- १६.५२

पर्यैक्षि प्रभुरितरैः १६.३३

मा तात तात सुमुखेति २.३६

हरितामधीश नर- ८.३०

९. सर्वतोभद्रम्

समानया यानमास १०.४८

—०—

५ तारतम्यमीमांसा

विष्णोः सर्वोत्तमत्वं वायोश्च जीवोत्तमत्वं न सम्यगवगम्यते विना तारतम्यमीमांसाम्। विष्णुभक्तिश्च सर्वाधिका न देवतासु परिवारभूतासु तारतम्यपरिज्ञप्तिं विना शक्यमनुसन्धातुम्। तदियं तारतम्यमीमांसा प्रस्तूयते–

१. परमपुरुषो नारायणः।

[मत्स्यकूर्मक्रोडसिंहवटुभार्गवराघवाः।
कृष्णबुद्धौ कल्किदत्तहयशीर्षैतरेयकाः॥
पाराशर्यश्च कपिलो वैकुण्ठो वृषभस्तथा।
यज्ञो धन्वन्तरिश्चैव स्त्रीरूपस्तापसो मनुः॥
नारायणो हरिः कृष्ण उपेन्द्राः सर्व एव च।
एवमाद्या हरेः साक्षात् प्रादुर्भावाः प्रकीर्तिताः॥]

२. परा प्रकृतिर्लक्ष्मीः।

[श्रीर्भूर्दुर्गाऽम्भृणी ह्रीश्च महालक्ष्मीश्च दक्षिणा।
सीता जयन्ती सत्या च रुग्मिणीत्यादिभेदिता॥]

३.हिरण्यगर्भः, मुख्यप्राणश्च।

[प्राणः सूत्रं महान् ब्रह्मा चित्तं वायुर्बलं धृतिः।
स्थितिर्योगश्च वैराग्यं ज्ञानं प्रज्ञा स्मृतिः सुखम्॥
मेधा मुक्तिर्विष्णुभक्तिरादिगोपो महाप्रभुः।

ऋजुः सुमानो विज्ञाता महाध्याता महागुरुः ॥
हनूमान् भीम आनन्द इत्यादिबहुरूपिणः ।
हिरण्यगर्भा येऽतीता ये भाव्या यश्च वर्तते ॥]

४. हिरण्यगर्भपत्नी सरस्वती, मुख्यप्राणपत्नी भारती च ।

[सरस्वती च गायत्री श्रद्धाऽऽद्या प्रीतिरेव च ।
सर्ववेदात्मिका बुद्धिरनुभूतिः सुखात्मिका ॥

गुरुभक्तिर्हरौ प्रीतिः सर्वमन्त्रात्मिका भुजिः ।
शिवकन्येन्द्रसेना च द्रौपदी काशिजा तथा ।
चन्द्रेत्यादिस्वरूपा यास्तेभ्यः शतगुणावराः ॥]

५. गरुडः, शेषः, रुद्रश्च [एकादशरुद्रेषु यः प्रधानः]।

[शेषः सदाशिवश्चोर्ध्वस्तपोऽहङ्कार एव च ।
नरोऽवटो लक्ष्मणश्च रौहिणेयः शुकस्तथा ॥
सद्योजातो वामदेवश्चाघोरस्तत्पुमानपि ।
दुर्वासा द्रौणिरौर्वश्च जैगीषव्यादिरूपकः ॥]

६. विष्णोः कृष्णावतारे षण्महिष्यो नीला, भद्रा, मित्रविन्दा, काळिन्दी, लक्षणा, जाम्बवती च ।

७. गरुडपत्नी सुपर्णी, शेषपत्नी वारुणी, रुद्रपत्नी पार्वती च ।

८. पुरन्दरः, कामश्च ।

[वाली गाधिर्विकुक्षिश्च पार्थ इन्द्रः पुरन्दरः ।
सुदर्शनश्च भरतः प्रद्युम्नः स्कन्द एव च ।
सनत्कुमारः कामश्चेत्येक एव व्यवस्थितः ॥]

९. अहम्प्राणः [४९मरुत्सु प्रधानः]।

१०. इन्द्रपत्नी शची, कामपत्नी रतिः, कामपुत्रोऽनिरुद्धः, बृहस्पतिः, स्वायम्भुवमनुः, दक्षप्रजापतिश्च।

११. स्पर्शमानी प्रवहः [४९ मरुत्सु द्वितीयः]।

१२. सूर्यः, चन्द्रः, सूर्यपुत्रो यमः, स्वायम्भुवमनुपत्नी शतरूपा च।

[द्वादशस्वादित्येषु सूर्यस्तृतीयः। प्रथमो विष्णुर्वामनोऽदित्यां जातः। इन्द्रानुजतया जात इति तमुपेन्द्रमाचक्षते। द्वितीयोऽष्टमकक्ष्यागतः पुरन्दराख्य इन्द्रोऽदित्यां पूर्वजातः।]

१३. वरुणः [द्वादशस्वादित्येषु चतुर्थः]।

१४. नारदः।

१५. अग्निः [अष्टवसुषु प्रधानः], वरुणपुत्रो भृगुमुनिः, दक्षप्रजापतिपत्नी स्वायम्भुवमनुपुत्री प्रसूतिश्च।

१६. वैवस्वतमनुः, विश्वामित्रः, महर्षयः सप्त पूर्वे– मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठश्चेति।

१७. मित्रः[द्वादशस्वादित्येषु पञ्चमः], निरृतिः, बृहस्पतिपत्नी तारा, प्रवहवायुपत्नी प्रावही च।

१८. विघ्नाधिपतिर्गणपतिर्भूताकाशमानी, धनपतिः कुबेरः, वायुजो विष्वक्सेनः, सूर्यजावश्विनौ नासत्यदस्रौ, प्रधानवसुमग्निमृते सप्तान्ये वसवः– द्रोणः, प्राणः, ध्रुवः, अर्कः, दोषः, वस्तुः, विभावसुश्चेति [विभावसुरेव द्युवसुरित्युच्यते], उक्तान् पञ्च वक्ष्यमाणं चैकं विहाय षडादित्याः– अर्यमा, पूषा, त्वष्टा, सविता, भगः, धाता चेति, दश विश्वेदेवाः– क्रतुः, दक्षः,सवः, सत्यः,कामः, कालः, धुरिः, लोचनः, पुरूरवः, आर्द्रवश्चेति, एकादशसु रुद्रेषु प्रधानं विहायान्ये दश– रैवतः, ओजः, भवः, भीमः, वामः, उग्रः, वृषाकपिः, अजैकपात्, अहिर्बुध्निः,

विरूपाक्षश्चेति, एकोनपञ्चाशन्मरुत्सु अहम्प्राणं प्रवहं च विहायावशिष्टाः ४७ मरुतः प्राणापानाद्याः, कव्यवाहः पितृपतिः [त्रिषु प्रधानपितृपतिषु द्वौ यमसोमौ द्वादशकक्ष्यायां गतौ], ऋभवस्त्रयः– ऋभुः, विभ्वा, वाजश्चेति, द्यावापृथिवी-मानिन्यौ च दैव्यौ।

१९. प्रवहपुत्रो भूतवायुमानी मरीचिः। अग्निपुत्रो भूताग्निमानी पावकः। पाद-मानिनाविन्द्रपुत्रौ यज्ञनामा जयन्तः, शम्भुश्च। दैत्यगरुः शुक्रः। तत्सोदरश्च्य-वनः। बृहस्पतिसोदर उचथ्यः। उक्तं सनत्कुमारं विहायान्ये त्रयो ब्रह्मणो मानसपुत्रा ऋषयः– सनकः, सनन्दनः, सनातनश्च। सप्त चान्य ऊर्ध्वरोतसः। एतान् दश, पूर्वोक्तान् सनत्कुमारादींश्च दश विहायान्ये काश्यपाद्या अशीति-गृहस्था ऋषयः। भाविमन्वन्तराणामिन्द्राः सप्त– बलिः, अद्भुतः, शम्भुः, विधृतिः, ऋतधामा, दिवस्पतिः शुचिश्च। [अतीतेषु मन्वन्तरेणु प्रथमे स्वायम्भुवेऽन्तरे यज्ञनामा विष्णुरेवेन्द्रः। द्वितीये स्वारोचिषे रोचननामा वायुः। तृतीये चौत्तमे सत्यजिन्नामा यम इन्द्रः। चतुर्थे तापसे पञ्चमे च रैवते त्रिशिख-विभुनामानौ नासत्य-दस्रावश्विनाविन्द्रौ। षष्ठे चाक्षुषे मन्द्रद्रुम्नः, स एव च सप्तमे वैवस्वतेऽन्तरे पुरन्दरनामेन्द्रः। तमेतमष्टमकक्ष्यागतमिन्द्रमा-चक्षते।] त्रीनुक्तान् विहायावशिष्टा एकादश मनवः– स्वारोचिषः, उत्तमः, रैवतः, चाक्षुषः, सावर्णिः, दक्षसावर्णिः, ब्रह्मसावर्णिः, धर्मसावर्णिः, रुद्रसावर्णिः, देवसावर्णिः, इन्द्रसावर्णिश्चेति। [प्रथमः स्वायम्भुवो मनुर्दशमकक्ष्यायां गतः। चतुर्थस्तापसो मनुः स्वयं विष्णुरेव। सप्तमो वैवस्वतः षोडश्यां कक्ष्यायां गतः। अपरे त्वेकादशात्र।] दशसु पितृपतिषु पूर्वोक्तान् यमसोमकव्यवाहान् विहायान्ये सप्त। अष्टौ विष्णोर्द्वारपालकाः– जयः, विजयः, चण्डः, प्रचण्डः, नन्दः, सुनन्दः, कुमुदः, कुमुदेक्षणश्चेति। अष्टौ प्रधानगन्धर्वाः। अष्टौ प्रधानाप्सरसः। विश्वकर्मा, चित्रगुप्तः, सूर्यसारथिररुणः, नन्दी, ऐरावतः, सुरभिः, कल्पवृक्षादिदेवताः, अहोरात्रदेवते, पूर्णिमामावास्यादेवते, अभिजिद्-

विषुवद्देवते, ओषधिवनस्पतिमानिनः, हविःकपालादिमानिनः, कर्मणा देवत्वं गताः शतं राजर्षयश्च– पृथुः, कार्तवीर्यः, शशबिन्दुः, प्रियव्रतः, उत्तानपादः, मान्धाता, गयः, ककुत्स्थः,नहुषः, अम्बरीषः, आर्षभो भरतः, दौःषन्तिर्भरतः, मरुत्तः, हरिश्चन्द्रः, प्रह्लादः, परीक्षिदाद्याश्च।

२०. द्वादशादित्येषु चरमः पर्जन्यः, अनिरुद्धभार्या उषा विराडाख्या, चन्द्रभार्या रोहिणी, सूर्यभार्या सञ्ज्ञा, यमभार्या श्यामला, वरुणभार्या च गङ्गा।

२१. केचनानाख्याता देवाः।

२२. अग्निभार्या वाङ्मानिनी स्वाहा।

२३. जलमानी बुधः।

२४. अश्विभार्या नाममानिनी उषाः।

२५. कुजः।

२६. पृथिवीमानी शनिः।

२७. वरुणपुत्रः कर्ममानी पुष्करः।

२८. कृष्णपत्नीत्वेन जाता अग्निपुत्राः १६१०० सङ्ख्याकाः।

२९. अनाख्याता आजानजा देवाः। शतं गन्धर्वाः। शतमप्सरसः। [शतं कोटीनामृषयः सन्ति। तत्र पूर्वोक्तमृषीणां शतकं विहायावशिष्टाः] ९९.९९,९९,९०० ऋषयः।

३०. पूर्वोक्तानां सप्तानां पितृपतीनां सन्ततिभूताश्चिरपितरः।

३१. पूर्वोक्तं गन्धर्वाणामप्सरसां च शतमष्टोत्तरं विहायावशिष्टा गन्धर्वा अप्सरश्च।

३२. मनुष्यगन्धर्वाः।

***

एतेषु च विशिष्योपनिषदुक्ता नामादिमारुतान्ता यथा–

१. नाममानिनी उषाः (२४)
२. वाङ्मानिनी स्वाहा (२२)
३. मनोमानी पर्जन्यः (२०)
४. सङ्कल्पमानी मित्रः (१७)
५. चित्तमानी अग्निः (१५)
६. ध्यानमानी वरुणः (१३)
७. विज्ञानमानी चन्द्रः (१२)
८. बलमानी प्रवहः (११)
९. अन्नमानी अनिरुद्धः (१०)
१०. अम्मानी अहम्प्राणः (९)
११. तेजोमानी पुरन्दरः (८)
१२. आकाशमानिनी उमा (७)
१३. स्थिरस्मृतिमानी शिवः (५)
१४. आशामानिनी भारती (४)
१५. जीवमानी मुख्यप्राणः (३)

[बलमिति ज्ञानबलं देहबलं च। तदुभयमानी भूतवायुः। अन्नमिति ज्ञानरतिरूपं ज्ञानान्नं बाह्यमन्नं च। तदुभयमानी अनिरुद्धः। आप इति ज्ञानतृप्तिर्बाह्यजलं च। तदुभयमानी अहम्प्राणः। तेज इति मानसं प्रतिभानं बाह्यं च। तदुभयमानी पुरन्दरः। आकाश इति स्थिरा प्रतिभा भूताकाशश्च। तदुभयमानिन्युमा। ततः स्थिरस्मृतिमानी शिवः। तत आशाया अपरोक्षानन्दस्य मानिन्यौ सरस्वतीभारत्यौ। ततश्च जीवकलामानी मोक्षानन्दमानी च प्राणात्मा हिरण्यगर्भ इति।]

तथाहि श्रुतिः– 'अथातः सम्भूतिः। परमाद् विद्या विद्यायाः प्राणः प्राणाच्छ्रद्धा श्रद्धायाः शिवः शिवाद् बुद्धिर्बुद्धेरिन्द्र इन्द्रात् तैजसप्राणस्तैजसप्राणादनिरुद्धोऽनिरुद्धात् स्पर्शवातः स्पर्शवातात् सोमः सोमाद् वरुणो वरुणादग्निरग्नेर्मित्रो मित्रात् पर्जन्यः पर्जन्यात् स्वाहा स्वाहाया उषा जायते' इति।

इमामाचार्यगोविन्दश्चक्रे चक्रायुधप्रियाम्।
तारतम्यस्य मीमांसां विनेयजनवाञ्छया॥

—०—

६ शासनमीमांसा

साम्प्रतं मध्वविजयसङ्गते द्वे शिलाशासने उपलब्धे। अन्या अपि स्युः अविदितचराः कालगर्भे निलीनाः।

तौळवमण्डले 'मद्द' इत्येकोऽस्ति ग्रामः। मध्वपदस्यैवापभ्रंशोऽयम् – मध्वग्राम इत्येतत्। तत्रैका शिला वर्तते, यां मध्वशिलामाहुः। आचार्यमध्वः सञ्चारवेलायां कदाचित् तां शिलामध्यास्य ययाविति। तत्रैकं शिलामयं शासनं च वर्तते। तदपि मध्वचरितसम्बद्धं किमपि स्यात्। परन्तु न शक्यं पठितुम्; वर्षातपसमाक्रान्तं जराजीर्णं लुप्ताक्षरमिति सांशयिकमेव तत्।

अथापि द्वे मध्वविजयोल्लिखितकथासंवादिनी इतिहासमूकसाक्षिभूते अधुनाऽपि विद्येते शासने इति सन्तोष्टव्यम्।

एकं तावत् कळसप्रदेशे भद्रानदीमध्ये बृहति शिलाखण्ड उट्टङ्कितम्; यां पृथुशिलां मध्वः स्वयमानीय तत्र निधापयामास। तदेतदुल्लिखितं पण्डिताचार्येण– 'तीर्थार्थं पृथुतरवप्रपातिवाराम्–' [१६.७] इत्यादिना, 'तत् तुङ्गां ननु निकषाऽधुनाऽपि कर्म' [९] इत्यन्तेन पद्यकदम्बेन।

तदिदं शिलाशासनेन दृढीकृतम्। तत्र हि शिलायां यतिरूपस्य श्रीमध्वस्य प्रतिकृतिं रेखया टङ्कयित्वा कार्णाटिक्यां लिप्यां लिखितम्– 'ಶ್ರೀಮಧ್ವಾಚಾರ್ಯೈಃ ಏಕಹಸ್ತೇನ ಆನೀಯ ಸ್ಥಾಪಿತಾ ಶಿಲಾ' [श्रीमध्वाचार्यैरेकहस्तेन आनीय स्थापिता शिला] इति।

द्वितीयं त्वपूर्वं शासनं 'उडुपिजिल्ला' विभाग एव 'चेर्कोडि'ग्राम उपलब्धम्। मध्वविजये तावदेवं कथा श्रूयते– क्वचित् प्रदेशे ईश्वरदेवनामा कश्चित् भूपतिरासीत्। स तु पुनस्तटाकनिर्मित्सया पान्थजनैः खननं कारयामास। यात्रामिषेण तत्राऽगतं मध्वमपि खनितुं चोदयामासेति। मध्वमहिम्ना च स्वयमेव निरन्तरं चखानेति च[म.वि.१०.४-५]।

कोऽयमीश्वरदेवः? कस्य वा भूविभागस्यायं राजाऽसीत्? इतिहासज्ञानामपरिचितोऽयं भूपतिरासीत्। अत एव तेऽवदन्– महाराष्ट्रदेशे महादेवनामा कश्चित् तदात्वे राजाऽऽसीत्। स एवायमीश्वरदेव इति। किन्तु तदानीमीश्वरदेवनामैव तौळवमण्डल एव कश्चिद् राजाऽऽसीदिति 'चेर्कोडि'शासनादिदमुपज्ञमभिज्ञायते। इदमपरमपूर्वं प्रत्यायनं पण्डिताचार्यवचनस्य।

इतिहाससंशोधकेन, सम्प्रति हरिपदमुपगतेन 'वसन्त शेट्टि'महाभागेन दिष्ट्याऽऽविष्कृतमिदं शासनम्। भाषा लिपिश्च कार्णाटिकी। तथाचायं शासनपाठः–

೧. ಸ್ವಸ್ತಿ ಶ್ರೀಮತ್‌ಪಾಂಡ್ಯಚಕ್ರವರ್ತಿರಾಯ
೨. ಬಿಟ್ಟದೇವಾಲುಪೇಂದ್ರ ದೇವರ ವಿಜಯ ರಾ-
೩. ಜ್ಯಮುತ್ತರೋತ್ತರಾಭಿವೃದ್ಧಿ ಪ್ರವರ್ತ-
೪. ಮಾನಮಾಚಂದ್ರಾರ್ಕತಾರಾಂಬ-
೫. ರಂ ಸಲುತ್ತಮಿರೆ ಶಕವರ್ಷ ೧೧೭೦ನೆ-
೬. ಯ ಪ್ಲವಂಗ ಸಂವತ್ಸರದ ತುಲಾ-
೭. ಮಾಸ ಪ್ರಥಮ ದಿನ ಆದಿವಾರದಂ-
೮. ದು ಶ್ರೀಮತು ರಾಜಧಾನಿ ಬಾರಹಕನ್ಯಾ-
೯. ಪುರದರಮನೆಯಲು ಮಮ್ಮಗಳು ಅ-
೧೦. ಚಲಾದೇವಿ ಬಮ್ಮದೇವ ಒಡ್ಡಮದೇ-
೧೧. ವ ಸಹಿತ ಸ್ಥಿರಸಿಂಹಾಸನಾರೂಢರಾ-
೧೨. ಗಿ ವಡ್ಡೋಲಗಂಗೊಟ್ಟಿರಲು ಶ್ರೀಪಾದ ಸನ್ನಿದಾ(ನ)-

೧೩. ದಲು ಮೈದುನ ಯೀಶಬರದೇವ ಬಂಕಿವೆ-

೧೪. ಗ್ಗಡೆ ಗಜಬಾಹು ಸಂಧಿವಿಗ್ರಹಿ ದೇವಪ್ಪ-

೧೫. ರುಷರುಂ ಅಧಿಕಾರಿ ಆನಂದಿ ಸೇನಭೋವ-

೧೬. ರುಂ ಇರಲು ಚೇರ್ಕಾಡಿಗರಿಳ್ದು ಕುಂಜಾಲು(ಲ)

೧೭. ಳ(ಗೆ) ಮಾಡಿದ ಕಟ್ಟು...........

इतः परमस्फुटा लुप्तप्रायाः काश्चन पङ्क्तयः । ततः शिलापृष्ठभागे शासनमनुवर्तते । एतावन्नः पर्याप्तम् ।

एतेन ज्ञायते– यत् ११७०तमे शा.शके ईश्वरदेव इति [यः शासने यीशबरदेव इत्युल्लिखितः] कश्चिदालुपवंशीयः भूपतिरासीत्, यः पुनर्बारहकन्या[बार्कूर्] पुराधिपतेः बिट्टिदेवालुपेन्द्रस्य स्याल आसीदिति । अयमेवेश्वरदेवो मध्वं खनितुं दिदेशेति शक्यं सम्भावयितुम् । बारहकन्यापुराधिपतेरुल्लेखोऽपि मध्वविजये दृश्यते । स तु बिट्टिदेवालुपेन्द्रस्य तनयः स्यात् । स एव वा स्यात् ।

एतच्छासनकाले मध्वस्य कौमारमासीत् । ईश्वरदेवोऽपि युवैव । प्रायस्तस्य वार्धके खननप्रसङ्गः सम्बभूवेति भाति । अत्र शासने निर्दिष्टः श्रीपादः [श्रीपादसन्निदानदलु] क इति न स्फुटम् । अनामनिर्देशादेव तदानीमतिप्रथितः श्रीपाद इति निर्विचिकित्सम् । प्रायोऽच्युतप्रज्ञ एव स्यात् । बारहकन्यापुर एव तस्य मठोऽपि [भंडारकेरि] प्रथित आसीद्धि ।

तृतीयं च प्रथितं शासनमस्ति नरहरितीर्थीयम् । न साक्षान्मध्वविजयगतकथासम्बन्धि । अथापि मध्वचरितसम्बन्धि भवति । अतस्तदपि किञ्चिदिव प्रस्तूयते ।

संहत्य षट्शासनानि नरहरितीर्थीयान्युपलभ्यन्ते । तत्रैकं १२०३ तमे शा.शकवत्सरे उट्टङ्कितं विशिष्य मध्वचरितसङ्गतमस्ति । तथाहि श्रीकूर्माख्ये क्षेत्रे नृसिंहगेहस्य पुरतः स्तम्भ उपलब्धस्य तेलुगुलिपिबद्धस्य शासनस्यायं

प्रायः शोधितः पाठक्रमः–

దేవశ్రీకమలావిలాసలహరీపాత్రం కలిప్రోన్మిలత్-
క్లేశక్లిష్టజనేఖిలక్షితితలే సంల్లీనబోధోదయే ।
స్వీయశ్రీపదపఙ్కజైకశరణాన్ సంరక్షితుం సన్ముని-
ర్జాతః శ్రీపురుషోత్తమాభిధమహాతీర్థః సుమత్యగ్రణీః ॥

देवश्रीकमलाविलासलहरीपात्रं कलिप्रोन्मिलत्-
क्लेशक्लिष्टजनेऽखिलक्षितितले संल्लीनबोधोदये ।
स्वीयश्रीपदपङ्कजैकशरणान् संरक्षितुं सन्मुनि-
र्जातः श्रीपुरुषोत्तमाभिधमहातीर्थः सुमत्यग्रणीः ॥ १ ॥

'देवः श्रीकमला–' इति क्वचित् संशोधकैरुत्प्रेक्षितः सविसर्गपाठः प्रामादिकः । नच शासनेऽपि तथा । 'संल्लीलबोधोदये' इति शासनपाठः प्रामादिकः । '–पदपंकजैक–' इति शासनपाठः ।

యన్మునిభాషితభాష్యం భాష్యం కిల తీర్థికప్రవరసంఘైః ।
ఉన్మదవాదిద్విరదప్రతికుమ్భమఙ్కుశం భవతి ॥

यन्मुनिभाषितभाष्यं भाष्यं किल तीर्थिकप्रवरसङ्घैः ।
उन्मदवादिद्विरदप्रतिकुम्भमङ्कुशं भवति ॥ २ ॥

'बाष्यम्' इति शासनपाठः । 'कुंभ–' इति च । शिल्पिनः प्रमादः । चतुर्थचरणो लुप्ताक्षरः । '–प्रतिहतकुम्भमङ्कुशं भवति' इति पाठः स्यात् । वस्तुतस्तु पद्यमेवेदमत्रानन्वितम् । अच्युतप्रज्ञो हि पुरुषोत्तमतीर्थः । नहि तेन विरचितं भाष्यं क्वापि प्रसिद्धम् । प्राय इदं तृतीयपद्यत्वेन निवेशनीयम् । तृतीयं च द्वितीयतया । शार्दूलविक्रीडितद्वयानन्तरमार्याद्वयमिति । शिल्पिकृतप्रमादेन पूर्वपतितं स्यात् ।

తస్య జ్ఞానకలాకలోదయకలో వైయాసికం గోగణం
మందైర్భిన్నమతప్రధారితమలం సువ్యక్తభేదే పథి ।
నేతుం సద్వ్రతదణ్డమణ్డితకరో యః ప్రాదురాసీన్ముని-
వ్రాతైః సేవ్యపదారవిన్దయుగళాదానన్దతీర్థో మునిః ॥

तस्य ज्ञानकलाकलोदयकलो वैयासिकं गोगणं
मन्दैर्भिन्नमतप्रधारितमलं सुव्यक्तभेदे पथि ।
नेतुं सन्धृतदण्डमण्डितकरो यः प्रादुरासीन्मुनि-
व्रातैः सेव्यपदारविन्दयुगळादानन्दतीर्थो मुनिः ॥ ३ ॥

'वैयासीकम्' इति शा.पाठः । '–प्रधारित–' इत्यत्र '–प्रसारित–' इति पाठः सम्भावित इत्येके। '–प्रचारित–' इत्यन्ये। तस्य पुरुषोत्तमतीर्थापराख्यस्य मुनिव्रातसेव्यात् पदारविन्द-युगळादानन्दतीर्थो मुनिः प्रादुरासीदित्यन्वयः । 'ज्ञानकलाकलोदयकलः' इति नाति-स्फुटार्थम्। समग्रं पद्यं नातीव स्वरसम्।

యన్ముఖనిఃసృతభాషా లలితా లలితప్రకారపదవిన్యాసా ।
కమలాపతిపదకమలం భజతే భజమానభవభయారాతిమ్ ॥
यन्मुखनिःसृतभाषा ललिता ललितप्रकारपदविन्यासा ।
कमलापतिपदकमलं भजते भजमानभवभयारातिम् ॥ ४ ॥

ఆనన్దతీర్థభగవత్పాదాచార్యసరస్వతీ ।
లోకే చ హరిపాదాబ్జయుగళప్రాప్తయే ను సా ॥

आनन्दतीर्थभगवत्पादाचार्यसरस्वती ।
लोके च हरिपादाब्जयुगळप्राप्तये नु सा ॥ ५ ॥

'लोकेऽत्र' इति केचित् । लिपीनामस्पाष्टयादेवं पाठान्तराणि भवन्ति । 'न सा' इति शा.पाठः प्रामादिकः ।

తస్మాల్లోకసురక్షణాతినిపుణాత్ సమ్ప్రాప్తకర్తవ్యధీ-
ర్ద్వేధాముత్ర తథాత్ర యోవతి జనాన్ కాలిఙ్గభూసమ్భవాన్ ।
పిత్ర్యాచారముపైతి సూనురితి సన్నీతిస్థితో ధర్మతః
శత్రుక్ష్మాపతివర్గదుర్గనివహాన్ భీతానభీతః స్వయమ్ ॥

तस्माल्लोकसुरक्षणातिनिपुणात् सम्प्राप्तकर्तव्यधी-
र्द्वेधाऽमुत्र तथाऽत्र योऽवति ज़नान् कालिङ्गभूसम्भवान् ।

पित्र्याचारमुपैति सूनुरिति सन्नीतिस्थितो धर्मतः
शत्रुक्ष्मापतिवर्गदुर्गनिवहान् भीतानभीतः स्वयम् ॥ ६ ॥

'–धीद्वेधा–', 'तधाऽत्र' इति च शा.पाठः। लिपिकृत्प्रमादः।

యశ్చ శ్రీకమఠాధినాయకమహాకార్యైకబద్ధవ్రత-
స్తస్య ప్రచ్యుతివారణాయ శబరానీకక్షితీధ్రాశనిమ్ ।
ధత్తే సత్కరవాలమస్య తటితా సన్త్యక్తజీవే రిపౌ
హన్తవ్యానవశేషణాన్నిజవిధిర్నో యస్య బోధ్యస్తరామ్ ॥

यश्च श्रीकमठाधिनायकमहाकार्यैकबद्धव्रत-
स्तस्य प्रच्युतिवारणाय शबरानीकक्षितीध्राशनिम् ।
धत्ते सत्करवालमस्य तटिता सन्त्यक्तजीवे रिपौ
हन्तव्यानवशेषणान्निजविधिर्नो यस्य बोध्यस्तराम् ॥ ७ ॥

'-महाकार्य्यैक-' इति, '-विधिन्नो-' इति च शा.पाठः। विस्मृतरेफः शिल्पी। 'बोध्य-स्तराम्' इत्यस्फुटम्।

తేనానేన శ్రీమన్నరహరితీర్థాఖ్యమునివరేణ్యేన ।
కలిసమయప్రహ్లాదప్రభావపరితోష్యనృహరిరూపేణ ॥

तेनानेन श्रीमन्नरहरितीर्थाख्यमुनिवरेण्येन ।
कलिसमयप्रह्लादप्रभावपरितोष्यनृहरिरूपेण ॥ ८ ॥

'–तीर्ताख्यमुनि–' इति शा.पा.। '–प्रह्लादप्रबाव–' इति च। नूनमल्पप्राणः शिल्पी।

స్వస్తి శ్రీశకవత్సరే హుతవహవ్యోమద్వయక్ష్మాయుతే
మేషే శుక్లశశాఙ్కశేఖరదినే వారే చ సౌమ్యే వరే ।
ప్రాసాదం కమఠాధిపస్య పురతో నిర్మాయ శర్మప్రదో
యోగానన్దనృసింహ ఏష భగవాన్ ప్రీత్యా ప్రతిష్ఠాపితః ॥

स्वस्ति श्रीशकवत्सरे हुतवहव्योमद्वयक्ष्मायुते
मेषे शुक्लशशाङ्कशेखरदिने वारे च सौम्ये वरे ।

प्रासादं कमठाधिपस्य पुरतो निर्माय शर्मप्रदो
योगानन्दनृसिंह एष भगवान् प्रीत्या प्रतिष्ठापितः ॥ ९ ॥

'शुक्लशशांक-' इति शा.पाठः। '-नृसिंह्न-' इति च। हुतवह(३)व्योम(०)द्वय(२)-क्ष्मा(१) युते। १२०३तमे शकवत्सरे। शशाङ्कशेखरदिनेऽष्टम्याम्।

एतेनेदं विज्ञायते– नरहरितीर्थपूर्वजा अपि कलिङ्गराजामात्या आसन्। पूर्ववय-स्येव नरहरितीर्थः प्राप्तमन्त्रिपद आसीत्। आचार्यदर्शनानन्तरं तच्छिष्यो बभूव। सन्न्यासस्वीकारानन्तरमपि कळिङ्गराज्यभारं निर्वहन् भुनक्ति स्मे-त्यादि।

योगनरसिंहस्य प्रतिष्ठां नरहरितीर्थकृतां मनसि निधायेव नारायणार्यः 'नरसिंहपदाधाराः'[१५.१२८] इत्याह। तेन च तच्चरितविशेषः सूचितो भवति; नाम च निर्दिष्टं भवति।

एवमिह सम्भाव्यते– नरहरितीर्थेन न स्थापितमिदं शासनम्। अर्थतः शब्दतश्च तत्रतत्रास्वारस्यात्। परन्तु तदभिमानिभिर्देवालयाधिकृतैः परस्तादुपक्षिप्तं स्यादिति।

—०—

नाममीमांसा ७

मध्वविजये भगवन्नामानि

१. अजः ६.२९;९.१
२. अजितः ११.७;८.४२;१४.३९
३. अधीशिता १५.५३
४. अधोक्षजः १५.४७
५. अनन्तः ८.४
६. अब्जभूगुरुः ८.२५
७. अम्भोजनाभः ६.३६
८. अयोध्याधिपतिः १.२१
९. अरिधरः ३.४२
१०. अरीन्द्रधारी ११.१८
११. असुरासुहृत् ११.९
१२. इन्दिरापतिः ११.६२
१३. इन्दिरेशः १४.३५
१४. ईश्वरः १५.६०
१५. ईशः १५.११;१६;१९;२०;५०;५९
१६. ईशिता ७.३६
१७. कमलापतिः ११.१७
१८. कमलेष्टतमः ७.३
१९. करुणाकरः ८.१९
२०. कवीन्द्रः ७.५८
२१. कृष्णः १.२;४३;६.३०;८.३; १५.८२
२२. कृष्णारमणप्रियः १.२
२३. गायत्रः १४.५०
२४. गुरुः ७.३७;४९;५६;९.२;५५;
२५. गोपिकाप्रणयी ९.४१
२६. गोविन्दः १.३६;१०.२६;१२.३२
२७. चराचरेशः ८.४७
२८. चक्रायुधः १५.६९
२९. चक्री १२.२५;१४.१२;१५.१३१
३०. चारुगीः ७.२१
३१. जगज्जनकः ६.४०
३२. जगतां पिता ७.५५
३३. जगद्गुरुः ४.५१;७.४५;८.४७
३४. जलजायतलोचनः ७.४१
३५. त्रिगजत्तिलकः ७.४४
३६. त्रिभुवनवैद्यनाथः १६.४०
३७. देवः २.६;७.५९;१०.१७; १२.४९;५४;१५.६३
३८. देवदेवः १२.३१

३९. देवशिखामणिः ७.३८
४०. दैत्यरिपुः ७.१९
४१. द्विजवर्यान्वयजः ७.५४
४२. धरणीधरः ६.२९
४३. धर्मजः ८.९;९.१
४४. धर्मसूनुः ८.५४
४५. नरहरिः १२.५१
४६. नळिननाभः ३.५
४७. नाथः १.२५; २.२;२२;२७; ६.२९; ७.४२;९.४ ११.२१;१४.४८;
४८. नारायणः १.१;३२;२.१८;६.३८; ७.१८;८.६;१०.२४; १२.५३;१४.७;१५.८
४९. निशाचरारिः ४.३६
५०. नृसिंहः १६.३०
५१. पद्मेशः १५.५
५२. परमः २.२५;८.१०;११.१७
५३. परमः पुमान् १.२०
५४. परमपूरुषः ५.४८
५५. परमात्मा ८.४१
५६. परमेश्वरः १३.४५
५७. पराशरात्मजः ७.५१
५८. पवित्राह्वयः १.४४
५९. पाञ्चजन्यप्रियः १४.२८
६०. पाराशर्यः १०.२५
६१. पावनपावनः १३.
६२. पुराणपूरुषः १.१२; ८.१०
६३. पुरुषोत्तमः ६.३३
६४. पूर्णपुरुषः ११.८
६५. प्रभुः २.१५;३.४५;४.३;६.४४; ८.१४;११.१४
६६. प्राद्योतनिप्रीतिकृत् १.१३
६७. बादरायणः ८.६
६८. ब्रह्म १४.७;१५.८;४०;
६९. भगवत्तमः ७.५०
७०. भगवान् १.५३; ३३;६.४६ ; ८.११;१३.५०
७१. भुवनप्रभुः ७.४३;१३.४४
७२. भुवनपतिः १२.५२
७३. भुवनैकपतिः ११.१५
७४. भूमा १.३३
७५. मधुजित् ११.३९
७६. मधुद्विट् १.१३
७७. मधुमथनः १६.१
७८. महान् ८.८३
७९. महीधरः ८.५२
८०. मुकुन्दः १.३५;४४;४६;२.१; ६.४५;११.७७;१६.५६
८१. मुनिसुतः ८.५४
८२. मुनीन्द्रतनयः ८.४३
८३. मुरद्विट् ४.८
८४. मुरारिः १३.३८;१५.११०;१६.५३
८५. मुररिपुः ६.५७;१४.१९;३०
८६. रथचरणी १४.२८
८७. रथाङ्गपाणिः १३.४०
८८. रमापतिः १.११;११.७३
८९. रमावरः ४.१??
९०. राघवः १.१८
९१. रामः १.१४;२२;२३;२४; २५;२७;१५.१३८
९२. रामतनुः १.११;३.४
९३. लोकपतिः ८.४३

९४. वसुदेवसूनुः १३.४४;५२
९५. वासुदेवः १.५५;२.२९;५३;६.२९;९.८;४७;१२.२६;३९
९६. वारिजनाभः ७.३२
९७. विधाता ४.१७
९८. विभुः १.५५;७.२६;२९;८.५०;१५.२३
९९. विश्वकर्ता १५.८
१००. विश्वज्ञः १५.८??
१०१. विश्वपाजः २.११
१०२. विष्णुः १.४५;२.२४;५४;५.४२;७.५९;१०.४६;५४;१२.२९;४६;१४.२९;१५.६३
१०३. वेदनायकः ८.१;९.१
१०४. वेदराट् ७.४८
१०५. वेदव्यासः ७.५९
१०६. व्यासः १.३३
१०७. व्यासरूपः १.५३
१०८. शार्ङ्गपाणिः १४.३६
१०९. शौरिः ४.३६;१४.३९
११०. शेषशयनः ८.५
१११. श्रियःपतिः ९.४१
११२. श्रीरङ्गवासः ५.४७
११३. श्रीरामनाथः ५.४२
११४. श्रीवल्लभः १.९;२.१५
११५. श्रुतिभर्ता ७.४०
११६. श्रुतीश्वरः ७.५२
११७. सकलजगदधीशः १४.३९
११८. सद्गुणः १४.४८
११९. सत्यवतीसुतः १३.५५
१२०. सर्वज्ञः १५.४५
१२१. सर्ववित् १५.१२
१२२. सविता १४.४९
१२३. सत्पतिः ८.२
१२४. सत्यवतीसुतो हरिः ७.१६
१२५. सत्यवत्याः सुतः ७.५७
१२६. सत्यवाक् ७.५७
१२७. सद्गुरुः ७.४७
१२८. सम्पूर्णपूरुषः २.२१
१२९. सीतापतिः १.२६
१३०. स्वात्मा - १.२६;१४.१४
१३१. हरिः२.१६;४.२;३;४;३१;६.५;४१;४४;७.१३;३०;५४;८.६;१८;४२;९.५४;१३.४४;१४.२१;४५;४६;१५.६;१३०

विशिष्योल्लिखितान्यवताररूपाणि

१-२. मत्स्य-हयग्रीवौ ८.१४
३-४. कूर्म-वराहौ ८.१५
५-६. नरसिंह-तापसौ ८.१६
७-८. वामन-बुद्धौ ८.१७
९-१०. परशुराम-वेदव्यासौ ८.१८
११-१२. राम-कृष्णौ ८.१९-३४
१३-१४. महिदास-कल्किनौ ८.३५
१५-१६. कपिल-यज्ञौ ८.३६
१७-१८. धन्वन्तरि-मोहिन्यौ ८.३७
१९-२०. सनत्कुमार-दत्तात्रेयौ ८.३८
२१-२२. वृषभ-हंसौ ८.३९
२३-२४. हरि-कृष्णौ धर्मतनयौ ८.४०

आचार्याय दत्तदर्शने भगवद्रूपे

१. वेदव्यासः ७.१८-५९;८.१-५;४३;५४;९.१-३;१०.२४-२५

२. धर्मतनयो नारायणः ८.६-१३;४२-५४

रजतपीठपुरालयस्य भगवतो नामानि

[अयं सम्प्रति अनन्तेश्वरः, अनन्तासनः, अनन्तपद्मनाभ इति च व्यवह्रियते।]

१. कुलपतिः २.१८
२. नारायणः २.१८
३. भगवान् ३.१४
४. भुजङ्गशयनः २.१९
५. रजतपीठपुराधिवासः २.१९
६. रजतपीठपुरेश्वरः २.१०
७. रजतपीठपुरालयः २.३२
८. रजतपीठवासः ९.५५
९. रूप्यतळालयः ४.१५
१०. रूप्यपीठपतिः ६.२३
११. रूप्यपीठालयः ४.१२;१२.२६
१२. रूप्यपीठालयवासी ४.३७
१३. शिवनामकीर्तनः ९.२९
१४. हरिः ९.५५

मुख्यप्राणनामानि

१. अनिलः १.४५
२. असुदेवः २.२९
३. असुदेवता २.५३
४. जगज्जीवनदः १.३१
५. पवनः २.४४;३.४४
६. प्राणिगणप्रणेता १.९
७. प्राणेशः १६.५७
८. प्राणेश्वरः १.९
९. भगवान् २.८;२५
१०. भुवनजीवनः २.२
११. भुवनाधिराजः २.२५
१२. मरुत् २.४
१३. लोकेश्वरः २.३४
१४. वायुः १.५;२.२४;२६;७.५९
१५. विश्वगुरुः १.५
१६. विश्वज्ञः २.८
१७. सतांगुरुः १.९
१८. समस्तशक्तिः २.४१
१९. समीरः १६.४८
२०. सुमुखः २.३

हनुमदवतारनामानि

१. गुरुगुणः १६.५७
२. महाभागवतप्रबर्हः १.१०
३. रामप्रियतमः १६.५७
४. वीरः १.१३
५. श्रीमान् १.१०
६. स्वामी १६.५७
७. हनुमान् १.१०
८. हनूमान् १.१५;१६.५७
९. हरिप्रबर्हः १.२६
१०. हरीन्द्रः १.१२

भीमावतारनामानि

१. कृती १.३३
२. कृष्णवर्त्मा १.४१
३. कृष्णेष्टः १६.५७
४. प्रबलतमः १६.५७
५. भगवान् १६.५७
६. भरताग्र्यः ६.३१
७. भीमः १.२८; ३५;४४;३.४८;१६.८;३३;३७;५७
८. राजहंसः १.३४
९. वायुप्रभवः १.४०
१०. वीरः १.३६

११. वीरराजः १.४३
१२. वृकोदरः १.३८
१३. शुद्धबुद्धिः १.३३
१४. सुतेजाः १.४०

मध्वावतारनामानि

१. अखण्डज्ञः १५.२७
२. अखण्डधीः ५.४
३. अखिलगुरुः १०.५०
४. अखिलज्ञः १४.२७
५. अजसमः १०.५४
६. अघनाशनकीर्तिः ६.३६
७. अतनुमनाः १४.४८; १६.४
८. अतिसुलक्षणाकृतिः ५.४९
९. अतुच्छधिषणः १५.६६
१०. अदभ्रधिषणः १२.५१
११. अदभ्रबोधः १६.२२
१२. अदभ्रमनीषः ६.४२
१३. अदीनसत्त्वः १०.३०
१४. अधिकधिषणः १४.४५
१५. अधिकबोधः १४.३६
१६. अनन्तगुणान्तरः १०.३४
१७. अनन्तधीः ७.१४;९.१२
१८. अनन्तबोधः १५.१२७
१९. अनन्तमतिः १५.१०१
२०. अनन्तमानसः १३.२४
२१. अनन्तस्वान्तः १२.१
२२. अनन्तहृत् ८.४
२३. अनुमानतीर्थः ५.७
२४. अनूनबोधः १५.१४०
२५. अपरिमितमनीषः १४.२८
२६. अपूर्वपूरुषः ७.६
२७. अप्रमेयमतिः ९.२२
२८. अमन्दधीः ५.४७
२९. अमन्दमनीषः ६.३५
३०. अमानवकला ११.७
३१. अमानवनवाकृतिः २.५२
३२. अमितप्रमतिः ७.५२; १३.१६
३३. अमितबुद्धिः ४.५३
३४. अमितमतिः १२.५२
३५. अमितान्तरः ८.६
३६. अलयबुद्धिः ४.२७
३७. अलवबोधः १४.२९
३८. अलेशधीः ९.१४
३९. अविरळसंवित् १६.५२
४०. अविरळान्तरः ८.४२
४१. असुदेवतासत्कला २.५३
४२. आचार्यवर्यः ६.३०
४३. आनन्दतीर्थः ५.२;७.५९;१२.४२;१५.१४१
४४. आयतचेताः ६.११
४५. आर्यवर्यः ५.३१
४६. उच्चमानः १६.५
४७. उत्तमचित्तः ६.४६
४८. उत्तमप्रीतितीर्थः १२.२९
४९. उरुचेताः १४.३
५०. उरुमतिः १६.४४
५१. उर्वीक्षः १५.९३
५२. ऋजुपुङ्गवः ८.५
५३. करुणाकरः १५.७९
५४. करुणाब्धिः ६.३१
५५. कविः ८.४६
५६. कवीन्द्रः ७.५८

५७. कालवित् ४.३१
५८. कृतान्तवित्तमः ५.३७
५९. कृत्स्नज्ञः १५.११६
६०. गरिष्ठधीः ५.१०
६१. गुरुः ३.४३; ६.५२; १३.१८; १६. २८;५६;१६.२८; ३१;५६;५८
६२. गुरुप्रबर्हः १-.३६
६३. गुरुबुद्धिः ५.३
६४. गुरुमतिः १२.५४
६५. गुरुमानसः ८.२
६६. गूढदेवः १३.३९
६७. गोविन्दभक्तः १२.३२
६८. गौरपक्षः १४.३४
६९. चक्रायुधप्रियः १५.६९
७०. चक्रिभक्तः १२.२५
७१. चतुरधीः ३.२८
७२. चारुधीः ५.३४
७३. जगदीशः १०.१३
७४. जगद्गुरुः ३.४९;४.५; ५.२५
७५. जगद्गुरूणां गुरुः ५.३९
७६. जगद्विजेता ५.१२
७७. जिष्णुः १२.४५
७८. जैत्रः ४.५३
७९. त्रिजगत्पूज्यपदः १३.२२
८०. त्रिभुवनगुरुः ३.५६
८१. दशमतिः १०.२
८२. दयालुः १०.४०
८३. दशधिषणार्यवर्यः १६.५१
८४. दशप्रमतिः ९.३०
८५. दशहृदयः १४.२
८६. देवः ७.५९
८७. द्विजकुमारः ३.४०
८८. द्विजवर्यान्वयजः ७.५४
८९. धन्यप्रवरः १०.२१
९०. धन्यबुद्धिः १२.३४
९१. धीरमतिः ८.५३
९२. नन्दितीर्थः ९.२०
९३. नाथः ६.४९;१०.३२;१५.७०
९४. निशातधीः ९. ४९
९५. परमानन्दसुतीर्थसूरिराजः १३.८
९६. परमानन्दप्रयतीर्थः १४.४
९७. परात्मवेदकः ९.५१
९८. परिपूर्णप्रमतिः ७.१६
९९. परिपूर्णमतिः १३.६१
१००. परिपूर्णसंवित् १४.५५
१०१. पवनांशः १५.१०९
१०२. पुरुकरुणाम्बुधिः १६.६
१०३. पुरुधीः ८.१
१०४. पुरुसञ्चः ६.३९;५०
१०५. पुष्टबुद्धिः ६.३१
१०६. पूज्यचरणः ९.२७
१०७. पूरुषरत्नम् १३.२०
१०८. पूर्णचेताः ५.१२
१०९. पूर्णदृक् ६.२२
११०. पूर्णदृष्टिः ९.३२
१११. पूर्णधीः ४.४७
११२. पूर्णबोधः ४.३३
११३. पूर्णबुद्धिः ४.४२
११४. पूर्णसञ्चः ९.१७
११५. पूर्णेक्षः १५.१३७
११६. पृथुदर्शनः १३.१

११७. पृथुधीः ३.२२
११८. पृथुप्रबोधः ९.५३
११९. पृथुमतिः १४.२६
१२०. पृथुलचेताः ६.२०
१२१. पृथुहृत् ६.१६
१२२. पृषतामधिपस्यांशः ६.४३
१२३. प्रचुरतरहृत् १४.४३
१२४. प्रचुरतरान्तरः १६.४०
१२५. प्रचुरधीः ६.३८
१२६. प्रचुरप्रज्ञः १३.६७
१२७. प्रचुरमनाः १६.५३
१२८. प्रचुरान्तरः ११.१
१२९. प्रपूज्यपूज्यः १६.३७
१३०. प्रबर्हबोधः १३.३८
१३१. प्रभुः ३.२१;३९;४.१७;२१;
४९;५.४०;१०. ४२;१३.
२१;१४.३९; १६.१६
१३२. प्रभूतधीः ८.७
१३३. प्रमोदतीर्थः ५.२९
१३४. प्रवीणः १४.२३
१३५. प्राज्ञः १०.२३;४९;१३.३
१३६. प्राज्ञदिवाकरः १३.३
१३७. प्राज्यप्रज्ञः १२.३८
१३८. प्राज्येक्षः १५.१२१
१३९. प्राणपतिः १३.१८
१४०. प्रीतितीर्थः १५.९८
१४१. बहळधीः ९.३४
१४२. बहळप्रबोधः १३.६९
१४३. बहळबोधः १३.६८
१४४. बहळहृत् १४.६
१४५. बृहत्प्रबोधः १६.४७
१४६. बृहद्धीः १६.२३
१४७. बृहन्मतिः ५.१३
१४८. ब्रह्मसमः १५.९७
१४९. भगवत्तमः ११.३
१५०. भगवान् २.८;७.५०;१०.४३;
१३.२;१५.८३;९५;
१४.५५
१५१. भाग्यवान् ७.५०
१५२. भाविचतुर्मुखाकृतिः ४.३२
१५३. भुवनगुरुः १६.३; ४८
१५४. भुवनभर्ता ३.३७
१५५. भुवनविभूषणः १०.५५
१५६. भूयोधीः १५.७१
१५७. भूयोबोधः १५.१
१५८. भूरिचित्तः १२.९
१५९. भूरिचेताः ४.४०
१६०. भूरितरमानसः ८.९
१६१. भूरिहृत् ४.५२
१६२. मध्वः १.३; ५.१५;५३;६.४५;
४८;८.५२; ५४;९.१८;
१०. १; ३; २९; ५४;
१२.२८;४१;४६; ५०;
५३; १३.४२;६६;१४.१;
१५. ८८; ९१; ९६;१०२;
११३; ११७; १३२; १६.
१४;१५;३०; ४६; ५७
१६३. मनीषी १४.३८
१६४. मरुदंशः ६.३४
१६५. महनीयपादः ११.५
१६६. महाचार्यः १५.७२
१६७. महात्मा ४.४४

१६८. महाधीः	७.४८	१९९. विशङ्कटबुद्धिः	६.३३
१६९. महानन्दतीर्थः	११.७७	२००. विशारदः	४.१;५.११;१०.५६
१७०. महापुरुषोत्तमदासः	१०.१६	२०१. विश्वज्ञः	१६.२
१७१. महाबोधः	१५.११४	२०२. विश्वजनीनवृत्तिः	२.८
१७२. महामतिः	९.३	२०३. विश्ववित्	४.२६
१७३. महामनाः	५.४६	२०४. विश्ववेत्ता	९.४८
१७४. महामानसः	५.१४	२०५. विश्वाभिज्ञः	१५.६४
१७५. महासुखतीर्थः	८.४३	२०६. विश्वेशचेताः	५.३३
१७६. महाहृत्	४.५०	२०७. विष्णुदासः	२.५४
१७७. महिष्ठधीः	९.४७	२०८. विसंशयांशः	१६.४३
१७८. महिष्ठहृदयः	९.५५	२०९. विस्तारिबुद्धिः	१२.३९
१७९. महीयोमतिः	१०.५	२१०. विस्तृतचित्तः	६.५
१८०. महेक्षः	१६.७	२११. विस्तृतान्तरः	९.३८
१८१. मान्यधीः	१४.३०	२१२. वेदप्रवचनाचार्यः	१५.१२६
१८२. मारुतः	१५.८१	२१३. वेदबन्धुः	१०.५०
१८३. यतिवरः	१६.८	२१४. वेदवादिराट्	१५.९२
१८४. योगी	१०.५४	२१५. वेदान्तगुरुः	१५.९९
१८५. रामप्रियः	१५.१३८	२१६. वैष्णवाग्रेसरः	१०.८
१८६. लोकेश्वरः	२.३४	२१७. व्यासशिष्यः	१०.४४
१८७. वसुदेवसुताह्वयः	३.२४	२१८. व्यूढहृत्	६.२
१८८. वायुदेवः	१२.२	२१९. व्रजिननाशननामा	६.५४
१८९. वासुदेवः	२.२९;५३	२२०. व्रतिराजः	१३.१७
१९०. विचक्षणः	५.२८	२२१. शतसञ्चः	१३.१९
१९१. विततमतिः	१६.१	२२२. शुचिहृत्	१६.२९
१९२. वितानिचेताः	९.५२	२२३. शुद्धधीः	६.७
१९३. विद्याधिपतिः	५.४५	२२४. शुद्धहृत्	६.४४
१९४. विद्वद्वर्यः	१२.२७	२२५. श्रीमदानन्दतीर्थः	१६.५८
१९५. विपुलप्रमतिः	११.३	२२६. श्रीमान्	१६.५७
१९६. विपुलहृत्	१६.१९;३२	२२७. सकलज्ञः	६.१०;७.१
१९७. विभुः	३.४८;१०.२०	२२८. सकलमतिः	१६.१०
१९८. विरळेतरान्तरः	८.४७	२२९. सतां गुरुः	४.१४

२३०. समग्रधीः ५.३०
२३१. समधिकधिषणः १४.३१
२३२. सम्पूर्णप्रमतिः १६.२१
२३३. सम्पूर्णसङ्घचः ५.४१
२३४. सम्मोदतीर्थः ५.१७
२३५. सर्वज्ञः १६.१२;४२
२३६. सर्वधीः ९.५
२३७. सर्ववित्कविः ९.१६
२३८. सर्ववित्सर्वदीपः १२.४९
२३९. सर्वविद्यतिः ६.२१
२४०. सहस्रप्रकाशः ४.२२
२४१. सुखतीर्थः ५.९;४२;१०.३३
२४२. सुचित्तः ५.३२
२४३. सुचेताः १५.१२०
२४४. सुमुखः १०.१५
२४५. सुरेश्वरः ४.३०
२४६. सुविचारः ६.२३
२४७. सुहासः ६.१५
२४८. सूरिमौलिमणिः ६.१९
२४९. सौख्यतीर्थः ९.१;१०.२६
२५०. सौख्यदाख्यः १२.४४
२५१. सौम्यः ६.१०;८.५०
२५२. स्वानन्दतीर्थः ५.५२; ६.५७
२५३. स्वामी १०.४०
२५४. हरिदयितवरिष्ठः १६.५८
२५५. हरिरतिपूर्णकामः १६.५५
२५६. हरिपदरतः १०.५६
२५७. हरिः ७.५४
२५८. हरिपदः ३.१९
२५९. हर्षतीर्थः १२.११
२६०. हंसराट् ९.३५

अच्युतप्रज्ञः

१. अच्युतप्रमतिः ९.३०
२. अच्युतप्रेक्षः ४.६
३. अच्युतबुद्धिः ५.३०
४. अच्युतमतिः ९.३६
५. अच्युतात्मा ४.३८
६. गुरुः ३.४५;४.३०;३५;४०;४४;४५; ५.१०;२५;३१;४६; ९.३३;३५
७. गोविन्दबुद्धिः ५.३
८. पुरुषोत्तमतीर्थः ६.३३
९. मुकुन्दधीः ५.९
१०. मुकुन्दबोधः ४.५०
११. यतिसत्तमः ४.५१
१२. यतीश्वरः ४.३६
१३. व्रतीश्वरः ४.४६।

ज्येष्ठयतिः

[यतिरयं 'पेजेत्ताय'कुलोद्भवः, अच्युतप्रज्ञमठे वसत्सु सन्यासिषु आश्रमज्येष्ठ आसीदिति ज्ञायते। अस्य सन्यासनाम नोपलभ्यते।]

१. आर्यः १२.४३
२. आर्ययतिः ९.३१
३. ज्यायान् ६.३२
४. ज्येष्ठयतिः ५.२७
५. यतिः ९.३८
६. यतिराट् ९.३२
७. लिकुचान्वयोद्भवः ५.२७।

त्रिविक्रमपण्डिताचार्यः

[एषां लिकुचवंशीयानां 'पेजत्ताय' इति तौळवं कुलनाम। क्वचित् 'पिजत्ताय' इति च।]

१. अयुगविक्रमार्यः १३.६९

२. अयुगुविक्रमार्यः	१४.३
३. आर्यः	१३.६१
४. कविकुलतिलकः	१४.३
५. कवीन्द्रः	१४.५
६. कवीभः	१३.६६
७. गृहिप्रबर्हः	१३.५४
८. त्रिविक्रमः	१३-४६
९. त्रिविक्रमाख्यः	१३.५०
१०. त्रिविक्रमार्यः	१.४;१५.२;६४
११. द्विजश्रेष्ठः	१५.६७
१२. लिकुचः	१३.४८
१३. लिकुचशेखरः	१५.१३५
१४. वादिद्विरदेन्द्रः	१३.६३
१५. षडर्धविक्रमार्यः	१५.७२
१६. सूरिनन्दनः	१५.७१
१७. सूरिपोतः	१३.४७

शङ्करपण्डिताचार्यः

१. लिकुचशेखरः	१५.१३५
२. शङ्करार्यः	१४.२

सुब्रह्मण्यपण्डिताचार्यः

१. गुहनामकः	१३.४३
२. लिकुचकुलजः	१३.४३

तस्य भार्या

१. सती दयिता	१३.४४
२. सूरिपत्नी	१३.४५

पण्डिताचार्यसहपाठिनः

१. वयस्याः	१३.४९

मध्यगेहभट्टः

[मध्वपितुर्भट्टस्य नामधेयं मध्वविजये नैव निर्दिष्टम्। नारायणभट्ट इति प्रवादः। तौळवभाषायामेतत्-कुलनाम 'नडिल्लाय' इति।]

१. आर्यः	२.५०
२. गुरुः	३.१०;३५
३. जनकः	२.४२;३.१२;२६;२८
४. तातः	२.२९;३.१९;२६;२९; ४.२१
५. त्रिकुलैककेतुः	२.११
६. द्विजः	३.९;१५;४.२४
७. द्विजपुङ्गवः	२.५२
८. द्विजवरः	३.१८;३१
९. द्विजेन्द्रः	२.१३;२४
१०. धरासुरः	४.२०
११. पण्डितः	५.२४
१२. पिता	३.३०;४.१५
१३. प्राज्ञः	२.३७
१४. बुधः	२.३१
१५. भट्टः	२.१४
१६. भूसुरेन्द्रः	२.१३
१७. मध्यगेहार्यवरः	५.२३
१८. महीसुरपुङ्गवः	३.८
१९. विप्रः	२.३९
२०. सन्मध्यगेहकुलमौलिमणिः	२.९
२१. सुतपोनिधिः	३.१६

भट्टपत्नी

[अस्या अपि नाम नात्र काव्ये निर्दिष्टम्। वेदवतीति किंवदन्ती। सत्यवतीत्यपि स्यात्। 'हरिमिव कविवर्यं सत्यवत्यास्तनूजम्' १४.४५ इति श्लोषभङ्ग्या तस्या अपि नाम सूचयतीव कविः।]

१. अम्बा	४.२८
२. गृहिणी	३.१६

३. जननी २.४१;४२;३.२;२१;२६
४. जाया २.२१
५. द्विजेन्द्रवनिता २.२४
६. पत्नी २.२०
७. प्रिया ४.१८
८. भूसुरेन्द्रदुहिता २.२३
९. माता २.३५;३६;३७;४.२५;२७;
१०. विप्रपत्नी २.३९
११. सवित्री ४.२४
१२. स्वानन्दसन्ततिकृत् २.१३

भट्टपुत्री

[मध्वाग्रजायाः अस्याः कल्याणीदेवीति नामेति वदन्ति ।]

१. तनया २.४०
२. निजकन्या २.३५
३. बाला २.३७
४. मुग्धा २.३६

शिशोः पयःपानार्थं गोप्रदाता

[अयं 'मूडिल्लाय' इति भाषायां प्रथितः भट्टस्य गोप्रदाता मध्वानुग्रहपात्रं बभूव ।]

१. पूर्वालयः २.३०

भट्टस्य वृषप्रदाता

['कक्रेसेट्टि' इति तन्नामेति वदन्ति ।]

१. धनिकः २.५०;५१
२. वृषविक्रयी २.५०

पुराणकथकः

['शिव मडिन्नाय' इति तौळवं नामास्य ।]

१. कथकः ३.२३;२६
२. धौतपटोद्भवः ३.२२
३. शिवः ३.२४;२६

४. शिवपदः ३.२२

वेदाध्यापकः

['तोटन्तिल्लाय' इति तौळवं नाम ।]

१. अध्यापकः ३.५५
२. गुरुः ३.५२
३. धरणीसुरः ३.५१
४. पूगवनान्वयजो द्विजः ३.४९
५. ब्राह्मणगुरुः ३.५६

सहपाठी

[अयं 'तोटन्तिल्लाय' विप्रस्य पुत्रः वासुदेवनामा मध्वप्रियः बाल्यसहपाठीति सम्प्रदायः । एतेन साकमन्ये च क्रीडापटवः सहाध्यायिनो वटवश्चात्र निर्दिष्टाः ।]

१. प्रियतमः ९.४५
२. प्रियवयस्यः ३.५३
३. वासुदेवः ९.४७

भूतग्रहविशेषः

[रजतपीठपाजकयोर्मध्ये सम्प्रति 'कुक्किकट्टे' इति व्यवह्रियमाणस्य प्रदेशस्य समीपे 'सन्दोळिगेपाडि' इति प्रथिते कुञ्जे भूतालयोऽद्यापि विद्यते ।]

१. तत्क्रीडितग्रहः २.३३
२. महाग्रहः २.३४

अच्युतप्रज्ञशिष्याः

१. पञ्चषा द्विजाः ४.४९

अज्युतप्रज्ञसखः सशिष्यगणः

१. यतिः सखा बहुशिष्यसंवृतः ५.३

मायावादस्थापकः शङ्कराचार्यः

१. दर्शनाचार्यः १२.४
२. पापः १.४८

३. प्रच्छन्नबौद्धः	१.५१
४. मणिमान्	१.३९;४७
५. महातस्करः	१.५२
६. शठः	१.४९
७. सङ्करः	१.५४
८. सङ्कराख्यः	१.४७

तत्काले मायावादिकर्मन्दिनः

१. आचार्याः शङ्कराद्याः	१२.२१

तौळवमण्डलगत एको मायावादिगुरुः

[अयं पद्मतीर्थनामा।]

१. आर्यः	१२.९
२. कञ्जाख्यानः	१२.४६
३. चोळजः	१२.२
४. दुष्टात्मा	१२.४४
५. पद्माख्यः	१२.४२२
६. हास्यः	१२.४३

अन्यस्तौळवगुरुर्मायावादी

[अयं पुण्डरीकपुरीनामा ।]

१. चित्रकायाभिधानः	१२.३७
२. दुरात्मा	१२.३९
३. निन्दनीयः	१२.४०
४. द्रीपिपुरी	१२.२
५. पुण्डरीकाभिधानः	१२.२६
६. प्राज्ञः	१२.३८
७. मूढः	१२.२७
८. शार्दूलाख्यः	१२.४१

प्रथमं मध्वेन पराजितो वादी

१. वासुदेवपण्डितः	४.४३

अपरस्तर्कपण्डितः

१. खलः	५.१५
२. वादिवरः	५.१६
३. वादिसिंहः	५.८;११

बौद्धपण्डितः

१. खलः	५.१५
२. बुद्धिसागरः	५.८;१४
३. बुद्धयब्धिः	५.१६

श्रीमध्वेन शाङ्करभाष्यप्रवचने श्रोतारः

१. तर्कविशारदा जनाः	५.१७
२. विस्मेरधियः	५.१९
३. वचस्विनः	५.२०

कश्चिद् विष्णुमङ्गले

मध्वशक्तिपरीक्षकः

१. भिक्षाप्रदाता	५.३१

तत्काले जन्मान्तरगतः शङ्कराचार्यः

[अयं 'कुदिपुस्तूरु' ग्रामे पुनर्जात इति मध्व-विजयादेवावगम्यते ।]

१. अप्रांशुनूत्नोपपदाधिवासजः	५.३८
२. परः	५.४०
३. यतिवेषधारी	५.४३
४. सङ्करः	५.३८

दक्षिणक्षेत्रसञ्चारकाले श्रीमध्वेन

कृतवादाः प्रभाविताश्च

१. विदग्धाः पुरुषाः	५.४५
२. जिज्ञासवो द्विजेन्द्राः	५.५०
३. दिदृक्षुर्जनः	५.५१
४. सदसि गरिष्ठः	६.१
५. जिगीषवो भूसुराः	६.५
६. आकुलहृदः	६.८
७. साङ्गवेदचतुराः	६.९

८. वेदशास्त्रचतुराः ६.११
९. तर्कतन्त्रकुशलाः ६.१२
१०. द्विजवर्याः ६.१३
११. अन्यदेशजः ६.१३
१२. जिगीषुर्विप्रः ६.१४
१३. मत्सराकुलधियः ६.१५
१४. आग्रहेण वदन्तो विद्वांसः ६.१८
१५. सदसि सर्वबुधाः ६.२१

१.मध्वशिष्यः सत्यतीर्थः

१. सत्यः १०.२३
२. सत्यतीर्थः ६.५०;९.१३
३. सत्यात्मा १०.४९

२.मध्वशिष्यो हृषीकेशतीर्थः

१. निजशिष्यप्रवरः १३.४०
२. वशीकृतहृषीकः १५.१२८

३.मध्वशिष्य उपेन्द्रतीर्थः

१. उपेन्द्रनामकः १५.१२८
२. एकः शिष्यः १०.२१

४.मध्वशिष्यो मध्वानुजः

१. अध्यात्मकोविदः १५.११०
२. अनुजः ४.२६;१५.९६
३. अवरजः १५.९१
४. धीरधीः १५.९४
५. पवनांशानुजः १५.१०९
६. मध्वदासः १५.१०२
७. मध्वानुजः १५.११३
८. यतिशेखरः १५.१०६
९. योगमणिः १५.११२
१०. विमत्सरः १५.१०५
११. विश्ववेत्तुरनुजः ९.४८
१२. विष्णुतीर्थः १५.९८; १०३
१३. वेदवित् १५.९२
१४. वेदान्तगुरुसोदरः १५.९९

५.मध्वशिष्यः पद्मनाभतीर्थः

१. चतुरास्यः १५.१२४
२. तार्किकशिखामणिः ९.१८
३. पद्मनाभतीर्थः १५.१२०
४. बोधसागरः १५.१२५
५. वादिसिंहः १५.१२३
६. विद्वत्तिमिङ्गिलः १५.१२२
७. वेदप्रवचनाचार्यशिष्यः १५.१२६
८. वेदसारवित् १५.१२६
९. शोभनभट्टः ९.१७

अन्ये पञ्च यतिशिष्याः

१. नरहरितीर्थः १५.१२८
२. जनार्दनतीर्थः १५.१२८
३. वामनतीर्थः
४. रामतीर्थः १५.१२९
५. अधोक्षजतीर्थः १५.१२९

मध्वप्रियौ विष्णुतीर्थशिष्यौ

१. अनिरुद्धतीर्थः १५.११५
२. व्यासतीर्थः १५.११७

कश्चन भूपतिः

[सम्प्रत्युपलब्धशिलाशासनबलादयमपि कश्चन तौळवमाण्डलिक इति सम्भाव्यते।]

१. ईश्वरदेवः १०.४

कश्चन शूद्रभूपतिः

[अयं गोमतीतीरभूपतिरासीत्।]

१. धूर्तः १६.४
२. क्षितिपतिरन्त्यवर्णजन्मा १६.२

कश्चन यवनभूपतिः

१. त्वरकराजः १०.१०
२. नृपः १०.१३
३. राजा १०.१८

तस्य सैनिकाः

१. क्रूरकिङ्करसहस्रतयम् १०.१३
२. जडाः १०.११
३. त्वरकराजपुरुषाः १०.१०
४. नृपपूरुषाः १०.१९
५. परुषाः पुरुषाः १०.१५
६. परे १०.१२

व्यासाश्रमे व्यासशिष्याः

१. तापसाः ७.५५
२. मुकुन्ददासाः ७.५६
३. मुनिगणाः ७.५८
४. मुनीन्द्राः ७.५७
५. शिष्याः ७.५६
६. शुकमुखाः शुभपक्षिणः ७.३

गङ्गातीरे कश्चन भूपतिः

१. नृदेवः १०.३०
२. भूपः १०.३१

तत्र निवासिनो जनाः

१. भूदेवमुखाः १०.३०

कश्चन धूर्तो यायजूकः

[अयं मरडित्तायकुलोत्पन्नस्तदानीमेतत्परिसरे प्रधानपुरोधा आसीत्।]

१. खलः ९.४४
२. जराघटितगोत्रः ९.४४
३. पापपूरुषः ९.४५

तत्सहायकाः

१. अहितो जनः ९.४५

'बारकूरु' भूपतिः

१. भूधरः ९.४५

तत्र न्यायनिर्णायका ग्रामप्रधानाः

१. समर्थाः ९.४५

मध्वकथाकथको मध्वभक्तः

[वस्तुतस्त्वयं कविर्नारायणपण्डित एव स्यात्]

१. कश्चित् दशमतिशिष्यः १०.२

अपरः कथकः

१. कोऽपि कोविदः १६.१
२. धरणीसुरः १६.४९

यात्राकाले लुण्टकाश्चोराः

१. चोराणां निकरः १०.२०
२. दस्यवः १०.२२
३. शूराः शतसङ्ख्याश्चोराः १०.२१

चोरनायकः

१. यूथ्यः १०.२१

कश्चिद् व्याघ्ररूपी दैत्यः

१. व्याघ्राकारो दैत्यव्याघ्रः १०.२३

कश्चिद् सर्परूपी दैत्यः

१. सर्पमयोऽसुरः ३.३८

गङ्गायां प्लवयन्तारः

१. तारकाः १०.३१

गङ्गातीरे मिळिता सभा

१. जनता १०.३२
२. पण्डितमण्डलम् १०. ३२

मूर्तिमती गङ्गा

१. देवनदी १०.३५

२. मूर्ता १०.३६

काश्यां वादार्थमागतो मायावादी यतिः

[अमरेन्द्रपुरीति तस्य नामधेयम्।]

१. अमरावतीपदो यतिः १०.४२
२. उग्रधीः १०.४३

आगामिकल्पीयमारीचः

१. भाविमारीचः १०.४९

मूर्तिमान् शिवः

१. विप्रात्मा ईशः १०.५०

तद्भक्तः कश्चित्

१. अन्यस्थलगनिजनरः १०.५०

कश्चिन्मध्वपरीक्षकः

१. शङ्करपदद्विजः १०.५२

'गोवा' देशभूपतिः

१. नृपः १०.५२

तत्परिवारः

१. नृमण्डलम् १०.५३

'पशुपे' ग्रामे सङ्गीतसभा

१.जनता १०.५३

प्रवचनशुश्रूषया रजतपीठपुरे गगनगतः शेषः

१. अनन्तः ११.२
२. फणिराट् ससनकादिमुनिः ११.१
३. भगवान् ११.४
४. भूरिदयः ११.४
५. लोकपतिः ११.३

तेन सहाऽगताः सनकादयः

१. मुनयः ११.२
२. सनकादिमुनयः ११.१।

तत्ववादप्रसारं निरोद्धुं तौळवमण्डले मिळिता मायावादिनः

१. पापाः १२.२
२. मायिगोमायवः १२.१
३. मायिजनः १३.६५
४. वक्राः १२.२५
५. हंसाः १२.१५

तत्रैको वक्ता

१. कोऽपि वाचालः १२.३

अपरो वक्ता

१. अन्यो मानी १२.१७
२. कष्टः ''
३. मन्दचेताः ''

मध्वपुण्डरीकपुर्योर्विवादसाक्षिण आम्नायज्ञा विद्वांसः

१. अनेकसङ्ख्या विप्राः १२.३०
२. सौम्या ब्राह्मणाः १२.३७
३. शुभजननिकरः १२.५४

मध्वान्तेवासिगणो भक्तगणश्च

१. अनुगाः ९.५५;१०.३६,
२. अभीष्टः १४.४१
३. अवनिदेवाः १४.४९
४. एके १४.२१
५. कश्चित् १३.१८
६. कोऽपि कोविदः १६.१
७. कोऽपि शिष्यः १४.१०
८. चत्वारः शिष्याः १५.८९
९. धन्यसन्यासिवर्गः १४.१८
१०. धरणीसुरः १६.४९

११. निजाः ९.५५;१३.१६
१२. निजाः शिष्याः १०.८
१३. पञ्चदश युवानः १०.३९
१४. पञ्चाङ्गविदः १४.१४
१५. परिवारजनाः १३.२०
१६. पुरुषाः १३.६६
१७. बहवो गृहिणः १५.१३५
१८. बहुदेशजा यतीन्द्राः १५.१२७
१९. ब्राह्मणाग्रण्यो ग्रामण्यः १५.१३७
२०. यतधीः १३.१३
२१. यतयः १३.११
२२. यतिः १४.१२
२३. युवशिष्यगणः १३.१४
२४. वाचकाः १४.२४
२५. व्रतीन्द्राः १४.८
२६. शतसङ्ख्या गृहिणः १३.१९
२७. शतसङ्ख्या यतयः, ,,
२८. शतसङ्ख्या वर्णिमुख्याः ,,
२९. शिष्याः ६.४१;४६;४९;१०.२७;
३१;३६;१२.१४;१४.९;
१३;१६.१०
३०. शिष्यसङ्घाः १३.१०
३१. श्रावकाः १४.११;१७;३१;४४
३२. श्रावकाग्र्यः १४.४४
३३. सुधीः १३.१२
३४. संयमी ४४.३३
३५. स्वशिष्याः १०.३७
३६. स्वीयाः १०.२०
३७. स्वे शिष्याः १६.६

गृहस्थास्त्रयः प्रधानशिष्याः

[त्रिविक्रमार्यः शङ्करार्यनामानौ द्वौ । तत्रैकः शङ्करार्यस्त्रिविक्रमार्यानुजः ।]

१. त्रयो लिकुचशेखराः १५.१३५

कश्चन सह्यवासी शिष्यः

१. निजशिष्यः १३.१

मध्वशिष्यपरम्परा

१. मध्वप्रशिष्याः
२. एषां प्रशिष्याः १५.१३२

मध्वभक्तस्तौळवभूपतिः

[अयं 'कबेसिंह' इति तदात्वे प्रीत्या प्रजाभिरभ्यधीयत ।]

१. जयसिंहः १३.२१
२. नरदेवः १३.२४;३९
३. नृपः १३.२
४. पृथिवीपतिः १३.२३
५. पृथिवीभृत् १३.१
६. भूमिभर्ता १३.२६
७. स्तम्भविशिष्टसिंहनामा १३.२१

जयसिंहराज्येऽधिकृताः

१. ग्रामण्यः १४.३
२. प्रभवः १४.२
३. विविधप्रभवः १३.३९

अङ्गरक्षकाः

१.सैनिकाः १३.२२

परिगता द्विजाः

१. केचन भूसुराः १३.२२
२. जनौघः १४.३१

जयसिंहदूतः

१. कश्चित् पुरुषः १३.१

जयसिंहराज्ये मध्वजिज्ञासयाऽऽगताः

१. जनपरिवारः १४.४०

२. चोदकाः १४.२५

तत्र मध्वदिदृक्षयाऽऽगताः

१. उभयग्रामजनाः १३.२४
२. उरुजनौघः १३.३७
३. ग्राम्याः १४.३
४. जननिकायः १४.३२
५. जनसम्बाधः १३.३७
६. जनौघः १४.३१
७. जनौघाः १४.४२
८. लोकाः १४.४५
९. विविधजनपदस्थाः १४.४३
१०. सत्त्वभाजः १४.१८

'कळस'ग्रामे शिलानेतारः

१. जनता १६.८
२. दशशतपुंसः १६.७

कण्वतीर्थक्षेत्रे ग्रहणस्नानार्थमागताः

१. अपरे १६.१२
२. असज्जनः १६.२१
३. इतरे १६.१०
४. ग्रामीणाः १६.११
५. जनजलधिः १६.१७
६. जनता १६.१८
७. जननिकराः १६.२०
८. दुर्जनः १६.२४
९. द्विजनिकराः १६.१९
१०. नीचाः १६.२२
११. शिष्याः १६.१०
१२. शुभाः १६.१२

मध्वपरीक्षार्थमागतः कश्चिन्मल्लः

[अयं तौळवः 'कोडिञाडि' इति, 'कोडिम्बाडित्ताय' इति च कुलनाम्ना प्रसिद्धः ।]

१. गण्डवाटः १६.२५

तस्याग्रजः

१. सहजः १६.२५
२. तज्ज्येष्ठः १६.२७

परीक्षाचोदकाः

१. लोकाः १६.२५

स्वलघिमशक्तिप्रदर्शनाय मध्वेनाधिरूढो बालः

१. वटुः १६.३०

अन्यो मल्लः

[अयमपि तौळवः 'मूडेम्बाडित्ताय' इति कुलनाम्ना विदितः ।]

१. पूर्ववाटः १६.३१

अपरे मल्लाः

[एतेऽपि तौळवाः, 'शिवत्ताय', 'अग्गित्ताय' इत्यादिकुलनाम्ना विदिताः ।]

१. शिवाग्निपूर्वाः १६.३५

पारन्तीसुरसदनोद्धारे सहकर्तारः

[पारन्तीदेवालयस्य तौळवमण्डलस्थस्य 'केवुडदेल' इति, 'केटदेवल' इति च तौळवं नाम भावप्रकाशिकायां पठ्यते । सम्प्रति पारन्तीग्रामः 'पारेन्तबोट्टु' इति , 'बाळ्तोट्टु' इति, 'केळ्देबैलु' इति च व्यवह्रियत इति वदन्ति । सम्प्रत्यपि विवादग्रस्तोऽयम् ।]

१. ग्राम्याग्रयाः १६.३६
२. क्षितिपतिः ''

मध्वविरोद्धारः सरिदन्तरग्रामजना ग्रामणीश्च

[अयं ग्रामस्तौळवभाषायाम्, 'इडेतुदे' इत्युच्यते। समग्रस्य प्रदेशस्य 'रामकुञ्ज' इति प्रथितं नाम ।]

१. खलपटलानि १६.३९
२. ग्रामेशो वृषळपतिः ''

'कोकड'ग्रामे कश्चन भक्तः

[अयमपि तौळवः, 'इडेपाडित्ताय' इति, 'एडेपाडित्ताय' इति वा कुलनाम्ना प्रसिद्धः ।]

१. स्वभक्तः १६.४०

उच्चभूतिग्रामस्था याज्ञिकाः

[अयं तौळवग्रामः, 'उजेर्य' इति पुरा प्रथित आसीत् । 'उजिरे' इति साम्प्रतं नाम ।]

१. अशुभनिकरः १६.४६
२. विद्वांसः १६.४१
३. विपक्षसङ्घः १६.४४

बदरीयात्रायां भिक्षाप्रदातारः

१. अग्निशर्ममुखाः पञ्चषा द्विजाः ९.७४१।

अथ देशनामानि

मध्वजन्मभूमिः

[अस्य 'पाजै' इति 'बेळ्ळे' इति च तौळवं नाम । 'विमानगिरेः' 'कुञ्जारु' इति । शिवरूप्यस्य 'शिवळ्ळिग्राम' इति ।]

१. अवतारभूः १५.९५
२. पाजकपदं क्षेत्रम् १२.१०
३. विमानगिरिः २.११
४. शिवरूप्यम् २.१०

'उडुपि' क्षेत्रम्

१. अवनिभागः १६-५४
२. भृगुकुलतिलकस्थानम् १०.१
३. रजतपीठम् ९.५५
४. रजतपीठपुरम् २.१५;३.५
५. राजतासनपुरम् ९.२९
६. रूप्यपीठम् २.२४
७. रूप्यपीठपुरम् ९.४०
८. रूप्यपीठायतनोत्तमम् ५.१०
९. रूप्यपीठालयः १२.२६

मध्वसञ्चरणस्थानानि

१. अतिभीमं वनम् (ಸಂದೊಳಿಗೆಪಾಡಿ, ಕುಕ್ಕಿಕಟ್ಟೆ) २.३३
२. अनन्तमठः(बदरीक्षेत्रम्) ६.४४
३. अनन्तसत्पुरम्(स्यानन्दूरम्-तिरुवनन्तपुरम्) ५.३६
४. अन्यदायतनम् (विष्णुमन्दिरम्, ಬೈಲಂಗಡಿ) ६.११
५. अमरधिष्ण्यम्(जनार्दनदेवालयः, ಕೊಡಿಪ್ಪಾಡಿ) १२.५४
६. अमरालयः(विष्णुमूर्तिदेवालयः, (ಕಾವುಗೋಳಿ) १५.१
७. आश्रमः (व्यासाश्रमः) ७.५;२२;५९
८. आश्रमान्तरम् (नारायणाश्रमः) ८.७
९. आश्रमान्तरम् (नारायणाश्रमः) ८.६
१०. आश्रमान्तरम्(व्यासाश्रमः) ९.२
११. इषुपातः १०.५१
१२. उच्चभूतिः(ಉಜೆರ್ಯ-ಉಜಿರೆ) १६-४१
१३. उत्तमाश्रमः(व्यासाश्रमः) ९.५३
१४. उभयग्रामः(वाटः-समवायः-ಪಾಡಿ-ಕೂಡಲ್) १३.२४
१५. कण्वतीर्थम् १६.११
१६. कन्यकातीर्थम्(ಕನ್ಯಾಕುಮಾರಿ) ५.४२
१७. काननदेवतासदनम् (ಕಾನಂಗಿ, ಕೊಡವೂರು, ಶಂಕರನಾರಾಯಣ, ಕ್ರೋಢಾಶ್ರಮ) ३.४,
१८. किञ्चित् सदः(शिवमन्दिरम् (ಚೆಮ್ಮಾಡು-ಶಂಭುನಾಡು) ६.१७
१९. कौरवं क्षेत्रम्(कुरुक्षेत्रम्) १०.४९
२०. गङ्गा ६.३६;४३;१०.२६
२१. गोदावरीतटम् ९.१४
२२. गोमत्यास्तटम् १६.२
२३. गोवा १०.५२

२४. गोविषयः(ಪಶುಪೆ) १०.५३
२५. ग्रामः(ವರ್ಕಾಡಿ) १५.१४०
२६. ग्रामवरः (ಕುತ್ಯಾಡಿ) ४.१९
२७. ग्रामोत्तमः(ಅಡೂರು) ५.४९
२८. घृतवल्ली (ನೇಯಂಬಳ್ಳಿ) ३.२१
२९. तुङ्गा (भद्रातीरम्, ಕಳಸ) १६.९
३०. देवायतनम् (महालिङ्गेश्वर-मन्दिरम्, ಅಡೂರು) ५.४९
३१. निजबन्धुगृहम् (ನಡುವೈರ-ತೆಂಕನಿಡಿಯೂರು) ३.१
३२. नृसिंहगेहम् (ನಾರ್ಶ್ಯ) १६.३०
३२. पयस्विनी ५.३५
३३. परमाश्रमम् (व्यासाश्रमः) ७.१
३४. पारन्तीसुरसदनम् (ಕೇವುಡದೇಲ-ಕೇಟದೇವಲ-ಪಾರೆಂತಬೊಟ್ಟು-ಬಾಳೊಟ್ಟು-ಕೇಳ್ದಬೈಲು) १६.३६
३५. प्राग्रवाटः(ಕೊಡಿವಾಡಿ) १२.५४
३६. प्राळेयाद्रेः प्रान्तः १०.२३
३७. बदरिकाश्रमः ६.३७
३८. मठान्तरम्(ಕಾಯ್ಯೂರು ಮಠ) ४.१९;५.९
३९. मठान्तरम् (हस्तिनपुरे) १०.३४
४०. मदनाधिपतेर्धाम (मदनेश्वरमन्दिरम्, ಮದವೂರು-ಮಧೂರು) १३.९
४१. मदनेश्वरवल्लभप्रदेशः १३.२१
४२. महानदी(नेत्रावती) ४.१९
४३. महेन्द्रदिगालयः (ಮೂಡುದೇವಾಲಯ-ಚಂದ್ರೇಶ್ವರ, ಉಡುಪಿ) ३.१३
४४. मुरारेरायतनम् (ಕಾವುಗೋಳಿ) १३.३८
४५. लघुनाळिकेर्युपपदान्तरसद्म (ತಾಳೆಕುಡೆ-ಬನ್ನಂಜೆ) ३.४
४६. वाराणसी १०.३७
४७. विष्णुपद्यास्तटम् १०.८
४८. विष्णुमङ्गलम् ५.३०;१३.२३;६९
४९. श्रीकान्तेश्वरसदनम् (ಕಾಂತಾವರ) १६.२६
५०. श्रीरङ्गम् ५.४७
५१. सन्मठः(ಶಾಂತ್ಯ) १५.१४०
५२. समुद्रसेतुः(धनुष्कोटिः) ५.४२
५३. सरिदन्तरम्(ಇಡೆತುದೆ-ಎರ್ಕಮಠ, ರಾಮಕುಂಜ) १६.३८
५४. सह्यः १३.१
५५. स्तम्भपदोपसर्जनाख्यो विषयः (ಕಬೆನಾಡು-ಕಾಸರಗೋಡು) १३.९
५६. स्वस्तटिनीतटम् १०.३२
५७. स्वारामः(ಕಾವು) १२.५४
५८. स्वाश्रमः(व्यासाश्रमः) ६.४५
५९. हस्तिनराजधानी १०.३४
६०. हृषीकेशदेशः १०.५०
६१. क्षेत्राग्रयम्(ಕೊಕ್ಕಡ) १६.४०

विष्णुतीर्थतपोभूमिः

१. गुहप्रियो महीध्रः(कुमाराद्रिः) १५.११९
२. हरिश्चन्द्रमहीधरः १५.१०४

शङ्करजन्मभूमिः

१. अञ्चितळम्(ಕಾಲಡಿ) १.४७

—०—

८ श्लोकार्धानुक्रमणिका

अ

अकळङ्कतया परं विविक्तं १३/३३
अकामानामनेकेषां १५/१०४
अक्लिष्टं तत्सूत्रभाष्यं बलीयो- १२/१३
अक्लिष्टशब्दान्वयमेष सम्भव- ५/२१
अखण्डखण्डनन्यायान् १५/२७
अखण्डयदखण्डज्ञो- १५/२७
अखण्डयद् व्यक्तमखण्डधीरिदं ५/४
अखण्डितोपन्यसनं विसंशयं ४/४८
अखिलखलकुलानां वर्धयन् द्वेष- १४/६
अगणयन्न शिवं जनता तदा ३/२४
अगणय्यगुणार्णवोऽमलः ७/१८
अगणय्यगुणैः सुपूरितं ७/२४
अगणय्यसद्गुणगणो विदूषणः ८/१३
अगणितगुणमुच्चैस्तोषयन् शार्ङ्ग- १४/३६
अगमदुचितमन्त्रैस्तूद्यानां १४/१४
अगाधमात्मन्यतिवेलमुद्धतं ५/१४
अग्निशर्ममुखपञ्चषैर्द्विजै- ९/७
अग्राहि पद्मोदरसुन्दराभ्यां १/१२
अङ्गुष्ठमात्रं जठरप्रतिष्ठितं ५/३३
अङ्गो तापस नो शून्यं १५/२९
अचलासनयोगपट्टिका ७/३०
अचाल्यमानः सगुरुः स चापलै- ५/४६
अचिरेण स विष्णुमङ्गलस्य १३/२३
अचूचुरद् वेदसमूहवाहं १/५२
अच्युतप्रमतिरच्युतप्रियं ९/३०
अच्छाम्बरेव रजनी परिपूरिताशा २/२३
अजयश्चतुर्दश जगन्ति सद्गुणैः १६/५६
अजितपरमभक्तः सन्ततं मन्य- १४/३९
अजितौ परस्परसभाजितौ स तौ ८/४२
अतत्वावेदकं मानम् १५/३२
अतत्वावेदकं वेदं १५/२५
अतिकान्तकाञ्चिपदकाञ्चिमिळत्- ११/६८
अतिचित्रधाम्नि निजधाम्नि रतं ११/२
अतिचित्रविचित्रपत्रिणं ७/१२
अतिदक्षमतिं सपादलक्षे १३/५१
अतिदुर्जयेन्द्रियजयादिरूपिणा ८/८
अतिधवळितदन्ता दन्तकाष्ठैः १४/८
अतिनूतनतिग्मभानुभासां १३/३१
अतिपाटलपादपल्लवाभ्या- १३/२८
अतिभासितं घनगुणापघनै- ११/७१
अतिभासुरकर्णभासितश्री- १३/३५
अतिलोलदृशां समीक्षितुं स्वं १३/३७
अतिलौकिकान् रमयतो रमणान् ११/५९
अतिशान्तवपुर्निशाकरः ७/७
अतिसम्भ्रमतः परिभ्रमन्तं १३/१५
अतिसुन्दरमन्दहासराज- १३/३४
अतिसुन्दराः सुरभयः पुरुषा ११/२५
अतीत्य देशान् समयांश्च चारुधी- ५/३४
अतो न याया इति तं तदाऽवदत् ४/४१
अत्यजद् विफलधीः प्रदक्षिणा- ९/२१
अत्यवर्तत नितान्तमथासौ ६/३६

अत्र जन्मनि न यत् पठितं ते ४/५३
अत्रस्तमेव सततं परिफुल्लचक्षुः २/३१
अत्रानन्तस्वान्तवेदान्तसिंहे १२/१
अथ कथं कथयेति तदा जने ३/२५
अथ कदाचन सुन्दरनन्दन- ३/१
अथ कदाचन सोऽध्ययनान्तरे ३/५०
अथ खण्डितेश्वरधनुः स लीलया ८/२५
अथ तत्क्षणघट्टितोरुघण्टा- १३/१६
अथ तयोः प्रमदोत्थितमप्यदः ३/१०
अथ तस्य स वेदिकान्तरे ७/१४
अथ दशशतशोचिष्याप्रयाति १४/२६
अथ प्रायुङ्क्त विविधान् १५/६५
अथ बादरायणसहायसम्पदा ८/६
अथ भार्यया हुतवहं प्रविष्टया ८/३४
अथ माधवतीमपास्य काष्ठां १३/३
अथ हैमवते तटान्तरे ७/१
अथ वेदपुराणभारतानि १३/६०
अथापि मिथ्या विमतं मतत्वतो- ५/५
अथेष्टसिद्धिरछलजातिवारिधि- ४/४४
अथैष वेषान्तरभस्मलीनः १/४०
अथैष सल्लोकदयासुधार्द्रया ४/१
अथोपगम्यैष गुरुं जगद्गुरुः ४/३०
अदभ्रचेता अभिषिच्यते पुरा ५/१
अदारिभावेन जगत्सु पूज्यो १/३२
अदार्यसालावलिदारणेन १/१३
अदीर्घान्याभिधाना ये १५/१२९
अधरीकुरुते स्वशोभया ७/३८
अधार्याणीतरजनैः १५/६७
अधिकधिषणमेनं व्याख्यया १४/४५
अधिकं धरणीमलश्चिकीर्षु १३/२७
अधिकममरनद्याद्याप्लवाद् धन्य- १४/२९
अधिकारिणां गुणविशेषवशात् ११/७१
अधिकारिणां फलमलं विदुषां ११/४
अधिगता ननु जात्वपि नश्रुताः ३/५४
अधिगतोपनिषच्च सकृच्छ्रुता ३/५४
अधिजानु समर्पितं परं ७/३६
अधीत्य धर्मेण षडङ्गमागमं ५/५०
अधुना कलिकालवृत्तये ७/२२
अधुना विधिनोपपादितं तं १३/६४
अध्यापकाय विततार विमोक्षबीजं ३/५५
अनतिपरिचितस्याप्यस्य सोऽयं १४/५
अनतिविरळभावा अप्यनन्योन्य- १४/२०
अनधिकैरधिकैश्च वयस्यथो ३/४३
अनन्तबोधस्यानेके १५/१२७
अनन्तमतिकारुण्य- १५/१०१
अनन्तमात्रान्तमुदाहरन्ति यं ४/३२
अनन्तोऽर्थः प्रकटित- १५/८२
अनन्यसङ्गाद् गुणसङ्गिता हरे- ४/२
अनयोः प्रथमे शिष्या- १५/१२७
अनयोरपि दभ्रविभ्रमात् ७/४३
अनयोर्नियोगमधिरोपितवान् ८/५३
अनवलोक्य सुतं सुतवत्सलो- ३/८
अनवेक्ष्य परं स्वभीष्टकर्त्रे ९/५४
अनसूयया शुचिमनीषया धृतः ८/३८
अनाकुलं गोकुलमुल्ललास १/२
अनानावयवेत्येव १५/४
अनार्द्रवासाः स कुतूहलार्द्रे- १०/३०
अनिकटे वटुभिः पटुभिर्गुरोः ३/४३
अनिरुद्धपदाधारः १५/११५
अनुकूलगुणस्वरादिभाजा १३/४०
अनुकूलवचा महिष्ठमानो १३/६५
अनुग्रहं तं प्रतिगृह्य साग्रहं ४/३९
अनुत्तरज्ञः स तमर्थयन् पुन- ४/१८
अनुपालिताः स्वदयितैर्दयिताः ११/३६

अनुभूयते सुखमनन्तसखैः ११/२४
अनुयोगपरं मुहुः प्रमत्तं १३/१५
अनुरञ्जयन्ति नवकञ्जदृशो ११/२६
अनुरूपरूपमतिलोकसुखं ११/५९
अनुवीक्षितुं तनुविलासमिमं ११/३५
अनेन निर्यत्नमवार्यविस्मय- ५/३१
अनेन सत्यं विमतं मतत्वतो ५/५
अनैकान्तिकता हेतोः १५/५३
अन्यत्र च चोरान् धन्यप्रवरोऽसौ १०/२१
अन्यो जनोऽपि किल लाळयति २/४२
अपनेतुमेनमनयं कृतं खलैः ८/४६
अपरं च किञ्चिदशुभं न भवे- ११/२३
अपरथा कथितं कथक त्वया ३/२३
अपरथा परितुष्टमनाः कथं ३/१७
अपरस्परमत्सरप्रजं ७/४
अपरस्परसङ्गतानि भाष्या- १३/५५
अपराविदितः प्रसादगर्भं १३/६७
अपरिमितमनीषस्योल्लसच्छङ्ख- १४/२८
अपरैः श्रुतिस्मृतिनिजार्थदूषकैः ८/४५
अपरोऽपीष्यतेऽस्माभि- १५/८६
अपहृतमपरेषां मन्त्रतो ग्रन्थजातं १४/२
अपक्षपाती पुरुषस्त्रिलोक्या- १/१६
अपि किङ्करीदशशतीमहिता ११/१६
अपि कृष्ण इत्यभिहितो मुदे सतां ८/४०
अपि केनचिदित्यदो न चित्रं १३/१८
अपि चोदिता अधिरुहन्ति शनै- ११/५३
अपि ततोऽहमुपेत्य सहामुना ३/१४
अपि ततः प्रगतो लघु नाळिके- ३/४
अपि तथेति विधाय विशेषतः ३/७
अपि तस्य लोकमतिलोकगुणं ११/२२
अपि तारतम्यसहितैः ११/२४
अपि त्रिलोक्या बहिरुल्लसन्ती १/३
अपिधाय सूत्रहृदयं सतां प्रियं ८/४५
अपि न तस्य मतं सहसाऽऽददे १३/६८
अपि नादिरायणपदोदितं हरे- ८/६
अपि बुद्ध्यादिरहितः १५/४९
अपि भङ्गमुपानयन्ननम्रान् १३/५
अपि भानुपुरस्सराः समस्ताः १३/५०
अपि भूतपञ्चकमितोऽण्डमण्डलं ८/११
अपि मन्युमदादिवर्जितान् ७/१५
अपि मानुषभावविग्रहो ७/८
अपि लीलया कुवलयोल्लसितै- ११/३४
अपि वामनो लळितबाल्यवानयं ८/१७
अपि विष्णुपदस्पृशोऽलस- ७/२
अपि सङ्कथाः श्रुतिसुखाः ७/५८
अपि सप्ततया विराजितान् ७/१५
अपीह मायासमये पटौ नृणां ४/४६
अप्यतोऽतिशयिनीं शुचिस्मितं ९/३१
अप्यदूष्यमतनोदनन्तधी- ९/१२
अप्यद्वन्द्वस्वात्मबोधप्रतीतै- १२/२१
अप्यनागतगतप्रतिपत्तिं ६/२०
अप्यल्पबोधा अपरे १५/१३४
अप्यल्पोऽसौ नह्युपेक्षाम्बभूवे १२/२८
अप्युपेक्षितविकर्षणदुःखां ६/२८
अप्येवं भुवनगुरोः कृतानुवादः १६/४८
अप्रकम्प्यवपुषं सुरासुरैः १०/१४
अप्रत्यक्षगुणोद्रिक्ता १५/१२९
अप्रमेयमतिशास्त्रमीदृशं ९/२२
अप्रमेयहृदयं प्रसादवत् ९/१०
अप्रयातमपि देशमशेषं ६/२२
अप्रांशुनूत्नोपपदाधिवासजः ५/३८
अप्लवदेवनदीतरणं ते १०/१६
अभवद् गुहनामको विपश्चित् १३/४३
अभजद् भुवनप्रभू हरीशौ १३/४४

अभावभावस्याभावाद् १५/३६
अभिकान्तमुन्नमितकान्तकुचा ११/५४
अभिदधति मुनीन्द्रा द्वादशाब्दो- १४/२९
अभिनन्दयन् हिमऋतुं सुसखा ११/४३
अभिनन्दितः पवननन्दनादिभिः ८/३१
अभूत् कुशास्त्राभ्यसनं न पातकं ४/८
अभूदसङ्गोऽपि स तत्सुसङ्गवा- ४/३९
अमन्दधीर्देवमवन्दताऽगतः ५/४७
अमरेन्द्रवैरिभुजदण्डमण्डल- ८/१५
अमरैरमरानुगैर्मुनीन्द्रै- १३/७
अमरैराश्रितच्छायं १५/७८
अमितप्रमतिः प्रचोदितोऽसा- १३/१६
अमितप्रमतिं श्रुतीश्वरः ७/५२
अमितां मितामपि गिरं जगद्गुरो- ८/४७
अमुचदमपसरेति श्रावकोक्तेः पुरा १४/३१
अमुं धृताषाढमवेक्ष्य मेनिरे ४/३४
अमुष्मै पश्चतपसो- १५/९७
अमुष्य शिष्या अनुमानशिक्षिता- ५/३
अमुष्य शिष्या विनयेन तस्मै ७/५६
अमृतमपि निरीक्ष्याऽस्रावि १४/१३
अमृतं पिबन्त्यसुलभं भविभि- ११/५२
अमृतस्रगुत्तमफलप्रसवा- ११/४५
अमृतात्ममहाफलप्रदं ७/१३
अमृताहिराजमृदुभोगगतः ११/१७
अम्भोजनाभं स भुजङ्गशायिनं ५/३६
अम्भोधेस्त्वरिततरोर्मिपाणिमृष्टे १६/१६
अयमप्रतिवारणः प्रयाणे १३/८
अयमयत्नतयेति न विस्मयो- ३/४४
अयमाप्य धाम चिरमिष्टदः सतां ८/३४
अयमुदीर्य तदर्थमवाप्तवान् ३/३०
अयमेव गोविषयतोऽपि १०/५३
अयि कृपालय पालय बालकं ३/१५
अयि सुतेदमुदाहर तत्त्वतो- ३/११
अयि स्वामिन् दुष्टान् दमयदमय ३/५६
अरतिविरहितः सोऽनारतं ना- १४/२५
अरमयदिह नानाहृद्यविद्याविलासैः १४/४०
अरिधरेण समं स्फुरितं गुरो- ३/४२
अरिवारिजध्वजकळङ्कलसत्- ११/६९
अरिवारिजलक्षणोल्लस- ७/३५
अरुणतरणिबिम्बच्छद्मना पद्म- १४/४७
अरुणतरणिरत्यच्छाम्बरा १४/१६
अरुणप्रभाश्च तरुणाभ्ररुचो ११/२१
अरुणयवनिकान्तर्ब्रह्म नारायणा- १४/७
अरुणाश्मदलान्तरोल्लस- ७/३९
अरुणाश्मवर्णतनवस्तनवः ११/२८
अर्चयन् सततमाप सम्पदो ९/२५
अर्थं कमप्यनवमं पुरुषार्थहेतुं २/१२
अर्थान्तरं प्रकटयन् १५/६८
अलश्चक्रुरलं पृथ्वीं १५/१३२
अलभिष्ट यदेष धन्य इ- ७/५५
अलमलमनुवादेनानुवाच्येत पश्चात् १४/४४
अवगम्य तं मुनिगणा वरिष्ठतो- ७/५८
अवतारभुवं प्रायाद् १५/९५
अवतीर्य पुरैव वाहनात् स्वा- १३/२२
अवदतीति पितर्यपि चोदिते ३/३०
अवदत् स कथां रथाङ्गपाणे- १३/४०
अवधार्य यदेति कार्यमार्यः १३/६१
अवधार्य विशेषकारिशङ्क- १३/१२
अवनाववनाय संविदां ७/२१
अवन्दतोपेत्य गुरुं गरिष्ठधीः ५/१०
अवभाति ननु प्रभाप्रभावी १३/४७
अवनिरनभिनन्दिन्यप्यदश्चक्षमे १४/३२
अवनिवनवनध्रुग्वायुखाहम्महत्सु १४/४८
अवर्ण्यो महिमा तस्य १५/१०१

अवलोकितलक्षणः स तै- ७/१०
अवलोकितवानानन्तधी- ७/१४
अवलोक्य कृतार्थतामगां ७/४५
अवलोक्य पुनःपुनर्नवं ७/१७
अवलोक्य लोकपतिरानतं महा- ८/४३
अवसरमधिगम्य भ्रूविजृम्भादभीष्टो- १४/४१
अवादि वाणी बलिनः स्वशिष्या- १०/३७
अवाप्तवान् पुनरिषुपातमस्मरद् - १०/५१
अविकारिणे स्फुटमनन्तरूपिणे ८/४१
अविदितरसभेदं शीतळं लघ्वगन्धं १४/३३
अविदुषामिति सङ्करताकरः १/५४
अविदुषी जननीति स बालकः ३/२
अविरळैर्गरळोष्मभिराकुली- ३/३८
अविशेषत्वतश्चास्य १५/२६
अविळम्बगतिर्न्यशामयत्- ७/१०
अवेक्ष्य दस्यवः पुनः १०/२२
अवैदिकं माध्यमिकं निरस्तं १/५०
अव्यक्तया प्रथमतो वदनेऽस्य २/४३
अव्यक्तरूपे श्रियमत्यजन् द्राक् १०/२९
अव्ययं सततमप्युपभुक्त्या ६/३२
अशनकैर्युगपत् प्रकृताहवान् ३/४७
अशनैः शनकैरिवाऽव्रजन्तं १३/२८
अशुभानपहाय मायिजुष्टा- १३/४
अशृणोदनन्तहृदनन्ततोऽचिरात् ८/४
अशेषशिष्यैश्च तदाज्ञया तदा ४/५२
असङ्गमस्मात् प्रकटीकरोम्यहं ४/२
असत्त्वादित्यसौ हेतु- १५/३९
असत्पदेऽसन् सदसद्विविक्तं १/५१
असमेऽनधिके सुसाधिते ७/३४
असमोत्तमो मतोऽसौ १०/४७
असावनुज्ञार्थमथानमद्धरिं ४/४
असावसूयन् द्विनवप्रकारतो ५/१२
असाविदानीं च निषेवमाणो १/२७
असुराहितां वरविलासिनीतनुः ८/३७
असूययोचेऽत्र महानतिक्रमः ५/३८
असेवताऽलोच्य मुहुर्गुरोर्गिरं ४/१२
असौ दास्यं ध्रुवं यातं १५/११८
अस्तदूषणमवन्ध्यभाषणं ९/११
अस्मभ्यमाचक्ष्व विचक्षणोचितं ५/२८
अस्मिन्नस्मद्दर्शनापायकाले १२/१६
अहमहमिकयाऽऽशु प्राप्य पार्श्वं १४/४२
अहमिहापि महेन्द्रदिगालयं ३/१३
अहरो दुरागमतमः स्वगोगणै- १६/५६
अहो आत्मपरिज्ञास्यै १५/८२
अहो महाबोधसेवा- १५/११४
अहो मुहूर्तादयमप्रयत्नवा- ५/१६
अहो विधात्रा स्वयमेव दापिता ४/१७
अहो हनूमन्नववारिदोऽसौ १/१५
अहं स्वयं ब्रह्म न किञ्चिदस्ति मत्- ४/१०
अळिकार्धचन्द्रविलसत्तिलकं ११/६३

आ

आकर्ण्येत्थं तस्य वाणीमथान्यो १२/१७
आकृष्टोऽस्य गुणैर्व्याप्तै- १५/१२०
आक्रन्दं मे हन्त शृण्वन्तु सोऽयं १२/७
आक्रान्ताः प्रबलतरैश्च लोड्यमाना १६/२०
आक्रान्तोऽधिकगुरुणा स तेन १६/२३
आख्यानितीव सुरदुन्दुभिमन्द्र- २/२६
आज्ञादेशादुत्तरं रादिशब्दं १२/४०
आचरन्नसुचिरात् सुविचारो ६/२३
आत्मनो भेदरहिता १५/५७
आत्मनः प्रियतमक्रतोरमुं ९/४५
आत्ममज्जनत एव निकामं ६/३५
आदर्शं गुणगणदर्शने मुरारेः १६/५३
आदाय व्यतनुत बीजमोषधीनां १६/५

आदेशमौलिमणिमुज्ज्वलवर्णमेनं	२/४	आश्चर्यरत्नेष्वधिकं जगत्त्रये-	११/७३
आदौ ह्रस्वत्वेन वत्सानुसृत्यां	१२/३२	आश्रमान्तरमवाप्य कृष्णतः	९/२
आध्वर्यवं युद्धमखे प्रतिप्र-	१/१८	आश्रमे निजजनानिह दृष्ट्वा	६/५३
आननन्द स हि मध्वशास्त्र-	९/३७	आश्रावि स्थिरतरभक्तिभिः	१६/५१
आनन्दचिद्गुणगणं परिपूर्णसंवित्	१४/५५	आश्रित्य तस्य शुशुभेऽवयवैकदेशं	२/४६
आनन्दतीर्थभगवद्वदनेन्दुबिम्बं	१५/१४१	आश्वस्तौ शुचिहृदिमावनूनमा-	१६/२९
आनन्दतीर्थेति पदं गुरूदितं	५/२	आस्तामास्तामेष वो विश्वमोषो-	१२/४७
आनन्ददं स चतुराननहासलक्ष्म्या	१३/६९	आस्माकाः केऽप्येवमुक्त्वा विल-	१२/१३
आनन्दयन्तं वदनेन्दुना जगत्	५/४४	आस्माकेऽपेक्षिते पक्षे	१५/४७
आनन्दयेः सुमुख भूषितभूमिभागो-	२/३	आस्यतामित्युदीर्योपविष्टे	७/५७
आनन्दरूपस्य परस्य पात्रधी-	५/२	आस्विन्नावलसतरौ गुरोर्नियोगा-	१६/२८
आनन्दाद्यैर्गुरुगुणगणैः पूरितो-	१/५५	आहत्या गुरुगदयैव नाळिकेरा-	१६/२६
आनमन् सबहुमानममी तं	६/१६	आक्षेपं तमसहमान उच्चमानः	१६/५
आनम्रैः सुमकुटमौलिभिः कराग्रै-	१६/५१	इ	
आनिवृत्तवपुषा गुरुणाऽऽरात्	६/५२	इज्यते यज्ञशीलैः स यज्ञः	११/७४
आनीतां दशशतपुम्भिरत्यशक्त्या	१६/७	इत एव पुराणगौरगौ	७/२०
आपतत आलपत इत्यवददुच्चैः	१०/१०	इतकामतापसरसार्द्रधीगिरः	८/२३
आभान्तं परिषदि मत्सरादपृच्छत्	१६/४२	इतराः स्रजो विरचयन्ति पती-	११/४७
आभाष्य सोऽत्र जनतां शपथा-	२/८	इतस्तृतीये दिवसे द्युनिम्नगा	४/४१
आम्नायमाम्नायविदां विदग्धं	१०/३३	इति कार्यचिकीर्षयाऽऽर्थयत् त्वां	१३/२
आम्नायानाममानत्वे	१५/४३	इति गुरोस्त्रिजगद्गुरुशिक्षणे	३/३५
आम्नायास्त्रय इव तत्वबोधकास्ते	८/५४	इति गौणविमुक्तये गुणाढ्यं	१३/५२
आम्नायं ये पेठुराम्नायपूर्वं	१२/३०	इति चिन्तयता महाधिया	७/४८
आयास्यन् किल सरिदन्तराख्य-	१६/३८	इति चिन्तयन्नविरलान्तरो हरिं	८/४२
आयुष्मंस्तदधिष्ठानं	१५/३०	इति तत्फलं सफलसङ्कथनो	११/४
आरुरोह दुरारोहं	१५/११९	इति तं ब्रुवाणमयमब्रवीद् विभु-	८/५०
आरोग्यशालिनि पुरेव तदाऽपि	२/४१	इति तातवचो निशम्य किञ्चित्	१३/५३
आर्द्राङ्गाः सपदि निमज्जनात्	१६/११	इति तैरुदीरितमुदारमति-	११/५
आविश्य पूरुषमुवाच महाग्रहो-	२/३४	इति द्विजेनाभिहितेऽनमत् स तं	४/२४
आविश्य वेश्म निजनन्दनमिन्दु-	२/२८	इति नाद्भुतमस्य हि प्रयान्ति	१३/२०
आविष्टवानकुशलं पुरुषं प्रकृत्या	२/७	इति नास्य गुणार्णवाकृते-	७/७
आव्रजेदिह न वा स हि वेद	६/४८	इति निगदति मायावादिविद्वेष-	१२/५४

इति निगदितवन्तस्तत्र वृन्दार- १६/५८
इति निगद्य विभाति शिशुः स्म वि- ३/१४
इति निजप्रतिभागुणभावितं ३/१९
इति बहुविधविश्वाश्चर्यचित्तप्रवृत्ते- ४/५४
इति ब्रुवाणे तनये कदाचि- ४/२९
इति ब्रुवाणे प्रतिपादयत्यलं ५/१९
इति ब्रुवाणे यतिसत्तमे स्वयं ४/५१
इति भुवनविभूषणस्य भूयां- १०/५५
इति मायिजनेन तत्रतत्र १३/६५
इति विभुः पथिकैरुदितो व्रजन् ३/३
इति विविधगोधारावारैर्विशारद- १०/५६
इति विहरति मह्यां विष्णुदासेऽपि २/५४
इति सा महीधरमुखाद् विनिःसृता ८/५२
इति सुरललनाभिर्लाळितः खेच- १४/५१
इति सुरैरपि भूसुरमण्डलैः ३/६
इतिहासपुराणाब्धेः १५/७६
इतिहाससुन्दरपुराणसूत्रस- ८/४
इतीदमादिश्य वचो वचस्विनि ४/१२
इतीममुक्त्वा प्रभुरब्रवीत् पुनः ४/२१
इतीरयन् पश्चदशैष यूनः १०/३९
इतीह मायासमयोपपादितं - ४/१०
इत्थं नीत्या शास्त्रनीत्येव बाध्यः १२/२३
इत्थं पान्थैर्वर्णितं शृण्वतः प्राग् १२/११
इत्थं विचिन्त्य तनयां बहु भत्स- २/४०
इत्थं विचिन्त्य स मुहुः स्वजनो- २/४७
इत्थं विचिन्त्य स विचिन्त्यमन- २/१९
इत्थं सद्भिः सद्भिरर्च्यो धरायां १५/१४०
इत्थं हरेर्गुणकथासुधया सुतृप्तो- २/१६
इत्यर्थितो व्यधान्मध्वः १५/८८
इत्यस्य वाचा शरदेव भासिता ५/२९
इत्याकुला गृहमुपेत्य तदा प्रसन्नं २/३९
इत्यादीन् दर्शयन्त्यर्थान् १५/६४
इत्याद्येते कार्यमालोच्य काले १२/२५
इत्याद्यैरपि चरितैरनन्यसाध्यै- १६/२४
इत्युक्तस्तैरेष विस्तारिबुद्धेः १२/३९
इत्युदीरयति विस्तृतचित्ते ६/५
इत्यूचे धरणिधरेण केवलं नो १६/४९
इत्यूचे मदमतिमानिनोऽखिलज्ञ- १६/४१
इत्येव वेदा अपि वेदयन्ति ११/७६
इदमस्तसमस्तदूषणं ७/२४
इदमाप शुकोऽपि लालनं ७/५५
इदमित्थमितीक्षणैर्नराणा- १३/२७
इदमुवाच विचारविचक्षणः ३/२३
इनविरहमसह्यं प्राप्य पद्मैः सचक्रै- १४/५२
इन्दीवरश्रीजयिसुन्दराभं १/३५
इन्द्रायुधं हीन्द्रकराभिनुन्नं १/२९
इमं ददामीत्यभिधाय सोऽमुना ४/३८
इमान् स्वस्वपूर्वाश्रयानात्म- १०/९
इमेऽस्मरंस्तद्वपुषोऽन्यथाऽस्य १०/२८
इयमेकपदे सरस्वती ७/४०
इह कथां कथयन् ददृशे ततः ३/२२
इह मच्छरीरवलये लसिता- ११/९
इह मूर्तिधरा इव स्वधर्माः १३/१९
इह यो दधे जगति पापशान्तये ८/३५
इह विभावुपचारधिया नृणा- ३/४८
इह सत्यवतीसुतं हरिं ७/१६
इह सम्भवेत् सकलकान्तिरसः ११/१३

ई

ईश्वरो न सुखी तेन १५/६०

उ

उक्तमुक्तमभिधेयमुत्तमं ९/९
उक्ताङ्गेभ्यः कादिकान् व्यञ्जयन्तं १२/३१
उक्तिभिस्तमसकृत् सुयुक्तिभि- ९/३४
उचितां गुरुतां दधत् क्रमा- ७/२९

उच्चावाचा येन समस्तचेष्टाः १/७
उच्यतामिति मुहुः सपृथिव्या- ६/४१
उज्जासय दुष्टानां १०/४६
उत्तुङ्गकेतुशिखरे स कृताङ्गहारो २/७
उत्तुङ्गशृङ्गलसितस्य महिष्ठमूर्तेः २/४६
उत्थीयतां यस्य समर्थता स्या- १०/३९
उत्पत्स्यते जगति विश्वजनीन- २/८
उदतारयत् परिजनं मृतिभी- १०/१२
उदपादि धर्मतनयो ह्ययं ८/४०
उदयति घनमालालीनभानौ च २/५४
उदयति विनताया नन्दने श्लाघ्य- १४/७
उदयतीति हि बालदिवाकरे ३/१६
उदयन्मिहिरोपरिष्ठपूर्ण- १३/१७
उदयमहिमरोचिश्चक्रवर्ती १४/१४
उदयमित इवास्तं यश्च भानुर्बभासे १४/४६
उदाहरद् भूरियशा हि केवलं ४/३३
उदीर्य कृच्छ्रादुपगम्य मन्दिरं ४/२५
उद्धर्तुं विपुलहृदङ्गुलीं च नालं १६/३२
उद्भ्रान्तरक्तमवलोक्य तमभ्यधायि २/३३
उन्मत्तप्रलपितवन्न तद्धि मानं १६/३
उपकर्णममुष्य भासिता ७/४२
उपगीयते स्म मधुरं मधुजि- ११/४६
उपगूहयन्नमृतसिन्धुसखः ११/३७
उपचरति नितान्तं हन्त पौरन्दरी १४/४
उपधेरधःकृतबलीन्द्रशात्रवः ८/१७
उपनिनाय सुतं सुकुमारकं ३/३४
उपभोक्तुमप्यविधिबन्धवशा ११/४५
उपमानमहो न लभ्यते ७/२८
उपयान्तमनन्तमानसं तं १३/२४
उपयाहि यशः शशाङ्कगौरं १३/६४
उपरम्यते न तरुणेन चिरं ११/५७
उपर्यपास्तं तदिति ब्रुवत्यसौ ४/४५
उपलभ्यते यदुपमानपदं ११/८
उभयं वहति त्रयीमयं ७/३३
उल्ललास गिरिपुङ्गवशृङ्गे ६/५४
उवाच वाचं परिहासहासवान् ५/१७
उवास मासांश्चतुरो महामनाः ५/४६

ऊ

ऊचुरर्थशतकं हरिनाम्नां ६/५

ऋ

ऋजुपुङ्गवस्य परिजानतः स्वयं ८/५

ए

एकं तत्वं वष्टि मायामयीयं १२/४
एकविंशतिकुभाष्यदूषकं ९/१२
एकाकी किल यश्चक्रे १५/८०
एकान्तेन प्राप्ततेजोविलीनं १२/१८
एकेन तु शिष्येणाकृष्टकुठारान् १०/२१
एकेन दोष्णा नयतो गिरीन्द्रं १/१९
एतत्प्रतीपं किल कर्तुकामा १/४६
एतदर्थमतिसूक्ष्ममपि त्वं ६/४०
एतादृग्बलविभवः स तस्य कण्ठं १६/२७
एवं चेत् कारणं मा स्म १५/३०
एवं चेद् विमतो ज्ञानी १५/१७
एवं स्वरूपदेहत्वं १५/५५
एषु दभ्रमतीन् दभ्रान् १५/८५

ऐ

ऐच्छदच्छलदयोदयादयं ९/४०
ऐतरेयमथ किञ्चन सूक्तं ६/१
ऐश्वर्यैरिति लघिमादिकैरुपेतो- १६/३०

औ

औदार्यसौन्दर्यतनुं तनुं ता- १०/३६
औपाधिकोऽस्य भेदश्चेत् १५/२१
अंशेन वायुरवतीर्य स रूप्यपीठे २/२४

क

कथनं तदुदारधैर्यसारं १३/४१
कथमप्यमराः प्रपञ्चयेयु- १३/४२
कथयतां प्रथमे कथयत्यलं ३/२८
कथयन्त्यमुं परशुभासमानगो- ८/१८
कदाचिच्चोराणां निकरमव- १०/२०
कदाचिदत्रोपययौ यतिः सखा ५/३
कदाचिदाप्यालयबुद्धिरालयं ४/२७
कदाचिदेनं प्रतिगम्य सौम्यधीः ५/२३
कदेत्याद्यनुयोगेऽस्या- १५/४८
कनकद्युतिमध्वसङ्गवा- ७/५३
कनकातुलकालसन्निभः ७/६
कन्यकाद्दतसुरेन्द्रवपुःश्री- ६/१७
कन्यां सुवर्णलसितामिव वेदविद्यां २/१२
कमलाकमलासनानिलै- ७/२५
कमलाकरानिव शुभान् प्रबोधयेत् ८/५१
कमलापतिः कमलयाऽमलया ११/१७
कमलायतलोचनावलोकै- १३/३४
कमलामयं कमलपत्रलोचनां ८/२६
कमलेष्टतमस्थिरान्तरै- ७/३
करतळे खलु कन्दुकवत् सदा ३/४२
करपल्लवैस्तरळितैर्ललितै- ११/३२
करयोर्युगलेन वल्गुना ७/५१
करिष्यमाणानि च तस्य पूजां १/३३
करुणाकर नेत्राभे १५/७९
करुणाकरः स वसुदेवमोददो- ८/१९
करुणाविषयं चिकीर्षुणा स्वं १३/२६
कर्णान्तमानीय गुणग्रहीत्रा १/१४
कर्तव्यमौढ्यमभिपद्य निरूप्य सा २/३८
कर्मभिः सकललोककौतुकै- ९/२९
कर्माणि कुर्वन् परमाद्भुतानि १/११
कलयन् स्वयं न कुशलेति किल ११/४०
कलिकालकालितगुणे धरातळे ८/४९
कलिताञ्जलिना स्फुटानुयातं १३/२६
कल्लोलैः करिनिकरैरिवानिवार्यै- १६/२०
कवीन्द्रतिलको विद्व- १५/११७
कवीन्द्रैर्न समाप्यन्ते १५/७३
कश्चिदेष्यति विपश्चिदिहैनं ६/१८
कस्तन्त्रसारं सम्प्राप्य १५/७८
कळभाषण एव सूरिपोतः १३/४७
कान्ताद्दतौ समुचितेऽथ बभार २/२३
कान्ताय कल्याणगुणैक- १/१
कामत्रासविहीनस्य १५/११२
कामं महामानसकुम्भसम्भवो- ५/१४
कामादेताः प्रवर्तन्ते १५/१३
कारणं परिणामि स्याद्- १५/१४
काले कलौ सुविमलान्वयलब्ध- २/९
कालं वेदान्तशास्त्रस्य १५/९९
कालः स एव समवर्तत नाम याव- २/५
काल्पीः क्लृप्तीर्व्यञ्जयंश्छान्दसी- १२/३५
काष्ठमौनमदधादुपवासं ६/४४
किञ्चाखण्डेऽत्र वाक्यानि १५/३५
किन्तु प्रभो रजतपीठपुरे पदाब्जं २/१५
किन्तूत्तमश्लोकशिखामणीनां १/७
किमिति तात तदर्थमवर्णयन् ३/२९
किं वर्णयामः परमं प्रसादं १/२६
कीर्तिं त्रिलोक्यां हृदयं मुकुन्दे १/४४
कुचकुम्भपूर्णतरकान्तिसुधा- ११/३३
कुत्रचित् सदसि तावदपाला ६/१७
कुरुते परिरभ्य पूरितं ७/४१
कुरु सूत्रभाष्यमविलम्बितं व्रजेः ८/४६
कुर्वन्नन्याश्चाग्रूपा विवृत्ती- १२/३२
कृतकृत्यतया क्रियाः प्रकुर्वन् १३/४६
कृतपरमसपर्यः सान्द्रसच्चन्दनाम्भः- १४/३८

कृतमपकृतमार्यैः क्षम्यतां क्षान्ति- १४/२
कृत्स्नज्ञं कृपया स्वेषु १५/११६
कृत्स्नमाददयमित्यविस्मयः ९/७
कृष्णलाळिततमामनवद्या- ६/३०
कृष्णाङ्घ्रिपङ्केरुहभृङ्गराजः १/४३
कृष्णाभीष्टा शास्त्रविस्पष्टसञ्ज्ञा १२/४२
कृष्णेवान्या मान्यविन्यासपादा १२/३३
को नेच्छेत् सुलभं भक्त्या १५/१३९
केवलं न सकलाः श्रुतिविद्या- ६/२०
कैशोरलीलां हतसिंहसङ्घां १/३०
कोऽपि तं गुणविशेषविच्च वि- ९/२३
क्रियाकलापं सकलं स कालवित् ४/३१
क्रीतवान् नरपतिर्महादरं ९/२५
क्रोष्टूनां श्वकळकळप्रदं विरावं १६/२२
क्वचिच्छिलाच्छटाभ्रमा- १०/२२
क्वचिदमुं निजिघांसुरशान्तिमा- ३/३८
क्वचिदीश्वरदेवमेष भूपं १०/४
क्व नु यियाससि तात न साम्प्रतं ३/३

ख

खण्ड्येत दण्डो यदि चण्ड न त्वया ५/४३
खद्योतैरिव तरणिर्विडम्बयन् नून् १६/३५
खपुष्पवदखण्डत्वाद्- १५/४२

ग

गगनेऽल्पदृष्टवपुरत्र जनै- ११/१
गजराजगतिर्महाभुजः ७/६
गणयेद् गणयन्त्यनारतं ७/४६
गणयेद् रमाऽस्य न गुणानखिलान् ११/१९
गते दिनानां दशके समासके ४/४३
गदोऽथ शौरेरिव कर्मकृत् प्रियः ४/२६
गमनासनसङ्कथादिलीलाः १३/४२
गमनोत्सवविस्मितैर्निषेव्यो- १३/६
गमनोद्यमलक्षणैरजानन् १३/१०
गरीयसीं विश्वगुरोर्विशुद्धां १/५
गरुडतुण्डमिव प्रतिपन्नवान् ३/४०
गाङ्गमङ्गलतरङ्गभङ्गद- ९/१३
गान्धारं द्युविषयमुज्ज्वलं सृजन्तो- १६/५०
गाम्भीर्यं धृतिमुरुवीर्यमार्यभावं १०/१८
गाम्भीर्यात् स्वनमधरीकरोति १६/१७
गाम्भीर्यधैर्युक्तमौदार्यकार्यै- १२/३४
गिरिशगुर्वमरेन्द्रमुखैश्च य- ३/४१
गीतातात्पर्यभाष्याभ्या- १५/७५
गीयते गेयकीर्तिः सुगीतै- ११/७४
गीर्वाणैर्विजयमहोत्सवस्य पूजां १६/५२
गुणकुण्डलमण्डितं विमानं १३/१३
गुणनिका चरणादिकगोचरा ३/५१
गुणवन्तमुपास्महे मुकुन्दं १३/६०
गुणसारविदः कुतूहला- ७/५
गुणादिभेदे सम्बन्ध- १५/२३
गुणानुरूपोन्नति पूर्णबोध इ- ४/३३
गुरुचरणसरोजद्वन्द्वनिर्णेजनाम्भो- १४/३२
गुरुप्रबर्हस्य पदारविन्दं १०/३६
गुरुभक्तिभरानताकृति- ७/४९
गुरुभिरभिहितेष्वाचारभेदेषु निष्ठां १४/८
गुरुमानसस्य गुरुताऽपि सत्पते- ८/२
गुरुर्विदित्वोपनतां निजां मृतिं ४/९
गुरोरुपान्ते श्रवणे रतैर्द्विजैः ४/४९
गुरोः किलान्वेषणवान् जगद्गुरुः ४/५
गुरोः स्वशिष्यं चतुरं चिकीर्षतः ४/४४
गुर्वाज्ञागौरवाढ्यीकां १५/७२
गृहे वसन् कल्पसमान् क्षणान् नयन् ४/१८
गोगणैरप्रतीकारैः १५/७५
गोपिकाप्रणयिनः श्रियःपते- ९/४१
गोप्यं भारतसङ्क्षेप- १५/८३
गोभिस्तमांस्यपनयन् गतिदं १४/५५
गोभिः समानन्दितरूपसीतः १/१५

गोमत्यास्तटनिकटेऽच्छकीर्ति- १६/२
गोलीलास्वतिशयिनावगाधभावा- १६/१५
गोविन्दमावन्द्य सहानुगोऽगाद्- १०/२६
गोविन्दसुन्दरकथासुधया स- २/१५
गोव्रातैस्तं दारयित्वा न्यगृह्णात् १२/४६
गौणैस्तर्कैर्गौणवाक्याभिगुप्तै- १२/१५
ग्रन्थेभ्य एभ्योऽगाधेभ्यो १५/८७
ग्रहणनिग्रहणे ग्रहणे दृढे ३/४८
ग्रामण्यो ब्राह्मणाग्रण्यः १५/१३७
ग्रामे ग्रामीणसामान्ये १५/१
ग्रामेग्रामे वार्यतां माननैषां १२/२४
ग्रामे वातैः पाविते काण्वतीर्थै- १५/१४०
ग्रामोत्तमान् प्राप्य पयस्विनीतटे ५/४९
ग्राम्यत्रयक्षितिपतिभिर्दिनार्ध- १६/३६

घ

घटनोपनिषत्सु नाल्पबुद्धेः १३/५७
घनरसनिकरोऽसावन्तरत्यन्त- १४/२७

च

चकितेन दुष्टजनतस्तपस्विना ८/२१
चक्रिचारुतरार्चासु १५/१३१
चतुरश्चतुरः शिष्यान् १५/८९
चतुरश्चतुराननः स्वयं ७/९
चतुराननाय चतुरः पुराऽगमान् ८/१४
चतुरा विदधुर्यदीयगात्रं १३/३६
चतुरोऽसौ प्रवचने १५/१०२
चरन्नेतेष्वेतानथ मिथ इहाघात- १०/२०
चरमसमयसुप्ताः पूर्वमुत्थाय शिष्या- १४/९
चलचारुचामरधरानुचरा- ११/२५
चिच्छेदातुच्छधिषणः १५/६६
चित्तवृत्तिमनुवृत्तिमान् गुरोः ९/२
चित्रदिग्विजयकीर्त्यकीर्तिमान् ९/४६
चित्रमेष यतिराड्घनाघनो ९/३२
चिन्तामणीन्द्रमिव चिन्तितदं दरिद्रो- २/४९
चिन्तामणींश्चिन्तयन्ती १५/८५
चिरमनवतरन्तः श्रावका मुक्त- १४/११
चिरात् सुतत्वं प्रबुभुत्सुना त्वया ४/३८
चूर्णकृद् विविधशङ्कचूर्णक- ९/२१
चोदयन्तमथ गन्तुमादरात् ९/१
चैत्रवत् किं पुनर्विघ्न- १५/१५
चैत्रो यथेत्युपाधिः स्यात् १५/५२

छ

छन्दस्सार्थं सार्थमत्रामुनेत्थं १२/३७
छन्दोभ्यश्श्रुतरससङ्ग्रहप्रवीणान् १६/४३

ज

जगतां चतुर्दशतयं चतुर्मुख- ८/१०
जगतां हितं हरिमिवापरं हरिं ८/१८
जगत्प्रदीपायितगोगणाढ्ये १०/२९
जगद्गुरूणामिति तां गुरोर्गिरं ५/३९
जगद्विजेतुश्च जये ससंशय- ५/१२
जग्राह बालमथ चैक्षत मातृमार्गं २/३७
जघनांशुकैरवयवाभरणै- ११/५१
जनकवाचमिमामवधारयन् ३/१२
जनकेन सोऽथ विरहासहिष्णुना ८/२१
जनदृग्विषयत्वमत्यजत् ७/२२
जननं समयेसमये जगतः १०/४५
जनमनोनयनाम्बुजभास्करो- ३/५
जनसदागतिसूचितवर्त्मना ३/९
जनो नमेन्नापरथेति मत्वा १/४९
जन्मस्थित्यवसितिदायिनं कटाक्षं १६/२३
जयसिंह इमं नृसिंहवर्यः १३/२१
जलजायतलोचनस्य मा- ७/४१
जलविहारपराजयिभिः स्पृधा ३/४६
जाज्वल्यमानस्य वनेवनेऽलं १/३८
जाज्वल्यमानोज्ज्वलराघवाग्नौ १/१८
जाज्वल्येते विष्णुवायू स्म देवौ ७/५९

जातस्य तस्य गुणजातवहस्य २/२८
जातां भारततात्पर्य- १५/७६
जिगाय जैत्रान् बहुतर्ककर्कशान् ४/४३
जिगीषया ज्ञानसहायकर्मणः १०/४२
जिघांसया वैरिजनस्य तीक्ष्णः १/३७
जितकुमारगुणं सुकुमारकं ३/३६
जितवान् दिशो दशरथोऽग्रसम्पदो ८/१९
जेष्यन् कदाचित् किल काल- ५/३०
जैत्रं प्रजिज्ञासु कुतूहलाकुलं ५/१०
ज्येष्ठो यतिर्यो लिकुचान्वयोद्भव- ५/२७
ज्ञातः स ते ज्ञान्यसि चेन्न चेन्न स- १०/४३
ज्ञात्रादिरूपमस्य स्याद्- १५/५४
ज्ञानप्रयत्नवाञ्छावान् १५/५०
ज्ञानार्थमेव यदभूद्सुदेव एष २/२९
ज्ञानिश्रेष्ठश्रेष्ठविज्ञानिवर्गे १२/७
ज्ञाने जाते दग्धवस्त्रप्रतीतं १२/६
ज्ञापयन्निति परात्मवेदकः ९/५१
ज्यायसो दूषणेनैव १५/३८
ज्यायसे सगुरवे हरिगीता- ६/३२
ज्वलनज्वलद्द्रदमुदारधनुः ११/६६

ट

टीका परानुव्याख्याया- १५/१२५

त

तं जिगीषुमथ विप्रमदः प्री- ६/१४
तटे निषण्णानधिकं विषण्णा- १०/२७
ततमतनुमनाः सोऽचिन्तयत् सत्- १४/४८
ततस्ततो विस्मितलोचनैर्नरै- ५/४९
ततो निवृत्तः परमेव पूरुषं ५/४८
ततः क्रमेण प्रचलन्नुपेयिवा- ५/३६
ततः परं द्वादशवत्सरान्तरे ४/४२
ततः स्वतः प्रमाणेन १५/६३
तत्काले परमभिवर्षयन् घनौघं १६/३८
तत्पादसेवारतिरेष नैच्छत् १/२४
तत् पुत्ररत्नमुपगृह्य कदाचिदाप्तः २/३१
तत्प्रत्यर्थी प्रार्थ्यते वक्तुमेतत् १२/३८
तत्प्रसङ्गबलतोऽखिलविद्या- ६/१६
तत्प्रीतये रजतपीठपुराधिवासी २/६
तत्याज मत्या तस्यासा- १५/१०५
तत्रतत्र पथि पथ्यविभ्रमः ९/५
तत्रतत्र स जगत्त्रयचित्रं ६/३७
तत्रतत्र स सभासु भासुरो- ९/२०
तत्र देवमभिवन्द्य यातवान् ९/१४
तत्रापि न्यधित तयाऽस्य सूच्यतेऽलं १६/९
तत्रायन् खरकिरणोपरागहेतो- १६/११
तत्वनिर्णयपार्थोऽयं १५/८०
तत्वस्यावर्णनीयत्वात् १५/३३
तत्त्वेऽप्यतत्त्वे विमतेऽनुमां वदन् ५/७
तत्वे स कालचलधीरतिसंशयालु- २/१६
तत्स्नानादधिकशुचौ नदाधिराजे १६/१९
तदनादिकालमितमुक्तिरते- ११/१४
तदाज्ञयोपागतजाह्नवीजले ४/४२
तदा तदाननाम्भोजाद्- १५/३
तदाद्यपद्यस्थमवद्यमण्डलं ४/४५
तदाऽनन्दं तन्वन्निति सुमनसां ३/५६
तदाऽनुरूपं ददुरासनं ते ७/५६
तदाऽभवद् भाविचतुर्मुखाकृति- ४/३२
तदाऽमुनाऽग्राहि नरप्रवेशिना ४/३७
तदितरायतनात्तु यदाऽगमं ३/१३
तदिदं वपुरस्य दृश्यते ७/२३
तदेव देहशब्दोक्तं १५/५४
तद्दण्डसङ्खण्डनसंश्रवं व्यधात् ५/४१
तद्द्रष्टॄणां चेति वाणीकृपाणी १२/१२
तद् द्वयं चोक्तदोषं हि १५/२१
तद्वादी तेन वेदस्य १५/३२
तद् वासुदेवपदमन्ववदन् सुरेन्द्रा- २/२९

तनुकुक्षिगळाळिकेषु रेखा- १३/३०
तनुनिम्नसुनाभिशोभिते ७/३२
तनुमध्यमा निजगृहाणि गताः ११/५२
तनूदरे नास्ति गरिष्ठता कथं ५/३२
तं तत्क्षणाद् यो न दिधक्षति स्म १/५३
तं नमन् प्रचुरधीर्हरिगीता- ६/३८
तं निगदन्तमितिप्रभृतीह १०/१६
तं निरस्य जनमप्यथाहितं ९/४५
तमपश्यदाश्रमवरे प्रभूतधी- ८/७
तममुष्य कान्तिविजितेन्दुमग्रजं ८/२०
तमरुणमणिवर्णं दिव्यदेहाख्यगेहे १४/३७
तमवेक्ष्य धर्मजमधर्मदुर्लभं ८/९
तमसोऽप्युभयस्य नाशका- ७/२७
तमस्ततीर्वा द्युमणिर्विशुद्धया ५/१३
तमस्मरत् स्वामिनमेव दूनधी- ४/४०
तमाव्रजन्तं यतिवेषधारिणं ५/४३
तमिमं प्रविशन्तमाश्रमं ७/५
तमुपगृह्य सुतं सुतपोनिधिः ३/१६
तमेव पक्षं प्रतिपादुकोऽसौ १/५०
तमोनुदाऽऽनन्दमवाप लोक- १/४
तं पूर्णषड्गुणतनुं करुणामृताब्धिं २/१८
तं पूर्वपक्षसितबिम्बमिव प्रवृद्धं २/२४
तरणिभिरिव गौरैरूर्ध्वपुण्ड्रै- १४/३०
तरस्विनः प्रोच्चलितानधीरान् १/४२
तरुणप्रभाकरसहस्ररुचं ११/१८
तर्कतन्त्रकुशलानपि पुंस- ६/१२
तल्लीनमाक्षेपमुपैक्षताफलं ५/२६
तव कीर्तिरार्तिमतिमात्रमानये- ८/५१
तव वेदनदीर्विगाह्य भूयः १३/६३
तस्मात् समस्तविदपत्यमवद्यहीनं २/१७
तस्मिंस्तु विस्मेरधियोऽपि यत्नतो- ५/१९
तस्मै नमो नीरदनीलभासे १/२
तस्य तुल्यमतिरेष दुर्जनो- ९/२२
तस्य त्रासात् पृष्ठतस्तिष्ठतोऽभूत् १२/४५
तस्य प्रभोश्चरणयोः कुलदेवताया २/१४
तस्य भावविदमन्दमनीषः ६/४२
तस्य वल्लभतमाऽऽस वासभू- ९/४
तस्य व्याप्तैः शिष्यजालैस्तु गौणैः १२/१४
तस्यार्थं वचनचयस्य तं ब्रुवाणः १६/४५
तस्यैव वायोरवतारमेनं १/२८
तस्यैवामन्दमानन्दं १५/१८
तस्योरुदुर्गर्ववतो जिगीषया ५/९
तानितानि च वितानिचेतसो ९/५२
तां दिदेश पुरुषोत्तमतीर्थ- ६/३३
तान्यभ्यधुरभावं चेद्- १५/३५
तां पद्यप्रणिगदितां तु मूर्छयित्वा १६/५०
तां मन्त्रवर्णैरनुवर्णनीयां १/६
तांस्तथाऽभ्यधित तत्पदभावं ६/१९
तिमिरनिकरकुम्भिव्रातमत्यन्त- १४/१५
तिरोहितात्मा प्रापासौ १५/१०४
तिस्रोऽवस्थास्तद्गुणैर्भावयन्तं १२/३१
तीर्थकं विष्णुतीर्थं च १५/१०३
तीर्थार्थं पृथुतरवप्रपातिवारां १६/७
तीर्थेषु तीर्थेषु च सौख्यतीर्थः १०/२६
तीव्रव्रतोऽतीन्द्रियविद्- १५/११५
तीव्रैः पयोव्रतमुखैर्विविधव्रताग्र्यै- २/२१
तीक्ष्णेन वाक्येन मितेन वेगिना ५/११
तूर्णं तीर्णादिभ्रमार्गोऽथ सार्यः १२/४३
तेजोऽमृतं नन्दनगात्रपात्रगं ५/२४
तेजो विद्वच्चक्रचन्द्रस्य लीनं १२/४८
तेजःशङ्कामात्रतो यद् विलीनं १२/१८
तेन तत्प्रवचने विहितेऽलं ६/४१
तेन लेशत इतीह पदं स्या- ६/४०
तेन सम्प्रार्थितं यातं १५/११६

तेनाथ मुक्तैरतिविस्मयस्तै- १०/४१
तेनोपयातेन कदाचनाथ १०/३७
ते पृथक्पृथगमुं स्वशाखया ९/१६
तेषां दोषा वर्णनीया विदग्धैः १२/२२
तौ यथा विधुरवी अहो अहो- ९/३८
तं वदन्तमिति तेऽथ वदन्तो- ६/६
तं विष्णुमङ्गलगतं बहळप्रबोधं १३/६९
तं स्फुटं प्रकटयन् स पृणीया- ६/१४
त्रस्तधीरतिययौ स मुहूर्तात् ६/५२
त्राता य एव नरकात् स हि पुत्र- २/१७
त्रिगुणाकृतिप्रकृतितो गुरुं तत- ८/११
त्रिजगत्तिलकाळिकान्तरे ७/४४
त्रिदिवादि लभ्यमपि नास्य फलं ११/६
त्रिभुवनवरतेजोव्यक्तवेदार्थशुक्र- १४/२३
त्रिविक्रमार्य सोऽपश्यत् १५/२
त्रिविक्रमार्येण तदा १५/६४
त्रिंशदुद्यतनरैः सुदुर्धरां ९/४२
त्वयि रत्नाकरे रत्न- १५/८४
त्वरितमुद्यतविस्तृतमस्तकः ३/३९
त्वरितमेत्य स काननदेवता- ३/४

द

दग्ध्वा पुरं योगबलात् स निर्यन् १/३२
दण्डार्हबुद्धिविषयो नृपपूरुषाणां १०/१९
दयितः सतामृषभ एष भूधरो ८/३९
दयिताऽस्य सती गुणानुरूपा १३/४४
दलितेन्द्रनीलमणिनीलविभ्रमं १४/५३
दशमतिशिष्यः कश्चि- १०/२
दशोपनिषदो देवीः १५/७४
दक्षपक्षविहतेन ताडयन् ९/३५
दान्तं स्वयं च हृदयं दमयाश्चकार २/२०
दारुणाघगणदारणं स्म स ९/३९
दिशतु स परमाग्र्यानन्दतीर्थाङ्घ्रिरेणु- १४/४
दिशं प्रयातं शशिन- १५/१०३
दिश्याद् दृशं नो विशदां १/३
दीप्रा यत्राग्रय इव १५/१३५
दुःखप्रसङ्गादिति मा १५/६०
दुःखव्याप्तं सुखं बद्धे १५/५१
दुःखाकरोति यद् दैवं १५/४६
दुःखाकरोऽतिघोरः स्यात् १५/४६
दुःखं परिजिहीर्षन् यः १५/१९
दुर्गमार्गगतमप्यनुधाव- ६/५१
दुर्गं मायावादसत्रं दिधक्षु- १२/८
दुर्मन्त्रैः खलपटलैः प्रचोद्यमानो १६/३९
दुर्वादिगर्वाद्रिपविं १५/८८
दुःशासनेनाऽकुलितान् प्रियायाः १/३७
दुष्टात्माऽसौ भद्रमेकाकिनं यः १२/४४
दृढस्वसंन्यासनिषेधनिश्चयां ४/२७
दृष्टान्तो भवति तदप्रमाणतायां १६/३
दृष्टान्तो यस्य नेष्टोऽयं १५/६१
दृष्टान्तोऽसाध्यविकलो १५/५९
दृष्ट्वा तं धरणीधरं सुवनमा- ६/५७
देवतास्वसुलभा प्रतिभा ते ६/१०
देवादिसद्भिरनुपालितयाऽऽदरेण २/४३
देवेरिताविव पुराऽदितिकाश्यपौ तौ २/२१
देशमेनमचिरादुपयात- ६/१९
दैव्यां सभायामिव पद्मयोनिं १०/३३
दोषेयुषां सममनेन वनेऽतिभीमे २/३३
दौर्मुख्यं दधत उतापरे निनिन्दु- १६/१२
द्रष्टाद्रष्टा निग्रहीता ध्रुवं वः १२/४७
द्रुतमवसितकृत्यैर्धन्यसंन्यासिवर्गैः १४/१८
द्वन्द्वदुःखानले वीरो- १५/१०५
द्विजमहामधुपेन मनोहरं ३/९
द्विजराजगोविषयतातिपूरितं ८/५२
द्विजवरेण वयस्युचिते स्थितं ३/३१

द्विजवरोऽथ कदाचन मातृकाः ३/१८
द्विजवृन्दकृतं कुतूहला- ७/४०
द्विरदतुरगदेश्या दूरतो वर्जितान्ताः १४/२०
द्वेषोऽयं वादिनां कस्मात् १५/६२

ध

धत्ते रूपाण्यनन्तान्यपि भुवन- १२/५२
धनमिव सधनायेभ्योऽर्कसूनुः १४/२५
धन्योऽमद्यत नाकिनामहितहृ- १०/५४
धन्योऽसौ सिद्धिमापेमां १५/११४
धरणीभरं पृथुलचक्रमक्षिणोत् ८/३३
धर्मसूनुमिव धार्मिकं पुरा ९/४७
धर्माद्यभावे नो मानं १५/४३
धवलेऽस्य मनःपयोनिधौ ७/१९
धिग्धिक् ताननिति जनता जगाद १६/१८
धूतदुःसमयध्वान्ता- १५/१३०
धृतपङ्कजबीजचक्रचिह्नैः १३/२५
धृतमातपवारणं वरेण्यं १३/१७

न

न कुतूहलिता कुतूहलं ७/४७
नक्तमेव भगवत्युपयाते ६/४६
नखनिर्जितपद्मरागरागं १३/२९
न खलु केवलमस्य गुरोर्व्यधात् ३/५२
नगरैर्महापुरमसंहतिम- ११/१४
न चेत् प्राप्तं पारिशेष्या- १५/४०
न जघास न सुष्वाप १५/९४
न जडा जले पतत साहसादहो १०/११
न तथाऽपि परम्परोपयातं १३/५६
नतमुन्नमय्य मुखचन्द्रमसं ११/५७
नतिर्न शुश्रूषुजनाय शस्यते ४/१७
नत्वा हरिं रजतपीठपुरालयं तं २/३२
न नाममात्रात् शुचिमर्थतोऽपि यं ४/६
ननाम सोऽयं गुरुपूर्वकान् यती- ४/३५
ननु केवलमेव वैष्णवं ७/२७
ननु तत्र विश्वविभवैकपदं ११/८
ननु विप्रतिपन्नः स्यात् १५/५२
ननु स यजति नित्यं हृत्सरोजासन- १४/३७
ननु सुतावितथं कथितं त्वये- ३/२७
ननु सौख्यादिमान्नेशो- १५/१६
नन्दयन् मन्दहासावलोकै- ७/५७
नन्वनन्यशरणात्मनां सतां ९/४०
नन्वस्य सूत्रस्य परोऽर्थ उच्यतां ५/२०
न पुत्र पित्रोरवनं विना शुभं ४/२२
न पौरुषेयं वचनं १५/४४
न भवतादिति तं विजनस्थले ३/२०
न भवन्ति यत्र मृतिजन्मजरा- ११/२३
न मननमधुना द्रागाव्रजेत्याह्वयत् १४/४४
नमस्तुभ्यं भीम प्रबलतम कृष्णेष्ट १६/५७
नमस्ते प्राणेश प्रणतविभवा- १६/५७
नमोनमो नाथ नमोनमस्ते १/२५
न यदित्थं नो तदित्थं १५/१४
न यदेवं नो तदेवं १५/१२
नयनद्वयेन नळिनप्रभामुषा ८/९
नयनाञ्जनैरपि मिथोऽब्जदृशां ११/५१
नयासना नास या न १०/४८
न रतिः श्रमादिखचिता नियमाद्- ११/६०
नरदेवदिदृक्षया समेता- १३/२४
न रमाऽपि पदाङ्गुलीलसन्- ७/४६
नरसिंह एष विददार दारुणं ८/१६
नरसिंहपदाधारा- १५/१२८
न लभेय वल्लभतमेदृशं सुखं ८/४८
नवकम्बुकण्ठमहिमांशुमहो- ११/६५
नवकाव्यरसप्रियस्य वादि- १३/६३
नवभानुभाः कनककान्तिपरं ११/७२
नवमम्बुधरं विडम्बयत् ७/४५

नवमल्लिकास्रजमभीष्टतमः	११/४०	नास्मदुक्तिसदृशं हितरूपं	६/४७
न वयं सहस्रवदना अपि ता-	११/१९	निखिलागमावगमितैरमितैः	११/७०
नवरोमराजिवलिवल्गुमृदु-	११/३२	निखिलानुभवाभावात्	१५/४९
न वानरेन्द्रस्य विलङ्घिताब्धेः-	१०/२८	निगद तात शिवः कथकः स किं	३/२६
न विमुक्तिमुपैति कोऽपि मुक्त्वा	१३/५७	निगद्यतां गद्यमिहैव पञ्चमे	४/५१
न विश्वकृत् पशुपतिः	१५/१५	निगमसन्मणिदीपगणोऽभवत्	१/५४
न शुक्तिरूप्यादि मतं यदन्यथा	५/६	निगृह्य गूढाग्रहमुग्रमेतयो-	५/१८
नष्टं च नन्दनमिति स्वजनोऽस्य	२/४९	निजधर्मरतो गृहिप्रबर्हः	१३/५४
न सङ्गहीनोऽपि परिव्रजामि वा-	४/२३	निजमानसरागपीडना-	७/२६
न हि हरिं सततं न नमत्यसौ	३/७	निजराज्यमात्मदयिताय दत्तवान्	८/३१
न ह्यनर्घगुणमूल्यमाप्यते	९/२३	निजरूपभूतनिरपेक्षनिर्मल-	८/८
नळिननाभनिभालनसम्मदा-	३/५	निजलीलया विजितराजशात्रवो-	८/२६
नाकीन्द्रास्तमवनिभागमावसन्तं	१६/५४	निजशिष्यमुदेऽथ सह्यमाप्तं	१३/१
नात्यजत् क्षणमपि ह्यसाविदं	९/४	निजहृत्कमलेऽतिनिर्मले	७/१७
नात्यत्वरा नातिरया	१५/४	निजे जने किं नमसीति पृच्छति	४/५
नाथः कलौ त्रियुगहूतिरनुद्धभूषु-	२/२	नितरां निशितात्मना निसर्गात्	१३/५४
नाथनाथ बत नोऽत्र विनाथान्	६/४९	नित्यतुष्टहरितोषविशेषं	६/४४
नाथं निषेव्य भवनानतिदूरमाप्तः	२/२७	नित्यं हितं विश्वदहं च वित्त तं	५/३३
नाथस्य भूरिकरुणासुधयाऽभि-	२/२२	निन्ये तां गिरिमिव वानरीकृतात्मा	१६/९
नाऽध्यासते यामेकाहं	१५/१०८	निबध्य सेतुं रघुवंशकेतु-	१/१७
नानाना नो नूनं	१०/६	निभृतो निरीक्ष्य सुचिरं सुतनोः	११/५६
नानासुभाषितस्तोत्र-	१५/८४	निम्नभूरिव सतीः प्रजा व्रजन्	९/२८
नानिष्टभोगस्तेन स्यात्	१५/५५	नियुद्धसिद्ध्यै युगपद्धि वीर-	१०/३८
नानेनेनानेना-	१०/६	निरङ्गरागं मुखरागवर्जितं	४/३४
नापरेषु रतिमाययौ कचित्	९/१९	निरवग्रहमुर्वनुग्रहं विदधत्	७/२१
नारविन्दमकरन्दमासवा-	९/१९	निरुत्तरं तं निश्चोद्यं	१५/६९
नारायणायाखिलकारणाय	१/१	निर्यत्नं वटुमधिरुह्य मन्दहासी	१६/३०
नारायणोऽनन्तगुणो	१५/८	निर्वाणहेतुमलभिष्ट परात्मविद्यां	२/३०
नाराशंस्यचरमचारुमन्त्रभेदा-	१६/४३	निर्विकारचरितोऽपि परीतः	१०/१३
नार्थः स्यादयमिति वर्णयन्नथ त्वं	१६/४४	निर्वेदिना वेदविदा	१५/९२
नावैक्षि कचिदपि शक्त्यपूर्तिरस्मि-	१६/३३	निवर्तमाने न हि पालकोऽस्ति	४/२२
नासाग्रे मृदुनि कृतैश्च मुष्टिघातै-	१६/३४	निशाचरारेरिव लक्ष्मणः पुरा	४/२६

निषेद्धूननादृत्य चानन्यलङ्घ्यां १०/९
निष्कलङ्कमिव चन्द्रमण्डलं ९/३६
निष्पेष्टुं परममवापतुः प्रयत्नं १६/२७
निःस्वानां कतिपयभुक्तियुक्तभक्तं १६/४७
निहितमुचितमुच्चं योगपीठं प्रवक्तुः १४/१८
नीचानामवचवचांस्यजीगणन्नो १६/२२
नीतिं प्रकाशयितुमेव विपत्सु १०/१९
नीत्याऽनया तन्निरासात् १५/२२
नीरजा मलयमण्डलवृत्त्या ६/३४
नूनं पिपासुरतिरोदिति हन्त बालो २/३९
नृपगोत्रभुवोः पुराऽत्मनोः ७/५४
नेतारो यतिवर मानवा न हीमां १६/८
नेदृशं तद् यथा कुम्भ- १५/२८
नेदृशं स्थलमलं शमलघ्नं ६/४७
नेदृशैः कविभिरेव केवलं ९/२७
नेमुः खादुपनिषदं तदैतरेयीं १६/५४
नैतदीरितमहो जगृहुस्ते ६/९
नोदितं स्मृतमपीति हि शिष्यैः ६/४९
न्यवसदमरधिष्ण्ये प्राग्रवाटाभि- १२/५४
न्यायमार्गमपहाय महान्तं ६/२७
न्यायरत्नानि भाष्याब्धेः १५/७३

प

पञ्चगव्यं पपौ किञ्चित् १५/१०६
पञ्चाशन्नरपनरोपनीतमात्रां १६/३१
पञ्चास्यः श्वभिरिव ही विहीन- १६/३५
पञ्चास्यो योऽभवद् व्यक्तं १५/१२४
पटवच्चेदवयवा निरस्यन्ते १५/५६
पठसि नो शठ ते सखिभिः समं ३/५०
पत्न्या समं भगवतः स भजन् २/२०
पदपद्मरजोदास्यं १५/७०
पदपद्मरजोऽस्य धारितं ७/२५
पदमुदीर्य जवेन यियासितं ३/४४
पदं पशोर्वा विनतातनूज- १०/३०
पदारविन्दप्रणतो हरीन्द्र- १/१२
पद्माकरं वा कलुषीचिकीर्षुः १/४९
पद्माख्यासत्सैन्धवेनाहृतां तां १२/४२
पद्मेशपदपद्मश्रित् १५/७
पयःकलशपञ्चकत्रिकयुगाभिपूर्णं १०/५२
पयस्विनीं प्रेक्ष्य पथि द्विजार्चितां ५/३५
पयोवदिति चेत् साध्य- १५/९
परतत्त्ववर्णनमयोग्यतावते ८/४९
परतत्त्वविवर्तत्वाद- १५/२६
परपक्षरथारूढं १५/२
परप्रकारेष्वपि सम्भवत्सु ते ४/५०
परभागतः स्फटिककुट्टिमभूः ११/३०
परमथ परमान्नं प्राप्तमेवाप्रयासं १४/३९
परमागमार्थवरशास्त्रमिदं ११/७
परमाजिनयोगपीठगं ७/२३
परमाण्वादिदेशेषु १५/५८
परमात्मने सततमेकरूपिणे ८/४१
परमान् प्रकाममर्थान् १०/४७
परमारुणपाणिपल्लवान्तः १३/३२
परमाश्रममाश्रयं श्रियः ७/१
परमाश्रमिणां गतश्रमो ७/८
परमेव स पारमारुरुक्षु- १३/५३
परमेश्वरयोः प्रसादयोगात् १३/४५
परमोरुनितम्बसङ्गिना ७/३१
परयोगभूरिसुखभोगमिता ११/२०
परिचराग्निगुरू चरितव्रतः ३/३५
परिणायकानुपवनाभिमुखा- ११/२७
परितापविहीनमुज्ज्वलं १४/५४
परितुतोष न तत्र जगद्गुरौ ३/४९
परितोऽपि हरिं स्फुरन्त्यहो ७/३०
परिपूर्णचन्द्रपरिहासिमुखं ११/६४

परिपूर्णमतेर्जगत्सु कीर्ति-	१३/६१	पुरतो विसृताः समाधिशुद्ध्यै	१३/११
परिपूर्णशशाङ्कबिम्बशङ्का-	१३/३३	पुराणस्थानपान्थानाम्	१५/७७
परिवारजना न मार्गदुःखं	१३/२०	पुरातनानामपि सौम्य कुत्रचित्	४/११
परिवृढघनसङ्घे राजसिंहोर्जशक्त्या	१४/१	पुरा विनश्याम इतो दयालो	१०/४०
परिवृतमवनम्रैर्ग्रामणीग्राम्यपूर्वै-	१४/३	पुरुधीः कदाचिदथ वेदनायकं	८/१
परिशोधयता स्वपादसङ्गात्	१३/३	पुरे कुमारानलसान् विहारा-	१/३०
परिषत्पदपट्टनेषु नार्घो	१३/४५	पुरेव कृष्णाप्रियमापदश्रमं	९/५३
परिषदा नितरां परिवारितः	३/२२	पुरैष कृष्णाकरसिद्धशुद्धिमद्-	४/७
परिसृत्वरकीर्तिरार्तिमुक्त्यै	१३/६	पुष्टबुद्धिरकरोत् करुणाब्धि-	६/३१
परे परस्याप्यतिपीनतादृशः	५/४०	पुष्पमुत फलमहो विदधे	१०/५३
पर्याकुलानेकसरस्वतीततीन्	५/३४	पुंस्त्वाच्चैत्रवदित्यस्ता	१५/४५
पर्यासीनास्तावदाचार्यवर्यं	१२/३०	पूर्णदृक् प्रततया निजकीर्त्या	६/२२
पर्यैक्षि प्रभुरितरैः शिवाग्निपूर्वै-	१६/३३	पूर्णदृष्टिजलधेर्गृहीतवान्	९/३२
पवनांशानुजो जित्वा	१५/१०९	पूर्णसद्गुणमजं गतदोषं	६/२९
पश्यन्तः स्वगुरुमथाऽर्चिचन्	१६/५५	पूर्णेन्दुप्रभवदनः क एष धन्यो	१६/१७
पक्षयोरविशेषत्वाद्-	१५/३८	पूर्वजन्मसु हि वेद पुरेदं	४/५३
पक्षिश्रेष्ठोऽपरः सन्नमितमति-	१२/५२	पूर्वापरीकारमथापरं वा	१/८
पाश्चात्या बलिसलिलं समं ददत्या	१६/३७	पूर्वाऽपूर्वा हन्त दौर्घट्यभूषा	१२/४
पाण्डित्यं परममवेत्य तस्य तादृक्	१६/४४	पूर्वाशामापूर्य विश्वप्रकाशी	१२/४९
पातुं पयांसि शिशवे किल गोप्रदो-	२/३०	पूर्वेऽपि कर्दमपराशरपाण्डुमुख्या	२/१८
पादसुन्दरपदक्रमभावै-	६/२५	पृथिवीपतिनाऽनुगम्यमानो-	१३/२३
पादैः पुनन्तः पृथिवीं	१५/१३०	पृथुकुम्भकर्णगजराजमुद्धतं	८/३३
पादोपान्तनमन्महामुनिगणं हेम-	६/५७	पृथुदर्शनमुत्थितं कृतार्थं	१३/१
पारन्तीसुरसदनं विशालसंवित्	१६/३६	पृथुपीवरवृत्तहस्तयो-	७/३५
पारम्पर्येणाऽगतं तत्व-	१२/२२	पृथुमतिरथ तेषामैक्यमापाद्य	१४/२३
पाराशर्यः परतत्वप्रसिद्ध्यै	१०/२५	पृथुमतिरिह तावच्छ्रेष्ठसंसर्गलोलैः	१४/२६
पारिव्राज्यं प्रार्थयन्तं	१५/९३	पृथुवक्षसमुन्नतांसभित्तिं	१३/३२
पुच्छान्तमच्छमवलम्ब्य कदाचिदेष-	२/४५	पृथुवृत्ततुङ्गकठिनोरसिज-	११/५५
पुत्रोद्भवश्रवणतो महदाप्य सौख्यं	२/२७	पृष्ट्वाऽवगम्य सकलं च ततः प्रवृत्तं	२/४०
पुनःपुनस्ते चरणारविन्दं	१/२५	पौत्रे पवित्राह्वयजामिपौत्रे	१/४४
पुर एव पूरितममपूरयत् पुन-	८/३	पौरुषेयत्वतो यद्वद्-	१५/४४
पुरतो मधुरस्वनैर्वदद्भिः	१३/२५	प्रकटीभवति स्म सुन्दरी	७/१९

प्रकारं प्रकटीकर्तु-	१०/५
प्रकाशयन् स्वातिशयानमानुषा-	५/४८
प्रकृतितः कृतिता खलु मे शिशोः	३/२७
प्रगतासु तासु रणितै रशना-	११/३५
प्रचुरान्तरप्रवचनं फणिराड् -	११/१
प्रजासरोजावलिरश्मिराजः	१/४३
प्रणतिपरमकृत्याः सन्मतेर्ये जनौघा	१४/४२
प्रणतिरभसधूळीबद्धशोभाविशेषा-	१४/१७
प्रणमामि पदद्वयं विभो-	७/२६
प्रणम्य गुरुमादरादथ नियोगतो-	९/५५
प्रणम्याऽचष्ट शिष्योऽसौ	१५/७०
प्रणयबन्धुरबान्धववानसौ	३/३२
प्रणयामृतपूर्णमानसः	७/५२
प्रतनावतिसुन्दरे मृदा-	७/३२
प्रतिकामिनीप्रणयतः कलहो-	११/६०
प्रतिकृतिमखिलज्ञस्याऽपरोक्ष्येण	१४/२७
प्रतितनव उदारास्तास्वलं सन्नि-	१४/२८
प्रतिपादितमात्मना यथार्थं	१३/४९
प्रतिभाप्रभाप्रमुखसद्गुणैर्निजै-	८/१
प्रतिसद्म भाति यमुना मिळिता	११/१०
प्रतीक्षमाणं तमनुग्रहं मुदा	४/१४
प्रत्यज्ञायि व्यक्तमार्येण सोऽपि	१२/९
प्रत्ययप्रकृतिसङ्गमभङ्गी	६/७
प्रत्यर्थी स्वयमिति दूरवोऽभिधावन्	१६/४६
प्रददौ त्रिजगज्जयध्वजं	७/३४
प्रद्योतैरुडुपदवीं प्रकाशयन्तः	१६/५३
प्रधानमपराधीनं	१५/९
प्रपदादिकान्तसकलावयवा-	११/७०
प्रभुनिदेशकरो हनुमत्तनौ	३/४५
प्रभुपदारुणचारुतराङ्गुली-	३/३९
प्रमदातिरेकमुपयातवता	११/४६
प्रमाणकोटेः स हि हेळयाऽगा-	१/३१
प्रमाणादिवदित्येव-	१५/४२
प्रमोदतीर्थाननचन्द्रचन्द्रिका	५/२९
प्रयुक्तमात्रान् प्रहसन्	१५/६६
प्रवचनमतिचित्रं प्राणभाजां	१४/२४
प्रविशन्निमां स जगदेकसुन्दरो-	८/२४
प्रश्नः पृष्टः खण्ड्यते तेन नूनं	१२/१०
प्रस्तुता अभिदधौ परीक्षकैः	९/१५
प्राग् रिङ्गणं स्वयमथ स्थितिमेष-	२/४४
प्राच्यं शास्त्रं यत् सपादं तु लक्षं	१२/११
प्राज्यतापहरदर्शनाम्बुना	९/२८
प्राज्यप्रज्ञः प्राज्यया प्रज्ञयाऽसौ	१२/३८
प्राज्ञमौलिमणिरभ्यनुज्ञया	९/३
प्राज्ञवित्तमयमाप्तुमागतै-	९/१५
प्राज्ञैर्महापूरुषसर्वलक्षणैः	५/४०
प्राज्ञो राज्ञां त्रिदिवपदवीं कौरवं	१०/४९
प्राणेश्वरः प्राणिगणप्रणेता	१/९
प्रादिभेदमविदन् गुणयं त्वं	६/१५
प्राद्योतनिप्रीतिकृता निकामं	१/१३
प्राप केरळसुमण्डलजात-	६/११
प्रापदाप्तैर्निजैरेष शिष्यैर्वृत-	१०/८
प्राप स नारायणतः	१०/२४
प्रापुर्द्विजेन्द्रास्तमपूर्वपूरुषं	५/५०
प्राप्तमात्मनगरान्तिकं नृपः	१०/१४
प्राप्तस्ततो हस्तिनराजधानीं	१०/३४
प्राप्ते महाय महिताय महाजनौघे	२/६
प्रायात् प्रियस्य सहसा स्वजनैरदृष्टो-	२/४५
प्राळेयाद्रेः प्रान्ते प्राज्ञः	१०/२३
प्रियमेव साधयति नित्यमहो	११/४४
प्रियया च शोभनशुकस्वनया	११/४२
प्रियवयस्यशिरोगुरुवेदना-	३/५३
प्रीतयेऽस्य पुरतो वरभाष्यं	६/३९
प्रीतिमार्ययतिरुत्तमां पुरा	९/३१

प्रीत्यै विष्णोरुत्तमप्रीतितीर्थो- १२/२९
प्रेमामृतप्रसन्नास्य- १५/९८
प्रेष्ठो न रामस्य बभूव तस्मा- १/२४
प्रैरयत् स्वचरणे रतचित्तं ६/४५
प्रोच्य तत्प्लवनमप्यतिचित्रं ६/५३
प्लवनतेजसि हन्त न केवलं ३/४५
प्लवैरपेतामवलोक्य सिन्धुं १०/२७

फ

फलमप्यथ मुक्तिरीदृशी स्या- १३/५९
फलिनीकुलं कुसुमयञ्छिशिरो- ११/४३

ब

बभुरमलगुणानां शोभनाच्छा- १४/१९
बलाय सर्वानुमानां १५/१३
बहवो गृहिणो यस्मात् १५/१३५
बहुप्रकारे लिखितेऽपि वाचिते ४/४९
बहुविधैश्चरितैरिति चारुभिः ३/३१
बहुश्रुतत्वाद् यदि तत् सहे बला- ४/२४
बहुसत्त्वगुणं सविकं समहा- ६/५५
बहून् द्विजिह्वान् मणिमत्पुरोगा- १/३९
बाहुल्येन ह्येतदुक्त्वा खलु द्रा- १२/१६
बालसङ्घमपि बोधयद् भृशं ९/१०
बालस्य बालपरिलम्बनगोचरं तद् - २/४८
बिभेद भूभृद्वपुरङ्गसङ्गा- १/२९
बिल्वपर्णैः क्षितौ पत्रै- १५/१०७
बुद्धिशुद्धिकरगोनिकराढ्यं ६/३५
बुद्ध्यब्धिना वादिवरेण चाऽर्जितां ५/१६
बुधोऽभिधानं श्रवणं बुधेतरो- ४/४७
बुभुत्सया मत्सरवर्जितान् जनान् ५/२२
ब्रह्मवेदननिविष्टचेतसां ९/५१
ब्रह्माप्यखण्डं बत शून्यसिद्ध्यै १/५१
ब्रूयुरौपाधिकं भेदं १५/२२

भ

भक्तैरनुगिरं नीतं १५/१०६
भक्त्या भवाब्धिभयभङ्गदया २/१९
भगवत्तमपादपङ्कजे ७/५०
भगवत्तमस्य विपुलप्रमतेः ११/३
भगवत्युदिते सगोविलासे १३/५०
भगवत्समीपमुपयातवतां ११/२२
भगवन्तमनन्तमन्तिके ७/११
भगवन्मनः पुरमिवाऽयतं पुरा ८/३
भगवंश्चित्रकवितां १५/८३
भगवानिह नः स्वकिङ्कराणा- १३/२
भजतां वरतर्कमुद्रया ७/३६
भजतोऽत्र च भाजयत्यदो ७/२९
भत्सयन्निति जहास ६/१५
भवतां पतिं क्षितिपतिं दिदृक्षवः १०/११
भवता सुसखा चक्रे १५/७७
भवतोरितः सततसेवनामृते ८/४८
भवत्प्रवक्तृत्वसमर्थता न मे ४/४६
भवनं विभाति भुवनैकपतेः ११/१५
भवभयमहाघर्मोत्तप्तं सदङ्घ्रिप- १०/५६
भवादृशैर्यः कविभिर्न दूष्यते ५/२०
भविताऽन्यदुष्करतरं विधाय तत् ८/४४
भविष्यतः शिष्यवराद्धि विद्धि मा- ४/१३
भारतं ननु शतार्थमपि स्याद् ६/४
भारतोत्तमभृतामनुरूपा- ६/२५
भावाभावविशेषाणा- १५/३६
भिक्षाप्रदात्राऽत्र परीक्षितुं मुहु- ५/३१
भिक्षावसाने द्विशताधिकैः फलै- ५/३२
भित्त्वा भुवं देवनदी जगाम १०/३५
भिदा सुसाध्येत्यनुमानमत्र तैः ५/४
भीतैररातेरतिमात्रमत्र १०/३१

भीमत्वे सह सहजैः प्रतिष्ठितः प्राक् १६/३७
भीमसेन इव सूनवर्यहृत् ९/६
भीष्मद्विजाचैरतिभीषणाभं १/४१
भुक्तं च जीर्णं परिपन्थिदत्तं १/३१
भुङ्क्ते स्म त्रिदशनरोपभोग्यमन्नं १६/४७
भुजगेश्वरोऽपि भुवनेश्वरप्रियः ८/२०
भुजङ्गभूतेशविहङ्गपादिकैः ४/३५
भुजयोर्युगेन रमणो रमणीं ११/५५
भुवनत्रयधारिणं मुकुन्दं १३/१८
भुवनत्रयभूत्यभूतिदाने १३/३५
भुवनभवनपूर्णं भानुमानञ्जनाभं १४/१५
भुवनभर्तुरहो स्वनिगूहनं ३/३७
भुवनाद्भुतमध्वचेष्टितं १०/३
भूयोबोधस्ततो भूयो- १५/१
भूरिभक्तिभराः केचिद- १५/१३४
भूरिव्रतप्रभवदिव्यसुकान्तिमन्तौ २/२२
भूसुरप्रवरवृद्धिसमृद्धि- ६/२४
भृगुकुलतिलकस्थानं १०/१
भृशमाकुलीकृतमदप्रमादव- ८/२९
भेदापेतं भेदि मानैः समानैः १२/५
भोगाधिकाभोगवतोऽरुणाक्षा- १/३९
भ्रष्टा भाट्टा न प्रभाकृत्प्रभाऽभूत् १२/८

म

मङ्गल्याङ्गव्यक्तभावा त्रिलोकीं १२/३३
मज्जनं व्यधित शीतळगङ्गा- ६/४३
मज्जन्तं पृथुलहरीनिगूढमूर्तिं १६/२१
मठान्तरेऽनन्तगुणान्तरः स- १०/३४
मणितादिसौरतवितानपटू- ११/५८
मणिराजिराजितमहा- ११/६३
मणिस्रजं वा प्लवगोऽव्यवस्थो १/४८
मण्डयन् भरतखण्डमखण्डं ६/३८
मतमित्यवेत्य महितं महतो- ८/५३
मता माध्यमिकास्तेऽपि १५/२४
मत्तदुर्वादिमातङ्ग- १५/१२४
मदनाधिपतेः सुधाम धाम १३/९
मदनेश्वरवल्लभप्रदेशे १३/२१
मधु मधुकरराजो निष्पतन् पौष्पमाघ्रुं १४/५
मधुमाधवौ मधुपगीर्मधुरौ ११/३९
मधुरपतगरावाः शान्तनैशाम्बु- १४/१६
मधुरस्वरास्ततपतत्रतति- ११/४१
मध्ये तेषां नीचनीत्या समानो- १२/३
मध्येऽन्येषां गोततीस्तत्प्रयुक्ताः १२/४५
मध्वकेळीशुकोऽस्याभू- १५/११७
मध्वप्रशिष्या बह्वो- १५/१३२
मध्वानुजे मध्वनाथो-. १५/११३
मध्वाब्धी परममतेः प्रियं जनानां १६/१५
मध्वेनाहो दुस्तरेण स्वभावात् १२/२८
मध्वेन्दोर्नित्यसम्बन्धा- १५/९१
मध्वे ब्रुवाणेऽमत तौ जितौ जनः ५/१५
मनोमान्द्यात् ततो ग्रन्थं १५/८७
मन्त्रयन्त इति ते द्विजवर्या ६/१३
मन्दहासमृदुसुन्दराननं ९/३
,, ९/४३
मन्यन्ते शून्यमेवान्ये १५/२४
मम नाथ पदं न मत्सरा- ७/४२
मम प्रभोर्नापरथा हि शोभते ४/३
मरतकमणिवर्णे भूतधात्रीपुरन्ध्र्या- १४/४७
मरुतीदृशि भान्ति हि यत्स्तवने १०/७
मर्त्यामर्त्यामर्त्यविद्विट्पुरोगं १२/५
मसृणत्वचमुन्नतं ततं ७/११
महमतो निजबन्धुमुदे मुदा ३/१
महवता स्वजनेन समीरित- ३/२१
महागदं चण्डरणं पृथिव्यां १/३६
महानन्दतीर्थस्य ये भाष्यभावं ११/७७

महान्तं महिमानं च १५/११९
महाविटपिनं चक्रे १५/१००
महितं भवद्भिरपि लोकपते ११/३
महितं हि महीतळे महिम्ना १३/५१
महिदासपूज्यचरणो द्विजादभूत् ८/३५
महिष्ठहृदयो महामहिमसिन्धुरान- ९/५५
महीयोमतिमाहात्म्याद्- १०/५
मा गृह्णेरन् विश्वसत्त्वान्तराणि १२/१४
मा तात तात सुमुखेति पुनः प्ररोदी- २/३६
माध्वं नियोगं ये प्रायो १५/१३६
माननीयमपि नाकिनायकैः ९/११
मानमानमयतीह कथं नो ६/१२
मानमित्यपि विधाय धिया ते ६/३
मानिनोऽपि हि वशीचकार यो- ९/४४
मानीकृताम्नाययुतस्मृति क्षणा- ५/२१
मानैर्मान्यैर्भासमानोऽसमानै- १२/२९
मा मैनं भुवनगुरुं विनिन्दतेत्थं १६/१३
मायाविग्रामसिंहान् यो- १५/१२३
मार्गात् सतां स्खलति खिन्नहृदो- २/१
मालाकृतस्तच्चरिताख्यरत्नै- १/८
मिथ्याभिमानरहितः परयेव मुक्त्या २/१३
मुकुन्दबोधेन महाहृदब्रवीत् ४/५०
मुकुन्दभक्त्यै गुरुभक्तिजायै १/५
मुकुन्दवैगुण्यकथां स्वयोग्यां १/४६
मुकुळितकरपद्मा आस्यतामित्य- १४/४३
मुक्तो रूपादिवित्सत्वात् १५/५९
मुक्त्वाऽयःकठिनतरत्वचं शिरोधिं १६/२८
मुखरमिच्छति को मृगधूर्तकं ३/२४
मुञ्चन् महीं नित्यनिषेवणार्थं १/२६
मुदमाप्य तत्र दयितोरुवार्त्तया ८/३२
मुनयोऽभिवाद्य विनयाभरणा- ११/२
मुनिनन्दनमिन्दरापते- ७/१२
मुनिमण्डलमध्यवर्तिनं ७/१६
मुनिसप्ततन्तुकृतवैरबन्धनं ८/२२
मुररिपुविमुखानां दुस्सहो देहभाजां १४/३०
मुष्टिप्रहारं दशकाय सीता- १/१७
मुहुरपृच्छदमुष्य गतिं नरान् ३/८
मृदुकग्रशय्यमनुरागवतां ११/५३
मृदुकुमुदचकोरैः पादसङ्गेन राज्ञः १४/५२
मृदुगामिविमानसम्पदो १४/५४
मृदुसूक्ष्मघनारुणाविकाच्छ- १३/३१
मेति भाण्यविशेषत्वाद्- १५/३९
मोहपीतलवणोदको मुहुः ९/३७
मोक्षशास्त्रामृताम्भोधि- १५/१३१
मौकुन्दे सुन्दरे रूपे १५/१११
मौनवानलिखदुत्तमचित्तः ६/४६
मौलिसङ्गहविकर्षणदूनां ६/२७

य

यच्चेतनाचेतनयोः १५/११
यच्छक्तिगुप्तिरहितानलमस्मि २/३४
यतधीर्गुरुचक्रिमूर्तिपूर्णं १३/१३
यतयो गृहिणोऽथ वर्णिमुख्याः १३/१९
यतवचसि जनेऽस्मिन्नानते १४/२२
यतिरतियतचेताश्चक्रिणोऽर्चा- १४/१२
यतिर्यतात्मा भुवि कश्चनाभवद् - ४/६
यतिर्विशेषादिति लोकचोदनात् ४/४७
यतीश्वरानुव्रतमात्मनन्दनं ४/१९
यत्र स्वानन्दिनः सन्तः १५/४७
यत्रामा वसति तिथाविनेन चन्द्र- १६/१०
यत्संवृत्युत्थितं विश्वं १५/२९
यत् सायमैक्षत जनः शिशुमाव्रजन्त- २/४८
यत् स्पृशन्ति न नरा हिमभीता- ६/४३
यथा कुशास्त्राध्यसनं मुरद्विषः ४/८
यथाऽऽत्मनः प्रदेशाः स्युः १५/५८

यथेष्टमध्यास्त शिलां	१५/१०८
यदन्यथा देशमिमं परित्यजन्	४/२८
यदा विरक्तः पुरुषः प्रजायते	४/२३
यदास्यशीतांशुभुवा गुरूंस्तां-	१/४
यदि चेद्गुणास्यतेऽस्य रूपं	१३/५९
यदि तेषु निराग्रहान्तराः स्मः	१३/५६
यदि नाभविष्यदिह विभ्रमता-	११/११
यदि राजविभूषणैर्युतौ	७/५४
यदेतदात्मैक्यमुपास्तिचोदितं	४/११
यद्वतैकतमवर्णलेखकः	९/१३
यद्ब्रह्मसूत्रोत्करभास्करं च	१/५२
यद्भ्रूविजृम्भेण सशम्भुशक्रं	१०/४१
यद्यदेव सपदि प्रकृतं स्यात्	६/२१
यद्यद्वैतं कर्कशैर्गौणतर्कैः	१२/२०
यद्यप्येवं न ह्युपेक्ष्यो विपक्षः	१२/२१
यद्वत् सिंहं ग्रामसिंहोऽशुचीच्छो	१२/२७
यद्वन्मायी भूरिमायुस्तरक्षुं	१२/२७
यं तत्वावेदकं वेद	१५/३३
यमजाम्युदवास ऊर्जितो	७/५३
यमशेषभवप्रभवः स्मरता-	१०/७
यस्तमुत्तमगुणं विडम्बय-	९/२६
यस्तु तार्किकशिखामणिः सुधी-	९/१८
यस्त्रयीसकलपक्षशिक्षक-	९/१७
यस्त्रिवारमितरासुतशाखा-	६/५०
यस्मै प्रसन्नः प्राज्येक्षः	१५/१२१
यस्य त्रिलोकजननी जननी	२/४१
याज्यया समुचितानुवाक्यया	९/४८
याति तावदधुनैव जनोऽयं	६/४८
यानियानि चरितानि यानिया-	९/५२
यामस्तावत् तूर्णमाशामुदीची-	१०/१७
यायजूकगुणमात्मनः स्मरन्	९/४४
यावदर्थशतकं न विशङ्कः	६/८
यासु स पद्मासहितो-	१०/२४
यायाः प्रसक्ताः परिषत्सु पूरुषै-	५/४५
यियासति स्वस्तटिनीं मुहुर्मुहु-	४/४०
युक्ताः प्रसादयन्त्यर्था-	१५/७४
युक्ताया युक्तिमालायाः	१५/९०
युक्तिप्रवाहसंरम्भात्	१५/१२२
युगपद् रचयन्नेनां	१५/८९
युवशिष्यगणो दधे नयत्ता-	१३/१४
युष्माभिः किं नैक्षि देदीप्यतेऽसौ	१२/४९
येये गुणा नाम जगत्प्रसिद्धाः	१/१०
येषां विद्या शाङ्करी शङ्करी नो-	१२/१९
येषां सद्बुसिमात्रेण	१५/१३७
यैः प्रैक्ष्यतात्र भवतापशमाय	१५/१४१
योग्यत्वे सति नहि दृश्यतेऽधिकारी	१६/४
योग्या मङ्क्तुं तेऽन्यथा स्युः कथं	१२/२५
यो दुःखसमवायोऽयं	१५/२०
यो नैवं स्यात् स नैवं स्यात्	१५/१६
,,	१५/१७
योऽपरोक्षवपुषाऽप्यपेक्षितः	९/५०
यो भूरिवैरो मणिमान् मृतः प्राग्-	१/४७
यो लोकत्रयविजयी गुरुः प्रसिद्धः	१६/२१
यो वेदवेदितार्थानां	१५/३७
योऽसौ देवो विश्वदीपः प्रदीप्तः	१०/१७
यँयं सुखी कामयतेऽर्थमत्र	११/७६
यँयं प्रापद्भूरिचित्तः प्रदेशं	१२/९
र	
रचितं ननु सूत्रमत्र मानं	१३/५५
रभसावपातितपृथूरसिजः	११/५८
रमणीयरत्नगणविद्धलसद्-	११/६५
रमावरावासभुवा विशारदो	४/१
रविचक्ररुक्प्रकरचक्रकरं	११/६६
रविरिव रविपूज्याङ्घ्रिः समाजान्त-	१४/२२

रसिकाः सुधाप्सु सरसीषु ततो- ११/४९
रसोज्झिताश्रश्लवृत्तयोऽलं १/४५
रहस्यतिरहस्यं तद्- १५/९७
राजसूयमुखसन्मखवृत्तां ६/२६
राजानमत्युज्ज्वलराजसूयं १/३६
राजाऽस्य स्फुटमुपलभ्य विस्मितो १०/१८
राजेव सत्पुरवरं भुवनाधिराजो- २/२५
राज्याभिषेकेऽवसितेऽत्र सीता १/२२
राज्ये कथञ्चित् संस्थाप्य १५/९५
रामप्रियो राम इव १५/१३८
रामस्य वाण्या मणिमञ्जुमाला- १/२२
रामाधिवेशितहरिस्वसृमौलि- २/११
रामार्चने यो नयतः प्रसूनं १/१९
राक्षसासुरनिरासकृत्सुरान् ९/४९
रिपुनृपप्रणिधिप्रतिशङ्कया १०/१५
रुचिरवाचनयाऽर्चितवाक्छ्रिया ३/२१
रुचिराश्रमाजिरचिताग्रतेजसा ८/२९
रुचिरेण वरैणचर्मणा ७/३१
रुद्धाखिलाशं मुखरं प्रचण्डं १/४०
रेमेऽच्छयोपनिषदेव महाविवेको २/१३
रोदे क्रियासमभिहारत एव वृत्ते २/३७
रोद्धैष नोऽस्ति धनिको वृषविक्रयीति २/५०

ल

लज्जानतः स्वार्थमथार्थयन्नस- ५/४४
लब्धं सुतादिति वदन् द्विजपुङ्गवेन २/५२
ललना ललन्त्यभिवरं प्रवरा- ११/४७
लसिता तुळसीस्रगस्य कण्ठे १३/१२
लाळिता शिरसेशेन १५/७
लक्षणान्विततया वचनेऽस्मिन् ६/३
लक्षणाभिः प्रवर्तन्ते १५/३४
लिपिकुलं ननु तात गते दिने ३/१९
लीलया सजवमाक्रममाणं ६/५१
लीलाकरेण स करेण सुकोमलेन २/५१
लीलां करोति नु गृहान्तरगो नु २/४७
लीलावसानसमये सहसा कदाचि- २/५०
लीलाविवादे गुरुणा जगद्गुरोः ५/२५
लेखिन्यां मुहुरपिनह्य कृष्यमाणं १६/३४
लोकानामवलोकाय १५/७९
लोकानामुपकृतये कुतः शिलेयं १६/८
लोका वा सकलभृतस्त्रयोऽत्र रेजुः ८/५४
लोलालोककलोकदृक्कुमुदिनी- ५/५२

व

वचसेत्यनेन स परान् न्यरुणद्- १०/१२
वच्मि शक्तित उरुक्रमगीता- ६/३९
वदतां वरस्तमवदत् तदा तयो- ८/४७
वदनपवनभीत्या पार्श्वतो बिभ्रदग्रं १४/३३
वदनमाकुललोचनमादधे ३/४६
वदनेन्दुमवेक्ष्य नन्दनस्य १३/४६
वदनैः शुचिस्मितकटाक्षरसै- ११/३४
वद विशारदवाद यथेप्सितं ३/५१
वदोत्तरं भाति यदीह कुर्महे ५/३९
वनलीलया विविधया मुदिता- ११/४८
वन्दमानमवलोक्य यां मुदं ९/३०
वपुरिन्दिरापतिरमन्दरसं ११/६२
वपुर्जगन्मङ्गलमेष दृग्भ्यां १/२१
वरनूपुरं परमरुक्प्रपदं ११/६९
वरपारिभद्रकसुकल्पतरु- ११/३८
वरपीवरांसमधिराजदुरो- ११/६७
वरमन्दिरप्रकरमध्यगतं ११/१५
वरवल्कलाकलितमौञ्जमेखलं ८/७
वरविमानगिरावपि चण्डिका ३/१७
वरहस्तिहस्तसदृशोरुयुगं ११/६८
वरहारराजिभिरुतानुपदं ११/३३
वराश्रमस्ते जरतोरनाथयो- ४/१६

वराश्रमाचारविशेषशिक्षणं ४/३६
वराश्रमाप्तिं मम संवदस्व मां ४/२८
वर्णयामि तदहं सकलं वः ६/६
वर्णसौष्ठवगरिष्ठमतूर्णं ६/२
वर्णितावधृतिदुर्बलचित्ता- ६/८
वर्तस्वाध्यधि सर्वं १०/४६
वर्धितोर्मिर्हरिप्रेष्ठा १५/६
ववृषुरखिलदृश्यं पुष्पवारं सुगन्धं १६/५८
वलयेन वृतः प्रियं मुरारेः १३/३८
वशीकृतहृषीकाश्च १५/१२८
वह्निप्रवेशाधिगतात्मशुद्ध्या १/२०
वाक्यैरतिबलीयोभिः १५/६८
वागीशानैर्वाग्विहङ्गेन्द्रजीवै- १२/३६
वाणी च यत्प्रेष्यतया कृतार्था १०/३५
वादव्याजाक्षेपकामाः कुमन्त्रा- १२/२६
वादादयः प्रकरण- १५/८१
वादिद्वीपिध्वंसिनं मध्वसिंहं १२/४१
वादिनो विशकलय्य तान् समा- ९/२०
वादिव्रातं लज्जयेन्नो विशेषा- १२/१०
वानरेन्द्र इव तीर्णवारिधि- ९/६
वानरेन्द्र इव वायुजवोऽसौ ६/५४
वायुना त्रिरपि पूर्वपायिना ९/५०
वारयतवारयत वैरिसुहृदोऽमून् १०/१०
वारि शारदमिव प्रसादव- ९/३६
वार्यतां बुधजनैर्ननु हाहा ६/३०
वासुदेवदयितो महिष्ठधी- ९/४७
वासुदेवधरणीधरनाथे- ६/२९
वासुदेवपदसन्ततसङ्गी ६/३६
वासुदेवमिति वासुदेवस- २/५३
वासुदेवमिह वासुदेवता- २/५३
विकटा विटङ्ककृतपत्रिततिः ११/११
विकल्पकोटीरथ खण्डयन् द्रुतं ५/१३
विकसितसुमनोघटागमुच्चं ६/५६
विगीतं न विचार्यं स्यात् १५/४१
विचिन्तयन्नित्थमनन्तचिन्तकः ४/४
विचिन्त्य पर्याकुलिता चिकीर्षितं ४/२९
विचिन्त्य विद्वान् स निरुत्तरीकृत- ४/२५
विजिगीषुर्द्विजश्रेष्ठो- १५/६७
विजित्य विश्वान् विदुषां सभास्वसौ ५/७
विज्ञातभारतपुराणमहारहस्यं २/१४
विज्ञानभानुमति कालबलेन लीने २/१
विततततमतमोन्तं साधयन्त्या १०/४४
विततः सुखसच्चिदद्वयात्मा १३/५८
विदधे वराहवपुषाऽमुनोर्मिम- ८/१५
विदितवान् व्यवहृत्य सुदर्शनं १३/६८
विदुषोऽविदुषोऽपि शृण्वतोऽलं १३/४१
विद्यासुधां चास्य वचोमहाघटे ५/२४
विद्योरुद्युतिधीरतारकतिरस्कारे ५/५२
विद्वेष्टा श्रुतिगुणसाधकं श्रुतीनां १६/२
विद्वेषं व्यधित पुनर्निरस्तभाग्ये १६/२४
विधयो विहङ्गपतयोऽगणिता- ११/२०
विधानमात्रं तदुपाददे तदा ५/२६
विधावतविधावत त्वरितमत्रिवा- १२/५१
विधिनाऽनुसृतं पराशरात् ७/१८
विधिभ्रूविभ्रमभ्रश्य- १५/९२
विधिवायुवीन्द्रशिवकौशिकेशका- ८/१२
विधुरयमकळङ्कः स्याद्यदि स्याद- १४/५१
विनयाभरणेन भूषितः ७/५०
विना कैवल्यसाम्राज्यं १५/११२
विनिहत्य हि श्रुतिमुषं पुरातनं ८/१४
विनीतमाम्नायशिरोविशारदं ४/९
विपक्षकक्षं क्षिण्वन्ति १५/८१
विपक्षयुक्तान् वीर्येण १५/६५
विपुलहृदयपार्श्वे दीपदीप्तिप्रदीप्रे १४/१२

विप्रात्मेशः क्षणार्थं कृतनतिर-	१०/५०	विशोधितात्मा मधुकृत्प्रवृत्तिमान्	४/७
विबभावतिवेलमच्छरूपः	१३/८	विश्वकर्तेति विश्वज्ञः	१५/८
विबभावुडुराडिवोडुमध्ये	१३/३९	विश्वम्भरं बिभ्रदसौ जिगाय	१/१६
विभवाभिभवोद्भवादिकं	७/४३	विश्वं मिथ्या विभुरगुणवा-	१/५५
विमतो नावयववान्	१५/५६	विश्वविस्मयकरः स्वतेजसा	९/४६
विमतं कारणं न स्यात्	१५/२८	विश्ववेत्तुरनुजोऽत्र होतृतां	९/४८
विमतः पुरुषोऽज्ञः स्यात्	१५/४५	विश्वव्याप्तं यत्तु तद्दीप्तिमूलं	१२/४८
विमलमलयजाम्भोबिन्दुभिश्चर्चि-	१४/३५	विश्वस्य चेष्टितमहो यदनुग्रहेण	२/४४
विमलाकृतिः प्रकृतिरेव महा-	११/१३	विश्वस्य विश्वपरिपालकपालनाय	२/३५
विमलाद् विमानवलयाच्छनकैः	११/२७	विषमोक्षमहाहिमवन्तमय-	६/५५
विमलान् मणीनिव गुणोज्झिता-	८/५०	विषयत्वं लक्षणानां	१५/३४
विरक्तं विषयान् भुक्त्वा	१५/९६	विषयेभ्यो हृषीकाश्वान्	१५/१०९
विरहदूनतयोद्गमनोन्मुखं	३/१०	विष्णुर्मोक्षस्य दातेति	१५/६३
विरहितस्वजनं चरणप्रियं	३/१५	विष्णुं विश्वजयप्रदं स हि नमन्	१०/५४
विरोधि वेदान्तकृतान्तसम्पदां	५/२८	विष्णोर्भूयः शोभयद्भिः पदान्तं	१२/४६
विलक्षणं जीवगणाद् गुणार्णवं	५/३७	विष्णोः पदश्रिद् बकसन्निरासी	१/३४
विवादस्य पदं न स्या-	१५/३१	विष्णोः पदान्तं भजताऽनिलेन	१/४५
विवादाध्यासिता सृष्टिः	१५/१०	विस्तृतान्तरवियत्पदौ यती	९/३८
विविदुरतितरां ये देवताः	१४/५०	विस्मेरैर्मुनिनिकरोपदेवयुक्तैः	१६/५२
विविधजनपदस्थाः प्राक् श्रुतेभ्यो-	१४/४३	विहरतीति पठत्यपि न स्फुटं	३/४९
विविधप्रभुमध्यसन्निषण्णो-	१३/३९	विहरन्ति साकमवगाह्य धवै-	११/४९
विविधवेदतया विजिहीर्षवो-	३/३३	विहसितबिसभङ्गश्रीप्रकर्ष सितिम्ना	१४/३४
विविधशाखिपदार्थनिवेदने	३/२९	विहितमनुसरन्तो धर्मशास्त्रप्र-	१४/४९
विविधसुवृत्तं वाक्यं	१०/२	विहितमविहितं प्रागेव कस्माद्वि-	१४/११
विविधस्तुलोपगतचित्रपटी-	११/१२	विहितसाधनसाधितसत्क्रियो-	३/३४
विविधा विधाय किल तत्र सङ्कथा	८/४३	विहिनस्ति हि नो जनोऽतिवाग्मी	१३/६२
विविधा विधाय विहृतीः सलिले	११/५०	वीच्यङ्गैरधिकतरैरिहाधिवेलं	१६/१४
विविधोत्तरधूळिपातनेन	१३/६६	वीतभूषमपि विश्वभूषणं	५/५१
विशङ्कटं स्वस्तटिनीतटं ते	१०/३२	वीरदृष्टिकृतसिंहविभ्रमः	९/५
विशुद्धद्विकुलं श्रौतं	१५/९६	वृष्ट्यादेः स नियमनादि चक्र एत-	१६/४८
विशेषमात्रेणानन्त्यं	१५/२३	वेदद्विषां यः प्रथमः समाययौ	५/८
विशेषशिक्षां स्वयमाप्य धीरधी-	४/३६	वेदप्रवचनाचार्य-	१५/१२६

वेदबाह्यो विपश्चिद्भिरेष- १५/३७
वेदभारतपुराणनिष्ठितो- ९/१८
वेदव्यासो न्वेष वेदो नु मूर्तो- १२/१२
वेदव्रातसुदर्शनः परिलसत्तर्काख्य- १२/५३
वेदशास्त्रचतुरैरिह विद्या- ६/११
वेदाद्रिसद्व्रजतपीठपुरेश्वराभ्यां २/१०
वेदानां समुचितभाववाददक्षं १६/१८
वेदान्तमार्गपरिमार्गणदीनदूना- २/३
वेदान्तविद्यानिजराज्यपालने ५/१
वेदान्तसन्ततकृतान्तरसं न विघ्नः २/५
वेदान्तसूत्राणि कृतान्तवित्तमो- ५/३७
वेदान्तं स्वयमिव बन्धमोक्षमूलं १६/१
वेदान्ताब्धिं न यो जातु १५/१२२
वेदिजामिव पुरा भरताग्र्यः ६/३१
वेदोक्तं फलमलमाप्यतेऽधिकारा- १६/४
वैकुण्ठेतेश्रीविशेषाजनाना- ११/७५
" ११/७५
वैकुण्ठं यातयोः पित्रो- १५/९१
वैधर्म्येणैष दृष्टान्तः १५/३१
वैराग्यवैयात्यसुवाक्त्वपूर्वकैः ५/२७
व्यक्तं चक्रे विवरणं १५/९०
व्यक्तमुन्नतिमितोऽप्ययं जन- ९/२४
व्यक्तं वक्तुं नियुनक्ति स्म १०/२५
व्यञ्जयत् स्मृतिवचोभिरञ्जसा ९/९
व्यदधत परिदृष्टज्योतिषः साधु १४/४९
व्यधादनुग्रहं कुर्वन् १५/११८
व्यहरद् वलक्षतमपक्षशोभनं ८/३९
व्याख्याता निशि स कदाचन प्रदीपे १६/६
व्याख्यान् कदाचिन्मणिमद्धि- ५/१७
व्याख्याप्रणादमात्रेण १५/१२३
व्याख्यालौल्यादैतरेयादिसूक्ते १२/४०
व्याख्यां भाष्यस्य भूयोधीः १५/७१
व्याचख्यावतिचिरमैतरेयशाखा- १६/१६
व्यासदेवहृदयातिवल्लभं ९/८
व्यूढहृज्ज्वलदघोषममुष्यो- ६/२
व्रजतामहो परमवैष्णवतां ११/७
व्रत्याकारं वासुदेवद्विषं ते १२/२६

श

शनकैः पुनस्तदवलम्बबलात् ११/३६
शबळद्युतीनि मदनस्य जग- ११/३१
शबळप्रभादिविविधद्युतिमत् ११/७२
शबळावळीकघटितस्फटिक- ११/१०
शब्दभेदमवधार्य तमर्चा- ६/४२
शरणान्तरेष्वधिकपूरणतः ११/१२
शरदोल्लसत्कुवलयेक्षणया ११/४२
शर्वशक्रगुरुपूर्वदैवतै- ९/२७
शार्दूलाख्यां प्राप्य सम्भावितः १२/४१
शास्त्रकल्पकतरोरमुष्य कः ९/२६
शिखिनोऽनुयान्ति हि सहस्रदृशं ११/४१
शितमध्ववचःसृणिप्रयोक्तॄन् १३/६६
शिलावदित्यतः शुद्ध- १५/६१
शिशुरसौ प्रतिभाम्बुधिरित्यलं ३/२०
शिष्यकैस्त्रिचतुरैर्जलाशये ९/४१
शिष्यप्रशिष्यातिशया १५/१३९
शिष्यक्षेत्रेषु सद्विद्या- १५/१३६
शिष्यान् स्वान् पुरुकरुणाम्बुधि- १६/६
शीतं पयोऽपि सततं परिपाययन्ती २/३८
शीक्षाशिक्षालक्षणानां हि लक्ष्यं १२/३४
शुकनिःस्वना ध्रुवमिमा अपराः ११/२९
शुचि हरिपदमापत्सम्पदोराश्रिता- १४/४६
शुभशुद्धनितम्बबिम्बराज- १३/३०
शुश्रूषापक्षपाताद्यैः १५/१३८
शून्यं ब्रह्माद्यमद्वैतं १५/४१
शून्यं ब्रह्माह्वयेनाऽहुः १५/२५

शुद्धधीः श्रुतिशिरःशतसिद्धा- ६/७
शृङ्गाररसिन्धुं स भुजङ्गशायिनं ५/४७
शृणुताऽदरेण महनीयतमं ११/५
शृणुताप्यलोकविषयं विषयं ११/६२
शृणु देवकार्यमवधार्य धैर्यवद्- ८/४४
शृणु वाचमिमां विचारितार्थां १३/५२
शोभनाय गुरवे स्वभावतः ९/३३
शोभनोपपदभट्टनाकः ९/१७
शौक्रीवालं लज्जयेद् देवपूज्यं १२/१९
श्यामं स्मितास्यं पृथुदीर्घहस्तं १/२१
श्रद्धुरधिकवाक्यैर्विभ्रमास्तच्च १४/१३
श्रवणमननकीर्तनैरभीष्टं १०/५५
श्रवणमननहेतोः प्राक् चिरायास्त- १४/१०
श्रवणामृतगीर्गणैर्द्विजैः ७/३
श्रवणेनानुवादेन १५/९९
श्रितसाधुपुराणभारतं ७/१३
श्रीकान्तेश्वरसदनेऽनयत्किलैको १६/२६
श्रीकृष्णामृतपरमार्णवाभिधानां १६/४०
श्रीमन्तं शशिवदनं कुशेशयाक्षं १६/५५
श्रीवल्लभाङ्गां ससुरेन्द्रयाच्ञां १/९
श्रीविष्णुतीर्थनामास्मै १५/९८
श्रुतप्रवीणानतितार्किकान् मुहु- ५/२२
श्रुतिनाथदिदृक्षयाऽन्यथा ७/९
श्रुत्या मत्या सदा भक्त्या १५/१२१
शुश्रूषामयमुचितो विधातुमीष- १६/२५
श्रोतुमिच्छति सभा भगवद्वचः ६/१
श्रौते व्याख्योच्चारणे चारुणी ते १२/३६
श्व एव वादोऽस्त्विति वादिनौ ५/१५
श्वित्रिणी भवति तत्पदवाच्ये- ६/१८

ष

षट्कर्मज्ञैर्दिव्यमन्त्रौषधाढ्यै- १२/२०
षडर्धविक्रमार्योऽसौ १५/७२

स

सकमण्डलुमण्डलावलम्बं १३/१४
सकलं खलु किन्तु किञ्च- १०/३
सकललक्षणशिक्षणमूलभूः ३/५२
सकललोकमनोनयनोत्सवः ३/२८
सकलशब्दमयी च सरस्वती ३/१८
सकलसमयिहस्ताम्भोजबन्धा- १०/४४
सकलाङ्गयुतावभातशाखः १३/४८
सकलावयवान् स्फुटं मिमानाः १३/३६
सकलास्तकलङ्ककालिम- ७/३८
स कृष्णवर्त्मा विजयेन १/४१
स ग्रामं परमपि यात उच्चभूतिं १६/४१
सङ्ख्या मां पूरणी मा गात् १५/१०२
सङ्गृह्य प्रसभरसादपि प्रयत्नौ १६/२९
सङ्घातैरधिकघनैरलङ्कृताध्वा १६/१०
सङ्क्षिप्तवाक्ये मयि मन्दबुद्धौ १/६
सङ्क्षोभी घनघनघोषघोरवेषः १६/१३
सच्चतुर्भुजा वनजपत्रदृशो ११/२१
स च नावयवी निरूप्यते चेद् १३/५८
स चित्ताविषयत्वाद्वा १५/११३
स चिन्तयन् पुत्रमनोरथं शुचा ४/१९
सजगद्विसप्तकतनूदरकं ११/६७
स जगाम मातृजनतुष्टये किल ८/२७
स जननीसहितो जनकं गृहे ३/२६
स जातकोपाकुलितो धरासुरो ४/२०
सज्जनान् सह महादरेण नून् ९/३९
सज्जनैः कतिपयैरतिदीनै- ६/२८
सज्ज्ञानायाऽनन्दविज्ञानमूर्ती ७/५९
सञ्चरन्नञ्चनीयः कदाचिद्- १०/८
सञ्चरन् विदधदाप नराणां ६/३७
सञ्चोदयतूपण्डितमण्डलाढ्यं १०/३२

सततं गळता स्वतः श्रुति- ७/३७
सततमनिमिषं सन्दृश्य सानन्द- १४/४५
स तत्र हन्तैकतमे स्थितं त्यजन् ४/५२
सतां गुरुः कारणमानुषाकृति- ४/१४
स तासुतासु प्रतिभातिभासुरो- ५/४५
सति जातवति व्यजायत ७/२०
सत्त्वानि पुंसां भयदानि नाशं १/३८
स त्यजन् साहसी तच्च १५/१०७
सत्यात्माद्यैरिह परिवृतो भावि- १०/४९
सत्योच्छेदे सेच्छापातं १०/२३
सत्यं सत्यं व्यावहार्यं विधत्ते १२/६
सत्सूत्रभावे प्रविचारिते पृथग्- ५/१८
सत्सूत्रेष्वितिहासनन्दकचणो- १२/५३
सत्स्वपीन्द्रादिषु पुरा १५/८६
स ददधिकबोधः षोडशात्रोपचा- १४/३६
स दान्तिभक्तिमाधुर्य- १५/१००
सदा प्रसन्नस्य हरेः प्रसत्तये ४/३१
सदा सकलसच्छास्त्र- १५/१३३
सदा समस्ताश्रमभाक् सुरेश्वरो- ४/३०
स दारितारिं परमं पुमांसं १/२०
सदाक्ष्यमाक्षिप्तसमस्तपक्षको- १०/४२
सद्गुरोर्न विरहं सहमानः ६/५०
सद्ददादद-सुशंसननिन्दा- ६/१३
सद्यो माद्यद्वादिदन्तीन्द्रभीमे १२/१
सद्वीपवारिनिधिसप्तकभूतधात्र्या- २/९
स धार्तराष्ट्रान् बहुहेतिलीलो- १/४२
सनवावरणाण्डदर्शिनो- ७/४७
सनिरासमयेऽसमये स्थितियुक् १०/४५
स निरीक्ष्य पराशरात्मजः ७/५१
स निहत्य विश्वभयदं सुदुस्सहं ८/२८
सन्तः प्रीतिमसन्तोऽन्यां १५/७१
सन्तुष्यतां सकलसन्निकरैरसद्भिः २/२६
सन्नाम शिवनामकीर्तनं ९/२९
सन्नामं विपुलहृदे विधाय भक्त्या १६/१९
सन्निर्णीतं गुण्यलं शब्दभेदै- १२/५०
सन्न्यायरत्नावळि- १५/१२५
सन्मात्सर्यं बद्धमूचेऽशुभानां १२/३
सपटखण्डमकिञ्चनवत् क्वचित् ३/३७
सपदि दद्दशुरेके वाचनीयादि- १४/२१
सपदि समस्कुरुत भृशं १०/१
सपदि सुविवृतानामन्तरर्थान् धियां १४/१९
स पद्मनाभतीर्थाख्यः १५/१२०
सप्ताष्टानि दिनान्येवं १५/६९
स प्रयुज्य निशिता निशातधी- ९/४९
सबहुमति तदाद्यप्यार्धरात्रात् १४/९
सभ्यः सभायां यो वेदं १५/१२६
समग्रधीर्मण्डितविष्णुमङ्गलं ५/३०
समतीतपर्वतपुरोगदुर्गमः ८/२८
समतीतविद्रुमभुवां सुदृशां ११/३०
समदर्शयदूर्ध्वमोरसोऽसौ १३/३७
समधिकधिषणस्य प्रेक्षमाणो १४/३१
स मनोनयनैः पुरा गत- ७/४८
सममुल्लसन् कमलयैव केवलं ८/१०
समयगुणविशेषालोचकैर्लाळनीयः १४/३४
समयमुपनतं संवेदयन्तो वयस्या- १४/१७
समयापेक्षयोर्वीक्षो- १५/९३
समयार्थी स्मरन् ज्येष्ठं १५/९४
समयेन गतोऽमहीयसाऽसौ १३/९
समयेन भूरिनिजभक्तिपूरितान् ८/३६
समर्प्य कृत्यानि कृती कृतानि १/३३
समवायः कश्चिदीशे १५/२०
समस्तवादीन्द्रगजप्रभङ्गद- ५/८
समस्तशक्तिं न युनक्ति यः स्वा- १०/३८
समागमन् श्रोतुममुष्य साग्रहा- ४/४८

समाधिमाधिशमनं १५/११०
समानया यानमास १०/४८
समुचितग्रहयोगगुणान्वितं ३/३२
समुचितं चरितं महतामिदं ३/४०
समुचिताचरणे चतुरं स्वतः ३/३६
समुद्रसेतौ च निमज्ज्य विष्णवे ५/४२
समुपास्य विप्रगुरुमब्जभूगुरुः ८/२५
सम्पूर्णलक्षणचणं नवराजमान- २/२५
सम्पूर्ण शशिनमिवोदितं कृशः श्वा १६/४६
सम्प्राप्तस्तत उत यान्तमीक्षमाणः १६/३९
सम्प्राप्तानां मानभङ्गाय कार्यं १२/२४
सम्प्राप्तं सह सहजेन गण्डवाटं १६/२५
सम्भूयामी चोळजद्वीपिपुर्योः १२/२
सम्मोदात् तरळतरो द्रुताभिगामी १६/१४
सयाचनं वाक्यमुदीर्य तांविदं ४/१६
स युक्तिनखरैः खरैः मुखर- १२/५१
संयम्यान्तर्यन्तृकामेन हास्यं १२/४३
सरस्वतीर्वृत्तिकरीः शरीरिणा- ९/५३
स राजकेळ्युरुकदळीसहस्रकं १०/५१
स रूप्यपीठालयवासिने यदा ४/३७
सर्वज्ञमन्यमनवेक्ष्य स कार्यवीर्यं २/२
सर्वज्ञस्याज्ञतां वेदः १५/१८
सर्वज्ञोऽप्ययमधिकं न यज्ञभङ्गी १६/४२
सर्वज्ञं सपरिजनं समीक्षमाणाः १६/१२
सर्वदा सदसि सर्वबुधानां ६/२१
सर्वधर्मपरिशिक्षणदक्षां ६/२६
सर्ववित् त्वमसि मुख्यतः कवे ९/१६
सर्वविन्निर्मितं सर्वं १५/१२
सर्वाधारं ब्रह्मसञ्ज्ञं विहायो- १२/५०
सर्वे दुर्वादिदुर्वाद- १५/१३३
सर्वे सौम्या जिष्णुजिज्ञासयाऽमी १२/३७
सवने विकस्वरगुणस्वरद्विजे ८/२३
स वादिसिंहस्य गिरं गरीयसी- ५/११
सविकासदृशां कृताञ्जलीनां १३/३८
सवितानप्रकाशार्था १५/६
स विपिने विजने मुखवायुना ३/५३
सविलासलास्यपरितुष्टदृशो- ११/२६
स व्याख्यास्वरदमनाय पूर्ववाटो- १६/३१
स व्याचख्यावुक्तनैरुक्तमार्गो- १२/३५
स व्रजन्नुदलसज्जगदीशः १०/१३
स शङ्करपदद्विजोपहृतमाप्य १०/५२
स शनकैर्बलिनोऽयुगपद् गतान् ३/४७
स सङ्कराख्योऽङ्कितळेषु जज्ञे १/४७
स समलाळ्यत विस्मयिभिर्नरै- ३/२५
स ससर्ज सदध्वगोपकृत्यै १३/४८
ससोदरोऽथाऽदित राजहंसः १/३४
संसाधितार्थे भगवत्ययुक्तिवित् १०/४३
सह कैश्चन भूसुरैरवाप्त- १३/२२
सहचरपरिक्लृप्ते सूक्ष्मवस्त्रास्तृतेऽसौ १४/४०
सहजविजयतोऽयुग्विक्रमार्यः १४/३
सहजान्वितः सकलमित्रसंयुतो- ८/२४
सह भार्ययाऽपि शुभया महाजय- ८/२७
सहभोगमनन्यलभ्यमस्मै ९/५४
सहसोदहरन् स्वयोग्यमुद्रा- १३/११
स हन्ताऽपतितं दुःखम् १५/१९
सहितं समादिपदताननगैः ११/३८
साकं सुतेन परिवारजनान्वितोऽसौ २/३२
साङ्गवेदचतुरा इतिहासे ६/९
साधयत् सकलदोषवर्जितं ९/८
साधुपान्थपरितापमपास्य- ६/३४
साधुभ्यो मधुमथनाङ्घ्रिभक्ति- १६/१
सानुगो विविधभूरतीत्य ९/१४
सानुनीतिरथ नीतिमानयं ९/३३
साम्नाय्यमव्यक्तहृदाखुभुग्वा १/४८

सा बालकं प्ररुदितं परिसान्त्वयन्ती २/३६
सासूया भूभूषणे वासुदेवे १२/२
साक्षादथोपनिषदो विभुरैतरेय्याः ३/५५
साक्षादप्यमरवरैरुदीर्यमाणा १६/४९
साक्षादमानवनवाकृतितः स लेभे २/५२
साक्षान्महाभागवतप्रबर्हं १/१०
सितसौधसन्ततिरुचा स्फुरिता ११/९
सिद्धसाधनता हेतो- १५/५७
सुकुमारतळाङ्गुलीमतोः ७/२८
सुखसंविदात्मकतया वपुषां ११/६१
सुग्रीवमित्रं स जगत्पवित्रं १/११
सुजनाय दत्तपद आत्मशुद्धिदः ८/३८
सुजनैस्तरसाऽभिगम्यमानः १३/४
सुतपोरुचेरयमपापकर्दमा- ८/३६
सुतपःकवितादिसद्गुणानां १३/४३
सुतस्य कौपीनधृतौ हि साहस- ४/२०
सुतं यतीन्द्रानुचरं विरागिणं ४/१५
सुन्दरेषु सुरमन्दिरवृन्दे- ६/२३
सुन्दरं स इह सन्न्यधापयद्- ९/४३
सुबृहत्पयोधरमिथःप्रसंहति- ८/३७
सुभक्तिना तेन स भक्तवत्सलो- ४/१३
सुमनोनिकरेण पूरितं ७/४
सुमनःफलशोभिनोऽत्र पुंसो- १३/५
सुमुख मे पुरुषैः परुषैः कथं १०/१५
सुमुखी सुलक्ष्यभुजमूलवलिः ११/५४
सुरभिं सुवर्णमथ वर्णक- ११/५०
सुरवरप्रमदा अपि सप्रिया- ३/३३
सुरवर्यकराग्रसेव्यजङ्घं १३/२९
सुराद्या नरान्ता मुकुन्दप्रसा- ११/७७
सुरुचिरद्युतीर्दधति सूक्ष्मतरं ११/२९
सुलतालयेषु परिरभ्य रतिं ११/४८
सुवत्सलौ रूप्यतळालयस्थितं ४/१५
सुविडम्बितकम्बुरीक्ष्यते ७/३७
सुविशेषशेषवदशेषवर्णित- ८/२
सुस्मितेन्दुमरविन्दलोचनं ५/५१
सुहयमेधगणातिशयालवो- ३/६
सुहसितकमलाकरोपगूढं ६/५६
सुहुतमतिसृजन्तोऽग्न्याहितास्ते १४/५०
सूत्रदीप्तमणिमालिकयाऽलं ६/२४
सूत्रस्यन्दनवृन्दाढ्या १५/५
सूत्रार्थविच्चेत् कुरु भाष्यमञ्जसे- ५/२५
सूपपत्तिमहापत्तिः १५/५
सृजति प्रपालयति हन्ति सन्ततं ८/१२
सृष्टावीशानपेक्षायां १५/११
सृष्टित्वात् पटसृष्टिर्वे- १५/१०
सेना सेनाग्रहा दिव्या १५/३
सेवाप्रसन्नोऽमृतकल्पवाचा १/२३
सोऽङ्गीकरोति चेत् सत्त्वं १५/४०
सोऽदेहश्चेदनिच्छादि- १५/५३
सोऽपृच्छत्तमथ महाह्वयोपसर्गाः १६/४५
सौख्यतीर्थकविलोकनायको- ९/१
सौन्दर्यसारैकरसं रमापते ११/७३
सौमेरवं गौरवमावहन्ति १०/४०
स्तन्यं मुहुः किल ददौ जननी २/४२
स्तन्येन बालमनुतोष्य मुहुः २/३५
स्तोकमानसतया ततो व्रजेत् ९/२४
स्थलजजलजवल्लीवृक्षवीरुत्सम- १४/३५
स्थेयसो भिषगिवास्य हृद्गतं ९/३४
स्नात्वाऽत्र तीर्थेष्वचिरेण कन्यका- ५/४२
स्पर्शनाद् भगवतोऽतिपावनात् ९/४२
स्पृष्टैव यं प्रीतिमताऽनिलेन १/२८
स्फिग्दूषणानि प्रतिपादयत्यलं ५/४१
स्फुटमुदयति तेजस्व्युज्ज्वले १४/१
स्फुरन्नसौ वैरिभयङ्करोऽभूत् १/१४
स्फुरितामिह प्रियतमां निजश्रियं ८/३०

स्मरन् मुरारेराकारं	१५/११०
स्मितनयनविकासैस्तस्य विज्ञात-	१४/४१
स्मितफुल्लमुल्लसितझिल्लिलसन्-	११/५६
स्मितमाधवीकुसुमरम्यतरौ	११/३९
स्मितया नगोत्तमशिरस्सुजातया	१४/५३
स्मितरुचिरमुखेन्दुः स्निग्धकौशेय-	१४/३८
स्मित्वाऽर्भकोऽभिमतनिष्कपदे	२/५१
स्मृतिकीर्तनप्रणतिभिर्विमुक्तये	८/१३
स्यात् तथेत्थमपि सम्भविताऽर्थ-	६/४
स्वकृतोर्वनुग्रहबलादमुष्य तां	८/५
स्वगतिसमुचितानां भूतिदायी	१४/६
स्वगुरौ परिहर्तुमक्षमेऽपि	१३/४९
स्वजनतापगमागमसङ्गम-	३/२
स्वजनतारहितस्य तु कोऽत्र ते	३/११
स्वतेजसा विस्मितभूपनुन्नैः	१०/३१
स्वपदमाव्रजतो व्रजतोऽप्यतो	३/१२
स्वप्ने स्वप्रेरितान्यस्थलगनिजन-	१०/५०
स्वफलं तु मुक्तिपदमुक्तिपदं	११/६
स्वमपि प्रतिचोदयन्तमूचे	१०/४
स्वमातुलेयं कमलायताक्षं	१/३५
स्वयमपि नयति द्रागङ्गवस्त्रादि	१४/१०
स्वयमिन्दिरैव पतिमानकरी	११/१६
स्वरमचरमकाले मन्द्रमेवात्यज-	१४/२४
स्वरिपुं क्षणेन सरसः स्फुरत्तनुं	८/१६
स्वरूपं च निरस्येत	१५/५१
स्वव्याहत्यादिनोपेक्ष्या	१५/४८
स्वशिष्यहस्तेन मठान्तरेषुधैः	५/९
स्वसामर्थ्येन तेनैव	१५/५०
स्वसूत्रजातस्य विरुद्धभाषी	१/५३
स्वहेळया पातितपार्थिवव्रजां	५/३५
स्वानन्दविषये मोक्षे	१५/६२
स्वानन्दहेतौ भजतां जनानां	१/२७
स्वानां चेतो नन्दयन् मन्दचेताः	१२/१७
स्वाभिप्रायो ब्रह्मवत् स्यादवाच्यो-	१२/२३
स्वाश्चर्यरत्ने मग्नात्मा	१५/१११
स्वाश्रमोपगमनाय मुकुन्दो-	६/४५
स्विन्नेऽस्मिन्नपि यतमान आग्रहोग्रे	१६/३२
ह	
हरिगुरुनमनं द्राग् यत्नतोऽमी	१४/२१
हरिणीदृशां निवसनानि बृहत्-	११/३१
हरितामधीशनरदेवमण्डलं	८/३०
हरितिग्मचक्रलसितोऽब्धिमध्यगं	८/३२
हरिधाम्नि दम्पतिगणस्य ततो	११/६१
हरिनीलगिरीन्द्रमस्तक-	७/४४
हरिनीलनीलरुचयोऽत्र पराः	११/२८
हरिपादसरोजसङ्गसारो-	१३/७
हरिस्वसा नन्वचिरादसद्भिदे	४/३
हर्यंशोऽयं तं न चक्षाम भूय-	१२/४४
हसतः सितदन्तसन्ततिः	७/३९
हसितप्रसूननिकरोरुभर-	११/३७
हसिताननेन्दुमरविन्ददृशं	११/१८
हसितावलोकललितैरतुलै-	११/६४
हारावळीमिव हृदा विबुधेन्द्रयाच्ञां	२/४
हास्योऽत्राभूद् वासुदेवप्रभार्थी	१२/३९
हिमवर्षरविप्रभासहाः	७/२
हिमशीतवर्षपरितापपुर-	११/४४
हृदये कृतसज्जनोदये	७/३३
हृदोरुसौहार्दभृताऽधिमौलि	१/२३
हेतुवादिनि विशङ्कटबुद्धौ	६/३३
हेतोः कुतश्चिद् विमनीकृतोऽप्यहो	५/२३

हेतोरतिव्याप्तिरवादि तै- ५/६
हेमाद्रिराजविभुराजदिळावृताभ- २/१०
हंसराट् कलिमलं निराकरो- ९/३५
हंसानां नो वाग्विघातप्रवीणाः १२/१५

क्ष

क्षणदामिह तावदूषिवांसं १३/१०
क्षणदासु विचक्षणः स वीक्ष्य १३/६७
क्षणमामुकुलीकृतेक्षणः ७/४९
क्षणेन कौपीनधरो निजं पटं ४/२१
क्षपयन्तमुद्यतसुबाहुमाहवे ८/२२
क्षपित-तत-तमस्का भास्करीव ४/५४
क्षाम्य सौम्य सकलज्ञ नमस्ते ६/१०
क्षितिसुराङ्घ्रचभिवन्दनपूर्वकं ३/४१
क्षिप तं त्वमुदारयुक्तिशूरो- १३/६२
क्षेत्राग्र्यं त्रिभुवनवैद्यनाथनाथं १६/४०
क्षेत्रं स पाजकपदं त्रिकुलैककेतुः २/११

—०—

इतः परं प्रकटनाय सिद्धाः संशोधिताः संस्कृतग्रन्थाः

*

१. **महाभारततात्पर्यम्**

नरहरितीर्थकृतया टीकया सहितम्।

२. **विष्णुतत्वनिर्णयः**

पद्मनाभतीर्थकृतया
नारायणपण्डिताचार्यकृतया च
टीकया सहितः।

३. **तलवकारोपनिषद्भाष्यम्**

४. **काठकोपनिषद्भाष्यम्**

५. **आथर्वणोपनिषद्भाष्यम्**

६. **षट्प्रश्नोपनिषद्भाष्यम्**

७. **याज्ञीयमन्त्रव्याख्यानम्**

८. **माण्डूकोपनिषद्भाष्यम्**

षडपीमान्यानन्दतीर्थभगवत्पादभाष्याणि
त्रैविक्रमार्यदासप्रणीताभिरपूर्वाभिष्टीकाभिः सहितानि।